










२०८

शब्द कल्पद्रुम




२०६

शब्दकल्पद्रुम






206



206





अथ

कल्पद्रुमो मुद्र्यते

अऋणी

अ अकारः। आद्य स्वर वर्णः
अस्योच्चारण स्थानं कंठः सच
ह्रस्वो दीर्घः प्लुतश्च भवति
इति व्याकरणं अस्य तत्वं
यथा। शृणु तत्वं अकारस्य
अतिगोप्यं वरानने शरच्चंद्र
प्रतीकाशं पंचकोणमयंसदा
पंच देव मयं वर्णं शक्ति त्रय
समन्वितं। निर्गुणं त्रिगुणोपेतं
स्वयंकैवल्य मूर्तिमान॥ बिंदुतत्व
मयं वर्णं स्वयं प्रकृति रूपिणी
इति कामधेनुतंत्रम्॥
अ वा अभावः॥ अल्पः॥निषेधः
अनुकंपा॥ इति मेदिनी॥
अः पुं विष्णुः॥ इतिमेदिनी॥
अऋणीन त्रि अनृणी।अऋणग्रस्तः
अधारी। यथा।दिवसस्याष्टमे
भागे शाकं पचति यो नरः।
अऋणी चाप्रवासी च सवारिचर

अंशु


मोदते इति महाभारतं
अंश त् क विभाजने अंश
करणे॥ इतिकविकल्पद्रुमः
अंशः पुं विभाजनं।तत् पर्यायः
भागः २ वंटकः ३। इत्यमरः
विभागः ४ भक्तिः ५ । इति
जटाधरः। अंशसहोदन्त्यसोनोपि
अंशसतक विभाजने इति
कविकल्पद्रुम दर्शनात्॥ स्कंधःइति
विद्याविनोदादयः॥
अंशकः पुं ज्ञातिः। दायादः॥
इति त्रिकांडशेषः॥
अंशकं क्ली दिने॥ इति
त्रिकांडशेषः॥
अंशलः त्रि अंसलः। बलवान्॥
इत्यमरटीकायांरमानाथः॥
अंशीन त्रि अंशयोग्यः वंटक
विग्राहः। भागी॥
अंशुः पुं किरणः॥ प्रभा॥ इति

मेदिनी। वेशः॥ इति धरणी
सूत्रादिसंप्लेषः॥ इतिहेमचंद्रः
॥ लेशः॥सूर्य्यः॥ इतिविश्वः
अंशुकं क्ली वस्त्रमात्रे॥सूक्ष्मवस्त्रे
॥ उत्तरीयवस्त्रे॥ इति मेदिनी
॥शुक्लवस्त्रे॥ इत्यमरटीकायां
रमानाथः॥ पत्रे। तेजपातहेति
भाषा। इति राजनिर्घंटः ॥
अंशुधरः पुं सूर्य्यः॥ इति
त्रिकांडशेषः ॥
अंशुमतूकला स्त्री कदलीवृक्षः
इत्यमरः ॥
अंशुमती स्त्री सालपर्णीवृक्षः
इत्यमरः ॥
अंशुमान् पुं सूर्य्यः॥ इति
त्रिकांडशेषः ॥ असमञ्जःपुत्र
सूर्य्यवंशीयराजविशेषः॥इति
पुराणे॥ अंशुयुक्तेत्रि ॥
अंशुमाली न पुं सूर्य्यः॥ इति
त्रिकांडशेषः ॥
अंशुलः पुं चाणक्यमुनिः॥इति
त्रिकांडशेषः ॥
अंशुहस्तः पुं सूर्य्यः ॥ इति
जटाधरः ॥
अंस त्‌ क विभाजने। अंश
करणे॥ इति कविकल्पद्रुमः॥
अंसः पुं क्ली स्कंधः॥इत्यमरः

॥ विभागे पुं॥ इति विश्वः
हेमचंद्रश्च ॥
अंसकूटः पुं ककुद्।षांडेरकूटे
इति भाषा। इतिहेमचंद्रः ॥
अंसलः त्रि बलवान्॥इत्यमरः
अंहः स क्ली पापं॥ इत्यमरः ॥
अंहतिः स्त्री दाने॥ इत्यमरः ॥
रोगः॥ त्यागः॥इतिमेदिनी ॥
अंहती स्त्री दाने ॥ इत्यमर
टीका सारसुंदरी ॥
अंहितिः स्त्री दाने॥ इत्यमर[illegible]
टीकायां रायमुकुटः ॥
अंह्रिः पुं पादः॥वृक्ष मूले
इत्यमरः ॥
अंह्रिपः पुं वृक्षः ॥ इति
हलायुधः ॥
अंह्रिस्कंधः पु गुल्फः॥इति
हेमचंद्रः ॥
अक म वक्रगतौ।कुटिलगमने
इतिकविकल्पद्रुमः ॥
अक [illegible] इ उ गत्यां॥लक्षणे॥
इतिकविकल्पद्रुमः ॥
अक इ क लक्ष्मणि।चिह्नकरणे॥
इतिकविकल्पद्रुमः ॥
अकं क्ली पापं दुःखं ॥ इति
मेदिनी ॥
अकचः पुं केशग्रहः ॥ इति

हारावली ॥ वाच्यलिंगस्तु केशशून्ये
अकथ्यः त्रि अकथनीयः ।
अवक्तव्यः ॥
अकनिष्टः पुं बुद्धः ॥ इति
शब्दरत्नावली ॥ कनिष्टभिन्ने
वाच्यलिंगः ॥
अकनिष्ठगः पुं बुद्धः॥ इति
त्रिकांडशेषः ॥
अकंपितः पुं बौद्धगणाधिप
विशेषः॥ इति हेमचंद्रः॥कम्प
रहिते वाच्यलिङ्गः ॥
अकरणिः स्त्री आक्रोशविशेषः
। शापः। यथा।तस्याकरणिरेवास्तु
॥ इत्यमरः ॥
अकरा स्त्री आमलकी॥इति
शब्दचंद्रिका ॥ वाच्यलिङ्गस्तु
कररहिते ॥
अकरुणः त्रि करुणाशून्यः।
निर्दयः। अकृपः।यथा।रेत्रोर्वंशे
कृतसामकरुणसमुत्सारयतिकः
इतिमहानाटके ॥
अकर्कशः त्रि कार्कशरहितः
कोमलः॥ इतिहेमचंद्रः ॥
अकर्णः त्रि कर्णरहितः।वधिरः
इतिहेमचंद्रः ॥
अकर्त्तनः पुं वामनः।खर्व्वः
इति जटाधरः ॥

अकर्त्तव्य त्रि अकरणीये ।
अकरणार्हे । अकार्य्ये ॥
अकर्म्मण्यः त्रि कर्म्मायोग्यः ।
क्रियानर्हः निष्कर्म्मण्यः।अकेजुया
इति भाषा। यथा अकर्म्मण्ये
तिथिमले ॥ इति स्मृतिः ॥
अकर्म्मान त्रि कार्य्याक्षमः।निष्कर्म्मा
। कार्य्यानुपयुक्तः ॥
अकर्म्मान्वितः त्रि निष्कर्म्मान्वितः
अकर्म्मविशिष्टः।दुष्कर्म्मयुक्तः॥
अकल्कनः त्रि दम्भरहितः ॥
तत् पर्य्यायः। वीतदम्भः २।इति
हेमचंद्रः॥अकल्कल इत्यपिपाठः॥
अकल्का स्त्री ज्योत्स्ना ॥इति
शब्दचंद्रिका ॥ वाच्यलिङ्गस्तु कल्क
रहिते
अकल्पितः त्रि कल्पनारहितः।
अकाल्पनिकः । अकृत्रिमः ।
अरचितः ॥
अकल्यः त्रि रोगी ॥ कल्यो
निरामयः तत्र नञ्समासः॥
अकल्याणं क्ली अमंगले।अशुभे ॥
अकस्मात् व्य अतर्किते।हठात्
तत्पर्य्यायः। सहसा २ सद्यः ३
सपदि ४ तत्क्षणे ५ एकपदे ६
। इतिहेमचंद्रः॥नञ्समस्त
किमशब्दस्यपंचमस्तप्रयोगोयं॥



इति केचित् ॥

अकारणं क्ली कारणशून्य:। निर्हेतु। अनिमित्तं। यथा। कुत: पुन: शश्वदभद्रमीश्वरेनवार्पितं कर्म यदप्यकारणं ॥ इति श्रीभागवते ॥

अकारणगुणोत्पन्नगुण: पुं स्वाभाविकगुण:। न्यायमते विभुनिष्ठ विशेषगुणा: यथा। बुद्धि: १ सुखं २ दु:खं ३ इच्छा ४ द्वेष: ५ यत्न: ६ धर्म्म: ७ अधर्म्म: ८ भावना ९ शब्द: १० इति सिद्धान्तमुक्तावली।

अकार्य्यं क्ली कार्य्यभाव:। अकृत्यं। अकर्म्म। यथा। किमकार्य्यं कदर्य्याणां दुस्त्यजं किं धृतात्मनां ॥ इति श्रीभागवते ॥

अकाल: पुं असमय:। अप्रशस्तकाल:। यथा। योग्यकालातिरिक्तसमय: ॥ अशुद्धकाल:। यथा गुरोरस्तात् प्राक् वृद्धत्वे पंचदशाह:। तस्यास्ते द्वात्रिंशत् दिने। तस्योदयात् परं बालत्वे पंचदशाह:। गुर्वादित्ययोगे स्थितिकाल: दश त्रिंशत् दिनादि:। सिंहे गुरो: स्थिति काल: (दि संवत्सरस्थूल:। अस्य विशेष: यथा माघ पौर्णमास्यां मघा नक्षत्रं प्राप्यते तदैवं भाव्यं। वक्रिगुरौ अष्टाविंशति दिने। पूर्वराशावनागतातिचारि गुरौ एकवर्ष:। अयमेव लुप्त। पूर्वराशिगातिचारे गुरौ पंचचत्वारिंशत् दिने। नीचस्थ गुरो: स्थितिकाल: संवत्सरस्थूल: राहुग्रस्तगुरो: स्थितिसमय: एकाह: स्यात् ॥ भृगोर्महास्तात् प्राक् वृद्धत्वे पंचदशाह:। तस्य महास्ते द्विसप्तति दिने। तस्योदयात् परं बालत्वे दशाह: एतत् त्रयं स्वल्पीयास्तमुच्यते ॥ भृगो: पादास्तात् प्राक् वृद्धत्वे दशाह:। तस्य पादास्ते द्वादशाह: तस्योदयात् परं बालत्वे दिनत्रयं। एतत् त्रयं वक्रास्तमुदितं ॥ मलमासे मासमेकं ॥ भानुलङ्घित मासे क्षय मासे च तदेव ॥ भूकम्पाद्यद्भुते सप्ताह: ॥ पौषादि चतुर्मासे एकदिनवर्षणाङ्कितवर्षणे तद्दिनं। दिन द्वय वर्षणाङ्कित वर्षणे दिनत्रयं। दिनत्रयवर्षणांकित वर्षणे सप्ताह: ॥ दक्षिणायने वर्षासा: ॥ श्रीहरिशयने चतुर्मास: चंद्रसूर्य्यग्रहणे कर्म्मविशेष एकत्रिसप्तदिनानि ॥ इति

ज्योतिषतत्त्वं ॥

अकालज: त्रि अकालजात:। असमयोत्पन्न:। अपूर्णकालोद्भव:। यथा। अकालजन्म विरसेनयात्वे गुणवतस्तते ॥ इति राजवल्लभ:

अकालजलदोदय: पुं कुज्झटी। इति शब्दमाला ॥ अकाले मेघानामुदय: ॥

अकालमेघोदय: पुं कुज्झटी ॥ इति शब्दमाला ॥ अकाले। मेघानामुदय: ॥

अकिञ्चन: त्रि दरिद्र:। नास्ति किञ्चिदपि यस्य ॥ इति हेमचन्द्र:

अकिञ्चनता स्त्री अकिञ्चनस्य भाव: सान्त परिग्रहत्याग रूपो यम विशेष:। इति हेमचन्द्र: ॥

अकिल्बिष: त्रि किल्बिषशून्य: पापरहित:। यथा। न मां दोषेण सुग्रीव गन्तुमर्हस्य किल्बिष। इति रामायणे ॥

अकुतोभय: त्रि नास्ति कस्माद्भयं यस्य। निर्भय:। यथा। इकुतामकुतो भयमिति भक्तिरसामृतसिन्धु: ॥

अकुप्यं क्ली स्वर्णं ॥ रूप्यं ॥ इति हलायुध: ॥

अकूपार: पुं समुद्र: ॥ इत्यमर: ॥ कूर्म्मराज: ॥ पाषाणादि: ॥ इति मेदिनी ॥ कमठ: ॥ इति त्रिकाण्डशेष: ॥

अकूर्द्ध: पुं वृद्ध: ॥ इति त्रिकाण्डशेष: ॥ कैतवशून्ये त्रि ॥

अकृत त्रि न कृते। अनिष्पादिते। यथा। कालातीतेषु यत् कुर्यात् कृतं तन्न हि निर्दिशेत् ॥ इति स्मृति:

अकृतज्ञ: त्रि कृतघ्न:। हितास्मर्ता उपकारामानी। उपकारहन्ता। यथा। भजतोऽपि न वै केचिद्भजन्त्य ऽभजत: कुत:। आत्मारामा: पूर्णकामा अकृतज्ञा गुरुद्रुह: ॥ इति श्रीभागवते ॥

अकृतित्वं क्ली अक्षमता। अपटुता। कर्म्माकुशलत्वं। अयोग्यत्वं ॥

अकृतीन त्रि कर्म्माक्षम:। कार्य्याकुशल:। क्रियानुपयुक्त:

अकृत्रिम त्रि अकरणज। अजन्य। सिद्ध ॥

अकृप: त्रि कृपाशून्य:। निर्दय:। अकरुण:। यथा। वनजो वनजो ह्रस्वशिरामो सकूपो ऽकृप: ॥ इत्यनुष्टुवाचार्य्य: ॥

अकृपण: त्रि कार्पण्यरहित: दीनताशून्य:। यथा। महद्वा व्यसनं प्राप्तो दीन: कृपण उच्यते। कुले एकुपणो राम संभूत: सर्वकामदे

। इति रामायणं ॥

अक्लिष्टकर्मा न त्रि दुष्कर्मरहितः निष्पापः। शुद्धाचारः अकल्मषं निष्पापत्वात् अक्लिष्टकर्म्मास्य इत्यमरटीकायां भरतः ॥

अकेशः त्रि केशरहितः॥अल्पकेशः॥अप्रशस्तकेशविशिष्टः

अकैतवं क्ली कैतवाभावः। अकपटता। अधूर्त्तता। अवञ्चना

अकोटः पुं गुवाकः ॥ इति त्रिकांडशेषः ॥

अकोविदः त्रि अपंडितः । मूर्खः ॥

अकौटिल्यं क्ली कौटिल्याभावः । सरलता ॥

अक्का स्त्री माता। इति शब्दरत्नावली

अक्तः त्रि युक्तः॥गतः॥व्यक्तः

अञ्ज व्यक्ति गति म्रक्षणे इत्यस्मात् कर्म्मणि क्तः॥यथा। स्थालान्तरे पूर्व्वं तैलाक्ते स्वेद इष्यते। इति चंद्रदत्तः ॥

अक्तुः स्त्री रात्रिः॥वेदप्रयोगोयं ॥

अक्रमः त्रि क्रमरहितः ॥ व्यतिक्रमः। यथा। अक्रमाक्षेपर्व्हर्हि यो ऽभिवाञ्छति मूढधीः । इति माधवकरः ॥

अक्रांता स्त्री वृहती ॥ इति काचिद्रत्नमाला॥अनाक्रांते त्रि॥

अक्रियः त्रि अक्रियान्वितः । कुकर्म्मविशिष्टः॥क्रियारहितः॥यथा अक्रियत्वाच्च सर्व्वदा। इति चरकः॥

अक्रूरः पुं पाद्दिनीपुत्रः । श्रीकृष्णपितृव्यः॥तस्य पिता श्वफल्कः। इति श्रीभागवतं॥क्रूरताशून्ये त्रि ॥

अक्रोधः पुं क्रोधश्चित्तविकारः तद्विपरीतः। सत्त श्राद्ध्विणंदश धर्म्मांतर्गत धर्म्मः। इति जटाधरः वाच्यलिंगं क्रोधरहिते अक्रो ॥

अक्लांतः त्रि क्लांतिरहितः । अनवसन्नः । अग्लानः ॥

अक्लिका स्त्री नीलावृक्षः। इति शब्दचंद्रिका ॥

अक्लिष्टकर्म्मा त्रि अक्लेशेन कर्म्मकर्त्ता। यथा। हतोहं कोशलेंद्रस्य रामस्याक्लिष्टकर्म्मणः इति रामायणं ॥

अक्लेशः त्रि क्लेशशून्यः॥अनायासः अकष्टः॥क्लेशाभावे क्ली ॥

अखट्टः पुं प्रियालवृक्षः॥इति राजनिर्घंटः ॥

अखट्टिः पुं सद्यवहारः । अखट्टि इतिख्यातः ॥इति

त्रिकांडशेषः ॥

अखंडः त्रि खंडरहितः। पूर्णः॥ इत्यमरः ॥

अखंडनः पुं कालः ॥ इति शब्दचंद्रिका ॥

अखंडितर्त्तु त्रि सफलवृक्षादिः इति शब्दचंद्रिका ॥

अखाते क्ली पुं देवखाते । अकृत्रिम जलाशयः। इत्यमरः

अखात मितिस्वामी॥पुंक्लिय यथा आखातो देवखातक इत्यमर। दंतः ॥

अखाद्यं त्रि खादितुमनर्हं। अभक्ष्यं

अखिलं त्रि सर्व्वं इत्यमरः ॥

अख्यातः त्रि अख्यातिविशिष्टः अप्रतिष्ठितः ॥ अप्रसिद्धः ॥

अग म वक्रगतौ। कुटिलगमने इतिकविकल्पद्रुमः ॥

अग इ गतौ । इति कविकल्पद्रुमः ॥

अगः पुं पर्व्वतः ॥ वृक्षः॥सर्पः सूर्य्यः ॥ इति हेमचंद्रः ॥

अगच्छः पुं वृक्षः ॥ इति त्रिकांडशेषः ॥

अगजं क्ली शिलाजतु॥इति रत्नमाला ॥ पर्व्वतवृक्षजे त्रि॥

अगण्यं त्रि अगणनीयं॥अगणे

।अगणितव्यं । यथा। गुणैरगण्यैरिति शीलशालिभि रितितारविः॥

अगदः पुं औषधं। इत्यमरः॥ नीरोगे त्रि। इतिरमानाथः॥

अगदङ्कारः पुं वैद्यः॥इत्यमरः॥

अगमः पुं वृक्षः॥इत्यमरः ॥ पर्व्वतः। नगच्छतीत्यगमः ॥

अगम्यं त्रि अगन्तव्यं। अगमनीयं गमनायोग्यं। यथा। अगम्यसा भवत् तत्र यत्राभूत् स महारणः इतिदेवीमाहात्म्यं ॥


अगरी स्त्री देवताडवृक्षः ॥ इत्यमरटीकायां भरतः ॥

अगरु क्ली पुं अगुरु ॥ इति हेमचंद्रः ॥

अगस्तिः पुं वकवृक्षः॥अगस्त्य मुनिः ॥ इति मेदिनी ॥

अगस्तिद्रुः पुं वकपुष्पवृक्षः इति त्रिकांडशेषः ॥

अगस्त्यः पुं वकपुष्पवृक्षः॥इति राजनिर्घंटः ॥मित्रा वरुणयोः पुत्रः मुनिविशेषः॥तस्य पर्य्यायः। कुंभसंभवः २ मैत्रावरुणिः ३। इत्यमरः ॥अगस्तिः ४ पीताब्धिः ५ वातापिद्विट् ६ आग्नेयः ७ और्व्वशीयः ८ आग्निमारुतः ९ घटोद्भवः १०। इतिहेमचंद्रः ॥




अगाधः त्रि अतिगम्भीरः। अतल
स्पर्शः ॥ इत्यमरः
अगाधं क्ली छिद्रं॥ इतिमेदिनी॥
अगाधजलः पुं ह्रदः। इत्यमरः॥
अगारं क्ली आगारं । गृहं
इत्यमरटीकायां भरतः ॥
अगिरः पुं अग्निः ॥ सूर्य्यः
राक्षसः॥ इति जटाधरः ॥
अगुः पुं राहुग्रहः ॥ इति
दीपिका॥ किरण रहिते त्रि
अगुरु क्ली शिंशपावृक्षः [स्थ]
कालागुरु॥ स्वानाम प्रसिद्ध सुग
काष्ठविशेषः। अगर इतिख्यातः
अस्यपर्य्यायः। वंशिकं १
राजर्हं २ लोहं ३ कृमिजं ४
जोङ्गकं ५ इत्यमरः॥ भृंगजं ६
कृमि ७ लोहाख्यं ८ लघु ९
इतिरत्नमाला ॥ पीतकं १०
वर्णप्रसादनं ११ अनार्य्यकं १२
असारं १३ कृमिजग्धं १४ काष्ठकं
१५। इतिराजनिर्घंटः अस्यगुणाः
तिक्तत्वं। उष्णत्वं। कटुत्वं। लेपे
रूक्षत्वं। व्रण कफ वायुवान्ति
मुखरोग नाशित्वंच ॥ इति
राजवल्लभः राजनिर्घंटश्च॥ अ[गुरु]
वा पुंसीति वोपालितः। पुमान्
इति शब्दार्णवः ॥

अगुरुः त्रि गुरुभिन्नः। लघुः॥ इति
मेदिनी ॥
अगुरुशिंशपा मी शिंशपावृक्षः
इत्यमरटीकायां स्वामी ॥
अगूढगन्धं क्ली हिङ्गु॥ इति
राजनिर्घन्टः ॥
अगोचर त्रि इंद्रियजन्य
प्रत्यक्षाविषयः। अज्ञातः। यथा।
अगोचर हृत वाउ मृदितं
मांसमुतस्सृजेत्। इतिराजवल्लभः
अगोक[स]ः पुं शरभः॥ सिंहः॥
पक्षी ॥ इतिमेदिनी ॥
अग्नायी त्रि अग्निभार्य्या॥ इत्यमरः
॥ त्रेतायुगः ॥ इति जटाधरः॥
अग्निः पुं तेजः पदार्थ विशेषः
आगुन इति भाषा ।धर्मस्य
वसुभार्य्यायां जातः प्रथमोग्निः
तस्यपत्नीस्वाहा पुत्रास्त्रयः पावकः
१ पवमानः २ शुचिः ३ षष्ठमन्वन्तरे
अग्ने वंसोर्धरायां द्रविणकादयः
पुत्राः । एतेत्यः पंच
चत्वारिंशदग्नयो जाताः। सर्वे
मिलित्वा एकोन पंचाशदग्नयः
इतिपुराणं॥ अस्यपर्य्यायः।
वैश्वानरः १ वह्निः २ वीतिहोत्रः ३
धनञ्जयः ४ कृपीटयोनिः ५ ज्वलनः
६ जातवेदाः ७ तनूनपात् ८

तनूनपाः ९ वर्हिःशुष्मा १० वह्निः
११ शुष्मा १२ कृष्णवर्त्मा १३
शोचिष्केशः १४ उषर्बुधः १५
आश्रयाशः १६ आशयाशः १७
बृहद्भानुः १८ कृशानुः १९ पावकः
२० अनलः २१ रोहिताश्वः २२
वायुसखा २३ वायुसखः २४
शिखावान् २५ शिखी २६
आशुशुक्षणिः २७ हिरण्यरेताः
२८ हुतभुक् २९ हव्यभुक् ३०
दहनः ३१ हव्यवाहनः ३२ सप्तार्चिः
३३ दमुनाः ३४ दमूनाः ३५ शुक्रः
३६ चित्रभानुः ३७ विभावसुः ३८
शुचिः ३९ अप्पित्तं ४० । [४१]
सत्यनामल्लडीकाच॥ वृषाकपिः
जुहुवालः ४२ कपिलः ४३ पिंगल
४४ अरणिः ४५ अगिरः ४६ पावनः
४७ विश्वप्साः ४८ छागवाहनः
४९ केवार्चिः ५० जुहुवारः
५१ उदर्चिः ५२ भास्करः ५३ वसुः
५४ शुष्मः ५५ हिमाराति ५६
तमोनुत् ५७ सप्तशिखः ५८ सप्तजि[ह्वः]
५९ अपधारिकः ६० सर्वदेवमुखः
इतिजटाधरः॥ ॥ अस्यगुणाः
वायुकफस्तंभशीतकम्पनाशकत्वं
। आमाशयजनकत्वं। रक्तपित्त
प्रकोपकत्वंच इतिराजवल्लभः

अपिच। अग्नेर्दुर्ईक्षताज्योति ॥
स्तापः पाकः प्रकाशनः। शोको
रागो लघु तैक्ष्ण्यं सतत
श्चोर्द्धभासिता ॥ इतिमोक्षधर्मः
॥ ॥ अथ कर्मविशेषे
अग्नेर्नामानि। यथा। लौकिके
पावकोह्यग्निः प्रथमः परिकीर्तितः
१ लौकिकेनवगृहप्रवेशादौ ।
अग्नेस्तु मारुतोनाम गर्भाधाने
विधीयते २॥ पुंसवनेचंद्रनामा ३
शुङ्गाकर्मणि शोभनः ४ सीमन्ते
मंगलोनाम ५ प्रगल्भाजातकर्मणि
६॥ नाग्निस्यात् पार्थिवोह्यग्निः ७
प्राशनेच शुचिस्तथा ८ सत्यनामाथ
चूडायां ९ व्रतादेशे समुद्भवः १०
॥ व्रतादेशे उपनयने॥ गोदाने
सूर्य्यनामाच ११ केशान्तेह्यग्नि
रुच्यते १२ गोदानगोदानाख्य
संस्कारे। केशान्ते समावर्त्तने ।
वैश्वानरो विसर्गेतु १३ विवाहे
योजकः स्मृतः १४॥ विसर्गे साग्नि
कर्त्तव्याकर्म्मविशेषे॥ चतुर्थ्यान्तु
शिखीनाम १५ धृतिरग्निस्तथापरे
१६ चतुर्थ्यां विवाहान्ते चतुर्थी
होमे। अपरे धृतिर्होमादौ ।
प्रायश्चित्ते विधुश्चैव १७ पाक
यज्ञेतु साहसः १८ प्रायश्चित्ते



प्रायश्चित्तात्मक महाव्याहृति होमादौ ॥ पाकयज्ञे पावकः स्यात् ॥ लक्षहोमे च वह्निः स्यात् ॥ कोटिहोमे हुताशनः २० । पूर्णाहुत्यां मृडो नाम २१ शान्तिके वरदस्तथा २२ ॥ पौष्टिके बलदश्चैव २३ क्रोधाऽग्निश्चाभिचारिके २४ वश्यार्थे शमनो नाम २५ वरदाने ऽभिदूषकः २६ कोष्ठे तु जठरो नाम २७ क्रव्यादो मृतभक्षणे २८ इति गोभिलपुत्रकृत संग्रहः । ॥ ० ॥ अथ तस्य रूपं । यथा । पिङ्गभ्रूश्मश्रुकेशाक्षः पीनाङ्गजठरोऽरुणः । छागस्थः साक्षसूत्रोऽग्निः सप्तार्चिः शक्तिधारकः ॥ इत्यादित्यपुराणं ॥ । अथ होमीयाग्नेः शुभलक्षणानि यथा । अर्चिष्मान् पिण्डितशिखः सर्पिः काञ्चनसन्निभः । स्निग्धः प्रदक्षिणश्चैव वह्निः स्यात् कार्य्यसिद्धये ॥ इति वायुपुराणं ॥ ० ॥ वैद्यकमते अग्निस्त्रिधा भौमः १ दिव्यः २ उदर्य्यः ३ । तत्राद्यः काष्ठेन्धनप्रभवः ऊर्ध्वज्वलनस्वभावः पवनस्वेदादिसर्पणश्च द्वितीय उदकेन्धनः पर्य्यग् ज्वलनशीलो वाडवः । तृतीय उभयेन्धनः पर्य्यग् ज्वलनशीलः भुक्तस्याहारस्य रसादि परिणामनिमित्तञ्च विद्युदादिश्च इति विजयरक्षितोपरि सन्देहभञ्जिका ॥ ॥ अपि च मन्दः १ तीक्ष्णः २ अथ विषमः ३ समश्चेति चतुर्विधः ४ । कफपित्तानिलाधिक्यात् तत्साम्याज्जाठरोऽनलः ॥ तेषां कार्य्यं यथा । विषमो वातजान् रोगान् १ तीक्ष्णः पित्तनिमित्तजान् २ करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ३ समा समाग्ने । रक्षिता मात्रा सम्यग् विपच्यते ४ स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥ कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते ॥ इति माधवकरः ॥ अत्यन्ततीक्ष्णाग्निरेव हि भस्मक उच्यते । स तु आहाराभावे शोणितादीन् धातून् पाचयित्वा आशु मारयति ॥ इति रक्षितः ॥ ० ॥ अग्निः कोणाधिपतिः ॥ इत्यमरः ॥ चित्रकवृक्षः ॥ रक्तचित्रकः भल्लातकः निम्बुकः ॥ पित्तं ॥ स्वर्णं ॥ इति राजनिर्घण्टः अग्निकः पुं इन्द्रगोपनामरक्तवर्णकीटः । इति हेमचन्द्रः ॥

अग्निकणः पुं अग्निकणा । स्फुलिङ्गः ॥ इत्यमरः

अग्निकारिका स्त्री अग्निकार्य्यं इति हेमचन्द्रः ॥ (ऊं)

अग्निकार्य्यं क्ली अग्नावग्न्यैर्वा का । हविर्दानादि पूर्वकाग्निज्वालनं तत्पर्य्यायः । अग्नीन्धनं २ अग्नीध्रा ३ अग्निकारिका ४ । इति हेमचन्द्रः ॥

अग्निकाष्ठं क्ली अगुरु ॥ इति राजनिर्घण्टः ॥

अग्निकुक्कुटः पुं ज्वलदग्नितृणोल्का ज्वलत्तृणउ इति ख्यातः ॥ इति त्रिकाण्डशेषः ॥

अग्निकोणं क्ली पूर्वदक्षिणकोणं । तत्कोणाधिपतिरग्निः । इति ज्योतिषं ॥

अग्निक्रीडा स्त्री अग्निखेला । खधूपादित्यागः । आतशवाजीति ख्याता ॥

अग्निगर्भः पुं अग्निजारवृक्षः ॥ सूर्य्यकान्तमणिः ॥ इति राजनिर्घण्टः

अग्निगर्भा स्त्री महाज्योतिष्मती वृक्षः ॥ इति राजनिर्घण्टः ॥

अग्निचित् पुं अग्निहोत्री । साग्निकः ॥ इत्यमरः ॥

अग्निजः पुं अग्निजारवृक्षः ॥ इति राजनिर्घण्टः ॥

अग्निजातः पुं अग्निजारवृक्षः इति राजनिर्घण्टः ॥

अग्निजारः पुं औषधविशेषः । अस्य पर्य्यायः । अग्निनिर्य्यासः २ अग्निगर्भः ३ अग्निजः ४ वडवाग्निमलः ५ जरायुः ६ अर्णोद्भवः ७ अग्निजातः ८ अग्निजालः ९ सिन्धुफलः १० । अस्य गुणाः । कटुत्वं । उष्णत्वं । कफवायुसन्निपातशूलातिघ्नीतरोगनाशित्वं । पित्तप्रदत्वञ्च ॥ इति राजनिर्घण्टः ॥

अग्निजालः पुं अग्निजारवृक्षः ॥ इति राजनिर्घण्टः ॥

अग्निज्वाला स्त्री जलपिप्पली ॥ धातकीवृक्षः ॥ इति राजनिर्घण्टः अग्निशिखा ॥

अग्निजिह्वा स्त्री लाङ्गलीवृक्षः । विषलाङ्गला इति भाषा ॥ इति राजनिर्घण्टः ॥ अग्नेः काल्यादि सप्तजिह्वा च । इति जटाधरः ॥

अग्निदमनी स्त्री क्षुपविशेषः । अस्य पर्य्यायः । वह्निदमनी २ बहुकण्टका ३ वह्निकण्टारिका ४ गुच्छफला ५ क्षुद्रफला ६ क्षुद्रदुःस्पर्शा ७ क्षुद्रकण्टारिका ८ मत्स्येन्द्रमाता



५ दमनी ६। अस्या गुणाः कटुत्वं
।उष्णत्वं रूक्षत्वं वातकफ गु
ल्म। प्लीह नाशित्वं। रुचिकृत्वं
अग्निदीपनत्वं लघुत्वंच॥इति।
राजनिर्घंटः॥ अग्निदीप्ता
स्त्री महाज्योतिष्मती
लता॥इति राजनिर्घंटः॥
अग्निदेवा स्त्री कृत्तिकानक्षत्रं
इतिहेमचंद्रः॥अग्निनिर्यासः
पुं अग्निजारवृक्षः
॥ इतिराजनिर्घंटः॥
अग्निप्रस्तरः पुं अग्निजनकपा
षाणः। चकमकीपात्थर इतिभा
षा॥अग्निभं स्त्री स्वर्णं॥इति
राजनिर्घंटः॥अग्निभूः॥
पुं कार्त्तिकेयः। इत्यमरः
॥जले स्त्री। इति वेदपुराणे॥
अग्निभूतिः पुं बौद्धभेदः।
सच श्वेतजैनाचार्य्यशिष्यः।
इति हेमचंद्रः॥
अग्निमणिः पुं सूर्य्यकान्तमणिः
इति जटाधरः
अग्निमन्थः पुं गणिकारिका।
वृक्षः इत्यमरः॥
अग्निमारुतिः पुं अगस्त्यमुनिः
इति हेमचंद्रः॥
अग्निमुखः पुं देवता॥ब्राह्मणः

॥इति मेदिनी॥ चित्रकवृक्षः॥
भल्लातकः॥ इति विश्वः॥
अग्निमुखा स्त्री भल्लातकी॥
इत्यमरः॥लाङ्गलिकी॥इति
राजनिर्घंटः॥ अग्निरक्षणं
स्त्री अग्न्यथानं।
अग्निहोत्रं॥ इतिहेमचंद्रः॥
अग्निरजाः पुं इंद्रगोपाख्यकी
टः॥ इतिहेमचंद्रः॥
अग्निरुहा स्त्री मांसरोहिणी॥
इतिराजनिर्घंटः॥
अग्निवर्द्धकः त्रि अग्निवृद्धि
कारकौषधादिः आग्नेयः इति
वैद्यकं॥ अग्निवल्लभः
पुं सालवृक्षः॥
रालः॥इति राजनिर्घंटः॥
अग्निवाहः पुं धूमः॥इति
त्रिकांडशेषः॥
अग्निवाहुः पुं धूमः॥ इति
जटाधरः॥
अग्निवित् पुं अग्निवित्।
अग्नि होत्री॥इति हेमचंद्रः॥
अग्निवीजं स्त्री स्वर्णं॥इति
त्रिकांडशेषः॥
अग्निवीर्य्यं स्त्री स्वर्णं॥इति
राजनिर्घंटः॥
अग्निशिखः पुं कुसुम्भवृक्षः

कुंकुमः॥दीपः॥वाणः इति
शब्दरत्नावली॥
अग्निशिखं स्त्री स्वर्णं॥इति
राजनिर्घंटः॥कुंकुमे॥कुसुम्भपुष्पे
इतिमेदिनी॥ अग्निशिखा
स्त्री लाङ्गलिकीवृक्षः।
विषलांगला इति भाषा॥वृक्ष
विशेषः तस्य पर्य्यायः॥
विशल्या १ अनंता २ फलिनी ३
शक्रपुष्पी ४ इत्यमरः॥ज्वाला
आगनेरशिष इति भाषा॥
अग्निशेखरं स्त्री कुंकुमे।इति
राजनिर्घंटः
अग्निष्टोमः पुं यज्ञविशेषः।इति
शब्दरत्नावली॥तस्य विधिः
ज्योतिष्टोमेन स्वर्गकामो यजेतेति
वाक्यविहितज्योतिष्टोम नामक
याग विशेषस्य गुण विकारो
अग्निष्टोमो नाम। तस्य कालो।
वसन्तः। तत्राधिकारी अधीत।
वेद आहिताग्निश्च। द्रव्यंसोमः।
देवता इन्द्रवाय्वादयः।ऋत्विजः
षोडश। तेषांच चत्वारो गणाः
होतृगणः १ अध्वर्यु गणः २ ब्र
ह्म। गणः ३ उद्गातृगणः ४ एकै
कस्य गणस्यचत्वारश्चत्वारः तत्रहोतृ
गणे होता १ प्रशास्ता २ ॥

अच्छावाको ३ ग्रावस्तोता ४
अध्वर्य्युगणे अध्वर्य्युः१ प्रतिप्र
स्थाता २ नेष्टा ३ उन्नेता ४ ब्रह्मगणे
ब्रह्म १ ब्राह्मणाच्छंसी २ अग्नीत ३
पोता ४ उद्गातृगणे उद्गाता १
प्रस्तोता २ प्रतिहर्त्ता ३ सुब्रह्म
ण्यः ४ सचपंचाह साध्यः प्रथमदिने
दीक्षादीक्षणीयादि तदंगानुष्ठा
नं तत्रद्वितीय दिवसे प्रायणीय
यागः सोमलताक्रयणं।तेना द्वि
तीय तृतीयचतुर्थदिवसेषु प्रातः
काले सायंकालेच प्रवर्ग्योपसन्ना
मक यागानुष्ठानं। चतुर्थ दिवसे
प्रवर्ग्योद्वासनानंतरं अग्नीषोमीय
पश्वनुष्ठानं। तत्र यस्ययजमान
स्य गृहे पितृ पितामह
प्रपितामहानां मध्ये केनापि
वेदो नाधीतो अग्निष्टोमोवा न
कृतः सदुर्ब्राह्मणोभवति। तस्य
दौर्ब्राह्मण्यपरिहारायाश्विनपशुः
कर्त्तव्यः। यस्ययजमानस्य पितृ
पितामह प्रपितामहानां मध्ये
केनापिसोमपानं न कृतं स्यात्
तस्य सोमपान विच्छेद दोष
परिहारार्थं मैन्द्राग्न पश्वनुष्ठा
नं कर्त्तव्यं। इत्थं त्रयाणां पशूनां
युगपदालंभपक्षे एकस्मिन्नेवयूपे



त्र्याणां पञ्चूनां वेधने इत्येपञ्च
त्र्याननुष्ठाने चतुर्थ दिवसे त
स्मिन्नेव दिनेवा तृतीयभागे ऽग्न्या
धेयप्रयोगारंभः कार्य्यः। तत्र पात्रा
सादनं। पात्राणिच ग्रहाश्च समाः
स्थाल्यश्चेति। तत्र ग्रह
पात्राणि वितस्ति मात्राणि
उलूखलाकाराणि ऊर्ध्वपात्राणि
चमसपात्राणि तावत् परिमि
तानि तिर्य्यगाकृतीनि कोणवतष्टय
विशिष्टानि धारणार्थं दण्डयुक्ता
नि स्थाल्यो मार्तिक्यः। ततआरभ्य
सोमलता कण्डनेन सोमरसे
निष्कास्य निष्कास्य ग्रहेष्वहोमः
कर्त्तव्यः। तत्र सूर्य्योदयानन्तरं॥
अग्नेय पशुयागः कर्त्तव्यः॥
एवमुक्थ्य पर्य्यायपात्रहुते प्र
तःसवन समाप्तिः। ततो मध्यंदि
न सवने तत्र दक्षिणादाने दक्षि
णाच द्वादशोत्तरशतंगावः तत
स्तृतीय सवने इत्ये प्रातःसवन
माध्यंदिनसवन तृतीयसवन रू
त्र्यात्मकोऽग्निष्टोमः प्रधानयागः
इतरेऽङ्गयागाः तृतीय सवन
समाप्त्यंतरमवभृथयागः। उदके
वरुण देवताक पुरोडाशहोमः
तदनंतरमनुवेध्या पञ्चयागः

पसवन

तत्रयोः पशुः। तस्य
कलिनिषिद्धत्वात् तस्यचानित्य
त्वात् तत् स्थाने आमीक्षा योगः। त
त उदयनीयाततउदवसानीया।
साच पंचमदिवसे यावद्रात्रि कर्त्त
व्या उत् समाप्तावग्निष्टोमयाग स
माप्तिः इत्यग्निष्टोम यागीय पद
र्थ कल्प सूची॥
अग्निष्टः पुं लोहमयतणूलादि
भर्ज्जनपात्रे। इतित्रिकाण्डशेषः॥
अग्निसखः पुं वायुः वायुसखो
ऽग्निरितिदर्शनात्॥
अग्निसंभवः पुं अरण्यकुसुंभः
इति राजनिर्घण्टः॥
अग्निसहायः पुं वनकपोतः इति
राजनिर्घण्टः॥
अग्निसारं क्ली रसांजने। इति
राजनिर्घण्टः॥
अग्निस्वात्ताः पुं मरीचिपुत्रपितृग
ण विशेषः। नित्यबहुवचनांत
शब्दोयं। इतिशब्दमाला॥
अग्निहोत्रं क्ली यज्ञविशेषः तत्
द्विविधं। मानसाख्यं यावज्जीवन
साध्यञ्च। द्वितीयेविशेषोयं।
उदग्नौ यावज्जीवं प्रत्यहं प्रातः
सायंहवनं। तदग्निना यागकर्त्तु
र्देहदाहश्च। इति स्मृतिः तत्क्रमो॥

यथा ब्राह्मण क्षत्रिय वैश्यानां।
कृतदारपरिग्रहाणां कौलान्यत्व
वधिरत्व पंगुत्वादि दोषरहितानां
वर्णक्रमेण वसंत ग्रीष्म शरत्सु॥
अग्न्याधाने विहिते। अग्नयस्त्रयः
गार्हपत्यः १ दक्षिणाग्निः २
आहवनीयः ३। एवमाधानं
नाम देश विशेष तत्तन्मंत्रैः
स्थापनं। तेष्वग्निषु सायंकालेप्रा
तःकालेवाग्निहोत्र होमः कर्त्तव्यः
अग्निहोत्रं नाम होमस्य नामधेयं
अग्नयेहोत्रं होमायस्मिन् कर्म्मणि
व्यधिकरण बहुव्रीहिः। तद्द्रव्या
णि। दशपयः १ दधि २ यवागूः ३
घृतं ४ ओदनः ५ तंडुलाः ६
सोमरसः ७ मांसं ८ तैलं ९
माषाः १०। सम्प्रति कलियुगे
पयसा तंडुलैर्यवाग्वाच होमः
शिष्टाचार प्रसिद्धः तत्र एक
ऋत्विक् नित्यहोमः यजमानेन
वा कर्त्तव्यः ऋत्विजावाकारयित
व्यः। अमावास्यायां रात्रौयवागू
द्रव्येण यजमानेनैव कर्त्तव्यः
सचाग्निहोत्रहोमः आरम्भप्रभृति
यावज्जीवनः कर्त्तव्यः। प्रथमदिने
पूर्वोक्तानां दशानां द्रव्याणां
मेध्यसम्प्रतिप्रचलद्रूपाणांद्रव्य

येनद्रव्येण प्रथमाग्निहोत्रहोमः
कृतः तेनैवद्रव्येण यावज्जीवनं।
कर्त्तव्यः। प्रथमहोमश्च यस्मिन् दिने
अग्न्याधानं कृतं तस्मिन् दिने
सायंकाले आरंभनीयः॥
तत्र प्रातर्होमे सूर्य्योदेवता
सायंकाले अग्निर्देवता॥
आधानानंतरं प्रथम पौर्णमास्यां
दर्शपूर्णमास यागारंभः कर्त्तव्यः
दर्शपूर्णमासाभ्यां स्वर्गकामो॥
यजेतेति विधिवाक्यं। तत्र
षड्यागाः। पौर्णमास्यांत्रयः।
अमायांत्रयः पौर्णमास्यामाग्नेयाग्नी
षोमीयोपांशु यागास्त्रयोयागाः।
अमावास्यायामाग्नेयैन्द्र दधि
पयो यागास्त्रयः। तत्रामायां
कर्त्तव्य याग त्रयस्य दर्शपदं॥
नामधेयं। पौर्णमास्यां कर्त्तव्य।
यागत्रयस्य पूर्णमासपदंनामधेयं
दर्शश्च पूर्णमासश्च दर्शपूर्णमा
सौ वितिद्वंद्वः। पौर्णमास यागस्य
प्राथमिकत्वेपि अल्पाच्तरमिति
पाणिनीयानुशासनानुसारेण दर्श
शब्दस्याल्पाच्कत्वात् पूर्वनिपातः
दर्शपूर्णमासावपि यावज्जीवं।
कार्य्यौ। तत्रापि त्रयाणां वर्णाना
मपरिलिखितान्यत्वाद्यधिकार

प्रतिबंधकीभूत दोष
संबन्धाभाववतोकृताग्निधानानां
सपत्नीकानामधिकारः सामान्य
तः षर्णमारंभः प्रतिपदि यागइति
परिभाषा। तत्राकृतसोमयागस्य
यजमानस्य पौर्णमास्यामाग्नेय।
पुरोडाश यागः आज्येनोपांशु।
याजयागः। अमायांतु आग्नेय
पुरोडाशयागः ऐंद्राग्न पुरोडाश
यागः कृत सोम यागस्य ॥
यजमानस्यतु पौर्णमास्यामाग्ने
य पुरोडाशयागः आज्येनोपांशु
याज्ययागः अग्नीषोमीयपुरोडाश
यागः अमायांतु आग्नेय ॥
पुरोडाशयागः ऐंद्रपयोयागः।
ऐंद्रदधियागश्चेति त्रयः। तत्र
ऋत्विजश्चत्वारः। अध्वर्युः ब्रह्मा
होता ३ अग्नीदिति ४ यजुर्वेद
कर्मकर्ता अध्वर्युः ऋग्यजुःसा
मवेदत्रयकर्मकर्ता ब्रह्मा ऋग्वेदक
र्मकर्ता होता। अग्नीत्तु प्रायशो
ऽध्वर्योरेवानुयायी तत्प्रेरित
कर्मकर्ता पुरोडाशो व्रीहि
तंडुलैर्यवतंडुलैर्वा कर्तव्यः। अ
अग्निहोत्रवद्येनद्रव्येणारम्भः कृत
स्तेनैव द्रव्येण यावज्जीवं यागः
कर्तव्यः। आरंभवेलायामिच्छेव

नियामकेत्यादि दिङ्मात्रमिदः
इति यजुर्वेदः ॥ऽ॥ यज्ञाग्नि
संचयः। तत्पर्यायः। अग्न्याधानं २
अग्निरक्षणं ३। इति हेमचंद्रः॥
अग्निहोत्रः पुं अग्निः॥ हुतं इति
मेदिनी ॥
अग्निहोत्री न पुं अग्निहोत्रयाग
कर्ता। तत्पर्यायः। अग्निचित् २
आहिताग्निः ३। इति हेमचंद्रः।
अग्निचित् ४ इत्यमरः॥ साग्निकः
५ इति पुराणं ॥
अग्नीध्रः पुं ऋत्विग्विशेषः। तस्य
कर्माग्निरक्षणं। इत्यमरः ॥
अग्नीधास्त्री अग्निकार्य्ये हवि
दानादि पूर्वकाग्निज्वालने इति
हेमचंद्रः ॥
अग्नीन्धनं स्त्री अग्निकार्य्ये हवि
दानादि पूर्वकाग्नि ज्वालने इति
हेमचंद्रः ॥
अग्न्यस्त्रं स्त्री आग्नेयास्त्रं ॥
अग्निघटितास्त्रं। बंदूक कामान
इत्यादिभाषा ॥
अग्न्याधानं स्त्री श्रौतविधिनाग्नि
संस्कारः। अग्निरक्षणं। अग्निहोत्रं
। इति हेमचंद्रः ॥
अग्न्यालयः पुं यज्ञाग्न्याधारकुंडं
इति जटाधरः ॥

अग्न्युत्पातः पुं आकाशादिषु
अग्निविकारः। धूमकेतूल्कापातादिं
अग्निनिष्टात् पातोवा । सतु
मंत्रादि द्वारा अग्नेर्दाह शक्ति
निवारणं तत्पर्यायः उपाहितः
२। इत्यमरस्य टीकाच ॥
अग्रं स्त्री उपरिभागः। आगा॥
इति भाषा। अस्य पर्यायः शिरः
२ शिखरं ३ इत्यमरः॥ पुरस्तात्
अवलंबने ॥ पल परिमाणे॥
प्रान्ते॥ समूहः॥ इति मेदिनी ॥
अग्रः त्रि श्रेष्ठः उत्तमः ॥
इत्यमरः॥ प्रधानः॥ अधिकः॥
प्रथमः॥ इति मेदिनी ॥
अग्रगण्यः त्रि अग्रेगणनीयः
यथा। शमन भवन याने यद्भवान्
ऽग्रगण्यः॥ इति महानाटके ॥
अग्रगामी न त्रि अग्रेगमन कर्ता।
अग्रेसरः। इति हेमचंद्रः ॥
अग्रजः पुं ज्येष्ठभ्राता। तत्
पर्यायः। पूर्वजः २ अग्रियः ३
इत्यमरः॥ ब्राह्मणः। इति
हेमचंद्रः॥ अग्रेजाते त्रि॥
अग्रजङ्घा स्त्री प्रतिजङ्घा। जङ्घाग्र
भागः। इति हेमचंद्रः ॥
अग्रजन्मा न पुं ब्राह्मणः। इत्यमरः

ज्येष्ठभ्राता [illegible]। इति विश्वः
अग्रजातकः पुं ब्राह्मणः। इति
शब्दरत्नावली ॥
अग्रजातिः पुं ब्राह्मणः। इति
हेमचंद्रः ॥
अग्रणीः त्रि अग्रिमः श्रेष्ठः इति
हेमचंद्रः ॥
अग्रतः म व्य अग्रे प्रथमे। तत्
पर्यायः। पुरतः २ पुरः ३
इत्यमरः ॥
अग्रतःसरः त्रि अग्रगामी।
इत्यमरः ॥
अग्रदानी न पुं पतितब्राह्मण
विशेषः। सच प्रेतसंप्रदानक
घर्डगतिलादि द्रव्य ग्राही यथा
लोभी विप्रश्च शूद्राणामग्रदाने
गृहीतवान्। ग्रहणे मृतदानाना
मग्रदानी बभूव सः॥ इति
ब्रह्मवैवर्त पुराणं। तत्पर्यायः
अग्रहारिकः २। इति स्मृतिः॥
अग्रपर्णी स्त्री अजलोमाहन्तः।
इति रत्नमाला ॥ आलकुशी इति
केचित् ॥
अग्रमांसं स्त्री हृदयं। इत्यमरः
उदर मध्यवर्ति मांसवर्द्धनरूप
रोगविशेषः। इति वैद्यके ॥

अग्रघाने क्ली नासीरे सेनाग्र
गमने। इति हेमचंद्रः ॥
अग्रलोहिता स्त्री चिल्लीशाके
इति राजनिर्घंटः ॥
अग्रवीजः पुं वीजाग्रहस्तमात्रे
सचकुरन्ट्यादिः। इति हेमचंद्रः
अग्रसंधानी स्त्री यमपंजिका॥
जीवानां शुभाशुभ कर्मलिखि
यमस्य पुस्तकं॥इति त्रिकांडशेषः
अग्रसरः त्रि अग्रेसरः।अग्रगामी
।इति हेमचंद्रः ॥
अग्रहः पुं वानप्रस्थः। इति
त्रिकांडशेषः॥ अगृह इति
पाठे गार्हस्थ्याश्रम वहिर्भूतः
अग्रहायणः पुं मार्गशीर्षमासः
इति शब्दरत्नावली॥अस्य पर्य्या
यः। आग्रहायणिके जातफले
मार्गशीर्षे द्रष्टव्यं ॥
अग्राह्य त्रि अग्रहणीये।ग्रहण
योग्ये।यथा।अग्राह्य शिव
नैवेद्यं पत्रं पुष्पं फलं जलं।
सालग्राम शिला स्पर्शात् सर्वं
याति पवित्रतां ॥ इति
तिथ्यादितत्वं ॥
अग्रिमः त्रि प्रधानः उत्तमः
इति हेमचंद्रः॥ज्येष्ठः।अग्रजः
इति जटाधरः ॥

अग्रिमा स्त्री लवणीकलं।लेना
इति ख्याता।इति शब्दचंद्रिका॥
अग्रियं त्रि प्रधानं। इत्यमरः॥
अग्रियः पुं अग्रजः।ज्येष्ठभ्राता
।इत्यमरः ॥
अग्रीयं त्रि प्रधानं। इत्यमरः ॥
अग्रजे पुं। इति तट्टीकायां
रमानाथः ॥
अग्रुः स्त्री अंगुलिः वेद प्रचुर
प्रयोगोयं ॥
अग्रेगाः पुं अग्रगामी । इति
मुग्धबोधव्याकरणं ॥
अग्रेगूः पुं अग्रगामी ।
इत्युणादिवृत्तिः ॥
अग्रेदिधिषुः पुं द्विरुढैव यस्य
कुटुंबिनी स द्विजः।द्विज इत्युप
लक्षणं।दिधिषूः परपूर्वाग्रेदिधिषु
स्तत् पुरन्ध्रिकः। इति सामान्येन
नाममालादर्शनात्॥द्वितीयवारं
विवाहित पुत्रादिमति गृहिणीर
स्वामी इतिभाषा।इत्यमरः॥
अग्रदिधिषुः स्त्री अविवाहितज्येष्ठ
भगिनी सत्वे अग्रे विवाहिता
कनिष्ठा यथा। ज्येष्ठायां
विद्यमानायां कन्यायां मुह्यते
ऽनुजा।साचाग्रेदिधिषु र्ज्ञेया ॥
पूर्वाचदिधिषुः स्मृता इतिदेवलः

दिधिषू दीर्घोकारोस्त्यापि ॥
अग्रेवणं क्ली वनस्याग्रभागः।इ
ति। शब्दमाला ॥
अग्रेसरः त्रि अग्रेगमनकर्त्ता।
तत्पर्य्यायः पुरोगः २ प्रष्ठः ३
अग्रतःसरः ४ पुरः सरः ५
इत्यमरः॥अग्रगामी ६ अग्रसरः७
अग्रगः ८ पुरोगमः ९ पुरोगा
मी १० इतिहेमचंद्रः ॥
अग्रेसरिकः त्रि अग्रगामी इति
त्रिकांडशेषः ॥
अग्र्यः त्रि प्रधानः।उत्तमः।
इत्यमरः॥ज्येष्ठभ्रातरि पुं
इति तट्टीकायां रमानाथः ॥
अघ इङ गतौ॥निंदायां ॥
आरंभे ॥ जवे॥ इति
कविकल्पद्रुमः ॥
अघ तक अघकृतौ इति
कविकल्पद्रुमः ॥
अघं क्ली पापं दुःखं॥व्यसनं
इत्यमरः ॥
अघमर्षणं त्रि पापनाशने
सर्वपापध्वंसिजप्यं। इत्यमरः
अश्वमेधयज्ञाङ्गावभृथ स्नानमं
त्र वैदिक संध्यान्तर्गत मंत्र
करणकाघ्रात जल प्रक्षेप रूप
पापनाशक क्रियाविशेषः इति

स्मृतिः॥तांत्रिक संध्यायांमुषडंग
न्यासमाचर्य्य वामहस्ते जलं
ततः गृहीत्वा दक्षिणे नेवसंपुटे
कारयेद्बुधः॥शिववायु जल पृथ्वी
वह्निवीजैस्त्रिधापुनः॥अभिमंत्र्य
च मूलेन सप्तधा तत्व मुद्रया॥
निःक्षिपेत् तज्जलं मूर्ध्नि शेषं
दक्षे निधायच। इडयाकृष्यदेहान्तः
क्षालितं पापसंचयं॥ कृष्णवर्णं
तदुदकं दक्षनाड्याविरेचयेत्।
दक्षहस्तेव तन्मंत्री पापरूपं
विचिन्त्यच॥ पुरतो वज्रपाषाणे
निक्षिपेदस्त्र मुद्रया॥ इति
तंत्रसारः ॥
अघवान् [ति] त्रि अघविशिष्टः पा
पी। अघासुरः पुं अघनामासुरः
सचकंसराजसेनापतिः इति
श्रीभागवते ॥
स
अघोः-घ्य सं बोधने।यथा अघो
यज।इति वोपदेवः ॥
अघोरः पुं महादेवः।इति
शिवचतुर्दशी व्रतपूजायां अ
ति भयानके अभयानकेच त्रि
अघोरा स्त्री भाद्रकृष्णचतुर्दशी
यथा।भाद्रमास्यसिते पक्षे॥
ऽघोराख्या चतुर्दशी।तस्या॥



साराधितः स्याणर्नये क्विवपुंश्च
वे ॥ इत्यस्मृतिः ॥
अघोषः त्रि अभीरष्मूल्पदेशादि
शाहवहितः अल्प ध्वनियुक्तः।
कलापादि व्याकरणस्य संज्ञा
विशेषे पुं। संतवर्गप्रथमद्वितीय
वर्णाः शषसाश्च ॥
अङ्घ्रः पुं ब्रन्धा। इत्युणादिकोषः
अघ्न्या स्त्री स्त्रीगवी। इत्यमरः।
अङ्क लक पदे संख्यासंस्थाने॥
लक्षणे। चिह्नयुक्तीकरणे॥
इति कविकल्पद्रुमः ॥
अङ्कः पुं चिह्न क्रोडे
इत्यमरः रूपकविशेषः ॥
अपराधः ॥ रेखा विभूषणे ॥
समीपे ॥ स्थाने ॥ नाटकांशः ॥
इति मेदिनी ॥ चित्रयुद्धे इति
विश्वः ॥ शरीरे ॥ इत्युणादिको
ष ॥ नवसंख्या। इति ज्योतिषं ॥
अङ्कतिः पुं ब्रह्मा ॥ अग्निः ॥
अग्निहोत्री ॥ इति विश्वः ॥ वायुः
इति त्रिकाण्डशेषः
अङ्कनं क्ली संख्यासंस्थाने चि
ह्न युक्तीकरणे। आंकन दागन
इति भाषा ॥
अङ्कपालिका स्त्री आलिंगने
इति शब्दमाला ॥

अङ्कपाली स्त्री आलिंगनं धा
त्री ॥ वेदिकाख्यगंधद्रव्ये तस्य
नामांतरं कोटिः। इति मेदिनी।
अङ्कलोडः पुं विंवोटकवृक्षः
वेंचको। इति भाषा॥ चिञ्चोडमू
ल इति केचित्। अस्य गुणाः गुरुत्वे
अजीर्णकारित्वं। शीतलत्वंच। इ
ति राजवल्लभः ॥
अङ्कितः त्रि लांछितः। चिह्नितः
इति व्याडिः ॥
अङ्की स्त्री अङ्क्यः। मृदंगविशे
षः ॥ इति शब्दरत्नावली ॥
अङ्कुरः पुं वीजाङ्कवः ॥
नूतनोत्पन्न तृणादिः। अस्य
पर्यायः। अभिनवोद्भिद् २
इत्यमरः ॥ उद्भेदः ३ प्ररोहः ४
अङ्कुरः ५। इति राजनिर्घण्टः
रोहः ६ अङ्कूरः ७ इति हेमचंद्रः
जलं ॥ रक्तं ॥ लोम ॥ इति
मेदिनी ॥
अङ्करकः पुं नीडः पक्षिवास
स्थाने। इति शब्दमाला ॥
अङ्कुशः पुं क्ली हस्तिचालना
र्थ लोहमयवक्रायास्त्र डंगश इति
भाषा। तत्पर्यायः। सृणिः २
इत्यमरः ॥ सृणिः ३ इति तट्टीका
अङ्कुशः ४ इत्युणादिकोषः


अङ्कुशदुर्धरः पुं दुरंतहस्ती इति
त्रिकाण्डशेषः ॥
अङ्कुशी स्त्री जिनानांचतुर्विंश
ति शासनदेव्यंतर्गतदेवीविशेषः
इति हेमचंद्रः ॥
अङ्कूरः पुं अङ्कुरः। अभिनवोद्भि
द्। इति हेमचंद्रः ॥
अङ्कुषः पुं क्ली अङ्कुशः।
इत्युणादिकोषः ॥
अङ्कोटः पुं अङ्कोटवृक्षः। इति
रत्नमाला ॥
अङ्कोठः पुं वृक्षविशेषः ॥
आंकोड़ इति ख्यातः।
थलआंकुडा इति केचित्। अस्य
पर्यायः। निकोचकः २ इत्यमरः
निकोठकः ३ निकोचकः ४
इति भरतः ॥ अङ्कोलकः ५
वोधः ६ नेदिष्ठः ७ दीर्घकीलकः
रामठः ९। इति रत्नमाला ॥
कोठरः ११ रेची १२ गूढपत्रः १३
गुप्तस्नेहः १४ पीतसारः १५ मदनः
१६ गूढवल्लिका १७ पीतः १८
ताम्रफलः १९ दीर्घकीलः २०
गुणाढ्यकः २१ कालकः २२ लंब
कर्णः। २३ गंधपुष्पः २४ रोचनः २५
विशान। तैलगर्भः २६ अस्य गुणाः कटु

स्निग्धत्वं। विषलूतादिदोषनाशि
त्वं। कफवायुहारित्वं। स्रंसनशुद्धि
कारित्वं। रेचकत्वंच ॥ ❀ ॥
तत्फलगुणाः। शीतलत्वं।
स्वादुत्वं। श्लेष्मनाशित्वं गुरुत्वं
बलकारित्वं। धातुपोषकत्वं।
विरेचकत्वं। वातपित्तदाहक्षय
दुष्टरक्तनाशित्वञ्च। इति
राजनिर्घण्टः ॥
अङ्कोलः पुं अङ्कोटवृक्षः ॥
आंकोड यस्य प्रसिद्धः। इत्यमर
टीकायांस्वामी ॥
अङ्कोलकः पुं अङ्कोटवृक्षः इति
जटाधरः ॥
अङ्कालिका स्त्री आलिंगनं इ
ति ॥ शब्दमाला ॥
अङ्कोलसारः पुं स्थावरविष
प्रभेदः। इति हेमचंद्रः ॥
पाखवनयाज इति भाषा।
इत्यमरः ॥ तदुक्तं सार्द्धतोल
आयाम श्वतुर्हं शङ्कुलाननं
हरीतक्याकृतिर्धैः स्यादेकाङ्के
महि वाधते ॥ इति भरतः ॥
अग लक पदे संख्यासंस्थाने ॥
लक्षणे। चिह्नयुक्तीकरणे इति
कविकल्पद्रुमः ॥




अङ्गं च संबोधने पुनरर्थः॥
इत्यमरः॥
अंगं क्ली शरीरादेरेकदेशः
अंग इति हिन्दीभाषा।तत्पर्य्यायः
।अवयवः २ प्रतीकः ३ अपघन
४।इत्यमरः।गात्रं॥ अप्रधाने॥
उपायः॥ इतिमेदि॥ मनः॥
अंगमनसिकायेवेत्यभिधानल
दर्शनात्॥ यथा हिरण्यगर्भोऽङ्ग
भुवं मुनिं हरिरितिमाघः।वेदांग
शास्त्राणि षट्।यथा।शिक्षा १
कल्पः २ व्याकरणं ३ निरुक्तं ४
ज्योतिषं ५ छंदः ६ इत्यमरः
अंगस्य लक्षणं यथा तदीय प्रधा
न फलजनक व्यापारजनकत्वे सति
तदीय प्रधान फलाजनकत्वं इति
तिथ्यादितत्वटीका॥
अंगाः पुं स्वनाम ख्यात देशः।
इति हेमचंद्रः।मेदिनीकरमते
नित्यबहुवचनान्त शब्दोयं॥
अंगः त्रि अंगविशिष्टः।निकटः
इतिमेदिनी
अंगग्रहः पुं गात्रवेदना।इति
वैद्यकं॥
अंगजं क्ली वक्तं।इतिमेदिनी
शरीरजे वाच्य लिङ्गं॥
अंगजः पुं पुत्रः।केशः॥कामः
मदः॥इति विश्व मेदिन्यौ
॥मदस्थाने गदः। इति
क्वचिन्मेदिनी॥
अंगजा स्त्री कन्या अंगाज्जात
इत्यस्मात् स्त्रियामाप्॥
अङ्गणं क्ली अङ्गने चत्वरे।
इत्यमरटीकायां भरतः॥
अंगतिः पुं ब्रह्मा विष्णुः अग्निः
अग्निहोत्री॥इतिशब्दरत्नावली
अंगदं क्ली केयूरं।ताड वाजु
इत्यादिभाषा इत्यमरः॥
अंगदः पुं कपिभेदः सचवालि
नामवानर राजपुत्रः॥इति
मेदिनी॥
अंगदा स्त्री दक्षिणदिग्हस्तिभार्या
।इतिमेदिनीकर हेमचंद्रौ॥
अंगनं क्ली अंगनभूमिः अंगन
उठोन इति भाषा।तत्पर्य्यायः
चत्वरं २ अजिरं ३ इत्यमरः॥
अंगणं ४ इति तट्टी शाङ्गने॥
५॥याने।गमने।इति मेदिनी॥
अंगना स्त्री कामिनी।
सुंदराङ्गी स्त्री। इति मेदिनी॥
सार्वभौम नाम्न उत्तरदिग्गजस्य
पत्नी।इत्यमरः॥वृष कर्कट
कन्या वृश्चिक मकर मीन राशयः
इतिज्योतिषतत्वे॥

अंगनाप्रियः पुं अशोकवृक्षः।
इतिशब्दमाला॥
अंगपालिः पुं आलिंगनं।इति
त्रिकांडशेषः॥
अंगमर्द्दः पुं अंग मर्दनकारक
भृत्यः।तत् पर्य्यायः।संवाहकः २
।इति हेमचंद्रः॥अंगमर्द्दकः ३
।इतित्रिकांडशेषः॥अङ्गमर्द्दी ४
।इतिहलायुधः॥
अंगमर्दकः पुं अङ्गमर्द्दः।इति
त्रिकांडशेषः॥
अंगमर्दी न् पुं अंगमर्द्दः।इति
हलायुधः॥
अंगरक्तः पुं वृक्षविशेषः।
गुंडारोचनी इति ख्यातः।तत्
पर्य्यायः।पिकाक्षः २ रोचनी ३
लघुपत्रकः ४ इतिशब्दचंद्रि
का।कंपिल्लः ५ कर्कशः ६ चंद्रः ७
रक्तांगः ८।इत्यमरः॥
अंगत्रिणी स्त्री अंग त्राणं॥
सेजोया इति भाषा। तत्
पर्य्यायः।जालिका २ जालप्राये
आयसी ४।इति हेमचंद्रः॥
अंगरागः पुं गात्ररञ्जने।
अंगे चन्दनादि लेपने। तत्
पर्य्यायः।विलेपनं २ इति
हेमचंद्रः॥
अङ्गराट् पुं अंगदेशाधिपतिः॥
।सचकर्णः।इति हेमचंद्रः॥
अंगलोड्यः पुं चिंचाटतृणं।
इतिरत्नमाला॥अकल्लोड्य इतिच
पाठः॥
अंगवः पुं शुष्कफलं। इति
अंगवः शब्दचंद्रिका॥
अङ्गविकृतिः पुं अपस्मार रोगः
इतिराजनिर्घण्टः॥
अङ्गविक्षेपः पुं अङ्गहारः।
अंगचालनरूपनृत्य इत्यमरः॥
अंगवैकृतं क्ली आकारः।इङ्गितं
इतिजटाधरः॥
अंगसंस्कारः पुं कुंकुमादिना
शरीरशोभाधान रूपसंस्कारः
इतिभरतः॥स्नानोद्वर्तनादिः।
इतिस्वामी॥शरीरसंस्कारमात्रे॥
इत्यन्ये॥स्वेदादिकृतदौर्गन्ध्य॥
हरणाय चंदनादिना उद्वर्तनानु
लेपनादिः।इति सारसुंदरी॥
तत्पर्य्यायः।परिकर्म्म २।इत्यमरः
॥ प्रतिकर्म्म ३।इतिक्वचित्पाठः॥
अंगहारः पुं अंगानां स्थानात्।
स्थानान्तरनयनं।तत्पर्य्यायः।
अंगविक्षेपः २ इत्यमरः
अंगहारिः ३।इति तट्टीका॥
स्थिर हस्त पर्य्यस्तकादिकौ।



द्वात्रिंशत् प्रकारः। इति मधुः॥
वृश्चिक भ्रमरादि द्वात्रिंशद्द्वयः।
इतिरायः॥अङ्गुल्यादि विन्यास
स्त्रिंशद्द्वयः इति कौमदी॥
अङ्गहारिः पुं अङ्गहारः। इति
भरतधृत हृ चेंद्रः॥
अङ्गहीनः त्रि अवय रहितः।
अङ्गहानिविशिष्टः। यथा।
अङ्गहीने क्रियाहीने विधिहीनेव
यद्भवेत्। इतिस्मृतिः कामदेवे
पुंल्लिंगः॥
अङ्गाधिपः पुं अङ्गदेशाधिपतिः
सचकर्णः। इतिभूरिप्रयोगः॥
अङ्गारः पुं क्ली दग्धकाष्ठखंडे
तत्तु निरग्नि साग्निच। कयला
अंगारा इतिभाषा। तत्पर्यायः।
अलातं २ उल्मुकं ३ इत्यमरः
आलातं ४ उल्मूकं ५ इति
तट्टीका
अङ्गारः पुं मङ्गलग्रहः। इति
मेदिनी॥हितावली इति
वैद्यकं॥
अङ्गारकः पुं मंगलग्रहः इत्यमरः
अङ्गारः कुरुन्टेकवृक्षः
इतिमेदिनी भृंगराजः इति
राजनिर्घंटः॥
अङ्गारकतैलं क्ली स्वनामख्यात।
पक्वतैलं। तस्यपाक प्रकारो
गुणाश्च यथा। मूर्वा लाक्षा हरिद्रे
द्वेमञ्जिष्ठा सेंद्रवारुणी वृहती
सैंधवकुष्ठ रास्ना मांसी
शतावरी॥आरनालाटकेनैव
तैलप्रस्थं विपाचयेत् तैलं
अङ्गारकं नाम सर्व्वज्वरविमोक्षणं
इतिसुखबोधः॥
अङ्गारकमणिः पुं प्रवालः।
इतिराजनिर्घंटः॥
अङ्गारकुष्ठकः पुं हितावली
इतिराजनिर्घंटः॥
अङ्गारधानिका स्त्री अङ्गारधारण
पात्रं आङ्गठा इति ख्याता
सोजाल इति केचित्।
तत्पर्यायः अङ्गारशकटी २
हसन्ती ३ हसनी ४। इत्यमरः
अङ्गारपरिपाचितं क्ली अङ्गार
पक्वमूल विद्धाङ्गारदग्धमांसं
कावाव इति ख्यातं इति
शाह्वचंद्रिका॥
अङ्गारपर्णः पुं चित्ररथगंधर्वः
इतिमहाभारतं॥
अङ्गारपुष्पः पुं इंगुदीवृक्षः।
जियापुता। इतिख्यातः इति
रत्नमाला॥
अङ्गारमंजी स्त्री कांजविशेषः

इतिशब्दरत्नावली अस्यनामांतरं
अङ्गारमंजरी॥
अङ्गारवल्लरी स्त्री करंजविशेषः
इत्यमरः॥भार्गी॥ गुञ्जा॥
इतिराजनिर्घंटः
अङ्गारवल्ली स्त्री महाकरञ्जः
भार्गी इतिराजनिर्घंटः॥
अङ्गारशकटी स्त्री अङ्गारधानि
का। इत्यमरः॥
अङ्गारिः स्त्री अङ्गाधानिका
इतिजटाधरः॥
अङ्गारिका स्त्री इक्षुकांडं पलाश
कलिका। इतिमेदिनी॥
अङ्गारिणी स्त्री अङ्गारधानिका
भास्करत्यक्तादिक्। इतिमेदिनी
अङ्गारितं क्ली पलाशकलिका
द्रुमः॥दग्धेत्रि इतिविश्वः॥
अङ्गिका स्त्री कंचकः॥काचुली
इति॥ख्याता। इति हेमचंद्रः
अङ्गिराः पुं मुनिविशेषः॥
सचब्रह्मणोमुखाज्जातः तस्य
भार्य्या. कर्दम. मुनि कन्याशुद्ध
पुत्रं उतथ्यः २ वृहस्पतिः २
कन्यासिनीवाली २ कुहूः २ रा
का ३ आनुमतिः ४ इतिश्रीभागवे
अङ्गी त्रि अङ्गविशिष्टः॥अवयवी
यथा। येनाङ्गेनाक्षी विकृतो॥
मन्यते तस्मादङ्गाङ्गी इति
मुग्धबोधटीकायां दुर्गादासः॥
प्रधानः। मुख्यः यथायथङ्गीस्या
द्रुमांतरं। इति ध्वनिकारः॥
अङ्गीकारः पुं स्वीकारः। तत्
पर्य्यायः। संवित् ३ आगूः ४
प्रतिज्ञानं ५ नियमः ६ आश्रवः ७
संश्रवः ८ अभ्युपगमः ९ समा
धिः। १० प्रतिश्रवः ११। इत्यमरः॥
अङ्गीकृतं त्रि स्वीकृतं। तस्य
पर्य्यायः ऊरीकृतं २ उररीकृतं ३
आश्रुतं ४ प्रतिज्ञातं ५ संगीर्णं
६ विदितं ७ संश्रुतं ८ समाहितं
९ उपश्रुतं १० उपगतं ११ प्रति
श्रुतं १२ अभ्युपगतं १३ इत्यमरः
अङ्गुरिः स्त्री पाणि पादांगुली
इत्युणादि कोषः॥
अङ्गुरी स्त्री अंगुली इत्यमरटीका
अङ्गुरीयः पुं क्ली अङ्गुलीयकं
आंगुठा इति भाषा अंगुलौ
भवेअङ्गुलीयं मनीषादित्वात्
लस्यरः। इतिभरतः॥
अङ्गुरीयकं क्ली पुं अङ्गुलीकं
इत्यमरटीकायां मुकुटादयः।
अङ्गुलः पुं अङ्गुष्ठः॥वात्स्यायन
मुनिः। इति हेमचंद्रः अङ्गुला॥



इत्यमरटीकायां रमानाथः॥
अष्ट यव परिमाणं इत्यमर
टीकायां वाचस्पतिः ॥
अंगुलिः स्त्री करशाखा अंगुल
इति भाषा गजकर्णिका हस्ति
शुण्डाग्रभागः इति हेमचंद्रः॥
अंगुष्ठः इत्युणादि कोषः ॥
अंगुलितोरणं क्ली चंदनादिना
ललाटे कृता ऽर्द्धचंद्रः इति
हारावली ॥
अंगुलिमुद्रा स्त्री सात्तरोर्मिका
प्रभुनाम्ना स्वनाम्ना वा अंकित
मंगुरीयकं। फारसी अंगुटी
मोहर खोदा अंगुटि इति
भाषा इत्यमरः ॥
अंगुलिमुद्रिका स्त्री अंगुलिमु
इत्यमरटीकायां रमानाथः
अंगुलिमोटनं क्ली अंगुलिद्वय
मर्दनजातशब्दः अंगुलमट्काना
इति भाषा। तत् पर्य्यायः छुकुटो
२इति त्रिकांडशेषः स्फुटो॥
३ अंगुलिसंदेशः ४ इति
हारावली मुचुटी ५ इति
जटाधरः मचुटीति मुष्टिपर्य्या
ये। हेमचंद्रेण लिखिता ॥
अंगुलिसन्देशः पुं अंगुलि
मोटनं इतिहारावली ॥

अंगुली स्त्री शरीरावयवविशेषः
अंगुल इति भाषा। तत् पर्य्यायः
करशाखा २ इत्यमरः ॥ अंगुलिः
३ अंगुरिः ४ अंगुरी ५ अंगुलः ६
इति तट्टीका सा क्रमेण पंचधा
यथा अंगुष्ठः १ तर्जनी २
मध्यमा ३ अनामिका ४ कनिष्ठा ५
इत्यमरजटाधरौ ॥ हस्तिशुंडाग्र
इति मेदिनी ॥
अंगुलीकः पुं क्ली अंगुलीयके
इति त्रिकांडशेषः ॥
अंगुलीपंचकं क्ली हस्तस्य
पंचांगुलानि यथा अंगुष्ठः १
प्रदेशिनी २ मध्यमा ३ अनामि
का ॥ ४ कनिष्ठिका ५ इति राजनि
र्घंटः ॥ अंगुलीयः पुं क्ली अंगुली
यकं ॥ इत्यमरटीकायां ॥
अंगुलीयकं क्ली पुं अंगुलिभू
षणं ॥ अंगुटो इति भाषा। तत् पर्य्यायः
ऊर्मिका २ इत्यमरः अंगुरीयकं
३ अंगुरीयः ४ अंगुलीयः ५ इति
तट्टीका करारोटः ६ अंगुलीकः
७ इति त्रिकांडशेषः पुंसि
प्रमाणं अयं मैथिल्याभिज्ञानं
काकुत्स्थस्याङ्गुरीयकः इति
भट्टिः ॥
अंगुलीसंभूतः पुं नखः इति

राजनिर्घंटः ॥
अंगुष्ठः पुं हस्तांगुलिः बुडो
आंगुल इति भाषा। इत्यमरः॥
अंगूषः पुं नकुलः ॥ बाणः
इत्युणादिकोषः ॥
अंघः[न] क्ली अंहः। पापं
इत्युणादिकोषः ॥
अंघ्रिः पुं अंघ्रिः इतिविश्वः ॥
अंघ्रि पुं पादः हस्तमूले ॥
॥ इतित्रिकांडशेषः ॥
अंघ्रिनाम[न] क्ली हस्तमूले। इति
हेमचंद्रः ॥ (अचलभ्राता)
अंघ्रिनामकः पुं हस्तमूले ॥
इत्यमरः ॥
अंघ्रिपः पुं हस्तः । इति
हेमचंद्रः
अंघ्रिपर्णी स्त्री पृश्निपर्णीचकुलि
या इति ख्याता। इत्यमरटीकायां
रमानाथः ॥
अंघ्रि वल्लि स्त्री विश्वपर्णीहस्तः
चाकुलिया इति भाषा ।
इत्यमरः ॥ अस्या कपान्तरे
अंघ्रिवल्लिः अंघ्रिवल्ली
अच ई पूजायां इति
कविकल्पद्रुमः
अच इ ञ गतौ श्लिष्टोक्तौ ॥
इतिकविकल्पद्रुमः

अच उ ञ गतौ श्लिष्टोक्तौ ॥
इतिकविकल्पद्रुमः ॥
अचंडी स्त्री सुशीलागौः शांतगाई
इतिभाषा। तत् पर्य्यायः। सुकरा
२ इत्यमरः ॥ अकोपना स्त्री ॥
अचलः पुं पर्वतः ॥ कीलकः ।
इतिमेदिनी ॥ अकम्प त्रि ॥
अचलकीला स्त्री पृथिवी इति
शब्दरत्नावली ॥
अचलत्विट् पुं कोकिलः इति
शब्दचंद्रिका ॥
अचलभ्राता पुं बौद्धगणाधिप
विशेषः सतु शेषजैनाचार्य्यस्य
एकादश शिष्यांतर्गतः। इति
हेमचंद्रः ॥
अचला स्त्री पृथिवी इति मेदिनी
अचिरद्युतिः स्त्री विद्युत् इति
त्रिकांडशेषः ॥
अचिरप्रभा स्त्री विद्युत्। इति ॥
हेमचंद्रः ॥
अचिररोचिः[स] स्त्री विद्युत् इति
जटाधरः ॥
अचिरा स्त्री अर्हतां मातृविशेषः
इति हेमचंद्रः ॥
अचिरांशुः स्त्री विद्युत् इति
हलायुधः ॥



अचिरात् व अचिरं । शीघ्रं अविलम्बं । यथा । अचिराडुपहं रावरेदथवाम्भोपयिकीमुपक्रिया ॥ इति नैषधे ॥
अचिराभा स्त्री विद्युत् । इति हारावली ॥
अचेतनः त्रि चेतनारहितः चैतन्यशून्यः । अज्ञानः । यथा । कामार्ता हि प्रकृति कृपणाश्चेतनाचेतनेषु । इति मेघदूतकाव्ये । सेंद्रिये चेतनं द्रव्यं निरिंद्रियमचेतनं । इति चरकः ॥
चेतनाभावः । अज्ञानं । यथा । अचैतन्यमिदं विश्वं चैतन्यं दैवमेव यत् । न ज्ञानेत्यपि शास्त्रा । धर्मेत्येव हि केवलं ॥ इति चैतन्यचंद्रामृतं ॥ तद्वति त्रि
अच्छं व अभिमुखे सामख्ये । इति मेदिनी ॥
अच्छः त्रि स्वच्छः । निर्मलः इत्यमरः ॥
अच्छः पुं स्फटिकः भालुकः इति मेदिनी ॥
अच्छभल्लः पुं भालुकः इत्यमरः तट्टीकाकारमते अच्छो भल्लश्चेति ॥ शब्दद्वयमपि

अच्युतः पुं विष्णुः । इत्यमरः ॥ स्थिरे त्रि ॥
अच्युताग्रजः पुं बलरामः ॥ इत्यमरः ॥ इंद्रः । इति ॥ [illegible] हेमचंद्रः ॥
अच्युतावासः पुं अश्वत्थवृक्षः इति राजनिर्घंटः ॥
अज ० क्षेपे ॥ गतौ ॥ इति ॥ कविकल्पद्रुमः ॥
अज इक भासि । दीप्तौ । इति कविकल्पद्रुमः ॥
अजः पुं ब्रह्मा ॥ विष्णुः । शिवः राजविशेषः । सच रघुराजपुत्रः दशरथ पिता च छागः इति मेदिनी ॥ मेषः । इति ज्योतिषे ॥ माक्षिकधातुः । इति हेमचंद्रः ॥ जन्मरहिते वाच्यलिंगः
अजकर्णः पुं असनवृक्षः इति रत्नमाला ॥
अजकर्णकः पुं सालवृक्षः इति राजनिर्घंटः ॥
अजकवः पुंक्ली शिवधनुः इति ॥ त्रिकांडशेषः ॥
अजकावः पुंक्ली शिवधनु इति त्रिकांडशेषः ॥
अजगंधा स्त्री वनयमानी तत्

पर्यायः । अजमोदा २ खराश्वा ३ कारवी ४ । इति रत्नमाला ॥ उग्रगंधा ५ इत्यमरः ॥ ॥ वृक्ष विशेषः । ववरी इति हिंदी भाषा । इति मदनविनोदः तिल्लोणि ॥ इति राजनिर्घंटः ॥ तत्पर्यायः ॥ वस्तगंधा २ खरपुष्पा ४ अविगंधिका । ५ उग्रगंधा ६ ब्रह्मगर्भा ७ अजा स्त्री । ८ भूतिमयूरिका ९ अस्यगुणाः कटुत्वं । उष्णत्वं । वात गुल्मोदररोग वर्ण व्रणार्त्तिशूल नाशित्वं । पीता च दन्ककेने हिता ॥ इति राजनिर्घंटः ॥
अजगंधिका स्त्री बर्बरावृक्षः बावरि इति भाषा । इत्यमरः ॥
अजगंधिनी स्त्री अजशृंगीवृक्षः इति रत्नमाला ॥
अजगरः पुं स्वनामख्यात वृहत् सर्पः । तत्पर्यायः शयुः २ ॥ वाहसः ३ । इत्यमरः ॥
अजगवं क्ली पिनाकः शिवधनुः इत्यमरः ॥ तस्य रूपांतरे अजकवं अजकावं अजीकवं अजगावं ॥
अजगावं क्ली शिवधनुः । इति शब्दमाला
अजजीविकः पुं अजाजीवी

छागपालकः । तत्पर्यायः । जावालः २ । इति हेमचंद्रः ॥
अजटा स्त्री भूम्यामलकी । इति राजनिर्घंटः ॥ तस्या रूपांतरे । अजडा । अज्झटा ॥
अजडा स्त्री कपिकच्छुः आलकुशी इति भाषा । इति राजनिर्घंटः ॥
अजथ्या स्त्री स्वर्णयूथिका इति दीक्षितः ॥
अजदंडी स्त्री ब्रह्मदंडीवृक्षः । इति वाजनिर्घंटः ॥
अजनकः त्रि अनुत्पादकः । अजन्मदः । असृष्ट । अकारकः
अजननिः पुं जन्मराहित्यं । उत्पत्त्यभावः ॥ अकरणिः शापः । यथा । अजननिरभवतस्य इत्यमरटीकायां रायमुकुटः
अजन्यं क्ली उत्पातः शुभाशुभ सूचक भूकंपादिः । इत्यमरः
अजननीये त्रि ॥
अजपः पुं असदध्येता । कुपाठकः इति हेमचंद्रः । छागपालकः यथा । नवथी नाम रूपास्या । जानेत स्य ऽजपा वने इति ॥ चरकः
अजपा स्त्री हंसमंत्रः । यथा




विपदर्हंड ललित लसदादि ॥
सर्गसंयुतः। अजयाख्यो मनुः
प्रोक्तो ह्यक्षरः स्मरपादपः॥ॐ॥
अस्य देवतार्द्धनारीश्वरमूर्त्तिः य
था। उद्यद्भानुस्फुरिततडिदाकार
मूर्द्धाम्बिकेशं पाशाभीतिवरद
परशुं संदधानं कराग्रैः।
दिव्याकल्पैर्नवमणिमयैः शोभितं
विश्वमूलं सौम्याग्नेयं वपुरवतु न
श्चन्द्रचूडं त्रिनेत्रं ॥ इति
तंत्रसारः॥ॐ॥ स्वाभाविनिश्वास
प्रश्वासरूपेण जीवजप्य हंस
मंत्रः तथाच दक्षिणामूर्त्ति
संहितायां। अथ वक्ष्ये ॥
महेशानि प्रत्यहं प्रजपेन्नरः
मोहबंधं न जानाति मोक्षस्तस्य
नविद्यते श्रीगुरोः कृपया देवि
ज्ञायते जप्यते यदा उच्छ्वास
निःश्वासतया तदा बंधक्षयो
भवेत्॥ उच्छ्वासैरेव निःश्वासै
हंस इत्यक्षरद्वयं। तस्मात्॥
प्राणस्य हंसाख्य आत्माकारेण
संस्थितः नाभेरुच्छ्वासनिश्वासौ
हृदयाग्रे व्यवस्थितैः। षष्टिश्वासै
र्भवेत्प्राणः षट्प्राणानाडिका
मताः। षष्टिनाड्यास्त्वहोरात्रं जपसंख्या
क्रमो मतः। एकविंशतिसाहस्रं

षट्शतादिक मीश्वरि॥ जपते
प्रत्यहं प्राणी सान्द्रानन्दमयीं परां
उत्पत्तिर्जयमारंभो मृत्युस्तत्र
निवेदनं विनाजपेन देवेशि
जपो भवति मंत्रिणः अजपेयं
ततः प्रोक्ता भवपाशनिकृन्तनी
अन्यत्रापि। षट्शतानि दिवारात्रौ
सहस्राण्येकविंशतिं। एतत्
संख्यान्वितं मंत्रं जीवो जपति
सर्वदा॥ॐ॥ संध्यावंदनहीना
इति महाभारतं ॥
अजभक्षः पुं वर्व्वूरवृक्षः इति
राजनिर्घंटः ॥
अजमीढः पुं राजयुधिष्ठिरः इति
त्रिकांडशेषः
अजमोदा स्त्री यवानिका तत्
पर्य्यायः। उग्रगंधा २ ब्रह्मदर्भा ३
यवानिका ४। इत्यमरः चत्वारि
यवान्या। यवानी द्विविधा एका
क्षेत्रयवानी सा अजमोदेत्येव
ख्याता। अपरा यवानीत्येव ख्याता
अविशेषात् द्वयोरपीति स्मृतिः
॥केचित् अजमोदादि द्वयं
वनयवान्या। ब्रह्मदर्भादि द्वयं
यवान्यामित्याहुः। उग्रगंधाज
मोदाख्या स्मृता क्षेत्रयमानिकेति
यमानीदीप्यको दीप्याभूतिकश्च

यमानिकेति च रत्नमाला। इति
भरतः॥ॐ॥ वैद्यके तु वनयमानी
इतिख्याता। तत्पर्य्यायः। खराह्वा
२ वस्तमोदा ३ मर्कटी ४ मोदा ५
गंधदला ६ हस्तिकारवी ७
गंधपत्रिका ८ मायूरी ९।
शिखिमोदा १० मोदाढ्या ११
वह्निदीपिका १२ ब्रह्मकोशी।
विशाली १४ हयगंधा १५ ॥
उग्रगंधिका १६ मोदिनी १७
फलमुख्या १८ विशल्या १९ अस्य
गुणाः कटुत्वं। उष्णत्वं रूक्षत्वं।
रुचिकारित्वं। कफवायु ॥
शूलाध्मानरुचि ज्वरामय
नाशित्वञ्च। इति राजनिर्घंटः
अजमोदादिका स्त्री यवानी इति
वैद्यकं ॥
अजेभः पुं भेकः। इति
शब्दरत्नावली न संति जेभा दन्ता अस्य
अजयः पुं पराजयः यथा।
सुखदुःखे समे कृत्वा लाभालाभौ
जयाजयौ इति भगवद्गीता ॥
राढदेश प्रसिद्ध नद विशेषः ॥
अजया स्त्री विजया। भांगसिद्धि
इतिख्याता इति राजनिर्घंटः ॥
अजय्य त्रि जेतुमशक्यं अजेयं
इति मुग्धबोधव्याकरणं

अजरः त्रि जरारहितः वार्द्धक्य
शून्यः। यथा। अजरामरवत्
प्राज्ञो विद्यामर्थञ्च चिंतयेत्।
इति हितोपदेशः
अजरा स्त्री जीर्णफञ्जीलता हड
दारकाभेदः॥ गृहकन्या।
घृतकुमारीतिख्याता। इति
राजनिर्घंटः ॥
अजर्य्यं क्ली संगते सौहार्दे।
इति हेमचंद्रः॥ अजराह त्रि ॥
अजलंबनं क्ली स्रोतोञ्जने।
इति शब्दचन्द्रिका ॥
अजलोमा न् पुं वृक्षविशेषः।
शुयाशिषा। शूयाशिम्बी इति च
भाषा तत् पर्य्यायः शिखी २
केशी ३ महालोमा ४ अग्रपर्णी
५ इति रत्नमाला ॥
अजशृंगी स्त्री वृक्षविशेषः।
गाडरशिङ्गी मेढाशिंगी इति।
ख्याता। तत्पर्य्यायः। विषाणी २
इत्यमरः ॥ विषाणिका ३
वक्रश्रेणी ४ अजगंधिनी ५ मेषी
६ नेत्रौषधी ७ आवर्त्तिनी ८
इति रत्नमाला मेषशृंगी ९
वर्तिका १० सर्पदंष्ट्रिका ११
चक्षुष्या १२ तिक्तदुग्धा १३ पुत्रशृंगी
१४ कर्णिका १५ अस्या गुणाः।




कटुत्वं । तिक्तत्वं कफार्शः ॥
शूलशोथश्वासहृद्रोग विषरोग
कासकुष्ठ नाशित्वं । वस्तिहित
कारित्वञ्च ॥ तत्फलस्य गुणाः ।
तिक्तत्वं उष्णत्वं । कटुत्वं । कफवायु
नाशित्वं । जठरानलरुचिकारित्वं
। लघुत्वं । लवणाम्लरसत्वञ्च ।
इति राजनिर्घण्टः ॥
अजस्रं क्ली निरन्तरं । सततं
इत्यमरः ॥

अजहत् स्वार्था स्त्री लक्षणाख्य
वृत्ति । विशेषः उपादानलक्षणा
स्वीयार्थात्यागिनी लक्षणा यथा
कुन्ताः प्रविशन्तीत्यत्र कुन्तधारि
पुरुषे लक्षणा इत्यलंकारशास्त्रं
अजहल्लिङ्गः विशेषणभूतोपि
स्वलिङ्गात्यागी शब्दः इति व्याकर
णं अजहा स्त्री शूकशिम्बी इत्यमर
टीकायां स्वामी ॥ अत्याज्ये त्रि ॥
अजा स्त्री छागी । इत्यमरः ॥
माया । आद्यशक्तिः । इति ॥
पुराणं ॥
अजागरः पुं भृङ्गराजवृक्षः इति
शब्दरत्नावली जागरणरहिते त्रि
अजाजी स्त्री श्वेतजीरकः ॥
कृष्णजीरकः ॥ काकोडुम्बरिका
इति राजनिर्घण्टः

अजाजीवः पुं जावालः ।
छागोपजीवी । इत्यमरः ॥
अजातः त्रि अजन्मविशिष्टः ॥
अनुत्पन्नः । यथा । अजात पक्षा
इव मातरं खगाः । इति ॥
श्रीभागवतं ॥
अजातशत्रुः पुं राजयुधिष्ठिरः
इति हेमचन्द्रः ॥
अजातारिः पुं राजायुधिष्ठिरः
इति भूरिप्रयोगः ॥
अजादनी स्त्री क्षुद्रदुरालभा ।
इति राजनिर्घण्टः ॥
अजानेयः पुं उत्तमघोटकः ।
तत्पर्य्यायः । हयोत्तमः २॥
वाताश्वजात्यः ३ । इति ॥
त्रिकाण्डशेषः ॥ आजानेयः ४
कुलीनः ५ इत्यमरः निर्भये त्रि
इति त्रिकाण्डशेषः ॥
अजस्त्री स्त्री वृक्षविशेषः ।
नीलवर्णीवाना इति भाषा । तत्
पर्य्यायः । नीलवुह्ना २ नीलपुष्पी
३ अतिलोमशा ४ - नीलिनी ५
छगलाक्षी ६ अण्डः कोटरपुष्पी ७
इति रत्नमाला वस्ताक्षी ॥
वृहद्दारकः ॥ इति राजनिर्घण्टः ॥
अजापालकः त्रि अजजीवी ।
छागरक्षकः इति शब्दरत्नावली

अजिते त्रि अनिर्जिते । इति हेमं
चन्द्रः ॥ अतिपराजितश्च ॥
अजितः पुं विष्णुः बुद्धः तीर्थ
कृज्जैनविशेषः । इति हेमचन्द्रः
शिवः । इति तस्य सहस्रनाम मध्ये
पठितः ॥
अजिनः क्ली चर्म्मब्रह्मचार्यादिधार्य्य
कृष्णसारादित्वक् इत्यमरः ॥ जिन
भिन्नेवाच्यलिङ्गं ॥
अजिनपत्रा स्त्री चर्म्मचाटकावाम
चिका इति ख्याता । तत् पर्य्यायः
जतुका २ इत्यमरः ॥ जतूका ३
इति तट्टीका ॥
अजिनपत्रीजतुका । इति राज
निर्घण्टः ॥
अजिनयोनिः पुं हरिणः इत्यमरः
अजिरं क्ली चत्वरं वायुः शरीरं
मंडूकः विषयः । इति मेदिनी ॥
अजिह्मं त्रि अवक्रे सरले इत्यमरः
भेके पुं इति शब्दरत्नावली ॥
अजिह्मगः पुं वाणः । इत्यमरः ॥
अवक्रगवाच्यलिङ्गः ॥
अजिह्वः पुं भेकः इति त्रिकाण्डः
शेषः ॥ जिह्वारहिते त्रि ॥
अजीर्णं क्ली अपाकः तत्पर्य्यायः

वायुगण्डः २ अन्तर्वमिः ३ पक्तिनाशः
४ । इति त्रिकाण्डशेषः अस्य ॥
निदाने परिशिष्टे द्रष्टव्यं ॥
अजीवः त्रि मृतः ॥ अवसन्नः
इति ॥ त्रिकाण्डशेषः ॥
अजीवनिः स्त्री जीवनाभावः
अक । रणिः । शापः । यथा तस्याजन
नि । रेवास्तु इत्यमर टीकायां भवतः
अजीवनि स्तव भूयात् । इति
मुग्धबोधे ॥
अजेयः त्रि अजेतव्यः अजयनी
यः । इति नञ्पूर्व्वक जिधातोः कर्म्मणि
यप्रत्ययः ॥
अजैकपात् पुं एकादशरुद्रा
न्तर्गत ॥ रुद्रविशेषः इति शब्दमाला
अजैकपादः पुं रुद्रविशेषः इति
जटाधरः केचित्तु गौथादसंधि
रपि विष्णुपुराणे चन्द्रकलापश्च
स्ता वेअजएकपादिति ॥
अज्जुका स्त्री नाट्योक्तौ वेश्या
इत्यमरः ॥
(त्यमरः
अज्झटा स्त्री भूम्यामलकी । इ
अज्झलं क्ली फलकं । ढाल इति
ख्यात । इति हेमचन्द्रः ॥
अज्ञः त्रि जडः ॥ मूर्खः इत्यमरः



अज्ञानं क्ली विरुद्धज्ञानं। तत
पर्य्यायः अविद्या १ अहंमतिः
२। इत्यमरः सृष्टिकाले ब्रह्मा प्रथ
मे पंचप्रकारमज्ञानं ससर्ज यथा
तमः १ मोहः २ महामोहः ३
तामिस्रं ४ अंधतामिस्रं ५ इति
श्रीभागवतं॥ वेदांतमत सदस
द्भ्यामनिर्व्वचनीये त्रिगुणात्मके
भावरूपं ज्ञानविरोधि यत् किंचित
ज्ञानरहिते त्रि ॥
अञ्चतिः पुं वायुः। इति त्रिकांड
शेषः ॥
अंचलः पुं वस्त्रप्रांतभागः। आंच
ल। इति भाषा इति हलायुधः
अंचितः त्रि पूजितः इत्यमरः
अंचितभ्रूः स्त्री सुंदरभ्रूयुक्तनारी
इति स्त्री पर्य्याये राजनिर्घंटः॥
अंजनं क्ली म्रक्षणं गमनं व्यक्ती
करणं इत्यनट् प्रत्ययांतोंजधातो
र्थः॥ कज्जलं। अस्य गुणाः तारा
नैर्मल्यकारित्वं। निर्मलचंदत
ल्यं। निराकुलदृष्टिकारित्वं च
इति राजवल्लभः॥ सौवीरांजनं
रसांजनं। अंजिः मसी इति हेम।
चंद्रः॥ अग्निः इति विश्वः॥ आल

ङ्कारिक भाषया अञ्जनाख्य हस्तिः
यथा अनेकार्थस्य शब्दस्य वाचकत्वे
नियंत्रिता संयोगाद्यैरवाच्यार्थ।
धीकृद्व्यापृतिरंजनं॥ इति काव्य
प्रकाशः ॥
अंजनः पुं पश्चिमदिग्गजः स्त्री ॥
ज्येष्ठी। जटी इति भाषा। इति ॥
विश्वमेदिन्यौ ॥
अंजनकेशी स्त्री हट्टविलासिनीनाम
गंधद्रव्यं इत्यमरः ॥
अञ्जना स्त्री वानरीविशेषः साच
हनुमन्माता। इति मेदिनी ॥
अंजनाधिका स्त्री अंजनिका इति
हेमचंद्रः ॥
अंजनावती स्त्री सुप्रतीकनामदि
ग्गज॥ भार्य्या। इत्यमरः ॥
अंजनिका स्त्री ज्येष्ठीविशेषः अंज
ना इति अंजिना इति च भाषा॥
तत्पर्य्यायः अंजनाधिका २ हा
लिनी ३ हलाहलः ४ इति हेम॥
चंद्रः॥ लघुमूषिका। इति जटाधरः
अंजनी स्त्री लेप्यनारी। चंदनादि।
लेपनयोग्या॥ इति विश्वमेदिन्यौ।
कटुकाहस्तः कालांजनी हस्तः।
इति राजनिर्घंटः ॥

अंजलिः पुं हस्तसंपुटः। आंजला
इति भाषा॥ कुडव परिमाणं।
इति मेदिनी ॥
अंजलिका स्त्री बालमूषिका इति
जटाधरः अंजनिका इति च पाठः
अंजलिकारिका स्त्री लज्जालुलता
इति राजनिर्घंटः॥ पुत्तलिका
इति हेमचंद्रः
अंजसः त्रि अवक्रः ऋजु इति
हेमचंद्रः ॥
अंजसा अव्य द्रुते शीघ्रे यथार्थः
प्रकृते इत्यमरः ॥
अंजिः पुं प्रेषणिकः प्रेरकः।
इत्युणादिकोषः ॥
अंजिष्टः पुं सूर्य्यः इत्युणादि
कोषः
अंजीरं क्ली स्वनामख्यातफलवृक्ष
विशेषः। आंजिर इति पेयारा
इति च भाषा तत्पर्य्यायः अंजलं
काकोडुम्बरिकाफलं॥ अस्य गुणाः
शीतलत्वं स्वादुत्वं गुरुत्वं।
वातपित्तरक्तक्रिमि शूलरुजापीन
कफ मुखवैरस्यनाशित्वं अग्नि
कारित्वञ्च लघ्वंजीरं तस्मादल्पगुणं
इति राजवल्लभ राजनिर्घंटौ ॥

अट० गत्यां। इति कविकल्पद्रुमः
अटनं क्ली भ्रमणं यथा सर्वज्ञत्व
मथीश्वरत्व मगमत् मां च भिक्षा
टनं। इति घंटाकर्णः ॥
अटनिः स्त्री धनुरग्रभागः धनुकेर
हुल् इति भाषा। इत्युणादि ॥
कोषः ॥
अटनी स्त्री अटनिः धनुष्कोटिः
इत्यमरः ॥
अटरूषः पुं वासकवृक्षः इत्यमरः
अटरूषः पुं वासकवृक्षः इत्यमरः
टीकायां रायमुकुटः ॥
अटवि स्त्री वनं इति रायमुकुटः
अटवी स्त्री वनं इत्यमरः ॥
अटा स्त्री पर्यटनं भ्रमणं इति
रत्नकोषः नीलकंठश्च ॥
अटाटा स्त्री पर्य्यटनं इत्यमरः॥
पुनः पुनर्भ्रमणं अतिशय भ्रमणं
इति व्याकरणं ॥
अट्ट उ० अतिक्रमे वधे। इति ॥
कविकल्पद्रुमः ॥
अट्ट क लोक्यो अनादरे। इति ॥
कविकल्पद्रुमः ॥
अट्टं क्ली भक्तं अन्नं इति ॥
मेदिनी भूरिप्रयोगाश्च ॥

अट्टः पुं क्षौमः । इत्यमरः ॥ हर्म्यादिगृहं । इति भरतः ॥ प्राकारस्योपरिस्थितरणगृहं । इति कौटिल्यः ॥ अट्टेति ख्यातगृह ॥ विशेषः । इति कोकटः प्राकार ॥ मंडपस्योपरिशाला इति केचित् हर्म्यादि वात कुटिका । इति केचित् ॥ मंडपोपरि हर्म्य पृष्ठं । इति केचित् प्राकारस्यारण्यौ । अन्तरे क्षौमाख्या अट्टः । इति भट्टः अतिशयः इति मेदिनी ॥ अट्टः । इति हेमचंद्रः ॥ अट्टहट्ट अन्नञ्च इति जटाधरः ॥ अट्टन्तं क्ली चक्रफलास्त्रं । इति त्रिकांडशेषः ॥

अट्टहासः पुं महत्तरोहासः । अट्टहासक हास्ये । इति हेमचंद्रः ॥ अट्टहासकः पुं कुंदपुष्पवृक्षः इति राजनिर्घंटः ॥

अट्टहासी न् पुं शिवः इति हेमचंद्रः ॥

अट्टालः पुं प्राकारादुपरितनमन्दिर स्थाने । इति क्षीरस्वामी ॥ यथा । भज्यमानपुरोद्यानप्राकाराट्टालगोपुरं । इति श्रीभागवतं ॥

अट्टालकः पुं उपरितनगृहं अट्टालिकोपरि गृहं तत् पर्यायः । क्षौमः २ अट्टः ३ । इति हेमचंद्रः अट्टालिका स्त्री राजगृहं तत् पर्यायः नृपागारं २ हर्म्यं ३ सौधं ४ धवलागारं ५ । इति जटाधरः ॥

अट्टालिकाकारः पुं शूद्रागर्भे विश्वकर्मजात जातिविशेषः ॥ तस्य कर्म गृहनिर्माणादि राज इति । थवई इति भाषा कुलटायां च । शूद्रायां चित्रकारस्य वीर्यतः अट्टालिकाकारः पतितो जारदोषतः इति ब्रह्मवैवर्तपुराणं ॥

अटा स्त्री परिभ्रमणं पर्यटने इत्यमरटीकायां रायमुकुटः यथा तीर्थत्रिकं ह्यपाटा च कामजो दशाको गणः इति स्मृतिः ॥

अठि ०
अठि इ उ ० } गतौ । इति कविकल्पद्रुमः

अड उ उद्यमे इति कविकल्पद्रुमः

अड्ड न व्याप्तौ । इति कविकल्पद्रुमः

अडु ० अभियोगो । समाधाने इति कविकल्पद्रुमः ॥

अण ० रवे । इति कविकल्पद्रुमः

अण उ य जीवने । प्राणने । इति कविकल्पद्रुमः ॥

अणकः त्रि कुत्सितः । अधमः ॥ इत्यमरः ॥

अणव्यं क्ली आणवीनं । अणुधान्योत्पादक क्षेत्रे । इति रायमुकुटः ॥

अणिः पुं स्त्री अक्षाग्रकीलकः रथचक्राग्रस्थितकीलः । इत्यमरः अश्रिः । सूच्याद्यग्रभागः ॥ सीमा इति मेदिनी ॥ तस्य रूपान्तरे । अणी । आणिः । इत्यमर टीका

अणिमा न् पुं अणोर्भावः । अणुत्वे सूक्ष्मता इति व्याकरणं ॥ अष्टविधैश्वर्य्य मध्ये ऐश्वर्य्यविशेषः इत्यमरः ॥ यत् प्रभावात् देवाः सिद्धाश्च सूक्ष्मीभूय सर्वत्र विचरंति कैश्चिदपि न लक्ष्यन्ते । इति ॥ तट्टीका ॥

अणीयः स् त्रि अत्यल्पे अतिसूक्ष्मे इत्यमरः ॥

अणु त्रि क्षुद्रे सूक्ष्मे । इति ॥ मेदिनी ॥

अणुः पुं लेशः व्रीहिविशेषः सूक्ष्मधान्ये । चिना इत्यादिभाषा । इत्यमरः

अणुजः त्रि चेतनः । निपुणः ॥ अल्पः । स्तोकः इति मेदिनी ॥

अणुभा स्त्री विद्युत् । इति ॥ त्रिकांडशेषः ॥

अणुरेवती स्त्री दंतीवृक्षः । इति राजनिर्घंटः ॥

अणुव्रीहिः पुं सूक्ष्मधान्ये । तत् पर्यायः । प्रसातिका २ । इति रत्नमाला ॥

अंडं क्ली पक्ष्यादिप्रादुर्भावक ॥ कोषः । अंडा । डिम् इति भाषा तत् पर्यायः । पेशी २ कोषः ३ इत्यमरः ॥ पेशिः ४ कोशः ५ पेशीकोषः ६ इति तट्टीका ॥ डिम्बः ७ इति मेदिनी ॥ मत्स्य ॥ पक्षिकूर्माडस्य गुणाः स्वादुत्वे कटुपाकित्वे । रुचि शुक्रकारित्वे वातश्लेष्मनाशित्वञ्च । इति ॥ राजवल्लभः ॥ मुष्कः वीर्य्य ॥ इति विश्वः मृगनाभिः इति केचित् ॥

अंडकः पुं अंडकोषः इति हेमचन्द्रः ॥

अंडकोटरपुष्पी स्त्री अजान्त्री वृक्षः नीलपुष्पा । नीलपुष्पा इति ॥ ख्याता । इति काविरत्नमाला ॥ क्षेतः कोटरपुष्पी इत्यपि पाठः ॥

अंडकोशः पुं अंडकोषः ।



…इत्यमरटीकायां ॥
अण्डकोषः पुं स्वनामख्यातशरीरावयवविशेषः तत्पर्य्यायः मुष्कः २ वृषणः ३ इत्यमरः अण्डं ४ पेलं ५ अण्डकः ६ इति हेमचन्द्रः ॥ बीजपेशिका ७ ॥ इति राजनिर्घण्टः । सीमा ८ । इति जटाधरः फलकोषकः ९ । इति त्रिकाण्डशेषः ॥ फलं १० ॥ इति रामायणे ॥
अण्डकोषकः पुं अण्डकोषः । इति शब्दरत्नावली ॥
अण्डजः पुं पक्षी ॥ सर्पः ॥ मत्स्यः ॥ कृकलासः इति ॥ विश्वमेदिन्यौ ॥ अण्डजात मात्रे त्रि । इत्यमरः ॥
अण्डजा स्त्री मृगनाभिः ॥ कस्तूरी । इति विश्वमेदिनी हेमचन्द्राः ॥
अण्डालुः पुं मत्स्यः ॥ इति शब्दचन्द्रिका ॥
अण्डीरः पुं पुरुषः शक्तः इति मेदिनी ॥
अण्वी स्त्री अङ्गुलिः । अस्याः प्रचुरप्रयोगो वेदे ॥ क्षीणा ॥
अत इ बन्धने । इति कविकल्पद्रुमः
अत ई बन्धने इति कविकल्पद्रुमः
अत० सातत्यगतेनिरन्तरगमने ॥ प्रापणेच । इति कविकल्पद्रुमः ॥
अतः स व्य कारणं ॥ अपदेशः ॥ निर्देशः इति विश्वः ॥ एतद्शब्दात् तस् प्रत्यये एवमेव रूपे अत एव व्य अस्मादेव । एतत् कारणेनैव । अनेनैव हेतुना । यथा अत एव महेशानि वलयोः समता भवेत् इति सारदातिलकटीकायां राघवभट्टः अत एव पुं इति वोपदेवः ॥
अतटः पुं पर्वतस्योच्चस्थाने तत्पर्य्यायः । प्रपातः २ भृगुः ३ इत्यमरः ॥
अतर्कः पुं अहेतुकः । पक्षतर्कपरः । इति महाभारतदानधर्मः ॥
अतलं क्ली प्रथमखण्डपातालं इति भूरिप्रयोगः ॥
अतलस्पर्शः त्रि अगाधः ॥ अतिगभीरः इत्यमरः ॥
अतलस्पृक् त्रि अतलस्पर्शः । तत्पर्य्यायः । अस्था २ अस्थाघ अस्ताघं ४ अगाधं ५ इति । हेमचन्द्रः ॥
अतसः पुं वायुः । इत्युणादिकोषः आत्मा । इति सिद्धान्तकौमुद्या ॥ मुणादिवृत्तिः वल्कलनिर्म्मितवस्त्रं । यथा अतसः क्षौमे प्रहरणे

वायुश्चेति धातुकौ माधवः ॥
अतसी स्त्री क्षुद्रपुष्पवृक्षविशेषः मसिना इति ख्याता । तत् पर्य्यायः उमा २ क्षौमी ३ उमा ४ रुद्रपत्नी ५ सुवर्च्चला ६ । इति रत्नमाला ॥ पिच्छिला ७ देवी ८ मदगन्धा ९ मदोत्कटा १० हैमवती १२ सुनीला १३ नीलपुष्पिका १४ अस्या गुणाः उष्णत्वं । तिक्तत्वं वातहारित्वं श्लेष्मपित्तकारित्वञ्च अस्यास्तैलस्य गुणाः मधुरत्वं । पिच्छिलत्वं । मदगन्धित्वं कषायत्वं वायुकफकासनाशित्वं । स्वादुत्वं । उष्णत्वं अम्लत्वं । पाके कटुत्वञ्च । इति राजवल्लभ राजनिर्घण्टौ शणवृक्षः इत्यमरटीका ॥
अति व्य प्रशंसा ॥ प्रकर्षः ॥ लङ्घन । इति विश्वमेदिन्यौ ॥ अतिशये ॥ क्रान्ते ॥ पूजने असम्भावना । इति दुर्गादासः प्रादि विंशत्युपसर्गान्तर्गतोऽयं
अतिकथः त्रि अश्रद्धेयः ॥ नष्टः इति मेदिनी ॥ नष्टधर्म्मः । इति हेमचन्द्रः ॥
अतिकथा स्त्री अपार्थवाक्यं वृथाभाषणं । इति विश्वहेमचन्द्रश्च
अतिकन्दकः पुं हस्तिकन्दवृक्षः इति राजनिर्घण्टः ॥
अतिकेशरः पुं कुब्जकवृक्षः । इति राजनिर्घण्टः ॥
अतिक्रमः पुं क्रमोल्लङ्घनं । तत् पर्य्यायः । अतिपातः २ उपात्ययः ३ पर्य्ययः ४ अभिक्रमः । रणे शत्रून् प्रति अभीत योधादेर्गमने । इत्यमरः ॥
अतिक्रान्तः त्रि कृतातिक्रमः कृतक्रमोल्लङ्घनः । यथा राजानमतिक्रान्ता अतिराजी । इति ॥ वोपदेवः ॥ अतीतः । यथा वेगेन समतिक्रान्ते गतोऽयमिति लक्ष्यते । इति शब्दार्थः
अतिक्रामकः त्रि अतिक्रमकर्त्ता क्रमोल्लङ्घकः । अतिपूर्वक्रमधातोः कर्त्तरि णकः ॥
अतिगण्डः पुं विष्कम्भादि सप्तविंशति योग मध्ये षष्ठ योगः तत्र जातफलं कलिप्रियो वेदविनिन्दकश्च धूर्त्तः कृतघ्नो गलरोगयुक्तः । सरोमदेहः पुरुषोऽतिदीर्घः प्रकाण्डगण्डस्त्वतिगण्डजन्मा इति कोष्ठीप्रदीपः ॥
अतिगन्धः पुं भूतृणं चम्पकः मुद्गरवृक्षः ॥ गन्धकः । इति ॥

राजनिर्घण्टः ॥
अतिगन्धालुः पुं पुत्रदात्रीलता
इति राजनिर्घण्टः ॥
अतिगर्व्वितः त्रि महाहङ्कृतः।
अतिशयगर्व्वयुक्तः तत्पर्य्यायः।
समुद्धः २। इति हलायुधः ॥
अतिगुहा स्त्री पृश्निपर्णीविशेषः
तद्द्वाकुलिया इति भाषा इति
रत्नमाला गुहातिक्रामके त्रि ॥
अतिचरा स्त्री पद्मचारिणीवृक्षः
स्थलपद्मिनी। इत्यमरः राजनिर्घण्टः
श्च। अतिचारः पुं शीघ्रगमने।
अतिक्रम्य गमने। कुजादि।
पञ्चग्रहाणां राशि भोग।
कालासमाप्तौ राश्यन्तर गमने।
तत्र पूर्व्वराशि गमने वक्रातिचारः
पर राशि गमने अतिचारः।
यतो गुरोरब्द कालो भवति।
गुरुस्तु यदि पुनः पूर्व्वराशिं नाया
ति। तदा महातिचारः तेन लुप्त
सम्वत्सरो भवति। ग्रहाणां स्व
भोग्यमन्नराश्यावपि वक्रातिचारौ
भवतः। तत्र नाकालिः। इति।
स्मृतिज्योतिषे ॥
अतिच्छत्रः पुं भूतृणं। इति
राजनिर्घण्टः जलतृणविशेषः
अरुणवर्णा कल्याख्या। इति ख्यातः

॥ इति रत्नमाला ॥ छत्रा।
कांटछाति। भूइंछाति।
पोयालछाति इति ख्याता।
इत्यमरः ॥
अतिच्छत्रकः पुं छत्रवृक्षः।
कातारियाविष इति ख्यातः ॥
तस्य मूले पत्रे च वचाकारः कटुरसश्च
इति रत्नमाला ॥ भूतृणं ॥
इति राजनिर्घण्टः ॥
अतिच्छत्रा स्त्री शताह्वा पुष्पी।
मौरी इति ख्याता। इत्यमरः ॥
शताह्वा। शालुफा। इति प्रसिद्धा
इति रत्नमाला ॥
अतिजवः त्रि अतिशीघ्रगामी
अतिवेगवान्। तत्पर्य्यायः।
जङ्घालः २। इत्यमर जङ्घिलः ३
अतिवलः ४ इति तट्टीका ॥
अतिजागरः पुं नीलक्रौञ्चः।
कालवकः। इति राजनिर्घण्टः
अतिडीनं क्ली पक्षिणां प्रचण्ड
गमनं। इति महाभारतं ॥
अतितीव्रा स्त्री गण्डदूर्व्वा। इति।
राजनिर्घण्टः ॥
अतिथिः पुं कुशपुत्रः। स च
श्रीरामचन्द्रस्य पौत्रः। इति।
मेदिनी ॥ कोयः। इति विश्वः
अतिथिः त्रि अज्ञातपूर्व्वगृहागत

व्यक्तिः। इति श्रीधरस्वामी अतिथ
इति भाषा। तत्पर्य्यायः आगन्तुः
२ आवेशिकः ३ गृहागतः ४।
इत्यमरः स्त्रीलिङ्ग आवेशिकी
५ अतिथी ६। इति तट्टीका ॥
सारसुन्दरी। अगान्तुः ७। इति
हरुचन्द्रः ॥ प्राघूर्णः ८ अभ्यागतः ९
प्राघूर्णिकः १० इति हेमचन्द्रः।
प्राघुणिकः ११ इति विश्वः प्राघुणः
१२। इति त्रिकाण्डशेषः ॰ ॥
तस्य लक्षणं। यस्य न ज्ञायते नाम
न च गोत्रं न च स्थितिः अकस्मात्
गृहमायाति सोऽतिथिः प्रोच्यते
बुधैः ॰ तस्य निवर्त्तने गृहस्थस्य
दोषा यथा अतिथिर्यस्य भग्नाशो
गृहात् प्रति निवर्त्तते स तस्मै
दुष्कृतं दत्वा पुण्यमादाय गच्छति
इति पुराणं ॰ तस्य गृहणकालः
तेन गोदोह मात्रस्य काले ॥
तिष्ठन् गृहाङ्गनेऽतिथिर्गृहस्थस्य
तदर्द्धं वा यदृच्छया ॥ इति ॥
विष्णुपुराणं ॰ गोदोहकालश्च
मुहूर्त्ताष्टम भागः ॥ यथा।
आवश्यं ततः कुर्य्यात् प्राज्ञो
द्वारावलोकनं मुहूर्त्तस्याष्टमे
भागमुदीक्ष्यो ह्यतिथिर्भवेत् ॥
इति मार्कण्डेयपुराणं ॰ तस्य

मूर्खत्वादि विचारो नास्ति प्रियो वा
यदि वा द्वेष्यो मूर्खः पतित एव वा
सम्प्राप्तो वैश्वदेवान्ते सोऽतिथिः
स्वर्गसंक्रमः इति पराशरः ॰।
तस्य वेदादयो न प्रष्टव्याः।
स्वाध्यायगोत्रचरणमपृष्ट्वापि तथा
कुलं हिरण्यगर्भ बुद्ध्या तं
मन्येताभ्यागतं गृही ॥ इति
विष्णुपुराणं ॥ ॰ तस्य देशादौ।
दृष्टे दोषः। देशं नाम कुलं
विद्यां पृष्ट्वा यो अन्नं प्रयच्छति न स
तत्फलमाप्नोति दत्वा स्वर्गं न गच्छति
इति स्मृतिः ॥ ॰ ॥ अतिथये ॥
पाकानुसारेण दातव्यं भोजनं
हन्तकारं वा अग्रं भिक्षामथापि वा
अदत्वा नैव भोक्तव्यं यथा।
विभवमात्मनः ॥ इति
मार्कण्डेय पुराणं ॥ ॰ भिक्षादि
लक्षणं ग्रासप्रमाणं भिक्षा स्यादग्रं
ग्रासचतुष्टयं अग्राच्चतुर्गुणं प्राहुः
हन्तकारं द्विजोत्तमाः ॥ इति।
मार्कण्डेयपुराणं ॥ इत्याह्निक
तत्त्वं ॥ ॰ ॥
अतिथिपूजनं क्ली अतिथिसेवा
आतिथ्यक्रिया तत्पर्य्यायः।
नृयज्ञः २ इति हेमचन्द्रः ॥
अतिदानं क्ली बहुदानं ॥

अपरिमितदाने यथा अतिदाने
बलिर्बद्धो अतिमानेन कौरवाः ।
अतिरूपे हृता सीता सर्वमत्यन्त
गर्हितं इति चाणक्यः ॥
अतिदिष्टः त्रि अतिदेशविशिष्टः
यथा न समानगोत्रां भार्य्यां
विन्देतेत्यनेन शूद्रस्यापि सगोत्रा
कथं न निषिध्यते इति चेदत्र
उपदिष्टातिदिष्टगोत्रस्यैव निषेधा
न त्वतिदिष्टातिदिष्टशूद्रगोत्रादेः
इत्युद्वाहतत्त्वं ॥
अतिदीप्यः पुं रक्तचित्रकवृक्षः
इति राजनिर्घण्टः ॥
अतिदेशः पुं अन्यधर्म्मस्यान्यत्र
आरोपणं यथा इणवादिक
इत्यादिः इति दुर्गादासः
कारिकायथा प्रकृतात् कर्म्मणो
यस्मात् तत् समानेषु कर्म्मसु
धर्म्मातिदिश्यते येन अतिदेशः
स उच्यते इति मलमासतत्त्वं ॥
स तु षड्विधः । शास्त्रातिदेशः १
यथा नित्येन तुल्यं शेषं स्यात्
इत्यत्र तुल्यशब्देनातिदेशः
कार्य्यातिदेशः २ यथा अप्रयाजास्ते
इत्यत्र कार्य्येण निर्देशनं दर्श
पौर्णमास धर्म्मातिदेशः २
निमित्तातिदेशः ३ यथा विकृतौ
मौद्गचरुप्रयोगे व्रीहिकार्य्यकारिणि
मुद्गे व्रीहिकार्य्य निमित्तत्वात्
धर्म्माः प्रोक्षणादयः कल्प्यन्ते ३
व्यपदेशातिदेशः ४ यथा
मासमग्निहोत्रं जुहोति इत्यत्र
मासस्याध्ययनाख्ययोगे अग्निहोत्र
यद्व्यपदेशात् अग्निहोत्रं ।
धर्म्मातिदेशः ४ रूपातिदेशः ५
यथा यजमानाद्भिन्नो यूपः इत्यत्र
यूपे यजमानादन्यत्वरूपावगमात्
यजमानधर्म्मस्य तदीय परिमाण
स्यातिदेशः । इति श्राद्धविवेक
टीकायां श्रीकृष्णः ॥
अतितनु त्रि अतीवतनौ के ।
नावमतिक्रान्ते नावोत्तीर्णे ।
इत्यमरः तस्य पुं स्त्री लिङ्गयोः ।
अतिनौः इति रूपं ॥
अतिपतने स्त्री अत्ययः अतिक्रमणं
इति शब्दरत्नावली ॥
अतिपन्थाः पुं सन्मार्गः सत्पथः
इत्यमरः ॥
अतिपत्रः पुं हस्तिकन्दवृक्षः
शाकवृक्षः इति राजनिर्घण्टः
अतिपातः पुं अतिक्रमः ॥
उपात्ययः पर्य्यायः इत्यमरः ॥
अतिपातकं क्ली नवविधपाप
मध्ये गुरुतरपातकं तत्त्रिविधं ॥

पुंसः मातृदुहितृस्नुषागमनजन्यं
स्त्रियाश्च पुत्रपितृश्वशुरगमन
जन्यं । इति प्रायश्चित्तविवेकः ॥
अतिबलः त्रि प्रबलः अतिशय
बलवान् प्रकृष्टबलविशिष्टः ।
इति मेदिनी ॥
अतिबला स्त्री पीतबला ॥
पीतवर्णवाडियाला इति ख्याता
पिटारणी इति मदनविनोदः
गाङ्गेरुकीभेदः इति राजनिर्घण्टः
तत्पर्य्यायः बलिका २ बल्या ३
विकङ्कता ४ वाट्यपुष्पिका ५ घण्टा ६
शीता ७ शीतपुष्पा ८ भूरिबला ९
वृष्यगन्धिका १० तस्या गुणाः ।
तिक्तत्वं कटुत्वं वातकृमिनाशित्वं
दाहतृष्णाविषच्छर्दिक्लेदोपशमन
कारित्वञ्च । इति राजनिर्घण्टः ।
अतिभारगः पुं खेसर खच्चर
इति भाषा इति राजनिर्घण्टः ॥
अतिभीः पुं वज्रज्वाला इति
हलायुधः ॥
अतिभूमिः स्त्री आधिक्यं
यथा प्राप्य मन्मथमदादतिभूमिं
दुर्वहस्तनभराः सुरतस्येति ॥
माघः अतिशायितभूमिः ॥
अतिमङ्गल्यः पुं बिल्ववृक्षः ।
इति रत्नमाला अतिशयमङ्गल
। जनके त्रि ॥
अतिमर्य्यादः त्रि अतिशयितः ।
इति हेमचन्द्रः अतिशये क्ली ॥
अतिमात्रं क्ली अतिशयः तद्युक्ते ।
त्रि इत्यमरः ॥
अतिमुक्तः पुं माधवीलता ॥
इत्यमरः ॥ तिनिशवृक्षः इति
हेमचन्द्रः ॥
अतिमुक्तः त्रि निष्कलः निःसङ्गः
इति विश्व मेदिन्यौ ॥ प्राप्त
निर्वाणः ॥
अतिमुक्तकः पुं तिनिशवृक्षः
इत्यमरः तिन्दुकवृक्षः पुष्पवृक्ष
विशेषः तत्पर्य्यायः पुण्ड्रकः २
मल्लिनी ३ भ्रमरानन्दा ४ कामुक
कान्ता ५ तस्य गुणाः कषायत्वं
शीतलत्वं श्रमनाशित्वं पित्त
दाहज्वरोन्माद हिक्का छर्दि ।
निवारकत्वञ्च इति राजनिर्घण्टः
अतिमोदा स्त्री नवमल्लिका इति
राजनिर्घण्टः ॥
अतिरसा स्त्री मूर्वालता रास्ना
क्लीतनकं इति राजनिर्घण्टः ॥
अतिरिक्तः त्रि अधिकः अति
शयितः तत्पर्य्यायः समधिकः
२ इत्यमरः ॥
अतिरेकः त्रि अतिशयः यथा

सम्पूर्णे तूभयो र्ज्ञेय मतिरेके ॥
परेह्नि इतितिथ्यादितत्वं ॥
अतिरोगः पुं क्षयव्याधिः
इतिराजनिर्घण्टः
अतिरोमशः पुं वनच्छागलः
इतिहारावली वृहत्वानरः इति
केचित् अतिशयलोमयुक्ते त्रि।
अतिलोमशा स्त्री नीलबुह्ना ॥
इतिरत्नमाला ॥
अतिवर्त्तुलः पुं कलायविशेषः
वांटुलाकडाई इति भाषा इति
रत्नमाला अस्य गुणाः सतीन
शब्दे द्रष्टव्याः
अतिवादः पुं अभिवादः ।
परुषोक्तिः इत्यमर टीकायां
रमानाथः ॥
अतिविकटः पुं दुष्टहस्ती इति
शब्दमाला अतिकराले त्रि।
अतिविषा स्त्री वृक्षविशेषः
आतइच आतैच इति भाषा।
तत् पर्य्यायः विश्वा २ विषा ३
प्रतिविषा ४ उपविषा ५ अरुणा
६ शृङ्गी ७ महौषधं ८ इत्यमरः
काश्मीरा ९ श्वेता १० इति ॥
रत्नमाला श्वेतकन्दा ११ भङ्गुरी
१२ भृंगरा १३ विरूपा १४
श्यामकन्दा १५ विषरूपा १६
वीरा १७ माद्री १८ श्वेतवचा १९
अमृता २० इति राजनिर्घण्टः
तस्यागुणाः पाचकत्वं ग्राहित्वं
दोषनाशित्वञ्च इति राजवल्लभः
कटुत्वं उष्णत्वं कफ पित्त
ज्वरामातिसार कास विष छर्दि
नाशित्वञ्च त्रिविधातिविषा ज्ञेया
शुक्ला कृष्णा तथारुणा रसवीर्य्य
विपाकेषु निर्विषेव गुणाधिका
इति राजनिर्घण्टः ॥
अतिविश्रव्धनवोढा स्त्री स्वीयान्तर्गत
मध्यनायिकाभेदः तस्यालक्षणं
नायकातिशय प्रश्रय युक्ता।
अस्याश्चेष्टा सेर्ष्या सापराध
नायके वक्रोक्तिः। अनेर्ष्या
सापराध नायके परुषवाक् ।
इतिरसमञ्जरी ॥
अतिवृष्टिः स्त्री अतिशयवृष्टिः
ईतिविशेषः सतु महद्वर्षणरूप
कृषिणामुत् पातः यथा अतिवृष्टि
रनावृष्टिः शलभा मूषिकाः खगाः
प्रत्यासन्नाश्च राजानः षडेते
ईतयः स्मृताः इति पराशरः ॥
अतिवेलं क्ली अतिशयः ॥
अतिवेल त्रि इत्यमरः
अतिव्यथा स्त्री अतिशय यातना
तीव्रवेदना इतिशब्दरत्नावली

अतिव्याप्तिः स्त्री अतिशयव्यापने
अलक्ष्ये लक्षणस्य गमने ।
यथा साध्याभाव वदवृत्तित्व
मिति व्याप्ति लक्षणे धूमवान्
वह्नेरित्यत्र धूमाभावाधिकरण
हृदवृत्तित्वाभावमादाय अति
व्याप्तिः इति तार्किकाः स्वा॥
व्यवहित शाक लग्न वक्रेदेन
रविभुज्यमानराशीय रविसंयोग
विशिष्टत्वातिमलक्षणकत्वमलमा (सत्वे)
भानुलङ्घिते अतिव्याप्तिवारणाय
ज्ञैत् पातिक भिन्नत्वेन विशेषणं
यं इतिमलमासतत्वटीका मुख्य
फलजनक व्यापारजनकत्वेसति
मुख्य फलाजनकत्वं अंगत्वं ।
यज्ञादावङ्गिव्याप्तिवारणाय सत्यन्ते
इति तिथ्यादितत्वटीका च ॥
अतिशक्तिता स्त्री विक्रमः ।
महाबले इत्यमरः ॥
अतिशक्तिभाक् पुं अतिशय
शक्तिविशिष्टः अतिसमर्थः ।
सवीर्य्यमतिशक्तिभाक् इत्यमरः
अतिशयः पुं अधिकः तत्
पर्य्यायः भरः २ अतिवेलं ३
भृशं ४ अत्यर्थं ५ अतिमात्रं ६
उद्गाढं ७ निर्भरं ८ तीव्रं ९
एकान्तं १० नितान्तं ११ गाढं १२
वाढं १३ दृढं १४ इत्यमरः ॥
अतिमर्य्यादः १५ उत्कर्षः १६
इतिहेमचन्द्रः बलवत् १७ सुष्ठु
१८ किमुत १९ सु २० अतीव २१
अति २२ इत्यव्ययवर्गे अमरः ॥
अतिरिक्तः २३ समधिकः २४
इतिविशेष्यनिघ्नवर्गे अमरः ॥
अतिशायने क्ली अतिशयः
उद्युक्ते त्रि इत्यमरटीकायां ॥
रमानाथः ॥
अतिशायने क्ली अतिशायने
इतिशब्दरत्नावली ॥
अतिशोभनः त्रि अतिशय ॥
शोभायुक्तः ॥ अतिश्रस्यः ।
श्रेष्ठः इत्यमरः ॥
अतिसर्जने क्ली अतिशयदाने
तत्पर्य्यायः विलम्भः २ इत्यमरः
दाने वधे इतिमेदिनी ॥
अतिसारः पुं बहुद्रवमलनिःसारण
रोगः तत्पर्य्यायः अग्रगोधिः २
उदरामयः ३ इतित्रिकाण्डशेषः
अतीसारः ४ इति वैद्यकं ।
अस्य निदानं गुर्वतिस्निग्धरूक्षोष्ण
द्रवस्थूलातिशीतलैः विरुद्धा
ध्यशनाजीर्णैर्विषमैश्चापि भोजनैः
स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैश्च
विषैर्भयैः शोकाद्दुष्टाम्बुमद्याति

यानैः सात्म्यर्त्तुपर्य्ययैः जलाभि
रमणैर्वेगविघातैः क्रिमिदोषतः
नृणां भवत्यतीसारो लक्षणं
तस्य वक्ष्यते ॥ संप्राप्ति यथा
संशम्यापां धातुरग्निं प्रवृद्धः
शकृन्मिश्रो वायुनाधः प्रणुन्नः
सरत्यतीवातिसारं तमाहुर्व्याधिं
घोरं षड्विधं तं वदन्ति ॥
एकैकशः सर्वशश्चापि दोषैः
शोकेनान्यः षष्ठ आमेन चोक्तः
॥ पूर्वरूपं यथा हृन्नाभिपायूदर
कुक्षि तोद गात्रावसादानिल ।
सन्निरोधाः विट्संग आध्मान
मथाविपाको भविष्यत स्तस्य
पुरःसराणि इति माधवकरः
अतिसारकी त्रि सातिसारः ।
अतिसाररोगयुक्तः उदरामयी
इत्यमरः ॥
अतिसाम्या स्त्री लतायष्टिमधु
इति राजनिर्घण्टः अस्या गुणाः
क्लीतनक शब्दे द्रष्टव्याः ॥
अतिस्फिरः त्रि अतिस्फूर्त्तिशाली
तत्पर्य्यायः स्फेष्ठः २ इति
जटाधरः ॥
अतिहसितं क्ली अतिशयहास्य
इति जटाधरः
अतिहासः पुं सशब्दहासः
तत्पर्य्यायः अनुस्यूतः २ इति ॥
हेमचंद्रः ॥
अतीतः त्रि गतः भूतः ॥
अतिक्रांतः यथा ननस्यन्यून
समाहेनातीताग्रणीति वत्सरे
इति वैद्यक परिभाषा संगीत
शास्त्रमते मानप्रभेदः ॥
अतीन्द्रियं त्रि अप्रत्यक्षं ।
प्रत्यक्षाविषयं इंद्रियागोचरं
इंद्रियाग्राह्यं इत्यमरः ॥
अतीव अव्य अतिशयः इत्यमरः
अतीसारः पुं अतिसाररोगः ।
इति वैद्यकं ॥
अतुलः पुं तिलवृक्षः इति
शब्दचंद्रिका तुलनारहिते त्रि
अतुल्य त्रि निस्तुल्य अनुपमा
असाम्य असदृश यथा ।
अतुल्य महसा साकं ममरामेण
विग्रहः इति भट्टिः ॥
अतुष्टिः स्त्री तुष्ट्यभावः ।
अपरितुष्टिः अन्नाभिलाषः यथा
उष्माऽल्पोऽपि तमः प्रदेशादहने
कटुत्व तिक्ता रसा वर्णाः पांडु
विवर्जितः कुपितता कर्म्माणि
विनस्यैव ॥ इति रक्षितः ॥
अतृप्त त्रि ॥
अतेजः स्त्री छाया । इति ।

राजनिर्घण्टः तेजोरहिते त्रि ॥
अत्कः पुं शरीरावयवः ।
अंगं इत्युणादिकोषः ॥
अत्कः त्रि पथिकः पान्थः
इत्युणादिकोषः
अत ट उ॰ अतिक्रमे रये ।
इति कविकल्पद्रुमः ॥
अत्ता स्त्री माता ज्येष्ठभगिनी ।
इत्यमर टीकायां रमानाथः
अत्ता मातायज स्वसा । इति
नानार्थकोषः प्राकृतभाषायां
श्वश्रूः इति साहित्यदर्पणटीका
अत्तिः स्त्री नाट्योक्तौ ज्येष्ठा
भगिनी इति शब्दरत्नावली ॥
अत्तिका स्त्री अत्तिका नाट्योक्तौ
ज्येष्ठा भगिनी इति भरतः ।
द्विरूप कोषश्च ॥
अत्नुः पुं सूर्य्यः इत्युणादिकोषः
अत्यः पुं अश्वः वैदिक
शब्दोयं ॥
अत्यंतं क्ली अतिशयः यथा
अत्यंतं कठिनौ तथापि सदया
नेदाय वक्षोरुहौ इति
नरहरिकविः
अत्यंतकोपनः त्रि अतिशय
क्रोधी तत्पर्य्यायः चंडः २
इत्यमरः
अत्यंतगामी त्रि अतिशयगमन
शीलः अतिशीघ्रगमनकर्त्ता ।
तत्पर्य्यायः अत्यंतिकः २ ।
इति हेमचंद्रः
अत्यन्तसुकुमारः पुं कंगुनीवृक्षः
इति राजनिर्घण्टः ॥
अत्यंतिकः पुं अतिशयभ्रमण
कर्त्ता अत्यंतगामी इति
हेमचंद्रः ॥
अत्यंतीनः त्रि भृशगामी ।
अतिशयगमनशीलः इत्यमरः
अत्यम्लं क्ली वृक्षाम्ल तेंतल इति
भाषा इति राजनिर्घण्टः ॥
अत्यम्लपर्णी स्त्री लताविशेषः
तत्पर्य्यायः तीक्ष्णा २ कंडुरा ३
वल्लिसूरणः ४ करवडवल्ली ५ वयस्था
६ अरण्यवासिनी ७ अस्या गुणाः
तीक्ष्णत्वं प्लीहमूलविनाशित्वं
वातहारित्वं अग्निरुचिकारित्वं
गुल्म श्लेष्मरोगापहारित्वञ्च
इति राजनिर्घण्टः ॥
अत्यम्ला स्त्री वनबीजपूरः मधुर
लेबु मधुरावा इति ख्याता इति
रत्नमाला ॥
अत्ययः पुं मृत्युः अतिक्रमः ॥
दंडः दोषः कृच्छ्रे इत्यमरः
अत्यर्थः क्ली अतिशयः तद्विशिष्टे




वाच्यलिंगे इत्यमरः ॥
अत्यल्पं त्रियत्किंचित् । अति
सूक्ष्मे तत्पर्यायः अल्पिष्ठं २
अल्पीयः ३ कणीयः ४ अणीयः ५
इत्यमरः ॥
अत्याकारः पुं न्यक्कारतिरस्कारः
इतिहेमचंद्रः ॥
अत्याचारः पुं असंगताचरणे ।
अचाराल्लिंघने । अत्यायः ॥
अत्याज्यः त्रि त्यागानर्हः ॥
अत्यक्तव्यः अत्यजनीयः ॥
अत्यालः पुं रक्तचित्रकवृक्षः
इतिराजनिर्घंटः ॥
अत्याशा स्त्री अतिशयाशा ।
अत्यंतस्पृहा असंभावनीयवांछा
यथा अत्याशास्ति रूपागता श्वग
गाणान् धन्वावतो भापि तास्त्रो
यत्तर्पिपितं क्षमोऽस्मि मम
तद्धैर्येमनो हूयते इत्युद्भटः ॥
अत्याहारी त्रि अतिशयाहार
कर्त्ता बह्वाशी अपरिमित·
भोजी ॥
अत्याहितं क्ली महाभीतिः
अतिशायं ॥ जीवानपेक्षि
कर्म । जीवनाशारहितसाहसकर्म
इत्यमरः ॥

अत्युक्तिः स्त्री अरोपितकथने ।
अतिशयोक्तिः । असंभवोक्तिः ॥
अत्युहः पुं कालकंठः ।
दात्युहयष्टी । इति मेदिनी ॥
अतिशयवितर्कः
अत्यूहा स्त्री नीलिका शेफालिका
। इतिमेदिनी ॥
अत्र व्य एतस्मिन् स्थाने इति
भाषा एतच्छब्दस्यसप्तम्याश्चादेश
कपोयं ॥
अत्रभवान् त्रि पूज्यः श्लाघ्यः
मन्यः नाटके २ स्यप्रचुरप्रयोगः
इतिहेमचंद्रः ॥
अत्रिः पुं सप्तर्षिमध्येऋषिविशेषः
सचब्रह्मणश्चक्षुर्योजातः तस्य
भार्या कर्द्दम मुनिकन्या अनसूया
पुत्रः दत्तः २ दुर्वासाः ३ चंद्रश्च ३
। इतिश्रीभागवते ॥
अत्रिजातः पुं चंद्रः द्विजन्मा
यथा अत्रिजातस्यामूर्त्तिः शशिनः
सज्जनस्यच कस्योवैवा त्रिजातस्य
तमसो दुर्जनस्यच इति
त्रिविक्रमभट्टः ।
अत्रिदृग्जः पुं चंद्रः इति
हेमचंद्रः ॥
अत्रिनेत्रजः पुं चंद्रः इति ॥
जटाधरः ॥

अत्रिनेत्रप्रसूतः पुं चंद्रः । इति
हलायुधः ॥
अत्रिनेत्रभूः पुं चंद्रः इति
त्रिकांडशेषः
अत्रभारद्वाजिका स्त्री अत्रि
भारद्वाजी विवाहः इति
शब्दरत्नावली ॥
अथ व्य मंगलं अनंतरं ॥
आरंभः प्रश्नः कात्स्न्यं ॥
इत्यमरः अधिकारः संशयः
विकल्पः समुच्चयः इतिमेदिनी
अथकिं व्य स्वीकारः इति ।
शब्दरत्नावली ॥
अथर्व न क्ली वेदविशेषः । इति
मेदिनी ॥ तत्तु चतुर्थवेदः
नवशाखायुक्तः ॥
अथर्वणः पुं शिवः । इति
त्रिकांडशेषः ॥
अथर्वणिः पुं अथर्ववेदज्ञब्राह्मणः
पुरोहितः । इति मेदिनी ॥
अथर्वा न पुं ब्राह्मणः । इतिमेदिनी
अथो व्य मंगलं आनंतर्य्यं ॥
समुच्चयः प्रश्नः आरंभः ॥
कार्त्स्न्यं अधिकारः संशयः
विकल्पः इति मेदिनी ॥
अद ३ वंधे इतिकविकल्पद्रुमः

अद ल ऊ भक्षणे । इति ॥
कविकल्पद्रुमः ॥
अदः स त्रि एतत् पुरोवर्ति एइ
इतिभाषा यं परोक्षभूते
सेइ इति भाषा इति ॥
मेदिनी ॥
अदत्ता स्त्री अविवाहितइति
स्मृतिः ॥
अदनं क्ली भक्षणे भोजने ।
इतिहेमचंद्रः ॥
अदभ्रः त्रि प्रचुरः बहुः
इत्यमरः ॥
अदर्शनं क्ली दर्शनाभावः ।
असाक्षात् । दृष्ट्यगोचरं । तत्
पर्यायः । विनाशः २ इत्यमरः ॥
अदलः पुं हिज्जलवृक्षः इति
शब्दचंद्रिका दलरहिते त्रि
अदला स्त्री घृतकुमारी इति
शब्दचंद्रिका ॥
अदाता त्रि कृपणः दानशक्ति
रहितः । यथा । अदाता पुरुष
[illegible] स्वधनेत्यज्य गच्छति इति
प्राचीनाः ॥
अदांतः त्रि तपःक्लेशासहिष्णुः
अकृतवाह्येंद्रिय निग्रहः इति
पुराणे ॥
अदितिः स्त्री दक्षप्रजापतिकन्या



सा कश्यपपत्नी देवमाताच ।
इतित्रिकांडशेषः ॥ भूमिः ॥
अखंडः इतिशब्दरत्नावली ॥
अदितिनंदनः पुं देवता ।
इत्यमरः ॥
अदृक्[श] त्रि दृष्टिरहितः अंधः
इत्यमरः ॥
अदृश्य त्रि अदर्शनीये अदृश्यं
यथा कन्याकन्याद्रेवतिकोमलं
त्रिभुवन व्याप्याप्यदृश्या जनैः
इत्युद्भटः ॥ (त्रितः
अदृष्टः त्रि अकृतदर्शनः अवी
यथा अदृष्टे दर्शनोत्कंठ
दृष्टे विच्छेद भीरुता इति
रसतरंगिण्यां भानुदत्तः ॥
अदृष्टं क्ली अग्निजलादिभया
जातभयं इत्यमरः जन्मान्तरीय
संस्कारः । भाग्यं यथा अदृष्टे
मय्यपि मदृष्टं वैभवात्करोति
सुप्तिर्जनदर्शनातिथिं इतिश्री
हर्षः । तत्त्वात्मनो अतीन्द्रियगुणः
इदं वासना जन्यं तत्स्नान
नाख्यं भोगनाश्यंच धर्माधर्म
भेदेनतत्द्विविधं धर्मस्तुस्वर्गादि
कारणं गंगास्नानयागादिजन्यः
कर्मनाशाजलास्पर्शनाशश्च
अधर्मस्तुनरकादि कारणं ॥

प्रायश्चित्तादि नाश्यश्च इति ।
भाषायांछेदः ॥
अदृष्टवान्[३] त्रि भाग्यवान् ।
कपालिया इति भाषा
अदृष्टिः स्त्री प्रतिकूलादृष्टि
कुत्सितादृष्टिः सरोषवक्रदृष्टिः
कुटिलचक्षुः असौम्याक्षि ॥
वक्रदृष्टियुक्तचक्षुः । इत्यमरः
अदृष्टिका स्त्री सरोष वक्रदृष्टिः
इतिशब्दरत्नावली ॥
अदेवमातृकः पुं देवमातृक
भिन्नदेशः नदीमातृकदेशः
यथावितन्वतिक्षेममदेवमातृकाः
इतिभारविः ॥
अद्गः पुं हृतं इति सिद्धांत
कौमुद्यामुणादिवृत्तिः ॥
अड्ड उ॰ अतिक्रमे वधे इति
कविकल्पद्रुमः ॥
अड्ड ॰ अभियोगे इति ॥
कविकल्पद्रुमः ॥
अद्धा व्य यथार्थे तत्पर्य्यायः
तत्वं २ अंजसा ३ इत्यमरः ॥
अद्भुतं क्ली अपूर्वं तत्पर्य्यायः
विस्मयः २ आश्चर्य्यं ३ चित्रं ४
तद्विशिष्टेवाच्यलिंगं इत्यमरः ॥
अद्भुतः पुं शृंगारादिनव
रसानांमध्ये रसविशेषः तस्य ॥

स्थायिभावोविस्मयः देवतागंधर्वः
वर्णः पीतः आलंबनं लोकातीत
वस्तु उद्दीपनं तद्गुण महिमा
अनुभावाः स्तंभ स्वेद रोमाञ्च ।
गद्गदस्वर विभ्रम नेत्रविकाशादयः
अस्य व्यभिचारि भावाः ।
वितर्कावेगसंभ्रांति हर्षादयः
इति साहित्यदर्पणे ॥
अद्भुतस्वनः पुं महादेवः ।
इतित्रिकांडशेषः ॥
अद्भुतसारः पुं खदिरसारः
इतिकेचित् ॥
अद्मनिः पुं अग्निः इत्युणादि
कोषः ॥
अद्मरः त्रि भक्षकः भक्षणपरः ।
इत्यमरः ॥
अद्य व्य वर्तमानदिनं । आजि
इतिभाषा इत्यमरः
अद्यतनः पुं कालविशेषः सर्व
भाष्यमते दुर्गसिंह मतेच पूर्व
रात्रिशेष दंडचं अद्यावधिकपर
रात्रिसार्द्धयाममपर्यंतः पूर्वरात्रि
शेषार्द्धावधि पररात्रि प्रथमार्द्ध
पर्य्यंतोवा भर्तृहरि क्रमदीश्वर
मतेपूर्वरात्रिशेषप्रहरावधिपर
रात्रि प्रथम प्रहरपर्य्यंतः अद्य
जातवस्तुनि त्रि ॥

अद्यश्वीनं त्रि आसन्नमरणादि ॥
अद्यश्वोवाभवति अद्यश्वीनं मरणं
इतिसंक्षिप्तसार व्याकरण
परिशिष्टे ॥
अद्यश्वीना स्त्री आसन्नप्रसवा ।
अद्यश्वोवासूते अद्यश्वीनागौः ॥
इतिसंक्षिप्तसार परिशिष्टे ॥
अद्यावधि क्ली अद्यारभ्य आजि
इस्तक इति भाषा वर्तमानदिवस
पर्य्यंते आजि लागाइत इति
भाषा ॥
अद्रिः पुं सूर्य्यः पर्वतः वृक्षः
इत्यमरः परिमाणविशेषः ।
इतिशब्दरत्नावली ॥
अद्रिकर्णी स्त्री अपराजिता इति
राजनिर्घंटः ॥
अद्रिकीला स्त्री भूमिः इति
त्रिकांडशेषः
अद्रिजं क्ली शिलाजतु इति
रत्नमाला पर्वतजात वस्तुनि त्रि
अद्रिजा स्त्री दुर्गा इतिहेमचंद्रः
सैंहली वृक्षः इतिराजनिर्घंटः
अद्रितनी स्त्री पार्वती यथा ।
पक्षाहमद्रितनया मुखपद्मजन्मेति
काव्यप्रकाशः ॥
अद्रिनंदिनी स्त्री दुर्गा हिमालयाद्रि
जातत्वात् ॥

अद्रिभिद् पुं इंद्रः । इति
त्रिकांडशेषः ॥
अद्रिभूः पुं आखुकर्णीलता ।
इतिराजनिर्घंटः
अद्रिराजः पुं हिमालयपर्वतः ।
इति हेमचंद्रः ॥
अद्रिसारः पुं लोहः इति
रत्नमाला ॥
अद्रीशः पुं शिवः हिमालयः
इतिधरणी ॥
अद्वयः पुं बुद्धः इतिहेमचंद्रः
अद्वयवादीन् पुं बुद्धः इत्यमरः ॥
अद्वितीयः त्रि द्वितीयरहितः ।
अतुल्यः । यथा । एकमेवाद्विती
यं । ब्रह्म इति वेदांतः नवास्तिनेयः
सहितो द्वितीयः । इतिनैषधे ।
अद्वैतः त्रि द्वितीयरहितः एकः
यथा यदद्वैते ब्रह्मोपनिषदि ।
उदयस्य तनुभा । इति
श्रीचैतन्यचरितामृते ॥
स
अधः व्य तले नीचे अधोभागः
यथा लोकानुपर्युपर्यास्ते
ऽधोऽधोऽप्यपि च माधवः ।
वोपदेवः पाताले योनिः ।
इति त्रिकांडशेषः ॥
अधःपुष्पी स्त्री गोजिह्वा इति

राजनिर्घंटः तृणविशेषः ।
हेठाहूली चोरखडिकाभट् इ
इति भाषा तत्पर्यायः ।
अवाक्पुष्पी २ मंगल्या ३ अमर
पुष्पिका ४ इति रत्नमाला ॥
अधःक्षिप्तः त्रि अधस्त्यक्तवस्तु
इतिजटाधरः ॥
अधमः त्रि न्यूनः निंदितः ।
अपकृष्टः । तत्पर्यायः निकृष्टः २
प्रतिकृष्टः ३ अर्वा ४ रेफः ५
याप्यः ६ अवमः ७ कुत्सितः ८
अवद्यः ९ कुपूयः १० खेटः ११
गर्ह्यः १२ अणकः १३ इत्यमरः
रेपः १४ अरमः १५ आणकः १६
अनकः १७ इति तट्टीका ॥
अधमः पुं उपपतिभेदः तस्य
लक्षणं भयदया लज्जाशून्यत्वे
कामक्रीडा विषये कर्त्तव्याकर्त्तव्य
विचारकत्वञ्च इतिरसमंजरी
अधमभृतकः त्रि अधमभृत्यः
नीचदासः दौवारिक भार ।
वाहकादयः
अधमर्णः त्रि ऋणगृहीता ऋणी
खातक इति भाषा इत्यमरः ॥
अधमा स्त्री स्वीयाद्यंतर्गतनायिका
भेदः । अस्यालक्षणं । हितकारी
प्रियतमे अहितकारित्वं अस्याः

क्रिया अधमा अस्या निष्कारण
कोपत्वात् चंडीनाम । इति
रसमंजरी ॥
अधमांगं क्ली पादः चरणः इति
शब्दचंद्रिका ॥
अधरं क्ली पुं स्मरागारं । इति
गृहं योनिरितियावत् इति
शब्दरत्नावली त्रिकांडशेषश्च
अधरः पुं मुखावयवविशेषः ।
नावीचौंट इति भाषा ओष्ठः ॥
उपरचौंट इति भाषा तयोः
पर्यायः रदनच्छदः १ दशनवासः
२ इत्यमरः परंतु द्वयोरपि
ओष्ठाधर प्रयोगः यथा रदनच्छदौ
दशनवाससी उभयत्र वर्त्तेते
तथा ओष्ठाधरावपि उभयत्रेति
नयनानंदः । रायमुकुटोप्याह
उपरिवर्त्ती अधोवर्त्तीर ओष्ठः ॥
अधरोप्येवं ॥
अधरः त्रि अधः तले हीनः
अपकृष्टः । इति मेदिनी ॥
हीनवादी । इति हेमचंद्रः ॥
अधरतः[स] व्य अधस्तात् अधोभागं
इतिहलायुधः ॥ (शृते
अधरमधु क्ली वक्त्रासवः अधरा
अधररसः इति त्रिकांडशेषः
अधरस्तात् व्य अधरतः इति


हलायुधः ॥
अधमात् व्य अधस्तात् अधरात्
दिग्वाचक शब्दात् दिग्देशकाल
वाच्य । प्रथमा पंचमी सप्तमीतो
स्यानस्तात् प्रत्ययो भवति ।
इतिव्याकरणं ॥
अधरा स्त्री अधोदिक् । इति ॥
व्याकरणं नीचा यथा अधराय
कृतायैव सा इति नैषधे ॥
अधरात् व्य अधरतः ।
अधरेण अधरस्तात् इत्यमर
टीका ॥
अधरीणः त्रि धिक्कृतः तिरस्कृतः
इतिजटाधरः ॥
अधरेण व्य अधोदिग्देशकालः
अधोदिग्देशकाले । इति ।
व्याकरणे ॥
अधरेद्युः[स] व्य अपरदिवसः ।
परदिने इतिशब्दरत्नावली ॥
अधर्म्मः पुं धर्मविरोधी सन्
ब्रह्मणः पृष्ठाज्जातः इति
श्रीभागवतपाठे अधराधः
श्रुतिस्मृतिविरुद्धाचारः यथा
अधर्म्मेणैधते राजन् ततो
भद्राणि पश्यति ततः सपत्नान्
जयति समूलस्तु विनश्यति इति
महाभारते ॥

[illegible] न
अधर्म्मी त्रि अधर्म्मिकः ।
अधर्म्मात्मा अधर्म्मशब्दादस्त्यर्थे
अधश्वरः पुं चौरः इति
हारावली अधोभागिनि त्रि
अधश्चौरः पुं नीचचौरः ।
सिँदालचार इति भाषा इति
केचित् ॥
अधस्तात् व्य अधोभागः इति
हलायुधः पश्चाद्भागः इत्यमर
टीका रतिगृह भग इति
त्रिकांडशेषः ॥
अधामार्गवः पुं धामार्गवहतः
इत्यमरटीकायां रायमुकुटः
अधार्म्मिकः त्रि अधर्म्मी अधर्म्मात्मा
पापीतत् पर्य्यायः अधार्म्मिकः
अधि व्य प्रादि विंशत्युपसर्गा
मध्ये उपसर्ग विशेषः अस्यार्थः
उपरिभागः इति दुर्गादासः ॥
अधिकारः ईश्वरः इतिमेदिनी
अधिके यथा अधिमासः
अधिकोमासः इत्यर्थः इतिस्मृति
अधिः पुं आधिः मनः पीडा
इत्यमरटीकायां भरतः ॥
अधिके स्त्री काव्यालंकारभेदः
तस्यलक्षणं अधिके पृथुलाधा
राद्येयाधिकवर्णनं उदाहरणं

यथावल्लीशनि जले यत्र तत्र
नौति न ते गुणाः ॥ इति
कुवलयानंदे अप्ययदीक्षितः
अधिकः त्रि अतिरिक्तः अनेकः
इति हेमचंद्रः ॥
अधिकरणं स्त्री एकन्यायोपपादने
इति हेमचंद्रः अधिक्रियते ॥
ऽर्थादिचारो ऽस्मिन्ननेनेतिवा
अधिकरणं वेदविचारयस्यात्मिका
मीमांसा सा च द्विधा कर्म्ममीमांसा
ब्रह्ममीमांसा चेति कर्म्मकांड
वेदविचारयस्यः कर्म्म मीमांसा
जैमिनिप्रणीता सैव मीमांसात्वेन
प्रसिद्धा पूर्वमीमांसा इत्युच्यते ।
ब्रह्मकांडवेदविचारयस्याश्च ब्रह्म
मीमांसा वेदव्यासप्रणीता सच
वेदांतत्वेन प्रसिद्धा उत्तर ॥
मीमांसा इत्युच्यते इत्यश्च
मीमांसापदमपि करणाधिकरण
व्युत्पत्त्या ग्रन्थपरं ज्ञेयं ।
भावव्युत्पत्त्या च विचारपूर्वक
निर्णय परमिति पत्र अधिक्रियते
विचारो अस्मे इति व्युत् यथा
अधिकरणं मीमांसा सिद्धांत
इत्युदीचो नाभिहितं तत्रासिद्धांत
स्याधिकरण चरमावयवत्वेनासा
करणत्वात् अधिकरणस्यानुपपत्तेः

यथा न्याय मते निगमनस्य ।
न्यायावयवत्वेन तन्मात्रस्यन्यायत्व
तद्यहापीति सुधीभिर्भाव्यं ।
तस्य चाधिकरणस्य पंचांगानि
यदुक्तं विषयो विषयश्चैव पूर्व
पक्षस्तथोत्तरं निर्णयश्चेति ।
पंचांगं शास्त्रेऽधिकरणं स्मृतं
विषयो विचारार्ह वाक्यं यथा
खादिरे पशुं बध्नाति खादिरे
वीर्यकामस्य यूपं कुर्वीतइत्यादि
संयोग पृथक्त्वाधिकरणादेः
एवंविषयो निश्चय स्तद्भिन्न
स्तद्विरोधी वा अविषयः संशयः
तदुक्तं विशब्दश्च विशेषार्थः सिनो
तिर्बंधनार्थकः विशेषेण सिनोतीति
विषयोऽर्थ नियामकः नियामकः
कोटि निश्चायकतया विशेष
दर्शनात्मकव्यावर्त्तादिनिश्चय एव
एवमेव न्याय गुरुन्याय वागीश
भट्टाचार्य चरणाः अन्येतु विशय
इति विपूर्वस्य शेतेः संशयार्थक
त्वमालोच्य तालव्यमध्यपाठं वदंते
विशयः संशयः इतिव्याचक्षते
तत्रविपूर्वशेतेः संशयार्थकत्वे
मानमनुसंधेयं । संशयः
अस्त्ययमर्थो नवेत्याकारकः ।
पूर्वपक्षः सिद्धांत विरुद्धा

तर्कोपन्यासेन सिद्धांत विरुद्ध
संशयैक कोटि व्यवस्थापनं ।
उत्तरं प्रकृत सिद्धांतानुकूल ॥
तर्को पन्यासेन प्रकृतसिद्धांत
सिद्ध संशयापर कोटि
व्यवस्थापनं निर्णयः सिद्धांतसिद्ध
विचार्य्यवाक्यतात् पर्य्यावधारणं
कर्म्ममीमांसाधिकरणानि सहस्र
संख्यकानि जैमिनिप्रणीतानि
शास्त्रदीपिकादौ यार्थसारथि
मिश्रादिभिर्व्याख्यातानि इति
चंद्रशेखरकृततत्त्वसंबोधिनी ॥ ० ॥
व्याकरणमते आधाररूपकारके
तच्चत्रिविधं सामीप्य १ यथा
गंगायां घोषः कालिंद्यां वेगे
आश्लेषः २ यथा दिवि देवाः ।
कानने रमे विषयः ३ यथा ॥
शास्त्रेनिपुणः केलौ कुशलः
व्याप्तिः ४ यथा तिलेषु तैलं
सकलेस्थितः । ० ।
अधिकर्द्धि त्रि अतिशयसंपत्ति
युक्तः तत् पर्य्यायः समृद्धः २
इत्यमरः ॥
अधिकर्म्मिकः पुं हट्टाध्यक्षः
हाटदरोगा इति भाषा । इति
हेमचंद्रः ॥
अधिकांगी स्त्री सकंचुकाः मेध्य



यद्दूर्ध्वंति तत् कंचुकादिदार्ढार्थ
सूत्रैर्मध्यकायेनिबध्यपट्टिकादि
तत्पर्य्यायः सारसनं २ ॥
इत्यमरः ॥ विशात्यंगुल्या
घतिरिक्तअंगविशिष्टे त्रि
अधिकारः पुं राजदीनांचामर।
धूननछत्रधारणादिव्यापारः तत्
पर्य्यायः प्रक्रिया २ इत्यमरः ॥
प्रकरणं। यथा नैमित्तिकोयं
प्रायश्चित्ताधिकारइतिमिताक्षरा
स्वामित्वं। यथासर्वेस्वाधिकारिणि
इति स्मृतिः ॥ अधिकृतदेशादिः
यथानिजाधिकारः मित्राधिकारः
इत्यादिवहवःशिष्ट प्रयोगाः

न

अधिकारी त्रि प्रभुः स्वामी
अधिपतिः अधिकारविशिष्टः
स्वत्ववान्। इति स्मृतिः ॥
अधिकारी[न] पुं वेदान्तशास्त्रवेत्ता।
अधिगताखिल वेदार्थनितांत
निर्मल स्वांत साधन चतुष्टयस्य
वः। प्रमाता। इति वेदान्तसारः।
पुरुषः। इतिराजनिर्घंटः ॥
अधिकृतः पुं अध्यक्षः ॥
आयव्ययाविक्षकः इत्यमरः
कृताधिकारद्रव्ये वाच्यलिंगः
अधिक्रमं पुं आक्रमणं इति
हेमचंद्रः
अधित्यका स्त्री पर्वतोपरिभूमिः
इत्यमरः ॥
अधिपः त्रि अधिपतिः स्वामी
इत्यमरः ॥ राजा इति ॥
त्रिकांडशेषः ॥
अधिपतिः पुं प्रभुः स्वामी।
इतिहलायुधः ॥
अधिभूः पुं स्वामी प्रभुः।
इत्यमरः ॥
अधिमासः पुं रविसंक्रांतिद्वय
मध्यवर्त्तिचांद्रमासः रविसंक्रांति
शून्यशुक्लप्रतिपदादिदर्शांतमासः१
तत्पर्य्यायः अधिकमासः २

असंक्रांतमासः ३ मलमासः ४
मलिम्लुचः ५ विनामकः ६ नपुंसकः
इतिमलमासतत्वं ॥
अधिरथः पुं कर्णपिता
सत क्षत्रियजातिः तस्यकर्म
सारथ्यं। यथा विवेशाधिरथो
रंगं यष्टिप्राणोह्वयन्निव।
इति महाभारते ॥
अधिराज्यभाक् पुं अधिराट्
यथा अत्यन्यान् पृथिवीपालान्
पृथिव्यामधिराज्यभाक्। इति
महाभारते ॥

[न]
अधिराट् पुं सम्राट् चक्रवर्त्ती।
इतिमहाभारते ॥
अधिरोहिणी स्त्री येषाकाष्ठादि
निर्मितारोहनमार्गः सिडि
इति भाषा। तत् पर्य्यायः
निःश्रेणिः २। इत्यमरःनिःश्रेणी
३ इति तट्टीका अधिरोहणी।
इत्यपिपाठः ॥
अधिवचनं क्ली नाम संज्ञा।
इतित्रिकांडशेषः ॥
अधिवासः पुं निवासः ॥
धूपनादिभिः संस्कारः इति
मेदिनी तद्द्रव्याणि मृत्तिका १
गंधः २ शिला ३ धान्यं ४ दूर्वा ५
पुष्पं ६ फलं ७ दधि ८ घृतं ९
स्वस्तिकं १० सिंदूरं ११ शंखः १२
कज्जलं १३ रोचना १४ श्वेतसर्षपं
१५ स्वर्णं १६ रौप्यं १७ ताम्रं १८
चामरं १९ दर्पणं २० दीपः २१
प्रशस्तपात्रं २२ इतिभवदेवः[ने]
क्वचित् पुस्तके श्वेतसर्षपस्था
सिद्धार्थे क्वचिच्चामरस्थाने
तत्रानुष्ठानं। दुर्गापूजा दोल
यात्रायागादौ पूर्वदिनेसायंकालै
आचारात् संस्कारकर्मणाहिने
पूर्वोक्ते मंत्रे पठित्वा क्रमेणोक्त
द्रव्याणिआदौदेवादीनांललाटे
यथाद्रव्यैः स्पर्शयित्वा प्रशस्तपात्रे
स्थापयित्वा तत्पात्रं पूर्वोक्तक्रमेण
वारत्रयं स्पर्शयेत् ॥
अधिवासनं क्ली अधिवासः।
गंन्धमाल्यादिभिः संस्कारकरणं
इत्यमरः ॥
अधिविन्ना स्त्री अध्यूढा प्रथम
विवाहितास्त्री कृतानेकविवाह
स्वामिनः आपेक्षिक प्रथमोढा
भार्य्या इत्यमरः ॥
अधिश्रयणी चुल्ली चुलाइति स्त्री
भाषाइत्यमरः ॥
अधिष्ठानं क्ली नगरं चक्रे
प्रभावः अध्यासनं अवस्थाने
इत्यमरः
अधिक्षिप्तः त्रि प्रतिक्षिप्तः ॥
इत्यमरः प्रेरितः इतिभरतः
प्रणिहितः स्थापितः कृत सितः
भर्त्सितः। इतिमेदिनी ॥
अधीतः त्रि कृताध्ययनः
पाठितः। यथा अधीते पात
साहस्रमनंतं वेदपारगो इति
स्मृतिः ॥ पाठितशास्त्रं ॥ पाठे क्ली
अधीतिः स्त्री अध्ययनं पठने
इतिजटाधरः ॥
अधीती[न] त्रि अध्ययनविशिष्टः
कृताध्ययनः इतिव्याकरणं ॥

अधीनः त्रि परवशः तत्पर्यायः
निघ्नः २ आयत्तः ३ अस्वच्छन्दः ४
गृह्यकः ५ इत्यमरः ॥
अधीरः त्रि चञ्चलः इति
हलायुधः कातरः इत्यमरः
अधीरा स्त्री विद्युत् इति ॥
हारावली मानावस्थायां मध्या
प्रगल्भनायिकयोर्भेदः तस्या
लक्षणं अधीरा कोपप्रकाशकत्वं
मध्याधीरायाः परुषवाक् कोप
प्रकाशिका प्रौढाधीरायां तर्जन
ताडनादिकं कोपप्रकाशकं
साद्विधा ज्येष्ठाकनिष्ठा च इति
रसमंजरी
अधीशः त्रि अधिपतिः प्रभुः
इतिहलायुधः ॥
अधीश्वरः त्रि प्रणताशेषसा(मन्तः)
महाराजः । चक्रवर्त्ती इत्यमरः
अधुतं त्रि अकम्पितं धुञ् कंपे
इत्यस्मात् कर्म्मणि क्तः पश्चान्नञ्
समासः दीर्घं मध्येऽपि ॥
अधुना अव्य अस्मिन्काले इदानीं
सम्प्रति इत्यमरः
अधुनातनं त्रि इदानींतने
वर्त्तमानकाले इति एतत्कालीने
इतिव्याकरणं ॥
अधृतः पुं विष्णुः इति ॥
तस्य सहस्रनाममध्ये पठितं ।
अकृतधारणवस्तुनि त्रि
अधृष्टः त्रि सलज्जः अप्रगल्भः
तत्पर्यायः शालीनः २ ।
इत्यमरः ॥
अधृष्यः त्रि प्रगल्भः अधर्षणीयः
इतिमेदिनी ॥
अधृष्या स्त्री नदीविशेषः इति
मेदिनी ॥
अधैर्यः त्रि धीरताशून्यः
धैर्याभावे क्ली यथा धैर्या
ऽधैर्य्यपरिग्रहग्रहिलयोरेणीदृशो
प्रीतये इतिभानुभट्टः ॥
अधोंशुकः क्ली परिधानवस्त्र
इत्यमरः ॥
अधोघंटा स्त्री अपामार्गः ।
इतिरत्नमाला ॥
अधोजिह्विका स्त्री तालमूलस्य
लघुजिह्वा आलजिव् इतिभाषा
इतिहारावली ॥
अधोभुवनं क्ली पाताले ।
इत्यमरः ॥
अधोमर्म्म क्ली गुह्यद्वारं इति
हेमचन्द्रः ॥
अधोमुखः त्रि अधोवदनः ।
पातालमुखः तत्पर्यायः ।
अवाङ् २ इत्यमरः ॥

अधोमुखा स्त्री गोजिह्वाह्वयः
इतिराजनिर्घण्टः ॥
अधोवायुः पुं अपानवायुः ।
यथा क्षुतेऽधोवायुगमने जृंभने
जपमुत्सृजेत् इति तंत्रसारे
योगिनीहृदये ॥
अधोक्षजः पुं विष्णुः इत्यमरः ।
अध्यग्नि क्ली विवाहकाले
अग्निसमीपे स्त्रियै दत्तं धनादि
यथा विवाहकाले यत्स्त्रीभ्यो
दीयते ह्यग्निसन्निधौ तदध्यग्नि
कृतं सद्भिः स्त्रीधनं परिकीर्त्तितं
इति दायभागे कात्यायनः ॥
अध्यंडा स्त्री कपिकच्छुः
आलकुशी इतिभाषा इत्यमरः ।
भूम्यामलकी । इति रत्नमाला
अध्ययनं क्ली गुरुमुखादानुपूर्वी
श्रवणं । पठनं ब्राह्मणस्य षट्
कर्मान्तर्गतमिदं ॥ इति
शब्दरत्नावली ॥
अध्यवसायः पुं उत्साहः ।
इत्यमरः कर्मस्त सकरप्रत्ययः ।
इतिमधुः कर्मसुदृढयत्नकारके
भावः इतिरमानाथः कर्मस्य
प्रत्ययः इति नयनानंदः ॥
अधिकेवलोद्यमः । इति केचित्
उद्योगाध्यवसायौ चात्र इति
भरतः ॥
अध्यक्षः पुं क्षीरिकावृक्षः ।
इतिशब्दरत्नावली ॥
अध्यक्षः त्रि प्रत्यक्षः इंद्रिय
जन्यज्ञाने अधिकृतः आय
व्ययादिनिरीक्षकः । इत्यमरः
अध्यापकः त्रि अध्यापनकर्त्ता
पाठगुरुः अध्यापयिता तत्
पर्यायः उपाध्यायः २ इत्यमरः
अध्यापनं क्ली पाठनं विद्यादानं
ब्राह्मणानांषट्कर्मान्तर्गतकर्मभेदे
इति शब्दरत्नावली ॥
अध्यायः पुं वेदपुराणादि
परिच्छेदः ग्रंथसंधि तन्नामान्तराणि
यथा । सर्गः । वर्गः परिच्छेदः ।
उद्घातः अङ्कः । संग्रहः उच्छ्वासः
परिवर्त्तः पटलः कांडं ।
स्थानं । प्रकरणं पर्व आह्निकं ।
इतित्रिकांडशेषः स्कंधः ।
स्तवकः उल्लासः । पादः ।
अथातः विरचनं इत्याद्यपि ॥
अध्यारूढः त्रि समारूढः ।
कृतारोहणः अभ्यधिकः ।
अतिशयः । इतिमेदिनी ॥
अध्यारोपः पुं वस्तुन्यवस्तु
न्यारोपः सच्चिदानंदानंताद्वय
ब्रह्मणि अज्ञानादि सकलजड

समूहस्यारोपणमित्यर्थः अस्य
भूत रज्जो सर्पारोपवत्। इति।
वेदांतसारः॥ (शेषः
अध्यावाहनिकं क्ली सौयनवि
यघायत् पुनर्लभेत नारी
नीयमानाहि पैतृकात्।
अध्यावाहनिकं नाम तत्सौयन
मुदाहृतं इति दायभागे
कात्यायनः॥
अध्याहरणं क्ली अध्याहारः
तर्कणं ऊहनं इतिशब्दरत्नावली
अध्याहारः पुं तर्कः ऊहः।
इत्यमरः अपाद्यार्थस्पष्टांतरेण
स्पष्टीकरणं अकांक्षासमापक
पदानुसंधानं वाक्यसंपूर्णार्थं
पदयोजनं युक्ति प्राप्तस्य
पदांतर मुदाहृत्य व्यक्तीकरणं
इतितट्टीका॥
अध्युष्टः त्रि साढ़ेत्रिसंख्या।३।०
साढे तिन इति भाषा। यथा।
अवाप्यस्वांभूमिंभुजगनिभमध्युष्ट
वलयं इति आनंदलहरी॥
अध्युष्ट्रः पुं उष्ट्रयुक्तरथः उष्ट्र
वाह्य पैरवा इतिहारावली
अध्युढः पुं महेश्वरः इति॥
मेदिनी॥
अध्युढः त्रि अधिकसमृद्धियुक्तः
समृद्धः इति धरणी॥
अध्युढा स्त्री प्रथमविवाहितास्त्री
कृतसापत्निका कृतानेक
विवाहस्यप्रथमोढास्त्री इत्यमरः
मेदिनीकरौ॥
अध्येषणा स्त्री याचना। इति
हेमचंद्रः आराध्यस्यादरपूर्वकं
कर्मणि नियुक्तकरणे गुर्वादेः
सत्कारपूर्वकंकाचिदर्थेनियोजने
तत्पर्य्यायः सनिः२ इत्यमरः
सनी ३ इति तट्टीका॥
अध्वगः पुं पथिकः इत्यमरः
उष्ट्रः। इति त्रिकांडशेषः॥
सूर्य्यः। इति हेमचंद्रः खेसरः
खच्चर इति भाषा इति
राजनिर्घंटः॥
अध्वगभोग्यः पुं आम्रातकवृक्षः
इतित्रिकांडशेषः॥
अध्वगा स्त्री गंगा इति॥
त्रिकांडशेषः॥
अध्वजा स्त्री स्वर्णुलीवृक्षः इति
राजनिर्घंटः॥
अध्वनीनः त्रि पथिकः इत्यमरः
अध्वन्यः त्रि पथिकः इत्यमरः
अध्वरः पुं यज्ञः वसुभेदः॥
सावधानः। इति मेदिनी॥
अध्वरथः पुं पथरथः अध्व

गमनोपयुक्तरथः तत्पर्य्यायः।
परियानिकः २ इति हेमचंद्रः
अध्वर्य्युः पुं यजुर्वेदवेत्ता।
इत्यमरः॥
अध्वशल्यः पुं अपामार्गः। इति
राजनिर्घंटः॥
अध्वा पंथाः कालः संस्थाने
अवस्कंधः। इति मेदिनी॥
शास्त्र॥स्कंधः। इतिच पाठांतरं
अध्वगमनजन्यगुणः मेदःकफ
स्थूलतासौकुमार्य्यनाशित्वंइति
राजवल्लभः॥
अध्वांतशात्रवः पुं श्योनाकवृक्षः
इतिशब्दचंद्रिका॥
अन चलु प्राणने जीवने इति
कविकल्पद्रुमः॥
अन उ य प्राणने जीवने। इति
कविकल्पद्रुमः॥
अनंशुमत् फला स्त्री अंशुमत्फला
कदली इति जटाधरः
अनः क्ली शकटं इत्यमरः अनं
इत्युणादिकोषः॥ जननी॥
जन्म॥जन्मी। इतिकोषांतरं
अनकः त्रि अणकः अधमः।
इत्यमरटीकायां भरतः
अनगारः पुं ऋषिः। मुनिः
इतिहेमचंद्रः॥अगार शून्ये॥
वाच्यलिंगः॥
अनग्निः पुं श्रौतस्मार्त्त कर्महीनः
। इति महाभारते दानधर्मः
अनघः त्रि अपापः निर्मलः
मनोज्ञः इतिमेदिनी॥
अनंगं क्ली आकाशं॥ मनः
इतिमेदिनी॥
अनंगः पुं कामदेवः इत्यमरः
अंगरहिते वाच्यलिंगः
अनंगकं क्ली चित्तं मनः इति
शब्दरत्नावली॥
अनंगासुहृत् पुं शिवः इति
हेमचंद्रः॥
अनच्छः त्रि आविलः अनिर्मलः
इत्यमरः॥
अनेजनं क्ली आकाशं इति
शब्दचंद्रिका अंजन शून्ये त्रि।
अनडुजिह्वा स्त्री गोजिह्वावृक्षः
इतिराजनिर्घंटः
अनडुही स्त्री नड्डाही गाइ
इति भाषा इतिहेमचंद्रः॥
डुह॥
अनड्वान् पुं वृषः यथा इति।
भाषा। तत्पर्य्यायः गौः २
भद्रः ३ बलीवर्द्दः ४ दम्यः ५
दांतः ६ स्थिरः ७ बली ८ उक्षा ९
ककुद्मान् १० ऋषभः ११ वृषभः १२

वृषः २३ धुर्य्यः २४ धुरीयः २५ धौरेयः २६ शंकरः २७ शिववाहनः २८ रोहिणीरमणः २९ वोटा २० गोनाथः २१ सौरभेयकः २२ इतिराजनिर्घंटः ॥

अनडुही स्त्री अनडुही स्त्रीगवी गाइ इति भाषा इति हेमचंद्रः

अनयः पुं गौरसर्षपः इति ॥ राजनिर्घंटः ॥

अनधिगतः त्रि अनवगतः यर्थ अरेविद्वन्नन्यास्त्वनधिगतवेदार्थ विभावाः । इतिभगवद्वाक्यमिति प्रामाणिकाः ॥

अनध्यक्तः त्रि अप्रत्यक्तः । इत्यमरटीकायां रमानाथः ॥ अध्यक्षमित्रः ॥

अनंते क्ली आकाशं इत्यमरः अभ्रकं । इतिराजनिर्घंटः ॥

अनंतः पुं विस्नुः इतिमेदिनी वलदेवः अनंतजिन्नामजिनः इतिहेमचंद्रः शेषनागः इत्यमरः ॥ वासुकिः इतिशब्दमाला सिंडुवारवृक्षः । इति राजनिर्घंटः ॥

अनंतः त्रि अनंतरहितः अनवधिः अशेषः असीमः इत्यमर मेदिनीच ॥

अनंतजित् पुं जिनानां टन्न ॥ विंशत्यंतर्गतचतुर्द जिनः तत् पर्य्यायः । अनंतः २ इति हेमचंद्रः ॥

अनंततीर्थकृत् पुं अनंतजित् इतिहेमचंद्रः ॥

अनंतरं त्रि अनवकाशं ॥ अनंतररहितं तत् पर्य्यायः अव्यवहितं २ संसक्तं ३ ॥ अपटांतरं ४ । इतिहेमचंद्रः ॥ पश्चादर्थे क्ली ॥

अनंतविजयः पुं युधिष्ठिरराजस्य शंखः इतिश्रीभगवद्गीता ॥

अनंतवीर्य्यः पुं भाविकल्पजनानां चतुर्विंशत्यंतर्गतत्रयोविंशतीर्थकरजिनः इति हेमचंद्रः

अनंतशीर्षा स्त्री वासुकिपत्नी इतिशब्दमाला ॥

अनंता स्त्री पार्वती पृथिवी अग्निशिखावृक्षः श्यामालता दूर्वा पिप्पली दुरालभा ॥ हरीतकी आमलकी गुडूची इतिमेदिनी यवासः श्वेतदूर्वा नीलदूर्वा अग्निमंथवृक्षः इति राजनिर्घंटः ॥

अनंतास्त्री अनंतमूलं तत् पर्य्यायः गोपवल्ली १ करालः ३

सुगंधा ४ भद्रवल्लिका भद्रा ६ नागजिह्वा ७ इति रत्नमाला । गोपी ८ श्यामा ९ शारिवा १० उत्पलशारिवा ११ इत्यमरः । गोप्यादि पंच श्यामलतायां । नागजिह्वाया मिति केचित् गोप्यादि त्रयं श्याम लतायां अनंतोत्पलशारिवति द्वये अनंतमूलं इति केचित् इति तट्टीकायां भरतः तस्यागुणाः मलवंधकारित्वं रक्तपित्तनाशित्वं । शीतलत्वं च इतिराजवल्लभः ॥

अनन्यगतिकः त्रि गत्यंतररहितः एकाश्रयः । यथा अनन्यगतिके जने विगतपातके चातके यथ रुचितथाकुरुश्रियतथापिनंत्यं भजे । इत्युद्भटः ॥

अनन्यजः पुं कामदेवः । इत्यमरः ॥

अनन्यवृत्तिः त्रि एकमात्रवृत्तिः तत् पर्य्याय । एकतानः २ एकाग्रः ३ एकायनः ४ एकसर्गः ५ एकाग्र्यः ६ एकायनगतः ७ । इत्यमरः ॥

अनपायी त्रि निश्चलः ॥ अपायशून्यः । अनश्वरः यथा अनपायिभिरस्माभिर्गुणायाक्षर हे । प्रभो इतिश्रीभागवते ॥

अनभिज्ञः त्रि मूर्खः प्रज्ञारहितः बुद्धिहीनः यथा पिकत्वं । वृततरो परापर परिज्ञाना ऽनभिज्ञो भवान् इति ॥ प्रवीनाः ॥

अनभिलाषः पुं अरुचिः इति राजनिर्घंटः अनिच्छा ॥

अनमः पुं ब्राह्मणः । इति त्रिकांडशेषः ॥

अनमितंपचः त्रि मितंपचः । कृपणः । इत्यमरः टीकायां ॥ रमानाथः ॥

अनभ्रः पुं बौद्धविशेषः । इति ॥ सिद्धांतशिरोमणौ गोलाध्यायः ॥

अनयः पुं दैवं ॥ अशुभं ॥ व्यसनं ॥ विपद । इति मेदिनी ॥

अनर्गलं त्रि निरर्गलं प्रतिबंधक रहितं तत्पर्य्यायः अबाधं २ उच्छृंखलं ३ उद्दाम ४ नियंत्रितं ५ निरंकुशं ६ इतिहेमचंद्रः ॥

अनर्थकं क्ली निरर्थकं । अर्थशून्यवाक्यं । तत्पर्य्यायः ॥ अबद्धं २ इत्यमरः अपार्थं ३ इतितट्टीका ॥

अनलः पुं अग्निः वसुभेदः ॥ इति मेदिनी ॥ चित्रकः ॥ रक्तचित्रकः भल्लातकः ॥ पित्तं ॥

इतिराजनिर्घण्टः ॥
अनलप्रभा स्त्री ज्योतिष्मतीलता
इतिराजनिर्घण्टः ॥
अनलप्रिया स्त्री अग्निभार्य्या ।
आग्नेयी । इतिजटाधरः ॥
अनलिः पुं वकवृक्षः इति
त्रिकाण्डशेषः ॥
अनवधाने क्ली चित्तस्यविक्षेपः ।
अवेक्षायोगः अप्रणिधाने इति ॥
हलायुधः ॥ तद्विशिष्टे त्रि ।
अनवधानता स्त्री सेनायोग ॥
शून्यता । चित्तस्यानन्यविषया ॥
ऽभावत्वे कार्य्येअनवहितत्वं। तत् ॥
पर्य्यायः । प्रमादः २ । इत्यमरः ॥
कर्त्तव्याकरणे यत्र समर्थस्यक्वचिद्भवेत्
उच्यते हितये तत्र प्रमादो ॥
ऽनवधानता इतिशब्दरत्नावली
अनवरः त्रि अकनिष्ठः अन्यूनः
श्रेष्ठः । प्रधानः । यथा । सोऽय ॥
सिंह्रादनवरोवासुदेवाद्व भारते
इतिविराटपर्व ॥
अनवरते क्ली निरन्तरं । तत्
पर्य्यायः सततं २ अनारतं ३
अश्रान्तं ४ संततं ५ अविरतं ॥
६ अनिशं ७ नित्यं ८ अजस्रं ९
तद्विशिष्टे वाच्यलिङ्गे इत्यमरः ।
अनवरार्द्ध्यः त्रि उत्तमः प्रधानः ।

इत्यमरः ॥
अनवलम्बः त्रि अवलम्बनशून्यः
निराश्रयः यथा । न परं पथि
पक्षपातिता नवलम्बे किमु
मादृशोपि सा इतिनैषधे ॥
अनवसरः त्रि निरवकाशः ॥
अवसराभावे पुं यथा ॥
अतर्क्यैश्वर्य्येत्वय्यनवसरदुःस्था
हतधियः । इतिमहिम्नस्तोत्रे ॥
अनवस्करं त्रि निर्मलं शोधितं
इत्यमरः
अनवस्था स्त्री तर्कविशेषः तस्य
लक्षणं । अप्रामाणिकानंतप्रवाह
मूलक प्रसंगत्वं यथा घटत्वंयदि
यावद्घटवृत्तिर्नहिस्यात् घटान्य।
वृत्तिस्यात् ॥ इति तार्किकाः
उपपाद्योपपादकयोरविश्रान्ति
इतिमीमांसकाः । दशाऽभावः
स्थित्यभावः ॥
अनवस्थानः पुं वायुः इति
राजनिर्घण्टः अवस्थितिशून्ये त्रि
अनवस्थितिः स्त्री चापल्यं
चाञ्चल्यं । अस्थिरत्वं अधैर्य्यं
इतिहेमचन्द्रः ॥
अनशनं क्ली भोजनाभावः
उपवासः इति हलायुधः ॥
तद्वति त्रि ॥

अनश्वरं त्रि सनातने नित्ये ।
ध्रुवे शाश्वते इति हेमचन्द्रः ।
अनसूया स्त्री कर्दममुनिकन्या
अत्रिपत्नी इति श्रीभारते ।
असूयाशून्ये त्रि ॥
अनहंकृतिः स्त्री अहंकाराभावः
तत्पर्य्यायः अशोचः २ इति
त्रिकाण्डशेषः ॥
अनक्षः त्रि अक्षिहीनः अन्धः
नविद्यते अक्षिणी यस्यइत्यर्थे।
षप्रत्ययः अक्षभिन्नः ॥
अनक्षरं क्ली दुर्वचने इति
भवतः अवचनार्हः गालि
प्रभृति । इति मथुः ॥
गुणाक्षेपक दोषाविष्कारिवा
क्यं । इतिकेचित् ततपर्य्यायः
अवाच्यं २ इत्यमरः ॥
अनक्षि क्ली कृत् सितवक्षुत (त
पर्य्यायः असौम्याक्षि २ इति
हेमचन्द्रः ॥
अनाकुलः त्रि स्थिरः एकाग्रः
अव्याकुलः अव्यग्रः इति
जटाधरः [illegible]
अनाक्रान्ता स्त्री कंटकारीवृ
इतिरत्नमाला अनाक्रमणवि
शिष्टे ॥ त्रि ॥
अनागतं त्रिभविष्यत् इति

राजनिर्घण्टः ॥ अनायाते ॥
अनुपस्थिते अज्ञाते यथा ॥
अनागतादि लिंगेन न
स्यादनुमिति सदा । इति
भाषापरिच्छेदः ॥
अनागतार्तवा स्त्री अप्राप्तऋतुका
अरजस्का । तत् पर्य्यायः गौरी।
२ नग्निका ३ इत्यमरः ॥
अनाचारः पुं कदाचारः ॥
अशुद्धाचारः श्रुतिस्मृतिविरुद्ध
कर्मकरणं । यथा सर्वदेशे
समाचारः पथितामूलवर्त्तने इति
स्मृतिः तद्विशिष्टे त्रि ॥
अनातपः पुं रौद्राभावः ।
छाया । इति राजनिर्घण्टः ॥
अनातुरः त्रि अरोगी यथा।
तेषा मनातुराः पूर्वे वातलाद्याः
सदातुराः इतिचरकः ॥
अनाथः त्रि प्रभूहीनः नाथशून्यः
यथा । वना वना वनाथ वत्
स्वजीवनावनाभवत् इतिनलोदयः
अनादरः पुं निरादरः । तत् ।
पर्य्यायः परिभवः २ परिभावः ३
तिरस्क्रिया ४ रीढा ५ अवमानना ६
अवज्ञा ७ अवहेलं ८ असूक्षणं ९
इत्यमरः असूक्षणं १० अतर्क्षणं।
११ असत्क्षणं १२ । इति भरतः ॥

अनादिः त्रि आदिरहितः ॥ ।
उत्पत्तिशून्यः स्वयंभूः यथा
अनादिरादिर्गोविंदः सर्वकारण ।
कारणं ॥ इति ब्रह्मसंहिता
अनादृतः त्रि निरादरः अवज्ञातः
अवमानितः इति हेमचंद्रः ॥
अनामकं क्ली अर्शोरोगः इति
शब्दरत्नावली मलमासेपुं इति ।
मलमासतत्वं दुर्नामके ॥
निर्नामकेच त्रि
अनामयं क्ली रोगाभावः ॥
आरोग्यं इत्यमरः तद्विशिष्टे ।
त्रि ।अनामा^न^ पुं अनामिकांगुली ।
अनामा^न^ पुं अनामिकांगुली ।
इतिशब्दरत्नावली
अनामिका स्त्री कनिष्ठामध्यमयो
मध्यवर्त्यंगुली इत्यमरः ॥
अनायत्तः त्रि अवशीभूतः ।
अनधीनः । यथा । एतावज्जन्म ।
साफल्यं यदनायत्तवृत्तिता इति
हितोपदेशः ॥
अनायासः पुं अक्लेशः ।
श्रमव्यतिरेकः यत्नाभावः यथा
अनायासेन मरणं विनादैन्येन ॥
जीवनंअनाराधितगोविंद ॥
चरणस्यकथं भवत् इति ।
प्रामाणिकाः ॥

अनायासकृतं त्रि अनायासेन ।
यत्क्रियतेस्मतत् विनायत्नेनकृते
तत्पर्य्यायः फंट २ इत्यमरः
अनारतं क्ली अनवरतं सततं
नित्यं । इत्यमरः ॥
अनारंभः पुं आरंभाभावः ॥
यथानकर्मणामनारंभान्नैष्कर्म्यं
पुरुषो२श्नुते इतिभगवद्गीता
अनार्जवः पुं रोगः इति ॥
राजनिर्घंटः ऋजुत्वाभावः ।
अनार्य्यः त्रि अश्रेष्ठः यथा
अनार्य्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन
इतिश्रीभगवद्गीता ॥
अनार्य्यकं क्ली अगुरुकाष्ठ इति
राजनिर्घंटः ॥
अनार्य्यजं क्ली अगुरु इति
हेमचंद्रः ॥
अनार्य्यतिक्तः पुं भूनिम्बः
चिराता । इतिभाषा इत्यमरः
अनालोचितः त्रि अकृतालोचनः
इतिकर्त्तव्यतयानवधारितः
अविवेचितः यथा किंकरोमि
प्रतिज्ञा मे यदनालोचिता पुरा
इतिदेवीमाहात्म्यं ॥
अनाविलः त्रि आविलशून्यः
निर्मलः इतिहलायुधः ॥
अनावृतः त्रि आवरणशून्यः

अनाच्छादितः । यथा । अनावृत ।
त्वाहहिरेतरंनते । इतिश्रीभागवते
अनावृष्टिः स्त्री ईति विशेषः ।
वर्षणाभावः सुकाइति भाषा ।
इतिस्मृतिः ॥
अनाश्यः त्रि नाशायोग्यः
नशाश्यातोर्ण्यणि नञ समासः ।
अनासिकः त्रि नासिकारहितः
तत्पर्य्यायः । विखः २ विखुः ३
विग्रः ४ इतिहेमचंद्रः ॥
अनाहतं क्ली तंत्रोक्त षट्
चक्रांतर्गत चतुर्थ चक्रं । तत्तु
ह्रदयस्य कादि ठान्त वर्णं
युक्तोद्यदादित्य सन्निभ द्वादश
दलपद्माकारं तन्मध्ये अयुत
सूर्य्यसमप्रभ शब्दब्रह्ममयबाण
लिंगमस्ति इति तंत्रसारः ॥
अनाहतं त्रि नूतनवस्त्रं छेद ।
क्षालन भोग रहित वस्त्रं
इत्यमरः अगुणितं इत्येकशास्त्रे ।
अकृताघातं ॥
अनाहारः पुं निराहारः ।
भोजनाभावः यथा कृता ।
वनाहारतया भयेनेतिचरकः
अनाहूतः त्रि अकृताह्वानः ।
अनिमंत्रितः यथा अनाहूतै
रेत्यप्रचुर गुणलोभेन भवतः
क्षुद्रः ॥ह्रस्वमप्योपि यथा ।
अनाहूता अप्यभियोति सौहृदे ।
इतिश्रीभागवते ॥
अनिगीर्णः त्रि अनुक्तः यथा
विषयस्यानिगीर्णस्यान्यतादात्म्य
प्रतीतिकृत् इतिसाहित्यदर्पणे
अनिच्छुः त्रि अनिच्छाविशिष्टः
अनाकांक्षी अस्पृहः इच्छतीति
इच्छुः ततो नञ समासः ॥
अनित्यः त्रि नश्वरः अस्थायी
जन्यवस्तु । यथा । धर्मोनित्यः
सुखदुःखेत्वनित्येजीवोनित्यो
हेतुरस्याप्यनित्यः इति ॥
महाभारते भारतसावित्री ॥
अनिंदित त्रि निंदारहितः ॥
अगर्हितः तत्पर्य्यायः प्रणाय्यः
रसाय्युः २ इति त्रिकांडशेषः ॥
अनिपुणः त्रि अप्रवीणः अविज्ञः
अपटुः यथायः शास्त्रादिष्वनिपुणः
श्रद्धावान् सतु मध्यमः इति
भक्तिरसामृतसिंधुः ॥
अनिमिषः पुं स्त्री देवता ॥
मत्स्यः इत्यमरः ॥
अनिमिषाचार्य्यः पुं बृहस्पतिः
देवगुरुः इतिशब्दरत्नावली ॥
अनिमेषः पुं देवता मत्स्यः ।
इतिहेमचंद्रः ॥

अनियतं त्रि अनित्यं। अस्यानि
यथा रत्यादयोऽप्य ऽनियते
रसस्य व्यभिचारिणः। इति
साहित्यदर्पणे दिष्टेत्रिविधे ॥
मुनयोनियत मनियतं योगजञ्च
इति ज्योतिषे ॥
अनियमः पुं नियमाभावः।
अनिश्चयः अनिर्द्धारः यथा
गुरुयष्टञ्च पादान्तो श्रेषेष्वनियमो
मतः इति छन्दोमञ्जरी ॥
तद्विशिष्टे त्रि ॥
अनिराकृतः त्रि अनिवारितः
यथा अनिराकृततापसंपदं
फलहीनां सुमनोभिरुज्झितां
इति माघः ॥
अनिरुद्धं क्ली संदाने पश्वादि
बंधनरज्जुः। इति त्रिकाण्डशेषः।
अनिरुद्धः पुं कामदेवपुत्रः।
तत्पर्य्यायः। उषापतिः २ ब्रह्मसूः
३ विश्वकेतुः ४ इत्यमरः सतु
भगवतश्चतुर्व्यूहान्तर्गतादिव्यूहः
तस्मात् सृष्टिः भवति यथा।
तमासौ ब्रह्म संभूतं तमो
मूलामृतात्मकं। तद्विश्वभावं
संस्तांते पौरु पौरुषीं अनुमाश्रि(ते)
सोऽनिरुद्ध इति प्रोक्तस्तत्।
प्रधानं प्रवर्त्तते। अदृष्ट्यक।

मिति ज्ञेयं त्रिगुणं नृपसत्तम ॥
विद्या सहायवान् देवो विश्वक्
सेनो हरिः प्रभुः अक्षेव
शायनश्चक्रे निद्रायोगमुपागतः
जगतश्चिन्तयन् सृष्टिं महानात्म
गुणः स्मृतः इति महाभारते
मोक्षधर्मः ॥
अनिरुद्धः त्रि रोधशून्यः।
अप्रतिबद्धः वरः इति विश्वः ॥
अनिरुद्धपथं क्ली आकाशं
इति शब्दचंद्रिका अरुद्धवर्त्म
अनिरुद्धभाविनी स्त्री उषा
सर्वकामपुत्रपत्नी बाणराजकन्या
इति शब्दरत्नावली ॥
अनिर्णयः पुं अनिर्द्धारः।
अनिश्चयः निर् पूर्वक नीञ
धातो रलि नञा समासः ॥
अनिर्धारितः त्रि अकृतनिर्धारण
अनिश्चितः यथा अनिर्धारितैकत्वा
ऽनेकत्वविशेषस्य पूर्वरूपमात्रस्य
व्यक्तस्य व्याधि लिंगत्वं इति
रोगपूर्वरूपलक्षणरक्षितः ॥
अनिर्मलः त्रि मलिनः आविलः
अपरिष्कृतः। निर्मलाभावे क्ली
अनिर्माल्या स्त्री पृक्कानामकौषधिः
इति शब्दरत्नावली ॥
अनिर्वचनीयः त्रि निर्वचनायोग्यः

अनिर्वाच्यः वाक्यागम्यः। यथा
सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं
भावरूपं ज्ञानं विरोधि यत्
किञ्चिदिति वदन्ति इत्यज्ञान
लक्षणे वेदान्तसारः ॥
अनिर्वाहः पुं निर्वाहाभावः ॥
अनिष्पत्तिः असंगतिः। यथा।
मुख्यार्थ वाधे तद्योग इति
कारिकायां मुख्यार्थस्यान्वय।
वाधोपितात् पर्य्याविषयस्यान्
यस्य मुख्यार्थतावच्छेदकरूपेणानिर्वा
ह एव इति काव्यप्रकाशटीकायां
महेश्वरः ॥
अनिर्विण्णः त्रि निर्वेदशून्यः।
वद्धेनिर्विद्यमानस इत्यत्रनिर्विण्ण
विरक्तेइति देवीमहात्म्यटीका
तद्भिन्न अविरक्तः विषयसक्त इति
यावत् निर्विण्णातिमामन्वेन
इत्यत्र निर्विण्णो दुःखितः इति
देवीमहात्म्यटीका तद्भिन्नः
अदुःखितः वहुव्रीहौ तु
अतिदुःखितः ॥
अनिर्वृतिः स्त्री निर्वृत्यभावः।
दरिद्रता। यथा। अनिर्वृति
निशाचरी मम गृहान्तराले गता
इत्युद्भटः
अनिलः पुं वायुः। इत्यमरः

वसुविशेषः। इति मेदिनी ॥
अनिलघ्नकः पुं विभीतकवृक्षः
इति राजनिर्घण्टः ॥
अनिलसखः पुं अग्निः इति
हेमचंद्रः ॥
अनिलान्तकः पुं इंगुदीवृक्षः
इति राजनिर्घण्टः ॥
अनिलामयः पुं वातरोगः
इति राजनिर्घण्टः ॥
अनिलोचितः त्रि अनालोचितः
अविवेचितः यथा
अनिलोचित कार्य्यस्य वाग्जालं
वाग्मिनो वृथा इति माघः ॥
अनिशं क्ली अनवरतं सततं
इत्यमरः ॥
अनिश्चितः त्रि निश्चयरहितः
अनिरूपितः अनिर्णीतः यथा
कवयस्तानन्तकं परचिन्ताः कश्मले
ययुरनिश्चिततत्वाः इति ॥
श्रीभागवतं ॥
अनिष्टः त्रि अनभिलषितः
अवाञ्छितः यथा इष्टनाश।
दनिष्टाप्तेः करुणाख्यो रसो भवेत्
इति साहित्यदर्पणे ॥
अनिष्ठा स्त्री नागवला। इति
राजनिर्घण्टः ॥
अनिष्णातः त्रि अकुशलः।

अप्रवीणः अनभिज्ञः अकृती
निपूर्वात् स्नात शोधने इत्यस्मात्
कर्त्तरि क्तेन नञ् समासः ॥
अनिष्पन्नः त्रि निष्पत्तिरहितः
असमाप्तः असंपूर्णः निःपूर्वक
पदधातोः कर्म्मणि क्ते निष्पन्नः
पश्चान्नञ् समासः ॥
अनिक्षुः पुं इक्षुविशेषः आनाख
खाकडा इतिख्यातः तत्पर्यायः
इक्षुतुल्या २ इक्षुवालिका ३
इक्ष्वालिका ४ इतिरत्नमाला
अनीकः पुं क्ली युद्धं सैन्यं
इति मेदिनी
अनीकस्थः पुं रणगतः संग्रामस्थः
हस्तिशिक्षाविचक्षणः राजरक्षकः
चिह्नं वीरमर्द्दलकः जयढाक
इतिभाषा इतिमेदिनी ॥
अनीकिनी स्त्री सेना सैन्य
संख्याविशेषः तद्यथा ६५६१
अश्वाः २१८७ हस्तिनः १०९३५
पदातयः २१८७ रथाः (क
समुदायेन सप्तत्यधिकाष्टशताधि
सहस्राधिकायुतद्वयं २१८७०
अक्षौहिणी दशमांशे इत्यमरः
भरतौ
अनीचदर्शीन् पुं बुद्धभेदः।
इति त्रिकाण्डशेषः ॥

अनीतिः स्त्री दुर्नीतिः अन्यायः
अत्याचारः यथा विष्टयो
ऽतिपाताश्च भवन्त्यनीति
संभवाः इतिवामनपुराणे ॥
अनीशः पुं विष्णुः इतितस्य
सहस्रनाममध्येपाठतः ईश्वर
भिन्ने त्रि यथा अनीशो वा ॥
कुर्यां भुवनजननेकः परिकर
इतिपुष्पदंतः ॥
अनु अ उपसर्गविशेषः अस्यार्थाः
पश्चात् सादृश्यं लक्षणं ॥
वीप्सा इत्थंभावः भागः ॥
हीनः सहार्थः आयामः ॥
समीपं परिपाटी इति ॥
मेदिनी ॥
अनुकः त्रि कामुकः कामी ॥
इत्यमरः ॥
अनुकंपा स्त्री दया कृपा
इत्यमरः ॥
अनुकम्प्यः त्रि तरस्वी वेगवान्
इतिहारावली कृपायोग्यः।
स्यायात्रे यथा अनुकंप्या ॥
ऽनुकंप्यश्च स जातः स च जीवति
इतिकाव्यप्रकाशः ॥
अनुकरणं क्ली अनुकारः सदृशी
करणं व्याकरणमते तत् द्विविधं
यत्रार्थरहितं केवल शब्दस्य सदृश

करणं तत् शब्दानुकरणं १ यत्रार्थ
विशिष्टस्य सदृशाकरणं तदर्थानु
करणं २ इति गोयीचंद्र
टीकोपरि विद्यालंकारटिप्पनी
अनुकर्षः पुं रथाधः स्थितकाष्ठं
रथेरतला इतिभाषा इत्यमरः
रथस्याधस्तनभागेयद्दारुधारण
काष्ठं तिष्ठति यतो यस्याक्षे उपरि
पट्टकर्म यत्र चक्रे उदनुकर्ष।
शब्दवाच्ये इतिभरतः आकर्षणे
इतिमेदिनी
(अनुकर्षणे इतिमेदिनी)॥
अनुकर्षणं क्ली अवकर्षणं
आकर्षणं इतिमेदिनी
अनुकर्षान् पुं अनुकर्षः रथाधः
स्थितकाष्ठं इत्यमरः टीकायां
रायमुकुटः
अनुकल्पः पुं मुख्यकल्पादधमः
गौणकल्पः मुख्यस्याप्रत्र
प्रतिनिधिः यथा व्रीह्यभावे ॥
नीवारैर्यजेत इत्यमरभरतौ
अनुकामीनः त्रि कामंगामी
स्वेच्छागमनशीलः इत्यमरः
अनुकारः पुं सदृशीकरणं
सदृशा रूपवेशभाषाद्याविष्करणं
तत्पर्यायः अनुहारः २
इत्यमरः उपमा इतिहेमचंद्रः
अनुकूलः त्रि अप्रतिकूलः

दक्षिणः। सहायः यथा।
मयानुकूलेन नभस्वतेरिते इति
श्रीभागवते ॥
अनुकूलः पुं पतिभेदः तस्य
लक्षणं सदा परांगनापराङ्मुख
त्वे सति स्वस्त्र्यनुरक्तत्वं इति
रसमंजरी ॥
अनुकूलता स्त्री आनुकूल्यं तत्
पर्यायः दाक्षिण्यं २ इति
हेमचंद्रः ॥
अनुकूला स्त्री दंतीवृक्षः इति
(अनुक्रमः पुं यथाक्रमं तत्)
राजनिर्घण्टः ॥
अनुक्रमः पुं यथाक्रमं तत् ॥
पर्यायः आनुपूर्व्वी २ परिपाटी
३ आवृत् ४ पर्यायः ५
इत्यमरः
अनुक्रमणिका स्त्री भूमिका
ग्रंथादेर्मुखबंधः पुराणादेरुक्त
विवरणस्य संक्षेपेण पुनःकथने
इतिपुराणे ॥
अनुक्रोशः पुं करुणा दया
इत्यमरः ॥
अनुगः त्रि पश्चाद्गामी अनुचरः
अनुसरः। तत् पर्यायः अन्वक् २
अन्वक्षः ३ अनुपदः ४ इत्यमरः
सेवकः दासः इतिहलायुधः
अनुगतः त्रि अनुगः आश्रितः।



अधीनः पश्चाद्गतः यथा आगच्छपश्य
काकुत्स्थः स्वर्गाय समुपस्थितः
विमानवरं कोटीभिर्देवैरनुगत
स्तदा इति रामायणे निस्तुतः
यथा नवतदनुगतमेव अभिधाव
लेवनेनपिनस्यभावात् इति
पंचमोल्लासे काव्यप्रकाशकारः
अनुगवीनः पुं गोपः गोरक्षकः
गोः पश्चात् यथेष्टगामी इति
सेतिप्रसारव्याकरणपरिशिष्टे
अनुगमः पुं पश्चाद्गमने ॥
उपसर्पणे यथा कृतेनूद्दीयते ॥
गत्वांत्रितायांहुताय वैद्यापरे ॥
याचमानाय कलेऽप्यनुगमान्विते
इति स्मृतिः न्यायमते येन ॥
रूपेणतावत् पदार्थग्रहः तदेव
रूपेणतावत् पदार्थानुगमकं
तस्यक्रिया ॥
अनुगामी न त्रि कामगामी इति
हेमचंद्रः सहचरः पश्चाद्गामी
यथा दृष्ट्वाश्रियमिवायांतीमालाप
मनुगामिनी इति रामायणे ॥
अनुग्रहः पुं दुःखहरकरणेच्छा
अनिष्टवारणपूर्वकेष्टसाधने
तत्पर्यायः अभ्युपपत्तिः २
इत्यमरः ॥

अनुचरः त्रि सहचरः सहायः ॥
इत्यमरः दासः इति ॥
हलायुधः ॥
अनुच्छिष्टः त्रि उच्छिष्टभिन्नः पवित्रः
इति हलायुधः ॥
अनुजं क्ली प्रपौंडरीकनाम
सुगंधिद्रव्यं इति राजनिर्घंटः ॥
अनुजः पुं कनिष्ठभ्राता तत्
पर्यायः जघन्यजः २ कनिष्ठः ३
यवीयान् ४ अवरजः ५
इत्यमरः
अनुजा स्त्री त्रायमाणालता इति
राजनिर्घंटः कनिष्ठाभगिनी यथा
भ्रातस्त्वयानुजाताहं भुंक्ष्व भक्त
मिदंपयः । इति तिथ्यादितत्त्वं ।

न

अनुजीवी त्रि दासः तत्पर्यायः
सेवकः २ अर्थी ३ इत्यमरः ॥
अनुचरः इति हलायुधः ॥
अनुज्ञा स्त्री आज्ञा अनुमतिः यथा
नाग्रजानां ब्राह्मणयोर्नगुरुशिष्ययो
रन्तरा व्यपेयात् अनुज्ञयात्
व्यपेयात् इति तिथ्यादितत्त्वं ॥
अनुतरं क्ली आतरः तरपण्य
पारणीकडी इति भाषा इत्यमरः
टीकायां रायमुकुटः ॥

अनुतर्षः पुं तृष्णा अभिलाषः
मद्यपानपात्रे इतिमेदिनी ॥
अनुतर्षणं क्ली चषकः सुरापान
पात्रं इत्यमरः ॥
अनुतापः पुं पश्चात्तापः ।
पस्तान इति भाषा इत्यमरः
अनुत्तमः त्रि श्रेष्ठः प्रधानः ।
इत्यमरः नञ्समासेतु अधमः ।
अनुत्तरं त्रि मुख्यं इतिहेमचंद्रः
श्रेष्ठे प्रतिजल्पविवर्जिते ।
अनुत्तरहीने इति मेदिनी ।
स्थिरे इति धरणी अधः ॥
दक्षिणदिक् इत्यमरटीकायां
स्वामी अनुत्तराभावे क्ली ।
यथा भवत्यवज्ञा च भवत्यनु
त्तरात् इति नैषधे ॥
अनुदयः त्रि अनुद्भवः बहुव्रीहौ
तु अनुद्धः
अनुदात्तः पुं वेदगाने नीचस्वरः
यथा उदात्त श्चानुदात्तश्च ।
स्वरितश्च त्रयः स्वराः इति
शब्दरत्नावली
अनुदारः त्रि अतिशयदाता
अदाता अतिमहान् अमहान्
अनुगतदारः यथा यस्मिन्
प्रतीदसि पुनः सम्भवत्युदारो
ऽनुदारश्च इति मम्मटभट्टः ॥

अनुदिनं क्ली प्रतिदिनं प्रत्यहं
यथा यावत् खलु शिलाकनमात्र
भोगी कामी भवेदनुदिनं वद
कोऽत्रहेतुः इति श्रीचैतन्यदेवः
अनुद्रुतं क्ली तालविशेषः सतु
द्रुतार्द्धमात्रावर्ध भागोवा ।
यथा अर्द्धमात्रे द्रुते ज्ञेयं ॥
द्रुतार्द्धञ्चाप्यनुद्रुतं इति ॥
शब्दरत्नावली अनुधाविते त्रि
यथा अनुद्रुतः संयते येन ॥
कोवलं वलस्यशत्रुः प्रशप्तोस
पृष्ठितो इति माघः ॥
अनुधावनं क्ली पश्चाद्धावनं ॥
अनुसंधाने यथा तस्मिन् कुवेग
प्रणवाद्वि मुहुश्छिन्ने निवार्य ।
ततस्मात् स्वाधीनं हृष्या तत्रानु
धावने इत्युद्भटः ॥
अनुनयः पुं विनयः तत्पर्यायः
प्रणिपातः २ प्रणतिः ३ इति
हेमचंद्रः ॥
अनुनादं क्ली वा अनुगः ।
पश्चाद्गामी इत्यमरः ॥
अनुपदी त्रि अन्वेष्टा अन्वेषण
कर्त्ता इति हलायुधः ॥
अनुपदीना स्त्री पदायतोपानत्
मोजा बुट इत्यादि भाषा
इत्यमरः ॥

अनुपमः त्रि उपमाशून्यः उत्तमः
इति मेदिनी ॥
अनुपमा स्त्री कुमुद नामदिग्गजयो
षा। इत्यमरः सुप्रतीकनाम दिग्गज
स्त्री। इति मेदिनी ॥
अनुपातः पुं पश्चात् पतनं ॥
पूर्वोक्तपातानुसारेण अपरोक्त
पातः यथा। ग्रन्थान्तरे ॥
चेदिदमन्तरं स्यात् उदस्तविक्षेप
लवे तदा किं वक्राग्रके ॥
रित्यनुपात युक्त्या युक्तं निरुक्तं।
परिधेः प्रमाणं ॥ इति
सिद्धान्तशिरोमणौ गोलाध्यायः ॥
अनुपातकं क्ली महापातकसदृश
पाप विशेषः तत् पंचत्रिंशत् ॥
प्रकारं यथा।
समुत्कर्षे मिथ्यावचनं — १
तत् द्विविधं आत्मगामि।
अन्यापूर्वक परगामि च ॥

राजगामि पैशुन्यं — १
पितुर्मिथ्या दोष कथनं — १
——
एतत्त्रयं ब्रह्महत्यासमं ३
वेदत्यागः — १
सतु अधीतवेदविस्मरणं ॥
वेदनिंदा — १

कौटसाक्ष्यं — १
तत् द्विविधं ज्ञातस्याकथनं।
मिथ्याकथनञ्च ॥ २
सुहृद्वधः — १
सतु ब्राह्मणव्यतिरिक्तमित्रवधः
ज्ञानपूर्वाभ्यासेन गर्हितान्नस्य
अर्थात् अन्त्यजान्नस्य भक्षणं — १
ज्ञानपूर्वकाभ्यासेन गर्हिताद्यस्य
अर्थात् छत्राकादेर्भक्षणं — १
——
एतत् षड्विधं सुरापानसमं ॥ ६
निक्षेपहरणं — १
नरहरणं — १
अश्वहरणं — १
रजतहरणं — १
भूमिहरणं — १
हीरकहरणं — १
मणिहरणं — १
एतानि सप्त स्वर्णस्तेय समानि ७

सपिंडस्त्रीगमनं —
कुमारीगमनं — १
अन्त्यजागमनं — १
सख्युः स्त्रीगमनं — १
औरसेतरपुत्रस्त्री — १
पुत्रस्यासवर्णस्त्रीगमनं — १
एतानि षड्विमातृगमनसमानि ६

मातृष्वसृगमनं — १
पितृष्वसृगमनं — १
स्नुषागमनं — १
मातुलानीगमनं — १
शिष्यस्त्रीगमनं — १
भगिनीगमनं — १
आचार्यभार्यागमनं — १
शरणागतागमनं — १
राज्ञीगमनं — १
प्रव्रजितागमनं — १
धात्रीगमनं — १
साध्वीगमनं — १
वर्णोत्तमागमनं — १
एतानि त्रयोदश } —
गुर्वङ्गनागमनसमानि १३
——
इति प्रायश्चित्तविवेकसंग्रहः ३५
अनुपानं क्ली औषधाङ्गपेयविशेषः
औषधेन सह तत्पश्चाद्वापीयते
यत् यथा अनुपान विशेषेण
करोति विविधान् गुणान् इति
वैद्यकं ॥
अनुपुष्पः पुं शरः। इति
शब्दचंद्रिका ॥
अनुप्रासः पुं तुल्यवर्णविन्यासः
यथा वर्णसाम्यमनुप्रास इति
काव्यप्रकाशः वर्णावृत्तिरनुप्रासः

पदेपादे विधीयते। इति १
काव्यचंद्रिका ॥ अस्य विवरणं
अलंकारशास्त्रे द्रष्टव्यं ॥
अनुप्लवः पुं सहायः अनुचरः
इत्यमरः ॥
अनुवंधः पुं दोषोत्पत्तिः ॥
प्रकृत्यादिः आदि शब्देन ॥
प्रत्ययागमादेशाः विनश्वराः
उच्चारितप्रध्वंसी इत् संज्ञको वर्णः
मुख्यानुयायि शिशुः विवाहामंत्रेण
यात्रादिषु मुख्यं पित्रादिकमनु
याति यः मुख्यानुयायी शिशुश्चेति
इयं स्वतंत्रमिति स्वामी प्रकृतस्यानु
वर्तने प्रक्रान्तस्यानिवर्तनं।
इत्यमरभरतौ दोषोत्पादे ॥
यथानुवंधं तुह्नास्य देशे ॥
विधीयतामिति विनश्चेयथा ॥
औट टकारानुवंधे लोपः ॥
प्रकृतस्यानुवर्तने यथा भोक्त
मनुवंधः कृतः शिशो यथा।
बालकानुवंधेन यात्राभंगामाभूत्
इत्यमरटीका सारसुंदरी ॥
॥ ॥ वंधः इति मेदिनी ॥
आरंभः इति शब्दरत्नावली
लेशः। इति त्रिकांडशेषः ॥ ॥
वेदान्तमते अधिकारि विषय
संबंधप्रयोजनानि वैद्यकमते ॥

वातादि दोषाणां मथायात्वं ॥
अनुवेंधी स्त्री हिक्का हस्ता ।
इति मेदिनी ॥
अनुबोधः पुं गंधोद्दीपनं ।
न्यूनपूर्वगंधस्य चंदनादेःप्रयत्न
विघाषणा पुनः पूर्व ॥
सौगंध्योत्पादने तत्पर्य्यायः
प्रबोधनं २॥ इत्यमरः पश्चाद्बोधः
अनुभवः पुं स्मृतिभिन्नज्ञाने
अनुमानादि धारावाहिज्ञाने ॥
तत् पर्य्यायः उपलंभः २ ॥
इत्यमरः॥
अनुभावः पुं प्रभावः कोष
दंडजं तेजः सतांमति निश्चयः
सतां तभिप्रायस्य निश्चयः ।
निश्चय मात्रेभि भाववोधकः
इत्यादि सूचक गुण क्रियादिः
सचस्त्वेवन चातुर्य्य क्षेत्यपुल
रागादिरूपः एवमन्यत्रापि ।
इत्यमर भरतौ
अनुभूतिः स्त्री अनुभवः
सावतुविधा । प्रत्यक्षं १
अनुमितिः २ उपमितिः ३
पूराहृवोधः॰ष इति भाषापरिछेद
अनुभूता विस्मृति स्त्री संस्कारः
अनुभूतानां स्मृतानांच अविस्मृति
र्यस्मात् सभावनाखांसंस्कार इति
यावत् ॥
अनुमतिः स्त्री सम्मतिः अनुज्ञा
न्यूनेन्दुकलापूर्णिमा चतुर्दशी
युक्तापूर्णिमा इति मेदिनी ॥
अनुमरणं क्ली पश्चान्मरणंभर्तरि
मृतेतत् पादुकादिक मादाय
ज्वलच्चितारोहन पूर्वकं स्त्रिया
मरणंयथा देशांतरे मृते ॥
पत्योसाध्वी तत् पादुका हृये
निधायोरसि संशुष्का प्रविशेत्
जातवेदसं इति ब्रह्मपुराणं ॥
ब्राह्मणा निषेध माह स्मृतिः
पृथक् चितिं समारुह्य नविप्रा
गंतुमर्हति सहमरणं मृत
भर्त्रा सह ज्वलच्चितारोहणपूर्वकं
स्त्रियामरणं यथा भर्त्रानुमरणं
काले याः कुर्वन्ति तथा विधाः
कामात् क्रोधात् भयान्मोहात्
सर्वाः पूता भवन्ति ताः इति
महाभारते ॥
अनुमास्त्री अनुमितिः अनुमाने
इति त्रिकांडशेषः ॥
अनुमानं क्ली अनुमितिकरणं
अनुमितिः इति चिंतामणिः
तत्पर्य्यायः अनुमा २ इति
त्रिकांडशेषः ॥
अनुमानोक्तिः स्त्री तर्कः ऊहः

इतिहलायुधः ॥
अनुमितिः स्त्री अनुभवविशेषः
व्याप्तिविशिष्ट पक्षधर्मताज्ञान
जन्य ज्ञानं यथा धूम
दर्शनाद वह्निमान् पर्वत इत्याकार
ज्ञानं अस्याव्यापार कारणं
परामर्शः। अस्याः करणं व्याप्ति
ज्ञानं इतिभाषापरिछेदः ॥
अनुमोदितं त्रि कृतानुमोदनं
अनुमतं यथा भवतायद्व्यवसितं
तन्मेसाध्वनुमोदितं इति
श्रीभागवते ॥
अनुयाधीन त्रि सदृशः
पश्चाद्गामी यथा मुख्यानुयायिनि
शिशावित्यनुवेधपश्चार्थे अमरः
अनुयुक्तः पुं भूतकाध्येता ।
इति महाभारते ॥
अनुयोक्ता पुं भूतकाध्यापकः
इतिमहाभारते ॥
अनुयोगः प्रश्नः इत्यमरः ॥
अनुयोगकृत् पुं आचार्य्यः।
इतिहेमचंद्रः ॥
अनुयोजनं क्ली प्रश्नः इति
हेमचंद्रः ॥
अनुयोज्यं त्रि निंदार्ह अनुपूर्वक
निंदार्थ युज धातोःकर्म्मणिय
प्रत्ययः ॥
अनुरक्तः त्रि आसक्तः अनुराग
युक्तः यथा अनुरक्तोगुणान् वुते
विरक्तोदूषणानिच इत्युद्भटः ॥
अनुरंजनं क्ली अनुरागः हर्षजननं
यथाविश्वेषा मनुरंजनेन ॥
जनयत्रानंदमिंदीवरेति जयदेवः
अनुरतः त्रि अनुरागविशिष्टः
प्रीतः अनुरक्तः अनुपूर्व
रमधातोः कर्तरिक्तः ॥
अनुरतिः स्त्री अनुरागः इति
हेमचंद्रः ॥
अनुराग पुं प्रीतिः आसक्तिः
तत् पर्य्यायः। रतिः २ रागः ३
अनुरति ४। इति हेमचंद्रः ॥
अनुरागी न त्रि अनुरागविशिष्टः।
अनुवक्तः इति शाहरत्नावली॥
अनुराधा स्त्री सप्तदशनक्षत्रं।तस्या
रूपं सर्पाकृति सप्ततारामयं।
इतिकालीदासः बलिनिभतारा
चतुष्टयात्मकं इतिदीपिकाटीका
अस्याश्रयिदेवतामित्रः ॥ तत्र
जातफलं यथा सत्कीर्तिकांतिश्च
सदोत् सवः स्याज्जेता रिपूणाञ्च।
कलाप्रवीणः स्यात्संभवे यस्य
किलानुराधा संपत् प्रमादे ॥

विविधो भवेत्तौ ॥ इति
कोष्ठीप्रदीपः ॥
अनुरूपः त्रि तुल्यरूपः सदृशः
यथा देवाना मनुरूपाहि
वरन्त्वेतमहीतले इतिरामायणं
अनुरोधः पुं आराध्यादेरिष्ट
संपादने उपरोधः तत्
पर्य्यायः अनुवर्त्तनं २ इत्यमरः॥
अनुलापः पुं मुहुर्भाषा पुनः
पुनः कथने पुनरुक्तिः इत्यमरः
अनुलेपनं स्त्री गात्रे गंधद्रव्यादि
लेपने तद्द्रव्यंच तस्यगुणाः
प्रीत्योजः पुष्टि हृद्धिकारित्वं
धर्म्म दौर्गन्ध्य तंद्रा पाप श्रम
नाशित्वंच इतिराजवल्लभः ॥
अनुलोमः पुं यथाक्रमं ॥
अविलासः यथा वर्ण माला
समाख्याता अनुलोमविलोमिका
इतितंत्रसारे नारद वचनं ॥
अनुलोमजः त्रि अनुलोमजातः
अप्रतिलोमजः यथाब्राह्मणात्
क्षत्रिया गर्भजातः क्षत्रियात्
वैश्यायां जातः इत्यादि
उत्तमादधमार्यांजातः यथा
संकीर्ण योनेया येतुप्रतिलोमानु
लोमजाः अन्योऽन्यव्यतिषक्ताश्च
तान्प्रवक्ष्याम्यशेषतः इतिमनुः

अनुवत्सरः पुं वर्षः इति
हेमचंद्रः ॥संवत्सरादि ॥
पंचकान्तर्गत वत्सरविशेषः
अस्मिन्वर्षेधान्यदानेमहाकले
प्राकाह्नात्पंचभिर्युतिंयः शेष
स्तिष्ठतितेन प्रकादिक्रमेण सं
परिद्वद अनु उदा पूर्वकवत्सर
संज्ञकावत्सराभवंति इति
मलमासतत्त्वं ॥
अनुवर्त्तनं स्त्री अनुरोधः
इत्यमरः व्याकरणमते पूर्वो
लक्षणस्थित पदादेरनुवृत्तिः॥
अनुवाकः पुं ऋग्यजुःसामसमूहः
इत्यमरः वेदविशेषः इति
सभूतिः
अनुवादः पुं कृतार्थवाक्यं ॥
इतिशब्दरत्नावली पुनरुक्तिः
उक्तस्यपुनःकथनं यथा विरोधे
गुणवादःस्यादनुवादोवधारिते
भूतार्थवादस्तद्धाना दर्थवाद
स्त्रिधामतः इतिमुहितत्वटीका
वाचारंभनमात्रं यथा ।
विनानुवादं नव तन्मनीषितं
सम्यग्यतस्त्यक्तमुपाददत्पुमान्
इतिश्रीभागवतं ॥
अनुवासनं स्त्री स्नेहनं धूपनं
इतिहेमचंद्रः स्नेहवस्तिः ॥

यथा अथानुवासने स्नेह वस्ति
धूपनयो रपीति मेदिनी ॥
द्विधावस्तिः परिज्ञेयो निरूह
स्त्वानुवासनं कषायाद्यैर्निरूहः
स्यात् स्नेहाद्यैरनुवासनं इति
वैद्यकं ॥
अनुवृत्तिः स्त्री अनुवर्त्तनं ।
अनुरोधः इति हेमचंद्रः ॥
व्याकरणमते पूर्वसूत्रस्थितपद
परसूत्रे धूपस्थितिः तत्पर्य्यायः
अधिकारः २ सा त्रिविधा यथा
सिंहावलोकिताख्यमंडूकप्लुति
रेवच गंगास्रोत इति ख्याताः।
अधिकारा स्त्रयोमताः सिंहाव
लोकितो यथा वावगोर्हीते
इत्यस्मात् दीत इति पदस्य ॥
ऋकगित्यत्र धूपस्थितिः मंडूक
प्लुति यथा टा भिस ङे
उसीत्यस्मात् अत इति पदस्य॥
आक्ति मभ्रबीत्यत्रोपस्थितिः ॥
गंगास्रोतो यथा ले: सि डौ
जसित्यस्मात् ले रिति पदस्य
तद्धित पर्य्यन्तेषूपस्थितिः इति
मुग्धबोधटीकायां दुर्गादासः
अनुव्रजनं स्त्री अनव्रज्या ।
गृहागतानांप्रियाणांगमनसमये
कियद्दूरं पर्य्यंत पश्चाद्गमनरूप

शिष्टाचारः आगतानामनुव्रजन
इतिभाषा यथा आयांतमग्रतो
गच्छेत् गच्छन्तंतमनुव्रजेत् इति
तंत्रसारेनिगमकल्पद्रुमः ॥
अनुशयः पुं दीर्घद्वेषः पूर्व
वैरता अनुतापः इत्यमरः ॥
द्वेषः अनुबंधः इतिमेदिनी॥
अनुशयाना स्त्री परकीयांतर्गत
नायिकाभेदः तस्यालक्षणं॥
इष्ट हानि जनितानुतापवती
सात्रिधा वर्त्तमान संकेत स्थान
विघटनेन १ भावि संकेत ॥
स्थानाभाव शंकया २ स्वानधिष्ठित
संकेतस्थाने भर्तुर्गमनानुमानेन
३ इतिरसमंजरी ॥
अनुशायी स्त्री क्षुद्र रोगान्तर्गतपाद
रोगविशेषः तस्यलक्षणं यथा
गंभीरा मल्प संरंभा सवर्णा॥
मुपरिष्टाते पादस्यानुशायी।
तांभ विद्यादंतः प्रपाकिनी इति
माधवाकरः ॥
अनुशायी त्रि दंडवत् प्रणामे॥
चरणमूलेशेते यः यथा मे
संपद्यजहात्यजा अनुशायी सप्तः
कुलायेयथा इतिश्रीभागवते
अनुशारः पुं राक्षसः इति ॥
शब्दमाला ॥

अनुशासनं स्त्री आदेशः । आज्ञा यथा इत्येते ब्रह्मणः पुत्रा आकृत्यात्मानुशासनं इति श्रीभागवते भूतपादने यथा नामलिंगानुशासनमित्यमरः

अनुशीलनं स्त्री पुनःपुनरभ्यासः मुहुः सेवनं ॥ यथा । आनुकूल्येन कृष्णानुशीलनं भ क्तिरुत्तमा इतिभक्तिरसामृतसिन्धुः

अनुशोचनं स्त्री अनुशोचना तत्पर्यायः मन्युः २ शोकः ३ शुक् ४ इतिजटाधरः ॥

अनुषंगः पुं कारुण्यं दया इतिहलायुधः एकत्रान्वित पदस्यान्यत्रान्वयः यथा ॥ कोषो वलंचयष्टन मित्यादौ वल्लान्विता यष्टन स्य कोषेऽष्टुयः न्याये उपनयस्यायेपदस्य ॥ निगमनेऽनुषंगः यथा । वह्निव्याप्यधूमवांश्चायं तस्माद्वह्नि मान् प्रसंगः । अन्योद्देशे ॥ प्रवृत्तावन्यस्यापिसिद्धिः यथा नित्यक्रिया तथान्यानुषंग कला भति इति स्मृतिः ॥

अनुष्टुप् स्त्री सरस्वती इति ॥ शब्दरत्नावली अष्टाक्षरपदेच्छंदः ॥ तत्समार्द्धसम विषमवृत्त भेदेन त्रिधातत्र शेषस्यप्रायिकप्रयोगः तस्यलक्षणं पंचमं लघु सर्वत्र सप्तमं द्वि चतुर्थयोः गुरु षष्ठंतु पादानां शेषेष्वनियमो मतः इतिछंदोमंजरी ॥ अस्याः प्रस्ताराः २५६ । इति पिंगलः

अनुष्ठानं स्त्री कर्मारंभः करणं यथा कृता श्री भवदेवेन ॥ कर्मानुष्ठान पद्धती ॥

अनुष्णं स्त्री उत्पलं इति राजनिर्घंटः ॥

अनुष्णः त्रि अलसः इत्यमरः उष्णभिन्नः शीतलः बहुव्रीहौ त अनुष्णः ॥

अनुष्णवल्लिका स्त्री नीलदूर्वा इतिराजनिर्घंटः ॥

अनुसंधानं स्त्री अन्वेषणं चेष्टा इत्यादिकाव्यानुसंधानबलाति काव्यप्रकाशः ॥

अनुसारः पुं अनुसरणं ॥

अनुयानं अनुक्रमः यथा अयस्लौह विधिं वक्ष्ये लौह शास्त्रानुसारतः । इति वैद्यक सुखबोधः ॥

अनुहारः पुं अनुकारः सदृशी करणं । सदृश रूप वेश्म ॥

भाषायाविष्करणे इत्यमरः ॥ उपमा इति हेमचंद्रः ॥

अनुक्षणं स्त्री प्रतिक्षणं । सर्वदा अनवरतं ॥ क्षण ॥ शब्दस्यवीप्सार्थेनूपसर्गेणाव्ययीभाव समासः ॥

अनूकं स्त्री कुलं वंशः शील स्वभावः इतिमेदिनी ॥

अनूकः पुं गतजन्म पूर्वजन्म इतिमेदिनी ॥

अनूचानः पुं सांगवेदविचक्षणः शिक्षादि षडंग सहित वेद ॥ वेत्ता इत्यमरः ॥

अनूचानः त्रि विनीतः सविनयः इतिमेदिनी ॥

अनूढः त्रि अविवाहितः आइबर इतिभाषा । यथा । परिवेत्ताऽनुजो अनूढे ज्येष्ठे दार परिग्रहात् इत्यमरः ॥

(पुं) अनूद्यं त्रि अनुवाद्यं अनुवदनी अवदनीये द्रव्यमध्ये । इति संक्षिप्तसार व्याकरणं

अनूनं त्रि अखंडं समग्रं पूर्णं इति जटाधरः

अनूनकं त्रि सकलं पूर्णं अखंडं । इत्यमरः ॥

अनूपं त्रि जलबहुलदेशः जलप्लावितस्थाने । तत् पर्य्यायः जलप्रायं २ इत्यमरः अस्यगुणाः शीतलत्वं स्निग्धत्वं वातश्लेष्म कारित्वंगुरुत्वंच इतिराजवल्लभः एतद्देशीयजलगुणाः गुरुत्वं घनत्वं पिच्छिलत्वं मधुरत्वं ॥ श्लेष्मजनकत्वं स्निग्धत्वंअग्निनाशित्वं प्रमेहगलगंडश्लीपदकर्द्दिप्रभृति रोगकारित्वंच इतिराजनिर्घंटः

अनूपः पुं महिषः । इति त्रिकांडशेषः ॥

अनूपजं स्त्री आर्द्रकं इति राजनिर्घंटः ॥


अनूरु पुं सूर्य्यसारथिः अरुणः इत्यमरः॥

अनूरुसारथिः पुं सूर्य्यः यथा गतेतिरश्चीन मनूरु सारथेः इतिमाघः ॥

अनृजुः त्रि असरलः शठः इत्यमरः ॥

अनृणी न त्रि अऋणी अधारी यथा । एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् पृथिव्यां नास्तितद्द्रव्यं यद्दत्वा सोऽनृणी भवेत् इत्याह्निकतत्वं ॥

अनृतं स्त्री कृषिः मिथ्या ॥



इत्यमरः विवाहादिषु वकेषु अनृत
कथनेन पापजनके यथा।
विवाहकाले रति संप्रयोगे
प्राणात्यये सर्वधनापहारे ।
विप्रस्य चार्थे ह्यनृतं वदेत पञ्चा
ऽनृतान्याहुरपातकानि इति
महाभारते कर्णपर्वणि अर्जुनं
प्रति श्रीकृष्ण वचनं ॥ (ने
अनेके त्रि एकत्वातिरिक्तसंख्ये
तद्विशिष्टे च बहुः यथा अनेकरा
जन्यरथाश्वसंकुलं इतिभारविः
अनेकजः पुं पक्षी इति
त्रिकांडशेषः बहुजाते त्रि ॥
अनेकधा अ अनेकप्रकार ॥
बहुधा यथा पाटीसूत्रोपमं
बीजं गूढ मित्यवभाषते नास्ति
गूढ मगूढ ज्ञानां नैव षोढेत्य
ऽनेकधा इति लीलावती ॥
अनेकवारार्थेऽपि कचित् प्रयोगः
अनेकपः पुं सी हस्ती ॥
इत्यमरः ॥ (णः
अनेकाश्रितगुणः पुं वह्वाश्रितगु
तद्यथा संयोगः १ विभागः २
द्वित्वपृथक्त्वादिः ३ एकत्वान्यसं
ख्या ४ । इति सिद्धांतमुक्तावली
अनेडमूकः त्रि धूर्तः शठः
श्रुतिवाग्विहीनः कालाजोर्व

इति भाषा इदि मेदिनी ॥
अनेहाः पुं कालः समयः ॥
इत्यमरः
अनैक्यं क्ली ऐक्याभावः ॥
अनेकता । एकस्य भाव ऐक्यं
पश्चान्नञ समासः ॥
अनो अ नियेधार्थः अभावः
ना । इत्यमरटीकायां नीलकंठः
अनोकहः पुं वृक्षः इत्यमरः
अन्च उ पूजने ॥ गमने श्लिष्टोक्तौ
इतिकविकल्पद्रुमः ॥
अन्चक व्यक्तौ इतिकविकल्पद्रुमः
अज्ज ऊ यज्ञ व्यक्तौ गतौ ॥
स्रक्षणे इतिकविकल्पद्रुमः
अंतं क्ली सरूपे स्वभावः इति
मेदिनीत्रिकांडशेषश्च ॥
अंतं क्ली पुं शेषः इति
मेदिनी तत् पर्य्यायः जघन्यं २
चरमं ३ अन्त्यं ४ पाश्चात्यं ५
पश्चिमं ६ इत्यमरः ॥
अंतः पुं नाशः इत्यमरः ॥
स्वरूपः प्रांतः सीमा ॥
निश्चयः अवयः इति
हेमचंद्रः ॥
अंतः त्रि अंतिकः निकटः ।
इति मेदिनी अतिमनोहरः ॥
इति विश्वः ॥

अंतःकरणं क्ली अंतरिंद्रियं ॥
धीद्रियं । तत्पर्य्यायः मनः २
चित्तं ३ । इति त्रिकांडशेषः ॥
अस्य कार्य्यभेदान्नामचतुष्टयं यथा
मनो बुद्धिरहंकारश्चित्तं करणं ।
अंतरं संशयो निश्चयो गर्वः
स्मरणं विषया अमी ॥ इति
वेदांतः ॥
अंतःकुटिलः पुं शंखः इति
राजनिर्घंटः कुटिलांतःकरणे
त्रि अंतःपुरं क्ली राज्ञांस्त्रीगृहं ॥
तत्पर्य्यायः अवरोधनं २
अवरोधः ३ शुद्धांतः ४ इत्यमरः ।
अंतःपुरादयो राजद्वारेष्वपि
तात्स्थ्यात् वर्त्तंते यथा शुद्धांत
संभोग नितांततुष्टे इति नैषधं
इति भरतः दाक्षिण्येन ददाति
वाचमुचितां भर्तुः पुरेभ्योऽधर्द
इत्यभिज्ञानशाकुंतला ॥
अंतःसत्वा स्त्री भल्लातकः इति
शब्दचंद्रिका गर्भवती अंतरुदर
मध्ये सत्वं प्राणी यस्याः सा ॥
अंतःस्वेदः पुं हस्ती इति
त्रिकांडशेषः ॥
अंतकः पुं यमः । इत्यमरः ।
अंतगः त्रि अंतगामी पारगः
यथा वेदांतगो ब्राह्मणः स्यात्

तत्प्रियो विजयी भवेत् । इति
महाभारते विष्णुसहस्रनामफले
श्रुतः । अंते नाशं गच्छतीति ॥
स
अंततः अ संभावना अवयवः
पंचम्यर्थे प्रासने इति ॥
विश्वः ॥
अंतर अ मध्ये प्रांते स्वीकारः
इतिविश्वः ॥
अंतरं क्ली अवकाशः अवधिः
परिधाने ॥ अंतर्द्धाने भेदः ॥
तादर्थ्ये ॥ अवसरः ॥ मध्ये ॥
अंतरात्मा छिद्रे आत्मीयः ॥
विना वहि । इत्यमरः सदृशः ॥
इति तट्टीका मेदिनी च ॥
अवकाशो यथा मृणालसूत्रांतर
मप्यलभ्यं इतिकुमारसंभवः ॥
अवधौ यथा निरंतराभ्यंतरं ॥
वात हस्तिषु परिधाने यथा ।
अंतरे प्राटकाः परिधानीया ॥
इत्यर्थः अंतर्द्धौ यथा
सर्वतांतरितोरविः भेदे यथा
यदंतरं सर्षप शैलराजयोः ॥
यदंतरं वायस वैनतेययोः इति
रामायणे तादर्थ्ये यथा ।
त्वामंतरेण क्रयणे गृहीते त्वदर्थ
मित्यर्थः छिद्रे ॥ यथा ॥



अंतरे रे देतरे रिपु आत्मीये ।
यथा अयमत्यंतरोयम विनार्थे
यथा हरेत्वदालोकनमंतरेण॥
वहिरर्थे यथा अंतरेवं उालगृहा
वास्याइत्यर्थः अवसरेयथा ।
अंत्रांतरेच कुलटाकुलवर्त्मपाते
त्यादि मध्येयथा आवयोरंतरे ।
जातः पर्वताः परितोद्रुमाः ॥
सदृशे यथा हकारस्य वकारो
अंतरतमः इति भरतः ॥
अंतरंगः त्रि आत्मीयःस्वसंपर्कः
यथा चरम गिरिकुरंगी श्रृंग
कंडूयनेन स्वपिति सुखमिदानी
मन्तरंगः कुरंगः इति
कालीदासः ॥
अंतरा व्य वर्जने। विना मध्ये ॥
निकटे इति मेदिनी ॥
अंतरापत्या स्त्री गर्भिणी अंतरे
उदरमध्ये अपत्यंयस्याः सा॥
अंतरायः पु विघ्नः इत्यमरः ॥
अंतरालं क्ली मध्यप्रदेशः ।
अभ्यंतरं। इत्यमरः
अंतरालकं क्ली अभ्यंतरं । इति।
राजनिर्घंटः ॥
अंतरितं त्रि अंतर्हीनशांत ।
व्यवहितं तत्पर्यायः प्रस्तृतं ।
२। इति त्रिकांडशेषः ॥

व्यवकलिताकः। वाकि इति ॥
भाषा इतिलीलावती ॥
अंतरिक्षं क्ली अंतरीक्षं आकाशे।
इतिक्षीरादसं इत्यमर टीकायां ॥
पुरुषोत्तम जातरूप स्मृति॥
रायादयः ॥
अंतरीयं क्ली पु द्वीपं इत्यमरः
अंतरीयं क्ली अधोवस्त्रं परिधान
वस्त्रं। इत्यमरः ॥
अंतरीक्षं क्ली गगनं इत्यमरः
अभ्रकथातुः ॥
राजनिर्घंटः ॥
अंतरीक्षजलं आकाशजलं
दिव्योदकं इतिराजनिर्घंटः
अंतरे व्य मध्ये अभ्यंतरे ॥
इत्यमरः ॥
अंतरेण व्य मध्ये विना॥
व्यतिरेकः इत्यमरः ॥
अंतर्गडुः त्रि निरर्थकः हथा
इतिहेमचंद्रः ॥
अंतर्गतं त्रि विस्मृतं मध्यगते
इतिहेमचंद्रः ॥
अंतर्गृहं क्ली गृहमध्ये॥
चेरर भितर इतिभाषा इति
नानार्थ कोष शाहार्थे अमरः
अंतर्जठरं क्ली कुक्षिमध्यकोष्ठ
इत्यमरः ॥

अंतर्दधने क्ली सुरावीजे इति।
शब्दचंद्रिका ॥
अंतर्दाहः पु कोष्ठसंतापः ।
शरीराभ्यंतरज्वला । इति
राजनिर्घंटः ॥
अंतर्द्धा स्त्री अंतर्द्धाने इत्यमरः।
अंतर्द्धानं क्ली आच्छादने इति
शब्दरत्नावली तत् पर्य्यायःअंत
र्द्धिः१ व्यवधा २ अंतर्द्धिः ३ अपवारणं
४ अपिधानं ५ तिरोधानं ॥ ६
पिधानं ७ छदनं ८। इत्यमरः॥
अंतर्द्धिः पु अंतर्द्धाने इत्यमरः
अंतर्द्वारं क्ली प्रकोष्ठद्वारं।इति
भरतः गृहाभ्यंतरद्वारं ॥
गृहाभ्यंतरं प्रकोष्ठादिद्वारं ॥
जालद्वारं वा। इतिस्वामी तत्।
पर्य्यायः प्रच्छन्नं २ इत्यमरः॥
पक्षद्वारं खडकिकाद्वारं यथा
प्रच्छन्न मंतर्द्वारंच पक्षद्वारं ॥
तदुच्यते इति शवरस्वामी ॥
अंतर्भूतः त्रि गुणीभूतःअंतःस्थः
अंतरस्थः अंतर्गतः यथा सएव
भगवान् विष्णुरंतर्भूतःसनातनः
इतिपद्मपुराणे माघमाहात्म्ये ॥
अंतर्मनाः त्रि दुर्मनाः विमनाः
व्याकुलचेताः इत्यमरः ॥
अंतर्यामी पु अंतःकरणनियामकः

तत्पर्य्यायः आत्मा २ जीवः ३
पुरुषः ४ पुद्गलः ५ ईश्वरः ६।
इति त्रिकांडशेषः विशुद्धसत्व
प्रधानाज्ञानोपहितचैतन्यं ॥
इतिवेदांतसारः मनोगतज्ञे ॥
त्रि ॥
अंतर्वंशिकः पु अंतः पुराधिकृतः
अंतःपुराध्यक्षः इतिमरः ॥
अंतर्वत्नी स्त्री गर्भिणी इत्यमरः
अंतर्वमिः पु अपाकः अजीर्णः
इतित्रिकांडशेषः ॥
अंतर्वाणिः त्रि शास्त्रवित् शास्त्रज्ञः
इत्यमरः ॥
अंतर्विगाहने क्ली प्रवेशने ॥
इति हेमचंद्रः ॥
अंतर्वेदी स्त्री ब्रह्मावर्त्तदेशः
गंगायमुनयोर्मध्येदेशः अप्रयाग
हरिद्वार पर्य्यन्तदेशः दोआव।
इति पश्चिमदेशे ख्याता तत्
पर्य्यायः शशस्थली २ इति ॥
त्रिकांडशेषः ॥
अंतर्हासः पु अव्यक्तहासः ॥
गूढहास्ये तत्पर्यायः उहर्हने
२। इति त्रिकांडशेषः तद्वति॥
अंतर्हितं त्रि लुक्कायितं गुप्तं
तत्पर्य्यायः संवीतं २ रुद्धं ३॥

आहते ४ संहते ५ पिहिते ६ ॥
कृत्ते ७ स्थगिते ८ अपवारिते ९
तिरोधाने १० इतिहेमचंद्रः ॥
अंतवासी न पुं अंतेवासी शिष्यः
इत्यमरटीकायां भरतः ॥
अंतशय्या स्त्री भूमिशय्या ॥
मृत्युः श्मशाने इतिमेदिनी ॥
अंतावशायी न पुं चंडालः ॥
मुनिविशेषः । इति हेमचंद्रः ॥
नापितः इत्यमरः ॥
अंतिः स्त्री नाट्योक्तौ ज्येष्ठा ॥
भगिनीइति शब्दरत्नावली ॥
समीपे व्य यथा मुग्धप्रभीत ॥
वडुपयतु रश्मिमात्रोः इति ॥
श्रीभागवते ॥
अंतिके त्रि निकटे इत्यमरः ॥
सामीप्ये क्ली इतिधरणी ॥
अंतिकतमः त्रि अतिनिकटः
तत्पर्यायः नेदिष्टः २ इत्यमरः
नेदीयान् ३ अभ्यासतमः ४ इति
जटाधरः ॥
अंतिका स्त्री नाट्योक्तौ ज्येष्ठा
भगिनी इत्यमरः तत्पर्यायः ।

अंतिका २ अत्तिका ३ इति
तट्टीकायां चुल्ली शातला
नामौषधं चामरकवाइति ॥

ख्याताइति मेदिनी ॥
अंतिकाश्रयः पुं निकटाश्रयः
समीपस्थावलंबनं तत् पर्य्यायः
उपघ्नः २ इत्यमरः ॥
अंतिमः त्रि अंतेभवः चरमः
अंत्यः इति जटाधरः अतिनिकटः
इत्यमरटीकायां नीलकंठः ॥
अंतेवासी न पुं शिष्यः ॥ चंडालः
इत्यमरः प्रांतस्थायिनि त्रि ॥
इतिविश्वः ॥
अंत्यं क्ली दशसागरसंख्या ॥
सहस्रलक्षकोटिः इतिलीलावती
द्वादशलग्नं इति ज्योतिषे ॥
अंत्यः त्रि अंतेभवः शेषात् पत्रः
अधमः जघन्यः इतिमेदिनी ॥
अंत्यः पुं मुस्ता मुताद्यास इति
भाषाइतिमेदिनी म्लेच्छः ॥
इति प्रायश्चित्ततत्त्वं ॥
अंत्यजः पुं स्त्री शूद्रः इति
हलायुधः रजकादिसप्तजातयः
यथा रजकश्चर्मकारश्च नटोवरुड
एवच कैवर्त मेद भिल्लाश्च ॥
सप्तैते अंत्यजाः स्मृताः इति

यमवचनं जघन्यजेत्रि ॥
अंत्यजन्मा न पुं स्त्री चतुर्थवर्णः
शूद्रः इतिशब्दरत्नावली ॥

अंत्यभं क्ली रेवतीनक्षत्रे ॥
मीनराशिः । इतिज्योतिषे ॥
अंत्यवर्णः पुं स्त्रीशूद्रः इति ॥
हेमचंद्रः ॥
अंत्यावसायी न पुं स्त्रीचंडालादि
सप्तजातयः यथा चांडालः ॥
श्वपचः क्षत्ता सूतो वैदेहक ।
स्तथा मागधायोगवौ चैव ॥
सप्तैते ऽन्त्यावसायिनः इति
अंगिराः ॥
अंत्रं क्ली शरीरतत् आंतडी
आंत् इति भाषा इत्यमरः ॥
अंदिका स्त्री अंतिका चुल्ली ।
चुलाइतिभाषा । इत्यमरटीकायां
नीलकंठः ॥
अंडुः स्त्री हस्तिनिगडः आंडषा
इतिभाषा स्त्रीपादभूषणं ।

मलयेवम इत्यादिभाषाइति ।
हेमचंद्रः भूरिप्रयोगश्च ॥
अंडुकः पुं हस्तिपादबंधनशृंखल
तत्पर्यायः निगडः २ इत्यमरः
पादालंकारविशेषः तत्
पर्य्यायः पादकटकः २ इति
त्रिकांडशेषः ॥
अंडूः स्त्री हस्तिपादबंधनलोह
निगडः आंडुया इतिभाषा ॥

स्त्रीपादभूषणं मलगुजरी इत्यादि
भाषाइतिमेदिनी ॥
अंहूकः पुं अंहूः इत्यमरः ॥
टीकायांस्वामी ॥
अंथ तक हकलक्षणे । इति
कविकल्पद्रुमः ॥
अंधं क्ली अंधकारः जले
इतिमेदिनी ॥
अंधः त्रि चक्षुर्द्वयहीनः आंधा
आंधला इति हिंदीभाषा ॥ तत्
पर्य्यायः अदृक् २ इत्यमरः
अंधः स क्ली अन्नं इत्यमरः ॥
अंधकः पुं देशभेदः इति ॥
शब्दरत्नावली ॥ नृपभेदः ॥
असुरभेदः इतिमहाभारते ।
मुनिविशेषः इतियाज्ञवल्क्यः
अंधकरिपुः पुं शिवः इत्यमरः
श्लेष कार्थदो अंधकार
नाशकत्वात् सूर्य्याग्नि चंद्रेष्वप
वर्त्तते ॥
अंधकारः पुं क्ली तेजःसामान्या
भावः आंधार इति भाषा तत्
पर्य्यायः ध्वांत २ तमिस्रं ३
तिमिरं ४ तमः ५ इत्यमरः ॥
भूछाये ६ इतिराजनिर्घंटः
महांधकारे अंधतमसं ७ सर्व
व्यापकांधकारे सन्तमसं ८

अल्यांधकारे अवतमसं ५ । इत्यमरः अस्य गुणाः भयहृष्टि तेजावरोध कारित्वं तिक्तत्वं । सर्वव्यापि करत्वंच । इति ॥ राजवल्लभः ॥

अंधकासरुद् पुं शिवः इति हेमचंद्रः ॥

अंधकूपः पुं अंधकारकूपः आधुयापातक्रुया इतिभाषइति त्रिकांडशेषः ॥

अंधतमसं क्ली निविडांधकारे इत्यमरः ॥

अंधतामसं क्ली निविडांधकारे महांधकारे । इत्यमरटीकायां स्वामी ॥

अंधतामिस्रं क्ली निविडांधकारमय नरक विशेषः ॥ पंच प्रकाराज्ञाना ज्ञानांतर्गताज्ञानविशेषः देहनाशे अहमेव मृतोस्मीति वुद्धिः । इतिभारत भागवते ॥

अंधमूषिका स्त्री देवताडहृक्षः इतिशब्दचंद्रिका ॥

अंधाहिः पुं स्त्री मत्स्यभेदः । कुंचिया इति ख्यातः । इति त्रिकांडशेषः ॥

अंधिका स्त्री द्यूतविशेषः ॥ रात्रिः । इति मेदिनी सर्षपी ॥

इतिहेमचंद्रः स्त्रीविशेषः चक्षूरोग विशेषः । इति शब्दरत्नावली ॥

अंधुः पुं कूपः इत्यमरः ॥

अंधुलः पुं शिरीषवृक्षः इति शब्दचंद्रिका ॥

अंध्रः पुं व्याधः मृगयाजीवि इतिकश्चित् संग्रहकारः ॥

अन्नं क्ली खिन्नतंडुल तत्पर्यायः भक्तं २ अंधः ३ भिस्सा ४ वदनं ५ दीदिविः ६ इत्यमरः भिस्सा । ७ इतितट्टीकाकारः ८ इति राजनिर्घंटः ॥ अस्य गुणाः तुष्टि शुक्रप्रीति पुष्टिधार्तीन्द्रिय वल कारित्वं गुरुत्वं क्षुधा तयरोग श्रम कार्श्य नाशित्वञ्च ॥ नवान्नगुणाः श्लेष्मकारित्वंस्वादुत्वं स्निग्धत्वं । हेहनत्वं गुरुत्वंच ॥ पुराणान्नगुणाः विरसत्वं कठत्वं । पथ्यत्वं । अग्निकारित्वंच ॥ उष्णान्नगुणाः प्रशंसनीयत्वं रुच्यत्वं । अग्निकारित्वं वातश्लेष्म नाशित्वं रक्तपित्त प्रकोप ॥ कारित्वंच ॥ अत्युष्णान्नगुणाः वलनाशित्वं ॥ शीतशुष्कान्नयो गुणाः । दुर्जरत्वं ॥ अतिक्लिन्नान्न गुणाः ग्लानिकारित्वं ॥

तंडुलान्वितान्नगुणाः दुर्जरत्वं ॥ जलधौत सद्योन्नगुणाः शीघ्र पाकित्वं हिमत्वं लघुत्वंच ॥ रात्रिस्थित जलयुक्तान्नगुणाः त्रिदोष कोपकारित्वं रूक्षत्वंच ॥ भृष्टतंडुलान्न गुणौ लघुत्वं अग्निप्रदीपनत्वंच इतिराजवल्लभः ॥ धान्यं । इति राजनिर्घंटः विष्णुः । इति तस्य सहस्रनाम मध्येपठितं अदनीयद्रव्यमात्रं

अन्नः पुं सूर्यः । इति सिद्धान्त कौमुदी ॥

अन्नः त्रि भुक्तः खादितः इति मेदिनी ॥

अन्नकोष्ठकः पुं तंडुलादिरक्षणस्थानं गोला कुठई इत्यादि ॥ भाषा इतिहेमचंद्रः ॥

अन्नगंधिः पुं उदरामयरोगः ॥ इतित्रिकांडशेषः ॥

अन्नप्राशनं क्ली षष्ठेमासि अष्टमेवा वालकस्य पंचमे मासि सप्तमेवा वालिकायाः प्रथमान्न भक्षण संस्कारः इति स्मृतिः तस्य क्रमः शुभदिने कृतस्नानः कृतवृद्धिश्राद्धः पितान्नुविनीमे मग्निं संस्थाप्य विरूपाक्षजपांते कुशंडिकां समाप्य प्रकृत कर्मारंभे प्रादेश प्रमाणं ॥ हुताकी समिधं तूष्णी मग्नौ हुत्वा महाव्याहृति होमं कुर्यात् तत आज्येन तत्तन्मंत्रः ॥ पंचाहुतीर्जुहुयात् । ततः पंच प्राणानो होमः । ततो ॥ महाव्याहृति होमंकृत्वा प्रादेश ॥ प्रमाणं हुताकी समिधं तूष्णी मग्नौहुत्वा प्रकृतं कर्म समाप्य उदीच्य शाट्यायन होमादि ॥ वामदेव्य गानांतं कर्म निर्वर्त्य मंत्रेण कुमारस्य मुखे अन्नं दद्यात् । ततः कर्मकारयित्रे ब्राह्मणाय दक्षिणांदद्यात् इति भवदेवभट्टः ॥


अन्नमयकोषः पुं स्थूलशरीरं इति वेदांतसारः ॥

अन्नमलं क्ली मद्यं यथा । सुरावै मल मन्नानां पुरीषं मल मुच्यते । तस्माद्ब्राह्मण राजन्यौ वैश्यश्चनसुरां पिवेत् इतिप्रायश्चित्तविवेकः ॥

अन्नविकारः पुं शुक्रं इति राजनिर्घंटः ॥

अन्नादः पुं विष्णुः इतितस्य सहस्रनाम मध्य पाठतः ॥

अन्नभोकरित्रि ॥



अन्यः त्रि-असदृशः । इति
मेदिनी परः तत्पर्य्यायः ॥
भिन्नः २ अन्यतरः ३ एकः ४ स्वः
[illegible] इतरः ६ । इत्यमरः ॥
अन्यत् व्य इतरे भिन्ने यथा
देवदत्त आयातोऽन्ययज्ञदत्तः
अन्यदेवास्यगाम्भीर्यमन्यद्धैर्य्य
महीयते इत्यादौ तु क्लीवलिंग
प्रथमैक वचनान्तान्य प्राह
स्वीकारेणाप्युपपत्तिरितिबोध्यं
अन्यतः[स] व्य अन्यत्र अन्यस्मात्
यथा एकतो ह्रियिगमूमगुणज्ञा
मन्यतः कथमदःप्रतिलंभः इति
नैषधं ॥

अन्यतमः त्रि भिन्नतमः बहूनां
मध्ये निर्द्धारितेकः अनेकेर
मध्ये एक इति भाषा इति
व्याकरणे न्याय मते अनेक
भेदा वच्छिन्न प्रतियोगिताक
भेदः ॥

अन्यतरः त्रि अन्यः इत्यमरः ।
भिन्नतरः । द्वयो मध्ये ॥
निर्द्धारितेकः द्वयेर मध्ये एक
इतिभाषा इतिव्याकरणन्याय
मतेद्वया वच्छिन्नप्रतियोगिताक
भेदः

अन्यतरेद्युः[म] व्य अन्यतरदिने ॥

दिनद्वययो रेकतर दिने
इत्यमरः ॥

अन्यत्र व्य वर्जने विना
यथा । अन्यत्र निधनात्पत्युःपत्नी
केशान्नवापयेदिति प्राचीनाः
पत्युर्निधनादन्यत्र पति मरणं
विनेत्यर्थः स्थानांतरे यथा ॥
अन्यत्रयूयं कुसुमावचायंकुरुध्वं
मत्रास्मि करोमि सख्यः इति
काव्यप्रकाशः ॥

अन्यथा व्य परार्थः मिथ्या ॥
इतिमेदिनी ॥ दृष्टं इति ॥
शाब्दरत्नावली अन्यप्रकारे इति
व्याकरणं ॥

अन्यथासिद्धिः स्त्री कार्य्याव्यवहित
पूर्ववर्तित्वे सति कार्य्यानुत्पादकत्वं
सेयं पञ्चविधा यथा यत् कार्यं ॥
प्रतिकारणस्य पूर्ववर्तिता येन
रूपेण गृह्यते तत्कार्य्यं प्रति
तद्रूप मन्यथासिद्धं यथा घटं
प्रतिदंडत्वं १ यस्य स्वातंत्र्येण ।
अन्वय व्यतिरेकौ न तः किंतु कारण
मादायान्वय व्यतिरेकौ तदन्यथा
सिद्धं यथा घटं प्रति दंड रूपं २
अन्यं प्रति पूर्ववर्तिता गृहीत्वैव
यस्य यत् कार्य्यं प्रति पूर्ववर्तित्वं
गृह्यते तस्य तत् कार्य्यं प्रति ॥

अन्यथासिद्धत्वं यथा घटादिकं
प्रति आकाशस्य ३ यत् कार्य्य
जनकं प्रति पूर्ववर्तित्वे गृहीत्वैव
यस्य यत् कार्य्यं प्रति पूर्ववर्तित्वं
गृह्यते तस्य तत् कार्य्यं प्रति
अन्यथासिद्धत्वं यथा कुलालपि[तु]
र्घटः प्रति ४ अवश्यक्लृप्तनियत
पूर्ववर्तिन एव कारणत्वसंभवे तद्भि
न्नमन्यथासिद्धं यथा घटं प्रति
रासभादिः ५ इति सिद्धांत ॥
मुक्तावली ॥

अन्यदा व्य कालांतरे । अन्य ॥
समये यथा अन्यदा भूषणं
पुंसः क्षमा लज्जेव योषितः ॥
पराक्रमः परिभवे वैजात्यं ॥
सुरतेष्विव ॥ इतिमाघः ॥

अन्यपुष्टः पुं कोकिलः यथा
अप्यन्यपुष्टाः प्रतिकूलशब्दाः
श्रोतुर्वितंत्री रिवताड्यमानाः ।
इतिकुमारसंभवः

अन्यपूर्वा स्त्री पौनर्भवाकन्या
एकस्मै वागादिना दत्ता पुनरन्येन
विवाहिता कन्या सा सप्तधा यथा
सप्तपौनर्भवाः कन्यावर्जनीयाः
कुलाधमा वाचा दत्ता मनो
दत्ताकृत कौतुक मंगला ॥
उदकस्पर्शिता या च या च ॥

पाणिगृहीतिका अग्निपरिगता
या तु पुनर्भूप्रसवा च या इत्येताः
काश्यपेनोक्ता दहन्ति कुलमग्निवत्
इत्युद्वाहतत्त्वं ॥

अन्यभृत् पुं काकः इति ॥
हेमचंद्रः ॥

अन्यभृतः पुं कोकिलः इति
हलायुधः ॥

अन्यमनस्कः त्रि भिन्नचित्तः
अन्यमनाः अन्यस्मिन् मनो यस्य स
इति बहुव्रीहौ क प्रत्ययेन सिद्धः

अन्यवर्द्धितः त्रि अन्यपुष्टः ।
परैधितः अन्येन प्रतिपालितः
इतिजटाधरः ॥

अन्यवादी[न] त्रि इतरवादी
अस्थिरवादी अन्यथावादी यथा
अन्यवादी क्रियाद्वेषी नोपस्थायी
निरुत्तरः आहूत प्रपलायी च हीनः
पंचविधः स्मृतः ॥ इति व्यवहार
तत्त्वे नारदः ॥

अन्यशाखकः पुं स्ववेदशाखान्तर
स्वज्यापरशाखाश्रयकर्म्म कुर्वाणः
तत्पर्य्यायः शाखारंडः २ इति
हेमचंद्रः ॥

अन्यादृक त्रि अन्यप्रकारः
इति मुग्धबोध व्याकरणं ॥

अन्यादृशः त्रि अन्यप्रकारः इति

तुग्धबोधव्याकरणं ॥
अन्यासः पुं न्यायभिन्नः ।
अनौचित्यं अयुक्तिः यथा
अन्यायेनापि यद्भुक्तं पित्रा पूर्व
तैस्त्रिभिः नतच्छक्यमपाकर्तुं
क्रमात्त्रिपुरुषागतं इति
व्यवहारतत्वे नारदः ॥
अन्याय्यः त्रि अनुचितःअयोग्यः
यथा दृष्टार्थे सत्वे अदृष्टैकल्पना(मा)
अन्याय्यत्वादित्यधिकरणमालायां
माधवाचार्य्यः ॥
अन्यूनः त्रि न्यूनतारहितः ।
संपूर्णः इतिजटाधरः ॥
अन्येद्युः(स) अव्य अन्यस्मिन्नहनि
दिवसांतरे अन्यदिने इत्यमरः
अन्योदर्य्यः पुं स्त्री वैमात्रेयः
यथा अन्योदर्य्यस्तु संसृष्टी
नान्योदर्य्यो धनं हरेत् इति
याज्ञवल्क्यः ॥
अन्योन्यं त्रि उभयतः तत्॥
पर्य्यायः इतरेतरं परस्परं ॥
१ इतिहेमचंद्रः ॥
अन्योन्याश्रयः त्रि परस्पर
ज्ञानसापेक्ष ज्ञानंश्रयः इति
स्मार्त्ताः स्वग्रह सापेक्ष ग्रह
सापेक्षग्रहकः इति तार्किकाः
तर्कविशेषः इस्यलक्षणं ॥

स्वापेक्षापेक्षितत्वनिबंधनप्रसंगत्वे
अपेक्षाच ज्ञप्तौ उत्पत्तौ
स्थितौच ग्राह्या तत्राद्या यथा
घटोयं यद्येतद्घटे ज्ञान जन्य
ज्ञान विषयः स्यात् उदेतद्घटे
भिन्नःस्यात् द्वितीय यथा
घटोयं यद्येतद्घटे जन्य जन्यः
स्यात्तदेतद्घट जन्य भिन्नःस्यात्
तृतीयायथा। घटोयं यद्येतद्
घटवृत्ति वृत्तिःस्यात् तथात्वेनोप
लभ्येत इति जगदीशः ॥
अन्वक्(व) त्रि पश्चाद्गामी इत्यमरः
अन्वयः पुं वंशः कुलं ॥
इत्यमरः पदानां परस्पराकांक्षा
योग्यताच इति दुर्गादासः ॥
परस्पर संबंधः इति राम
तर्कवागीशः ॥
अन्ववायः पुं वंशः कुलं
इत्यमरः ॥
अन्वष्टका स्त्री अष्टकापश्चात्तिथिः
सानुगौण(ो) चान्द्र पौष माघ
फाल्गुनामासानां कृष्णनवमी
तत्रसाग्नीनांमातृक श्राद्धं ॥
इतिश्राद्धविवेकः ॥
अन्वक्षः त्रि पश्चाद्गामी ।
इत्यमरः ॥
अन्वाधिः पुं एकस्मिन् यदर्पितं॥

वस्तु तेन पुरुषान्तरे अमुष्मिन्
स्वामिनि त्वं दास्यसीति निक्षिप्तं
तत् इति विवादार्णवसेतुः ॥
कार्य्येषु यावनेन अमुष्मिन्
पुरुषेत्वं दद्याइति परिभाष्यत्
समर्पितं तत् इति हलायुधः ॥
यथा अर्थीमार्गणकार्य्येषुअन्यस्मिन्
ववनान्मम दद्यास्त्वमितियोदत्तः
स इष्टान्वाधि रुच्यते ॥ इति
कात्यायनः पुनर्बंधकः ॥
पश्चान्मानसीव्यथा अनुपूर्वकस्य
आधिशब्दस्य इत्यर्थ द्वयमपि
संभवति
अन्वाधेयं क्ली विवाहानंतरपितृ
मातृभर्तृ कुल लब्ध स्त्रीधनेयथा
विवाहात् परतो यत्तु लब्धं भर्तृ
कुलात् स्त्रिया अन्वाधेयेनद्व्रव्यं
लब्धं बंधु कुलात्तथा इति
कात्यायनः ॥
अन्वासनं क्ली स्नेहवस्तिअनुशे(वनं)
उपासना इति विश्वमेदिन्यौ ॥
शिल्पादिगृहं इतिहलायुधः
अन्वाहार्य्यः क्ली मासिकश्राद्धं
इत्यमरः तत्तु प्रत्यमावास्या ॥
विहितं पार्वण श्राद्धं अकृत
सपिंडीकरणस्य वत्सरांते प्रति
मसंयत्श्राद्धं तदितिकेचित् ।


इतिभरतः गोभिलगृह्योक्त
कर्म्मणमाद्येगश्राद्धं तदेतांग
दक्षिणाच। यथा यत् श्राद्धं
कर्म्मणमादौ वाचांतु दक्षिणा
भवेत् अमावास्यं द्वितीयं
यदन्वाहार्य्यं विदुर्बुधाः इति
गोभिल गृह्यं ॥
अन्वाहार्य्यकं क्ली अन्वाहार्य्यं
यथा पिंडान्वाहार्य्यकं श्राद्धं
कुर्यान्मासानुमासिकं इति मनु
अन्वाहितं त्रि यदेकस्य हस्ते
निहितंद्रव्यं तेनापियश्चादन्यस्य
हस्तस्वामिने देहीति निहितंतत्
इति मिताक्षरा गच्छितद्रव्य ॥
ताहार स्वामिके दिते अन्यहस्ते
अर्पणकरा इति भाषा ॥
अन्वितः त्रि युक्तः मिलितःइति
जटाधरः कृतान्वयपदादिःयथा
पदार्थांतरे इन्वितानां संकेतो
गृह्यते। इति काव्यप्रकाशः ॥
अन्विष्टः त्रि अन्वेषितः कृतान्वेषणः
इत्यमरः ॥
अन्वीतः त्रि अन्वितः युक्तः
इतिजटाधरः ॥
अन्वेषणं क्ली अन्वेषणा ॥
अनुसंधाने यथा सुग्रीवोराम
मित्रे कजक तनयान्वेषणे ॥

प्रेषितोहं इतिमहानाटकं ॥
अन्वेषणा स्त्री तर्कादिना यथा
वोधित धर्माद्यन्वेषणं अन्वेषण
मात्रंतत् पर्य्यायः परीष्टिः २
पर्येषणा ३ गवेषणा ४ इत्यमरः
अन्वेषितः त्रि कृतान्वेषणःतत्
पर्य्यायः गवेषितः २ अन्विष्टः ३
मार्गितः ४ मृगितः ५ इत्यमरः
परीष्टः ६ पर्य्येषितः ७ इति ॥
अन्वेषणपर्य्याये परीष्टिपर्य्येष
णा । पददर्शनात् ॥
अन्वेष्टा मं त्रि अन्वेषणकर्त्ता।
पर्य्यायः । अनुपदः २ इति
हेमचंद्रः ॥
अप अ उपसर्गविशेषः ।
अस्यार्थः अनादरः ॥ श्रेष्ठः
असाकल्ये ॥ वैरूप्ये त्यागः ॥
नञर्थः । इति दुर्गादासः
अपकृष्टार्थः वर्जनार्थः ॥
वियोगः विपर्य्ययः विकृतिः
चौर्य्यं निर्देशः हर्षः ।
इतिमेदिनी ॥
अपः स क्ली यस्नकर्म इत्युणादि
कोषः ॥
अपकर्म क्ली दुष्क्रियाभेदकर्म
अपकृष्टार्थो पोपसर्गेण कर्म
शब्दस्य कर्मधारय समासः

अपकारः पुं द्रोहः अनुपकारः
मंदकरणं इतिहलायुधः
अपकारगीः स्त्री अपकारवाक्ये
भर्त्सने इत्यमरः ॥
अपकारीन त्रि अपकारकः ।
द्रोहकः यथा अपकारिणि चेत्
कोपः कोपः कोपे कथं नते
धर्मार्थकाममोक्षाणां चतुर्णां
परिपन्थिनि इत्युद्भटः ॥
अपाकृष्ट त्रि जघन्यं तत्
पर्य्यायः अधमं २ निकृष्टं ३
अणकं ४ गर्ह्यं ५ अवद्यं ६
कांडं ७ कुत्सितं ८ प्रतिकृष्टं ९
याप्यं १० रेकः ११ अवमं १२
बुवं १३ खेटं १४ पापं १५
अपशदं १६ कुपूयं १७ चेलं १८
अर्हचं १९ इतिहेमचंद्रः ॥
अपक्रमः पुं पलायने ॥
इत्यमरः ॥
अपक्रिया स्त्री द्रोहः अपकारः
इतिहेमचंद्रः ॥
अपक्रोशः पुं निंदने जुगुप्सने
भर्त्सने इतिशब्दरत्नावली ॥
अपक्वः त्रि पक्वभिन्नः कांचा इति
भाषा यथा तैले विपक्वाये ॥
विधात् पक्के चापक्वएव च इति
वैद्यक परिभाषा तत्पर्य्यायः

अलिंदे १ आमे २ अमृते ३
इतिरत्नमाला
अपगतः त्रि मृतः । इति ॥
हेमचंद्रः गतः दूरीभूतः ॥
यथा तापोनापगतस्तृषा नच
कृशाधूली नधूतातनो रित्यादि
वल्लालसेनः ॥
अपगा स्त्री आपगा नदी ।
इत्यमर टीकायां भरतः ॥
अपघनः पुं अवयवः अंगे
इत्यमरः ॥
अपघातः पुं अपहनने ।
अपकृष्टार्थोपसर्गात् हनधातो
भावे घञ् हस्यघः नस्यतः
अपचयः पुं क्षतिः हानिः ॥
तत्पर्य्यायः अपहारः २ ।
इत्यमरः
अपचायितः त्रि पूजितः ॥
इत्यमरः ॥
अपचारः पुं अहिताचरणं यथं
योनिप्रदोषाच्च भवंति शिश्रे
पंचापदंशा विविधापचारैः ।
इतिमाधवकरः ॥
अपचितः त्रि पूजितः इत्यमरः
अपचयविशिष्टः यथा ॥
तत्रापचितवलाः प्राणिनोभवंति
सूर्य्यवलत्वात् इतिसुश्रुतः ॥

अपचितिः स्त्री हानिः ॥ व्ययः
पूजा निष्कृतिः इतिमेदिनी
अपच्छायः त्रि देवः उपदेवः
निष्प्रभः अपगता छायायस्य इति
वहुव्रीहौ ह्रस्वः ॥
अपंचीकृतं क्ली सूक्ष्मभूते ॥
पंचीकृतभिन्नाकाशादिपंचभूते
। इति वेदांतसारः ॥
अपटांतरं त्रि अपदांतरं ।
अव्यवहिते इत्यमरटीकायां
स्वामी ॥
अपटी स्त्री वस्त्रावरणेकानात्
इतिभाषा इतिहेमचंद्रः ॥
अपटुः त्रि व्याधितः रोगी
इत्यमरः ॥ पटुता रहितः ॥
कार्य्याक्षमः यथा । साक्रांता
जघनस्थलेनगुरुणा गंभेनशक्तावयं
दोषैरन्यजनाश्रयैरपटवोजाताः
स्मइत्यद्भुते इत्यमरकविः ॥
अपतर्पणं क्ली लंघने रोगादौ
भोजनाभावः इति हेमचंद्रः
अपत्यं क्ली पुत्रः कन्याततः
पर्य्यायः संतानः २ तोकं ३
संततिः ४ प्रसूतिः ५ इति
जटाधरः ॥
अपत्यदा स्त्री गर्भदात्रीहसः इति
राजनिर्घंटः ॥



अपत्यपथः पुं भगं योनिः ॥
इतिहेमचंद्रः ॥
अपत्यशत्रुः पुं कर्कटः कांकडा
इतिभाषा इतिशब्दचंद्रिका ॥
अपत्रपः त्रि अपारहितः निर्लज्जः
अपगतात्रपायस्येतिबहुव्रीहौ
आकारस्यह्रस्वः ॥
अपत्रपा स्त्री अन्यतोलज्जा ।
परस्मात् लज्जा । इत्यमरः ॥
लज्जामात्रे इतिरत्नकोषः ॥
अपत्रपिष्णुः त्रि स्वभावसत्रपः
लज्जाशीलः लाज्जुक इतिभाषा
इत्यमरः ॥
अपथं क्ली व अपंथाः मार्ग
एवयोन भवति तत् इत्यमरः
योनिः इतिशब्दरत्नावली ॥
अपथ्यं त्रि पथ्यभिन्ने अहिते
यथायत् पथ्यं यदपथ्यंचवक्ष्यते
रक्तपित्तिनां इतिपथ्यापथ्यग्रन्थः
अपदानं क्ली अवदानंवृत्तंकर्म
वृत्तिः प्रवर्त्तने साप्रशस्ता ॥
विद्यते यत्र तत् यत्रकर्मणि ॥
वृत्तिः सर्वैः प्रशस्यते तदित्यर्थः
इत्यमरटीकायां स्वामी ॥
अपदांतरः त्रि अव्यवहितः
संयुक्तः इत्यमरः अभिन्नपरेक्ली
अपदिशं क्ली व दिक्कोणः

दिशोर्म्मध्यं । तत्पर्य्यायः ।
विदिक् २ इत्यमरः
अपदेशः पुं स्थानं निमित्तं
शरव्यं स्वकयाछादनं तत् ॥
पर्य्यायः व्याजः २ लक्ष्यं ३
इत्यमरः यशानिह्नकारि भिन्न
शठता इतिमहाभारत टीका
अपध्वंसजः पुं वर्णसंकरः यथा
शूद्राणांभ मथर्म्मणः सर्व्वे
ऽपध्वंसजाः स्मृताः इतिमनुः
अपध्वस्तः त्रि परित्यक्तः ॥
निंदितः चूर्णीकृतः इति ॥
मेदिनी ॥
अपनयनं क्ली खंडनं दूरीकरणं
यथा इति श्री शान्वपुराणे ॥
रोगापनयने श्रीसूर्य्य वक्र
विनिर्गत स्तवराजः समाप्त इति
अपनोदनं क्ली खंडनं दूरीकरणं
यथामानापनोदन विनोद
नतेगिरीशे इतिश्रीहर्षः ॥
अपंथाः पथिन् पुं अपथं इत्यमरः
अपपात्रितः त्रि उत्कटेदोषे
ज्ञातिभिभिन्नोदकीकृतः यथा
अपपात्रितस्यरिक्थपिंडोदकानि
निर्वर्त्तेत । इति शुद्धितत्वे ॥
शंखायनस्तन्त्रो ॥
अपभ्रंशः पुं ग्राम्यभाषा ॥

अपभाषातत् पर्य्यायः अपशब्दः
इत्यमरः पतनं यथा अत्या रूढि
भवति महता मेप्यप भ्रंशनिष्ठा
इत्यभिज्ञान शाकुंतला
अपमः पुं क्रांतिः इतिसिद्धांत
शिरोमणौ गोलाध्यायः ॥
अपमानं क्ली अनादरः अमर्य्यादा
इति शब्दरत्नावली ॥
अपमित्यकं क्ली ऋणं इति
हलायुधः ॥
अपमृत्युः पुं अपघातमरणं
विनारोगेण मरणं । यथा ॥
अपमृत्युः भये नास्ति मृतोमोक्ष
मवाप्नुयात् इतिदेवीमाहात्म्य
कीलके ॥ यत्तुशुद्धितत्वेशोक्तं
यद्दि मत् स्य मृग दंष्ट्रि शृंगि
नखियतनानशान्वज्राग्निविष
वैथजलप्रवेशास्वबन्धनादिजन्यमरणं
तदेवापमृत्यु रिति सुधीभि
र्विभाव्यं ॥
अपयानं क्ली पलायनं इत्यमरः
अपरं क्ली हस्तिपश्चाद्भागः ॥
गजांत्य जंघादिभागः इति
मेदिनी ॥
अपरः त्रि अन्यः इतरः ॥
अर्वाचीनः इतिमेदिनी ॥
अपरत्वं क्ली अपरस्यभावः ॥

न्यायमतेतत् द्विविधं दैशिकं ॥
कालिकंच दैशिकं यथा ॥
अल्पसूर्य्यसंयोगज्ञान जन्यगुणः
तस्यासमवायि कारणं दिक्
संयोगः कालिकंयथा अल्पसूर्य्य
परिस्पंदज्ञान जन्य गुणः ॥
तस्यासमवायि कारणं कालपिंड
संयोगः तदुभयं अपेक्षा ॥
बुद्धिजन्यंअपेक्षाबुद्धिनाशादेव
तदुभयोर्नाशः इतिसिद्धांत
मुक्तावली ॥
परतिः स्त्री निवृत्तिः विरतिः
इतिहेमचंद्रः ॥
अपररात्रं पुं रात्रिशेषः । तत्
पर्य्यायः । उद्बुद्धः २ इति ॥
त्रिकांडशेषः ॥
अपरंपर त्रि क्रियासातत्य ॥
कर्म्मनिरंतरता इत्यमरः ॥
अपरा स्त्री जरायुः इतिमेदिनी
पश्चिमादिक् इतिहेमचंद्रः ॥
अपरांगं क्ली गुणीभूत व्यंग्य
प्रभेदः यथा अगूढ मपरस्यांग
मितिभरतमुनिः अस्यार्थः ।
अपरस्य रसादेर्वाक्यार्थी ॥
भूतस्य वा वाच्यस्यांगं रसादि
अनुरणन रूपं वा । इति ॥
काव्यप्रकाशः तत्रैवोदाहरणं



अयंसरसनोत् कर्षी पीन स्तन
विमर्द्दनः नाभूरु जघनेषर्षी
नीवीविस्रंसनः करः अत्र
शृंगारः करुणस्यांग मिति ॥
अपराजितः पुं शिवः विष्णुः
ऋषिविशेषः अनिर्जिते त्रि॥
इतिमेदिनी ॥
अपराजिता स्त्री दुर्गाजयन्तीवृत्तः
अशनपर्णी इति मेदिनी ॥
स्वल्पफला विष्णुक्रांता इति
राजनिर्घंटः शेफाली [illegible]
शमीभेदः शंखिनी हपुषाभेदः
इतिवैद्यके स्वनामख्यात ॥
पुष्प लता विशेषः शुक्लनील
भेदेन स्याद्द्विधा। तस्याः पर्य्यायः
आस्फोता २ गिरिकर्णी ३
विष्णुक्रांता ४ इत्यमरः ॥
आस्फोटा ५ इति तट्टीका ॥
गवाक्षी ६ अश्वखुरी ७ श्वेता ८
श्वेतभंडा ९ गवादिनी १० इति
रत्नमाला अद्रिकर्णी ११ कटभी
१२ दधिपुष्पिका १३ गर्द्दभी १४
सितपुष्पी १५ श्वेतस्पंदा १६ भद्रा
१७ सुपुत्री १८ विषहन्त्री १९
नगपर्य्यायकर्णी २० अश्वाह्वादि
खुरी २१ अस्यागुणाः हिमत्वंतिक्तत्वं
पिंडोपद्रव विषदोषनाशित्वं ॥

चक्षुर्हितत्वं। त्रिदोष शमता ॥
कारित्वंच इति राजनिर्घंटः
शोथ कामनाशित्वं कंठहित
कारित्वंच। इति राजवल्लभः
अपराद्धपृषत्कः त्रि लक्ष्यच्युत
शायकः यस्यबाणोलक्ष्यात्च्युतः
तः इत्यमरः ॥
अपराधः पुं अकार्य्यादि दोषः
तत्पर्य्यायः। आगः २ मंतुः ३
इत्यमरः ॥
अपराह्णः पुं शेषं अह्नः
दिनशेषभागः विकाल इति
ख्यातः इत्यमरः तस्यभेदः ॥
द्विधा विभक्त दिनस्य शेष भागः
त्रिधा विभक्त दिनस्य तृतीयभागः
सचत्रिंशद्दंड दिनमाने विंशति
दंडात् परंदश दंडयावत् ॥
पंचधाविभक्त दिनस्यचतुर्थभागः
सतु अष्टादश दंडात् परंषड्
दंडयावत् इतिस्मृति स्मृती
अपराह्णतने त्रि अपराह्ण
भववस्तु अपराह्णजाते इति
सिद्धांतकौमुदी ॥
अपराह्णेतने त्रि अपराह्णतने
इतिसिद्धांतकौमुदी ॥
अपरिकलितः त्रि अज्ञातः॥
अदृष्टः यथा अपरिकलित

पूर्वः कश्चमत्कारकारी स्फुरति
मम गरीयानेव माधुर्य्य पूरःअय
मद्य मपि हन्त प्रेष्य ये लब्ध्या।
चेताः सरभस मुपभोक्तुं कामये
राधिकेव इतिललितमाधवः
अपरिच्छन्ने त्रि परिच्छेदशून्ये।
परिपूर्व छद धातोः कर्त्तरिक्ते
नञ्समासः ॥
अपरिच्छिन्ने त्रिपरिच्छेदरहिते
असीम॥ बहिरंतरशून्ये यथा
किंचपरिच्छिन्नस्यनीडेपत्यादे
रिवप्रवेशोभवेत् नवत्वनाहत
त्वात् अपरिच्छिन्नत्वेनवहिरंतरे
भेदोनास्तिकुतः प्रवेशः इति
श्रीधरस्वामी ॥
अपरित्यक्ते त्रि परित्यागरहिते
किंचित्त्यक्तुं परिपूर्वत्यजधातोः
कर्त्तरिक्ते तस्य वत्वेत्यस्यवक्तेत्व
परित्यक्ते ततो नञ् समासः॥
अपरिमिते त्रि परिमाणरहिते
मान तुला संख्या शून्ये ॥
यथा अपरिमिताश्रुतास्तनुभृतो
यदि सर्वगता स्तर्हि नशास्यतेति
नियमो ध्रुव नेतरथा इति
स्तुत्यध्यायः ॥
अपरिम्लानः पुं रक्ताम्लानवृक्षः
इतिराजनिर्घंटः म्लानिरहिते॥


वाच्यलिंगः ॥
अपरिष्कारः पुं परिष्काराभावः
अनिर्मलत्वे तद्वति त्रि परिपूर्व
कृधातो भावे घञ्नि नञ्
समासः ॥
अपरिष्कृते त्रि अमार्जिते ॥
अनिर्म्मले अभूषिते ॥
अनलंकृते। परिपूर्वकृधातोः
कर्मणिक्ते नञ्समासः ॥
अपरिहार्य्ये त्रि अपरिहरणीये
अत्याज्ये यथा जातस्यहि ॥
ध्रुवो मृत्यु ध्रुवंजन्ममृतस्यच
तस्मादपरिहार्य्येर्थेनत्वंशोचितु
मर्हसि इति श्रीभगवद्गीता ॥
अपरूपे त्रि अपकृष्टरूपे ॥
विकृतरूपे अपोपसर्गेण रूप
शब्दस्य बहुव्रीहि समासः कर्म
धारय समासे स्त्री लोकेतु ॥
आश्चर्य्यमितिप्रसिद्धे ॥
अपरेद्युः सव्य अपरेह्नि।
अपरदिने इत्यमरः ॥
अपर्णा स्त्री दुर्गा इत्यमरः
पत्रशून्येत्रि ॥
अपर्य्याप्ते त्रि पर्य्याप्तिशून्ये
असीम असमर्थे यथा ॥
अपर्य्याप्तंतदस्माकंबलंभीष्माभि
रक्षितं पर्य्याप्तंत्विदमेतेषां ॥

वल्लभीमाभिरक्षितं ॥ इति
श्रीभगवद्गीता
अपर्द्ध दंडः पुं रामशरतृणं
इति राजनिर्घण्टः
अपलं क्ली कीलकं इति
शब्दमाला पलशून्ये त्रि
अपलपनं क्ली अपलापः
अथोपसर्गात् लप धातोर्भावे
अनट् प्रत्ययः ॥
अपलापः पुं सतोप्यसत्त्वेन
कथनं ज्ञातस्य गोपनं तत्
पर्य्यायः निह्नुतिः २ अपह्नुतिः
३ अपह्नवः ४ निह्नवः ५ इति
शब्दरत्नावली प्रेम इति
मेदिनी
अपलापिका स्त्री तृष्णा इति ॥
हेमचन्द्रः ॥
अपवनं क्ली उपवनं कृत्रिमवनं
इति हेमचन्द्रः ॥
अपवरकः पुं अन्तर्गृहं तत्
पर्य्यायः गर्भागारं २ वासौकः
३ शयनास्पदं ४ इति हेमचन्द्रः
अपवर्गः पुं मोक्षः त्यागः ॥
क्रियावसानसाफल्यं कर्म्मफलं
इति विश्वमेदिन्यौ क्रियान्तः ॥
कार्य्यसमाप्तिः इति जटाधरो
रत्नावलीव घूर्णिता इति धरणी

अपवर्ज्जनं क्ली दानं मोक्षः
त्यागः इति मेदिनी ॥
अपवादः पुं आज्ञा निन्दा ॥
तत्पर्य्यायः अवर्णः २ आक्षेपः
३ निर्वादः ४ परीवादः ५ उपक्रोशः
६ जुगुप्सा ७ कुत्सा ८ गर्हणं ९
इत्यमरः विश्वासः इति
मेदिनी विशेषः बाधकः यथा
क्वचिदपवादविषयेप्युत्सर्गो
ऽभिनिविशते इति कलापः ॥
परिशिष्टं
अपवारणं क्ली व्यवधानं अन्तर्द्धाने
इत्यमरः ॥
अपवारितं त्रि अन्तर्हितं
इति हेमचन्द्रः ॥
अपवित्रं त्रि पवित्रता रहितं
अशुद्धं यथा अपवित्रः पवित्रो वा
सर्व्वावस्थां गतोऽपि वा यः स्मरेत्
पुण्डरीकाक्षं स बाह्याभ्यन्तरः
शुचिः ॥ इति स्मृतिः
अपविद्धः त्रि प्रत्याख्यातः ॥
निराकृतं इति हेमचन्द्रः
अपविद्धपुत्रः पुं द्वादशविधपुत्र
मध्ये पुत्र विशेषः सतु
पोषणाद्यसमर्थौ मातापितृभ्यां
त्यक्तः तयोरन्यतर मरणे त्वन्य
तरेण वा त्यक्तः अनेन अन्येन

गृहीत्वा पुत्रत्वेन परिकल्पितः यथा
मातापितृभ्यामुत्सृष्टं तयो
रन्यतरेण वा । यं पुत्रं परि ॥
गृह्णीयादपविद्धः स उच्यते ॥
इति मनुः
अपविषा स्त्री निर्व्विषीतृणं इति
राजनिर्घण्टः
अपशदः पुं अपसदः नीचः
इत्यमरटीकायां भरतः
अपशब्दः पुं असंस्कृतशब्दः ।
अपभ्रंशीय शब्दः लौकिकशब्दः
ग्राम्यभाषा । तत् पर्य्यायः ॥
अपभ्रंशः २ इत्यमरः ॥
आभीरादि गिरः काव्येष्वपभ्रंश
इति स्मृताः शास्त्रेषु संस्कृतादन्य
दपभ्रंशतयोदितं इति दण्डी ॥
अपशुक च पुं आत्मा यथा कु
उत्तमश्लोक गुणानुवादात्पुमान्
विरज्येत विना पशुघ्नात् इति
श्रीभागवते ॥
अपशोकः पुं अशोकवृक्षः ।
इति राजनिर्घण्टः ॥
अपष्ठं क्ली अंकुशाग्रे इति ।
हेमचन्द्रः ॥
अपष्ठु व्य निरवद्ये विपरीते ॥
शोभने इति शब्दमाला ॥
अपष्ठुः पुं काल वामे त्रि ॥

इति मेदिनी ॥
अपष्ठुरं त्रि प्रतिकूले इति
हेमचन्द्रः ॥
अपष्ठुलं त्रि प्रतिकूले विपरीते
इति त्रिकाण्डशेषः ॥
अपसदः पुं नीचः इतरलोकः
इत्यमरः ॥
अपसरः पुं अपसरणं स्थानात्
स्थानान्तरगमनं अथोपसर्गात्
गत्यर्थसृधातोर्भावे अल्प्रत्ययः
अपसर्जनं क्ली मोक्षः परित्यागः
दानं इति भूरिप्रयोगः ॥
अपसर्पः त्रि चरः हरकारा
इति प्रसिद्धः इत्यमरः ॥
अपसलवि व्य प्रदेशिन्यंगुष्ठयो
रन्तरा पितृतीर्थं यथा ॥
प्रदेशिन्यंगुष्ठयोरन्तरा अपसलवि
अपसव्ये वा तेन पितृभ्यो ॥
निदधाति इति श्राद्धतत्त्वे ॥
भट्टभाष्य धृत गृह्ये ॥
अपसव्ये क्ली अपसलवि
पितृतीर्थं इति श्राद्धतत्त्वे ।
भट्टभाष्यधृतगृह्ये ॥
अपसव्यं त्रि शरीरदक्षिणभागः
प्रतिकूलः इति मेदिनी ॥
अपस्करः पुं रथांग तद्ध ॥
अक्ष युग चक्रादि इत्यमरः ॥



गुह्यद्वारं विष्ठा इति धरणी ॥
अपस्नातः त्रि मृतशुद्धिप्रकृत
स्नानो जनः इत्यमरः संस्कारार्थं
स्नापितो मृतः इति स्वामी ॥
अपस्नानं क्ली मृतस्नानं ॥
मृतोद्देशकस्नानं इति
हेमचंद्रः ॥
अपस्मारः पुं रोगविशेषः ॥
मृगी इति भाषा तत्पर्य्यायः
अंगविकृतिः २ लालाधः ॥
भूतविक्रिया ३ इति राजनिर्घंटः
तस्य सामान्यरूपं तमः
प्रवेशः संरम्भो दोषोद्रेकहत
स्मृतेः अपस्मार इति ज्ञेयो
गदो घोरश्चतुर्विधः ॥ तस्य
निदानपूर्विकां संप्राप्तिः चिंता
शोकादिभिः क्रुद्धा दोषाह्यत्
स्रोतसि स्थिताः कृत्वा स्मृतेः
ध्वंसमपस्मारं प्रकुर्वते ॥
तस्य पूर्वरूपं यथा हृत्कंपः
शून्यता स्वेदो ध्यानं मूर्छा ॥
प्रमूढता निद्रानाशश्च तस्मिंश्च
भविष्यति भवत्यथ ॥
वातिकस्य रूपं कंपते प्रदशेत्
दन्तान् फेनोद्वामी श्वसत्यपि
परुषारुणकृष्णानि पश्येद्रूपाणि
चानिलात् पैत्तिकस्य रूपं
पीतफेनांगवक्त्राक्षः पीतासृग्रूप
दर्शनः सतृष्णोष्णानलव्याप्त
लोकदर्शी च पैत्तिकः ॥ ० ॥
श्लैष्मिक रूपं शुक्लफेनांग
वक्त्राक्षः शीतहृष्टांगजो गुरुः
पश्यन् शुक्लानि रूपाणि श्लैष्मिको
मुच्यते चिरात् ॥ ० ॥ त्रिदोषज
रूपं सर्वैरेभिः समस्तैश्च ॥
लिंगैर्ज्ञेय स्त्रिदोषजः ॥ ० ॥
असाध्य लक्षणं अपस्मारः
सवासाध्यो यः क्षीणस्यानवश्च यः
अरिष्टलक्षणं प्रस्फुरेत ॥
सुबहुशः क्षीणं प्रचलितभ्रुवं
नेत्राभ्यां च विकुर्वाणमपस्मारो
विनाशयेत् ॥
वेगकालः पक्षाद्वा द्वादशाहाद्वा
मासाद्वा कुपिता मलाः अपस्माराय
कुर्वन्ति वेगं किंचिद्दथान्तरं
देवे वर्षत्यपि यथा भूमौ बीजानि
कानिचित् शरदि प्ररोहंति
तथा व्याधिसमुच्छ्रायः ॥ इति
माधवकरः ॥
अपहारः पुं अपचयः हानिः
इत्यमरः अपहरणं चौर्य्यं
संगोपनं धनस्याप्यनुपयोगि
व्ययः इति दायभागः ॥
अपहारकः त्रि अपहारी ॥

अपहरणकर्त्ता यथा परापवाद
निरतः परद्रव्यापहारकः इति
पुराणं ॥
अपहासः पुं अकारणहास्य
[illegible] इति हेमचंद्रः ॥
अपह्नवः पुं अपलापः स्नेहः
इति मेदिनी ॥
अपह्नुतिः स्त्री अपलापः
अपह्नवः इति शब्दरत्नावली
उपमेयासत्यकरणपूर्विकोपमान
स्य सत्यताव्यवस्थापिकालंकृतिः तस्यै
लक्षणं प्रकृतं यन्निषिध्यान्यत्
साध्यते सा त्वपह्नुतिः ॥
उदाहरणं। अवाप्तः प्रागल्भ्यं परि
णतरुचः शैलतनये कलंको
नैवायं विलसति शशांकस्य वपुषि
अमुष्येयं मन्ये विगलदमृतस्यंदि
शिशिरे रतिश्रान्ता शेते रजनि
रमणी गाढमुरसि ॥ इति
काव्यप्रकाशः
अपांनाथः पुं समुद्रः इति
राजनिर्घंटः ॥
अपांनिधिः पुं समुद्रः ।
वारांनिधिरिति दर्शनात् ॥
अपांपतिः पुं समुद्रः ।
इत्यमरः वरुणः। अप्पति
रित्यमरेणोक्तत्वात् ॥
अपांपित्तं क्ली अग्निः इति ॥
शब्दरत्नावली चित्रकवृक्षः
वह्निसंज्ञक इत्यमरेणोक्तत्वात्
अपाक् त्रि दक्षिणदिग्भववस्तु
तत्पर्य्यायः अपाचीनं २ इति
हेमचंद्रः ॥
अपाकः पुं पाकाभावः अजीर्णता
यथा अंगमर्दो रुचि स्तृष्णा
आलस्यं गौरवं ज्वरः अपाकः
शूनतांगानामामवातस्य लक्षणं
इति माधवकरः पाकभाव
विशिष्टे त्रि। यथा गात्रप्रदेशे
क्वचिदेव दोषाः संमूर्छिता
मांसमसृक् प्रदुष्य। वृत्तं स्थिरं
मंदरुजं महान्तमनल्पमूलं चिर
वृद्ध्यपाकं इति माधवकरः ॥
अपाकशाकं क्ली आर्द्रकं इति
राजनिर्घंटः ॥
अपांगः पुं नेत्रयोरंतः चक्षुः
कोणः तिलकः इत्यमरः
अंगहीने त्रि इति मेदिनी ॥
अपांगकः पुं अपामार्गवृक्षः
आपां इति भाषा । इति
शब्दरत्नावली अंगहीने त्रि
अपांगदर्शनं क्ली कटाक्षः इति
हेमचंद्रः ॥

अपाची स्त्री दक्षिणदिक् इति
हलायुधः ॥
अपाचीने त्रि अपागर्थे दक्षिण
दिग्भव वस्तु विपर्य्यीते ॥
विपरीतः इति विश्वमेदिन्यौ
अपाच्य त्रि दक्षिणदिग्भववस्तु
अपाची दक्षिण दिक् ततोभवार्थे
स्य प्रत्ययः पचनायोग्ये ॥
पचधातोः कर्म्मणि ण्यण्पाच्य
पश्चान्नञ्समासः ॥
अपाटवं क्ली रोगः इतिहेमचंद्रः
अपटुता जडता पटोर्भावः ॥
पाटवं ततोनञ्समासः ॥
अपात्रं क्ली कुपात्रं असत्पात्रं
यथा अपात्रे पातयेद्दत्तं ॥
सुवर्णं नरकार्णवे इति ॥
मल्लमासतत्वं ॥
अपात्रीकरणं क्ली नवविधपा
मध्ये पापविशेषः तत्तुर्विधं
निंदितधनादानं १ वाणिज्यं
शूद्रसेवनं ३ असत्यभाषणं ४
इतिप्रायश्चित्तविवेकः ॥
अपादानं क्ली यस्माद्वस्तुनो
वस्त्वन्तरस्य चलनं भवति तत्
षट्कारकमध्ये पंचमकारकं
तत्रैकादशार्थे पंचमीस्यात् यथा
यतोऽपायः यथा हस्तात् पर्णं

पतति १ यतो भीः यथा ॥
व्याघ्राद्बिभेति २ यतोजुगुप्सा
यथापापात् जुगुप्सते धीरः ३
यतः पराजयः यथासिंहात्
पराजयते हस्ती ४ यतः प्रमादः
यथाधर्मात् प्रमाद्यति नीचः ५
यतआदानं यथाभूपात् धन
मादत्ते विप्रः ६ यतोभूः यथा
पितुः पुत्रोजायते ७ यतस्त्राणं
यथाव्याघ्रात् गांरक्षति गोपः ८
यतोविरामः यथाजपाद्विरमति
विप्रः ९ यतोऽन्तर्द्धिः यथा
गुरोरंतर्द्धत्ते शिष्यः १० यतो
वारणं यथा यवेभ्यो गां
निवारयति ११ इति मुग्धबोध
टीकायां दुर्गादासः ॥
अपानं क्ली मलद्वारं तत्पर्य्यायः
गुदं २ पायुः ३ इत्यमरः ॥
अपानः पुं गुदस्थवायुः इत्यमरः
अवाग्गमनवान् पाय्वादिस्थानवर्त्ती
वायुः इति वेदान्तसारः ॥
अपापः त्रि निष्पापः पापशून्यः
यथादृष्टं दाशरथे सीतासद्व्रता
ब्रह्मचारिणी अपापाहि त्वया
त्यक्ता ममाश्रमसमीपतः इति
रामायणं ॥
अपामार्गः पुं वृक्षविशेषः

अपां इति भाषा तत्पर्य्यायः ॥
शैखरिकः २ धामार्गवः ३ मयूरकः
४ प्रत्यक्पर्णी ५ कीशपर्णी ६
किणिही ७ खरमंजरी ८ इत्यमरः
शैखरेयः ९ अधामार्गवः १०
केशपर्णी ११ इति तट्टीका
स्थलमंजरी १२ प्रत्यक् पुष्पी १३
क्षारमध्यः १४ अधोकंटा १५
शिखरी १६ इतिरत्नमाला ॥
दुर्ग्रहः १७ अध्वशल्यः १८
कांडीरकः १९ मर्कटी २० दुरभिग्रहः
२१ वाशिरः २२ पराक्पुष्पी २३
कंटी २४ मर्कटपिप्पली २५
क्षुद्रमंजरीका २६ अघाटः २७
क्षारकः २८ पांडुकंटकः २९
नाल्लाकंटः ३० कुब्जः ३१ अस्य
गुणाः तिक्तत्वं उष्णत्वं कटुत्वं
कफार्शः कंडूदराम विषरोग
नाशित्वं धारकत्वं वांतिकारित्वंच
इतिराजनिर्घंटः शोधनीत्वत्वं
छेदकारित्वं स्रंसनत्वंच इति
राजवल्लभः ॥ तत्फलगुणाः
रसेस्वादुत्वं पाके दुर्जरत्वं ॥
विष्टंभित्वं वायुकारित्वं रूक्षत्वं
रक्तपित्तप्रसादनत्वंच इति ॥
भावप्रकाशः ॥
अपांपतिः पुं समुद्रः इत्यमरः ॥

वरुणः अप्पति रित्यमरेण
उक्तत्वात् ॥
अपाश्रितं क्ली अग्निः इति
शब्दरत्नावली चित्रकद्रुमः
वह्निसंज्ञक इत्यमरेणोक्तत्वात्
अपायः पुं विश्लेषः इति
रामतर्कवागीशः चलनं इति
दुर्गादासः विनाशः यथा।
साकाशी त्रिपुरारि राजनगरी
पायादपायाज्जगत् इति॥
काशीखंडे ॥
अपारं क्ली अवारं नद्यादे
रर्वाक् पारं इतिहलायुधः॥
असीमे ३ ॥
अपावृते त्रि पिहिते आवृते
स्वतंत्रे स्वाधीने इतिमेदिनी
अपावृत्ते त्रि लुठिते लोटा
गडागडि भाषा। इति ॥
हेमचंद्रः ॥
अपाश्रयः पुं शयनावरणं
सामियाना चंदोया इतिभाषा
तत्पर्य्यायः मत्तालंबः २ प्रग्रीवः
३ मत्तवारणः ४ इतिहेमचंद्रः
आश्रयशून्ये त्रि ॥
अपासंगः पुं उपासंगः तूणः
इत्यमरटीका सारसुंदरी ॥
अपासनं क्ली मारणं इत्यमरः ॥

अपस्तं त्रि निरस्तं यथा ॥
एतेन नाति संध्या समीपत
इत्यनेन राक्षसी वेला मात्रं
निषिध्यत इति मैथिल मत
मपास्तं इति भिख्यादितत्वं ॥
अपात्तं त्रि प्रत्यक्तं इति
त्रिकाण्डशेषः कुलितचक्षुः
लोचनशून्ये पतदर्थोत्पत्ति
लब्धौ ॥
अपि अ उपसर्गविशेषः ।
अस्यार्थाः आहरणं संभावनं
निंदा अनुज्ञा अल्पत्वं ॥
समुच्चयः इति दुर्गादासः प्रश्नः
शंका युक्तपदार्थः कामाचार
क्रिया इति विश्वमेदिन्यौ ॥
अपिगीर्णं त्रि स्तुतं वर्णितं ।
इत्यमरः ॥ २८व
अपिच्छिलः त्रि पैच्छिल्याभा
विशिष्टः । पिच्छिलताशून्यश्च
प्रमेहिणो यदा मूत्रमनाविल
मपिच्छिलं इति माधवकरः
अपितु अ यद्यर्थे यद्यपि ।
इति त्रिकाण्डशेषः ॥
अपिधानं क्ली आच्छादनं ॥
अन्तर्द्धानं इत्यमरः ॥
अपिनद्धं त्रि परिहितवस्त्रादि
तत्पर्य्यायः अमुक्तः २ प्रतिमुक्तं
३ पिनद्धः ४ इत्यमरः ॥
अपीतः पुं पीतभिन्नवर्णः
तद्विशिष्टे अकृतपाने च त्रि इति
नञ्समासस्य पीतशब्दस्यैतावर्थौ
अपीनसं क्ली पीनसरोगः इति
रभसः तद्रहिते त्रि ॥
अपीच्यं त्रि अतिसुंदरं यथा
अपीच्य दर्शनं श्यामं सर्वलोक
नमस्कृतं सर्ववयसि कैशोरे ॥
भृत्यानुग्रहकातरं इति ॥
श्रीभागवतं ॥
अपुच्छा स्त्री शिंशपावृक्षः इति
शब्दचंद्रिका ॥
अपुनर्भवः पुं मुक्तिः कैवल्यं ॥
इति हेमचंद्रः पुनर्जन्माभावः
यथाहितौ लिंगे प्रशमने
रोगाणां सपुनर्भवे ज्ञाने ॥
चतुर्विधं यस्य स राजार्हो
भिषक्तमः इति चरकः ॥
अपुष्पफलदः पुं पनसवृक्षः इति
राजनिर्घण्टः पुष्पव्यतिरेके जात
फलवृक्षमात्रे ॥ -
अपूपः पुं पिष्टकः इत्यमरः
गोधूमः इति राजनिर्घण्टः ॥
अपूप्यः पुं गोधूमचूर्णं मयदा
इति भाषा इति जटाधरः ॥
अपूरणी स्त्री शाल्मलिवृक्षः ॥

शब्दचंद्रिका ॥
अपूर्वं क्ली कर्मजन्यमदृष्टं तत्
पर्य्यायः अनुशयः २ नियोगः ३
अतिशयः ४ कार्य्य ५ प्रयोगः ६
इति स्मृतिः तच्चतुर्विधं यथा
फलापूर्वं १ समुदायापूर्वं २
उत्पत्त्यपूर्वं ३ अंगापूर्वं ४ ॥
येन स्वर्ग आरभ्यते तत् ॥
फलापूर्वं अमावास्यायां त्रयाणां
यागानामेकः समुदायः पौर्ण
मास्या मपरः तयो र्भिन्नकाल
वर्त्तिनोः संहृत्य फलापूर्वारंभा
ऽयोपात्तदारंभाय समुदाय द्वय
जन्यमपूर्व द्वयं कल्पनीयं तयो
रैकैकस्यारंभाय एकैकसमुदाय
वर्त्तिनां त्रयाणां यागानां भिन्नक्षण
वर्त्तित्वेन संघातासंभवात् याग
त्रयजन्यानि त्रीण्युत्पत्त्यपूर्वाणि
कल्पनीयानि तेषां योगायकार
मन्तरेणानिष्पत्ते रंगानां चानेक
क्षणवर्त्तिनां संघातासंभवात्
अंगापूर्वाणि कल्पनीयानि तत्रत्यं
विभागः इत्यधिकरणमाला ॥
अपूर्वं त्रि आश्चर्य्यं यथा ॥
अपूर्वेयं हरेर्माया त्रिगुणा रज्जु ।
रूपिणी यया मुक्ता नवत्तंति बद्धा
धावंति धावति इत्युद्भटः ॥
पूर्वदिग् देश काल भिन्ने
अपेतराक्षसी स्त्री तुलसीवृक्षः
इति राजनिर्घण्टः ॥
अपेयं त्रि पानायोग्यं
अपानीयं यथा मद्य मपेय ॥
मदेयमनिग्राह्यं इति भिख्यादि
तत्वे उशनः स्मृतं ॥
अपेक्षणीयं त्रि अपेक्षायोग्यं
अपेक्ष्यं अपेक्षितव्यं यथा ॥
आत्मा यत्नेन रक्ष्यो रणशिरसि पुनः
सोऽपि नापेक्षणीयः । इति
नवरत्नमध्ये श्लोकः ॥
अपेक्षा स्त्री कार्य्यनिमित्तयो
रन्योन्याभिसंबंधः इति सप्तप
टीकायां विष्णुमिश्रः आकांक्षा
यथा साप्रक्रिया या
कथमित्यपेक्षा इति वेदांत
टीकायां वाचस्पतिमिश्रः ॥
अपेक्षाबुद्धिः स्त्री अनेकैकत्व
विषयक बुद्धिः नानेकत्वावगाहि
बुद्धिः । अयमेकः अयमेक ॥
इत्याकार बुद्धिः इति भाषा ॥
परिच्छेदः ॥
अपोगंडः त्रि न्यूनाधिकांग
विशिष्टः तत्पर्य्यायः पोगंडः
२ विकलांगः ३ अंगहीनकः ४
इति शब्दरत्नावली शिशुः ॥

वलिभः त्रिवलियुक्तः इति
मेदिनी अति भीरुः । इति
विश्वः हेमचंद्रश्च
अपोदिका स्त्री उपोदिका ।
पूतिकाशाकं इत्यमरटीकायां
स्वामी ॥
अपोहः पुं अपगत ऊहः ।
वितर्काभावः शुश्रूषापहेथाथी
गुणांतर्गत षष्ठगुणः इतिहेमचंद्रः
अनह्याहत्तिः इतिकाव्यप्रकाश
टीकायांमहेश्वरः ॥ (रि
अप्नः स क्ली यज्ञकर्म्म इत्युणा
कोषः ॥
अप्तुः पुं शरीरं अंगं ।
इत्युणादिकोषः ॥
स
अप्सः क्ली जलं वेदप्रयोगोयं
अप्पतिः पुं वरुणः इत्यमरः
समुद्रः अपांपतिरितिदर्शनात्
अप्पित्तं क्ली अग्निः इत्यमरः
चित्रकवृक्षः वह्निसंज्ञकत्वात्
अप्रकटः त्रि अव्यक्तः अप्रकाशं
यथाप्रकटा प्रकटाचेतिलीला
सेयं द्विधोच्यते इति ॥
भागवतामृते पद्मपुराणं ॥
अस्यविवरणं लीलाशब्दद्रष्टव्यं
अप्रकांडः पुं कांडरहितवृक्षः

सतु विन्दिकादिः तत्पर्य्यायः
स्तंबः २ गुल्मः ३ इत्यमरः ॥
अप्रकाशः पुं प्रकाशाभावः
तत्पर्य्यायः जनांतिकं २ इति
त्रिकांडशेषः तद्विशिष्टे त्रि
अप्रहृष्टः पुं काकः इति
शब्दरत्नावली अधमे त्रि ॥
अप्रखरः प्राखर्य्य रहितः ॥
अतीक्ष्णः तद्धर्मे क्ली खर
रातीतिकः खरः प्रकृष्टः खरः
प्रखरः स्ततो नञ्समासः ॥
अप्रगुणः त्रि व्याकुलः व्यस्तः
इत्यमरः ॥
अप्रतिकरः त्रि विश्वस्तः विश्वास
पात्रं इति जटाधरः ॥
अप्रतिपक्षः त्रि अप्रतियोगी
विपक्षशून्यः नास्तिप्रतिपक्षो
यस्य ॥
अप्रतिभः त्रि अप्रत्युत्पन्नमतिः
अप्रगल्भः नास्ति प्रतिभानव
नवोन्मेषशालिनी प्रज्ञा यस्य सः
इतिप्रतिभान्वित शब्दार्थे भरतः
अप्रतिरथं क्ली यात्रा सामवेदः
मंगलं इति भूरिप्रयोगः ॥
त्रिकांडशेषः ॥
अप्रतिरथः पुं योद्धा इति
भूरिप्रयोगः तुल्ययोद्धरहितः ॥

इतिपुराणं ॥
अप्रतिरूपकथा स्त्री अप्रतिवचनं
वाक् अतुल्याकथातत्पर्य्यायः ॥
संगतिका २ इतित्रिकांडशेषः ॥
अप्रतिष्ठः त्रि अप्रतिष्ठितः ॥
प्रतिष्ठारहितः नास्तिप्रतिष्ठा
यस्येतिबहुव्रीहौ ह्रस्वः ॥ भावः
अप्रतुलं क्ली प्रकृष्टपरिमाणं
अनिर्हंति रितिलोकप्रसिद्धिः
प्रकृष्टे तुला रहिते त्रि ॥
नास्तिप्रकार्या तुला यस्य धनादेः
धनादेर्यस्यवा
अप्रत्ययः पुं प्रत्ययाभावः ॥
अविश्वासः यथा दोषाणां ॥
सन्निधाने कपट शतमये क्षेत्र
सप्रत्ययानो इति श्रीशिह्लनः ॥
अप्रत्यक्षः त्रि प्रत्यक्षशून्यः ॥
अतींद्रियः २ इत्यमरः ॥
प्रत्यक्षाभावे क्ली ॥
अप्रधानं क्ली प्रधान्यरहितं
तत्पर्य्यायः अप्राग्र्यं २
उपसर्जनं ३ इत्यमरः ॥
वाच्यलिंगो ऽप्ययं इतिभरतः
अप्रमत्तः त्रि अवधानविशिष्टः
सावधानः यथा पापात् परा
जितोड़ः स्वादप्रमत्तोविधेः सतः

इतिवोपदेवः ॥
अप्रयोगः पुं प्रयोगाभावः ।
अनुल्लेखादिः यथा उक्तार्थाना
मप्रयोगः इति दुर्गादासः ॥
अप्रलंबः क्ली अविलंबे शीघ्रे
इतिहलायुधः तद्वति त्रि
अप्रशस्तं त्रि असत् अश्रेष्ठे ॥
अविहिते यथा अप्रशस्तं ॥
निषिद्धस्थाने शहोरन्यत्रदर्शनात्
इति तिथ्यादितत्वे परापारः
अप्रसन्ने त्रि आविले अनच्छे । इति
शब्दरत्नावली अतुष्टे यथा त्वयि
प्रसन्नेपरशोर्म्मीभिः किंत्वय्यप्रसन्ने
परशोर्म्मीभिः किं इति प्राचीनाः
अप्रसिद्धे त्रि प्रसिद्धतारहिते ॥
अविख्याते । यथा लिंग सामर्थ्य
रूढिगते प्रसिद्धे नत्व प्रसिद्धे
अप्रस्तुते त्रि अप्रक्रांते ॥
प्रकरणप्राप्ते यथा अप्रस्तुत
प्रशंसासा याचैव प्रस्तुताश्रया
इतिकाव्यप्रकाशः अप्रशंसिते
प्रपूर्वस्तुत्यर्थ स्तुधातोः कर्म्मणि
क्तेनञ् समासः ॥
अप्रस्तुतप्रशंसा स्त्री काव्यालंकार
विशेषः सा च अप्राकरणिकस्यार्थस्य
अभिधानेनप्राकरणिकस्याक्षेपः ॥

तस्यालक्षणं अप्रस्तुतप्रशंसा
सायैवप्रस्तुताश्रया साच
कार्य्ये निमित्ते सामान्ये विशेषे
प्रस्तुते सति तदन्यस्यवच
स्तुल्ये तुल्यस्येतिच पंचधा
आद्याया उदाहरणं यथा याताः
किन्नमिलन्ति सुंदरि पुनश्चिन्ताद्द
यामत्कृते नो कार्य्यीतितरां कृशानि
कथयत्येवं सर्वाष्प मयि लज्जा
मंथर तारकेन निपतद्धाराश्रुणा
चक्षुषा दृष्ट्वामां हसितेन भावि
मरणोत्साहस्तया सूचितः इति
काव्यप्रकाशः इतरासां
उदाहरणानि वाहुल्यान्नोक्तानि
अप्रहते त्रि अकृष्टभूमिः ॥
खिलाभूमिः इत्यमरः ॥
अप्राग्र्यं त्रि अप्रधाने इत्यमरः
अप्राचीनं त्रि अपुरातने नव्ये
प्राचीतर दिग्जाते प्राग्भवे ॥
प्राचीनं ततो नञ्समासः ॥
अप्राप्तिः स्त्री अप्रापणं अलाभः
तद्धति यथा तदप्राप्ति ॥ का
महादुःख विलीनाशेषपात
इतिकाव्यप्रकाशकारः ॥
अप्राप्तः त्रि अलब्धः यथा
अप्राप्तप्रापको विधिः इति
संकल्पकौमुदी दुर्गादासः

अप्राप्यं त्रि अप्रापणीये ॥
अप्राप्तव्ये प्रपूर्वादाप धातोः
कर्मणि येनञ्समासः ॥
अप्रामाणिकः त्रि प्रमाणानभिज्ञः
प्रमाणासिद्धः प्रामाण्यरहितः
यथा अतोऽविभक्तार्जितत्व
मात्रेण धनस्य साधारणत्वाभिधान
मप्रामाणिकं इतिदायभागः
अप्रामाण्यं क्ली प्रामाण्याभावः
यथा अप्रामाण्यं जनयतिसदा
नैदस्तोर्वियोगः । इति ॥
यदांकदूते ॥
अप्रियं त्रि अनभीष्टं अनीप्सिते
अप्रीतिकरे अरुच्ये यथा
तथ्यं ब्रुयात् प्रियंब्रुयात् नब्रुयात्
सत्यमप्रियं । इति पुराणं ॥
अप्रियवचः क्ली निष्ठुरवाक्यं
इतिपारुष्यप्राहार्थे भरतः
अप्रिया स्त्री शृंगीमत्स्यः इति
शब्दरत्नावली ॥
अप्रीत त्रि प्रीतिरहिते ॥
असंतुष्टे प्रीत्यर्थ प्री धातोः ।
कर्त्तरि क्तेन ञ समासः
अप्रेतराक्षसी स्त्री अपेतराक्षसी
तुलसी इतिमाला ॥
अप्सरसः स्त्री स्वर्वेश्याः उर्वशी
मेनकाद्याः बहुवचनान्तोयंशब्दः

इत्यमरः ॥
अप्सरास्त्री स्वर्वेश्या । इति
शब्दरत्नावली ॥
अफलः त्रि विफलः निष्फलः
इतिहेमचंद्रः फलकाले ॥ (यः
अनृत पत्र फलकवृक्षः तत्पर्य्या
वंध्यः २ अवकेशी ३ इत्यमरः
फाडुकवृक्षः इतिशब्दचंद्रिका
अफला स्त्री भूम्यामलकी ॥
घृतकुमारी इतिशब्दचंद्रिका ॥
अफेनं क्ली वृक्षनिर्य्यासविशेषः
आफि इतिभाषा तत्पर्य्यायः
खसखसरसं २ निफेनं ३
अहिफेनकं ४ अस्य गुणाः ॥
सन्निपातनाशित्व शुक्रबल
मोहकारित्वंच तत्तचतुर्विधं
पकेश्वेतवर्णं अन्नजीर्णता
कारकत्वान्नाम जारणं द्वितीयं
कृष्णवर्णं मृत्युकारकत्वान्नाम
मारणं तृतीयं पीतवर्णं वयः
स्तंभनकारकत्वान्नामधारणं चतुर्थं
कर्बुरवर्णं मलसारकत्वान्नाम
सारणं । इतिराजनिर्घण्टः ॥
अवड्ड शब्दे इतिकविकल्पद्रुमः
अबद्धं त्रि प्रकृतानुपयोगिवचनं
समुदायार्थशून्यवाक्यं अनर्थ
कथा इत्यमरः बंधनशून्ये ॥

अबद्धकं त्रि समुदायार्थशून्यवा
क्यं । इतिशब्दरत्नावली ॥
अबद्धमुखः त्रि अप्रियवादी
दुर्मुखः इत्यमरः ॥
अबध्यं त्रि अनर्थवाक्यं ॥
बधायोग्यं इतिमेदिनी ॥
अवंध्यः त्रि सफलः फलकाले
फलयुक्त वृक्षः तत्पर्य्यायः
फलेग्रहिः २ इत्यमरः फलग्रहिः
३ ॥ इति तट्टीका ॥ अमोघ
फलोदयः ४ इतिराजनिर्घण्टः
अबलं त्रि बलरहिते दुर्बले
यथा अबलस्वकुलाशिनोझषान्
इति नैषधे ॥
अबलः पुं वरुणवृक्षः इति
शब्दचंद्रिका ॥
अबला स्त्री नारी इत्यमरः
अबाधं त्रि बाधशून्ये ॥
अनिवारिते तत्पर्य्यायः
निरर्गलं २ इत्यमरः अनर्गलं
३ उच्छृंखलं ४ उद्दाम ५
अनियंत्रिते ६ निरंकुशं ७
इतिहेमचंद्रः ॥ बाधा पीडा
तयाहीनेच ॥
अबिन्धनः पुं वाडवाग्निः इति
संदेहभंजिका ॥
अबोधः पुं अज्ञाने यथा ॥

निसर्ग दुर्बोधमबोध विक्लवाः
इतिभारविः बहुव्रीहौ त्रि ॥
अब्जं क्ली पद्मं इति मेदिनी ॥
दशार्बुदसंख्या शतकोटिः ॥
इतिलीलावती ॥
अब्जः पुं चंद्रः धन्वन्तरिः ॥
निचुलवृक्षः इतिमेदिनी ॥
अब्जः पुं क्ली शंखः इतिमेदिनी
अब्जजः पुं ब्रह्मा इति ॥
त्रिकांडशेषः ॥
अब्जभोगः पुं पद्मकंदः ।
इतिशब्दचंद्रिका ॥
अब्जयोनिः पुं विधाता ब्रह्मा
इत्यमरः ॥
अब्जवाहनः पुं शिवः इति
त्रिकांडशेषः ॥
अब्जहस्तः पुं सूर्य्यः इति ॥
हेमचंद्रः ॥
अब्जिनी स्त्री पद्मिनी । इति
राजनिर्घंटः पद्मसमूहः पद्मलता
पद्मयुक्तदेशः इतिनलिनी
शब्दटीकायां भरतः ॥
अब्जिनीपतिः पुं सूर्य्यः इति
हेमचंद्रः
अब्दः पुं वत्सरः मेघः मुस्ता
इतिमेदिनी पर्वतविशेषः ।
इति विश्वः

अब्दसारः पुं कर्पूरभेदः इति ॥
राजनिर्घंटः ॥
अब्धिः पुं समुद्रः इत्यमरः
अब्धिकफः पुं समुद्रफेनः तत्
पर्य्यायः हिंडीरः २ फेनः ३
इत्यमरः
अब्धिजौ पुं अश्विनीकुमारौ
द्विवचनांतोयं शब्दः इति ॥
हेमचंद्रः ॥
अब्धिद्वीपा स्त्री पृथिवी इति
त्रिकांडशेषः ॥
अब्धिनगरी स्त्री द्वारकापुरी इति
त्रिकांडशेषः ॥
अब्धिनवनीतकः पुं चंद्रः इति
शब्दरत्नावली ॥
शब्धिफेनः पुं समुद्रफेनः इति
राजनिर्घंटः ॥
अब्धिमंडुकी स्त्री मुक्तास्फोटः
शुक्तिः किनुक इति भाषा इति
हेमचंद्रः ॥
अब्धिशयनः पुं विष्णुः इति
हेमचंद्रः ॥
अब्ध्यग्निः पुं वडवानलः इति
हेमचंद्रः ॥
अब्भक्षः पुं सर्पः इति
त्रिकांडशेषः ॥
अभ्रं क्ली मेघः इत्यमरः ॥

मुस्तातृणं अभ्रकधातुः इति
राजनिर्घंटः ॥
अभ्रमातंगः पुं ऐरावतः
इत्यमरः
अभ्रिः स्त्री काष्ठकुद्दालः
नौकामलापनयनार्थकुद्दाल
इति । काष्ठ इत्यमरः ॥
अभ्रियं त्रि मेघोद्भववस्तु ।
इत्यमरः ॥
अब्रह्मचर्य्यकं क्ली मैथुनं इति
त्रिकांडशेषः ब्रह्मचर्य्यशून्येत्रि
अब्रह्मण्यं क्ली नाह्मणोनार्य
वध्य इत्याकारोक्तिः अवध्याज्ञा
तत्पर्य्यायः अवध्योक्ति २ ॥
इत्यमरः ॥
अभ इउ ध्वनौ । इति
कविकल्पद्रुमः
अभयं क्ली वीरणमूलं इत्यमरः
भयाभावः यथा प्रवृत्तिंच ॥
निवृत्तिंचकार्य्याकार्य्ये भयाभये
बंधंमोक्षंचयर्यवेत्तिबुद्धिःसापार्थ
सात्विकीइति श्रीभगवद्गीता
भयरहिते त्रि इतिविश्वः ॥
अभयडिंडिमः पुं युद्धढक्का ।
संग्रामपटहः इतित्रिकांडशेषः
अभया स्त्री हरीतकी इत्यमरः
चैयादेशाज्जातपंचशिराहरीतकी

सानेत्ररोगे प्रशस्ता इति ॥
राजवल्लभः ॥
अभक्ष्यं त्रि अभक्षणीयं अखाद्यं
यथा अथार्थ्य चर्म्म मे सद्भिः
करिष्यसिकिमस्थिभिः अभक्ष्ये
चैवमेमांसंत्वादृशैर्ब्रह्मचारिभिः
इतिरामायणं ॥
अभाजनं क्ली अपात्रं
अयोग्यं यथा दीर्थी वेवीट्समः
कश्चित्गुणदृष्टोरभाजनंक्विप्
प्रत्ययनिभः कश्चिद्यत्रसन्निहितनेत
इतिकाव्यप्रकाशः
पात्ररहिते त्रि ॥
अभावः पुं मरणं असत्ता ॥
इतिविश्वमेदिन्यो द्रव्यादि
षट्कभिन्नः स द्विविधः ॥
संसर्गाभावः १ अन्योन्याभावश्च २
इति भाषा परिच्छेदः ॥ भाव
शून्यः भावः स्थायिभावादि
रिति । अलंकारशास्त्रं ॥
अभवनीयः त्रि अचिंतनीयः
चौरादिक चिंतनार्थ भूधातोः
कर्म्मणनीयेनञ्समासः ॥
अभाषणं क्ली अकथनं ।
इत्यमरः ॥
अभि ब्य उपसर्गविशेषः ॥
अस्यार्थाः समंतात् उभयार्थः



वीप्सा इत्थंभावः धर्षणे।
इतिदुर्गादासः अभिलाषः॥
अभिमुख्ये इतिमेदिनी॥
चिह्ने इतिबोपदेवहेमचंद्रौ॥
अभिकः त्रि कामी कामुकः
इत्यमरः॥
अभिक्रमः पुं अभीतयोधादे
र्युद्धे शत्रुसम्मुखगमने आरोहणे
इतिहेमचंद्रः॥
अभिख्या स्त्री नाम शोभा॥
कीर्तिः इतिमेदिनी आख्याने।
इतिशब्दरत्नावली॥
अभिग्रस्तः त्रि शत्रुनाक्रांतः
इत्यभियत्र शब्दार्थे अमरः॥
अभिग्रहः पुं अभियोगः।
इत्यमरः कलहाह्वाने॥ (ते)
अपचिकीर्षया अतिक्रम्याक्रम
अभिमुख्येन ग्रहादि ग्रहतिः
इतितट्टीकायां भरतः॥
गौरवे अभिग्रहणं लुट् इति
भाषा इति मेदिनी॥
अभिग्रहणं क्ली अभिहारः
इत्यमरः॥ चौर्यकरणं॥
संमुखेहरणं इति तट्टीकायां
भरतः॥
अभिघातः पुं दंडादिभिरभि
हनने आघातः यथा अभि

घाताभिघाताभ्यामभियंगाभि
शायतः इतिमाधवकरः शब्दादौ
कवर्गादिवर्गाणां पूर्वस्थितचतुर्थ
द्वितीयतृतीयचतुर्थवर्णाः क्रमेण
परस्थितवर्णैकैक द्वि त्रि वर्ण
युक्ताः तत्र क्ली। यथा अभिघाते
स्यात् पूर्वं वेदद्विअब्धिवर्णोश्चेत्
नगवर्गाणां परतो धरणीचंद्र
द्विरामाख्याः॥ इतिकेरलशेषः
अभिघाती न पुं शत्रुः इत्यमरः
अभिचारः पुं हते इति
राजनिर्घंटः॥
अभिचरः पुं दासः भृत्यः॥
इतिहेमचंद्रः॥
अभिचारः पुं हिंसाकर्म
इत्यमरः अथर्ववेदोक्त मंत्र
यंत्रादिनिष्पादितमारणोच्चाटनादि
हिंसात्मककर्म इतिभरतः
मारणादिफलक तांत्रिकप्रयोग
विशेषः सषड्विधः मारणे १
मोहने २ स्तंभने ३ विद्वेषणे ४
उच्चाटने ५ वशीकरणे ६ इति
तंत्रसारः उपपातकविशेषः
इतिप्रायश्चित्तविवेकः॥
अभिचारी न त्रि अभिचारकर्त्ता
तंत्रादि शास्त्रोक्तानिष्ट कारी।

अभिपूर्वचरधातोः कर्त्तरि णिन्
अभिजनः पुं ख्यातिः जन्मभूमिः
कुलश्रेष्ठः वंशः इति॥
मेदिनी॥
अभिजातः त्रि सुंदरः न्याय्यः
इतिविश्वः कुलजः कुलीनः
बुधः पंडितः इत्यमरः॥
अभिजित् क्ली दिवसस्याष्टममुहू
र्त्तं। कुतपकाल इति प्रसिद्धे
यथा अपराह्णे तु संप्राप्ते॥
अभिजिद्रौहिणोदये। यदत्र
दीयते जंतोस्तदक्षयमुदाहृतं
इतिमत्स्यपुराणं नक्षत्रविशेषः
तत्तु तारकात्रयात्मकं शृंगाकोहि
उत्तराषाढायाः शेषपंचदशदंडाः
श्रवणायाः प्रथमदंडचतुष्टयेपत
विंशतिदंडात्मकमभिजिद्भवति
इतिज्योतिषं तत्र जात॥
फले अतिसुललित कांतिः
सम्मतः सज्जनानां ननुभवति
नीतश्चारुकीर्तिः सुवेशः द्विजवर
सुरभक्तो व्यक्तवाङ्मानवः॥
स्यादभिजिति यदि सूतिर्भूपतिः
स्वस्वदेशे इतिकोष्ठीप्रदीपः॥
अभिज्ञः त्रि प्रवीणः निपुणः
विज्ञः इत्यमरः॥
अभिज्ञानं क्ली चिह्नं इति॥

हेमचंद्रः
अभितः स शीघ्र साकल्ये॥
अभिमुख्ये उभयतः समीपे
इतिमेदिनी॥
अभिधर्षणं क्ली रक्षः पिशाच
भूतादेरभिषंगः। इति॥
महाभारते॥ सर्वतोभावेन
धर्षणं च॥
अभिधा स्त्री नाम इतिहेमचंद्रः
न्यायमते शब्दशक्तिः मीमांसा
मते विधिसमवेतविधिव्यापारी
भूतपदार्थः तस्याल्लक्षणं॥
समुख्यार्थस्तत्र मुख्यो व्यापारोस्या
ऽभिधोच्यते इतिकाव्यप्रकाशः
॥ ०॥ तत्रसंकेतितार्थस्य॥
बोधनादग्रिमाभिधा। इति
साहित्यदर्पणे
अभिधानं क्ली नाम इत्यमरः
कथने यथा तवाभिधानाद्व्यथते
नताननः इति भारविः॥
शब्दकोषः यथा कृत्तद्धित
समासानामभिधानं नियामकं
इति बोपदेवः॥
अभिधेयं क्ली अभिधानं नाम
अभिधीयते अनेनेति करणेयः
अभिधेयं त्रि अभिधागम्य
वाच्यं प्रति पाद्यं यथा इति

प्रयोजनाभिधेयसंबंधाः इति
वोपदेवः ॥
अभिध्या स्त्री परस्वविषयस्पृहा
इत्यमरः परद्रव्ये जिहीर्षा
दोषचिंतापूर्वकं परस्वलिप्सा
इत्येके। विषयप्रार्थना इति
स्वामी विषयस्य लाभस्य स्पृहा विषय
स्पृहा विषयेन चौर्य्यादिना स्पृहा।
इति तृतीयासमासेः इत्यन्ये ॥
विषयस्पृहेति पाठे परस्वविषये
विषयितया स्पृहा जिहीर्षामात्रे
इति कश्चित् इति कौमुदी इत्यमर
टीकायां भरतः अभिलाषः।
इति रायमुकुटः ॥
अभिनंदनः पुं बुद्धविशेषः
चतुर्थस्तीर्थंकरजिनोयं। इति
हेमचंद्रः सर्वतोभावेनानंद ॥
जनके त्रि ॥
अभिनयः पुं स्फुरित क्रोधादि
भावाभिव्यंजकः अंगुल्यादिना
व्यक्तीकृतमनःकार्य्यं तत्पर्य्यायः
व्यंजकः २ इत्यमरः दृश्यकाव्यं
रंगादिभिन्नदेशामयुधिष्ठिरादीनां
ममस्यानुकरणं सचचतुर्विधः
आंगिकः १ वाचिकः २ आहार्य्यः
३ सात्विकः ४ इति साहित्यदर्पणे
अभिनवः त्रि नूतनः इत्यमरः

अभिनवोद्भिते पुं अंकुरः ॥
इत्यमरः ॥
अभिनिर्मुक्तः पुं सूर्य्यास्तकाल
शयीयस्मिन् सुप्ते सूर्य्योऽस्तं
यातिसः इत्यमरः ॥
अभिनिर्याणं क्ली विजिगीषोः
प्रयाणं यात्रा इत्यमरः ॥
अभिनिवेशः पुं मनःसंयोग
विशेषः। मनोनिवेशः ॥
आवेशः। शास्त्रादौ प्रवेशः ॥
तत्पर्य्यायः निर्बंधः २ इति ॥
हेमचंद्रः योगशास्त्रमते ॥
मरणजन्यभयजनकाऽविद्या
विशेषः ॥
अभिनिष्टानः पुं विसर्गः।
अक्षरं इति मेदिनी ॥
अभिनीतः त्रि युक्तः न्याय्यः ॥
अतिसंस्कृतः प्रशस्त्या भूषितो वा
अमर्षी क्रोधनः असमावान् वा
इत्यमरः ॥
अभिनेता त्रि अभिनयकर्त्ता
केचो सेतबाला इत्यादि भाषा
इति नाटक प्रसिद्धः।
अभिपन्नः त्रि अपराद्धः ॥
अपवाध्यवान् व्यापद्गतः ॥
प्राप्तविपत्तिः अभियस्तः।
शत्रुणाक्रांतः इत्यमरः

अभिप्रायः पुं इच्छाविशेषः ॥
तत्पर्य्यायः आशयः २ छंदः ३
इत्यमरः आकूतं ४ भावः ५ ॥
इति जटाधरः ॥
अभिप्रेतं त्रि अभिप्रायविषयी
भूतं अभीष्टं यथा कामायतु ॥
हितकाम्यमभिप्रेतार्थसिद्धये
पर्वणोन विधानेन तदप्युक्तं ॥
खगाधिप इति भविष्यपुराणं
अभिभवः पुं गर्हनाशः।
परिभवः पराभवः इति ॥
शब्दरत्नावली हेमचंद्रश्च ॥
अभिभूतः त्रि ज्ञानरहितः ॥
तत्पर्य्यायः इतिकर्त्तव्यतामूढः
२ विह्वलः ३ व्याकुलः ४ अभिमर्यः
५ विक्लवः ६ विह्वलः ७ इति
जटाधरः पराभूतः भग्नदर्पः
तत्पर्य्यायः आत्तगर्वः २ इति
जटाधरः आत्तगंधः ३ इत्यमरः
अभिहतः ४ इति तट्टीका ॥
अभिभूतिः स्त्री अनादरः अवज्ञा
इति शब्दरत्नावली ॥
अभिमतं त्रि इष्टं सम्मतं।
यथा अभिमतफलशंसी चारु
पुस्फोरबाहुः स्त्रकृषु कुकुरुष्टैः
पक्षिणश्चानुकूलाः इति भट्टिः
अभिमंत्रणं क्ली आह्वानं ॥

आकारणं डाकन इति भाषा
इति हेमचंद्रः ॥
अभिमंथः पुं चक्षूरोगः इति
त्रिकांडशेषः अधिमंथ इति
वैद्यके पाठः तस्य निदानं ॥
संप्राप्तिरूपाणि हंडे रैते ॥
रभिष्यन्दे नराणां मक्रियावता
तावंतस्त्वधिमंथाः स्युर्नयने तीव्र
वेदनाः उत्पाट्यत इवात्यर्थं ॥
नेत्रं निर्मथ्यते तथा ॥
शिरसोऽर्द्धं च तं विद्यादधिमंथं
स्वलक्षणैः सतु चतुर्विधः यथा
हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्रादधि
मंथो रक्तजः पंचरात्रात् षड्रात्राद्
वातिकः संनिहन्यान्मिथ्याचारात्
पैत्तिकः सद्य एव ॥ इति ॥
माधवकरः ॥
अभिमन्युः पुं अर्जुनपुत्रः
सतु सुभद्रागर्भजातः। इति
महाभारतं ॥
अभिमरः पुं युद्धं वधः ॥
स्वसैन्यभयं इति विश्वमेदिन्यौ
बंधनं इति जटाधरः ॥
अभिमर्दः पुं आमर्दः पीडनं
संपरायः युद्धं इति ॥
मेदिनी ॥
अभिमातिः पुं शत्रुः। इति ॥

हेमचंद्रः ॥
अभिमानः पुं अर्थादिनाद्याः
तत्पर्य्यायः । अहंकारः २ गर्वः
२ ॥ ज्ञाने । बोधः प्रणयः ॥
प्रेमप्रार्थनाच हिंसा हनने
इत्यमर भरतौ ॥
अभिमानितं क्ली सुरतं ॥
मैथुनं इति त्रिकांडशेषः
अभिमानयुक्ते त्रि ॥
अभिमानी न् त्रि अभिमानयुक्तः
अभिमानग्रस्तः यथा कर्ताभूत
कुलानां जनुमय धारणाहीषितः
सोऽभिमानी इतिवेणीसंहारः ॥
अभिमायः त्रि इति कर्तव्यतामूढः
अभिभूतः इति जटाधरः ॥
अभिमुखं त्रि सन्मुखं इति ॥
जटाधरः ॥
अभियातिः पुं शत्रुः इति ॥
हेमचंद्रः ॥
न्
अभियाती पुं शत्रुः इत्यमर
टीकायां रायमुकुटः ॥
अभियुक्तः त्रि तत्परः पर
कर्तृकरुद्धः इति मेदिनी ॥
स्मृतिशास्त्रमते अभियोगविषयी
भूतः आसामी इति ख्यातः तत्
पर्य्यायः प्रत्यर्थी २ प्रतिवादी

यथा । अभियुक्तोभियोगस्य
यदि कुर्य्याद पह्नवं मिथ्या तत्तु
विजानीया दुत्तरं व्यवहारतः ॥
इतिव्यवहारतत्वे नारदः ॥
अभियोक्ता क त्रि अभियोगकर्ता
विवादकर्ता फरियादी इति
ख्यातः । तत्पर्य्यायः वादी २
अर्थी ३ यथा । अभियोक्ता
ऽप्रगल्भत्वात् वक्तुं नोत्सहते यदि
तदा कालः प्रदातव्यः कार्य्य
शक्त्यनुरूपतः इतिव्यवहारतत्वे
नारदः ॥
अभियोगः पुं अपराधादि ॥
योजनं अन्येन विरोधे स्वार्थ
संबंधितया राजसमीपे कथनं
आदास नालिष इति ख्यातः
यथा अभियोगमनिस्तीर्य्यैनं
प्रत्यभियोजयेत् । इति ॥
याज्ञवल्क्यः युद्धार्थह्वाने इति
रायमुकुटः अपकारकरणेच्छा
पूर्वकाक्रमणं तत्पर्य्यायः ॥
अभिग्रहः २ इत्यमरः उद्योगः
इतिहेमचंद्रः
अभिरामः त्रि रुचिरः सुंदरः
इति हेमचंद्रः ॥
अभिरूपः पुं पंडितः इति ॥
हेमचंद्रः कामदेवः चंद्रः ॥

शिवः विष्णुः इतिशब्दरत्नावली
अभिरूपः त्रि मनोहरः ॥
पंडितः इतिमेदिनी ॥
अभिलापः पुं शब्दः । इति
त्रिकांडशेषः संकल्पांगवाक्य
यथाकाम्याभिलापसहितःकुश
तिलजलत्यागरूपः संकल्पः
शास्त्रार्थः इति प्रक्रमाधिकरणं
अभिलावः पुं छेदने इत्यमरः
अभिलाषः पुं लोभः तत् ।
पर्य्यायः इच्छा २ आकांक्षा ३
स्पृहा ४ ईहा ५ तृट् ६ वांछा ७
लिप्सा ८ कामः ९ तर्षः १०
मनोरथः ११ इत्यमरः ॥
संगमेच्छा इतिरसमंजरी ॥
अभिलाषी न् त्रि अभिलाषयुक्तः
यथाजलाभिलाषीजलमाददानो
छायेवतां भूपतिरन्वगच्छत्
इतिरघुः
अभिलाषुकः त्रि अभिलाषयुतः
तत्पर्य्यायः लुब्धः २ गृध्नुः ३
गर्द्धनः ४ तृष्णक ५ इत्यमरः
अभिलासः पुं अभिलाषः
इच्छा इत्यमरटीकासारसुंदरी
अभिवादः पुं अप्रियवाक्यं ।
तत्पर्य्यायः पारुष्यं २ ।
इत्यमरः ॥

अभिवादकः त्रि वंदनशीलः ॥
तत्पर्य्यायः वंदारुः २
इत्यमरः अप्रियवक्ता ॥
पारुष्यार्थाभिपूर्व वदेः कर्तरि
एकः ॥
अभिवादनं क्ली नामोच्चारणपूर्वक
नमस्कारः । अभिवादये भो ॥
अमुकशर्माहमित्येवं रूपः
तत्तु पादस्पर्श पूर्वकनमस्कारः
तत्पर्य्यायः पादग्रहणं २
इत्यमरः ॥
अभिव्याप्तिः स्त्री सवत्रीवस्थाने
सर्वतोवृत्तिः तत्पर्य्यायः ।
संमूर्छनं २ इत्यमरः ॥
अभिशापनं क्ली मिथ्याभिशंसनं
अभिशापः अभिपूर्व शाप
धातोर्भावे ऽनट् ॥
अभिशस्तः त्रि प्राप्ताभिशापः
शापग्रस्तः यथा न नाम ग्रहणं
कुर्य्यात् कृपणस्य गुरोस्तथा
भार्य्याया अभिशस्तस्य ॥
विशेषः इति मेघदूतटीका
अभिशस्तः त्रि परस्त्रियां पर
पुरुषेवा मैथुनं प्रति मिथ्या
दूषितः मैथुनंप्रति आहत
इतिकेचित् उपपन्नं पातकं
इतिकेचित् मिथ्यादूषितमात्रं

इतिकेचित् इतिभरतः ॥
तत्पर्य्यायः आक्कारितः २
क्कारितः ३ इत्यमरः ॥
अभिशस्तिः स्त्री लोकापवादः
इतिहेमचंद्रः याञ्चा इत्यमरः
अभिशापः पुं स्वर्णस्तेयादिनाहे
त मित्यादि मिथ्यादूषणवाक्यं
मिथ्यापवादः तत्पर्य्यायः
मिथ्याभिशंसनं २ इत्यमरः ॥
क्रोधात् हिंसादि भिईरूवोभिधा
रणं इतिपुराणं ब्राह्मणगुरुहद
सिद्धान्तो अनिष्टाभिशंसने ॥
इतिविज्ञयरक्षितः ॥
अभिषंगः पुं पराजयः ॥
आक्रोशः शपथः इति
मेदिनी मिथ्यापवादः । इति
मधुरानाथः आलिंगनं इत्यमर
टीकायां रायमुकुटः सर्वतोभावेन
संगः इतिहलायुधः भूताद्या ॥
वेशः यथाअभिचारताभिचारार्थं
मभिषंगमभिशापतः । इति।
माघवकरः ॥
अभिषवः पुं यज्ञः स्नानं ॥
मद्यसंधानं ततु चिरस्थापित
मद्यात् पादक द्रव्यं इति
मेदिनीयज्ञ स्नानं सोमलता
पानेच तत्पर्य्यायः सुत्या २

सवनं ३ इत्यमरः ॥
अभिषवं स्त्री कांजिकं कांजि
इतिभाषा इति हलायुधः ४
अभिषुतं स्त्री कांजिकं
इत्यमरः ॥
अभिषेकः पुं स्नानं इति
त्रिकांडशेषः अर्थात् देव
याञ्चाभिषेक द्रव्याणिलिख्यंते
शीतलजलं १ गोमयं २
गोमूत्रं ३ दुग्धं ४ दधि ५ घृतं
६ कुशोदकं ७ शंखोदकं ८
चंदनोदकं ९ कुंकुमोदकं १०
फलोदकं ११ पुष्पोदकं १२
चंदनपिष्टामलकोद्वर्त्तनं ॥
सुगंधिजलं १४ तेनाष्टवारस्नानं
ततद्वितीयसप्तमाष्टमवारेषुमध्य
घृत मधु योजनं गंधोदकं १५
तेनपंचधास्नानं तीर्थजलं १६
गंगोदकं १७ वल्मीकतोयं १८
सर्वौषधिजलं १९ सहस्रधाराजलं
२० घटोदकं २१ केचिन्मते
अष्टोत्तरशतघटोदकं इति
उत्कलखंडे ॥ ० ॥ अथ ॥
इदमत्रैदिकेश्वरपुराणोक्त दुर्गा
पूजाभिषेकद्रव्याणिलिख्यंते
पिष्टामलकीपुष्पहरिद्रा १ तथा
दर्पणे प्रतिबिंबे देवीमुद्वर्त्यपश्चा

क्रमेवक्ष्यमाणप्रत्येकद्रव्येणमंत्रे
णविधिवत्स्नापयेत् शुद्धजलं २
शंखजलं ३ गंगाजलं ४ गंधोदकं
५ पंचगव्यंप्रत्येकंयथा गोमूत्रं
६ गोमयं ७ दुग्धं ८ दधि ९ घृतं
१० कुशोदकं ११ पंचामृतं १२
शिशिरोदकं १३ मधु १४ ॥
पुष्पोदकं १५ इक्षुरससमागरोदक
१६ सर्वौषधिमहौषधि जलं १७
पंचकषायोदकं १८ अष्टमृत्तिकाः
१९ फलोदकं २० उष्णोदकं २१ कुं
सहस्रधाराजलं २२ अष्टकलसोद
यथाव्योमगंगांबुपूर्णप्रथमकलसः
२३ मेघतोय पूर्ण द्वितीय ॥
कलसः २४ सारस्वत तोय पूर्ण
तृतीयकलसः २५ सागरोदक
पूर्णचतुर्थ कलसः २६ पद्मरेणु
मिश्रित जलपूर्ण पंचमकलसः २७
निर्झरोदकपूर्ण षष्टकलसः २८ सर्व
तीर्थांबुपूर्ण सप्तमकलसः २९ शुद्ध
जलपूर्णाष्टम कलसः ३० ॥
नानापद्धतिषु द्रव्याण्युक्त क्रम
पुनरुक्तायिकानि संति यत्र
यान्युक्तातिरिक्त द्रव्याणि तानि
लिख्यंते यथा नदी १ नारिकेल
२ रत्न ३ दृष्टि ४ कर्पूर ५ चंदना
गुरु ७ स्वर्ण ८ रजत ९ गोरोचना

१० कुंकुम ११ श्रीफल १२ धान्य १३
दूर्वा १४ शर्करा १५ सरोवरा १६
स्त्र १७ गंगासागर १८ पंचशस्य १९
तिल २० रुद्र २१ पुष्करिणी २२
कूप २३ फलमूला २४ श्री २५ षट्
चतुष्ट २६ जलानि शीतलजलेच
२७ तिलतैल १ गंधतैले २ ॥
नदीकूल १ वराहदंत २ वेश्याद्वार
३ राजद्वार ४ वृषशृंग ५ वल्मीक ६
चतुष्पथ ७ पारावार ८ देवद्वार ९
गंगा १० मृत्तिकाः गजदंत ११
नदी १२ भयकुल १३ नागर १४
गोष्ठ १५ त्रिपथ १६ मृत्तिकाइति
केचित् पंचामृतं प्रत्येकं ॥
सर्वौषधि महौषधी पृथक् पंच
कषायाः प्रत्येकं पंचामृता ॥
ऽतिरिक्त मधुघृत दुग्धानि उद्वर्त्तन
द्रव्यंकेवल हरिद्रा इतिकेचित्
तैलहरिद्रा इति केचित् गंध ॥
पिष्टपंचशस्यचूर्ण मितिकेचित्
कालीपुराणे देवीपुराणोक्त ॥
पद्धतिष्वपि तथा तासांमध्य
पूर्वोक्तातिरिक्तद्रव्याणिलिख्यंते
यथाप्रवाल १ मरकत २ पद्मराग
३ मुक्ता ४ माणिक्य ५ वैदूर्य्य ६
पद्म ७ कल्हार ८ कुमुद ९ खंडा १०
लक ११ वापी १२ रक्तचंदन १३



नानातीर्थ २४ हरिद्रा २५ पिष्ट २६
शालितंडुल २७ सिद्धार्थ २८
जलानि पंचतीर्थमृत २ ॥
विल्लुतैलं २ उद्वर्तनद्रव्यं तैल
हरिद्रा शुक्लामलकी २॥ः॥
अथ हस्तादिकेष्वदेवीकाली
पुराणपद्धत्युक्ताष्टकलसस्नानका
लीन। रागिणीरागवाद्यानि ॥

पुं। रागरागिन्यो वाद्यं।
हे। मालसी २ मंगलोत सरोत २
दें वाराडी २ इंद्रविजयः — २
कां। मालवः २ विजयः — २
हे। देवकीरी २ भुवनविजयः २
दें। मालवगौडः २ मंगलविजयः २
कां। ललिता २ डंडुभिः — २

हे। वाराडी ३ विजयः — ३
दें मालवः ३ देवोत [illegible] सवः ३
कां। विभाषा ३ डंडुभिः — ३

हे। देशालः ४ राजाभिषेकः ४
दें। देशालः ४ घनतालः — ४
कां भैरवी ४ वंशी — ४

हे। धानुषी ५ मधुरी — ५
दें। मालवी ५ मधुकरः — ५
कां कोडा ५ इंद्राभिषेकः ५

रागरागिन्यो वाद्यं ॥
हे भैरवी ६ करतालः ६
दें भैरवी ६ ठक्का — ६
कां वाराडी ६ शंखः — ६

हे गुजरी ७ वंशी — ७
दें वसंतः ७ शंखः — ७
कां। वसंतः ७ पंचशब्दः — ७

हे वसंतः ८ पंचशब्दः ८
दें कोडा ८ मृदंगः — ८
कां। धानुषी ८ विजयः — ८

अथ देवप्रतिष्ठाभिषेक द्रव्याणि
नदी १ नद २ सागर ३ निर्झर ४
मेघजलानि ५ पंचामृतं ६
कुशोदकसहितपंचगव्यं ७ अश्वखुर
८ गजदंत ९ पर्वत १० कृष्ण ११
वल्मीकमृत्तिका १२ तिलतैलं १३
घृतं १४ पंचकषायोदकं १५ आम्र
१६ चम्पक १७ शमी १८ पद्म १९
करवीरपुष्पाणि २० तुलसी २१
कुंद २२ श्रीफलपत्राणि २३ तिल
कल्कशालितंडुल बिल्वपत्रामलक
चूर्णान्यतममार्जनद्रव्यं २४ उष्णोदकं
२५ तीर्थोदकं २६ अष्टोत्तर
शतकुंभाः तदर्द्धं वा विंशतिर्वा ॥

पकोवा २७ वेदिकाष्टोत्तरशत
पलेन लौकिक षट्पलिकप्रस्थ
तोलकमितेन जलेन प्रस्थकाधक
घटेन द्रव्य मालोद्राकार्य्यं ॥
अष्टकोतु। वल्मीकमृत्तिका।
गोमयंशुष्कगोमयं भस्मशुकपारि
मितजलं गंधशुक्लजलंच इति
देवप्रतिष्ठातत्वं ॥ः॥ अथ राजा
ऽभिषेक द्रव्याणि मृगचर्मस्तीर्ण
ऽलंकृत स्वर्ण भद्रासने गंगा
यमुनासंगमजलं २ धावन्मुख
जलं ३ पूर्वमुख नदीजलं ४
पश्चान्मुख नदीजलं ५ तिर्थद्रुनदी
जलं ६ सर्वसमुद्रजलं ७ क्षीरहत
प्रवालशुक्लपत्रोत पल्लविमिश्रिता
ऽलंकृतकांचनपूर्णकुंभाः ८ रुचक
९ रोचना १० घृतं ११ मधु १२ दुग्धं
१३ दधि १४ पुण्यतीर्थमृत्तिका २५
पुण्यतीर्थजलं १६ मंगलद्रव्यं १७
मणि दंड श्वेतचामर व्यजने १८
माल्यभूषित श्वेतछत्रं १९ श्वेतहे
२० श्वेताश्वः २१ महागजवरः २२
वराभरणभूषिताष्टकन्याः २३ सर्व
वादित्राणि २४ अलंकृतवेदी २५ इति
वाल्मीकरामायणे अयोध्याकांडे
अथ राजाभिषेक विधिः ॥
पुरोहितो राज्ञः प्रजापालनार्थ
कार्यसिद्ध्यर्थं परदिनेऽभिषेके
कर्तव्ये पूर्वदिने गणेश मातृका
पूजन पुण्याह वाचन नान्दी प्रभृति
पूर्वांगं कुर्य्यात राजा राज्ञीच
नियमं कृत्वा उपवासं कुर्य्यात
परदिने अमात्यसामंत सहितः
पुरोहितः कृत मंगलस्नानौ
राज्ञी राजानौ मणिकांचन
पृथिवीपुष्पाणि स्पर्शयित्वा नानारत्न
चंद्रातपोपशोभित मंडप
मध्ये व्याघ्रचर्मच्छादितासने ॥
उपवेशयेत ततः पूर्वोत्तर ॥
नीचां वेदीं कृत्वा तत्र स्वगृह्योक्त
विधिनाग्निं संस्थाप्य हुताकाः
पलाशाश्वत्थशमीसमिधो वैदिके
र्मन्त्रैर्जुहुयात। ततः उदुम्बरस्रुवेण
वैदिकमंत्रैर्घृताहुती जुहुयात
ततः सर्वतोभद्रमंडपे स्थापित
स्वर्ण रजत ताम्रमृन्मय कलस्थ
सर्वौषधिपल्लवैलालवंगादिसुगंधि
द्रव्यसम्वासित पुण्यनदीतोयं सुवर्ण
विभूषित शंखेनकत्विः सह गृहीत्वा
त्रर्ष्यश्चौषं मंगल पाठे राजसूय
वाजपेय महाभिषेकोक्त सूक्त
मंत्रैः सस्त्रीकं राजानं प्राङ्मुखं मूर्द्धि
कन्याभिः सहाभिषेचेत ततो
ऽमात्यादयः सर्वेऽभिषिंचेयुः ॥



ततः पुरोहित मंत्रि सामंत
प्रकृतिपुरुषा अलंकृताभिः॥
कन्याभिः सह सुवासोगंधमाल्या
ऽलंकृत राज्ञी राज्ञो ललाटे ॥
कुंकुमागुरुकस्तूर्यादिद्रव्यैस्ति
लकंदद्युः ततः राज्ञो मूर्द्धि किरीटं
दत्वा छत्रचामरादिराजचिह्नद्रव्या
णि समुपकल्पयेयुः ततोदुंदुभिस्वस्ति
पुण्याह चतुर्वेद घोषैः सकुल
क्रमागतनाम्नाऽमुकस्त्वंराजाभव
इत्युक्त्वा राज्ञोपरि श्वेत कुसुम
लाजाक्षतादि विकिरेयुः ततो
वंदिनो मागधाश्च स्तुतिं कुर्युः।
ततो ब्राह्मणाश्चाशिषं कुर्युः ततः
अमात्यादयः राज्ञे उपायनानि
दत्वा नमस्कुर्युः इति
महाभारतादयः ॥ ० ॥
अभिषेणने क्ली यात्रे प्रति ॥
सेनासहित गमनं सेनयासह
करणभूतया वा विजिगीषोः शत्रो
रभिमुखेन गमनं इत्यमरः
भरतो ॥
अभिषुते त्रि वर्णिते स्तुतं ॥
इत्यमरः ॥
अभिष्यंदः पुं अतिवृद्धिः ॥
आस्रावः चक्षुरोगविशेषः इति
मेदिनी तस्य निदानं संप्राप्तिश्च॥

यथा उष्णाभितप्तस्य जल ॥
प्रवेशाद्दूरेक्षणात्स्वप्नविपर्ययाच्च
स्वेदाद्रजो धूम निषेवणाच्च ॥
छर्दिर्विघाताद्वमनातियोगात्
द्रवात्तथान्नान्निशिसेविताच्च विण्मूत्र
वातक्रमनिग्रहाच्च प्रसक्तसंरोदन
शोककोपक्लेशाभिघातादति।
मद्यपानात्॥ तथाऋतूनां च ॥
विपर्ययेण क्लेशाभिघातादति
मैथुनाच्च बाष्पग्रहात् सूक्ष्म
निरीक्षणाच्च नेत्रे विकारान्जनयंति
दोषाः स च चतुर्विधः यथा
वातात्पित्तात् कफाद्रक्तादभिष्यंद
श्चतुर्विधः प्रायेणजायते घोरः सर्व
नेत्रामयाकरः निस्तोदन स्तंभन
रोमहर्षसंघर्ष पारुष्यशिरोभि
तापाः विशुष्कभावः शिशिरा
श्रुता च वाताभिपन्ने नयने भवंति
दाहप्रपाकौ शिशिराभिनंदा
धूमायनं बाष्पसमुच्छ्रयश्च उष्णाश्रुता
पीतकनेत्रता च पित्ताभिपन्ने
नयने भवंति उष्णाभिनंदा ॥
गुरुतातिशोथः कंडूपदेहावति
शीतता च स्रावोमुहुः पिच्छिल
एव चापि कफाभिपन्ने नयने
भवंति ताम्राश्रुता लोहित
नेत्रता च राज्यः समंता इति ॥

लोहिताश्च पित्तस्य लिंगानि च
यानि तानि रक्ताभिपन्ने नयने
भवंति इति माधवकरः ॥
अभिष्यदिरमणी क्ली प्रधाननगर
सन्निहितनगरे तत्पर्य्यायः ॥
शाखानगरं २ इति जटाधरः
अभिसंतापः पुं युद्धं । इति ॥
हलायुधः ॥
अभिसंधाने क्ली वंचने प्रतारणे
इति हेमचंद्रः ॥
अभिसंधिः पुं अभिसंधाने ।
उद्देशः यथापितृभ्यो दिवि
येवमूर्ताः स्वधाभुजः काम्यफला
भिसंधौ प्रधानशाकाः सकलेप्सितानां
विमुक्तिदायेऽनभिसंहितेषु ॥
इति रुचिस्तवः ॥
अभिसंपातः पुं युद्धं ॥
इत्यमरः ॥
अभिसरः पुं सहायः अनुचरः
इत्यमरः ॥
अभिसर्जनं क्ली दानं वधः ॥
इति धरणी ॥
अभिसारः पुं बले युद्धे ॥
सहायः साधने इति धरणी
स्त्रीपुंसयोरन्यतरस्यान्यतरार्थं
संकेत स्थल गमनं इत्यलंकार
शास्त्रं ॥

अभिसारिका स्त्री ह्रीयादि ।
षोडशनायिका मध्ये अष्टावस्था
विशिष्टाष्टनायिकांतर्गत नायिका
भेदः ऽस्यालक्षणं संकेतस्थले
स्वयंगमन कर्त्री यद्वा प्रिय ॥
गमनकारयित्री अस्याश्चेष्टा
समयानुरूप भूषणं शंका
बुद्धिनैपुण्यं कपटसाहसादिः
सात्रिविधा दिवाभिसारिका १
ज्योत्स्नाभिसारिका २ अंधकाराभि
सारिका ३ इति रसमंजरी ॥
अभिहारः पुं चौर्य्ये संमुखे ।
हरणे तत्पर्यायः अभिग्रहणं २
इत्यमरः सन्नहनेकवचधारणे
अभियोगः अपचिकीर्षयाभि
गम्याक्रमणं इति मेदिनी ॥
अभिहितं त्रि उक्तं कथितं
इत्यमरः ॥
अभीकः पुं कविः इति ॥
मेदिनी स्वामी इति हलायुधः
अभीकः त्रि कामुकः क्रूरः
उत्सुकः निर्भयः इति ॥
शब्दरत्नावली ॥
अभीप्सितं त्रि वांछितं अभीष्टं
इत्यमरः ॥
अभीरः पुं आभीरः गोपः ॥
इत्यमर टीकायां रमानाथः ॥

अभीरुः पुं भैरवः यथा ॥
अभीरुर्भैरवो भीरुर्भूतपो
योगिनीपतिः इति वटुक
भैरवस्तवः निर्भये त्रि ॥
अभीरुः स्त्री शतमूली इत्यमरः
अभीरुपत्री स्त्री शतमूली ॥
इत्यमरः ॥
अभीशुः पुं प्रग्रहः वागडोर
इतिभाषा वेदेऽस्य प्रचुरप्रयोगः
किरणे इति हलायुधः
अभीशुः स्त्री अंगुलिःवेदेऽस्य
प्रचुरप्रयोगः ॥
अभीषंगः पुं आक्रोशः
इत्यमरः ॥
अभीषु पुं प्रग्रहः किरणः ॥
इत्यमरः कामः अनुरागः ॥
इति शब्दरत्नावली
अभीष्ट त्रि वांछिते तत् ॥
पर्य्यायः अभीप्सितं २ हृद्यं ३
दयितं ४ वल्लभं ५ प्रियं ६
इत्यमरः ॥ (अ)
अभीष्टा स्त्री वेणुकानामगंधद्र
इति शब्दचंद्रिका ॥
अभीक्ष्णं क्ली भृशं नित्ये ॥
तद्युक्त क्रिययो स्त्रि इतिमेदिनी
अभीक्ष्णं वा पुनःपुनःअनारते
इत्यमरः ॥

अभुक्तः त्रि उपवासी यथा।
अभुक्तस्य दिवानिद्रा पाषाणमपि
जीर्य्यति इतिवैद्यके अकृते
भोजने वस्तु ॥
अभूमिः स्त्री स्थानाभावः ॥
अनाधारः आश्रयाभावः यथा
अभूदभूमिः प्रतिपक्ष जन्मनां
श्रिया मिति माघः नाभूद् भूमि
स्मरशायकानामिति नैषधं ॥
अभेदः त्रि भेदरहितः ॥
अविशेषः। यथा अभेदः ॥
शिवरामयो रिति पुराणे ॥
अभेद्यं क्ली हीरकं इति
राजनिर्घंटः अभेदनीयवस्तुनि
त्रियथा अस्त्राण्यनेक रूपाणि
तथा भेद्यंच देहाने इति ॥
देवीमाहात्म्ये ॥
अभोजनं क्ली भोजनाभावः
उपवासः यथा अजीर्णे भोजनं
येषां जीर्णे येषा मभोजनं
राज्ञावभोजनं येषां तेषां
नश्यंति धातवः इतिवैद्यकं ॥
अभ्यग्रं त्रि समीपं निकटं
इत्यमरः ॥
अभ्यंगः पुं तैलमर्दनं तत्
पर्य्यायः स्नेहनं २ इति ॥
राजनिर्घंटः यथा तैलमत्स्ये ॥

यदंगेषु नवस्याद्वाहु तर्पणे स
मार्ष्टिः इषशाभ्यंगो मलकादौ
प्रकीर्तितः अभ्यंगमाचरेन्नित्यं
सजरा श्रम वातहा शिरः ॥
श्रवण पदेषु ते विशेषेण
शीलयेत् इत्यायुर्वेदः ॥ऽ॥
अस्यगुणाः मार्दव कारित्वं।
कफवात नाशित्वं धातु पुष्टि
जनकत्वं त्वग्वर्ण बल प्रदत्वंचर्ण
भ्यंगगुणाः निद्रावस्तुहितकारित्वं
पादरोग नाशित्वंच पादगतं
ह्रीशिरेवत्तषिसंवंद्वेस्तुःअतश्चत्त
हितार्थिनापादाभ्यंगःकरणीयः
कफग्रस्तकृतभेदवमनाजीर्णिभि
नीभ्यंगः करणीयः इति ॥
राजवल्लभः ॥ऽ॥ अपरंच ॥
मूर्द्धिदत्तं यदा तैलं भवेत् ॥
सर्वांगसंगतं । स्रोतोभि ॥
स्तर्पयेद्वाहू सवाभ्यंग उदाहृतः
तत्पर्यायः अभ्यंजनं २ ॥
आभ्यं इति भाषा इति ॥
प्रुष्टितत्व इत्यायुर्वेदः ॥
अभ्यंक्तः पुं तिलकल्कः इति
शब्दिदिशाकप्रयोगः ॥
अभ्यंजनं क्ली तैलं इति ॥
हेमचंद्रः अभ्यंगः इति ॥
राजनिर्घंटः ॥

अभ्यंतरं क्ली मध्यं तत्पर्य्यायः
अंतरालं २ इत्यमरः अंतः ॥
३ अंतरं ४ अंतरालकं ५
इतिराजनिर्घंटः ॥
अभ्यमितः त्रि रोगी इत्यमरः ॥
अभ्यमित्रीणः पुं अभ्यमित्रः।
इत्यमरः ॥
अभ्यमित्रीयः पुं अभ्यमित्रः
इत्यमरः ॥
अभ्यमित्रः पुं स्वसामर्थ्यवशेन
शत्रुसम्मुखगमनकर्ता युद्धस्थले
शत्रुसम्मुखगामी तत्पर्य्यायः॥
अभ्यमित्रीयः २ अभ्यमित्रीणः ३
इत्यमरः ॥
अभ्यर्णं त्रि निकटं इत्यमरः ॥
अभ्यवकर्षणं क्ली शल्यादेरुत्
पाटनं तत्पर्य्यायः निर्हारः ॥२
इत्यमरः
अभ्यवस्कंदः पुं निःशक्तीकरणाय
शत्रुभिर्दीयमानः प्रहारः तत्
पर्यायः अभ्यासादनं २ अयातः
३ धाटो ४ इति हेमचंद्रः ॥
अभ्यवस्कंदनं क्ली निःशक्तीकरणाय
शत्रुभिर्दीयमानः प्रहारः शत्रु
सम्मुखगमनं इत्यमरभरतौ
अभ्यवहारः पुं भक्षणं आहारः
इति हेमचंद्रः ॥



अभ्यवहृतं त्रि भुक्तं खादितं
इत्यमरः ॥
अभ्यसनं क्ली अभ्यासकरणं
पौनःपुन्येनकरणं चिन्तनेच
यथास्यादभ्यासोभ्यसनेनेतिका
इतिमेदिनी ॥
अभ्यसूया स्त्री असूयागुणेषु
दोषारोपणं यथा चैत्रस्यदानं
नामसे इत्यमरटीकायांभरतः
अभ्याकांक्षितं क्ली मिथ्याभियो
गः भिक्षादानया इतिभाषाइति
शब्दरत्नावली ॥ (गः
अभ्याख्यानं क्ली मिथ्याभियो
मिथ्याविवादः । शतं मे ॥
धारयसीत्यादिमिथ्याज्ञापनं
इत्यमरभरतौ ॥
अभ्यागतः पुं अतिथिः इति ॥
हेमचन्द्रः स्वयंज्ञातपूर्वगृहागतः
इतिश्रीधरस्वामी ॥
अभ्यागमः पुं समीपेमारणं
युद्धेवैर अभ्युत्थानं इति ॥
विश्वः ॥
अभ्यागारिकः त्रिकुटुम्बव्यापृतः
पुत्रदारादिपोषणे व्यग्रः ।
इत्यमरः
अभ्यादानं क्ली आरंभः इत्यमरः
प्रथमारंभः इतिरायमुकुटः

अभ्यान्तः त्रि रोगी । इत्यमरः ॥
अभ्यामर्दः पुं संग्रामः ।
इत्यमरः ॥
अभ्याशः त्रि समीपं इत्यमरः ।
टीकायांरायमुकुटः ॥
अभ्यासः पुं अभ्यसनं आवृत्तिः
इतिमेदिनी शराभ्यासः ॥
तत्पर्य्यायः खुरली २ योग्या
३ । इति त्रिकाण्डशेषः ॥
समीपे त्रि इत्यमरः
चित्तस्यैकस्मिन्नभ्यंतरे वाह्ये वा
प्रतिमादावालंबने सर्वतः
समाहृत्य पुनः पुनः स्थापन
मभ्यासः यथा अभ्यासयोगेन
ततोमामिच्छाप्तुं धनंजयेति
भगवद्गीताटीकायांनीलकंठः
अभ्यासादनं क्ली निःशत्रुकरणाय
शत्रुभिर्दीयमानः प्रहारः शत्रु
सम्मुखगमनं । इत्यमरभरतौ
अभ्याहारः पुं अभिहारः ॥
चौर्य्यं इत्यमरटीका ॥
अभ्युत्थानं क्ली गौरवं इति ।
हेमचन्द्रः आसनादुत्थानं
यथा यदा यदा हि धर्मस्यग्लानि
र्भवतिभारत।अभ्युत्थानमधर्मस्य
तदात्मानं सृजाम्यहं इति ॥
श्रीभगवद्गीता ॥

अभ्युदितः त्रि यस्मिन्सुप्तेसूर्य्य
उदेति सः सूर्य्योदयकालशायी
इत्यमरः ॥
अभ्युपगतः त्रि स्वीकृतः
अंगीकृतः इति हेमचन्द्रः ॥
अभ्युपगमः पुं स्वीकारः
इत्यमरः निकटागमनं इति ।
मेदिनी ॥
अभ्युपपत्तिः स्त्री अनुग्रहः
इत्यमरः
अभ्युपायः पुं अंगीकारः ।
स्वीकारः । इतिहेमचन्द्र उपायः
यथातत्स्वीकृतिव्यतिकरे ॥
कइहाभ्युपायः इतिकाव्यप्रकाशः
अभ्युपायनं क्ली उपायनं ॥
उपढौकनद्रव्यं यथा ॥
तावानयसमंगोपैर्नंदाद्यैः ॥
साभ्युपायनैः इतिश्रीभागवते
अभ्युपेतं त्रि स्वीकृतं उपगतं
यथा अहमभ्युपेतस्त्वामर्थि।
भावादिति नैविषादः इतिरघुः
अभ्युषः पुं अभ्युषः पोलिः ॥
इत्यमरटीकायांभरतः ॥
अभ्युषः पुं पाकावस्थागत
कलायादिः आरब्धपाकयव
सर्षपादिः वह्निना ईषद्दग्धः
चूट चुट शब्दवान् इतिकेचित्

दरदग्ध इति श्रीधरः तत्पर्य्यायः
आयक्कः २ पोलिः इत्यमरः ॥
अभ्युषः ४ अभ्योषः ५ इति
भरतः ॥ ० ॥ पोलिका रोटी इति
प्रसिद्धा अस्यागुणाः मधुरत्वं
गुरुत्वं रोचकत्वं वलकारित्वं
श्लेष्मवृद्धिजनकत्वं पित्तरक्त
प्रदायित्वंच ॥ ० ॥ अंगारहतायाः
स्तस्यागुणाः अग्निदीपनत्ववायुवृद्धि
कारित्वं लघुत्वं वलकारित्वंच
सास्नेहयुक्ताचेत् घनाघनगुणान्विता
इतिराजनिर्घण्टः ॥
अभ्योषः पुं अभ्युषः ॥
इत्यमरटीकायांभरतः ॥
अभ्रंगतौ इतिकविकल्पद्रुमः
अभ्रं क्ली मेघः आकाशं ॥
स्वर्णं अभ्रकधातुः इतिमेदिनी
अभ्रंलिहः पुं वायुः । इति ॥
पाणिनिः ॥
अभ्रकं क्ली स्वनामख्यातधातुः
आभइति भाषा तत्पर्य्यायः
गिरिजं २ अमलं ३ इत्यमरः
गिरिजामलं ४ गौर्य्यामलं ५
इति स्वामी ॥ गिरिजावीजं ६
गरजध्वजं ७ इतिवाचस्पतिः
शुभ्रं ८ इति जटाधरः घनं ९
व्योम १० अब्दं ११ इतिरत्नमाला

अभ्रं १२ भृंगं १३ अम्बरं ॥
अंतरीक्षं १५ आकाशं १६
बहुपत्रं १७ खं १८ अनंतं १९
गौरीजं २० गौरीजेयं २१ ॥
इति राजनिर्घंटः अस्यगुणाः
रसायनत्वं स्निग्धत्वं वलवर्णाग्नि
वर्द्धकत्वंच इति राजवल्लभः ॥
अपिच गुरुत्वं हिमत्वं वल्यत्वं
कुष्टमेह त्रिदोष नाशित्वंच
तच्चतुर्विधं यथा श्वेतं पीतं
लोहितं नीलमभ्रं चातुर्विधं
वातिभिन्नं क्रियार्ह श्वेततारे
कांचनेपीत रक्तेनीलं व्याधि
व्याध मभ्रं गुणाढ्यं इति ॥
मदनविनोदः ॥
अभ्रकषः पुं वायुः इति ॥
पाणिनिः ॥
अभ्रपिशाचः पुं वाहुग्रहः ।
इति त्रिकांडशेषः ॥
अभ्रपिशाचकः ॥ वाहुग्रहः
इति हारावली ॥ (पुष्प
अभ्रपुष्पं क्ली जलं यथा अभ्र
मपि दितसति पीनं सार्थिना
विमुखतायदभाजीति नैषधं
अभ्रपुष्पः पुं वेतसवृक्षः ।
इत्यमरः ॥
अभ्रमः त्रि भ्रमरहितः अभ्रांतः
नास्ति भ्रमो यस्येति बहुव्रीहिः
अभ्रमा स्त्री स्त्री आकाशमांसीलता
इति राजनिर्घंटः ॥
अभ्रमातंगः पुं ऐरावतः
इंद्रहस्ती इत्यमरः ॥
अभ्रमाला स्त्री मेघश्रेणी ।
मेघसमूहः इति हलायुधः ॥
अभ्रमुः स्त्री ऐरावतस्त्री ॥
सा पूर्वदिग्हस्तिनी इत्यमरः
अभ्रमुप्रियः पुं ऐरावतहस्ती
इति हेमचंद्रः ॥
अभ्रमुवल्लभः पुं ऐरावतहस्ती
इत्यमरः ॥
अभ्ररोहं क्ली वैडूर्यमणिः इति
राजनिर्घंटः ॥
अभ्रवाटिकः पुं आम्रातकः
इति राजनिर्घंटः ॥
अभ्रांतः त्रि भ्रांतिशून्यः यथा
आशाः शिष्टा विहृष्टा ले नेषां
वाक्य मशेषाय मित्यत्र यतो
अभ्रांतवुद्धय इति चरकटीकाकारः
अभ्रिः स्त्री काष्टकुद्दालः नौका
मार्जनार्थ कुद्दालाकृति काष्ठं
इत्यमरः ॥
अभ्रियः त्रि अभ्रोद्भववस्तु तत्
पर्यायः मेघभवः २ इत्यमरः
अभ्री स्त्री काष्टकुद्दालः ॥

इत्यमरटीकायां भरतः ॥
अभ्रेषः पुं उचितः । न्यायः ॥
इत्यमरः ॥
अभ्रोत्थं क्ली वज्रं । इति ॥
त्रिकांडशेषः ॥
अमक रोगे । इति कविकल्पद्रुमः
अम० गतौ ॥ भजने शब्दे ।
इति कविकल्पद्रुमः ॥
अम् व्य शीघ्रता ॥ अल्प ॥ इति
व्याडिः ॥
अमं त्रि अपक्कफलादि । इति
शब्दरत्नावली ॥ रोगे पुं इति
मुग्धबोध व्याकरणं ॥
अमंगलः पुं एरंडवृक्षः । इति ।
शब्दचंद्रिका ॥
अमंगलः त्रि मंगलशून्यः ॥
अकुशलः । यथा अमंगलं ॥
रूप मिदं दधत् कथं । इति ॥
विद्वन्मोद तरंगिणी मंगलाभावे
क्ली । यथा अमंगलाभ्यास रति
विचिंत्यते । इति कुमारसंभवः ॥
अमंगल्यः त्रि अमंगलजनकः
यथा । अमंगल्य शीलं तवभवतु
नामैवमखिलं । इति पुष्पदंतः
अमंडः पुं एरंडवृक्षः । इत्यमरः
अमतः पुं रोगः मृत्युः ॥
कालः इत्युणादिकोषः
अमतिः पुं कालः ॥ चंद्रः ॥
इति मेदिनी दुष्टे त्रि । इति ॥
शब्दरत्नावली ॥
अमत्रं क्ली पात्रं । अस्य भाषा
अमिर्ति । इत्यमरः ॥
अमत्सरः पुं अन्यशुभद्वेषाभावः
अत्र नञ्समासः । मात्सर्यरहिते
त्रि । अत्र बहुव्रीहि समासः ॥
अमनिः स्त्री वर्त्म पंथाः ।
इत्युणादिकोषः ॥
अमंदः पुं वृक्षः । इति शब्दचंद्रिका
मंदभिन्ने त्रि । यथा ॥
भ्राम्यदमंद मंदर गिरि ग्रावाग्र
कंडूयना न्निद्रालोः कमठाकृते ।
भगवतः श्वासानिलाः पांतुवः
इति श्रीभागवते ॥
अममः पुं भाविजिनविशेषः
इति हेमचंद्रः ॥ ममताशून्ये
त्रि ॥
अमरः पुं देवः इत्यमरः ॥
कुलिशवृक्षः ॥ अस्थिसंहारवृक्षः
इति मेदिनी ॥ पारदः इति ॥
राजनिर्घंटः मृत्युरहिते त्रि
यथा । अजरामर वत् प्राज्ञो ।
विद्यामर्थंच चिंतयेत् इति ।
हितोपदेशः ॥
अमरजः पुं दुःखदिरवृक्षः इति

राजनिर्घंटः ॥
अमरदारुः पुं देवदारुवृक्षः
इतिराजनिर्घंटः ॥
अमरद्विजः पुं देवलब्राह्मणः
इतित्रिकांडशेषः ॥
अमरपुष्पकः पुं काशतृणं
केशपा इति भाषा । इति ॥
रत्नमाला ॥ (वृक्षः
अमरपुष्पिका स्त्री अधःपुष्पी
इतिरत्नमाला ॥
अमररत्नं क्ली स्फटिकः इति
राजनिर्घंटः ॥
अमरवल्लरी स्त्री आकाशवल्ली
इतिवैद्यकं ॥
अमरा स्त्री दूर्वा ॥ गुडूची ॥
इंद्रपुरी स्थूणा जरायुः ।
इतिमेदिनी इंद्रवारुणीवृक्षः
वटीवृक्षः महानीलीवृक्षः
गृहकन्या घृतकुमारी इति
ख्याता इति राजनिर्घंटः ॥
नाभिनाला । इतित्रिकांडशेषः
अमराद्रिः पुं सुमेरुः । इति ॥
जटाधरः ॥
अमरावती स्त्री इंद्रनगरी
इत्यमरः ॥
अमर्त्यः पुं देवता इत्यमरः ॥
अमर्त्यभुवनं क्ली स्वर्गः इति

हलायुधः ॥
अमर्षः पुं क्रोधः इत्यमरः
अमर्षणः त्रि क्रोधी इत्यमरः
अमलं क्ली अभ्रधातुः निर्मले
त्रि इतिमेदिनी ॥
अमला स्त्री लक्ष्मी इतिमेदिनी
सातलावृक्षः इतिराजनिर्घंटः
भूम्यामलकी इत्यमरः ॥
नाभिनाला इतित्रिकांडशेषः
अमसः पुं कालः निर्बोधः ॥
रोगः इत्युणादिकोषः ॥
अमा अव्य सहार्थे निकटे
इत्यमरः ॥
अमा स्त्री अमावस्या इति
त्रिकांडशेषः चंद्रमंडलस्य ॥
षोडशकला तथाच स्कंधपुराणीय
प्रभासखंडे । अमा षोडश ॥
भागेन देवि प्रोक्ता महाकला
संस्थिता परमा माया देहिनां
देहधारिणी अस्यार्थः चंद्र ॥
मंडलस्य षोडशभागेन परिमिता
आधारशक्तिरूपा तयोदय
रहितत्वात् नित्या सकृत्सूत्रवत्
सर्वानुस्यूता अमा नाम्नी महा
कलाप्रोक्ता इति रघुनंदनः
अमांसः त्रि दुर्बलः । इत्यमरः
अल्पमांसयुक्तः ॥ मांसरहितश्च

अमात्यः पुं मंत्री । इत्यमरः ॥
अमाननं क्ली अनादरः न्यक्कारः
इतिशब्दरत्नावली ॥
अमानस्यं क्ली दुःखं । पीडा
व्यथा तद्युक्ते त्रि इत्यमरः ॥
अमानस्यं आमानस्यमपि पाठः
अमान्यः त्रि अमाननीयः ॥
अनादृत्यः मान्यशब्दस्य नञ्
समासः ॥
अमामसी स्त्री अमावस्या ।
इत्यमरटीकायां रमानाथः ॥
अमामासी स्त्री अमावस्या ॥
इत्यमरटीकायां रमानाथः ॥
अमायिकः त्रि मायारहितः
माया विद्यते यस्य स मायिकः
ततो नञ्समासः ॥
अमावसी स्त्री अमावास्या ।
इतिशब्दरत्नावली ॥ (र्थिः
अमावस्या स्त्री कृष्णपक्षांततिथि
सा तु चंद्रमंडलस्य पंचदशकला
क्रियारूपा तत् क्रियोपलक्षितः
कालो वा इति तिथ्यादितत्वं ॥
सूर्याचंद्रमसोर्यः परः सन्निकर्षः
सामावास्या इति गोभिलः ॥ (परः
परः सन्निकर्षश्च अत्र उपर्यधोभावो
समसूत्रपात न्यायेन एक ॥
राशिप्रवेशेन महावस्थानरूपः

इतिरघुनंदनः तत्पर्यायः ॥
अमावास्या २ दर्शः ३ सूर्येन्दु
संगमः ४ इत्यमरः पंचदशी
५ इति स्मृतिः अमावसी ६
अमावासी ७ इतिशब्दरत्नावली
अमामसी ८ अमामासी ९
इत्यमरटीकायां रमानाथः
सा दृष्टेंदुकला सिनीवाली १०
नष्टेंदुकला च कुहूः ११ इत्यमरः
अमावासी स्त्री अमावस्या इति
शब्दरत्नावली ॥
अमावास्या स्त्री अमावसीतिथिः
इत्यमरः ॥
अमित्रः शत्रुः पुं इत्यमरः ॥
अमिषं क्ली लौकिकसुखं ॥
इत्युणादिकोषः छलाभावः
अमीनं त्रि रोगी । यथा अम्यर्थं
इतिबोपदेवः ॥
अमीवं क्ली पापं दुःखं यथा
त्वामहं भवभीतानां प्रपन्नानां
भयापहं । आपन्नक्लेशपापविनिर्मुक्तः
पादस्पर्शादमीवहन् ॥ इति
श्रीभागवते ॥
अमुकं त्रि बुद्धिस्थत्वोपलक्षित
तत्तद्धर्मावच्छिन्ने स्वस्वहानिविशेष
धर्म्मपुरस्कारेण तत्तद्दलवाचकं ॥
फलमा इति भाषा अदसशब्दस्य

अकिकृते सो रोत्राभावे
अको २ कारस्य उत्वे अमुक इति
भवति अमुक इत्यागामिकं इति
क्रमदीश्वरः यथा अमुकामुक
गोत्रे ततत्तुभ्यम त्रेस्वधानमः इति
श्राद्धतत्वे ॥
अमुक्त क्ली कुरिकाविशेषः
ह्यातकुरी इति भाषा । इति
हलायुधः मुक्तिरहितेअन्यक्तेच
त्रि ॥
अमुत्र व्य जन्मांतरे परलोकः
इत्यमरः ॥
अमुष्यपुत्रः पुंस्त्री प्रख्यात
वंशोद्भवः । कुलीनः । इति ॥
जटाधरः ॥ (तः
अमूर्तः त्रि मूर्तिभिन्नः मूर्तिरहि
यथा । सत्तानां अमूर्तत्वादिति
वोपदेव न्यायमते आकाश
कालः दिक् आत्मा ॥ एषां ॥
सामान्यगुणाः संख्या १ परिमितिः
२ पृथक्त्वं ३ संयोगः ४ विभागः
५ आकाशस्य विशेषगुणः शब्दः
काल दिशोर्विशेषगुणो नास्ति
आत्मनो विशेषगुणाः । बुद्धिः १
सुखं २ दुःखं ३ इच्छा ४ द्वेषः ५
यत्नः ६ भावनाख्यसंस्कारः ७ धर्मः
८ अधर्मः ९ इति भाषापरिच्छेदः

अमूदृशः त्रि एवंप्रकारः ॥
एतद्रूपः इति मुग्धबोधे यथा
अमूदृशी तत्कथं वेदिवर्गिणे
रितिनैषधे ॥
अमूलकं त्रि मूलरहितं ॥
प्रमाणशून्यं नास्ति मूलं यस्येति
बहुव्रीह्यर्थे कप्रत्ययः ॥
अमूला स्त्री अग्निशिखावृक्षः
इति शब्दचंद्रिका मूलरहिते त्रि
इति मुग्धबोधे ॥
अमृणालं क्ली वीरणमूले
इत्यमरः ॥
अमृत क्ली समुद्रोद्भव देव
भक्ष्यामरत्वजनक द्रव्य विशेषः
यदा पृथुराजभयेन पृथ्वी गौर्भूता
तदा देवा इंद्रः वत्सं कृत्वा ॥
हिरण्मय पात्रे अमृत रूपं पयो
ऽदुहन् तत्तु दुर्वाससः शापात्
समुद्रमध्ये गतं पश्चात् समुद्र
मथनेन अमृत पूर्ण कलसं गृहीत्वा
धन्वंतरिरुत्थितः इति भारत
भागवते ॥ तत्पर्यायः पीयूषं ।
२ सुधा ३ इत्यमरः ॥ पेयूषं ४
इति तट्टीका सारसुंदरी ॥ ९ ॥
जलं ॥ घृते यज्ञशेषद्रव्ये ॥
अयाचितवस्तु मुक्तिः इति
मेदिनी दुग्धे औषधे ॥

विषसामान्ये ॥ वत्सनाभः ॥
पारदः इति राजनिर्घंटः अन्ने
यज्ञे स्वर्णे भक्षणीयद्रव्ये ॥
लघु स्वादुद्रव्ये इति ॥
हेमचंद्रः ॥
अमृतः पुं धन्वंतरिः देवता ॥
इति मेदिनी वाराहीकंदः ॥
वनमुग्यः इति राजनिर्घंटः ॥
सुंदरः अतिरूपः ॥ इति ॥
भरतधृतव्याडिः मरणरहिते
त्रि । यथा अमृते जारजः कुंडः
इत्यमरः ॥
अमृतजटा स्त्री जटामांसी इति
राजनिर्घंटः ॥
अमृततरंगिणी स्त्री ज्योत्स्ना
इति राजनिर्घंटः ॥
अमृतदीधितिः पुं चंद्रः इति
शब्दरत्नावली ॥
अमृतफलं क्ली पुं पारेवतवृक्षे
पटोलः । इति राजनिर्घंटः ॥
अमृतफला स्त्री द्राक्षा आमल
की ॥ इति राजनिर्घंटः ॥
अमृतवल्ली स्त्री गुडूची इति
रत्नमाला ॥
अमृतरसा स्त्री कपिलद्राक्षा
इति राजनिर्घंटः ॥
अमृतसंभवा स्त्री गुडूची इति

राजनिर्घंटः ॥
अमृतसारजः पुं गुडः ॥
तवराजोद्भवखंडः ॥ इति ॥
राजनिर्घंटः ॥
अमृतसूः पुं चंद्रः इति ॥
हेमचंद्रः देवमातरि स्त्री ॥
अमृतानां देवानां सूः प्रसूतिः
अमृतसोदरः पुं घोटकः इति
राजनिर्घंटः ॥
अमृतस्रवा स्त्री रुदंतीवृक्षः
लताविशेषः तत्पर्य्यायः
हस्तारुहा २ उपवल्लिका ३ धनवल्ली
४ सितलता अस्या गुणाः ।
पथ्यात्वं ईषत्तिक्तत्वं रसायनत्वं
व्रणनाशित्वं । विषकुष्ठाम कामला
क्षयघ्न जय कारित्वं ॥ इति
राजनिर्घंटः ॥
अमृता स्त्री गुडूची मदिरा ॥
इंद्रवारुणी ज्योतिष्मती ॥
गोरक्षदुग्धा अतिविषा ॥
रक्तत्रिवृत् दूर्वा आमलकी
हरीतकी इति राजनिर्घंटः
तुलसी । इति शब्दरत्नावली पिप्पली
इति मेदिनी चेयादेशजस्थूल
मांसा हरीतकी सा विरोचनो
प्रशस्ता इति राजवल्लभः
अमृतान्धः[स] पुं देवता इत्यमरः ॥

अमृताफलः पुं पटोलः इति॥
द्रव्याभिधानं॥
अमृताशनः पुं देवता इति
हलायुधः
अमृतासंगं क्ली तुत्थविशेषः
तत्पर्य्यायः कर्परिकातुत्थं २
अंजनं ३ इतिहेमचंद्रः ॥
अमृताहरणः पुं गरुडः इति
हारावली ॥
अमृताह्वं क्ली लघुबिल्वफला
खोरासानदेशजनासपाती नाम
फलंतत् पर्य्यायः रुचिफलं
अस्यगुणाः गुरुत्ववातनाशित्वं
स्वादुत्वं अम्लत्वं रुचि शुक्र॥
कारित्वंच तल्लघुफलगुणाः हृ
द्यत्वं। सुस्वादुत्वं त्रिदोषनाशित्वंच
तन्मुद्गल देशे बहुलं लभ्यते
इतिभावप्रकाशः ॥
अमृतोत्पन्नः क्लीखर्परीतुत्थं
इतिराजनिर्घंटः ॥
अमृतोत्पन्ना स्त्री मक्षिका॥
इतिराजनिर्घंटः ॥

अमृतोद्भवं क्ली तुत्थं खर्परी॥
तुत्थं। इतिराजनिर्घंटः ॥
अमेधाः[स] पुं मूढः मूर्खः इति
हेमचंद्रः ॥

अमेध्यं क्ली पुरीषं इति ॥
शब्दरत्नावली अपवित्रे त्रि
अमोघः त्रि सफलः अव्यर्थः
इतिमेदिनी नदविशेष पुं ॥
इतिशब्दरत्नावली ॥
अमोघा स्त्री पाटलिवृक्षः
विडंगं इत्यमरः हरीतकी
इतिमेदिनी ॥
अम्ब गतौ इतिकविकल्पद्रुमः
अम्बकं क्ली नेत्रं इति हेमचंद्रः
ताम्रं इति राजनिर्घंटः ॥
अम्बरं क्ली वस्त्रं आकाशं ॥
कार्पासः स्वनामख्यातसुगंधिद्रव्यं
इतिविश्वः अभ्रधातुः इति
राजनिर्घंटः ॥
अम्बरिषं क्ली भर्जनपात्रं
भाजनाखोला इति भाषा ॥
इत्यमरटीकायां रमानाथः ॥
अम्बरीषं क्ली भ्राष्ट्रः भर्जनपात्रं
इत्यमरः युद्धं इति मेदिनी ॥
अम्बरीषः पुं विष्णुः शिवः
इतित्रिकांडशेषः किशोरः॥
भास्करः ॥ नृपभेदः सतु ॥
सूर्य्यवंशीयनाभागराज पुत्रः
नरकभेदः आम्रातकवृक्षः
अनुतापः इति मेदिनी ॥
अम्बष्ठः पुं देशविशेषः॥

विप्राद्वैश्यायामुत् पन्नः इति
मेदिनी अयंचिकित् साहृत्तिः
वैद्यइतिख्यातः इत्यमरटीकायां
भरतः हस्तिपकः यथा ॥
अम्बष्ठाम्बष्ठमार्गेणो देरूपक्रमे
माचिरं इति श्रीभागवते ॥
कायस्थ जाति विशेषः इति
पश्चिम देशे प्रसिद्धः ॥
अम्बष्ठकी स्त्री लताविशेषः
आकनादि निमुखीइतिभाषा
तत्पर्य्यायः पाठा २ अम्बष्ठा ३
कुवेली ४ पापचेलिका ५ एका
ष्ठीला ६ वरा ७ तिक्ता ८ प्राचीना ९
एकोशिका १० वृका ११ इति
रत्नमाला विद्धकर्णी १२ स्थापनी
१३ श्रेयसी १४ रसा १५ पापचेली
१६ वनतिक्तिका १७ इत्यमरः॥
अविद्धकर्णी १८ अविद्धकर्णी
इतितट्टीका अम्बष्ठिका २० यूथिका
२१ विद्धकर्णिका २२ दीपनी २३
तिक्तपुष्पा २४ बृहत्तिक्ता २५
शिशिरा २६ वृकी २७ मालती २८
देवी २९ बृहत्पर्णी ३० इति॥
राजनिर्घंटः अस्यागुणाः
अतीसार शमनत्वं लघुत्वं॥
त्रिदोष नाशित्वंच इति ॥
राजवल्लभः तिक्तत्वं गुरुत्वं।

उष्णत्वं। वातपित्तज्वरपित्तदाह
शूलनाशित्वं भग्नसंधानकारित्वंच
इतिराजनिर्घंटः ॥
अम्बष्ठा स्त्री क्षुपविशेषः अम्बाता
इतिख्याता। अस्याः पर्य्यायः।
बालिकाका २ वाला ३ शठाम्बा ४
अम्बालिका ५ अम्बिका ६ अम्बा ७
माचिका ८ दृढवल्का ९ मयूरिका १०
गंधपत्री ११ चित्रपुष्पी १२ श्रेयसी
१३ मुखवाचिका १४ छिन्नपत्री १५
भूरिमल्ली १६ अस्यागुणाः।
कषायत्वं अम्लत्वं कफकंठरोग
वातरोगबलाश नाशित्वं ॥
रुच्याग्निकारित्वंच इतिराजनिर्घंटः
॥२॥ पाठा चांगीरी यूथिका
इत्यमर मेदिनीकरौ ॥
अम्बाष्टका स्त्री अम्बष्ठा आकनादि
इतिभाषा इति राजनिर्घंटः ॥
ब्राह्मणी वामनहाटी इति प्रसिद्धा
इति रत्नमाला ॥
अम्बा स्त्री जननी इतिशब्दरत्नावली
नाट्योक्तौ सेव इत्यमरः ॥
पांडुराज मातुः स्वसा इति
महाभारते अम्बष्ठा इति
राजनिर्घंटः दुर्गा इति ॥
केचित् ॥
अम्बालिका स्त्री माता इति॥


शब्दरत्नावली अम्बष्टा इति
राजनिर्घंटः पांडुराजमाता
इतिमहाभारते ॥
अम्बिका स्त्री दुर्गा माता
धृतराष्ट्रजननी इति मेदिनी
जैनदेवीविशेषः इतिहेमचंद्रः
कटुकीवृक्षः इति शब्दचंद्रिका
अम्बष्टा इति राजनिर्घंटः ॥
अम्बिकेयः पुं गणेशः ॥
कार्त्तिकेयः धृतराष्ट्रराजः
अम्बिकायाअपत्यमित्यर्थेढक्
अम्बिकेयः पुं गणेशः ।
इतिजटाधरः ॥
अम्बु क्ली जले बालनामौषधिः
बालाइति भाषा इत्यमरः
अम्बुकंटकः पुं कुंभीरः इति
त्रिकांडशेषः ॥
अम्बुकिरातः कुंभीरः इति
त्रिकांडशेषः ॥
अम्बुकीशः पुं शिशुमारजंतुः
सुसुक इति भाषा इति ॥
हेमचंद्रः ॥
अम्बुकूर्म्मः पुं शिशुमारःइति
हेमचंद्रः ॥
अम्बुकेशरः पुं कोलिंगवृक्षः
इतिरत्नमाला ॥
अम्बुचामरं क्ली शैवालं ।
शेवाला इति भाषा इति
जटाधरः
अम्बुजं क्ली पद्मं इतिमेदिनी
वज्रे इति त्रिकांडशेषः ॥
अम्बुजः पुं हिज्जलवृक्षः
इत्यमरः ॥
अम्बुजन्म क्ली पद्मं इति
राजनिर्घंटः ॥
अम्बुतालः पुं शैवाले इति
त्रिकांडशेषः ॥
अम्बुदः पुं मेघः इति रत्नमाला
मुस्तकं यथा कणासविश्वानलदं
सहाम्बुदं इतिवैद्यकं ॥
अम्बुधिः पुं समुद्रः इति
शब्दरत्नावली ॥
अम्बुधिस्रवा स्त्री दृढकन्या
घृतकुमारी इतिख्याता इति
राजनिर्घंटः ॥
अम्बुपः पुं चक्रमर्दकवृक्षः इति
शब्दचंद्रिका ॥
अम्बुपत्रा स्त्री उच्चटावृक्षः इति
रत्नमाला ॥
अम्बुप्रसादः ॥ पुं कतक
वृक्षः ॥
निर्मली इतिख्यातः इति ॥
राजनिर्घंटः ॥
अम्बुप्रसादजं क्ली कतकवृक्षः

इतित्रिकांडशेषः ॥
अम्बुभृत् पुं मेघः मुस्तकं ॥
इत्यमरः समुद्रः इति
केचित् ॥
अम्बुमात्रजः पुं शम्बुकः शम्बु(क
इतिभाषा इतिहेमचंद्रः ॥
अम्बुरः पुं द्वाराधःकाष्ठं ॥
गोवराद इति भाषा इति ॥
हेमचंद्रः ॥
अम्बुरुहा स्त्री स्थलपद्मिनी इ(ति
राजनिर्घंटः ॥
अम्बुवासिनी स्त्री पाटलावृक्षः
इतिजटाधरः ॥
अम्बुवासी स्त्री पाटलावृक्षः
इति राजनिर्घंटः ॥
अम्बुवाहः पुं मेघः । इति
रत्नमाला मुस्तकं मेघनामा
इत्यमरेणैकत्वात् ॥
अम्बुवाहिनी स्त्री काष्ठाम्बुवाहि(नी
काष्ठादि कृत छिन्नाश्मनौकाकृति
जलसेचनी इत्यमरटीकायां ॥
मथुरानाथः ॥
अम्बुवेतसः पुं जलवेतसः ।
तत्पर्य्यायः परिव्याधः २ विडुलः
३ नादेयी ४ इत्यमरः ॥
अम्बुशिरीषिका स्त्री जलशिरीष
वृक्ष । तत्पर्य्यायः । शिरोषिका २
दिदिणिका ३ डुवला ४ वारि
शिरीषिका ५ अस्यागुणाः त्रिदोष
विषकुष्ठार्शोनाशित्वं । इति
भावप्रकाशः ॥
अम्बुसर्पिणी स्त्री जलौकाः जोंक
इतिभाषा इतित्रिकांडशेषः ॥
अम्बुसेचनी स्त्री अम्बुवाहिनी
नौकाजलसेचन पात्रे इत्यमरः
टीकायांमथुरानाथः ॥
अम्बुकृतं त्रिश्लेष्मकण निर्गम
सहितवाक्यं तत्पर्य्यायः ॥
सनिष्ठेवं २ इत्यमरः ॥
सथूत्कारः ३ इतिहेमचंद्रः ॥
अम्लः पुं अम्लरसः अम्बलटक
इतिच भाषा इत्युणादिकोषः
अम्भः स क्ली जलं बालनामौषधं
इत्यमरः लग्नादितश्चतुर्थ
राशिः इतिज्योतिषे ॥
अम्भःसारं क्ली मुक्ता इति ॥
राजनिर्घंटः अम्भस्सारमपिपाठः
अम्भःसूः पुं धूमः । इति ॥
हेमचंद्रः अम्भस्सूरितिचपाठः
अम्भोजं क्ली पद्मं इति ॥
शब्दरत्नावली सारसपक्षी ॥
पुष्कराह्व इत्यमरेणैकत्वात्
चंद्रे पुं यथा । पिबंत ॥
त्वन्मुखांभोजच्युतं हरिकथामृतं ॥



इति श्रीभागवते जलजाते
त्रि ॥
अम्भोजन्मजनिः पुं ब्रह्मा यथा
अम्भोजन्मजनि स्मरदन्तरगतो
वत्सान्नितो वत्सपान् इति
श्रीभागवते ॥
अम्भोजयोनिः पुं ब्रह्मा यथा।
सदनमुपगतोऽहं पूर्वमम्भोज
योनेरिति प्रबोधचन्द्रोदयः
अम्भोजिनी स्त्री पद्मलता ॥
पद्मसमूहः पद्मयुक्तदेशः इति
शब्दरत्नावली ॥
अम्भोदः पुं मेघः मुस्तकं
इति शब्दरत्नावली ॥
अम्भोधरः पुं मेघः मुस्तकं ॥
इतिशब्दरत्नावली ॥
अम्भोधिः पुं समुद्रः इति ॥
शब्दरत्नावली ॥
अम्भोधिवल्लभः पुं प्रवालः
इति राजनिर्घण्टः ॥
अम्भोनिधिः पुं समुद्रः इति
शब्दरत्नावली [illegible] पुं समुद्रः इति
अम्भोराशिः पुं समुद्रः इति
राजनिर्घण्टः
अम्भोरुहं क्ली पद्मं सारसपक्षी
इत्यमरः ॥
अम्मये त्रि जलविकारे फेनादि
। इत्यमरः ॥ जलमयेत्रि यथा
न ह्यम्मयानि तीर्थानि न देवा
मृच्छिलाः ते पुनन्त्युरुकालेन
दर्शनादेव साधवः ॥ इति
श्रीभागवते ॥
अम्रः पुं आम्रवृक्षः फले क्ली
इतिशब्दरत्नावली ॥
अम्रातः पुं आम्रातकवृक्षः
इतिशब्दमाला ॥
अम्रातकः पुं आम्रातकवृक्षः
इति त्रिकाण्डशेषः ॥
अम्लं क्ली तक्रं इतिराजनिर्घण्टः
अम्लः पुं षड्रसमध्ये रसविशेषः
टक इति भाषा तोयाग्निगुण
बाहुल्यादम्लः इति सुश्रुतः
अस्य गुणाः पाकवद्दोषकारित्वं
रुच्यत्वं रुच्याग्निकृत मांसकारित्वं
[illegible] नाशित्वं [illegible]
स्निग्धोष्णत्वं कटु रसतोऽधिकोष्ण
वीर्य्यत्वं जिह्वाद्वेगकारित्वंच
इतिराजवल्लभः अस्य दन्ताहर्ष
कारित्वं [illegible] विषत्वं
प्रीत्यग्निपटुता कारित्वं ॥
प्रयावनत्वं इति राजनिर्घण्टः
॥ ॥ तद्वति शाखभक्षणगुणाः
यावकत्वं पित्तश्लेष्मवातिक्लेद
कारित्वं लघुत्वं उष्णत्वं ॥

वह्निः प्रीतत्वं वायुनाशित्वंच
इतिराजवल्लभः भ्रांति तुष्टि
कफ पाण्डुदोष कार्ष्य कास
कारित्वं इति राजनिर्घण्टः ॥
तद्वति त्रि इत्यमरः ॥ ॥
अम्लवेतसः इतिराजनिर्घण्टः ॥
अम्लकः पुं लकुचवृक्षः इति
शब्दरत्नावली ॥
अम्लकाण्डं क्ली लवणतृणं इति
राजनिर्घण्टः
अम्लकेशरः पुं मातुलुङ्गः ॥
वीजपूरः । इति रत्नमाला ॥
अम्लचूडः पुं अम्लशाकः इति
राजनिर्घण्टः ॥ (ति
अम्लजम्बीरः पुं अम्लनिम्बूकः इ
राजनिर्घण्टः ॥
अम्लनायकः पुं अम्लवेतसः इति
राजनिर्घण्टः ॥
अम्लनिशा स्त्री शटी इति ॥
राजनिर्घण्टः ॥
अम्लपञ्चफलं अम्लरसयुक्तपञ्च
प्रकारफलं तद्यथा कोलं १
दाडिमं २ वृक्षाम्लं ३ चुक्रिका ४
अम्लवेतसं ५ मतान्तरे जम्बीर
१ नारंग २ अम्लवेतसं ॥ ३ ॥
तिन्तिडीकं ४ वीजपूरं ५ इति
राजनिर्घण्टः ॥
अम्लपत्रः पुं अश्मन्तकवृक्षः इति
राजनिर्घण्टः
अम्लपत्री स्त्री पलाशीलता
क्षुद्राम्लिका इति राजनिर्घण्टः
अम्लपूरं क्ली वृक्षाम्लं इति ॥
राजनिर्घण्टः ॥
अम्लफलं क्ली वृक्षाम्लं तेतुल
इति भाषा इतिराजनिर्घण्टः
अम्लफलः पुं आम्रवृक्षः इति
राजनिर्घण्टः ॥
अम्लभेदनः पुं अम्लवेतसः
इतिराजनिर्घण्टः ॥
अम्लरुहा स्त्री मालवदेशज
नागवल्लीभेदः अस्या गुणाः ।
सतीक्ष्णत्वं मधुरत्वं रुचिकारित्वं
हिमत्वं दाहनाशित्वं पित्तोद्रेक
हरत्वं अग्नि बल सुखामोद ॥
श्रीसौभाग्य विवर्द्धनत्वं । मद
कारित्वं अल्पाध्मान विबन्ध
नाशित्वंच इति राजनिर्घण्टः ॥
अम्ललोनिका स्त्री क्षुद्रवृक्षविशेषः
आमरूल इतिभाषा तत्पर्य्यायः
चांगेरी २ चुक्रिका ३ दन्तशठा ४
अम्बष्ठा ५ इत्यमरः अस्या गुणाः
कफवायुनाशित्वं अग्निदीपनत्वं
ग्रहणीरोगे हितकारित्वंच इति
राजवल्लभः वस्त्रादिलग्न लोह



विह्लकषायरागनाशकगुणाय्य
लि। राजनिर्घण्टोक्त गुणपर्य्यायो
क्षुद्राम्लिका शब्दे द्रष्टव्यौ ॥
अम्ललोणी स्त्री अम्ललोणिका
चांगेरी इत्यमरटीका ॥ (हल
अम्लवती स्त्री क्षुद्राम्लिकाग्राम
इतिभाषा इतिराजनिर्घण्टः ॥
अम्लवर्गः पुं अम्लगणः यथा
चांगेरी लकुचं अम्लवेतसं ॥
जंवीरकं वीजपूरकं ॥
नागरंगं दाडिमं कपित्थं ॥
अम्लं वीजाम्लकं ॥ अम्लष्ट ॥
करमर्दकं निम्बूकं इति ॥
राजनिर्घण्टः ॥ (कंद
अम्लवल्ली स्त्री त्रिपर्णिकानाम
विशेषः इतिराजनिर्घण्टः ॥
अम्लवाटिका स्त्री नागवल्लीभेदः
अस्यागुणाः कटुत्वं अम्लत्वं
तिक्तत्वं रूक्षत्वं उष्णत्वं मुखपाक
कारित्वं विदाहपित्त रक्तप्रकोप
कारित्वं विष्टम्भदातृत्वं वायु ॥
नाशित्वंच इतिराजनिर्घण्टः ॥
अम्लवास्तुकं क्ली चुक्रं । इति
राजनिर्घण्टः ॥
अम्लवीजं क्ली वृक्षाम्लं इति
राजनिर्घण्टः ॥
अम्लवृन्तं क्ली वृक्षाम्लेतन्तुल

इतिभाषा इतिराजनिर्घण्टः ॥
अम्लवेतसः पुं स्वनामप्रसिद्ध
वृक्षविशेषः चुकाशाक इतिख्यात
इति केचित् अम्लकचाई इति
ख्यात इति केचित् इत्यमर ॥
टीकायां भरतः तत्पर्य्यायः ॥
आम्लः २ वेधी ३ रसाम्लः ४
आम्लवेतसः ५ वेतसाम्लः ६
अम्लसारः ७ शतवेधी ८ वेधकः
९ भीमः १० भेदनः ११ भेदी १२
राजाम्लः १३ अम्लभेदनः १४
अम्लाङ्कुशः १५ रक्तसारः १६
फलाम्लः १७ अम्लनायकः १८
सहस्रवेधी १९ वीराम्लः २०
गुल्मकेतुः २१ वराभिधा २२
शंखद्रावी २३ मांसद्रावी २४ इति
राजनिर्घण्टः ॥ वराङ्गी २५ इति
रत्नमालाचुक्रः २६ इत्यमरः
तत्फलगुणाः अत्यम्लत्वं कषायत्वं
उष्णत्वं वायु कफार्शः श्रम गुल्म
नाशित्वं अरुचिहारित्वंच इति
राजनिर्घण्टः छागमांस लोह
सूचीद्रवकारित्वं चणकाम्लवत्गुण
कारित्वंच इतिभावप्रकाशः ॥
आनाहरोग नाशित्वं ॥
तत्पक्वफलगुणाः दोषविनाशित्वं
गुरुत्वं धारकत्वंच ॥ इति ॥

राजवल्लभः ॥
अम्लशाकं क्ली वृक्षाम्लं चुक्रं
इति राजनिर्घण्टः ॥
अम्लशाकः पुं अम्लद्रव्यविशेषः
तत्पर्य्यायः शाकाम्लं २ शुक्ताम्लं
३ अम्लचुक्रिका ४ विवाम्लं ५ आ
म्लचूडः ६ विवासारः ७ अस्यागुणाः
अतिशयाम्लत्वं वातनाशित्वं कफ
दाहहारित्वंच सम शर्करा ॥
मिश्रितस्यास्यगुणाः दाह पित्त
कफार्त्ति नाशित्वं । इति ॥
राजनिर्घण्टः ॥
अम्लसारः क्ली कांजिकं इति
राजनिर्घण्टः ॥ (कः
अम्लसारः पुं अम्लवेतसः निम्बू
हिन्तालः इतिराजनिर्घण्टः ॥
अम्लहरिद्रा स्त्री शटी इति
राजनिर्घण्टः ॥
अम्लाङ्कुशः पुं अम्लवेतसः इति
राजनिर्घण्टः ॥
अम्लातकः पुं अम्लानवृक्षः इति
राजनिर्घण्टः अस्य गुणपर्य्यायौ
राजतरुणीशब्दे ज्ञेयौ ॥ (ला
अम्लानः पुं महासहावृक्षः आय
इतिख्यातः इत्यमर भरतौ ॥
अम्लानः त्रि म्लानिरहितः ।
यथा अम्लान पंकजा माला

शिरस्युरसि चापरा । इति
देवीमाहात्म्ये ॥
अम्लानिनी स्त्री पद्मसमूहः पद्मिनी
इतित्रिकाण्डशेषः ॥
अम्लिका स्त्री तिन्तिडी इत्यमरः
पलाशीलता श्वेताम्लिका ॥
क्षुद्राम्लिका इतिराजनिर्घण्टः
अम्लोद्गारः इतिमेदिनी ॥
अम्लिकावटकः पुं अम्लिका
स्वेदयित्वाजलेन सहमर्दयित्वात्
संस्कृतजले मग्नवटकः अम्लवड़ा
इतिभाषा अस्यगुणाः रुच्याग्नि
कारित्वं वटकगुणतुल्यगुणत्वंच
इतिभावप्रकाशः ॥
अम्लीका स्त्री अम्लिका इत्यमर
टीकायां रायमुकुटः ॥
अम्लोटकः पुं अश्मलवृक्षः ।
अम्लकचाइतिख्यातः इति
रत्नमाला ॥
अय उ, यते इतिकविकल्पद्रुमः
अयः पुं शुभावहविधिः ॥
मंगलानुष्ठाने इत्यमरः ॥
अयः स क्ली लोहं इत्यमरः
अयनं क्ली शास्त्रं यथा ज्योतिषा
मयनं नेत्रं रुक्तं श्रोत्रमुच्यते
इति तिथ्यादितत्वे पन्थाः
सूर्य्यस्य उत्तर दक्षिण दिग्गमनं

तद्यथा माघादिषण्मासाः॥
उत्तरायणं श्रावणादिषण्मासाः
दक्षिणायनं इत्यमरः। गमने
गत्यर्थायधातोर्भावे अनट्
अयंत्रितः त्रि अवाधः अनर्गलः
इति हेमचंद्रः॥
अयस्कांतः पुं लोहविशेषः
कांतलोह इति ख्यातः तत्
पर्य्यायः कांत लोहं२कांतं३
लोहकांतकं४ कांतायसं५
ह्मललोहं६ महालोहं७
अस्य गुणाः तीक्ष्णत्वं उष्णत्वं रूक्षत्व
पांडुशोथकफपित्तहरत्वं।
रसायनत्वं अत्युत्तमत्वं च स च तु
भ्रामकः१ चुंबकः२ रोमकः३
स्वेदकः४ एते रसायने
उत्तरोत्तर गुणिनः क्रमेण दार्ढ्यांग
कांति कांतस्त्वनीरोगदायिनः
इति राजनिर्घंटः चुंबक
प्रस्तरोप्ययं॥
अयस्कारः पुं प्रजंघायाः।
जंघायभागः इति त्रिकांडशेषः
लोहकारः अयस्करोतीति
व्युत्पत्या॥
अयाः पुं अग्निः इत्युणादिकोषः
अयावकः त्रि यावकरहितः य
था यदि भवति तदा तां यावका

यावकेषु। इत्युद्भटः॥
अयाचितं त्रि याच्ञां विना लब्धवस्तु
अप्रार्थितं इत्यमरः शाहाये
मेदिनी॥
अयाचितः पुं मुनिविशेषः तत्
पर्य्यायः उपवर्षः हलभृतिः३
कृतकोटिः४ इति त्रिकांडशेषः
अयानं क्ली स्वभावः। इति॥
हारावली अगमनं गत्यर्थ
याधातोर्भावे अनट् ततो नञ्
समासः॥
अयि व्य प्रश्नः अनुनयः॥
संबोधने इति मेदिनी॥
अयुक्छदः पुं सप्तपर्णवृक्षः
इति हेमचंद्रः॥
अयुक्तं त्रि अमिश्रितं अनुचितं
यथायुक्तः यदिह प्रोक्तं॥
प्रमादेन भ्रमेण वा। इति
दुर्गादासः॥
अयुग्मछदः पुं विषमछदः
सप्तपर्णवृक्षः इत्यमरटीकायां
भरतः॥
अयुतं क्ली दशसहस्रसंख्या
१०००० दशहाजार इति भाषा
इति हेमचंद्रः॥
अयुतः त्रि अमिश्रितः अयुक्तः
यथा अष्टयुग्मावोऽयुतासिद्धिः

इति चरकटीका॥
अये व्य कोपः विषादः॥
संभ्रमः स्मरणं इति मेदिनी॥
संबोधनं। इति शब्दरत्नावली
अयोगः पुं विश्लेषः विधुरः॥
कूटः कठिनोद्यमः इति॥
मेदिनी वमन विरेचनादीनां
प्रतिलोम प्रवृत्तिरल्प प्रवृत्तिर्वा
यथायोगाः सम्यक् प्रवृत्तिः
स्यादितियोगातिवर्त्तनं अयोगः
प्रातिलोम्येन वाल्पं वा प्रवर्त्तने
इति वैद्यकं योगो ध्याने
तदभावः योगो भेषजे॥
तदभावश्च॥
अयोगवः त्रि वैश्यकन्यायां
शूद्रादुत्पन्नसंतानः॥ इति।
जटाधरः॥
अयोगुडः पुं लोहगुलिका।
यथा वरमाशीविषविषं क्वथितं
ताम्रमेव वा पीतमत्यग्निसंतप्तं
भक्षिता वाप्ययोगुडाः इति
चरकः॥
अयोग्रं क्ली मुषलं इत्यमरः
अयोघनः पुं एकीभूतलोह
पुंजः। हातुडी भाषा तत्
पर्य्यायः लोहकूटं २। इति
हेमचंद्रः॥

अयोध्या स्त्री श्रीरामनगरी
पश्चिमदेशे अवध् इति प्रसिद्धा
तत्पर्य्यायः साकेतं २ कोशला
३ इति हेमचंद्रः उत्तर॥
कोशला ४ इति त्रिकांडशेषः
युद्धायोग्ये त्रि॥
अयोमलं क्ली लोहमलं
लोहारेड इति भाषा। इति
राजनिर्घंटः तत्पर्य्यायः।
मंडूरं २ लोहकिट्टं ३ तस्य गुणाः
शतोर्द्धमुत्तमं किट्टं मध्यं चाशीति
वर्षिकं अधमं षष्टिवर्षीयं ततो
हीनं विषोपमं यल्लोहं यद्गुणं
प्रोक्तं तत् किट्टेचापितद्गुणं
इति वैद्यके॥
अरं क्ली शीघ्रे चक्रांगे।
चाकारपाकि इति भाषा शीघ्रगे
त्रि इति मेदिनी॥
अरः पुं जिनानां कालचक्रस्य
द्वादशांशः सतु अवसर्पिण्याः
षष्ठभागः॥ जिनानामष्टादश
तीर्थंकरः इति हेमचंद्रः॥
अरकः पुं शैवालं इति॥
हारावली पर्पटः इति॥
राजनिर्घंटः
अरग्वधः पुं आरग्वधावृक्षः
सौंदालि इति ख्यातः इत्यमरः

टीकायांभरतः ॥
अरघट्टः पुं महाकूपः इत्यमर जटाधरौ ॥
अरघट्टकः पुं महाकूपः तत्पर्य्यायः पादावर्त्तः २ इति हेमचंद्रः ॥
अरजाः स्त्री कन्या कुमारी इतिहेमचंद्रः रजोगुण ॥ रहिते त्रि ॥
अरडुः पुं अरलुवृक्षः ॥ इत्यमरटीकायां रायमुकुटः
अरणिः पुं गणिकारिकावृक्षः इतिमेदिनी सूर्य्यः इति ॥ काशीखंडे ॥
अरणिः पुं स्त्री निर्मंथ्यदारु अग्निसाधनी भूतकाष्ठं घर्षणाद्वाग्निजनककाष्ठं इत्यमर ॥
अरणी स्त्री अरणिः इत्यमर टीकायां भरतः ॥
अरणीकेतुः पुं अग्निमंथवृक्षः इति राजनिर्घंटः ॥
अरण्यं क्ली वने इत्यमरः ॥
अरण्यः पुं कटफलवृक्षः इति शब्दचंद्रिका ॥
अरण्यकदली स्त्री गिरिकदली इतिराजनिर्घंटः ॥
अरण्यकार्पासी स्त्री वनकार्पासी तत्पर्य्यायः वनजा १ भारद्वाजी २ वनोद्भवा ३ अस्यागुणाः हिमत्वं रुक्षत्वं व्रणशस्त्रक्षत नाशित्वंच इतिराजनिर्घंटः
अरण्यकुलत्थिका स्त्री कुलत्था वनकुलथी इति भाषा इति राजनिर्घंटः ॥
अरण्यकुसुंभः पुं वनकुसुंभः तत्पर्य्यायः कौसुंभः २ अग्निसंभवः ३ अस्यगुणाः पाकेकटुत्वं श्लेष्मघ्नीप्रित्वं अग्निवृद्धिकारित्वंच इतिरानिर्घंटः ॥
अरण्यचोल्ली स्त्री वनचोल्ली यत्रशाकविशेषः । इति राजनिर्घंटः ॥
अरण्यचटकः पुं वनचटकः तत्पर्य्यायः धूसरः २ भूमिशयः ३ अस्यगुणाः शीतत्वं लघुत्वं शुक्रवृद्धिकारित्वं वलप्रदत्वंच इतिराजनिर्घंटः
अरण्यजार्द्रका स्त्री वनार्द्रका वनआदा इति भाषा । इति ॥ राजनिर्घंटः अस्य गुणपर्य्यायौ ऐंद्रशब्दे द्रष्टव्यौ ॥
अरण्यजीवः पुं वनजीवः वनजीरा इति भाषा इति राजनिर्घंटः ॥

अरण्यधान्यं क्ली नीवारः ॥ उडीधान इति भाषा इति राजनिर्घंटः
अरण्यमल्लिका देशः ऊँशा इति भाषा इतिशब्दरत्नावली
अरण्यमुद्गः पुं मकुष्ठकः वनमुग इतिभाषा इतिराजनिर्घंटः ॥
अरण्यवायसः पुं द्रोणकाकः डाँडकाक इति भाषा इति राजनिर्घंटः ॥
अरण्यवासिनी स्त्री अत्यम्लपर्णी इतिराजनिर्घंटः ॥
अरण्यवालुकः पुं वनवालुकः वनवेतो इति भाषा इति ॥ राजनिर्घंटः अस्यगुणपर्य्यायौ कुणंजरशब्दे द्रष्टव्यौ
अरण्यशालिः पुं नीवारः वनधान्यं इति राजनिर्घंटः
अरण्यशूरणः पुं वनशूरणः वनसूल इति भाषा इति ॥ राजनिर्घंटः ॥
अरण्यश्वा पुं वृकः नेकड़ावाघ इतिभाषा इतिहेमचंद्रः ॥
अरण्यानी स्त्री महावनं । इत्यमरः ॥
अरतित्रपः पुं स्त्री कुक्कुरः इति त्रिकांडशेष रत्यलज्जे त्रि
अरतिः पुं क्रोधः इत्युणादि कोषः ॥
अरतिः स्त्री अनवस्थितचित्तत्वे इतिरक्षितः क्रीडाभावः इतिकार्त्तिकः रतिविरहः रतिशून्ये त्रि ॥
अरत्निः पुं विस्तृत कनिष्ठांगुलि मुष्टिकहस्तः कूर्परः इति मेदिनी ॥
अरमः त्रि अधमः । इत्यमरटीकासारसुंदरी ॥
अररं त्रि कवाटं इत्यमरः करीरकोषः आच्छादने इति विश्वः ॥
अररिः पुं क्ली कपाटं इति हेमचंद्रः ॥
अररुः पुं शत्रुः । इति सिद्धांत कौमुद्यां उणादिवृत्तिः ॥
अररे च त्वरान्वितसंबुद्धिः शीघ्रसंबोधने इति शब्दरत्नावली
अरलुः पुं श्योनाकवृक्षः । शोनागाछ इति भाषा ॥ इत्यमरः ॥
अरविंदं क्ली पद्मं सारसयती इत्यमरः ताम्रे रक्तकमले नीलोत्पले इतिराजनिर्घंटः
अरविंदिनी स्त्री नलिनी इति



शब्दरत्नावली पद्मसमूहः पद्माकरः इति रत्नमाला ॥

अरसिकः त्रि अरसज्ञः अविदग्धः यथा अरसिकेषु रसस्य निवेदनं शिरसि मालिख मालिख मालिख इत्युद्भटः ॥

अराजकः त्रि राजशून्यदेशादिः यथा। चौरप्रायं जनपदं ॥ हीनसत्व मराजकं ॥ इति श्रीभागवतं ॥

अरातिः पुं शत्रुः इत्यमरः ॥

अरालं त्रि कुटिलं वक्रं ॥ इत्यमरः ॥

अरालः पुं सर्ज्जरसः मत्तहस्ती इति मेदिनी वक्रहस्तः इति शब्दरत्नावली ॥

अराला स्त्री असम्प्रा कुलटा इति शब्दरत्नावली ॥

अरिः पुं शत्रुः। इत्यमरः ॥ चक्रं। इति त्रिकाण्डशेषः ॥ खदिरभेदः। तत्पर्य्यायः ॥ सैद्धानिका १ दाली २ खदिरपत्रि ४ अस्यगुणाः कषायत्वं कटुत्वं तिक्तत्वं। रक्तातिपित्तनाशित्वञ्च इति राजनिर्घण्टः ॥

अरित्रं स्त्री कर्णः छालि इति भाषा तत्पर्य्यायः केनिपातकः २ इत्यमरः केनिपातः ३ इति भरतः ॥

अरिंदमः त्रि शत्रुदमनकारकः इति मुग्धबोध व्याकरणं

अरिमर्दः पुं कासमर्दवृक्षः इति राजनिर्घण्टः ॥

अरिमेदः पुं वृक्षविशेषः गुह्येयावावला इति भाषा तत्पर्य्यायः इरिमेदः २ रिमेदः ३ गोधास्कन्धः ४ अरिमेदकः ५ अहिमारः ६ पूतिमेदः ७ अहिमेदकः ८ विट्खदिरः ९ अस्य गुणाः कषायत्वं उष्णत्वं तिक्तत्वं भूतविनाशित्वं शोथातिसार कासविषवैसर्प नाशित्वञ्च इति राजनिर्घण्टः ॥

अरिष्टं स्त्री सूतिकागृहं ॥ अशुभं तक्रं मरणचिह्नं ॥ शुभं इति मेदिनी ॥ उपद्रवः तत्पर्य्यायः उपलिङ्गः ३ उपसर्गः ४ अजन्यं ५ ईतिः ६ उत्पातः ७ इति हेमचन्द्रः ॥

अरिष्टः पुं लशुनः निम्बः फेनिलवृक्षः काकः कङ्कपक्षी इति मेदिनी ॥ वृषभासुरः । इत्यनेकार्थध्वनिमञ्जरी मद्य विशेषः इन्द्रविकारसहितामद्य

चित्रक दंती पिप्पल्यादि भूरि भेषजक्वाथादिसंस्कारवान् अरिष्ट इतिधीयते इति सूक्ततटीका॥ अस्यगुणाः। अरुचि शोथ ग्रहणी कफरोगनाशित्वं इतिराजवल्लभः

अरिष्टकः पुं फेनिलवृक्षः। रीठाकरंज इतिख्यातः इति शब्दरत्नावली अरिष्टशब्दार्थपत्रे

अरिष्टतातिः त्रि क्षेमंकरः॥ शुभंकरः इति भूरिप्रयोगः॥

अरिष्टदुष्टधीः त्रि आसन्नमरण। सूचितलक्षणेन दूषितबुद्धिः मरणकुक्कुटबुद्धियुक्तः तत्पर्य्यायः विवशः २ इत्यमरः ॥

अरिनेमिः पुं जिनानामवन् विंशत्यन्त गतद्वाविंशतितीर्थकरः। इतिहेमचन्द्रः ॥

अरिष्टसूदनः पुं विष्णु इति॥ त्रिकाण्डशेषः शुभाशुभनाशके त्रि ॥

अरिष्टा स्त्री कटुका कटकी इति भाषा स्त्री कंडुका इतिराजनिर्घण्टः

स
अरुः पुं सूर्य्यः इत्युणादिकोषः रक्तखदिरः इतिराजनिर्घण्टः ॥

स
अरुः पुं स्त्री व्रणे क्षते इत्यमरः ॥

स
अरुः व मर्म्म संधिस्थाने इत्युणादिकोषः ॥

अरुचिः पुं रोगभेदः सच सत्यभिलाषेऽभ्यवहारासामर्थ्यरूपः इतिरक्षितः तत्पर्य्यायः अरोचकः २ अश्रद्धा ३ अनभिलाषः ४ इतिराजनिर्घण्टः ॥

अरुजः पुं आरग्वधवृक्षः सोंदालि इतिभाषा। इति राजनिर्घण्टः ॥

अरुणं क्ली कुंकुम सिंदूर॥ इतिराजनिर्घण्टः ॥

अरुणः पुं सूर्य्यसारथिः सतु विनतापुत्रः गरुडज्येष्ठभ्राताच तत्पर्य्यायः सूरसूतः २ अनूरुः ३ काश्यपिः ४ गरुडाग्रजः ५ सूर्य्यः॥ अर्कवृक्षः अव्यक्तरागः ईषद्रक्तवर्णः इत्यमरः संध्यारागः शब्दरहितः कपिलवर्णः ॥ कुष्ठभेदः अरुणगुणविशिष्टेतु वाच्यलिङ्गः इति मेदिनी ॥ पुन्नागवृक्षः गुडः इति राजनिर्घण्टः ॥

अरुणकमलं क्ली रक्तोत्पलं इतिराजनिर्घण्टः ॥

अरुणलोचनः पुं पारावतः



इतिराजनिर्घंटः ॥
अरुणसारथिः पुं सूर्यः इति
हेमचंद्रः ॥
अरुणा स्त्री अतिविषा श्यामा ॥
मंजिष्ठा त्रिवृत् इति मेदिनी ॥
इंद्रवारुणी गुंजा इति ॥
राजनिर्घंटः मुंडितिका इति
रत्नमाला ॥
अरुणात्मजः पुं जटायुपक्षी
इतित्रिकांडशेषः ॥
अरुणावरजः पुं गरुडः इति
हेमचंद्रः ॥
अरुणोदयः सूर्योदयात्पूर्व
मुहूर्त्तद्वयकालः यथावतस्यैव
टिकाः प्रातररुणोदय उत्थाने यतीनां
स्नानकालोपि गंगांभः सदृशः स्मृतः
इतिब्रह्मवैवर्त्तपुराणे ॥
अरुणोपलः पुं रक्तवर्णमणि
विशेषः चुनी इति भाषा तत्
पर्य्यायः पद्मरागः लोहितकः
२ लक्ष्मीपुष्पः ४ इतिहेमचंद्रः
अरुंतुदः त्रि मर्म्मपीडकः ततः
पर्य्यायः मर्म्मस्पृक् २ इत्यमरः
अरुंधती स्त्री वसिष्ठपत्नी ॥
तत्पर्य्यायः अक्षमाला २ इति
हेमचंद्रः साकर्द्दममुनिकन्या
महासाध्वी इति श्रीभागवते ॥

आकाशे सप्तर्षिमध्यवशिष्ठसन्निधौ
तस्या उदयः गता पुष्यस्नानयक्षंपति
सप्तपदीगमनानंतरं जामाता
मंत्रपाठयन् वधूं तां दर्शयतिव
अरुंधतीजानिः पुं वसिष्ठमुनिः
इतिहेमचंद्रः ॥
अरुंधतीनाथः पुं वशिष्ठमुनिः
इति त्रिकांडशेषः ॥
अरुष्कः पुं भल्लातकवृक्षः इति
शब्दरत्नावली ॥
अरुष्कं क्ली भल्लातकफले
इति हेमचंद्रः ॥
अरुष्करः पुं भल्लातकवृक्षः
इतिशब्दरत्नावली ॥
अरुष्करः त्रि व्रणकरः व्रतकारकः
इतिमेदिनी ॥
अरुहा स्त्री भूधात्री भूम्यामलकी
इतिख्याता इति राजनिर्घंटः
अरूपः त्रि रूपशून्यः यथा
अरूपवातातीतासारदाविवारुणं
इतिरचितः कुत्सितरूपः
यथा अरूपहार्य्यं किमतःपरं
भवेदिति कालिदासः ॥
अरुषः पुं सर्पविशेषः ॥
इत्युणादिकोषः सूर्यः इति
सिद्धांतकौमुद्यां उणादिवृत्तिः
अरे व्य नीचसंबोधने तुरे ॥

इतिभाषा इति हेमचंद्रः ॥
अरेपाकृतिः असूया । इति ॥
मेदिनी ॥
अरेरे व्य अधमसम्बोधने इति
जटाधरः सक्रोधाह्वाने । इति
शब्दमाला ॥
अरोकः त्रि निष्प्रभः ॥
दीप्तिरहितः इत्यमरः ॥
रोकश्छिद्रस्तद्रहितश्च ॥
अरोचकः पुं रोगविशेषः ॥
अरुचिरोग इति भाषा ॥
तस्यनिदान रूपं वातादिभिः
शोकभयातिलोभक्रोधैर्मनो ॥
घ्राणाशनरूपगंधैः । अरोचकाःस्युः
परिहृष्टदन्तः कषायवक्त्रोऽस्य
मतोऽनिलेन कट्वम्लमुखे
विरसंच पूतिपित्तेनविद्यालवणं
वक्त्रं माधुर्य्यपैच्छिल्यगुरुत्वशैत्य
विबद्धसम्बद्धयुतंकफेन इति ॥
माधवकरः ॥
अर्कक तापस्तुतौ इति ॥
कविकल्पद्रुमः ॥
अर्कः पुं सूर्य्यः इंद्रः ताम्रं ॥
स्फटिकः इति मेदिनी पंडितः ॥
इतिशब्दरत्नावली ज्येष्ठभ्राता ।
इति दंडादिनाथः लक्ष्मणया ॥
रविवारः इति ज्योतिष हेत्व ॥

विशेषः आकंद इतिभाषा तत्
पर्य्यायः क्षीरदलः २ पुच्छी ३
प्रतापः ४ क्षीरकांडकः ५ विक्षीरः
६ क्षीरी ७ खर्जुघ्नः ८ शीतपुष्पकः
९ जम्भनः १० क्षीरपर्णी ११ विकीरणः
१२ सदापुष्पः १३ सूर्य्याह्वः १४
आस्फोतकः १५ तूलफलः १६
शुकफलः १७ इति राजनिर्घंटः
वसुकः १८ आस्फोतः १९
गणरूपः २० मंदारः २१ अर्कपर्णः
२२ इत्यमरः ॥ ० ॥ अथश्वेतार्क
पर्य्यायः । अलर्कः १ राजार्कः २
प्रतापसः ३ गणरूपी ४ ॥ ० ॥
अथरक्तार्कपर्य्यायः विम्बारः १
सदापुष्पी २ रूपिका ३ आदित्य
पुष्पिका ४ दिव्यपुष्पिका ५ अर्कः ६
इतिरत्नमाला अस्यगुणाः ।
कटुत्वं उष्णत्वं अग्निकारित्वं
वातशोथव्रणअर्शकुष्ठ क्रिमि
नाशित्वंच इति राजनिर्घंटः
कफदोषनाशित्वं तीक्ष्णत्वंच
अस्यक्षीरगुणाः क्रिमिदोषव्रण
नाशित्वं कुष्ठार्शउदररोगेषुहित
कारित्वंच इतिराजवल्लभः ॥
अर्ककांता स्त्री आदित्यभक्ता ।
हुडहुडिया इतिख्याता इति
राजनिर्घंटः ॥

अर्कवंदनं क्ली रक्तचंदनं इति
राजनिर्घंटः
अर्कजौ पुं अश्विनीकुमारौ
नित्यद्विवचनांत शब्दोयं इति
हेमचंद्रः॥
अर्कतनयः पुं कर्णराजः इति
हेमचंद्रः॥ वैवस्वतमनु॥
तपत्याच स्त्री इति महाभारते
अर्कनंदनः पुं अर्कतनयः इति
त्रिकांडशेषः॥
अर्कपत्रः पुं आदित्यपत्रवृक्षः
इतिराजनिर्घंटः॥
अर्कपत्रा स्त्री वृक्षविशेषः।
ईश्वरमूल इति भाषा तत्॥
पर्य्यायः सुनंदा अर्कमूला २
विषापहा ४ इतिरत्नमाला॥
अर्कपर्णः पुं अर्कवृक्षः आकंद
इतिख्यातः इत्यमरः॥
अर्कपादपः पुं निम्ववृक्षः इति
त्रिकांडशेषः॥
अर्कपुष्पिका स्त्री वृक्षभेदः। ता
अर्कहूली हूलीपुष्प इतिख्या
तत्पर्य्यायः पयस्या २ सूर्य्यवल्ली
इ क्षितपर्णी ४ इतिरत्नमाला
अर्कपुष्पी स्त्री कुट्टम्बिनीवृक्षः
इतिभावप्रकाशः॥

अर्कप्रिया स्त्री जवा इति॥
राजनिर्घंटः॥
अर्कबंधुः पुं गौतमः सच
इक्ष्वाकु कुलोद्भवशाक्यवंशीय
बुद्धः इत्यमरः॥
अर्कबांधवः पुं अर्कबंधुः इति
अर्कभक्ता स्त्री आदित्यभक्तावृक्षः
हुरहुडिया इतिख्याता इति
राजनिर्घंटः॥
अर्कमूला स्त्री अर्कपत्रा॥
ईश्वरमूल इति भाषा इति॥
रत्नमाला॥
अर्करेतोजः पुं सूर्य्यपुत्रविशेषः
तत्पर्य्यायः रेवन्तः २ स्त्रवगः ३
हयवाहनः ४ इतिहेमचंद्रः॥
अर्कवल्लभः पुं बंधूकवृक्षः
इतिराजनिर्घंटः॥
अर्कवेधं क्ली तालीशपत्रे इति
राजनिर्घंटः॥
अर्कव्रतं क्ली आरोग्यसम्पादि
सूर्य्यव्रतं इतिस्मृतिः सूर्य्यस्य
जलशोषण वत्प्रजाकर ग्रहणे
यथा अष्टौमासान् यथादित्य
स्तोयं हरति रश्मिभिः तथा
हरेत् करान्वाष्ट्रान्नित्य मर्कव्रतं
हितत् इति मनुः॥

अर्कसूनु पुं यमः। इति
हेमचंद्रः॥
अर्कसोदरः पुं परावतहस्ती
इतिहेमचंद्रः॥
अर्कहिता स्त्री आदित्यभक्तावृक्षः
हुरहुडिया इतिख्याता इति
राजनिर्घंटः॥
अर्कश्मा ने अरुणोपलः॥
सूर्य्यकांतमणि रितियावत् इति
हलायुधः॥
अर्काह्वः पुं अर्कवृक्षः आकंद
इति भाषा इत्यमरः॥
अर्कोपलः पुं सूर्य्यकांतमणिः
इतिराजनिर्घंटः॥
अर्गलं क्ली स्त्री कपाटवंधककाष्ठ
विशेषः। हुडकातसला इत्यादि
भाषा इत्यमरः कल्लोले त्रि।
इति मेदिनी॥
अर्गलिका स्त्री अर्पागलाखिल
इतिभाषा इति हेमचंद्रः॥
अर्घ मूल्ये इति कविकल्पद्रुमः
अर्घः पुं मूल्यं पूजाविधिः
इत्यमरः अयं शाहसामगानां
सर्वत्राभिलापे सयकारेणपुंस्क
लिंगेनैव प्रयोज्यः अन्यवैदि
निर्यकारः पुं लिंगेनप्रयोज्यः
इतिश्राह्रतत्वे॥

अर्घीशः पुं शिवः। इति॥
शाहरत्नावली॥
अर्घ्य त्रि पूजनयोग्य। पूज्य
इति मेदिनी अर्घार्थं तत्तु
पूजार्थद्रव्यान्तनचंदनपुष्पमिश्रित
वारि इत्यमरः॥ अर्घार्थजलं
इतिकेचित् इति तट्टीकायां
भरतः तत्तु सामान्य विशेष
भेदेनद्विविधं तत्राद्यस्यक्रमः
स्ववामे त्रिकोण वृत्त भूविम्ब
विलिख्याधार शक्तिं पूजयित्वा
अस्त्रमंत्रेणपात्रंप्रक्षाल्य मंत्रेण
जलेनापूर्य्याकुश मुद्रया मंत्रेण
सूर्य्यमंडलात्तीर्थमावाह्य प्रणवेण
गंधपुष्पाभ्यां संपूज्य धेनुमुद्रां
प्रदर्श्यप्रणवमष्टधादशधावाजपेत्
अन्यस्यक्रमः स्ववामेत्रिकोणं
मंडलं कृत्वा तत्रत्रिपदिकामरोप्य
अस्त्रेण शंखं प्रक्षाल्य तदुपरि
संस्थाप्य मंत्रेण गंधपुष्पाक्षत
दूर्वादि तत्रमि: क्षिप्यविमलजलेन
विलोममात्रकयामूलेनचपूरयेत्
तत्रत्रिपदिकायां वह्निमंडलपूजा
शंखेवसूर्य्यमंडल पूजा जलेसोम
मंडलपूजततो मंत्रेणांकुश॥
मुद्रया सूर्य्य मंडलात्तीर्थ मावाह्य
मंत्रेणास्त्रस्यदयाद्देवतां तत्रावाह्य

ऋच्चमंत्रेणावगुण्ठ्य स्वमस्त्रेण गा
लिनी मुद्रां प्रदर्श्य मंत्रेण तज्जलं वीक्ष्य
अंगमंत्रः सकलीकृत्य गंध ॥
पुष्पाभ्यां देवतां संपूज्य ॥
तदुपरि मत्स्य मुद्रयाच्छाद्य मूल
मंत्र मष्टधा जप्त्वा धेनुमुद्रां ॥
प्रदर्शास्त्रेण संरक्ष्य तस्मात् ॥
किंचित् जलं प्रोक्षणी पात्रे ॥
निःक्षिपेत् इति तंत्रसारः ॥
अर्च्ची स्त्री जरत्कारुमुनितयो
वन तरुद्भूत मधु तस्यगुणाः
वक्त्रायुर्हितकारित्वं आमवात
कफपित्त नाशित्वंच । इति
राजवल्लभः ॥
अर्च्च ज पूजे इति
कविकल्पद्रुमः ॥
अर्च्चक पूजे । इति ॥
कविकल्पद्रुमः ॥
अर्च्चकः त्रि पूजकः अर्च्चनाकारकः
यथा अर्च्चकस्य तपोयोगात् ॥
अर्च्चनस्यातिशायनात् । आभिः
रूप्याच्च विम्बानां देवः सान्निध्य
मृच्छति इति तिथ्यादितत्वं ॥
अर्च्चनं स्त्री पूजनं यथा यनथा
कुर्यान्नित्यं गुरु देवद्विजार्च्चनं
इति राजवल्लभः पूजाद्रव्ये त्रि
यथा अर्च्चकस्य तपोयोगात् ॥

अर्च्चनस्यातिशायनात् । इति ॥
तिथ्यादितत्वं ॥
अर्च्चना स्त्री पूजा इति जटाधरः
गुरु देव द्विजानां नित्यार्च्चना
गुणाः स्वर्ग यश आयुर्धनधान्य
कारित्वं अलक्ष्मी पाप नाशित्वं
इति राजवल्लभः ॥
अर्च्चा स्त्री पूजा प्रतिमा इति
मेदिनी ॥
अर्च्चिः स्त्री अग्नि शिखा इति
सिद्धांतकौमुद्या मुणादि वृत्तिः
अर्च्चिः स स्त्री क्ली अग्निशिखा
किरणं इत्यमरः दीप्तिः
इत्युणादि कोषः अयं शब्दः सांत
इदंतश्च ॥
अर्च्चितः त्रि पूजित इत्यमरः
अर्च्चिष्मान् पुं अग्निः इति ॥
हेमचंद्रः ॥ सूर्यः अर्च्चिः शब्दात्
अतिशये मत् प्रत्ययः ॥
अर्च्च्यः त्रि अर्च्चनीयः पूज्यः
इति हेमचंद्रः ॥
अर्ज्जक क संस्कारे इति
कविकल्पद्रुमः ॥
अर्ज्ज अर्ज्जने इति ॥
कविकल्पद्रुमः ॥
अर्ज्जकः पुं श्वेतपर्णासवाउर

इतिभाषा तत्पर्य्यायः ।
श्वेतकुटः २ गंधपत्रं ३ पाताल ४
कुठेरकः ५ । इति शब्दचंद्रिका
वर्वरीभेदः आजवलाइ इति
पश्चिमदेशख्यातः तत्पर्य्यायः
तुङ्गतुलसी २ तुङ्गपर्णाः ३
मुखार्ज्जः ४ उग्रगंधः ५ जंवीरः ६
कुठेरः ७ कठिंजरः ८ अस्यगुणाः
कटुत्वं उष्णत्वं कफवातामय
नेत्ररोग नाशित्वं रुचिकारित्वं
सुखप्रसव कारकत्वंच इति
राजनिर्घंटः सामान्यतुलसी
इति रत्नमाला ॥
अर्ज्जकः त्रि उपार्ज्जन कर्त्ता यथा
अत एव वशिष्ठेन ज्येष्ठस्यांशद्वय
मभिधायार्ज्जकस्यांशद्वयमभिहितं
इति दायभागः ॥
अर्ज्जनं स्त्री उपार्ज्जनं स्वत्वहेतु
भूतो व्यापारः यथा अर्ज्जनं ॥
स्वत्वहेतु भूतो व्यापारः अर्ज्जने
स्वत्वं नायातीति विप्रतिषिद्ध
मिति दायभागः ॥
अर्ज्जुनं क्ली तृणं नेत्ररोगः
इति विश्वमेदिन्यौ तस्य लक्षणं
एकोयः शशरुधिरोपमस्तु विंदुः
शुक्लस्याभवति तदर्ज्जुनं वदेत्ति
इति माधवकरः ॥

अर्ज्जुनः पुं पांडुराजस्य तृतीय
पुत्रः स इंद्रात् कुंतीगर्भे जातः
तत्पर्य्यायः फाल्गुनः २ जिष्णुः
३ किरीटी ४ श्वेतवाहनः ५
बीभत्सुः ६ विजयः ७ कृष्णः ८
सव्यसाची ९ धनंजयः १० इति
विराटपर्व पार्थः ११ शक्रनंदः
१२ गांडीवी १३ मध्यमपांडवः
१४ श्वेतवाजी १५ कपिध्वजः १६
राधाभेदी १७ सुभद्रेशः १८
गुडाकेशः १९ बृहन्नलः २०
इति जटाधरः ऐंद्रिः २१ इति
भूरिप्रयोगः स्वनामख्यात ॥
वृक्षविशेषः आजन इति भाषा
तत्पर्य्यायः नदीसर्ज्जः २ वीरतरुः
इंद्रद्रुः ४ ककुभः ५ इत्यमरः
अम्बरः ६ पार्थः ७ चित्रयोधी ८
धनंजयः ९ वैरांतकः १० किरीटी
११ गांडीवी १२ शिवमल्लकः १३
सव्यसाची १४ कर्णारिः १५
करवीरकः १६ कौंतेयः १७
इंद्रसूनुः वीरद्रुः १९ कृष्णसारथि
२० पृथाजः २१ फाल्गुनः ॥ २२
धन्वी २३ इति राजनिर्घंटः
अस्यगुणाः क्षतभग्न रक्तस्तंभन
मूत्रकृच्छ्ररोगे पथ्यत्वं इति ॥
राजवल्लभः कषायत्वं उष्णत्वं ॥

व्रणशोथनत्वं कफ पित्त श्रम
तृस्रार्ति नाशित्वं वायुरोग ॥
प्रकोपकारित्वं च इतिराजनिर्घंटः
कार्त्तवीर्य्यार्जुनः मयूरः ॥
मातृरेकसुतः इति मेदिनी ॥
श्वेतवर्णः तद्वति त्रि इत्यमरः
अर्जुनध्वजः पुं हनूमान् इति
हेमचंद्रः ॥
अर्जुनी स्त्री गवी करतोयानदी
कुट्टनी उषा इति विश्वः ॥
मेदिन्यौ ॥
अर्जुनोपमः पुं वृक्षभेदः
शेगुन इति भाषा तत्पर्य्यायः
महापत्रः २ शाकवृक्षः ३ अनीलः
४ अर्णः ५ इति शब्दचंद्रिका
शाकाख्यः ६ खरपत्रः ७ इति
रत्नमाला ॥
अर्णः पुं शाकवृक्षः । इति
शब्दचंद्रिका अक्षरे इत्यागमः
स
अर्णः क्ली जले इत्यमरः ॥
अर्णवः पुं समुद्रः इत्यमरः ॥
अर्णवजः पुं क्ली समुद्रफेनः
इतिरत्नमाला ॥
अर्णवमंदिरः पुं वरुणः इति
हेमचंद्रः ॥
अर्णवोद्भवः पुं अग्निजावृक्षः
इतिराजनिर्घंटः
अर्णोदः पुं मुस्तकः ॥ नेयः
इतिराजनिर्घंटः ॥
अर्णोभवः पुं शंखः इति ॥
राजनिर्घंटः ॥
अर्त्तगलः पुं आर्त्तगलः ॥
नीलझिंटिका इत्यमरटीकायां
भरतः ॥
अर्त्तनं क्ली जुगुप्सा निंदा
इत्यमरः ॥
अर्त्तिः स्त्री पीडा धनुरग्रभागः
इत्यमरः ॥
अर्त्तिका स्त्री अंतिकानाट्योक्तौ
ज्येष्ठाभगिनी इत्यमरटीकायां
स्वामी ॥
अर्थ तकउ याचने इति ॥
कविकल्पद्रुमः ॥
अर्थः पुं विषयः याञ्चा धने
कारणं वस्तु शब्दप्रतिपाद्यः
निवृत्तिः प्रयोजनं इति
मेदिनी प्रकारः इति ॥
हेमचंद्रः
अर्थना स्त्री याञ्चा भिक्षा
इत्यमरः
अर्थपतिः पुं कुबेरः राजा
इति मेदिनी ॥
अर्थप्रयोगः पुं वृद्धिजीविका

वृद्धिदेया बाढीदेया इत्यादि ॥
भाषा इत्यमरः ॥
अर्थवादः पुं स्तुतिः प्रशंसा
इतिहेमचंद्रः सतु त्रिविधः ॥ गु
गुणवादः १ अनुवादः २ भूतार्थवा
द ३ यथा विरोधे गुणवादः ॥
स्यादनुवादोऽवधारिते भूतार्थ
वादस्तद्धानादर्थवादस्त्रिधामतः
इतिभट्टः तत्वसंबोधिनीमते
सप्तविधः स्तुत्यर्थवादः १
फलार्थवादः २ सिद्धार्थवादः
निंदार्थवादः ४ परकृतिः ५
पुराकल्पः ६ मंत्रः ७
एवामुदाहरणानि ग्रन्थकत्वात्
नलिखितानि ॥
अर्थवान् पुं पुरुषः इति ॥
राजनिर्घंटः अर्थविशिष्टे त्रि ।
अर्थविज्ञानं क्ली शुश्रूषाषष्ठधी
गुणांतर्गतगुणविशेषः शास्त्रार्थ
ज्ञाने इतिहेमचंद्रः ॥
अर्थव्ययज्ञः त्रि धनव्ययप्रकारवित्
तत्पर्य्यायः सुकलः २ इति ॥
हेमचंद्रः ॥
अर्थशास्त्रं क्ली चाणक्यादि ॥
प्रणीते नीतिशास्त्रे तत्पर्य्यायः
दंडनीतिः २ इत्यमरः ॥
अर्थसिद्धकः पुं सिंदुवारवृक्षः
इतिराजनिर्घंटः ॥
अर्थागमः पुं धनागमः तत्
पर्य्यायः आयः २ इति
हलायुधः ॥
अर्थिकः पुं वैतालिकः ॥
निद्राणस्य राजादेर्जागरयिता
इतिहेमचंद्रः ॥
अर्थी न त्रि याचकः सहायः ॥
सेवकः विवादी इति विश्वः
धनी अर्थो विद्यतेऽस्येतिइन्
अर्थ्यं क्ली शिलाजतु इत्यमरः ॥
मेदिनी करौ अर्थहिते त्रि ॥
अर्थ्यः त्रि पंडितः धनवान्
न्याय्यः इत्यमरभरतौ याच्यः ॥
याचनार्थकार्थधातोः कर्मणियः
अर्द ञ वधे इतिकविकल्पद्रुमः
अर्द यातनायां गत्यां ॥
याचने इति कविकल्पद्रुमः ॥
अर्दक वधे इतिकविकल्पद्रुमः
अर्दनं क्ली याचनं पीडनं ॥
हननं गमनं अर्दधातोर्भावे ॥
ऽनट् प्रत्ययः ॥
अर्दना स्त्री याञ्चा भिक्षा ॥
इत्यमरः ॥
अर्दनिः पुं अग्निः याञ्चा ॥

रोगः इत्यमरटीकायां भरतः
अर्द्दितं क्ली वायुव्याधिविशेषः
तस्य लक्षणं वक्रीभवति वक्त्रार्द्धं
ग्रीवा चाप्यपवर्त्तते शिरश्चलति
वाक्संगो नेत्रादीनां च वैकृतं ॥
ग्रीवा चिबुक दन्तानां यस्मिन् पार्श्वे च
वेदना तमर्द्दितमिति प्राहुर्व्याधि
व्याधिविशारदाः ॥ इति
माधवकरः ॥
अर्द्दितः त्रि याचितः इत्यमरः ॥
हिंसितः इति मेदिनीगतः ॥
पीडितः इति शब्दरत्नावली ॥
अर्द्धं क्ली समांशकः समभागः
आधा इति भाषा इत्यमरः ॥
समभागोऽर्द्धं चेद्रः पुमान् क्लीवेच
अर्द्धशाहः पुंलिंगः खंड पर्य्यायश्च
विभागीकृत्य वर्त्तितस्य तुल्य
वर्त्तितमर्द्धं क्लीवमेवेति केचित्
अर्द्धोरूपभेदात् भागे पुंसि
यथा वस्त्रार्द्धो नगरार्द्धः ॥
उपचारात्तु भागवति वाच्यलिंगः
यथार्द्धपाटी अर्द्धः कम्बलः
अर्द्धं वस्त्रं इति माधवी ॥
असमपरिभागहत्तित्रिलिंगाऽर्द्ध
इत्यनुन्यासः समयविभागोऽर्द्ध
प्राहीनपुंसकयवनाम्यलिंगः
इति भागवृत्तिः इति भरतः ॥

अर्द्धः पुं एकदेशः तत्पर्य्यायः
भित्तं २ शकलं ३ खंडं ४
इत्यमरः ॥
अर्द्धगंगा स्त्री कावेरीनदी इति
त्रिकांडशेषः ॥
अर्द्धगुच्छः पुं चतुर्विंशति ॥
गुच्छकहारः चविशन्नरदाना
इति भाषा इति हेमचंद्रः ॥
अर्द्धचंद्रः पुं नखक्षते बाण
विशेषः गलहस्तः गलादिमीषत्
प्रसिद्धिः इति मेदिनी चंद्रकः
मयूरपुच्छे चांद इति भाषा
चंद्रखंडं इति हेमचंद्रः ॥
अर्द्धचंद्रा स्त्री कृष्णत्रिवृत्
कालतेउड़ी इति भाषा ॥
इत्यमरः ॥
अर्द्धचंद्रिका स्त्री कर्णस्फोटालता
इति राजनिर्घंटः ॥
अर्द्धचोलकः पुं क्षुद्रचोलकः
काचुली इति भाषा इति ॥
हारावली ॥
अर्द्धजाह्नवी स्त्री कावेरीनदी
इति हेमचंद्रः ॥
अर्द्धतिक्तः पुं नेपालनिम्बः
इति राजनिर्घंटः ॥
अर्द्धनारीशः पुं शिवः इति
शब्दरत्नावली तस्य ध्यानं यथा

नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पल कपालक शूल
हस्तमर्द्धाम्बिकेशमनिशं प्रति
भक्त भूषं बालेंदु बद्ध मुकुटं
प्रणमामि रूपं इति तंत्रसारः ॥
अर्द्धपारावतः पुं चित्रकंठकपोतः
तित्तिरियक्षी। इति मेदिनी ॥ (१२)
अर्द्धमाणवः पुं द्वादशयष्टिकहा
राजनरः हार इति भाषा इति ॥
हेमचंद्रः ॥
अर्द्धरात्रः पुं रात्र्यर्द्धभागः ॥
दुइप्रहररात्रि इति भाषा तत्
पर्य्यायः निशीथः २ इत्यमरः
रात्र्यष्टम मुहूर्त्तः सतरात्रि मध्य
दंडद्वयात्मकः सम्पूर्णार्द्ध रात्रो
प्ययं महानिशा सात साऽर्द्ध ॥
प्रहरानंतरं सार्द्ध तृतीय प्रहर
पर्य्यंते इति स्मृतिः ॥
अर्द्धर्चः पुं क्ली अर्द्धऋक् ।
ऋङ्नामक वैदिक मंत्रार्द्धभागः
इत्यमरः
अर्द्धवीक्षणं क्ली अपांगदर्शने
कटाक्षः इति हेमचंद्रः ॥
अर्द्धशानं क्ली अर्द्धाशनं अर्द्ध
भोजनं इति शब्दरत्नावली
अर्द्धसफरः पुं क्षुद्रमत्स्य ॥
विशेषः दाडिकामाच इति भाषा

तत्पर्य्यायः दंडपालः २
इति हारावली
ऽर्द्धहारः पुं चतुःषष्टियष्टिकहारः
चौषष्ठिनरहार इति भाषा ।
इत्यमरः ॥
अर्द्धाशनं क्ली अर्द्धभोजनं
इति शब्दरत्नावली ॥
अर्द्धासनं क्ली स्नेहदाने
अकृत्स्नं इति धरणिः ॥
अर्द्धेंदुः पुं चंद्रार्द्धभागः ॥
गलहस्तः नखचिह्नं अतिशोठ
स्त्रीयोन्यंगुलि योजने इति
मेदिनी अर्द्धचंद्रबाणः इति
हेमचंद्रः ॥
अर्द्धोरुकं क्ली उत्तमस्त्रीणां
अर्द्धोरु पर्य्यंतं खेलनाकार ॥
परिधेय वस्त्रं तत्पर्य्यायः ।
चंडातकं २ इत्यमरः ॥
अर्पिशः पुं हृदयं इत्युणादि
कोषः ॥
अर्ब हिंसे गतौ । इति
कविकल्पद्रुमः ॥
अर्बुदः पुं क्ली दशकोटिसंख्या
मांसकीलः मांसपूरुषः आव्
इति भाषा इति लिंगादिसंग्रहे
अमरः मेदिनी च तस्य निदान
लक्षणं गात्रप्रदेशे क्वचिदेव दोषाः



संमूर्छिता मांसे मस्तक प्रदूष्य
हंतिस्थिरं मेदरुजं महामनल्प
मूलेविरहृद्यापाकं कुर्वंति
मांसोच्छ्रायमत्यपायं तमर्बुदं
शास्त्रविदो वदंति इति
माधवकरः ॥
अर्बुदः पुं पर्वतविशेषः इति
मेदिनी ॥
अर्भः पुं बालकः इति
हेमचंद्रः
अर्भकः पुं शिशुः इत्यमरः ॥
मूर्खः कृशः इति मेदिनी ॥
स्वल्पः सदृशः इत्युणादिकोषः
अर्म्म क्ली पुं वत्सरोगविशेषः इति
लिंगादिसंग्रहे अमरः तत्र ॥
पंचविधं प्रस्तार्य्यर्म्म १ शुक्लार्म्म २
रक्तार्म्म ३ मांसार्म्म ४ स्नाय्वर्म्म ५ एषां
लक्षणानि तत्तत् शब्दे द्रष्टव्यानि
वैद्यकेनोक्लीबलिंगोयं शब्दः
अर्म्मणः द्रोणपरिमाणं इति
वैद्यकपरिभाषा ॥
अर्य्यः पुं स्वामी - वैश्यः ॥
इत्यमरः श्रेष्ठे त्रि इति ॥
तट्टीकायां भरतः ॥
अर्य्यमा न पुं सूर्य्यः अर्कहस्तः
इत्यमरः पितृदेवविशेषः ॥
इतिमेदिनी ॥

अर्य्या स्त्री वैश्यस्त्रीजातिः ॥
इत्यमरः ॥
अर्य्याणी स्त्री वैश्यस्त्रीजातिः
इत्यमरः ॥
अर्य्यी स्त्री वैश्यपत्नी इत्यमरः
वैश्यस्त्रीजातिः इतिउग्रदासः
अर्व० वधे इतिकविकल्पद्रुमः
अर्वती स्त्री घोटकी इति ॥
हलायुधः कुट्टनी इति
त्रिकांडशेषः ॥
न
अर्वा पुं घोटकः इत्यमरः ॥
इंद्रः गोकर्ण परिमाणं इति
विश्वः कुत्सिते त्रि इत्यमरः
अर्वाक् अ पूर्वकालतः पश्चात्
पर्य्यायः अवरः २ इत्यमरः ॥
निकटे इतिभरतः अर्वाव इति
केचित् ॥
अर्वाचीनः त्रि पश्चाज्जातः ॥
विपर्य्यासे इति धरणिः ॥
अर्श क्ली अर्शोरोगः इति ॥
शब्दरत्नावली ॥
अर्शः स क्ली स्वनामख्यातगुदरोगः
तत्पर्य्यायः दुर्नामकं २ इत्यमरः
दुर्नाम ३ गुदकीलः ४ गुदांकुरः
५ इति राजनिर्घंटः
अनामकं ६ इतिशब्दरत्नावली

तस्य प्रकारो लक्षणानि ॥
पृथग्दोषैः समस्तैश्च शोणितात्
सहजानि च अर्शांसि षट्प्रकाराणि
विद्याद्गुदवलित्रये दोषा
स्त्वङ्मांसमेदांसि संदूष्य विविधा
कृतीन् मांसांकुरानपानादौ
कुर्वंत्यर्शांसितान् जगुः विष्टंभो
ऽन्नस्य दौर्बल्यं कुक्षे राटोपएव च
कार्श्यमुद्गारबाहुल्यं सक्थिसादो
ऽल्पविट्कता ग्रहणीदोषपांड्वर्ति
राशंका चोदरस्य च पूर्वरूपाणि
निर्दिष्टान्यर्शसामभिवृद्धये ॥
इतिमाधवकरः ॥
अर्शसः त्रि अर्शो रोगयुक्तः ॥
इत्यमरः ॥
अर्शसानः पुं अग्निः इति ॥
सिद्धांतकौमुद्यां उणादिवृत्तिः
अर्शीन त्रि अर्शोरोगयुतः ।
इति शब्दरत्नावली ॥
इति शब्दरत्नावली ॥
अर्शोघ्नः पुं तल्लः तल इति
भाषातत् पर्य्यायः सूरणः २
कंदः ३ इत्यमरः ॥ सूरणः ४
इति तट्टीका ॥
अर्शोघ्नी स्त्री तालमूली इति
मेदिनी ॥
अर्शोहितः पुं भल्लातकः ॥
भेल इति भाषा ॥ इति

त्रिकांडशेषः ॥
अर्ह ० योग्यत्वे पूजने । इति
कविकल्पद्रुमः ॥
अर्हक पूजने इतिकविकल्पद्रुमः
अर्हः पुं इंद्रः । इति ॥
शब्दरत्नावली ॥
अर्हः त्रि योग्यः उपयुक्तः ।
यथा तस्मान्नार्हा वयं हंतु
धार्तराष्ट्रान् सबांधवान् इति
श्रीभगवद्गीता ॥
अर्हणा स्त्री पूजा इत्यमरः ॥
त्
अर्हत् पुं क्षपणकः बुद्धः ॥
इतिमेदिनी शेषस्य पर्य्यायः
जिनः २ पारगतः ३ त्रिकालवित्
४ क्षीणाष्टकर्म्मा ५ परमेष्ठी ६
अधीश्वरः ७ शंभुः ८ स्वयंभूः ९
भगवान् १० जगत्प्रभुः ११
तीर्थंकरः १२ तीर्थकरः १३
जिनेश्वरः १४ वादी १५ अभयदः
१६ सार्वः १७ सर्वज्ञः १८ सर्वदर्शी
१९ केवली २० देवाधिदेवः २१
बोधदः २२ पुरुषोत्तमः २३
वीतरागः २४ । इति हेमचंद्रः
अर्हत् त त्रि पूज्यः मान्यः इति
मेदिनी ॥ स्तुतः इति
शब्दरत्नावली ॥



अर्हतः पुं बुद्धः क्षपणकः ॥
मान्ये त्रि इति जटाधरः शिवः
इति शब्दरत्नावली ॥
अर्हितः त्रि पूजितः इत्यमरः
अल न वारणे पर्य्याप्तौ ॥
भूषणे इति कविकल्पद्रुमः ॥
अलं क्ली वृश्चिकपुच्छकंटकः
बिच्छारहुल इति भाषा इति ।
हेमचंद्रः हरितालं । इति
रत्नमाला अमरटीकाच ॥
अलं व्य भूषणे पर्य्याप्तिः ॥
वारणे ॥ निरर्थके शक्तिः इति
मेदिनी अत्यर्थे यथा सर्वं
मे विमलं बहामलमलं गाले
विजानासि चेत् इति लीलावती
अलकः पुं क्ली भंगिपुतः केशः
कर्पूरादेः क्षोदचूर्णं तस्य
कुंतलाः चूर्णकुंतलाः तद्विनिश्च
न्यस्येत इत्यन्ये । अलति भूषयति
मुखं इत्यलकं इति भरतः ॥
कुटिल कुंतलः इति स्मृतिः
इति सारसुंदरी तत्पर्य्यायः ॥
चूर्णकुंतलः २ इत्यमरः ॥
अलकः पुं अलर्कः क्षिप्तकुक्कुरः
इत्यमरटीकायां रायमुकुटः ॥
अलकनंदा स्त्री कुमारी इति
त्रिकांडशेषः भारतवर्षीयगंगा

इति शब्दमाला तथैवालकनंदा ॥
दक्षिणेनतु ब्रह्म सदनाद्बहूनि
गिरिकूटान्यतिक्रम्य निषधहेमकूट
हिमकूटान्यति रभसतर रंहसा
लुठंती भारतमपि वर्षं दक्षिणस्य
दिशि लवणजलधि मभिप्रविशति
। इति श्रीभागवतं ॥
अलकप्रभा स्त्री कुवेरपुरी इति
शब्दरत्नावली ॥
अलकप्रियः पुं वृक्षविशेषः
इति जटाधरः ॥
अलकास्त्री कुवेरनगरी इत्यमरः
अष्टवार्षीवधि दशवर्षपर्य्यंत
वयस्का कन्या इति शब्दरत्नावली
अलकाधिपः पुं कुवेरः इति
जटाधरः ॥
अलकाधिपतिः पुं कुवेरः ।
इति शब्दरत्नावली ॥
अलक्तः पुं वृक्षनिर्यासविशेषः
लाहाजौ इति च भाषा तत्
पर्य्यायः राक्षा १ लाक्षा २ जतु ३
यावः ५ द्रुमामयः ६ इत्यमरः ॥
रक्ता ७ इति भरतः ॥ ॐ ॥
लाक्षारसः आलता इति भाषा
तत्पर्य्यायः अलक्तकः २ जतुरसः
३ रागः ४ निर्भत्सनः ५ जननी ६
जनकरी ७ रंपघा ८ चक्रवर्तिनी

९ अस्य गुणाः तिक्तत्वं उष्णत्वं
कफवात रोगव्रणदोष नाशित्वं
कंठरोग शमनत्वं रुचिकारित्वंच
इति राजनिर्घंटः ॥
अलक्तकः पुं निर्भत्सने ॥
अलक्तः इति हलायुधः ॥
हारावलीच लाक्षा इति ॥
राजनिर्घंटः ॥
अलगर्दः पुं जलसर्पः जलवाडा
इति केचित् अलाथ इति ॥
केचित् इत्यमरटीकायां भरतः ॥
अलगर्द्दः पुं जलव्यालः ।
इत्यमरः केमुटिया इति ख्यातः
जवोडा इति केचित् अलाथ ॥
इति केचित् इति भरतः ॥
अलंकरणं क्ली भूषणं इति
शब्दरत्नावली ॥
अलंकरिष्णुः त्रि अलंकारवर्त्ता
भूषणशीलः । इति रघुनाथ ॥
चक्रवर्त्यादयः तत्पर्य्यायः ।
मंडनः २ इत्यमरः अलंकर्त्ता ॥
इति शब्दरत्नावली ॥ ॐ ॥
अलंकारयुक्त व्यक्तिः इति ॥
सारसुंदर्यादयः तत्पर्य्यायः
अलंकर्त्ता २ मंडितः ३ प्रसाधितः ४
अलंकृतः ५ भूषितः ६ परिष्कृतः ७
इत्यमरः ॥

अलंकर्त्ता त्रि अलंकरिष्णुः
इत्यमरः ॥
अलंकर्म्मीणः त्रि कार्य्यकुशले
कर्म्मक्षमः इत्यमरः ॥
अलंकारः पुं भूषणे तत्
पर्य्यायः आभरणं २ परिष्कारः ३
विभूषणं ४ मंडनं ५ इत्यमरः ॥
ॐ काव्यालंकारः सद्विविधः
शब्दालंकारः १ अर्थालंकारश्च २
तस्य लक्षणं काव्यशोभाकरधर्मः
इति काव्यादर्शः वैचित्र्यमलंकार
इत्यलंकार सामान्य लक्षणं
वैचित्र्यंच भंगीविशेषः प्रतीति
साक्षिकः इति काव्यप्रकाश
टीकायां महेश्वरः अंगदादिवत्
शब्दार्थ शोभातिशाय जनको
रसाद्युपकारकोऽस्थिरधर्म्मः इति
साहित्यदर्पणं ॥ अस्य विवरणं
दंडि काव्यप्रकाश साहित्यदर्पण
अलंकारकौस्तुभ चंद्रलोकोज्ज्वल
नीलमणि काव्यचंद्रिका कुवलयानंद
सरस्वती कंठाभरणादि ग्रंथेषु
ज्ञेयं अलंकाराणां मध्ये ये ये
प्रसिद्धास्तेषां नाम लक्षणोदा
हरणानि चंद्रालोक धृतानि
तदतिरिक्तानि साहित्यदर्पण
कानिच लिख्यन्ते ॥

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
अक्रमातिशयोक्तिः १	अक्रमातिशयोक्तिः	आलिंगति समं देव ज्यांश
	स्यात्सहत्वेहेतुकार्य	राश्चपराश्चते ॥ १
	योः १ संगतान्यगुणानं	चिरं रागिणि मच्चित्ते
अतद्गुणः —— २	गीकारमाहुरतद्गुणं २	निहितापि न रंज्यसि २
	अत्यंतातिशयोक्तिस्तु	यास्यामीत्युदिते तन्व्या
अत्यंतातिशयोक्तिः ३	कार्यहेतुप्रशक्तिजः ३	वलयो भवदूर्मिका ॥ ३
अत्युक्तिः ———— ४	अत्युक्तिरद्भुतातथ्य	त्वयि दातरि राजेंद्र
	शौर्यौदार्यादिवर्णनं ४	याचकाः कल्पशाखिनः ४
अधिकं ———— ५	अधिकं पृथुलाधाराद	ब्रह्मांडानि जले यत्र ५
	धेयाधिक्यवर्णने ५	तत्रमांति न ते गुणाः ५
अनन्वयः ———— ६	उपमानोपमेयत्वे	इंदुरिवेंदुः श्रीमानित्या
	यदेकस्यैव वस्तुनः ६	दौ तदनन्वयः ॥
अनुकूलं ———— ७	अनुकूलं प्रातिकूल्य	कुपितासि यदा तन्वि
	मनुकूलानुबंधि चेत् ७	निधाय करजक्षतं बधान
		भुजपाशाभ्यां कंठमस्य।
		दृढं तदा ॥
अनुगुणः —— ८	प्राक्सिद्धस्वगुणोत्कर्षो	नीलोत्पलानि दधते
	ऽनुगुणः परसंनिधेः ८	कटाक्षैरतिनीलतां ८
अनुज्ञा ———— ९	दोषस्याभ्यर्थनानुज्ञा	मय्येव जीर्णतां यातु ॥
	तत्रैव गुणदर्शनात् ९	यत्वयोपकृतं हरे नरः
		प्रत्युपकारार्थी विपत्ति
		मभि कांक्षति ॥ ९
अनुप्रासः ———— १०	अनुप्रासः शब्दसाम्यं	आदाय बकुलगंधानंधी
	वैषम्येपि स्वरस्य यत् १०	कुर्वन्पदे पदे भ्रमरान् ॥
		अयमेति मंदमंदं कावे ॥
		रीवारियावनः पवनः ॥ १०

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
अनुप्रासस्तु पंचविधः		
एकस्य लक्षणोदाहरणे		
उक्ते। अपरे यथा		
छेकानुप्रासः ——	अनेकस्यैकधा साम्य	उन्मीलन्मधुगंधलुब्धमधु
	मसकृद्वाप्यऽनेकधा	पव्याधूतचूतांकुरक्री ॥
	एकस्य सकृदप्येष	डत्कोकिलकाकली
	छेकानुप्रास इष्यते	कलकलैरुद्गीर्णकर्ण
		ज्वराः नीयंते पथिकैः
		कथं कथमपि ध्याना ॥
		वस्थानक्षणप्राप्तप्राण ॥
		समाः समागमरसो ॥
		ल्लासैरमी वासराः ॥
वृत्यनुप्रासः ——	उच्चार्यत्वाद्यदेकत्र	हृद्यादस्यं मनसिजं जी ॥
	स्थाने तालुरदादिके	वयति दृशैव याः। विग्र ॥
	सादृश्यं व्यंजनस्यैतत्	पातस्य जयिनीस्तास्तु ॥
	वृत्यनुप्रास उच्यते ॥	मेवामलोचनाः ॥
श्रुत्यानुप्रासः —	व्यंजनं चेद्यथावस्थं	केशः काशस्तबक वि
	सहाद्येन स्वरेण तु	काशः कायः प्रकटित
	वर्त्यतेऽत्यंत्ययोज्यत्वा	करभविलासः चक्षु
	दनुप्रासः सएव तत्	र्दग्धवराटककल्पं त्यज
		ति न चेतः काममनल्पं ॥
	शब्दार्थयोः पौनरुक्त्ये	स्मेरराजीवनयने नयने
	भेदे तात्पर्यमात्रतः	किं निमीलिते यथा ।
	लाटानुप्रास इत्युक्तः	निर्जितकंदर्पकंदर्प
		वशगे प्रिये ॥

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
अनुमानं ——— ११	अनुमानन्तु विच्छित्या ज्ञानं साध्यस्य साधनात् ११	जानीमहेस्याः किल सारसाक्ष्याविराजते तः प्रियवक्त्रचंद्रः तत् कांतिजालैप्रसृतैस्तव दृंगव्यापाइताकुसुल तानिपद्ये ॥ ११
अन्योन्यं ——— १२	अन्योन्येनामयत्रस्याउ पकारः परस्परं — १२	त्रियामा शशिनाभाति शशीभाति त्रियामया ॥ १२
अपह्नवातिशयोक्तिः १३	रूपकातिशयोक्तिः स्या निगीर्याध्यवसानतः यदाऽपह्नुतिगर्भत्वं सैवसापह्नवामता १३	त्वत्सूक्तिषु सुधाराजन् भ्रांताः पश्यंति तां विधौ ——————— १३
अप्रस्तुतप्रशंसा — १४	अप्रस्तुतप्रशंसास्यात् सायत्रप्रस्तुताश्रया १४	एकः कृती सकुंतेषु यो ऽन्यशक्रान्नयाचते १४
अभिधाहेतुः —— १५	अभेदेनाभिधाहेतुः हेतोर्हेतुमता सह १५	तारुण्यविलासः इत्यत्र वशीकरणहेतुर्नायिका वशीकरणत्वेनोक्ताविलासहासयोस्तथ्यवसाय मूलोऽयमलंकारः १५
अर्थांतरन्यासः — १६	उक्तिरर्थांतरन्यासः स्यात् सामान्यविशेषयोः १६	हनूमानब्धिमतरत् दुष्करं किं महात्मनां गुणवद्व स्तुसंसर्गात् याति स्वल्पो पि गौरवं पुष्पमाला नुषंगेण सूत्रं शिरसि धार्यते ॥ १६

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
अर्थापत्तिः —— १७	दंडापूपिकयाऽन्यार्था गमोऽर्थापत्तिरिष्यते कविद्याकरणिकाद प्राकरणिकार्थस्यापत न्नेकवितत्प्राकरणिके तत्प्राकरणिकार्थस्य तिद्वौभेदौ १७	हारोऽयं हरिणाक्षीणां लुठंति स्तनमंडले मुक्ता नामप्यवस्थेयं केवयं स्मरकिंकराः विल लापसवासगन्धदेसहज्ञा मध्योऽपहायथारता अतितन्नमयोऽपि माईवं भजते केव कथाशरीरिणां १७
अल्पं ————— १८	अल्पंतु सूक्ष्मादाधेया यदाधारस्य सूक्ष्मता १८	मणिमालोर्मिकाते ऽ यकरेकेजयवटायते १८
अवज्ञालंकृतिः १९	ताभ्यांतौयदिनस्यातां मवज्ञालंकृतिस्तुसा १९	स्वल्पमेवांबु लभतेपात्र्यः प्राप्यापि सागरं । मीलं ति यदि पद्मानि काहा निरमृतद्युतेः १९
असंगतिः ——— २० तस्यत्रीणिलक्षणानि	विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसंगतिः अन्यत्रकरणीयस्य त तोऽन्यत्रकृतिश्चसाऽ न्यत्कर्तुं प्रवृत्तस्य तद्वि रुद्धकृतिश्चसा २०	विषं जलधरैः पीतं मूर्छिता पथिकांगना । अपारिजातां वसुधां चि कीर्षन् द्यां तथाकृथाः ॥ गोत्रोद्धारप्रवृत्तो हि गोत्रोद्धारं पुराकरोः २०
असदर्थनिदर्शना	अपरोबोधनंप्राहुः क्रियायास्सत्सदर्थयोः अस्यार्थः कस्यचित् किंचित् क्रियाविशिष्टस्य स्वक्रिययापरान्प्रतिअ । सतः सतोवार्थस्य बोधनं तर्हिने २१	नस्याद्राज विरोधीति क्षीणंचंद्रादयेपुनः २१



अर्थालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
असंभवः ---- २२	असंभवोऽर्थनिष्पत्ते रसंभाव्यत्ववर्णनं -- २२	कोवेदगोपशिशुकः शैलमुत्पाटयिष्यति २२
आवृत्तिदीपकं -- २३ तत्रिविधं पदावृत्तिः। अर्थावृत्तिः उभयावृत्तिः ॥	त्रिविधंदीपकावृत्तौ भवेदावृत्तिदीपकं २३	वर्षत्यंबुदमालेयंवर्षत्येषाचशार्वरी उन्मीलंतिकदंवानिस्फटंति कुटजोद्गमाः ॥ माद्यंतिचातकास्तृप्तामाद्यंतिचशिखावलाः २३
आक्षेपः ---- २४ अस्यत्रीणिलक्षणानि लक्ष्याणिच ॥	आक्षेपःस्वयमुक्तस्य प्रतिषेधोविचारणात् निषेधाभासमाक्षेपं बुधाःकेचनमन्वते आक्षेपोऽन्योविधौ व्यक्ते निषेधेचतिरोहिते २४	चंद्रसंदर्शयात्मानमथ वास्तिप्रियामुखंनाये हूतितनोऽल्पायत्लस्याः कालानलोयमः गच्छ गच्छसिचेत्कांततत्रै वस्याज्जनिर्मम ॥ २४
उत्प्रेक्षा -- २५ सावस्तुहेतुफलात्मता गोचरत्वेनत्रिविधा। वस्तूत्प्रेक्षा हेतूत्प्रेक्षा। फलोत्प्रेक्षा। तत्राद्या उक्तविषया अनुक्तविषया चेतिद्विविधापरे हेतुफलोत्प्रेक्षे सिद्धासिद्ध विषयतया प्रत्येकं द्विविधे एवमुत्प्रेक्षा षड्विधा ॥	संभावनाःस्युरुत्प्रेक्षा २५ वस्तुहेतुफलात्मता उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदेपरे ॥ २५	धूमस्तोमंतमःशंके। कोकीविरहशालिनां लिंपतीवतमोंगानि वर्षतीवांजनंनभः रक्तौतवांघ्री मृदुलौ भुविविक्षेपणात्कुतौ तेमुखामेक्षयानूनं यदीवैराग्यतेप्राणी। मध्यःकिंकुचयोर्धृत्यै वद्धःकनकदामभिः। प्रायोऽङ्गत्वत्पदेनैकं प्राप्तुंतोयेतपस्यति ॥ २५

॥ ॥

अर्थालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
अर्थापत्तिः	दंडापूपिकयाऽन्यार्थागमोऽर्थापत्तिरिष्यते कश्चित्प्राकरणिकादप्राकरणिकार्थस्यापत्तिः ॥ कश्चिदप्राकरणिकात् प्राकरणिकार्थस्येतिद्वौ भेदौ ॥	हारोऽयंहरिणाक्षीणां लुठतिस्तनमंडलेमुक्तानामप्यवस्थेयंकेवयं स्मरकिंकराः विललापसवाष्पगद्गदंसहजामप्यपहायधीरतां अतितप्तमयोऽपि मार्दवं भजतेकैव कथाशरीरिणां ॥ २७
अल्पं ------ २८	अल्पंतुसूक्ष्मादाधेयाद्यदाधारस्यसूक्ष्मता २८	मणिमालोर्मिकाते करेजपवटायते २८
अवज्ञालंकृतिः २९	ताभ्यांतौयदिनस्याता मवज्ञालंकृतिस्तुसा २९	स्वल्पमेवाम्बुलभतेप्रस्थः प्राप्यापिसागरः मीलन्तियदि पद्मानिकाहानिरमृतद्युतेः ॥ २९
असंगतिः ---- ३० तस्यत्रीणिलक्षणानि	विरुद्धंभिन्नदेशत्वं कार्यहेत्वोरसंगतिः अन्यत्रकरणीयस्यततोऽन्यत्रकृतिश्चसा अन्यत्कर्तुंप्रवृत्तस्यतद्विरुद्धकृतिश्चसा ३०	विषंजलधरैःपीतं मूर्छिताःपथिकांगनाः अपारिजातांवसुधांचिकीर्षन्द्यांतथाकृथाः गोत्रोद्धारप्रवृत्तोऽपि गोत्रोद्भेदंपुराकरोः ३०
असदर्थनिदर्शना ३१	अपरांबोधयन्नाह्नः। क्रिययासत्सदर्थयोः तस्यार्थःकस्यचित्किंचित्क्रियाविशिष्टस्यस्व। क्रिययापरान्प्रतिश्रसतः सतोवार्थस्यबोधनवर्णनं ३१	नश्यद्राजविरोधीति क्षीणंचंद्रोदयेपुनः ३१

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
एकावली ३२	गृहीतमुक्तरीत्यार्थ श्रेणिरेकावलीमता ३२	नेत्रकर्णांत विश्रांते कर्णौ दोःस्तंभपाससेनौ दोःस्तंभौ जानुपर्यंत प्रलम्बनमनोहरौ जानुनीरत्नमुकुरा कारौ तस्य महीभुजः ३२
कारकदीपके — ३३	क्रमिकैकगतानां तु गुंफः कारकदीपकं ३३	गच्छत्यागच्छति पुनः पा न्थः पश्यति पृच्छति
कारणमाला —— ३४ लापूर्वपूर्वपदार्थानां कारणत्ववर्णनेन एव मुत्तरोत्तरपदार्थानां कारणत्ववर्णनेन वा द्विधा	गुंफः कारणमाला स्या द्यथा प्रक्रांतकारणैः ३४	नयेन श्रीः श्रियात्याग स्त्यागेन विपुलं यशः भवंति नरकाः पापाः पापे दारिद्र्यसंभवे। दारिद्र्यमप्रदानेन तस्मा द्दानपरो भव॥ ३४
काव्यलिंगं —— ३५	समर्थनीयस्यार्थस्य काव्य लिंगं समर्थनं ३५	जितोसि मंद कंदर्प मच्चित्तेऽस्ति त्रिलोचनः ३५
काव्यार्थापत्तिः ३६	कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ३६	सजितं त्वन्मुखेनेंदुः का वार्ता सरसीरुहां ३६
कैतवापह्नुतिः — ३७	कैतवापह्नुतिर्व्यक्ते व्याजाद्यैर्निह्नुवे पदैः ३७	निर्यांति स्मरणाराचा कांतादृक्पातकैत वात्॥
गूढोक्तिः ——— ३८	गूढोक्तिरन्योद्देश्यं चे द्यदन्यं प्रति कथ्यते ३८	वृषापेहि परक्षेत्रादा याति क्षेत्ररक्षकः ३८

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
चपलातिशयोक्तिः	चपलातिशयोक्ति स्तत्पौर्वापर्यव्यति क्रमः। ३९	अग्रेमानो गतः पश्चा दनुनीता प्रियेण सा ३९
चित्रं —————— चित्रकाव्यमनेकविधं यथा पद्मखड्गधनुःखड्ग नागपाशकपाटनौका बंधाः अश्वगतित्रिपदी गोमूत्रिकादयः॥	पद्माद्याकारहेतुत्वे वर्णानां चित्रमुच्यते ४०	मारमासुषमाचारुरुचा मारवधूत्तमा। मात्त धूर्तममावासस्वावामा मेऽस्तु मा रमा॥ ४०
छेकापह्नुतिः ४१	छेकापह्नुतिरन्यस्य शंकातस्तस्य निह्नवे ४१	प्रजल्पन्मत्पदे लग्नः कांतः किं न हि नूपुरः ४१
तद्गुणः —————— ४२	तद्गुणः स्वगुणत्यागा दन्यदीयगुणग्रहः ४२	पद्मरागायते नासामौ क्तिकं तेऽधरत्विषा॥ ४२
तुल्ययोगिता ४३ सा त्रिधा		
प्रथमा यथा ——	वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता	संकुचंति सरोजानि स्वै रिणीवदनानि च त्वदं गमार्दवे दृष्टे कस्य॥ चित्ते न भासते॥ माल तीशशभृल्लेखाकदली नां कठोरता॥
द्वितीया यथा ——	हिताहिते वृत्तितौल्य मपरा तुल्ययोगिता	प्रदीयते पराभूतिर्मित्र॥ शात्रवयोस्त्वया॥
तृतीया यथा	गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता ४३	लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ४३



अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
प्रतिषेधः —— ६०	प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनं ६०	न द्यूतमेतत् कितवा क्रीडनं निशितैः शरैः ॥ ६०
प्रतीपं —— ६१ तल्लक्षणभेदेन पंचविधं। तत्तन्नामभेदेन	प्रतीपमुपमानस्योपमेयत्वप्रकल्पनं अन्योपमेयलाभेन वर्ण्यस्यानादरश्च तत् वर्ण्योपमानलाभेन तथान्यस्याप्यनादरः वर्ण्येनान्यस्योपमाया अनिष्पत्तिर्वचश्च तत् प्रतीपमुपमानस्यैकैमर्थ्यमपि मन्वते। ६१	तल्लोचनसमं पद्मं तद्वक्त्रसदृशो विधुः अलं गर्वेण ते वक्त्र कान्त्या चंद्रोऽपि तादृशः कः क्रौर्यदर्पस्ते मृत्यो त्वत्तुल्याः संति हि स्त्रियः मिथ्यावादोऽहि मुग्धाक्षि त्वन्मुखाभं किलांबुजं दृष्टे चेद्वदने तस्याः किं पद्मेन किमिंदुना ६१।
प्रत्यनीकं ६२	प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ६२	जैत्रनेत्रानुगौ कर्णौ उत्पलाभ्यामधःकृतौ ॥ ६२
प्रस्तुतांकुरः ६३	प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुतांकुरः ६३	किं भृंग सत्यां मालत्यां केतक्या कंटकाढ्यया ६३
प्रहर्षणं —— ६४	उत्कंठितार्थसंसिद्धि	तामेव ध्यायते तस्मै
तत्त्रिविधं	र्विना यत्नं प्रहर्षणं वांछितादधिकार्थस्य संसिद्धिश्च प्रहर्षणं यत्नादुपायसिद्ध्यर्थात् साक्षाल्लाभः फलस्य तत् ६४	विसृष्टा सैव दूतिका दीपमुद्दीपयद्यावत् तावदभ्युदितो रविः॥ निध्यंजनौषधीमूलखननादितो निधिः ६४

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
प्रौढोक्तिः —— ६५	प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पने ६५	कचाः कलिंदजातीरतमालस्तोममेचकाः
भाविकं —— ६६	भाविकं भूतभाव्यर्थसाक्षात्कारस्य वर्णनं ६६	अहं विलोकयेऽद्यापि युध्यंतेऽत्र सुरासुराः ६६
भाषासमावेशः ६७	श्लोकैरेकविधैरेव भाषा सुविविधास्वपि वाक्यं यत्र भवेत् सोऽयं भाषासमद्भुतीष्यते ६७	गुंजन्मणिमंजीरे कलगंभीरे विहारसरसीतीरे विरसासि केलिकीरे किमालि धीरे च गंधसारसमीरे ॥ ६७
भेदकातिशयोक्तिः ६८	भेदकातिशयोक्तिः स्यात्तस्यैवान्यत्वकल्पने ६८	अन्यदेवास्य गांभीर्यमन्यद्धैर्यं महीपतेः ६८
भ्रांतापह्नुतिः —— ६९	भ्रांतापह्नुतिरन्यस्य शंकायां भ्रांतिवारणे ६९	तापं करोति सोत्कंपं ज्वरः किं न हि सखे स्मरः ६९
भ्रांतिमान् —— ७०	स्यात् स्मृतिभ्रांतिसंदेहैस्तदंकालंकृतित्रयं ७०	अयं प्रमत्तो मधुपस्त्वन्मुखं वेत्ति पंकजं ॥ ७०
मालादीपकं —— ७१	दीपकैकावलीयोगात् मालादीपकमुच्यते ७१	स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ७१
मिथ्याध्यवसितिः ७२	किंचिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थांतरकल्पनं ७२	मिथ्याध्यवसितिर्वेश्यां वशयेत् खस्रजं वहन् ७२



अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
मीलितं	७३ मीलितं यदि सादृश्या	रसो नालक्षि लाक्षाया
	द्भेद एव न लक्ष्यते ७३	श्चरणे सहजारुणे ७३
मुद्रा ———— ७४	सूच्यार्थसूचनं मुद्रा प्रकृ	नितम्बगुर्वी तरुणी दृग्यु
	तार्थपरैः पदैः ७४	ग्मविपुला चसा ७४
यथासंख्यं ——— ७५	यथासंख्यं क्रमेणैव	शत्रुं मित्रं विपत्तिं च
	क्रमिकाणां समन्वयः ७५	जयरंजयभंजय ७५
यमकं ——— ७६	सत्यर्थे पृथगर्थायाः स्व	नवपलाशपलाशवने
	रव्यंजनसंहतेः क्रमेण	पुरः स्फुटपरागपरागत
	तेनैवावृत्तिर्यमकं	पंकजे मृदुलतान्तलतां
	विनिगद्यते ७६	तमवलोकयतत्सुरभिं
		सुरभिं सुमनोभरैः ७६
युक्तिः ——— ७७	युक्तिः पराभिसंधानं	त्वामालिखंति दृष्ट्वान्यं
[illegible]	क्रियया मर्मगुप्तये ७७	धनुः पौष्पं करे लिखत् ७७
रत्नावली ७८	क्रमिकाप्रकृतार्थानां	चतुरास्यः पतिर्लक्ष्म्याः
	न्यासे रत्नावली विदुः ७८	सर्वज्ञस्त्वं महीपते ७८
रूपकं ——— ७९	विषय्यभेदताद्रूप्य	अयं हि धूर्जटिः साक्षा
तत् द्विविधं अभेद	रंजनं विषयस्य यत्	येन दग्धाः पुरः क्षणात्
रूपकं ताद्रूप्यरूपकं	रूपकं तत्त्रिधाधिक्य	अयमास्ते विना शंभु
च तत्र समन्यूनाधिक	न्यूनत्वानुभयोक्तिभिः	स्तार्तीयीकं विलोचनं
कथनद्वारा प्रत्येकं	७९	शंभुर्विश्वमवत्यद्य स्वी
त्रिविधं समाभेद ॥		कृत्य समदृष्टिता ।
रूपकं न्यूनाभेद		अस्या मुखेंदुना लब्धे
रूपकं अधिकाभेद		नेत्रानंदे किमिंदुना ॥
रूपक समताद्रूप्य		साध्वी यमपरा लक्ष्मीरसु
रूपकं न्यूनताद्रूप्य		धासागरोत्थिता अयं ।
रूपकं अधिकताद्रूप्य		कलंकिनश्चंद्रान्मुख
रूपकं एतत्षड्विधं		चंद्रोऽतिरिच्यते ॥ ७९

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
रूपकातिशयोक्तिः	रूपकातिशयोक्तिः ।	पश्य नीलोत्पलद्वंद्वा
	स्यान्निगीर्याऽध्यवसा	न्निःसरंति सिताः शराः
	नतः अस्यार्थः विषय	८०
	संबंधेन उल्लेखनं विना	
	विषयवाचकशब्देन रू	
	पेण विषयिणा निगरणेन तत्	
	वके विषयस्य विषयिरूप	
	तयाऽध्यवसाने तस्मिन्स	
	ति रूपकातिशयोक्तिः	
	८०	
ललितं ——— ८१	प्रस्तुते वर्ण्यवाक्यार्थ	ललितं निर्गते नीरे
	प्रतिबिंबस्य वर्णनं ।	सेतुमेषा चिकीर्षति
	८१	८१
लुप्तोपमा ——— ८२	वर्ण्योपमानधर्माणामु	तडिद्गौरीन्दुतुल्यास्या
साक्षाद्यथा वाचक	पमावाचकस्य च एक	कर्पूरंती दृशोर्मम
लुप्ता धर्मलुप्ता उप	द्विव्यनुपादानात्तत्रि	कांत्या स्मरवधूयंती
मानलुप्ता धर्मवाचक	वा लुप्तोपमा यथा ८२	दृष्टा तन्वी रहो मया
लुप्ता वाचकोपमेय		यत्तद्वयामेलनेन भला
लुप्ता वाचकोपमान		भीमयम्बतद्वृतेः ।
लुप्त धर्मोपमान		तदेतत् काकतालीय
लुप्ता । धर्मोपमान		मवितर्कितसंभवः ८२
वाचकलुप्ता ॥		
श्लेषः ——— ८३	श्लेषः स्याद्दोषगुणयो	अखिलेषु विहंगेषु
	र्गुणदोषत्वकल्पने ८३	हंत स्वच्छंदचारिषु
		शुक पंजरबंधस्ते मधुरा
		णां गिरां फलं ८३

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
लोकोक्तिः——८४	लोकप्रवादानुकृतिं लोकोक्तिरितिकथ्यते ८४	सहस्वकतिचिन्मासान्मी लयित्वा विलोचने ८४
वक्रोक्तिः—— ८५	वक्रोक्तिः श्लेषकाकु भ्यामपूर्वार्थप्रकल्पनं ८५	मुंच मानं दिनं प्रातं नेह नान्दी हरांतिके ८५
विकल्पः—— ८६	विरोधे तुल्यबलयोर्वि कल्पालंकृतिर्मता ८६	सद्यः शिरांसि चापान्वा नमयंतु महीभुजः ८६
विकस्वरः—— ८७	यस्मिन्विशेषसमान्य विशेषाः स विकस्वरः ८७	स जियेयमहाता हि दुर्दर्शाः सागरा इवा ८७
विचित्रे——— ८८	विचित्रं तत्प्रयत्नश्चेत् विपरीतफलेच्छया ८८	नमंति संतस्त्रैलोक्या दपि लब्धुं समुन्नती ८८
विधिः——— ८९	सिद्धस्यैव विधानं यत्ता माहुर्विधिलंकृति ८९	पंचमोदंचने काले कोकिलः कोकिलोऽभवत् ॥
विनोक्तिः——— ९० लक्षणभेदन साद्विविधा।	विनोक्तिः स्याद्विनाकिं चित्प्रस्तुतं हीनमुच्यते तच्चेत् किंचिद्विनारम्यं विनोक्तिः सापि कथ्यते ।९०	विद्याहृद्यापि सा विद्या विना विनयसंपदं विना खलैर्विभात्येषा राजेंद्र भवतः सभा॥ ९०
विभावना ९१ अस्याः लक्षणानुरा हरणानि च षट्	विभावना विनापि स्यात् कारणं कार्यजन्म यत् हेतूनामसमग्रत्वे का र्योत्पत्तिश्च सा मता कार्योत्पत्तिस्तृतीया	अप्यलाक्षारसासिक्तं रक्तं तेच रणं द्वयं ॥ अस्त्रैरतीक्ष्णकठिनैर्जा राजयति मन्मथः॥ नरेंद्रानेव ते राजन्

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
	स्यात् सत्यपि प्रतिबंध के। अकारणात् कार्य्य जन्म चेत् या स्याद्विभाव ना विरुद्धात् कार्यसंप त्तिर्दृष्टाकाचिद्विभावना कार्यात्कारणजन्मापि दृष्टाकाचिद्विभावना	दशत्यसिभुजंगमः शंखाद्वीणानिनादोऽ यमुदेति महद्भुतः ॥ शीतांशुकिरणास्तन्वी हंत संतापयंति तां ॥ यशः पयोराशिरभूत् करकल्पतरोस्तव॥ ९१
विरोधः——— ९२ सदशधा॥	जातिश्चतुर्भिर्जात्याद्यै गुणो गुणादिभिस्त्रिभिः क्रियाक्रियाद्रव्याभ्यां यत् द्रव्यं द्रव्येणवा मिथः विरुद्धमिव भासेत विरोधोऽसौ दशा कृतिः ॥	तव विरहे मलयमरुद्दा वानलः शशिरुचोपि शोषमणिः हृदयमनि रुतमापि भिन्नेन लिनी दलमपि निदाघरवि रस्याः ॥ संततमुषला संगाद्बहुतर गृहकर्म घटनायान्नृपते द्विज पत्नीनां कठिनाः सति भवति कराः सरोज॥ कुमाराः अजस्य ॥ शृंक्ते जन्म निरीहस्य हतद्विषः। स्वगतो जा गरूकस्य याथार्थ्यं वद कस्तव ॥ वल्लभो तसं गसंगेन विना हरिण चक्षुषः। राकाविभाव रीजानि विषज्वालाकु लोभवेत् ॥ नयनयुगा सेच ॥



अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
		नेकं मानसहस्यापि दुष्प्रायं रूपमिदं मदिराक्ष्या मदयति स्वयं दुनोति च मे ९२
विरोधाभासः — ९३	आभासत्वे विरोधस्य विरोधाभास इष्यते।	विनापि तन्वि हारेण वक्षोजौ तव हारिणौ
विवृतोक्तिः — — ९४	विवृतोक्तिः श्लिष्टगुप्तं कविनाविष्कृतं यदि	वृषापेहि परक्षेत्रादिति वक्ति ससूचनं ९४
विशेषः — — — ९५ सत्रिविधः —	विशेषः ख्यातमाधारं विनाप्याधेयवर्णनं विशेषः सोऽपि यद्येकं वस्त्वनेकत्र वर्ण्यते किंचिदारंभतोऽशक्यवस्त्वंतरकृतिश्च सः ९५	गतेऽपि सूर्ये दीपस्थास्तमश्छिंदंति तत्कराः अंतर्बहिः पुरः पश्चात् सर्वदिक्ष्वपि सैव मे त्वां पश्यता मया लब्धं कल्पवृक्षनिरीक्षणं ९५
विशेषोक्तिः — — ९६	कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ९६	हृदि स्नेहक्षयो नाभूत् स्मरदीपे ज्वलत्यपि ९६
विषमं — — — — — तत्त्रिविधं।	विषमं वर्ण्यते यत्र घटनाननुरूपयोः विरूपकार्यस्योत्पत्तिरपरं विषमं मतं अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात्। ९७	क्वेयं शिरीषमृद्वंगी क्व तावन्मदनज्वरः कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका भक्ष्याशयाहिमंजूषां दृष्ट्वाखुस्तेन भक्षितः ९७
विषादनं — — — ९८	इष्यमाणविरुद्धार्थसंप्राप्तिश्च विषादनं ९८	दीपमुद्दीपयावत्तावन्निर्वाणः प्रदीपकः ९८

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
व्याघातः — — ९९ सद्विधः	स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् सौकार्येण निबद्धापि क्रिया कार्यविरोधिनः ९९	यैर्जगत्प्रीयते हन्ति तैरेव कुसुमैः स्मरः॥ दयाचेद्बाल इति मय्यपरित्याज्य एव ते ९९
व्याजनिंदा — — १००	निंदाया निंद्यया व्यक्तिर्व्याजनिंदेति गीयते १००	विधे स निंद्यो यस्ते प्रागेकमेवाहरच्छिरः १००
व्याजस्तुतिः — १०१ सद्विधः	उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः १०१	कः स्वर्धुनि विवेकस्ते नयसे पापिनो दिवं॥ साधुदूति पुनः साधु कर्तव्यं किमतः परं यन्मदर्थे विलूनासि दंतैरपि नखैरपि॥ १०१
व्याजोक्तिः — — १०२	व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनं १०२	सखि पश्य गृहारामपरागैरस्मि धूसरा॥ १०२
व्यतिरेकः — — १०३	व्यतिरेको विशेषश्चेदुपमानोपमेययोः १०३	शैला इवोन्नताः संतु किंतु प्रकृतिकोमलाः १०३
शुद्धापह्नुति १०४	शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः १०४	नायं सुधांशुः किं तर्हि व्योमगंगासरोरुहं १०४



अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
श्लेषः —— १०५ सचत्रिविधः प्रकृतानेकविषयः १ अप्रकृतानेकविषयः २ प्रकृताप्रकृतानेकविषयः ३	नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रयः १०५	सर्वदो माधवः पायात् स योगंगामदीधरत् ॥ अब्जेन त्वन्मुखं तुल्यं हरिणाहतशक्तिना। उच्चैर्हरिकीलालः शुशुभे वाहिनीपतिः ३ १०५
मदर्थनिदर्शना — १०६	विभावने समूहानां फलं सत्स्यदनुग्रहः १०६	उदयन्नेव सविता पद्मेष्वर्पयति श्रियं १०६
संदेहः —— १०७	स्यात्स्मृतिभ्रान्तिसंदेहैस्तदंकालंकृतित्रयं १०७	पंकजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः १०७
समं —— १०८ ततत्रिविधं —	समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः सारूप्यमपि कार्यस्य कारणेन समं विदुः विनायत्नेन तत्सिद्धिर्यदर्थः कर्तुमुद्यमः। १०८	स्वानुरूपं कृतं पद्महारेण कुचमंडलं नीचशरमता लतितजलजामलवोचिता मुक्तावनलाभोऽयं भूपते वारणार्थिनः॥ १०८
समाधिः —— १०९	समाधिः कार्यसौकार्यकारणांतरसन्निधेः। १०९	उत्कंठिता च कुलटा जगामास्तं च भानुमान् १०९
समासोक्तिः —— ११०	समासोक्तिः परिस्फूर्तिः प्रस्तुतेप्रस्तुतस्य चेत ११०	अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाः ११०

अथालंकारनामानि	तल्लक्षणानि	अदुदाहरणानि
समुच्चयः —— १११ सद्द्विविधः॥	बहूनां युगपद्भावभाजां गुंफः समुच्चयः अहंप्रथमिकाभाजामेककार्यान्वयोपि सः १११	नश्यंति पश्यात पश्यंति अप्यपत्तिवत वद्विषः॥ कुलं बलं च वयो विद्या धनं च मदयत्यमूं॥ १११
संबंधातिशयोक्तिः ११२ लक्षणभेदेन साद्विधा॥	संबंधातिशयोक्तिः स्याद्योगे योगकल्पने योगेप्ययोगसंबंधातिशयोक्तिरिष्यते ११२	सौधाग्राणि पुरस्यास्य स्पृशंति विधुमंडलं त्वयि दातरि राजेंद्र स्वर्द्रुमान्नाद्रियामहे॥ ११२
संभावना —— ११३	संभावने यदीत्थं स्यादित्यूहोन्यस्य सिद्धये ११३	यदि शेषो भवेद्वक्ता॥ कथिताः स्युर्गुणास्तव ११३
सहोक्तिः —— ११४	सहोक्तिः सहभावश्चेद्भासते जनरंजनः ११४	दिगंतमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ११४
सामान्यं —— ११५	सामान्यं प्रकृतस्यान्यतादात्म्यं सदृशैर्गुणैः ११५	मल्लिकाचितधम्मिल्लाश्चारुचंदनचर्चिताः अविभाव्याः सुखं यांति चंद्रिकास्वभिसारिकाः ११५
सारः —— ११६	उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते ११६	मधुरं मधु पीयूषं तस्मात् तस्मात् कवेर्वचः ११६

अथालंकारनामानि	तल्लक्षणानि	तदुदाहरणानि
सूक्ष्मं ----- ११७	सूक्ष्मं पराशयाभिज्ञेतरसाकूतचेष्टितं ११७	मयि पश्यति सा केशैः सीमंतमणिमावृणोत्
लोकोक्तिः -- ११८	लोकोक्तिर्यत्र लोकोक्तेः स्यादर्थांतरगर्भिता ११८	भुजंगपवनानीभुंजे गावरणे सखे ११८
स्वभावोक्तिः -- ११९	स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णने ११९	कुरंगैरुत्तरंगाक्षैः स्तब्धकर्णैः समीक्ष्यते ११९
स्मृतिमान् ---- १२०	स्यात् स्मृतिभ्रांतिसंदेहैस्तदंकाऽलंकृतित्रयं १२०	पंकजं पश्यतः कांता मुखं मे गाहते मनः १२०
हेतुः ------ १२१ सद्विविधः ॥	हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते हेतुमतोरैक्यवर्णनं हेतुरुच्यते १२१	असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवां लक्ष्मीविलासो विदुषां कटाक्षा वेंकटप्रभोः १२१
हेत्वपह्नुतिः १२२	शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः सएव युक्तिपूर्वश्चेदुच्यते हेत्वपह्नुतिः १२२	नेंदुस्तीव्रो न निशार्कः सिंधोरौर्वोऽयमुत्थितः ॥ १२२

अलङ्क्रिया स्त्री भूषितकरणं ।
तत्पर्य्यायः भूषा २ इत्यमरः ॥
अलंकृतः त्रि अलंकारयुक्तः
तत्पर्य्यायः । भूषितः २ प्रसा
धितः ३ परिष्कृतः ४ मंडितः ५
[illegible] ॥ इत्यमरः ॥
अलंजरः पुं मृन्मयबृहज्जलधर
पात्रं जाला इति ख्यातः तत्
पर्य्यायः । अलिंजरः २ मणिकः ३
इत्यमरटीकायां भरतः ॥
अलतिः पुं गीतविशेषः इत्यु
णादिकोषः ॥
अलंधूमः पुं धूमसमूहः इति
जटाधरः ॥
अलम् अव्य भूषणं पूर्णता ॥
सामर्थ्यं ॥ निषेधः इत्यमरः ॥
निरर्थकं ॥ इति भरतः ॥
अलंवुषः पुं प्रहस्तः वमनं
राक्षसविशेषः ॥ इति मेदिनी ॥
अलंवुषा स्त्री मुंडरी ॥ स्वर्गवेश्या
भेदः ॥ इति मेदिनी ॥ लज्जालु
भेदः । तत्पर्य्यायः । खररवक २
मेदः ३ गला ४ अस्या गुणाः ।
लघुत्वं स्वादुत्वं । क्रिमिपित्तकफ
नाशित्वं च ॥ इति राजनिर्घंटः
अन्यप्रवेशवारणार्थदत्तरेखादिः
अलर्कः पुं क्षिप्तकुक्कुरः श्वेतार्क

वृक्षः । शादा आकंद इति भाषा
तत्पर्य्यायः । प्रतापसः २ राजार्कः
३ गणरूपी ४ इति रत्नमाला
मेरी ॥ सूकराकाराष्टपादतीक्ष्ण
दंतसूच्याकृतिलोमजंतुविशेषः
देशनामा स ह्रो भृगुशापात् अयं
जंतुर्भूत्वा कर्णस्यारुं भित्वा परशु
रामदृष्टिपातात् शापमुक्तः पूर्वरू
पो बभूव ॥ इति महाभारते
राजधर्मे ॥
अलले अव्य पिशाचभाषायां संबो
धने तत् पर्य्यायः अले २
अलेले ३ इति शब्दरत्नावली ॥
अलवालं क्ली आलवालं वृक्ष
मूले जलधारणार्थं कृतालिः था
ला इति ख्यातः इत्यमर
टीकायां भरतादयः ॥
अलवालकं क्ली आलवालं इति
शब्दरत्नावली ॥
अलस त्रि आलस्ययुक्तः ॥ आलस्या
इति भाषा । तत् पर्यायः । मंदः २
तंदपरिमृजः ३ आलस्यः ४ शीतकः
५ अनुष्णः ६ इत्यमरः ॥
अलसः पुं वृक्षविशेषः ॥ पाद
रोगभेदः पाँकुई इति भाषा
॥ इति मेदिनी ॥ तस्य निदान
रूपे । क्लिन्नाङ्गुल्यन्तरे पादे कंडू

दाहरुजान्वितौ। दुष्टकर्दमसंस्य
र्शादलसंतेविभावयत्॥
अलसकः पुं उदररोगविशेषः
तस्यरूपं कुक्षिरानह्यते २
त्यर्थं प्रताम्यत् परिकूजति।
निरुद्धमारुतश्चैव कुक्षावुपरि
धावति। वातवर्च्चोनिरोधश्च
यस्यात्यर्थं भवेदपि तस्याल
सकमाचष्टे तृष्णोद्गारौ तयस्य व
तेञ्जोतरौ। प्रयाति नोर्द्ध्वं नाधस्ता
दाहारोनच पच्यते आमाशयेऽ
लसीभूतस्तेनसोऽलसकः स्मृतः
अलसा स्त्री हंसपदीलता इति
मेदिनी॥
अलसेक्षणा स्त्री स्त्रीविशेषः सा
अलसदृष्टिप्रुका इतिहेमचंद्रः
अलक्षणं क्ली दुर्लक्षणं भेद
चिह्नं तद्विशिष्टे त्रि॥
अलक्ष्मीः स्त्री नरकदेवता तत्
पर्य्यायः। निर्ऋतिः २ इत्यमरः
अलातं क्ली अंगारः इत्यमरः
अलाबुः स्त्री लताविशेषः तत्फले
वा। लाउ इति ख्याता। तत्पर्य्यायः
तुंबः १ तुम्बकः २ तुम्बा ३ तुम्बी ४
पित्तफला ५ महाफला ६ अल
बुः ७ अलाबुः ८ लाबुः ९ लाबुका १०
इत्यमरः तट्टीकाच अस्य गुणाः
भेदकत्वं। कफकारित्वं। गुरु
पाकित्वं हिमत्वं पित्तनाशित्वंच
तन्माडीगुणाः गुरुत्वं मधुरत्वं
मलभेदकत्वं वातश्लेष्मकारि
त्वं रूक्षत्वं शीतलत्वं पित्त
नाशित्वंच॥ इतिराजवल्लभः
अलारं क्ली कवाटं इति शब्द
रत्नावली॥
अलिः पुं स्त्री भ्रमरः वृश्चिकः
इत्यमरः काकः कोकिलः
इतिशब्दरत्नावली मदिरा
इतिमेदिनी॥
अलिकं क्ली ललाटं इत्यमरः
अलिकुलसंकुलः पुं कुब्जकवृक्षः
इतिराजनिर्घण्टः॥
अलिगर्द्दः पुं जलसर्पः आलाध
इतिख्यातः इतिशब्दरत्नावली
अलिजिह्वा स्त्री जिह्वायरित्व
द्रजिह्वा आलजिव इतिख्याता
इतिशब्दरत्नावली॥
अलिजिह्विका स्त्री अलिजिह्वा॥
इतिशब्दरत्नावली॥
अलिंजरः पुं मृदादिनिर्म्मितज
लाधारविशेषः जाल इतिख्यातः
इत्यमरः
अलिदूर्वा स्त्री मालादूर्वा इति
राजनिर्घण्टः॥

अलिंदः पुं बहिर्द्वारसंलग्न॥
अरस्तकृत्रिमभूमिः तत्पर्य्यायः
प्रघाणः १ प्रघणः २ बहिर्द्वारप्र
कोष्ठः ४ आलिंदः ५ इत्यमरः
अलिपकः पुं स्त्री भ्रमरः॥ को
किलः॥ कक्कुरः॥ इति मेदिनी
अलिपत्रिका स्त्री वृश्चिकाख्यक्षु
पः॥ इतिराजनिर्घण्टः॥
अलिपर्णी स्त्री वृश्चिकालीवृक्षः
इतिराजनिर्घण्टः॥
अलिप्रियं स्त्री रक्तोत्पलं।
रक्तपद्मं इतित्रिकाण्डशेषः॥
अलिप्रिया स्त्री पाटलावृक्षः इति
रत्नमाला॥
अलिमकः पुं भेकः कोकिलः
भ्रमरः पद्मकेशरः॥ मधूक
वृक्षः इतिमेदिनी॥
अलिमोदा स्त्री गणिकारीवृक्षः
इतिराजनिर्घण्टः॥
अलिंबकः पुं पद्मकेशरः भेकः
॥भ्रमरः॥कोकिलः॥ इति॥
शब्दरत्नावली॥
अलिवाहिनी स्त्री केविकापुष्प
इतिराजनिर्घण्टः॥
अलीपं पुं भ्रमरः वृश्चिकः॥
इतिमेदिनी॥
अलीकं क्ली अप्रियं मिथ्या
इत्यमरः॥ स्वर्गः॥ इति मेदिनी
॥ललाटं॥ इतिहेमचंद्रः
अलीकं त्रि मिथ्या अप्रियं॥
अल्पं॥ इतिशब्दरत्नावली॥
अलीकमत्स्यः पुं अंगारस्विन्नतिल
तैलभृष्टमाषपिष्टं। तत्र प्रमाणं
राजनिर्घण्टयथा। माषपिष्टिकया
लिप्यनागवल्लीदलैर्म्महत् ततु
संस्वेदयेत्युक्त्या स्थाल्यामंगारको
परि॥ ततोनिष्काशितंखंडितं तिल
तैलेनभर्ज्जयेत्। अलीकमत्स्यउ
क्तोयंप्रकारः पाकपंडितैः॥
तद्वेताकभटित्रेण वाल्केनचभ
क्षयेत्॥
अलः स्त्री आलुः लघुकलसी
इत्यमरटीकायांरमानाथः॥
अले व्य पिशाचभाषयासंबोधनं
इतिशब्दरत्नावली॥
अलेले व्य पिशाचभाषयासंबो
धनं॥ इतिशब्दरत्नावली॥
अलोभी नं त्रि लोभशून्यव्यक्तिः॥
अलोहितं क्ली रक्तपद्मं इति
रत्नमाला॥
अलौकिकः त्रि लौकिकप्रत्यक्षा
विषयः अमानुषिकः लोकातीतः
अल्पं त्रि किंचित् तत्पर्य्यायः।
ईषत् २ मनाक् ३ स्तोकं ४ स्वल्पकं

५ स्वल्पं ६ दभ्रं ७ कृशं ८ तनु ९
तनूः १० त्रुटिः ११ त्रुटी १२ मात्रा
१३ लवः १४ लेशः १५ कणः १६
कणी १७ कणि १८ अणुः १९
सूक्ष्मं २० इत्यमरः ॥
अल्पकः पुं यवासवृक्षः ॥ इति
राजनिर्घण्टः ॥
अल्पकेशी स्त्री भूतकेशीवृक्षः
इति रत्नमाला ॥
अल्पगन्धं क्ली रक्तकैरवं इति
रत्नमाला ॥
अल्पतनुः त्रि खर्वः ॥ दुर्बलः
अल्पास्थिवृक्षः लकुचवृक्षः तत
पर्य्यायः हलि २ ॥ इत्यमरः
अल्पपत्रः पुं लघुपत्रतुलसी
इति रत्नमाला ॥
अल्पपद्मं क्ली रक्तपद्मं इति
रत्नमाला ॥
अल्पप्रमाणकः पुं बेलांनेवेलो
वेलातरमूञ्ज इति ख्यातः खर
मुञ्ज इति केचित ॥ इति रत्नमाला
अल्पमारिषः पुं शाकविशेषः
तण्डुलिया इतिख्यातः तत्
पर्य्यायः तण्डुलीयः २ इत्यमरः
अल्पसरः क्ली क्षुद्रसरोवरः डोबे
गेडे इति भाषा तत्पर्य्यायः ॥
वेशन्तः २ पल्वलं ३ इत्यमरः

अल्पासुः पुं क्लान्तः इति त्रिकाण्ड
शेषः अचिरजीविनि त्रि ॥
अल्पिष्ठः
अल्पीयः } त्रि अत्यल्पे इत्यमरः
अल्पा स्त्री नाव्योकोमाता इति
वोपदेवः ॥
अव ० रक्षणे ॥ गतौ कान्तौ ।
स्पृहायामितियावत् ॥ प्रीतौ
तृप्तौ ॥ श्रुतौ । शोभायामिति
यावत् क्रतौ । आकर्णने इति
यावत् ॥ प्राप्तौ ॥ श्लेष । आलि
ङ्गने इति यावत् अर्थने याञ्चा
यामितियावत् ॥ वेध । प्रवेश
इतियावत् ॥ भावे सत्ताया
मितियावत् ॥ हृद्धे ॥ ग्रहे ।
आदाने इति यावत् ॥ वधे ॥
सामर्थ्ये ॥ अवगमे ॥ कृतौ
करणे इति यावत् कामे इच्छात
यादने इति यावत् इति वोपदे
वीयकविकल्पद्रुमः तट्टीकाव ॥
अव व्य उपसर्गविशेषः । अ ॥
स्यार्थः । निश्चये असाकल्ये ॥
अनादरः ॥ इति दुर्गादासः ॥
आलम्बने विज्ञाने व्यापने
शुद्धिः ॥ अल्प ॥ परिभवः ॥
नियोगः पालने इतिशब्द
रत्नावली ॥

अवकटं क्ली वैरूप्यं अवात्
कटारश्च वैरूप्यवकारात् कट
श्च । इति गोयीचन्द्रकृतललनं
अवकरः पुं मार्ज्जन्यादिक्षिप्त
धूल्यादिः । जंजाल इति ख्यातः
तत्पर्य्यायः । संकरः २ इत्यमरः
अवकलितः त्रि दृष्टः इतिधर
णिः अवकाशः पुं अवस्थानदे
शः फांक इतियावत् अवसरः
अवकीर्णः त्रि अवचूर्णितः तत्
पर्य्यायः अवध्वस्तः २ इतिहेम
चन्द्रः अवकीर्णी त्रि क्षतव्रतः स्त्री
संसर्गादिनात्यक्तनियमब्रह्मचारी इ
ति भरतजटाधरौ ॥
अवकुटारं क्ली वैरूप्यं । इति
संक्षिप्तसारव्याकरणस्य परिशिष्टं
अवकृष्टः त्रि बहिष्कृतः दूरी
कृतः तत्पर्य्यायः । निष्कासितः २
इत्यमरः ॥
अवकेशी त्रि फलकालेऽप्यनु
पन्नफलकवृक्षादिः तत्पर्य्यायः
वन्ध्यः २ अफलः ३ ॥
अवक्तव्यं त्रि वचनायोग्यं
अकथनीयं ॥
अवक्रयः पुं क्रयसाधनद्रव्यं
मूल्यं ॥ इत्यमरः ॥
अवगणितं त्रि अवज्ञातं ।

अवमानितं इत्यमरः ॥
अवगण्डः पुं गण्डस्थव्रणः वयस
फोडा इतियावत् तत्पर्य्यायः
वरण्डः २ इति त्रिकाण्डशेषः
अवगतं त्रि ज्ञातं तत्पर्य्यायः
बुद्धं २ बुधितं ३ मनितं ४ वि
दितं ५ प्रतिपन्नं ६ अवसितं ७
। इत्यमरः ॥
अवगतिः स्त्री ज्ञानसामान्यं
इतिजटाधरः ॥
अवगाथः त्रि प्रातःस्नातः प्रातः
स्नायी ॥ इति सिद्धान्तकौमुदी
अवगादः पुं जलद्रोणी नौका
जलसेचनकाष्ठपात्रं इतिहला
युधः ॥
अवगाहः पुं स्नाने ॥ स्नानगृहे
इति वोपदेवः ॥
अवगाहनं क्ली स्नानकरणं तत्
पर्य्यायः । अवगाहः २ वगाहः ३
मज्जनं ४ निमज्जनं ५ डुवदिया
नानया इति भाषा ॥
अवगीतः त्रि ख्यातगर्हणः नि
न्दितः ॥ इत्यमरः दृष्टः ॥ इति
मेदिनी मुहुर्दृष्टः ॥ इति विश्वः
अवगीतं क्ली निर्वादः लोका
पवादः ॥ इति विश्वमेदिन्यौ ॥
अवगुण्ठनं क्ली योषाननावरक

संप्रवस्त्रं स्त्रीमुखाच्छादनवस्त्रं
घोमटा इतिख्याता इतिशब्दर
त्नावली मुद्राविशेषः तथाच
तन्त्रसारे सव्यहस्तकृतामुष्टिर्दी
र्घाधोमुखतर्ज्जनी अवगुंठनमुद्रेय
मभितोभ्रामिता मता शूल्यादि
मर्द्दने ॥

अवगुंठिका स्त्री अवगुंठनस्त्री
रवावरकवस्त्रं इतिशब्दरत्नावली

अवगुंडितं त्रि चूर्णितं । गुंडाकरा
इति भाषा इतित्रिकांडशेषः

अवगोरणं क्ली ताडनार्थं दंडादी
नामुद्यमः मारिवारनिमित्ते ठेंगा
उठान इति भाषा ॥ इतिब्राह्मणे

अवग्रहः पुं हस्तिरोधः प्रति
बंधकः ॥ हस्तिललाटं इति
मेदिनी ॥ गजसमूहः इतिहारा
वली ॥ स्वभावः इति त्रिकांड
शेषः ॥ ज्ञानविशेषः इतिहेम
चंद्रः प्रापः इत्यमरटीकायां
भरतादयः ॥

अवग्रहणं क्ली प्रतिरोधः ॥
अनादरः ॥ इति मेदिनी ॥

अवग्राहः पुं ग्रहदोषादिजन्य
वृष्टिव्याघातः सुका इतिभाषा
तत्पर्य्यायः वृष्टिविघातः २
अवग्रहः ३ इत्यमरः हस्ति ॥
ललाटं ॥ प्रायः इति तट्टीका

अवचटः पुं भूरन्ध्रे गर्त्तः इति
त्रिकांडशेषः ॥

अवघातः पुं तंडुलादिकंडने ।
कांडनयस्यप्रसिद्धिः इतिहेम
चंद्रः ॥ अयहतुः ॥

अवचस्करः त्रि अवचनस्यः
अवाच्य इति भाषा ॥

अवचूर्णितं त्रि चूर्णीकृतद्रव्यं
गुंडाकरा इतिभाषा । तत्
पर्य्यायः अवध्वस्तः २ अपध्वस्तः ३
इत्यमरः तट्टीकाच ॥

अवचूलः पुं ध्वजाग्रवद्धाधोमुख
वस्त्रं ॥ इति हेमचंद्रः ॥

अवचूलकं क्ली चामरं ॥ इति
त्रिकांडशेषः ॥

अवच्छिन्ने त्रि अवच्छेदकतानिरू
पकं । विशिष्टे ॥ इतिन्यायभाषा

अवच्छुरितं क्ली महाहास्यं इत्य
मरटीकायां भरतः ॥

अवच्छुरितकं क्ली महाहास्यं
इतिशब्दरत्नावली ॥

अवच्छेदः पुं परिच्छेदः । एक
देशः विशेषणत्वं ॥

अवच्छेदकं त्रि न्यायमतेअव्या
प्यवृत्त्यधिकरणसंबंधैकदेशः
इतरव्यावर्त्तकः ॥ विशेषणं ॥

अवच्छेदावच्छेदः पुं व्यापकत्वं
इतिन्यायभाषा ॥

अवज्ञास्त्री अनादरः अवहेला
इत्यमरः ॥

अवज्ञाते त्रि अवमानिते ।
अनादृते । तिरस्कृते इत्यमरः

अवज्ञानं क्ली अवज्ञा ॥

अवटः पुं खिलं गर्त्तः ॥
कूपः कुहकजीवी इति विश्व
मेदिन्यौ ॥

अवटः पुं गर्त्तः इतिहलायुधः

अवटीटः त्रि नतनासिकः खांदे
छेपडानेको यस्यप्रसिद्धिः त
त्पर्य्यायः अवनाटः २ अवभ्रटः ३
इत्यमरः ॥

अवटुः पुं स्त्री ग्रीवापश्चाद्भागः
घाड इतिख्यातः इत्यमरः ॥
कूपः गर्त्तः ॥ इति हेमचंद्रः
वृक्षभेदः इत्युणादिकोषः

अवडंगः पुं हट्टः इतिजटाधरः
कस्यचिन्मते अवडंक इतिपा
ठः ॥

अवडीनं क्ली पक्षिणाम
धोगमने पक्षिणामवरोहणं इ
तिजटा

अवतंसः पुं क्ली कर्ण
पूरः कर्णभूषणं शेखरः शिरो
भूषणं । तत्पर्य्यायः वतंसः २
उत्तंसः ३ इत्यमरः ॥

अवतमसं क्ली अल्पांधकारः
इत्यमरः

अवतारः पुं अवतरणं पुष्करि
ण्यादिः तीर्थः ॥ इतिमेदिनी
देवानां विशेषतो विष्णोर्मूर्त्य
न्तरेण पृथिव्यांवेशरूपेण पृथि
व्यामवतरणं । अवताराश्चस्वसं
ख्याः तेष्वेते प्रसिद्धाः ब्रह्मा १
वराहः २ नारदः ३ नरनारायणौ ४
कपिलः ५ दत्तात्रेयः ६ यज्ञः ७
ऋषभदेवः ८ पृथुः ९ मत्स्यः १०
कूर्म्मः ११ धन्वंतरिः १२ मोहिनी १३
नृसिंहः १४ वामनः १५ परशुरामः
१६ वेदव्यासः १७ रामः १८
बलरामः १९ कृष्णः २० बुद्धः २१
कल्की २२ इतिश्रीभागवते

अवतारणं क्ली भूतादिग्रहः
वस्त्राचले अर्द्धांस इतिविश्व
मेदिन्यौ ॥

अवतीर्णः त्रि अवतविशिष्टः
प्रादुर्भूतः जलादौकृतावरोहः

अवतोका स्त्री पतद्गर्भा गौः तत्
पर्य्यायः स्रवद्गर्भा २ गावडागाई
गावफेलागाई इतिभाषा ॥
इत्यमरः ॥

अवदंशः पुं सुरापानरुचिजनक
चर्वणद्रव्यं गजर इतिभाषा ॥



तत्पर्य्यायः भत्सनं २ [illegible]रः
विद्वेषः ३ संधानं ४ रोचकः ५
॥ इतिराजनिर्घंटः ॥
अवदातः पुं श्वेतवर्णः पीत
वर्णः इत्यमरः ॥ (हे
अवदात त्रि शुक्लगुणविशिष्ट।
पीतवर्णयुक्तं निर्मलं मनोज्ञ
इत्यमरः हेमचंद्रा ॥ (अप
अवदानं क्ली हर्त्तुकर्मप्रशस्त
वनिवृत्तं कर्म्म येकर्म्मप्रहतिते
सकले प्रशंसाके रेसेइसमाप्तकें
इतिभाषा तत्पर्य्यायः ॥ अप
दानं २ इत्यमरः तट्टीकाच ॥
खंडनं ॥ इति मेदिनी वीरणं
मूलमिति स्वामी ॥
अवदारणं क्ली खणित्रे खनता
इतिख्याते इत्यमरः ॥
अवदाहं क्ली वीरणमूलं इत्यमरः
अवदाहेष्टं क्ली वीरणमूलं
इत्यमरटीकायां भरतादयः
अवदाहेष्टकापथं क्ली उशीर
खस इतिभाषा इतिभरतः
अवदीर्णं त्रि द्रवीभूतहृतादि
तत्पर्य्यायः द्रुतं २ इत्यमरः
अवदोहः पुं दुग्धं इति ॥
त्रिकांडशेषः ॥
अवद्यं त्रि अधमं कुत्सितं
गर्हितं निकृष्टं इत्यमरः ॥
अवद्यं क्ली अनिष्टं इतिवोप
देवः पापं इतिपाणिनिः ॥
अवधानं क्ली मनोयोगः तत्
पर्य्यायः समाधानं २ प्रणिधानं
३ समाधिः ४ इतिहेमचंद्रः
अवधारणं क्ली निश्चयः ॥
अवधार्य्यः त्रि अवधारणीयः
निर्धार्य्यः ॥
अवधिः पुं अवधानं सीमा ॥
कालः विलं ॥ इति विश्व
मेदिन्यौ ॥
अवधीरत क अवज्ञायां अव
धीरयति इति वोपदेवीयकवि
कल्पद्रुमः ॥
अवध्यं त्रि मारणानर्हं वधा
योग्यं ॥ अनर्थकवाक्यं इति
विश्वमेदिन्यौ ॥
अवध्वंसः पुं परित्यागः नि
न्दनं अवचूर्णनं इतिमेदिनी
अवध्वस्तः त्रि परित्यक्तः नि
न्दितः ॥ अवचूर्णितः इति
मेदिनी ॥
अवनं क्ली प्रीणनं ॥ इत्यमरः
रक्षणं इति हेमचंद्रः गमनं
स्पृहा ॥ तर्पणं शोभनं ॥
अवनं प्रीतिः आलिंगनं

यावने प्रवेशने समा
हृतिः ग्रहणं ॥ वधः शक्तिः
अवगमने कामः ॥ करणे ॥
यतिअवधात्वार्थाः ॥
अवनतं नम्रं नतभागः ।
नेवा इतिभाषा तत्पर्य्यायः
अवग्रं २ आनतं ३ नतं ४
इत्यमरः तट्टीकाच
अवनद्धं क्ली आनद्धं मृदंगादि
वाद्यं इत्यमरटीकायांस्वामी
अवनयः पुं अवनायः निपा
तनं अधः पातनं इतिभरतः
अवनाटः त्रि नतनासिकः
खांदा छ्यडानाकव्यक्ति इति
भाषा तत्पर्य्यायः अवटीटः २
अवभ्रटः ३ ॥ इत्यमरः ॥
अवनायः पुं अवनयः अधो
नयनं नीचे फलान इतिभाषा
इत्यमरः ॥
अवनिः स्त्री पृथिवी इत्यमरः
अवनी स्त्री पृथ्वी इतिभरतः
त्रायमाणालता इतिराजनिर्घं
टः अवनीपतिः पुं राजा इति
जटाधरः ॥
अवंतिः पुं अवंतीदेशः इति
हेमचंद्रः नदीविशेषः इतिउ
णादिकोषः
अवंतिका स्त्री उज्जयनीनगरी
अयोध्यामथुरामायाकाशीकांची
अवंतिका पुरीद्वारवतीचैवसप्त
तामोक्षदायिकाः इति स्कंद
पुराने ॥
अवंतिसोमं क्ली कांजिकेकांजि
इतिभाषा इत्यमरसिंहः ॥
अवंती स्त्री मालवदेशस्थनागरी
उजैनइति ख्याता । तत्
पर्य्यायः उज्जयनी २ विशाला ३
पुष्पकरंडिनी ४ इतिहेमचंद्रः
अवंध्यः त्रि फलवान् फलकाले
फलयुक्तवृक्षः तत्पर्य्यायः फले
ग्रहिः २ फलेग्रहिः ३ इत्यमरः
अवपातः पुं रंध्रे गर्तः ॥
इतिहेमचंद्रः अधःपतनं
अवभृथः पुं दीक्षांतयज्ञः प्र
धानयागसमापकार्ययज्ञः यज्ञा
दिन्यूनाधिकदोषशांतिनिमित्तक
शेषकर्त्तव्यहोम इतियावत् ॥
इत्यमरः तट्टीकाच यज्ञावशेष
स्नाने इतिभरतः त्रिकांडशेषश्च
अवभ्रटः त्रि नतनासिकव्यक्तिः
खांदा इति भाषा इत्यमरः
अवमः त्रि अधमः निंदितः
इत्यमरः
अवमं क्ली तिथ्यंतद्वयस्पृष्टैदिन

वमः एकदिनएकतिथिविशेष
अपरतिथिरआद्यंतस्पर्श इतिया
आरोहणं ॥ लतोद्गमः इति
वत इति ज्योतिषशास्त्रे प्र
सिद्धं ॥
अवमतं त्रि अवज्ञातं अव
मानितं अनादृतं इत्यमरः
अवमतिः पुं स्वामी ईश्वरः।
पतिः प्रभुः नेता इतिजटा
अवमर्दः पुं पीडने मथने स्य
इत्यमरः घासादिसंपन्नदेस्य
परचक्रेणापीडनं इतिभरतः
शत्रुकृतगाढप्रहार इतिकेचित्
पदाक्रमणमितिकेचित् ॥
अवमानं क्ली अपमानेअमर्या
दा अवमानना स्त्री अवज्ञाअ
नादरः इत्यमरसिंहः ॥
अवमानितः त्रि कृतापमानः
अवज्ञातः अनादृतः इत्यमरः
अवमूर्द्धशायः त्रि अधोमुखशायी
अवनतामूर्द्धाअस्येत्यवमूर्द्धः
तथाविधः शेते इत्यवमूर्द्धशयः
अवयवः पुं अंशः इत्यमरः
अवरः त्रि चरमः इतिमेदिनी
कनिष्ठः अपकृष्टः ॥
अवरं क्ली गजजंघाजंघादिदेशः
इत्यमरमेदिन्यौ ॥
अवरजः पुं कनिष्ठभ्राता इत्य
मरसिंहः
अवरतः स ध्यर अवरस्मात्
अवलुंठनं क्ली लुंठने लोठ
वरमे इतिसिद्धांतकौमुदी
अवरतिः स्त्री विरामः निवृत्तिः
इत्यमरः ॥
अवरवर्णः पुं स्त्री शूद्रः इत्यमरः
अवरवर्णकः पुं स्त्री चतुर्थवर्णः
शूद्रः इतिशब्दरत्नावली
अवरव्रतः पुं सूर्यः इति
त्रिकांडशेषः ॥
अवरस्तात् अ अवरतः पश्चात्
इति सिद्धांतकौमुदी ॥
अवरा स्त्री दुर्गा इति विश्वः
अवरार्द्धः त्रि अवरार्द्धभवः
शेषार्द्धजातः ॥ इति केचित्
अवरीणः त्रि धिक्कृतेतिरस्कृते
निंदिते इत्यमरः ॥
अवरोधः पुं तिरोधाने ॥
राजस्त्रीगृहे राजगृहे इति
विश्वहेमचंद्रौ राजदाराः इति
मेदिनी ॥
अवरोधकः त्रि रोधकारकः
अवरोधकर्त्ता
अवरोधनं क्ली राजाभ्यंतरः अं
इत्यमरसिंहः रोधकरणं
अवराधिकः पुं राजांतःपुर

ध्यक्षः इतिहेमचंद्रः ॥
अवरोहः पुं अवतरणं ॥
आरोहणं लतोद्गमः ॥ इति
मेदिनी वृक्षमूलादग्रपर्य्यंत
गतालता शाखाशिफावोया
नामनाइतिभाषा इत्यमरः
स्वर्गः इतित्रिकांडशेषः ॥
अवरोहशाखी न पुं स्तनवृक्षः
इतिराजनिर्घंटः ॥
अवरोहिका स्त्री अश्वगंधालता
इतिराजनिर्घंटः ॥
अवरोही न पुं वटवृक्षः ॥ इति
राजनिर्घंटः ॥
अवर्णः पुं निंदा परीवादः
इत्यमरसिंहः ॥
अवलग्नः पुं क्ली मध्यदेशः
माजाइतिभाषा ॥ इत्यमरः ॥
अवलग्नः त्रि संलग्नः संयुक्तः
इतिमेदिनी ॥
अवलंबः पुं अवलंबने ॥
अवलंबनं क्ली आश्रये ॥
अवलंबितं त्रि अविलंबितं
शीघ्रं ॥ इति जटाधरः अधो
म्बायमाने कृतावलंबने आश्रिते
अवलक्षः पुं बलक्षः श्वेतवर्णः
अस्ति त्रि इत्यमरटीकायांस्वामी
अवलिप्तता स्त्री अहंकारः ॥
इतिहेमचंद्रः ॥
अवलीला स्त्री हेलाअनायासः
अवलुंठनं क्ली लुंठने लोठा
गडागडी इतिभाषा ॥
अवलेपः पुं अहंकारः लेपने
भूषणे इतिमेदिनी संगः
इतित्रिकांडशेषः ॥
अवलेपनं क्ली विलेपनेअक्षणं
माखाइतिभाषा ॥
अवलेहः पुं लेह्यौषधे तस्य
लक्षणपर्य्यायश्चयथा क्वाथादेर्यत्
पुनः पाकात् घनत्वं सा रसक्रिया
सोऽवलेहश्चलेहश्च सा इत्युच्य
तेबुधैः इतिवैद्यकपरिभाषा
अवलेहनं क्ली लेहने जिह्वा
द्वारास्वादने चाटेन इतिभाषा
अवलोकनं क्ली दर्शने आलो
कने इति हेमचंद्रः ॥
अवलोकितः पुं लोकनाथः
बुद्धः इतिविश्वमेदिन्यौ ॥
अवलोकितं त्रि निरीक्षितं
दृष्टं ॥ इति विश्वमेदिन्यौ प्रेक्षण
क्रियायां क्ली ॥
अवल्गुजः पुं सोमराजी इत्य
मरः कृष्णवर्णसोमराजी हाकुच
यस्यप्रसिद्धिः तस्यगुणाः वायु
कफकुष्ठ त्वग्दोषनाशित्वं इति

राजवल्लभः अस्यविवरणंवारुची शब्दे द्रष्टव्यं ॥
अववादः पुं आज्ञा निदा विश्वासः इतिमेदिनी ॥ (शाः
अवशः त्रि अवशीभूतः विव
अवशिष्टः त्रि शेषः उद्धृतः
अवश्यं अव्य निश्चयः तत्पर्यायः नूनं २ निश्चितं ३ इत्यमरः
अनायत्ते त्रि ॥ (ति
अवश्यायः स्त्री कुज्झटिका इ शब्दरत्नावली ॥
अवश्यायः पुं हिमं इत्यमरः गर्वः इति विश्वप्रकाशः ॥
अवष्फयणी स्त्री वष्कयणीवि २अस्त् तागौः इत्यमरटीकायांसार सुंदरी ॥
अवष्टब्धं त्रि अविदूरः समीपे
अवलंबिते आश्रिते इत्यमरः बद्धः रुद्धः इति भरतः ॥
आक्रांतः इति मेदिनी ॥
अवष्टंभः पुं स्वर्णं स्तंभः प्रारंभः इतिमेदिनी सौष्टवं इति हलायुधः ॥
अवष्वाणं स्त्री भक्षणं इति हेमचंद्रः ॥
अवस् अव्य व्यतिरेकः इतिकेचित्
अवसः पुं राजा सूर्यः इति सिद्धांतकौमुदी ॥

अवसं क्ली रक्षणं वैदिक ॥ प्राह्येयं ॥
अवसक्थिका स्त्री खट्वा तत्पर्यायः पर्यस्तिका २ परिकरः ३ पर्यंकः ४ ॥ इतिहेमचंद्रः
अवसथः पुं छात्रनिलयः पाठशाला चौपाडी यस्यप्रसिद्धिः इतिहेमचंद्रः ग्रामः इति शब्दरत्नावली गृहं इतिहलायुधः
अवसथ्यः पुं छात्रवेश्मचौपाडी इतिभाषा इतिहेमचंद्रः
अवसन्नः त्रि अवसादप्राप्तः विसन्नः ॥
अवसरः पुं प्रस्तावः मेत्रविशेष वर्षणं इति मेदिनी वत् सरः क्षणं इतिहेमचंद्रः ॥
अवसर्गः पुं स्वेच्छाचारः तत् पर्यायः प्रकाम्यं २ स्वच्छंद ३ अनुमननं ४ इति त्रिकांडशेषः
अवसर्पः पुं अपसर्पः चरः इत्यमरटीकायां भरतः ॥
अवसर्पिणी स्त्री जिनानांकाल विशेषः सप्त दशाकोटिकोटि सागरवर्षेण समाप्यते इति हेमचंद्रः ॥
अवसव्यं त्रि अपसव्यं दक्षिणं इति रायमुकुटः ॥

अवसादः पुं अवसन्नता तत् पर्यायः विषादः २ सादः ३ विषन्नता ४ इति हेमचंद्रः ॥
अवसानं क्ली क्रियासमाप्तिः शेषः तत्पर्यायः सातिः २ इत्यमरः मृत्युः सीमा ॥ इति हेमचंद्रः ॥
अवसायः पुं शेषः समाप्तिः निश्चयः इति मेदिनी ॥
अवसितं त्रि परिपक्वमर्दितधं न्यां तत्पर्यायः ऋद्धं २ इति ॥ भरतेमेदिन्यौ ज्ञाते अव सानगते समाप्ते तत्पर्यायः सितः २ इत्यमर मेदिन्यौ ॥
अवसेकिमः पुं वटकः वडा इतिभाषा इति हेमचंद्रः ॥
अवस्कंदः पुं विजिगीषूणांनि वेशस्थानं शिबिरं इति हलायुधः
अवस्कंदनं क्ली अवगाहनं इति भट्टः अवतरणं इतिमहा भारते ॥
अवस्करः पुं विष्ठा गुह्यं ॥ इत्यमर मेदिन्यौ समार्जन्यादि निक्षिप्तधूल्यादि इत्यमरटीकायां मथुरानाथः सारसुंदरीच
अवस्तात् अव्य अवरे पश्चात् ॥ प्रोषे अंते इतिपाणिनिः ॥

अवस्तारः पुं यवनिकादिः कानात् इत्यादिभाषा अवस्तीर्यतेऽने नेतिल्युट् आच्छादने चत्र
अवस्तु क्ली असद्वस्तु वेदांतमते अज्ञानादिसकलजडसमूहः ॥
अवस्था स्त्री दशा कालिकविशेषः इत्यमरः कौमारं पंचमाब्दांतं ॥ पौगंडं दशमावधि कैशोर माषोडशाद्यौवनंतु ततः परं आषोडशाद्वृद्धत्वं लक्षणान्वितं उ च्यते । वृद्धस्तु सप्ततेरूर्ध्वं वर्षी यान् नवतेः परं इति स्मृतिः
अवस्थाचतुष्टयं क्ली कालकृतचतु र्विधदशा यथा आपंचदशवर्षं बाल्यं । आत्रिंशद्वर्षं कौमारं । आपंचाशद्वर्षं यौवनं पंचाशत ऊर्द्ध्वं वृद्धत्वं इति वैद्यकशास्त्रं ।
अवस्थानं क्ली स्थितिः वासः
अवस्थितं त्रि कृतावस्थानं अवस्थिति विशिष्टं स्थितं
अवस्थितिः स्त्री अवस्थानं थाका इतिभाषा ॥
अवहलः पुं हलपृष्ठे इति हेमचंद्रः ॥
अवहारः पुं चौरः युद्धादि विश्रामः निमंत्रणं उपनेत व्याघ्रः ग्राहनामजलजंतुः ॥ इति



विम्बमेदिन्यो धर्म्मान्तरं स्वेति
प्राह रत्नावली ॥
अवहारकः पुं जलजन्तुविशेषः
हांगर इति ख्यातः जलहस्तीति
केचित्। तत्पर्य्यायः अवग्राहः
२ नक्रराजः ३ अवहारः ४ इति
प्राह रत्नावली चुल्लादिनिवर्त्तके
त्रि अवहालिका स्त्री प्राचीरः।
इति हारावली ॥
अवहितं त्रि विज्ञाते ॥
अवधानेगते इति धरणी
अवहित्था स्त्री क्ली आकारगुप्तिः
रत्यादिसूचकोमुखरागादिराका
रः आगवेकृतमितिवोपालितः
५५ लज्जादिनातस्यगोपनं इत्य
मरटीकायां भरतः ॥
अवहेलं क्ली स्त्री अनादरः ॥
अवज्ञा इत्यमरः ॥
अवहेलनं क्ली अवहेलाअव
मानना इति प्राह रत्नावली
अवहेलितं क्ली अनादरः अव
हेलातहि पिष्टे त्रि ॥
अवाक् ने त्रि वाक्यरहितः वोवा
इतिभाषा इत्यमरः क्विकंतस्य
धातोर्न अ समासेहयंप्रयोगः
दक्षिणे अधोमुखे पतद्धयोः
अवपूर्वांच धातोः प्रयोगः ॥

अवाक्पुष्पी स्त्री शतपुष्पा शलफ
इति ख्याता मिश्रेया मौरी
इतिभाषा ॥ इत्यमररत्नमाले
वृक्षविशेषः हेडाझुली चोर
झुली चोरखड्की इतिभाषा
तत्पर्य्यायः अधः पुष्पी २ मङ्गल्या
३ अमरपुष्पिका ४ इतिरत्न
माला ॥
अवाग्रं त्रि नम्रं अवनतं ॥
इत्यमरः ॥
न्दु
अवाङ् त्रि नीचवदनः तत्पर्य्यायः
अधोमुखः २ अवाङ्मुखः ३ अवा
चीनः ४ इत्यमरजटाधरौ ॥
अवाङ्मुखं त्रि अधोवदनं ॥
अवाची स्त्री दक्षिणदिक् इति
वोपदेवादयः अधोदिक्
इतिव्याडिः अधोमुखी ॥
अवाचीनं त्रि दक्षिणदिग्भववस्तु
अधोमुखः इतिस्वामिजटाधरौ
अवाच्यं क्ली कुवाक्यं ॥ तत्
पर्य्यायः। अनक्षरं २ इत्यमरः
अवाच्यः त्रि अनिन्दितः इति
स्मृतिः अवक्तव्यः ॥
अवाच्यदेशः पुं योनिः इति
त्रिकाण्डशेषः ॥
अवादी न त्रि अविरोधी अवि

वादी अवक्ता अवदनशीलः
अवार्य्यं त्रि वाधाशून्यं अनर्गलं
तत्पर्य्यायः निरर्गलं २ इत्य
मरः ॥
अवाध्यः त्रि वाधानर्हः वाधा
योग्यः अवाधनीयः अवाधितव्यः
अवानं त्रि शुष्कफलादि इति
प्राह रत्नावली ॥
न
अवापितधान्य त्रि अकृतवप
धान्ये रोपितधान्ये रोंपाधान
इतिभाषा ततवापितधान्याय
तयाकिंविहीनगुणं इतिराज
वल्लभः ॥
अवारं क्ली अर्वाक्तटं नद्यादेः
पूर्वतीरं पयार इतिभाषा ॥
अवारं क्ली अर्वाक्तटं नद्यादेः
पूर्वतीरं ॥ पयार इतिभाषा ॥
इत्यमरः ॥
अवारपारः पुं समुद्रः इति
हेमचन्द्रः
अवारपारीणः त्रि पारगः
नद्यादिपारगतव्यक्तिः इति
पाणिनिः
अवारिका स्त्री धन्याकंधनिया
इतिभाषा अवरिकावपाठः
इतिराजनिर्घण्टः ॥
अवारितं त्रि अकृतवारणं
अनिवारितं
अवारीणः त्रि पारगः नदीपार

गतः इति पाणिनिः ॥
अवार्य्य त्रि अनिवार्य्य अवारणीये
अवारितव्ये वारणायोग्ये
अवासाः स त्रि वस्त्ररहितः नग्नः
इत्यमरः ॥
अवास्तवं त्रि अयथार्थं मिथ्या
अवाह्यः त्रि परिरक्तकः ॥
अविः पुं सूर्य्यः पर्वतः
मेषः इत्यमरः नाथः मूषिक
कंबलः इति मेदिनी प्राचीर
वायुः इति देडी ॥
अविः स्त्री ऋतुमती इत्यमरः
अविकटः पुं मेषसमूहः
भेडारपाल इतिभाषा इति
अविकटः पुं मेषसमूहः
भेडारपाल इति भाषा इति॥
सैक्षिप्तसारपरिशिष्टं ॥
अविकं क्ली हीरकं इतिराज
निर्घण्टः ॥
अविगन्धिका स्त्री अजगन्धाहतः
इतिराजनिर्घण्टः ॥
अविगीतं त्रि अनिन्दितं
अविग्रः पुं करमर्द्दकवृक्षः इत्य
मरः पानिआमला इतिख्यातः
इतिसारसुन्दरी ॥
अविचारः पुं अन्यायः अन्या
वारविचाररहिते त्रि
अविचारितः त्रि अकृतविचारः
अविवेचितः ॥



अविज्ञः त्रि अप्रवीणः अनिपुणः
अनभिज्ञः अशिक्षितः अकृती
अविडीनं क्ली पक्षिणां आभिमु
ख्याभिगमनं इति महाभारते
अवितं त्रि आते रक्षिते ॥
इत्यमरः ॥
अवितथं क्ली सत्यं ॥ तद्व
शिष्टे त्रि ॥ इति शब्दरत्नावली
अवित्यजः पुं क्ली पारदः इति
राजनिर्घण्टः ॥
अविदूसं क्ली मेषदुग्धं इति
हेमचंद्रः ॥
अविद्धकर्णी स्त्री अवष्टम्भाक
नादि इतिख्याता भृंगराजः
इत्यमरटीकायां भरतः ॥
अविद्धकर्णी स्त्री विद्धकर्णी
इति भरतः ॥
अविद्यः त्रि विद्यारहितः अ
विद्वान् ॥
अविद्यमानः त्रि अवर्तमानः
सत्तारहितः अभावः ॥
अविद्या स्त्री अज्ञानं इत्यमरः
माया इति वेदान्त ॥
अविधिः पुं अविधानं शास्त्र
विहितं
अविनः पुं यष्टा योगकर्ता
इत्युणादिकोषः ॥

अविनयः पुं विनयाभावः ॥
अविनीते त्रि ॥
अविनाभावः पुं व्याप्तिः व्याप्य
निष्ठव्यापकनिरूपितधर्मः यथा
वह्निमान् धूमात् इत्यादौ धूमनिष्ठा
वह्निनिरूपिता व्याप्तिः इति
न्यायमीमांसयोर्मते ॥
अविनीतः त्रि विनयरहितव्यक्ति
तत्पर्य्यायः समुद्धतः २ ॥
इत्यमरः ॥
अविनीता स्त्री कुम्भली असती
इति हेमचंद्रः ॥
अविपटः पुं अवीनां विस्तारः
इति संक्षिप्तसारव्याकरणपरि
शिष्टकम्बलादिः ॥
अविप्रियः पुं पपामाकतृणे
इति राजनिर्घण्टः ॥
अविप्रिया स्त्री श्वेतालता इति
राजनिर्घण्टः ॥
अविमरीसं क्ली मेषदुग्धं इति
हेमचंद्रः ॥
अविमुक्तः पुं वाराणसीक्षेत्रे
इति काशीखंडे अत्यक्ते त्रि
अविरतं क्ली प्रान्ते अनवरतं
तद्वति त्रि इत्यमरः ॥
अविरलं त्रि विरलत्वरहितं
तत्पर्य्यायः । निविरीसं २ घनं


३ निविडं ४ निरन्तरं ५ सान्द्रं
६ नीरन्ध्रं ७ बहुलं ८ दृढं ९
गाढं १० इति हेमचंद्रः ॥
अविलम्बनं क्ली शीघ्रं अवि
लम्बितं इति रायमुकुटः ॥
अविलम्बितं क्ली विलम्बाभावः
तत्पर्य्यायः शीघ्रं २ त्वरितं ३
लघु ४ क्षिप्रं ५ अरं ६ द्रुतं ७
सत्वरं ८ चपलं ९ तूर्णं १०
आशु ११ इत्यमरः ॥
अविलम्बितः त्रि त्वरायुक्तः तत्
पर्य्यायः उद्धुडः २ इत्यमरः
अविला स्त्री मेषी भेडी इति
हेमचंद्रः ॥
अविवादी न् त्रि विवादरहितः
निर्विवादी ॥
अविवाहितः पुं स्त्री अनूढः
अकृतोद्वाहः अकृतोपयमः
अपरिनीतः अकृतपाणिग्रहः
आइवड इति भाषा ॥
अविवेकः पुं सदसद्विवेचना
हित्यं तद्वति त्रि ॥
अविवेकी न् त्रि विवेकशून्यः
अविवेचकः ॥
अविवेचकः त्रि विवेचनार हितः
अविवेकी ॥

अविशेषः त्रि विशेषरहितः
अभेदः तुल्यः विशेषाभावे पुं
अविश्वस्तः त्रि विश्वासानर्हः अक
तविश्वासः प्रत्ययायोग्यः ॥
अविश्वासा स्त्री चिरप्रसूता गौः
केलिनगाइ इति भाषा इति
शब्दचंद्रिका
अविश्रान्तः त्रि विश्रामरहितः
विश्रान्तिशून्यः अनवरतं क्ली
अविषः पुं समुद्रः इति कातन्त्री
योणादिवृत्तिः ॥ विषशून्ये त्रि
अविषा स्त्री निर्विषातृणे इति
राजनिर्घण्टः ॥
अविषी स्त्री नदी इत्युणादि
वृत्तावुज्ज्वलदत्तः ॥
अविसोढं क्ली मेषदुग्धे इति
हेमचंद्रः ॥
अविस्पष्टं क्ली अस्पष्टवाक्यं तत्
पर्य्यायः क्लिष्टं २ इत्यमरः ॥
अवी स्त्री ऋतुमती । इति हेम
चंद्रः ॥
अवीचिः पुं नरकविशेषः इति
शब्दरत्नावली वाच्यलिंगस्तु तरंग
शून्ये ॥
अवीचिमयः पुं नरकभेदः यः
साक्षादौ अनृते वदति स निरव

लेवेऽवीविमयेऽथःशिरानिपात्य तेयत्र इतिश्रीभागवते ॥
अवीरः त्रि सत्वरहितः निर्वीर्य्यः इति मेदिनी ॥
अवीरा स्त्री अजातापत्यविधवा इतिस्मृतिः निष्पतिसुता इत्य मरमेदिन्यौ
अवेधः पुं गोवत्सकः वाछुर इतिभाषा इति शब्दचंद्रिका अस्तेये त्रि ॥
अवेलः पुं अपलापः अपह्नवः इतिमेदिनी ॥
अवेला स्त्री पूजावर्जितं विवान गुया इतिभाषा इतिमेदिनी
अवेक्षणं क्ली अवेक्षादर्शने अवेक्षा स्त्री प्रत्यवेक्षणं।
प्रत्यक्षदृष्टिः तत्पर्य्यायः प्रति जागरः २ इत्यमरः ॥
अवैधं त्रि विध्यविषयः विधि विवर्जितं विधिप्राप्तभिन्नं॥
अवोदं त्रि आर्द्रं इति जटा॥
अवोधः त्रि निर्बोधः अज्ञानः
अह्नः पुं वत्सरः मेघः मुस्ता इतिरायमुकुटः सारसंदरीव
अव्यक्तः पुं विष्णुः। शिवः॥ कंदर्पः इति मेदिनी मूर्खः इतिहेमचंद्रः अस्फुटे त्रि

अव्यक्तं क्ली प्रकृतिः आत्मा इतिहेमचंद्रः महदादिपर मात्मा इति मेदिनी ॥
अव्यक्तरागः पुं ईषल्लोहितवर्णः तत्पर्य्यायः अरुणः २ इत्यमरः
अव्यंगा स्त्री शूकशिम्बी अंग रहिते अविकलांगेव त्रि
अव्यंजनः पुं शृंगहीनपशुः इतिहलायुधः अस्फुटे त्रि
अव्यंडा स्त्री अव्यंडा आलकु शीतिभाषा ॥ इतिकुत्रचित्अमर कोषपाठः ॥
अव्यथः त्रि पीडारहितः व्यथा शून्यः सर्पे पुं इतिमेदिनी
अव्यथा स्त्री हरीतकीपद्मचारिणी इत्यमरः ॥
अव्यथिः पुं अश्वः वेदप्रयुक्त प्रयोगोयं ॥
अव्यथिषः पुं समुद्रः सूर्य्यः इतिसिद्धांतकौमुद्यां उणादिवृत्तिः
अव्यथिषी स्त्री पृथिवी अर्द्धरात्रं इतिसिद्धांतकौमुदी ॥
अव्यथ्यः त्रि व्यथाशून्यः इति पाणिनिः ॥
अव्ययं क्ली पुं शब्दविशेषः तत्र येषुविभक्तिर्नतिष्ठति अतएवलिंग त्रयाविकृतं तथाचकातंत्रे।

सदृशंत्रिषुलिंगेषु सर्वासुचविभक्तिषु वचनेषुच सर्वेषु यन्नव्येति तदव्ययं ॥
अव्ययः पुं विष्णुः व्ययरहितेत्रि इतिमेदिनी ॥
अव्यर्थः त्रि अमोघः सफलः
अव्यवसायवान् त्रि व्यवसाय रहितः अव्यवसायी तत्पर्य्यायः शिकुः २ इतित्रिकांडशेषः
अव्यवस्था स्त्री अवसिद्धांतः अविधिः शास्त्रविरुद्धव्यवस्था
अव्यवस्थितः त्रि नीतिशास्त्रादि व्यवस्थानभिज्ञः सिद्धांतरहितः
अव्यवहार्य्यं त्रि व्यवहारायोग्यं अव्यवहरणीयं ॥
अव्यवहितं त्रि व्यवधानशून्यं तत्पर्य्यायः संसक्तं २ अप दांतरं ३ अपदांतरं ४ इत्यमरः तट्टीकाच
अव्यवस्थितः त्रि अकृतव्यवहारः
अव्याजः पुं छलाभावः शौद्धि
अव्याप्यं त्रि अव्यापनीयं।
व्याप्तिरहितं अनधीनं ॥
अव्याप्यवृत्तिः त्रि किंचिदवच्छेदेवृत्तिः स्वसमानाधिकरणाभाव प्रतियोगीतियावत् दैशिक कालिकभेदेन सद्विविधः तत्प
र्य्यायः प्रादेशिकः २ आत्मनो विशेषगुणाः बुद्धि १ सुख २ दुःख ३ इच्छा ४ द्वेष ५ यत्न ६ धर्म्म ७ धर्म्म ८
भावनाख्यसंस्काराः ९ आकाशस्य विशेषगुणः शब्दः १० सामान्यगुणेषु संयोग ११ विभागौ १२ एतेसर्वे अव्याप्यवृत्तयःस्युः इतिन्याय भाषा ॥
अश ऋ उ. व्याप्तौ समूहे इतिवोपदेवीयकविकल्पद्रुमः अशभोजने इति कवि कल्पद्रुमः ॥
अशकुंभीस्त्री पाणीयपृष्ठजः पाना इतिभाषा इतिरत्नमाला
अशक्यं त्रि अशकनीयं असाध्यं
अशक्तं त्रि शक्तिरहितं असमर्थं
अशत्रुः पुं चंद्रः इतिशब्दचंद्रिका शत्रुरहितेमित्रेव त्रि ॥
अशनं क्ली भक्षणे अन्नः इतिहेमचंद्रः
अशनः पुं असनवृक्षः पीत शालवृक्षः इतिरायमुकुटः
अशनपर्णी स्त्री वृक्षविशेषः तत्पर्य्यायः वालकः २ शीतलः ३ शीतलकातकः ४ असनपर्णी ५ सनपर्णी ६ शनपर्णी ७ शीतः ८ शीतकः ९ अपराजिता १०



मारडीइतिख्याता इतिशब्द
रत्नावली ॥
अशूनाया स्त्री भोजनेच्छा तथा
इत्यमरः ॥
अशिनायिते त्रि क्षुधिते इत्य
मरः
अशनिः पुं स्त्री वज्रं इत्यमरः
विद्युत् ॥
अशर्म्म ३ क्ली कष्टे दुःखितहि
श्लिष्टेत्रि इति जटाधरः ॥
अशाखा स्त्री क्षुद्रतृणं इति
राजनिर्घण्टः
अशितं त्रि भुक्तं खादितं ॥
तन्नं इति हेमचन्द्रः ॥
अशितंगवीनं त्रि आशितंग
वीनं पूर्वंगवादिचरितस्थानादि
इत्यमरटीकासारसुन्दरी ॥
अशित्रः त्रिः चौरः इत्युणादि
कोषः ॥
अशिरं क्ली हीरकं इतिराज
निर्घण्टः ॥
अशिरः पुं अग्निः राक्षसः ॥
सूर्य्यः इतिमेदिनी ॥
अशिरा स्त्री अशिरराक्षसी
इत्युणादिकोषः ॥
अशिश्विका स्त्री अनपत्याकन्या
पुत्रविहीनास्त्री इतिशब्दरत्नावली

अँठ कुडी इतिभाषा
अशिश्वी स्त्री अशिश्विका इत्य
मरः ॥
अशिक्षितं त्रि शिक्षारहितं ॥
अनिपुणः अनभिज्ञः ॥
अशीतिः त्रि संख्याविशेषः
८० आशीइतिभाषा ॥
अशुद्धं त्रि अपवित्रे अकृत
शोधने ॥
अशुभं क्ली पापे इतिहेमचन्द्रः
अमंगलं तद्युक्तेत्रि ॥
अशृतं त्रि अपक्वं इतिरत्न
माला
अशेषं त्रि शेषरहितं निः
शेषं सर्वं इत्यमरः ॥
अशोकं क्ली पारदे इति
मेदिनी शोकरहिते त्रि
अशोकः पुं स्वनामख्यातपुष्प
वृक्षविशेषः तत्पर्य्यायः ।
शोकनाशः २ विशोकः ३ वंजुलो
द्रुमः ४ वंजुलः ५ मधुपुष्पः ६ अप
शोकः ७ कंकेल्लिः ८ केलिकः ९
रक्तपल्लवः १० चित्रः ११ विचित्रः १२
कर्णपूरः १३ सुभगः १४ दोहली
१५ ताम्रपल्लवः १६ रोगितरुः १७
हेमपुष्पः १८ रामा १९ वामांघ्रि
घातनः २० पिण्डीपुष्पः २१ नटः २२

पल्लवद्रुः २३ अस्यगुणाः शीतत्वं
हृद्यत्वं पित्तदाहश्रमापहत्वं ।
गुल्मशूलोदराध्माननाशित्वं
कृमिकारकत्वंच इतिराजनिर्घण्टः
अशोकरोहिणी स्त्री कटुरोहिणी
कटुकीतिभाषा इत्यमरः ॥
अशोका स्त्री कटुकी इत्यमरः ।
अर्हतां शासनदेवताभेदः ॥
इतिहेमचन्द्रः ॥
अशोकारिः पुं कदम्बवृक्षः
इतिशब्दचन्द्रिका ॥
अशोचः पुं शोकाभावः ।
तत्पर्य्यायः अनहंकृतिः इति
त्रिकाण्डशेषः ॥
अशोच्यं त्रि शोकायोग्यं ॥
अशौचं क्ली शुचित्वाभावः स्व
तौतु वैदिककर्मानर्हत्वप्रयो
जकसंस्कारविशेषः विहितकर्म्म
विरोध्यदृष्टविशेषः तदनेक
विधं तत्रसपिण्डत्वोक्तशौचानि
संगृह्यन्ते ॥
अथसपिण्डाद्यशौचं १ ॥
जननेमरणेच सप्तमपुरुषपर्य्यन्तं
सम्पूर्णाशौचं तत्रविप्रदशाहः
क्षत्रियस्य द्वादशाहः वैश्यस्य
पंचदशाहः शूद्रस्यमासः ॥
जननेमरणेच दशमपुरुषपर्य्यन्तं

सर्वेषां वर्णानामहः चतुर्दश
पुरुषपर्य्यन्तं पक्षिणी
जननेमरणेच जन्मनामस्मृतिपर्य्यन्तं
सर्ववर्णानामेकाहः जन्मनामस्मृ
तेरभावे स्नानमात्रं ॥
मातामह मरणे सर्वेषांवर्णानां
त्रिरात्रं ॥
मातृस्वस्रीय पितृस्वस्रीय मातुल
पुत्रभागिनेय मरणे सर्ववर्णानां
पक्षिणी ॥
पितामह भगिनीपुत्र पितामही
भगिनीपुत्र पितामहीभ्रातृपुत्र
रूपपितृबांधवत्रय मरणे सर्ववर्णा
नांपक्षिणी ॥
मातामहभगिनीपुत्र मातामही
भगिनीपुत्र मातामहीभ्रातृपुत्र
रूपमातृबांधवत्रय मरणे सर्ववर्णा
नामहोरात्रं ॥
एकग्रामवासिस्वगोत्रज मरणे
सर्ववर्णानामहोरात्रं ॥
औरसव्यतिरिक्तपुत्रजननमरणयोः
परपूर्वभार्य्या प्रसव मरणयोश्च
सर्ववर्णानांत्रिरात्रं ॥
आचार्य्यमरणे ब्राह्मणादिव
र्णत्रयाणां त्रिरात्रं ॥
समानजातीयोत्कृष्टजातीयपुरु
षांतरसंगृहीतस्वभार्य्या मरणे



*भ्रातृ

सर्वेषां त्रिरात्रं हीनवर्णेषु युक्ता
सरणेन नाशौचं ॥
भगिनीपुत्रगृहे मातृस्वसृ भ्रातृपुत्र
गृहे पितृस्वसुः पैतृष्वसीयगृहे
*पुत्रस्य जामातृगृहे श्वश्रूश्वशुरयोर्म
रणे भगिनीपुत्रादिवर्णानां त्रिरात्रं
श्वश्रूश्वशुरयोः सन्निधिमरणे सर्व
वर्णानां त्रिरात्रं ॥
श्वश्रूश्वशुरयोरेकग्रामस्थित
योर्मरणे सर्वेषां पक्षिणी ॥
श्वश्रूश्वशुरयोर्भिन्नग्राममरणे
सर्वेषामहोरात्रं ॥ (स्वसृ
भगिनी मातुलानी मातुलपितृ
मातृस्वसृ गुर्वङ्गना मातामहीम
रणे ॥ सर्वेषां पक्षिणी ॥ (स
आचार्यपत्नीपुत्रयोरुपाध्याये
मातुलवैमात्रेयस्य श्यालकसब्रह्म
ध्यायिनः शिष्यस्य च मरणे सर्व
वर्णानामहोरात्रं ॥
मातृस्वसृपुत्र पितृस्वसृपुत्र मातु
लपुत्ररूपात्मबांधवत्रयमरणे
सर्ववर्णानां पक्षिणी ॥
प्रथमभर्त्रेनोढा तेनैव जनितपुत्रं
पुत्रसहितैवान्यमाश्रिता यस्तेन
पिजनितपुत्रा तयोः पुत्रयोर्यथा
संभवं प्रसवमरणयोर्द्वितीयपुत्र
पितृस्त्रिरात्रं तत्सपिंडानामेक

रात्रं। तद्द्वितीयपितुर्मरणे तथ
विधपुत्रयोरपि त्रिरात्रं तथा विध
पुत्रयोः परस्परं प्रसवमरणयोर्मात
जात्युक्ताशौचं ॥
दौहित्रमरणे सर्वेषां वर्णानां
पक्षिणी ॥
पितृमातृ
त्रिरात्रं ॥ (स्वप्रभृ
यदि मातुल मातृस्वसृ पितृस्व
तीनां दहनवहनं करोति तदा सर्वे
षां वर्णानां त्रिरात्रं
मातामहादीनां त्रिरात्राभ्यंतरमरण
श्रवणेन शेषेण शुद्धिः तत्काले
त्तरश्रवणेन नैशौचं किंत्वाचारात्
स्नानमात्रं ॥
अथ बालाशौचं ॥ २ ॥
नवमादिमासजातबालस्याशौचका
लाभ्यंतरे मरणे मातापित्रोरस्पृ
श्यत्वमुक्तं तदेवसु जातस्य जननशौ
चं ज्ञातीनामशौचं नास्ति ॥
नवमादि मासमृतजातयोः कन्या
पुत्रयोः पित्रादि सपिंडानां मातुश्च
जननाशौचं तत्र ब्राह्मणानां दशाहं
शूद्राणां मासः ॥
पुत्रजन्मनि पितुः सचेलस्नानं पु
त्रमुखदर्शनात् परं पुनः सचेलस्नानं
पुत्रकन्या जनने ब्राह्मणस्य दशाह

नंतरं लौकिककर्माधिकारः
पुत्रजनने ब्राह्मणस्य विंशतिरात्रो
त्तरस्नानात् वैदिककर्माधिकारः
कन्या जनने ब्राह्मणस्य मासोत्तरस्ना
नात् वैदिककर्माधिकारः ॥
शूद्रायाः कन्या पुत्र जननेऽप्यो
दशाहोत्तरं लौकिककर्माधिकारः
वैदिककर्माणि तु मासोत्तरस्ना
नात् ॥ शुद्धिः ॥
एतत्सर्वं कन्यापुत्रयोर्विद्यमानत्वे
बोध्यं ॥
(जा
जननाशौचोत्तरं षण्मासाभ्यंतरम
तदंतमरणे मातापित्रोरेकाहः ॥
सपिंडानां तु सद्यः शौचं ॥
(मा
षण्मासाभ्यंतरेऽपि जातदंतस्य मरणे
तापित्रोस्त्र्यहः सपिंडानामेकाहः
षण्मासोपरि द्विवर्षपर्यंतं बालक
मरणे मातापित्रोस्त्र्यहः। सपिंडानाम
कृतचूडस्यैकाहः कृतचूडस्त्र्यहः
द्विवर्षोपरि मासत्रयाधिकषड्वर्ष
पर्यंतमनुपनीतबालकस्य मरणे
मातापित्रादिसपिंडानां त्र्यहः
तन्मध्येऽप्युपनीतस्य मरणे दशाहः
मासत्रयाधिकषड्वर्षोपरि मरणे
पित्रादिसपिंडानां दशाहः
शूद्रस्य षण्मासाभ्यंतरे अनुत
परं तस्य मरणे त्रिरात्रं
उत्पन्नदंतस्य ॥

पंचाहः ॥
षण्मासोपरि द्विवर्षाभ्यंतरे अकृतचूड
मरणे पंचाहः तत्रापि कृतचूडमरणे
द्वादशाहः ॥
द्विवर्षोपरि षड्वर्षाभ्यंतरे मरणे द्वादशा
हः। अत्रापि देवात्कृतो द्वाहे मासो
व्यवह्रियते ॥ षड्वर्षोपरि मासः
अथ कन्याशौच ॥ ३
कन्याया जन्मावधि द्विवर्षाभ्यंतरे मरणे
सर्ववर्णानां पित्रादिसपिंडानां सद्यः
शौचं। द्विवर्षोपरि वाग्दानपर्यंत
मेकाहः ॥
वाग्दानोत्तरं विवाहपर्यंतं कन्याम
रणे भर्तृकुले पितृकुले च त्रिरात्रं
विवाहोत्तरं मरणे भर्तृकुल एव
संपूर्णाशौचं ॥
दंतजन्मपर्यंतं भगिनी मरणे सोदर
भ्रातुः सद्यः शौचं ॥
चूडापर्यंतं भगिनी मरणे एक
रात्रं विवाहपर्यंतं त्रिरात्रं
दत्तकन्यायाः पितृगृहे प्रस
वमरणयोः पित्रोः शयनासनादि
संसर्गे मृत्योस्त्रिरात्रं तथाविधवैश्य
वर्णानां एकरात्रं तथाविधसं
सर्गिणस्तु ॥
सर्वेषां पूर्णाशौचं ॥
एतत्सर्वं सर्ववर्णसाधारणं ॥

अथ गर्भस्रावाशौचं
षण्मासाभ्यन्तरे गर्भस्रावे सर्ववर्णानां
मेवाशौचं तच्च लौकिकवैदिक
कर्मणो गर्भमाससमसंख्यादिना
व्यापकं ॥
द्वितीयमासावधि गर्भस्रावे मा
ससमसंख्यादिनाधिकाद्येकदिना
त्पर ब्राह्मणानां वैदिककर्माधिकारः
क्षत्रियाया गर्भमाससमसंख्यादि
नाधिकात् दिनद्वयात् वैश्य
यादिनत्रयात् शूद्राया षड्दिनात्
सप्तमाष्टमे मासयोर्गर्भपतने मातुः
संपूर्णाशौचं। सगुणसपिण्डानां सद्यः
शौचं निर्गुणपित्रादिसपिण्डानां
महोरात्रं पक्षेष्टो वरणशीलानां
सपिण्डानां त्रिरात्रं तत्र जातस्य त
द्दिन एव मरणे एवं ज्ञेयं ॥
सप्तमाष्टमे मासजातबालस्य ज
न्मद्वितीयदिनादौ मरणे नवमादि
मासजातबालकमरणवदशौ
चं। तच्च बालाशौचे विहितं ॥
अथ मृतविशेषाशौचं ॥५
शास्त्राननुमतबुद्धिपूर्वकात्म
घातिनो नाशौचं दाहश्राद्धादि
प्रशास्त्रानुमत्या अनशनादिकृतस्य
मादादनशनाशनिवह्निजललोष्ठ
देशप्रपतनसंग्रामशृंगिदंष्ट्रिमध्याघात
विषवंशलतोरहतस्य त्रिरात्रं
श्रृंग्यादिभिः स्त्रियाच क्रीडां कुर्वतः
प्रमादात् प्रमादहतस्य नाशौचादि॥
नागविप्रियकारित्वेन तद्धतस्य मर
णे द्वेषप्रहृतविप्रहतस्य चौर्य्या
दोषेण राजहतस्य कलहे कृत्वा
वा प्रत्यार्थिसमानवर्णेर्हतस्य वि
प्रादेर्व्याधिजनकौषधस्य विषस्य व
क्रेयवारतुम्मर्मरणे पाषण्डाश्रितस्य
नित्यपरापकारिणः क्रोधात्स्वयं
प्रायविषवह्न्यादिशस्त्रोद्बंधनजलगिरि
वृक्षप्रपातमृतस्य च मासयादिमपपात
निर्माल्य विप्रादेर्मनुष्यवधस्यानाधि
कारिणः कष्टदेशात् पतनभगरोगस्य
पुंकर्माशक्तनपुंसकस्य ब्राह्मणविप्र
पराधकरणनिहतस्य बुद्धिपूर्वक
ब्राह्मणहतस्य च महापातकिनाशनात्
कुष्टिनश्च एवं विधपतितानां मरणेव
नदाहाशौचादिकं कार्य्यं ॥ तत्कृत्वा
तप्तकृच्छ्रद्वयं कुर्य्यात् ॥
म्लेच्छतस्करादिभिर्युद्धे स्वाम्यर्थहत
विप्रादेर्दाहाशौचादिकमल्पेव॥
कृतप्रायश्चित्तगलत्कुष्टिना
दाहाशौचादिकं कार्य्यं ॥
शस्त्रेणाभिमुखहतस्य तु सद्यः शौचं
दाहादि च ॥
गवार्थे ब्राह्मणार्थे वादेशनृपुद्धेहत
स्याहोरात्रमशौचं ॥

नृपतिरहितयुद्धे लगुडादि इ
तस्य पराङ्मुख हतस्य त्रिरात्रा
शौचं ॥
गोविप्रपालनेऽभिमुखयुद्धे इतस्य
सद्यः शौचं पराङ्मुख इतस्य त्रि
रात्रं ॥
लौकिकपारिभाषिकोभयशास्त्र
ज्ञातेतरवृत्तमरणे सर्ववर्णानां स
प्ताहमध्ये अहःसप्ताहादूर्ध्वं संपू
र्णाशौचं ॥
लौकिकपारिभाषिकशास्त्रज्ञात
मरणे अहमध्ये अहः अहादूर्ध्वं प
कृताशौचं ॥ (ज्ञातः)
लौकिकशास्त्रज्ञातः खड्गश्वभादि
पारिभाषिकशास्त्रज्ञातस्तु पत्तिम
त्यमृगैर्यत्तदेहिदृष्टिगानखैर्हताः
नाः नष्टा भार्यैर्वज्राग्निविषर्वत्थनैः
मृताजलप्रवेशेन तेवैशास्त्रहताः
स्मृताः इति देवीपुराणोक्तः ॥
अथ विदेशस्थाशौचं ॥६
अशौचकालाभ्यन्तरे विदेशस्थज(न)
नमरणाशौच श्रवणे शेषाहोभिः
शुद्धिः ॥
अशौचकालोत्तरं विदेशस्थ
ज्ञातिजननश्रवणेऽशौचं ना।
स्त्येव पुत्रजननश्रवणेनरस्य चे
ल स्नानात् शुद्धिः ॥
संपूर्णाशौचविमरणे वर्षाभ्यन्तरश्रवणे
सपिण्डानां त्रिरात्रेण शुद्धिः। सचेलस्ना
नादंगास्पृश्यत्वनिवृत्तिः वर्षोत्तर
श्रवणे सपिण्डानां स्नानेन शुद्धिः॥
मातृपितृभर्तृमरणे वर्षान्तरश्रवणे
पुत्रपत्न्योरेकाहेन शुद्धिः द्विवर्षो
त्तरश्रवणे स्नानमात्रं ॥
पूर्णाशौचातिक्रम एव विदेशस्थ
मरणाशौचश्रवणे अहाशौचं न खण्डा
शौचातिक्रमे ॥
यत्र मरणमात्रे कृते विशिष्य मासादि
कमज्ञातं तत्र श्रवणादिनावधि स्वजात्यु
क्तमशौचं। खण्डाशौचेपि महापुरु
नियानिय एकारात्रं ॥
अथाशौचसंकरः ॥७
जननाशौचमध्ये जननाशौचान्तरपा
ते मरणाशौचमध्ये मरणाशौचान्तर
पाते च पूर्वाशौचकालेन सर्ववर्णा
नां शुद्धिः ॥
पूर्णजननाशौचादिने पूर्णजननाशौ
चान्तरपाते पूर्णमरणाशौचान्तदिने
पूर्णमरणाशौचान्तरपाते च पूर्णा
शौचान्तिमदिनोत्तरदिनद्वयेन
शुद्धिः ॥
पूर्णजननाशौचान्तिमदिवसीयोत्तर
प्रभाते सूर्योदयात् पूर्वं तत्पाते
सूर्योदयावधि दिनत्रयेण शुद्धिः

एवं मरणाशौचेपि ॥
पूर्वोक्तवर्हित दिनद्वयत्रयाभ्यंत
राशौचांतरपातेऽपि पूर्वाशौच
कालेन शुद्धिः ॥
अशौचत्रितयांतदिनकृत्यंहोरा
केमेकदेव तद्द्वितीयदिन कृत्यं
श्राद्धादिकं तत्परादिने ॥
अत्रैव अशौचांतिमदिनतत्प्र
तयोः स्वपुत्र जनने पितृमातृभ
र्तृमरणे च न दिनद्वयत्रयवृद्धिः किं
तु स्वपुत्र जननावधि पितृमातृ
भर्तृमरणावधि च पूर्णाशौचं ॥
ज्ञातिजननाशौचकालेन शुद्धिः
नेज्ञातिजननाशौचकालेन
शुद्धिः परार्द्धे तु स्वपुत्रजनना
शौचकालेन शुद्धिः ॥
ज्ञातिमरणाशौचकाल मध्ये
पितृमातृभर्तृमरणे पूर्वार्द्धे पूर्वाशौ
चकालेन परार्द्धे पराशौचकालेन
शुद्धिः ॥
स्वपुत्र जननाशौचांतिमदिनत
त्प्रभातयोर्ज्ञातिजनने पितृमातृ
भर्तृमरणाशौचांतिमदिने तत्प्रभा
तयोर्ज्ञाति मरणेपि न दिनद्वयत्र
यवृद्धिः किंतु पूर्वाशौचकालेन
शुद्धिः ॥
स्वपुत्र जननाशौचांतिमदिनतत्

पूर्वार्द्धे स्वपुत्र जनन

प्रभातयोः स्वपुत्रांतर जनने एवं
मातृमरणाशौचांतिमदिन तत्प्रभा
तयोः पितृ मरणे पितृमरणाशौचां
तिमदिन तत्प्रभातयोर्मातृमरणे
व्यक्रमेण दिनद्वयत्रयवृद्धिः ॥
जननाशौचद्वयसन्निपाते पूर्वजातो
यदाशौचकालाभ्यंतरे मृतस्तदा स
पिंडानां सद्यः शौचेन पूर्वाशौच
नाशः तत्राप्यादेव परार्द्धे जातवा
लस्य मातृपितृव्यतिरिक्तसपिंडानां
पूर्वार्द्धे जातवालस्य माता पित्रादि
सकलसपिंडानां परजननाशौचस
निवृत्तिः पूर्वजातवालस्य माता
पित्रोस्त्वस्पृश्यत्वयुक्त स्वस्वजा
त्युक्तजननाशौचं ॥
जननाशौचद्वयसन्निपाते प्रथमजनना
शौचपूर्वार्द्धे जातवालमरणे तन्मा
तापित्रोः पूर्वाशौच कालपर्यंते
ऽगास्पृश्यत्वयुक्तमशौचं ॥
परार्द्धे जात वालमरणे तु जनना
वधि तन्मातापित्रोरगास्पृश्यत्वयुक्त
स्वजात्युक्त जननाशौचं । विशेषा
तिरिक्तसमसंख्यादिवसीयजननम
रणाशौचयोः सन्निपाते मरणाशौच
कालेन शुद्धिः असमसंख्यादिवसीय
जननमरणाशौचयोः सन्निपाते तु
दीर्घाशौचकालेन शुद्धिः ॥

शूद्रतरायाः पुत्रजननमयुक्तविंश
तिरात्राशौचाभ्यंतरेयत्पुमरणेऽपि पुत्र
जननाशौचकालेन शुद्धिः ॥
पूर्वोक्त सपिंडद्वय जननवर्हिता
शौचमध्ये पितृमातृ भर्तृमरणेऽपि
वर्हित सपिंडद्वयजननाशौचका
शुद्धिः एकाहे पूर्णाशौचे सपिंड
द्वय मरणे यावदशौचं तावत सर्व
सपिंडानामस्पृश्यत्वं ॥
सकुल्यपर्याय समानोदकमर
विपुदादिमरणेपि शौचं त्रिरात्रे
ऽगास्पृश्यत्वमेकरात्रे तेनैव तत्त्रि
रात्रद्वयं गुरु विदेशस्य मरणेऽप्यात्
अशौचमध्ये अकृतसपिंडमरणे त्रि
रात्राशौचं अगास्पृश्यत्वं स्नानायने
ऽतत्सत्वत्तु एषं सन्निपाते गुरु
नैव शुद्धिः ॥
विदेशमृतज्ञाति त्रिरात्राशौचस्य
लघनः विदेशमृतपितृमातृभर्तृ
त्रिरात्रा शौचेन गुरुणा शुद्धिः
तुल्य त्रिरात्राशौच सन्निपाते
पूर्वेणैव शुद्धिः ॥
कन्यापुत्रं यमजातं पत्नी सर्वेषां
मातुर्मासेन शुद्धिः पित्रादि स।
पिंडानां स्वजात्युक्ताशौचं ॥
तयोरशौचमध्ये एकतरमरणे शू
द्राभिन्नमातुः कन्यामरणात् सद्यः

शुद्धिः ननु पुत्रमरणात् पित्रादिस
पिंडानां तु प्रथम जातमरणा शुद्धिः
ननु परजातमरणात् शूद्राया यम
जातयोः प्रथमजातमरणाशौचेन
शुद्धिः ननु परजातमरणात्
पित्रादि सपिंडानां तु प्रथमजातमर
णात् शुद्धिः ननु परजातमरणात्
एवमन्यद्ज्ञाह्यं सुधीभिः ॥
अथ शवानुगमनाद्यशौचं ८
ब्राह्मणशवानुगमने ब्राह्मणस्य
सचेलस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः
क्षत्रिय शवानुगमने ब्राह्मणस्य
एकाहेन शुद्धिः ॥
वैश्यशवानुगमने ब्राह्मणस्य
द्व्याहेन शुद्धिः ॥
शूद्रशवानुगमने ब्राह्मणस्य प्राणा
यामशतेन दिनत्रयेणैव शुद्धिः
प्रमादात् शूद्रशवानुगमने ब्रा
ह्मणस्य जलावगाहनाग्निस्पर्श
घृतप्राशनैः शुद्धिः ॥
अनाथ ब्राह्मणस्य धर्मबुद्ध्या
दहनवहनयोः स्नानघृतप्राश
नाभ्यां सद्यः शौचं ॥
लोभेन सजातीयदाहे स्वस्वजा
त्युक्ताशौचं ॥
असजातीय शव दहनवहन
स्पर्शैः शवजात्युक्ताशौचं ॥



स्त्रीहादसंचयिदाहकविप्रादेस्तद्
गृहवासे त्रिरात्रं ॥
अशौचि कुलान्नभोजनेन तत्तुल्या
शौचं ॥
अशौचान्नभोजनं विना तद्गृहवासे
ऽहोरात्रं ॥ विशेषवचनाभावे
संचयिनो मातु
लादेस्तद्गेहेनापि दाहे त्रिरात्रं ॥
विनाश्रुमसेवने स्नानात् शुद्धिः
शूद्रमृतेऽस्थिसंचयनकालाभ्यन्तरे
तद्गृहे गत्वाश्रुनिपातेन विप्रस्यापि
त्रिरात्रं स्यान्नान्तरेऽश्रुपातेने ऽहो
रात्रं ॥
शूद्रे मृतेऽस्थिसंचयनकलाहूर्ध्वं
मासाभ्यन्तरे तद्गृहेऽश्रुपातेने
विप्रस्याहोरात्रं सचेलस्नानं च
अस्थिसंचयनात् पूर्वं विप्रगृहे रो
दने विप्रस्य एकाह्नेन शुद्धिः
तत्रैव श्रूपयोर्गृहे रोदने विप्रस्य
द्व्यहेन शुद्धिः ॥
शूद्रस्तु सर्वत्र रोदनेनैकेन शुद्धिः
मृत शूद्रस्य बांधवैः सह रोदन
रहितविलापमात्रेण सापिण्डस्याहोरात्रं
अस्थिसंचयनकालस्य पूर्णाशौचे ब्र
णस्य चतुर्थाहः क्षत्रियस्य षष्ठाहः
वैश्यस्य अष्टमाहः शूद्रस्य दश
माहः अह्नाशौचे सर्वेषां द्विती
याहः ॥ ॥
पूर्णाशौचे विप्रमरणे ब्राह्मणस्य च
तुर्थाहेऽस्पृश्यतानिवृत्तिः क्षत्रि
यस्य षष्ठ दिने वैश्यस्य अष्टमदिने
शूद्रस्य दशमदिनेऽस्पृश्यतानिवृत्तिः
सर्वस्य स्वस्वाशौचे त्रिभागकालेना
स्पृश्यतानिवृत्तिः ॥
अतीतेऽशौचे सचेलस्नानेनास्पृश्य
तानिवृत्तिः ॥
जननाशौच सपिण्डानामस्पृश्यता
नास्ति ॥
पुत्रोत्पत्तौ स्नानात् पूर्वं पितुर्विना
तृणमस्पृश्यत्वं ॥
सूतिकास्पर्शे पितुर्विमातॄणां च सूति
कातुल्यकालास्पृश्यत्वं। अन्येषां
स्नानमात्रं ॥
कन्यापुत्रयोर्जनने मातुर्दशरात्र
मस्पृश्यत्वं ॥
कन्यापुत्रयोर्जनने न शूद्राणां त्रयो
दशरात्रमस्पृश्यत्वं ॥
अथ क्षतताशौचं ॥ ९ ॥
नाभेरूर्ध्वमधो वा रुधिरस्रवे संध्या
वंदनाद्यनित्यकर्मण्येकाहः देवार
कर्त्तवे सर्वत्र कर्मण्येकाहः अथ रज
स्वलाशौचं ९ तत्र प्रथमदिनावधि
त्रिरात्रमशौचं त्रिरात्रात् परं सप्तदशाह
रजोदर्शनेऽशौचाभावः ॥

अष्टादशाहे रजोदर्शने एकाह
मशौचं ॥
ऊनविंश दिने रजोदर्शने
द्व्यहाशौचं ॥
ऊनविंशतिदिनात् परे रजोद
र्शने त्रिरात्राशौचं ॥ (दि
रजस्वलावस्थायामहःभृत्सेवना
लौकिककर्माणि शुद्धायैवमे
ऽहनि दैवपैत्रकर्मणः शुद्धा ॥
रजस्वलाया अशौचमध्ये सूतिका
स्पर्शे अन्त्यजजातिस्पर्शे च त्रिरा
त्रोपवासेन शुद्धिः उपवासस्तु
अशौचात् परे करणीयः ॥
भर्तृपूरकपिण्डदानकाले यदि र
जस्वला भवति तदा वस्त्रान्यकाण्डु
नः स्नात्वा पूरकं दद्यात् किंतुश्रौ
तराशौचदिनास्तु एवायं विधिः
तत्स्थितेशुद्धयाभूत्वादेयं ॥
आह्निकश्राद्धकालेऽपुत्रभार्य्या
यदि रजस्वला भवति तदा पंचमे
ऽहनि तच्छ्राद्धं कुर्य्यात् इत्यशौ
चव्यवस्था समाप्ता ॥
अश्मः पुं सर्वतः मेघः ॥
वैदिकप्रयोगे ॥ (दः
अश्मकदली स्त्री कदलीविशे
इति राजनिर्घण्टः ॥ अस्या गुण
पर्य्यायो काष्ठकदलीशब्दे द्रष्टव्यौ
अश्मकेतुः स्त्री तद्रपाषाणभेदा
ह्वः इति राजनिर्घण्टः ॥
अश्मगर्भः पुं हरिन्मणिः मर ॥
कते ॥ इत्यमरः ॥
अश्मघ्नः पुं पाषाणभेदनह्वः
हाथ्याजुडी इति भाषा इति राज
निर्घण्टः ॥
अश्मगर्भजं क्ली मरकतपात्रा
इति भाषा इति राजनिर्घण्टः
अश्मजं क्ली शिलाजतु इत्य
मरः लोहं इति राजनिर्घण्टः ॥
अश्मजतुकं क्ली शिलाजतु इति
राजनिर्घण्टः ॥
अश्मदारणः पुं टंकः पाषाण
विदारणास्त्रं। टाँकी इति पश्चिम
देशेख्यातः इति जटाधरः
अश्मन्तं क्ली चुल्ली अशुभे
मरणे अनवधिः क्षेत्रे। इति ॥
मेदिनी ॥
अश्मन्तकं क्ली चुल्लीकाच्छा
दनदीयाधारच्छादने तेव
आँथारिया इत्यादिभाषा इति
मेदिनी ॥
अश्मन्तकः पुं तृणविशेषः अ
म्लकुचाइ इति भाषा तत्पर्य्यायः
अम्लोटकः २ इति रत्नमाला
वृक्षविशेषः आउटा इति पश्चिम



देशख्यातः तत्पर्य्यायः। १
इडुकः २ कुराली ३ अश्मपत्रः पु
४ पत्रकः ७ अस्य गुणाः मधुरत्वं
५ स्वल्पत्वक ५ नीलपत्र ६ यमल
कषायत्वं लघुशीतलत्वं पित्तप्रमेह
विदाहतृष्णाविषमज्वरविषार्त्ति
छर्द्दिभूतनाशित्वञ्च॥ इति
राजनिर्घण्टः॥
अश्मपुष्पं क्ली शैलेयं शैलज
नामगन्धद्रव्यं इत्यमरः॥
अश्मभालं क्ली द्रव्यचूर्णार्थलौ
हादिपात्रं तत्पर्य्यायः लोहभाण्ड
२ हामानदिस्ता इति भाषा॥
इति शब्दचन्द्रिका॥ तः
अश्मभिद्न पुं पाषाणभेदीवृ
इतिरत्नमाला प्रस्तरभेदक
त्रि॥
अश्मभेदः पुं पाषाणभेदीवृक्षः
इतिरत्नमाला॥
अश्मयोनिः पुं मरकतमणिः
इत्यमरटीकायां भरतः ख्यात
अश्मरः त्रि प्रस्तरसंबन्धीयः।
रिया इति भाषा इति पाणिनिः
अश्मरी स्त्री मूत्रकृच्छ्रयोगः पी
री इति भाषा तत्प्रकारः॥ कौ
वातपित्तकफैस्तिस्रश्चतुर्थी शु
जा पूर्व प्रायः श्लेष्माश्रयाः सर्व
अश्मर्य्यः स्युर्विषोपमाः तद्गत
शुक्रे मूत्रं सपित्तं पवनः कफं वा
यदा तदाश्मर्य्युपजायते क्रमे
शुक्रे मूत्रं सपित्तपवनः कफं वा
पित्ते ष्ठिवरोचनो गोः तत्सामा
न्यलक्षणं सामान्य लिङ्गरुङ्नाभि
सेवनीवस्तिमूर्द्धसु विधूर्णितधारं
मूत्रे स्यात्तया मार्गनिरोधने
तद्व्यपायात् सुखं मेहेद्दक्षं गोमे
दकोपमं तत्संक्षोभात् क्षते
सास्रमायास्य ज्ञातिरुग्भवेत् इति
निदाने॥
अश्मरीघ्नः पुं वरुणवृक्षः इति
त्रिकाण्डशेषः॥
अश्मरीहरः पुं धान्यविशेषः
देधान इतिख्यातः इतिरत्न
माला॥
अश्मसारः पुं क्ली लोहः इत्य
मरः॥
अश्मीरः पुं क्ली अश्मरीरोगः
इत्युणादिकोषः॥
अश्मास्यं क्ली शिलाजतु इति
राजनिर्घण्टः॥
अश्रं क्ली नेत्रजलं इत्युणादि
कोषः रक्तं इत्यमरटीकायां
अश्रद्धेयं त्रि श्रद्धानर्हं आद
राद्योग्यं॥

अश्रयः पुं क्ली राक्षसः इत्यमरः
अश्रान्तं क्ली अनवरतं नित्यं।
इत्यमरः श्रमरहिते त्रि॥
अश्रिः स्त्री गृहादेः कोणः॥
इतिहेमचन्द्रः अस्त्रादेरग्रभागः
इत्यमरः॥
अश्री स्त्री अश्रिः अस्त्रादेरग्र॥
भागः इत्यमरटीका॥
अश्रु क्ली चक्षुर्जलं तत्पर्य्यायः
नेत्राम्बु २ रोदनं ३ अस्रं ४॥
अस्तं ५ अस्रु ६ वास्पं ७ इत्य
मरकोषशब्दरत्नावल्यौ॥
अश्रुतं त्रि अकृतश्रवणं अना
कर्णितं अस्तुना इतिभाषा॥
अश्लीलं क्ली ग्राम्यभाषा॥ भेड
वाक्यं इत्यमरः॥
अश्लेषा स्त्री अश्विन्यादिसप्तवि
शति नक्षत्रान्तर्गत नवमनक्षत्रं
अस्य रूपं चक्राकृति षट्नक्षत्रा
त्मकं इतिदीपिका मौलिगे॥
भुजगाभेश्चपुच्छकेभगुराकृति
तिस्रमतारके इति कालिदासः त
त्र जातफलं॥ हृष्यादनस्यादति
दुष्टचेताः कष्टप्रदश्चापिहृयाज
सर्पेसदर्पोहिशठार्पितार्थः केद
र्पसंततम्मन्नाममनुष्यः इतिका
ष्ठीप्रदीपः॥
अश्लेषाभवः पुं केतुग्रहः इति
हारावली॥
अश्वः पुं घोटकः तत्पर्य्यायः
पीतिः २ पीती ३ वीतिः ४
घोटः ५ घोटकः ६ तुरगः ७
तुरंगः ८ तुरंगमः ९ वाजी १०
वाहः ११ अर्वा १२ गंधर्वः १३ हयः
१४ सैन्धवः १५ सप्तिः १६ इत्य
मरः तट्टीकाच अश्वेन श्रमणगुणाः
वातकोपनाश स्थैर्य्यबलाग्निका
रित्वं॥ इति राजवल्लभः पुं
जातिविशेषः तस्य लक्षणं काष्ठ
तुल्यवपुर्धृष्टो मिथ्याचारश्च नि
र्भयः द्वादशांगुलमेढ्रश्च दी
र्घलिङ्गो मतः इति रतिमञ्जरी
अश्वकंदिका स्त्री अश्वगंधावृक्षः
इतिरत्नमाला॥
अश्वकर्णः पुं शालवृक्षविशेषः
लताशाल इति केचित्॥ तत्
पर्य्यायः। जरणद्रुमः २ तार्क्ष्य
प्रसवः ३ शस्यसंवरणः ४ धन्यः ५
दीर्घपर्णः ६ कुशिकः ७ कौशिकः
८ अस्य गुणाः। कटुत्वं तिक्तत्वं
स्निग्धत्वं। उरोविस्फोटपित्तास्र
कण्डुशिरोदोषार्त्तिनाशित्वञ्च
इतिराजनिर्घण्टः॥ मरः
अश्वकर्णिकः पुं शालवृक्षः इत्य

अश्वकिनी स्त्री अश्विनीनक्षत्रं इति हेमचन्द्रः ॥ (छ

अश्वखुरः पुं नखीनामगन्धद्रव्यं इति रत्नमाला ॥

अश्वखुरा स्त्री अपराजितालता इतिराजनिर्घण्टः ॥ (ता

अश्वखुरी स्त्री अपराजितालता इति शब्दमाला ॥ षः

अश्वगन्धा स्त्री क्षुद्रवृक्षविशेषः असगन्ध इतिख्याता तत्पर्यायः हयगन्धा २ वाजिगन्धा ३ अश्वगन्धिका ४ वल्या ५ तुरगगन्धा ६ कंचुका ७ अश्वावरोहिका ८ काष्ठा ९ अवरोहिका १० वाराहकर्णी ११ तुरगी १२ वनजा १३ वाजिनी १४ हया १५ प्राष्टदा १६ बलदा १७ पुष्टिः १८ पीवरा १९ पलाशपर्णी २० वातघ्नी २१ पुष्पमला २२ कामरूपिणी २३ काला २४ प्रियकरी २५ गन्धपत्री २६ हयप्रिया २७ वाराहपत्री २८ अस्या गुणाः कटुत्वं उष्णत्वं तिक्तत्वं मदगन्धित्वं बलपुष्टिकारित्वं वातकाश्वासक्षयव्रणजरार्त्तिविनाशित्वञ्च इतिरत्नमाला राजनिर्घण्टराजवल्लभाः ॥

अश्वगोयुगं क्ली अश्वद्वयं एकत्र जोडाघोडा इति भाषा इति ॥ पाणिनिः ॥

अश्वग्रीवः पुं विष्णुद्वेष्टासुरविशेषः इतिहेमचन्द्रः ॥

अश्वघ्नः पुं करवीरपुष्पवृक्षः इतिरत्नमाला ॥

अश्वतरः पुं स्त्री अश्वायां गर्दभेन जातः पशुविशेषः खच्चर इति भाषा इति स्मृतिः ॥

अश्वतरः पुं वेगसरः नागराजविशेषः इतिमेदिनी गन्धर्वविशेषः पुं वत्सः इतिधरणिः

अश्वत्थः पुं स्वनामख्यातवृक्षविशेषः पिपर इति पश्चिमदेशीयभाषा तत्पर्यायः बोधिद्रुमः २ चलदलः ३ पिप्पलः ४ कुञ्जराशनः ५ इत्यमरः अच्युतावासः ६ चलपत्रः ७ पवित्रकः ८ शुभदः ९ बोधिवृक्षः १० याज्ञिकः ११ गजभक्षकः श्रीमान् १३ क्षीरद्रुमः १४ विप्रः १५ मङ्गल्यः १६ श्यामलः १७ गुह्यपुष्पः १८ सेव्यः १९ सत्यः २० शुचिद्रुमः २१ धनुर्वृक्षः २२ अस्य गुणाः समधुरत्वं । कषायत्वं शीतलत्वं कफपित्तविनाशित्वं रक्तदाहशमनकारित्वञ्च तत् पक्वफलस्य गुणाः मधो

योनिदोषहारित्वं शीतलत्वं । अतिरूक्षत्वं पित्तरक्तविषार्त्तिदाहच्छर्दिशोषारुचिदोषनाशित्वञ्च इतिराजनिर्घण्टः ॥ अथ ॥ अश्वत्थवेदनकालमन्त्राः अश्वत्थं वन्दयेन्नित्यं पूर्वाह्णे प्रहरद्वये अत ऊर्द्ध्वं न वन्देत अश्वत्थं तु कदाचन ॥ हे चलस्पन्दं भुजस्पन्दं तथा दुःस्वप्नदर्शने शत्रूणाञ्च समुत्थानमश्वत्थ शमयाशु मे अश्वत्थरूपी भगवान् प्रीयतां मे जनार्द्दनः त्वाष्टे ॥ नश्यते पापदेहस्थं लक्ष्मीः प्रवर्त्तते प्रदक्षिणे भवेदायुः सदाश्वत्थ नमो ऽस्तु ते ॥ इतिस्मृत्यर्थसारे हलायुध ५ ववने गर्दभाण्डवृक्षः ॥ इतिविश्वः

अश्वत्थभेदः पुं स्थालीवृक्षः इतिराजनिर्घण्टः

अश्वत्था स्त्री पूर्णिमातिथिः इति मेदिनी

अश्वत्थामा पुं द्रोणाचार्यपुत्रः सतु चिरजीवी महारथीच तत्पर्यायः कृपीसुतः २ द्रौणायनिः इति त्रिकाण्डशेषः द्रौणिः ४ इतिस्मार्त्तः ह्रस्वाभावे द्रौणिः ५

अश्वत्थी स्त्री वृक्षविशेषः पिपली इति लोके तत्पर्यायः लघु । पत्री २ पवित्रा ३ स्वल्पपत्रिका ४ पिप्पलीका ५ वनस्था ६ अश्वत्थिका ७ अस्या गुणाः । मधुरत्वं कषायत्वं आस्रपित्तनाशित्वं विषदाहप्रशमनकारित्वं गुर्विणीहितकारित्वञ्च ॥ इतिराजनिर्घण्टः ॥

अश्वदंष्ट्रा स्त्री गोक्षुरवृक्षः इत्यमरः ॥

अश्वंतं क्ली अश्वभे क्षेत्रे ॥ चुल्ली ॥ अनवधि ॥ मृते ॥ इति हेमचन्द्रः ॥

अश्वपालः पुं घोटकरक्षकः सहीस इतिभाषा ॥

अश्वपुच्छी स्त्री माषपर्णीवृक्षः इतिराजनिर्घण्टः ॥

अश्ववालः पुं काशः केशपा इतिभाषा इति त्रिकाण्डशेषः ॥

अश्वमहिषिका स्त्री अश्वमहिषयोर्नित्यवैरता इतिशब्दरत्नावली ॥

अश्वमारः पुं करवीरवृक्षः ॥

अश्वमारकः इतिशब्दरत्नावली

अश्वमुखः पुं किन्नरः इतिहलायुधः ॥

अश्वमेधः पुं यज्ञविशेषः इति जटाधरः यत्र लक्षणविशेषाक्रान्तमश्वं संप्रोक्ष्य कपालेजय पत्रं



वह्न्यात्यजेत् तद्दत्तार्थं पुरुषविशे
षेनियोजयेत् संवत्सरान्तेऽश्वे ॥
आगते सति अथवा केनापि से
वके पुच्छं कृत्वा तमानीय यथाविधि
वधं कृत्वा तद्वपया होमः कर्तव्यः
कामनानुसारेण तत्फलं मोक्षः
ब्रह्महत्यापापक्षयः स्वर्गश्च
अश्वमेधिकः पुं अश्वमेधयागीय
पुण्यघोटकः इति जटाधरः
अश्वमेधीयः पुं अश्वमेधयज्ञी
याश्वः तत्पर्य्यायः ययुः २ इत्य
तस्य लक्षणं कालीभोधर ॥
सकाशः स्वर्णवर्णस्खावलीयं
यास्ची तु भावर्द्धं चन्द्राकारे सुशो
भने ॥ पुच्छं विद्युत्प्रतीकाशमु
दरं कुंदसन्निभं पादाश्चैव हरि
द्वर्णाः कर्णौ सिंदूरसन्निभौ ज्वले
ग्निनिभा जिह्वा वक्षो भास्करोपमे
विराजितो रोमराज्या सानुलोम
विलोमया विचित्रैर्विविधैर्वर्णै
श्चित्रारजत विंदुभिः योवेगे ॥
वायुतुल्यः स्याडूर्द्धं रुद्धैः प्रवीयर्य
यस्य गोत्राङ्गवोऽगंधो गंधर्वम
पिमोहयेत् । एवंलक्षणसंयुक्तो
यज्ञियः यस्तु रुच्यते अश्वस्तथा
लकश्चातिवलवान् पुत्र उच्यते
पुत्र तुल्यः सुहृच्चापि वहुविज्ञः

[ते] नेमः इति इतिवाल्मीकिरामायणे
अश्वयुक् [जा] स्त्री अश्विनीनक्षत्रे
इत्यमरः ॥
[ज]
अश्वयुक् पुं आश्विनमासः ॥
अश्वयुजः इति शब्दरत्नावली
अश्वरक्षः पुं घोटकरक्षकः
अश्वपालः इति जटाधरः ॥
अश्वरोधकः पुं करवीरवृक्षः ॥
इति राजनिर्घण्टः ॥
अश्वलाला स्त्री सर्पविशेषः
तत्पर्य्यायः हलाहलः २ अल
सर्पः ३ इति त्रिकाण्डशेषः ॥
अश्ववक्त्रः पुं किन्नरः इति शब्द
माला ॥
अश्ववडव क्ली अश्ववडवानो
समाहारः अश्ववडवयोर्द्वन्द्वे
अश्ववडवौ अश्ववडवानां द्वन्द्वे
अश्ववडवाः इत्यमरटीकायां
भरतः सारसुंदरीच घोडा ॥
घुडीर समाहार द्वन्द्वसमासे क्लीव
लिंगेर एकवचन हय इतरेतर
द्वन्द्वे पुं लिंगेर द्विवचन वहुवचन
हय इति भाषा ॥
अश्ववहः पुं अश्ववाहकः घो
सवार इति भाषा इति जटा
अश्ववारः पुं सादी पुं सादी घोडसवार

यार इति भाषा इति हेमचन्द्रः
अश्ववारणः पुं गलकंवलरहि[ते]
गोसदृशः पशुविशेषः तत्पर्य्यायः
गवयः २ वनगवः ३ गोसदृक्षः ४
॥ इति हेमचन्द्रः ॥
अश्ववित् पुं नलराजा इति
त्रिकाण्डशेषः
अश्ववैद्यः पुं घोटकचिकित्
सकः सलोतरी इति पश्चिमदे
शीयभाषा ॥
अश्वशाला स्त्री घोटकगृहं
घोडारयाइशाल आस्तवल इति
भाषा ॥
अश्वशृगालिका स्त्री अश्वशृगालयो
र्वैरता इति शब्दरत्नावली ॥
अश्वषण्डं क्ली अश्वषण्डं षडश्वाः
इति पाणिनिः ॥
अश्वसेनन्त्यपनेदनः पुं सनत्
कुमारः इति हेमचन्द्रः ॥
अश्वा स्त्री घोटकी घुडी इति ॥
भाषा तत्पर्य्यायः वामी २
वडवा ३ इत्यमरः ॥
अश्वारिः पुं महिषः इति जटा ॥
धरः ॥
अश्वारूढः पुं अश्वारोहः घोटको
परिकृतारोहणः ॥
अश्वारोहः त्रि अश्वपृष्ठस्थित

योद्धा घोडसवार इति भाषा ॥
तत्पर्य्यायः । सादी २ इत्यमरः
अश्ववहः ३ इति जटाधरः ॥
अश्ववारः ४ नागी ५ इति हेम
चन्द्रः ॥
अश्वारोहा स्त्री अश्वगंधावृक्षः
अश्ववाहके त्रि इति मेदिनी ॥
अश्वारोही २ त्रि अश्वारोहणविशिष्टः
अश्वारूढः अश्वारोहणकर्त्ता
अश्वावरोहकः पुं अश्वगंधावृक्षः
॥ इति रत्नमाला ॥
अश्वावतः पुं देवसर्वपवृक्षे ॥
इति राजनिर्घण्टः ॥
अश्विनी स्त्री सप्तविंशतिनक्षत्रान्त
र्गतप्रथम नक्षत्रं अश्विन्यादयो
रेवत्यंताः सप्तविंशतितारा दक्ष
स्यापत्यत्वात् दाक्षायण्य उच्यंते
तत्पर्य्यायः अश्वयुक् २ दाक्षा
यणी ३ इत्यमरः सा चन्द्रस्य
भार्य्या । नवपादात्मक मेष राशे
रादिचतुष्पादरूपा च अस्या रूपे
घोटक मुखाकृति तारात्रया
त्मकं अस्या अधिष्ठात्री देवता
अश्वारूढपुरुषः इति ज्योतिः
शास्त्रं तस्या जातफलं सदैव ॥
देवाभ्युदितोविनीतः सत्वान्वितः
शास्त्रसमस्तसंयत् योषा विभ



पालात्मज भूरितोषः स्यादश्विनीज
न्मनि मानवस्य इति कोष्ठी
प्रदीपः ॥
अश्विनीकुमारौ पुं अश्विनीसुतौ
अश्वीभूतसंज्ञानाम सूर्य्यपत्न्याः
यमजपुत्रौ तौ देवचिकित्सकौ
नित्यद्विवचनान्तशब्दोऽयं ॥
अश्विनीपुत्रौ पुं स्वर्वैद्यौ इति
हेमचंद्रः ॥
अश्विनीसुतौ पुं अश्विनीपुत्रौ
तयोः पर्य्यायः स्वर्वैद्यौ २
अश्विनौ ३ दस्रौ ४ नासत्यौ ५
आश्विनेयौ ६ इत्यमरः ॥
अश्विनौ पुं अश्विनीकुमारौ ॥
इत्यमरः ॥ (क
अश्वीनः त्रि एकाश्वकरणकदिने
गम्यस्थानादिः आश्विन इत्यमरः
हृद्यभावयहे अश्विनः ॥ (हृः
अश्वीयं क्ली अश्वहृदं अश्वसमूह
तत्पर्य्यायः । आश्वं २ इत्यमरः ॥
अश्वीयः त्रि अश्वहितः अश्वहित
कारी इति मेदिनी ॥ अश्वसंब
न्धीयः ॥
अष ज दीप्तौ ग्रहणे गतौ ॥
इति कविकल्पद्रुमः ॥
अषडक्षीणः त्रि यो मंत्रादिर्द्वाभ्यां
क्रियते न तृतीयादीनां गोचरः ।
इङ्गजनेकरामंत्रणा इति भाषा
इत्यमरः ॥
अषाढः पुं आषाढमासः व्रते
पालाशदंडः इत्यमरटीकाष्टत
द्विरूपकोषः ॥
अषाढकः आषाढमासः इति
शब्दमाला ॥
अष्टन् त्रि संख्याविशेषः ८ आठ
इति भाषा नित्य बहुवचनांत
शब्दोयं इति व्याकरणं अष्टाष्ट
वाचकशब्दाः योगांगं १ वसुः २
शिवमूर्त्तिः ३ दिग्गजः ४ सिद्धिः ५
ब्रह्मकृतिः ६ व्याकरणं ७ दिक्
पालः ८ अहिः ९ कुलाद्रिः १०
ऐश्वर्य्यं ११ ॥ इति कविकल्पलता
अष्टकः त्रि अष्टसंख्या अष्टयवा
ष्टकः स्वार्थे कप्रत्ययः ॥
अष्टकर्णः पुं ब्रह्मा इति शब्द॥
रत्नावली ॥
अष्टका स्त्री श्राद्धविशेषः तिथि
भेदः तद्यथा गौणचांद्रपौषस्य
कृष्णाष्टमी पूपाष्टका गौणचांद्र
माघस्य कृष्णाष्टमी मांसाष्टका
गौणचांद्रफाल्गुणस्यकृष्णाष्टमीशा
काष्टका केचिन्मते गौणचांद्रा
श्विनस्य कृष्णाष्टमी अष्टका पदवाच्य
तासु क्रमात् पूप मांस शाकैः श्राद्

पौरुषिकं श्राद्धं कर्तव्यं ॥ इति
ब्रह्मवायुविष्णुधर्मोत्तरपुराणानि
अष्टकोणं क्ली नयपीठी याशार
कुक इति भाषा इति त्रिकांड ॥
शेषः ॥
अष्टपात् पुं लूतामाकड्सा
इति भाषा ॥ शरभः इति हेम ॥
चंद्रः
अष्टपादः पुं ऊर्णनाभविशेषः
तत्पर्य्यायः किंतनुः २ इति ॥
त्रिकांडशेषः ॥
अष्टपादिका स्त्री लताविशेषः
हापरमाली इति भाषा इति रत्न
माला ॥
अष्टमः त्रि अष्टानां पूरणः इति
व्याकरणं ॥
अष्टमंगलः पुं श्वेतवर्णमुखचरणः
खुरकेश पुच्छशुक्ल घोटकः इति
हेमचंद्रः ॥
अष्टमंगलं क्ली अष्टप्रकारमंगल
द्रव्यं तद्यथा मृगराजो वृषो
नागः कलसो व्यजनं तथा वैजयंती
तथा भेरी दीप इत्यष्टमंगलं ॥
इति ब्रह्मवैदिकेश्वरपुराणोक्त
दुर्गात् सवयद्वतौ । लोकेऽस्मिन्
मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः
हिरण्यं सर्पिरादित्य आपो राजा
तथाष्टमः इति शुद्धितत्वे ॥
अष्टमानं क्ली कुडवपरिमाणं
सरावौर्द्धं ॥ इति वैद्यक परि॥
भाषायां ॥
अष्टमिका स्त्री शुक्तिपरिमाणं
चतस्तोलकं इति वैद्यकपरि॥
भाषायां ॥
अष्टमी स्त्री क्षीरकाकोली इति
शब्दचंद्रिका तिथिविशेषः सा
चंद्रस्याष्टमकलाक्रियारूपा तत्र
जातफलं भूपालतः प्राप्तधनः
कृष्णांगः सुखीकृपालुर्युवतिप्रियश्च
चतुष्पदाढ्यो यत धान्ययुक्तः स्याद
मीजा मनुजः सुधीरः इति को
ष्ठीप्रदीपः ॥
अष्टमूर्त्तिः पुं शिवः इति हेम
चंद्रः तस्याष्टमूर्त्तिनामानि ॥
क्षितिमूर्त्तिः सर्वः १ जलमूर्त्तिर्भवः
२ अग्निमूर्त्तिः सर्वः १ जलमूर्त्तिरुग्रः
४ आकाशमूर्त्ति भीमः ५ यजमान
मूर्त्तिः पशुपतिः ६ चंद्रमूर्त्तिर्महा
देवः ७ सूर्य्यमूर्त्ति रीशानः ८
इति तंत्रशास्त्रं ॥
अष्टलोहकं क्ली अष्टधातुविशेषः
तद्यथा । सुवर्णं १ रजतं २ ताम्रं ३
वंगं ४ शीसं ५ कांतलोहं ६ मुंड
लोहं ७ तीक्ष्णलोहं ८ ॥ इति

पौरुषिकं श्राद्धं कर्त्तव्यं ॥ इति
ब्रह्मवायुविष्णुधर्म्मोत्तरपुराणानि
अष्टकोणं क्ली नयपीठीयापार ॥
कुकइतिभाषा इतित्रिकांड ॥
शेषः ॥
अष्टपात् पुं लूता माकड्सा ॥
इतिभाषा ॥ शरभः इतिहेम
चंद्रः ॥
अष्टपादः पुं ऊर्णनाभविशेषः
तत्पर्य्यायः किंतनुः २ । इति ॥
त्रिकांडशेषः ॥
अष्टपादिका स्त्री लताविशेषः
हायरमाली इतिभाषा इतिरत्न
माला ॥
अष्टमः त्रि अष्टानां पूरणः इति
व्याकरणं ॥
अष्टमंगलः पुं श्वेतवर्णमुखव(तः)
खुरकेश पुच्छ पक्ष घोटकः इति
हेमचंद्रः ॥
अष्टमंगलं क्ली अष्टप्रकारमंगल
द्रव्यं तद्यथा मृगराजो वृषो
नागः कलशो व्यजनं तथा वैजयंती
तथा भेरी दीप इत्यष्टमंगलं ॥
इति वृहन्नंदिकेश्वरपुराणोक्त
दुर्गोत्सवपद्धतौ लोकेऽस्मिन्
मंगलान्यष्टौ ब्राह्मणो गौर्हुताशनः
हिरण्यं सर्पिरादित्य आपो राजा
तथाष्टमः इति शुद्धितत्वे ॥
अष्टमानं क्ली कुडवपरिमाणं
सरावाई ॥ इतिवैद्यक परि ॥
भाषया ॥
अष्टमिका स्त्री शुक्तिमाणं ॥
चतुस्तोलकं इति वैद्यकपरि ॥
भाषायां ॥
अष्टमी स्त्री क्षीरकाकोली इति
शब्दचंद्रिका तिथिविशेषः सा
चंद्रस्याष्टमकलाक्रियारूपा तत्र
जातफलं भूपालतः प्राप्तधनः
कृशांगः सुखी कृपालुर्युवतिप्रियश्च
चतुष्पदाढ्यो धनधान्ययुक्तः स्यादष्ट
मीजो मनुजः सुधीरः इतिको
ष्ठीप्रदीपः ॥
अष्टमूर्त्तिः पुं शिवः इति हेम ॥
चंद्रः तत्रत्यैकमूर्त्तिनामानि
क्षितिमूर्त्तिः सर्वः १ जलमूर्त्तिर्भवः
२ अग्निमूर्त्ती रुद्रः ३ वायुमूर्त्तिरुग्रः
४ आकाशमूर्त्तिर्भीमः ५ यजमान
मूर्त्तिः पशुपतिः ६ चंद्रमूर्त्तिर्महा
देवः ७ सूर्य्यमूर्त्ति रीशानः ८
इतितंत्रशास्त्रं ॥
ऽष्टलोहकं क्ली अष्टधातुविशेष
तद्यथा सुवर्णं १ रजतं २ ताम्रं ३
वंगं ४ शीशं ५ कांतलोहं ६ मुंड
लोहं ७ तीक्ष्णलोहं ८ इति ॥

राजनिर्घंटः ॥
अष्टवर्गः पुं उषधविशेषाष्टकं
तद्यथा ऋषभः १ जीवकः २
मेदः ३ महामेदः ४ ऋद्धिः ५
वृद्धिः ६ काकोली ७ क्षीरका
कोली ८ इति वैद्यक परि
भाषा एकीकृतैतदोषयगुणाः
रक्तपित्त व्रण वायु पित्तनाशित्वं
इति राजवल्लभः ज्योतिषशा
स्त्रोक्त गोचर विशेषः तद्यथा
आदौ रव्यादि सप्तग्रहाणां राहोश्च
अष्टमासकोष्ठं कृत्वा प्रत्येकमास
कोष्ठे जन्मकालीनग्रहाधिष्ठित
राश्यवधि स्वाहितकुंभदृश्यादि
दीपिकोक्त वचनांकसंख्यकगृहे
रेखा विन्यसेत् तत्र रवेर्द्वादश
कोष्ठ ४८ चंद्रस्य ४९ कुजस्य ३९
बुधस्य ५५ गुरोः ५६ भृगोः ५२
शनेः राहोः ३९ एतत्ते
खकारेखादेयाः ततः प्रत्येक
गृहस्थरेखा द्विगुणीकृत्याष्टाधि
क्येत् अष्टभिः शोधयेत् शेषारे
खाः शुभाः ख्याताः अष्टोनाश्च
तदा विंदुभिरष्टानां पूरणं कार्य्यं
तत्र विंदवोऽशुभाः ख्याताः अ
ष्टौ चेत् तदा विंदुरेखयोरभाव
स्तत्र समं परिकीर्त्तितं ॥
अष्टश्रवाः पुं ब्रह्मा इतित्रिकांड
शेषः ॥
अष्टाकपालः पुं यज्ञविशेषः
यत्राष्टसु कपालेषु पुरोडाशः
पाकं कृत्वा हूयते इति श्रुतिः
अष्टार्घ्यः पुं अष्टद्रव्यार्पित
पूजोपकरणं यथा आपः क्षीरं
कुशाग्राणि दधि सर्पिः सतंडुलाः
यवाः सिद्धार्थकाश्चैव अष्टांगोर्घ्यः
प्रकीर्त्तितः इति तंत्रे आपः
क्षीरं कुशाग्राणि घृतं मधु तथा
दधि रक्तानि करवीराणि तथा रक्तच
चंदनं अष्टांग एषोऽर्घ्यो वै भान
वे परिकीर्त्तितः इति काशीखंडे
अष्टादश न त्रि अष्टाधिकदशसंख्या
। १८ अठार इतिभाषा नित्यवहु
वचनांतएष्ठोयं इतिसिद्धांत
कौमुदी ॥ अथाष्टादशवाचकशब्दाः
द्वीपः १ विद्या २ पुराणं ३ ॥
स्मृतिः ४ धान्यं इतिकविकल्प
लता ॥
अष्टादशांगः पुं अष्टादशद्रव्या
त्मकपाचने सचतुर्विधः दश
मूल्यादिः १ भूनिम्बादिः २ द्राक्षा
दिः ३ मुस्तादिः ४ तद्यथा दश
मूली शाठी शृंगी पुष्करं सडरालभा
भार्गी कुटजबीजं च पटोलं कटु



रोहिणी अष्टादशांगाद्यमिषसंत्रि
पातज्वरापहः कासहृद्ग्रहया
श्वार्त्ति हिक्का श्वासवमीहरः॥२॥
भूनिंबदारुदशमूलमहौषधाब्दति
क्तेंद्रवीजधनिकेभकणाकषायः
तंद्रीप्रलापकसनारुचिदाहमोह
श्वासादियुक्तमखिलंज्वरमाशुहंति
॥२॥ द्राक्षामृताशठीशृंगीमुस्तकं
रक्तचंदनं नागरं कटुका पाठा
भूनिंबं सदुरालभं॥ उशीरं॥
पद्मकं धान्यवालकं कंटकारिका
पुष्करं पिचुमर्दश्च क्काथं जीर्ण
ज्वरापहं कासे श्वासेच विषमे
श्वयथूदरनाशनं अष्टादशांगमु
दितमेतत्स्यात्सन्निपातनुत् ३
मुस्तपर्पटकोशीरदेवदारुमहौ॥
षधं त्रिफला धन्वयासश्च नीली
कंपिल्लकं त्रिहत् किरात् ति
क्तकं पाठा बलाकटुकरोहिणी
मधुकं पिप्पलीमूलंमुस्तायोगेण
उच्यते॥ अष्टादशांगमुदितमे
तद्वासन्निपातनुत् पित्तोत्तरे
सन्निपातेहितंचोक्तंमनीषिभिः
मन्यास्तंभ उरोघाते उरः पार्श्व
शिरोग्रहे ४ इतिसुख[illegible]बोधः॥
अष्टापदं पुं क्ली स्वर्णे शारीणं
फलकः पाशार् छक इतिभाषा

इत्यमरमेदिन्यौ॥ पुल्लूः
अष्टापदः पुं शरभः मर्कटः॥
इतिमेदिनी लूता चंद्रमल्ली॥
कृमिः कैलासपर्वतः इति॥
हेमचंद्रः कीलकः इति धरणिः
अष्टपदी स्त्री चंद्रमल्ली इति
मेदिनी॥
अष्टारचक्रवान्त पुं जिनविशेषः
तत्पर्य्यायः मंजुश्रीः २ ज्ञान
दर्पणः ३ मंजुभद्रः ४ मंजुघोषः ५
कुमारः ६ स्थिरचक्रः ७ वज्रधरः ८
प्रज्ञाकायः ९ वादिराट् १० नीलोत्
पली ११ महाराजः १२ नीलः १३
शार्दूलवाहनः १४ धियांपतिः १५
पूर्व्वजिनः १६ खड्गी १७ दंडी १८
विभूषणः १९ बालव्रतः २० पंच
वीरः २१ सिंहकेलिः २२ शिखा
धरः २३ वागीश्वरः २४ इतित्रिकां
डशेषः॥
अष्टिः स्त्री वीजः आंटि इति
भाषा॥ इत्युणादिकोषः॥
अष्ठीवान्न पुंक्ली जानु आडु इति
भाषा इत्यमरः॥
अस जदीप्तौ ग्रहणे गतौ
इतिकविकल्पद्रुमः॥
असत्व भवे विद्यमानताया
मितियावत् इतिकविकल्पद्रुमः

अस इर् यउ क्षेपे ॥ इति
कविकल्पद्रुमः॥
असंख्यः त्रि असंख्यानीयः॥
संख्यारहितः अपरिमितः॥
असंस्कृतवाक्य क्ली संस्कृतेतर
भाषा तत्पर्य्यायः अपभ्रंशः २॥
अपशब्दः ३ इत्यमरटीका॥
असंस्थाने क्ली असंस्थितिः सं
स्थानाभावः॥
असंहतः पुं व्यूहविशेषःसत
सेनानां पृथग्वृत्तिः इति राय
मुकुटादयः
असकृत् व पुनःपुनःवारं॥
वारं इत्यमरः॥
असंकुलः पुं विस्तृतःपंथाः॥
इति हेमचंद्रः॥
असंख्यः संख्यारहितः अगण
नीयः सत्त द्वियराद्धादिः। इति
हेमचंद्रः॥
असंगतः त्रि संगतिरहितः॥
शास्त्राद्यसम्मतः॥
असती स्त्री भ्रष्टा व्यभिचारिणी
तत्पर्य्यायः पुंश्चली २ धर्षिणी ३
बंधकी ४ कुलटा ५ इत्वरी ६ स्वैरि
णी ७ पांशुला ८ इत्यमरः॥
असतीसुतः पुंस्त्री व्यभिचारिणी
पुत्रः तत्पर्य्यायः बांधकिनेयः

२ वंधुलः ३ कौलटेरः कौल ४
टेयः ५ इत्यमरः॥
असत् त्रि अविद्यमाने असाधु
ब्रह्मभिन्नवस्तु इति वेदांतः॥
असत्पथः पुं मंदपथः तत्
पर्य्यायः कुपथः २ कापथः ३
व्यध्वः ४ दुरध्वः ५ अपथः ६ कदध्वा
७ विपथः ८ कुत्सितवर्त्म ९
इतिशब्दरत्नावली॥
असदध्येता त्रि असदध्ययनशाली
तत्पर्य्यायः अजपः २ इति
हेमचंद्रः॥
असदृशः त्रि अतुल्यः अनुपमेयः
असद्ग्रहः पुं अखह्रिः बालका
दीनां खोइब आवदार इत्यादि
भाषाइतित्रिकांडशेषः॥
असनं क्ली क्षेपणं ॥ इति
मेदिनी॥
असनः पुं वृक्षविशेषः पिया
शाल इति ख्यातः तत्पर्य्यायः।
महासर्ज्जः २ सौरिः ३ बंधूकपुष्पः
४ प्रियकः ५ वीजवृक्षः ६ नीलकः ७
प्रियसालकः ८ असनगुणाः कटुत्व
उष्णत्व तिक्तत्व वातास्रदोष
गलदोषरक्तमंडलनाशित्वसार
कत्वंच इतिराजनिर्घंटः तत्
भेदः आसन इतिख्यातः।तत्॥



पर्य्यायः अजकर्णः २ वंसर्जः ३
महासर्जः ४ इतिरत्नमाला
अस्यगुणाः कफ पित्त नाशित्वं
इतिराजवल्लभः ॥
असनपर्णी स्त्री वृक्षविशेषः
तत्पर्य्यायः वातकः २ शीतलः
३ शीतलवातकः ४ अपराजिता
५ शणपर्णी ६ इत्यमरः मा ॥
राष्ठाइतिभरतः तुसानइति
सारसुंदरी ॥
असन्[ना] पु इंद्रः इतित्रिकांड
शेषः ॥
असंतुष्टः त्रि सम्यकतुष्टिरहितः
संतोषशून्यः ॥
असन्नद्धः त्रि समुद्धतः पंडिता
भिमानी दर्पितः इतिजटाधरः
अकृतसन्नाहः ॥
असन्माने स्त्री मानहानिः अम
र्य्यादा । अनादरः ॥
असभ्यः त्रि असभासत् सभा
नुपयुक्तः असामजिकः ॥
असमः पु बुद्धः इतिशब्द
रत्नावली ॥
असमः त्रि विषमः अतुल्यः
असमंजसं स्त्री असंगतं अनु
पयुक्तं । तत्पर्य्यायः दुर्ज्जातं २
दःसमंजं ३ इतित्रिकांडशेषः

असमयः पु अकालः दुःसमयः
ऽसमर्थः त्रि अशक्तः दुर्बलः ॥
असमवायिकारणं स्त्री समवायि
कारणासन्नकारणं समवायिकारणे
प्रत्यासन्न जनकं यथाघटंप्रति
कपालद्वय संयोगः एतत्कारणं
गुणः कर्म्मवासमवायिकारणप्रत्या
सन्नद्वैयायिकारण द्वय इति
न्यायभाषा ॥
असमाप्तं त्रि समाप्तिरहितं ॥
असंपूर्णं अनिष्पन्नं
असमीक्ष्यकारी[न्] त्रि अविवेचना
पूर्वककर्म्मकर्त्ता तत्पर्य्यायः ।
जाल्मः २ इत्यमरः ॥
असंबद्धं त्रि अनर्थकवाक्यं तत्
पर्य्यायः अबद्धं २ इतिजटाधरः
असम्मतः त्रि अनभिमतः तत्
पर्य्यायः अप्रणयः २ इति हेम
चंद्रः ॥
असम्मानं स्त्री अमर्य्यादा अपमानं
असरुः पु वृक्षविशेषः कुकर
सोका इतिख्यातः इति शब्द
चंद्रिका ॥
असहनः पु शत्रुः इति
हेमचंद्रः
असह्यः त्रि असहनीयः असहि
तव्यः । सहनायोग्यः ॥

असाधारणं त्रि साधारणभिन्नं
असामान्यं विशेषः न्यायमते
साध्यव्यापकी भूताभाववप्रतियो
गिहेतः यथा वह्निमा जलत्वादि
त्यादि ॥
असाध्यं त्रि असाधनीयं साधना
योग्यं । अशक्यं ॥
असांद्रं त्रि अनिविडं विरलं ॥
इतिजटाधरः ॥
असांप्रतं व्य अयुक्तं अनुचितं
तथाचकालिदासः । विषवृक्षोपि
संवर्द्ध्यस्वयं छेत्तुमसाम्प्रतमिति
असारः पु एरंडवृक्षः । इति
शब्दचंद्रिका ॥
असारं त्रि साररहितवस्तु ।
स्थिरांशशून्यं तत्पर्य्यायः फल्गु
२ इत्यमरः ॥
असारं स्त्री अगुरु इति राज
निर्घंटः ॥
असाक्षात् व्य अप्रत्यक्षं अद
र्शने । अगोचरं ॥
असिः पु अस्त्रभेदः खाँडा तर
वाल इत्यादिभाषा तत्पर्य्यायः
खड्गः २ निस्त्रिंशः ३ चंद्रहासः
रिष्टिः ५ कौक्षेयकः ६ मंडलाग्रः
७ करवालः ८ कृपाणः ९ इत्यमरः
असिकं स्त्री अधरचिबुकयोर्मध्ये

भागः इतिहेमचंद्रः ॥
असिक्निका स्त्री असिक्नी दासी
इतिजटाधरः ॥
असिक्नी स्त्री अवृद्धांतःपुरचारि
णीप्रेष्या ॥ इत्यमरः नदीवि
शेषः इति मेदिनी ॥
असिगंडः पु क्षुद्रोपधाने ।
छोटवालिश इतिभाषा इति
जटाधरः ॥
असितः पु कृष्णवर्णः तद्विशिष्टे
त्रि इत्यमरः शनिग्रहः कृष्ण
पक्षः हलायुधः ॥
असिता स्त्री नीलीवृक्षः इति
राजनिर्घंटः याऽवृद्धा महा
देवीभिः प्रेष्यते अतःपुरेचपुनः
पुनश्चरति सा इत्यमरटीकायां
भरतः याअवृद्धा युवती कृष्ण
केशी प्रेष्या दासी अंतः पुरे
चरतिसा इतिसारसुंदरी ॥
असिताभ्रशेखरः पु बुद्धवि
शेषः इतित्रिकांडशेषः ॥
असितार्च्चिः[स्] पु अग्निः इति त्रि
कांडशेषः ॥
असितालुः पु नीलालुः इति
राजनिर्घंटः ॥
असितोत्पलं स्त्री नीलोत्पले
इतिराजनिर्घंटः ॥

असिदंष्ट्रः पुं जलजंतुविशेषः॥ मकर इतिख्यातः इतिशब्दरत्नावली॥

असिदंष्ट्रकः पुं असिदंष्ट्रः॥ मकरः इति त्रिकांडशेषः॥

असिद्धं त्रि अपक्वं।अस्विन्नं। इतिरत्नमाला सिद्धिरहिते॥

असिद्धिः स्त्री अनिष्पत्तिःन्याय मतेसात्रिविधा पक्षासिद्धिः १ यथाकांचनमयपर्वतोवह्निमान् इत्यादिः १ स्वरूपासिद्धिः २ यथा पर्वतःकांचनमयवह्निमान्इत्यादि २ व्याप्यत्वासिद्धिः ३ यथापर्वतो वह्निमान्ज्वलत्वादित्यादिः ३

असिधारः पुं शस्त्रमार्जकः सि कलकर इतिभाषा इतिजटाधरः॥

असिधावकः पुं असिधारकर्त्ता अस्त्रमार्जक इत्यमरः॥

असिधेनुः स्त्री छुरिका छुरी इति भाषा इति हलायुधः॥

असिधेनुका स्त्री छुरिका इत्यमरः॥

असिपत्रः पुं इक्षुः खड्गकोषः नरकविशेषः इति मेदिनी गुंडनामतृणं इतिराजनिर्घंटः

असिपत्रकः पुं इक्षुः इति त्रिकांडशेषः॥

असिपत्रवनं क्ली नरकविशेषः पत्रैर्यत्रविदार्य्यते इतिमनुः योनिजवेदमार्गादपगतः पाखंडमुपगतः तंकषयाप्रहरंतियत्र इतिश्रीभागवतं॥

असिपुच्छकः पुं शिशुमारः इतिहारावली॥

असिपुत्रिका स्त्री छुरिका इति हलायुधः॥

असिपुत्री स्त्री छुरिका छुरी इतिभाषा॥ इत्यमरः॥

असिमेदः पुं विट्खदिर॥ इतिशब्दरत्नावली॥

असिहेतिः पुं खड्गधारीयोद्धा तत्पर्य्यायः नैस्त्रिंशिकः २ इत्यमरः॥

असुः क्ली चित्तं उपतापः॥ इत्युणादिकोषः॥

असुः पुं प्राणः पंचप्राणेषु बहुवचनांतः असवः इत्यमरः

असुखं क्ली दुःखं इतिहेमचंद्रः॥

असुधारणं क्ली जीवनं इत्यमर

असुभृत् त्रि प्राणी जीवः॥

असुरः पुं स्त्री सुरविरोधी सतु कश्यपात् दितिगर्भजातः तत्पर्य्यायः दैत्यः २ दैतेयः ३

दनुजः ४ इंद्रारिः ५ दानवः ६ शुक्रशिष्यः ७ दितिसुतः ८ पूर्वदेवः ९ सुरद्विट् १० देवरिपुः ११ देवारिः १२ इत्यमरः सूर्य्यः इति मेदिनी राहुः॥ इति ज्योतिः॥ शास्त्रे॥

असुररिपुः पुं विष्णुः॥ इति शब्दरत्नावली॥

असुरसा स्त्री वर्वरी बाबुइतुलसी इतिभाषा इतिरत्नमाला॥

असुरा स्त्री रात्रिः राशिः॥ इतिमेदिनी॥

असुराह्वं क्ली कांस्यं॥ इति हेमचंद्रः॥

असुरी स्त्री राजिका राइसर्षा इतिभाषा इत्यमरटीकायां भरतादयः असुरपत्नी॥

असूर्क्षणं क्ली अवज्ञाअनादरः इत्यमरः॥

असुस्थः त्रि सुखस्थितिरहितः रोगी॥

असूक्षणं क्ली अवज्ञाअनादरः इत्यमरः॥

असूया स्त्री गुणेषुदोषाविष्करणं परगुणेदोषारोपणं इत्यमरः॥

असूर्य्यंपश्या स्त्री राजपत्न्यादिः इति कलाप पाणिनी॥

असूर्क्षणं क्ली अनादरः इत्य असूक्षणं मरः॥

असृक् क्ली रक्तं इत्यमरः कुंकुमं॥ इति राजनिर्घंटः विष्कुंभादि सप्तविंशतियोगांतर्गत षोडशयोगः तत्र जातफलं॥ धनीकुरूपः कुमतिर्दुरात्माविदेशगामी रुधिरप्रकोपः महाबलो भीरुरुषोवलीयानसृक् प्रसूतो किलयस्यजंतोः॥ इति कोष्ठीप्रदीपः॥

असृक्करः पुं शरीरस्थरसधातुः इतिहेमचंद्रः॥

असृक्पः पुं स्त्री राक्षसः इति हेमचंद्रः॥

असृग्धरा स्त्री चर्म्म इत्यमर राजनिर्घंटौ॥

असृग्धारा स्त्री चर्म्म इत्यमरटीकायांभरतादयः॥

असृक्पाटी स्त्री ङी रक्तधारा इत्यमरटीकासारसुंदरी॥

असेचनकं त्रि यस्यदर्शनात्तृप्तेरंतोनास्तितत् अत्यंतप्रियदर्शने इत्यमरः याहाकेदे॥ खियात्रिरशोषनाहृयपमनवत्स


असौम्यस्वरः त्रि काकवन्मेद॥ स्वरुक्कः तत्पर्य्यायः अस्वरः २

इत्यमरसिंहः ॥
असौष्ठवं क्ली अप्रशंसनीयत्वं ॥
अप्रेमनत्वं अनातिप्राय्यं ॥ष्यः
नञ् पूर्वसत्रुशब्दात् भावेस्यञ्
अस्तः पुं अस्ताचलः पश्चिमाचलः
तत्पर्य्यायः चरमक्ष्माभृत् २ ॥
इत्यमरमेदिन्यौ लग्नात्सप्तम ॥
स्थानं इतिदीपिका ॥
अस्तं त्रि क्षिप्ते अवसान
प्राप्ते इतिमेदिनी ॥
अस्तं क्ली मृत्युः इतिहेमचंद्रः
अस्तकः पुं मोक्षः निर्वाणं ॥
इतित्रिकांडशेषः ॥
अस्तम् अव्य अदर्शने इत्यमरः
अस्तमती स्त्री शालपणीहस्तः
इतिशब्दरत्नावली
अस्ताघः त्रि अगाधः अतिगभीरः
इति हेमचंद्रः ॥
अस्ताचलः पुं अस्तगिरिः पश्चि
माचलः इतिशब्दरत्नावली ॥
अस्ताद्रिः पुं अस्ताचलः इति
त्रिकांडशेषः ॥
अस्ति अव्य विद्यमानता । तत्
पर्य्यायः सत्वे २ इत्यमरः अस
धातोस्तिपिकृतेप्येतद्रूपं ॥
अस्तिमान् त्रि धनी इतिहेमचंद्रः
अस्तु अव्य अंगीकारः असूया ॥

पीडा इति विश्वमेदिन्यौ ॥ अस ॥
धातोः पंचम्यास्तुपिकृतेप्येतद्रूपं
स्यात् ॥
अस्त्यानं क्ली भर्त्सने निंदा ॥
इति त्रिकांडशेषः ॥
अस्त्रं क्ली प्रहारयोग्यद्रव्यमात्रं ॥
हातियार इति भाषा । तत् ॥
पर्य्यायः आयुधं २ प्रहरणं ३
शस्त्रं ४ इत्यमरः खड्गः धनुः
इतिमेदिनी क्षेपणयोग्यवा
णादि इतिरायमुकुटः ॥
अस्त्रकंटकः पुं वाणः इति ॥
त्रिकांडशेषः ॥
अस्त्रकारकः पुं अस्त्रनिर्म्माता
शस्त्रनिर्म्मायकः आयुधकारः अस्त्र
कारी
अस्त्रचिकित्सकः पुं शस्त्रवैद्यः
अस्त्रजित् क्ली हस्तविशेषः कवाट
वेष्ठ इतिख्याते कवाडवेष्ट्या
इतिकेचित् अस्यपर्य्यायः कवाट
वक्रशाहेद्रष्ट्यः ॥ अस्त्रजित् इतिच
पाठः इतिरत्नमाला ॥
अस्त्रमार्जः पुं अस्त्रमार्ज्जकः शान
करः तत्पर्य्यायः शस्त्रमार्जः २
असिधावः ३ असिधावकः ४
इतिशब्दरत्नावली ॥
अस्त्रसायकः पुं नाराचास्त्रं

समुदयलौहमयवाणः इतिशब्द
माला ॥
अस्त्रागारः पुं अस्त्ररक्षणगृहं
सेलाखाना इतिभाषा ॥
अस्थागं त्रि अगाधं अतिगभीरं
इतिहेमचंद्रः ॥
अस्थाघं त्रि अतलस्पर्शं इति ॥
हेमचंद्रः
अस्थानं त्रि अतलस्पर्शं ॥ इति
जटाधरः ॥ मेदस्थले क्ली ॥
अस्थायं त्रि अगाधं नसंभवति
स्थायः स्थितिर्यत्र इतिकेचित्
अस्थायी न् त्रि स्थितिरहितः अन
श्वरः ॥
अस्थारं त्रि अतलस्पर्शं अगाधं
इतिशब्दरत्नावली
अस्थावरं त्रि स्थावरेतरद्रव्यं
जंगमवस्तु इतिस्मृतिः ॥ षः
अस्थि क्ली शरीरस्थधातुविशे
हाड इतिभाषा तत्पर्य्यायः ॥
कीकसं २ कुल्यं ३ मेदोजं ४
इत्यमरादयः वीजे आंटी इति
भाषा इति रायमुकुटः वैद्यकस्य
अस्थिकृत् पुं शरीरस्थमेदोधातुः
इतिहेमचंद्रः ॥
अस्थिजः पुं मज्जा इति राज
निर्घंटः ॥

अस्थितुंडः पुं स्त्री पक्षी इति
शब्दमाला ॥
अस्थिधन्वा न् पुं शिवः इतिहेम
चंद्रः ॥
अस्थिपंजरः पुं शरीरास्थिसमूहः
तत्पर्य्यायः १ करंकः २ कंकालं
३ इतिहेमचंद्रः ॥
अस्थिभक्षः पुं स्त्री कुक्कुरः इति
हारावली
अस्थिभुक् पुं स्त्री कुक्कुरः ॥ इति
हेमचंद्रः ॥
अस्थिमाली न् पुं शिवः इति
हेमचंद्रः ॥
अस्थिरः त्रि चंचलप्रकृतिः तत्
पर्य्यायः संकसुकः २ इत्यमरः
॥ अनिश्चितः इतिस्वामी ॥
अस्थिविग्रहः पुं भृंगिनामक
शिवसहचरः ॥ इति हेमचंद्रः
अस्थिसंहारः पुं हस्तविशेषः ।
हाडेच हाडजोडा इतिभाषा
तत्पर्य्यायः वज्रवल्ली २ ग्रस्थि
मान् ३ कुलिशं ४ अमरः ५ इति
रत्नमाला ॥ हस्तिशुंडीरवनालिका
७ इतिहारावली अस्यगुणाः
वलास्थिभग्नहितकारित्वं । वायुनाशि



वेदः इति राजवल्लभः ॥
अस्थिसंहारी स्त्री अस्थिमानवृक्षः
इति राजनिर्घण्टः ॥
अस्थिशृङ्खला स्त्री अस्थिमानवृक्ष
इति राजनिर्घण्टः ॥
अस्थिसारः पुं मज्जा इति राज॥
निर्घण्टः ॥
अस्थिस्नेहसंचकः पुं मज्जा इति
राजनिर्घण्टः ॥
अस्थैर्य्य क्ली अस्थिरता ॥
अस्निग्धदारु क्ली देवकाष्ठे देव
दारुभेदः इति राजनिर्घण्टः
अस्पष्ट त्रि अव्यक्ते अस्फुटे ॥
अस्फुट त्रि अस्पष्टे अव्यक्ते
क्लिष्टवाक्ये इति हेमचन्द्रः
अस्फुटवाक् चे त्रि अस्पष्टवक्तृ तत्
पर्य्यायः लोहलः २ इत्यमर
सिंहः ॥ (हः
अस्मद् त्रि आत्मवाची सर्वनामश
अस्मद्रूपे यथा अहं आमि ॥
आवां आमराडुः इ वयं आमरा
अनेक इत्यादि व्याकरणं ॥
अस्मन्त क्ली अश्मन्त चुल्ली उनान
आखा इति भाषा इति राय
मुकुटः ॥
अस्रः पुं कोणः केशः ॥
इत्यमरः ॥

अस्र क्ली रक्ते अश्रु इत्यमरः ॥
अस्रकण्ठः पुं बाणः इतिहारावली
अस्रखदिरः पुं रक्तखदिरवृक्षः
इति राजनिर्घण्टः
अस्रज क्ली मांसे इति राज ॥
निर्घण्टः ॥
अस्रपः पुं स्त्री राक्षसः इत्यमरः
अस्रपत्रकः पुं भिण्डावृक्षः इति
राजनिर्घण्टः ॥
अस्रपा स्त्री जलौकाः इति हेम
चन्द्रः ॥
अस्रफला स्त्री सल्लकीवृक्षः
इति राजनिर्घण्टः ॥
अस्रबिन्दुच्छदा स्त्री लक्ष्मणानाम
कंदः इति राजनिर्घण्टः ॥
अस्रमातृका स्त्री शरीररसः
इति राजनिर्घण्टः ॥
अस्ररोधिनी स्त्री लज्जालुलता
इति रत्नमालाराजनिर्घण्टौ ॥
अस्रार्जकः पुं श्वेततुलसी ॥
इति रत्नमाला ॥
अस्रु क्ली चक्षुर्जले तत्पर्य्यायः
नेत्राम्बु २ रोदनं ३ अस्रं ४ अश्रु
५ इत्यमरः वास्प ६ । इति
शब्दरत्नावली ॥
अस्वछंदः त्रि अधीनः आयत्तः
इत्यमरः ॥


अस्वतन्त्रः त्रि परतन्त्रः पराधीनः
इति जटाधरः ॥
अस्वप्नः पुं देवता इत्यमरः ॥
अस्वरः त्रि मन्दस्वरयुक्तः ॥ तत्
पर्य्यायः ॥ असौम्यस्वरः २ इत्यमरः
अस्वाध्यायः पुं विधिपूर्वकवेदा
ध्ययनहीनः तत्पर्य्यायः निरा
कृति २ इत्यमरः अनध्यायः
अध्ययने निषिद्धदिने तद्यथा
चन्द्रसूर्य्यग्रहणदिनानि तानि
ग्रस्तास्ते ३ दिनानि अन्यत्र १
दिन संध्यागर्ज्जने १ दिनं ॥
माघादिमासचतुष्टयेगर्ज्जनेमे
तद्दिने ॥ निर्घातशब्दे १ दिनं
भूकंपे १ दिनं उल्कापाते
१ दिनं महोल्कापाते आका
लिकः एकवेदसमापनानन्तरं
१ दिनं आरण्यकनामक वेद ।
भागसमापनानन्तरं १ दिनं ॥
पंचपर्वाणि ५ दिनानि चैत्रशुक्ल
प्रतिपत् १ दिनं श्रावणशुक्लप्र
तिपत् १ दिनं मार्गशुक्लप्रतिपत्
१ दिनं एताप्रतिपदोनित्याः ॥
अन्याःकास्ताः वज्रपाते आका
लिकः विद्युत् समकालीनमेघ
शब्दे आकालिकः चतुर्दशमन्व
न्तराः १४ तिथयः युगाद्याः ४
तिथयः ॥ माघमासस्योभयपक्षीय
द्वितीया २ दिने आश्विनस्योभय
पक्षीयद्वितीया २ दिने चैत्रशुक्ल
पक्षद्वितीया १ दिनं कार्त्तिक
स्योभयपक्षीयद्वितीया २ दिने
आषाढस्योभयपक्षीय द्वितीया २
दिने मार्गमासस्योभयपक्षीय
द्वितीया २ दिने फाल्गुणमास
स्योभयपक्षीयद्वितीया २ दिने
उक्त सर्वदिनानि अनेकानि अतएव
तृतीया १ दिने इति स्मृतिः ॥
अस्वामिके त्रि स्वामिरहिते
अकर्तृके । वेतयारिस इति पार
सभाषा ॥
अस्वास्थ्य क्ली स्वस्थत्वाभावः स्वस्थ
तारहित्य ॥
अह इउ गतौ इति कविकल्पद्रुमः
अह इक भासे दीप्तिरिति
यावत् । इति कविकल्पद्रुमः
अह व्य प्रशंसा क्षेपणं ॥
नियोगः ॥ विनिग्रहः इति
मेदिनी ॥
अहं त्रि अस्मद्शब्दस्य प्रथमांत
स्वरूपे आमि इति भाषा
अहंयुः त्रि अहंकारयुक्तः गर्वा
न्वितः तत्पर्य्यायः अहंकार
वान् २ इत्यमरः ॥

अहः क्ली दिवाइत्यमरः ॥
अहः पतिः पुं सूर्य्यः इत्य
मरटीका
अहंकारः पुं अहंकृतिः तत्
पर्य्यायः गर्वः अभिमानः २
इत्यमरः पुराणमते सत्रिविधः
सात्विकः १ राजसः २ तामसः३
सात्विकाहंकारात् इंद्रियाधिष्ठा
तारोदेवा मनश्च जातं राजसाहं
कारात् दशेंद्रियाणि जातानि
तामसाहंकारात् सूक्ष्मपंचभूतानि
जातानि वेदांतमते अभिमा
नात्मिकांतः करणवृत्तिः ॥
अहंकारवान् त्रि अहंयुः गर्वा
न्वितः इत्यमरः ॥
अहंकृतः त्रि अहंकारयुक्तः
इतिहेमचंद्रः ॥
अहंकृतिः स्त्री अहंकारगर्वः
इति शब्दरत्नावली ॥
अहंकारी न त्रि अहंकारयुक्तः
अभिमानी गर्वान्वितः ॥
अहतं क्ली नवांवरं नूतनवस्त्रं
इतिहलायुध शब्दरत्नावल्यो
अनाहतेत्रि ॥ (१२:
अहमहमिका स्त्री परस्पराहंका
इत्यमरः परस्परं परमपत्या
ऽपरस्पाऽपरमपेत्यपरस्पयोऽ ॥

हंकारो ऽहमेव श्रेष्ठोऽहमेव
श्रेष्ठ इतिमानः इतिभरतः ॥
आमिवउआमिवउवलियापरस्पर
अहंकारइतिभाषा ॥
अहंपूर्विका स्त्री अहंपूर्वमग्रे
भवामि अहंपूर्वं अग्रेभवामि
इत्यन्योऽन्यं योधानांधावनक्रिया
इत्यमरः॥आमिअग्रेयाववलि
यायोद्धारदिगेर परस्पर आगे
धावयाइतिभाषा ॥
अहस्मतिः स्त्री अविद्या अज्ञाने
इत्यमरः ॥
अहर्गणः पुं मासः इतिहारा
वली ग्रहाणां मध्यादिज्ञानार्थं
सृष्टवाराहकल्पावधिसृष्टवधिब्रह्म
सिद्धांतोक्तकल्पावधि कल्पाघहा
वधिवाइष्ट कालपर्य्यंतपरिगणित
दिनसमूहः तत्पर्य्यायः धुवेदे
२ दिनौघः ३ द्युगणः ४ दिनपिंडः
५ इति ज्योतिःशास्त्रं ॥
अहर्पतिः पुं सूर्य्यः इत्यमरः
अहर्वांधवः पुं सूर्य्यः इतिहेमः
अहर्मणिः चंद्रः अर्कहस्तः
अहर्मुखं क्ली प्रत्यूषः इत्यमरः
अहल्यः त्रि हलाकृष्ट देशादिः
अकृष्टभूमिः ॥
अहल्या स्त्री अप्सरोविशेषः

गोतममुनिपत्नी इतिमेदिनी
अहस्करः पुं सूर्य्यः इति हेम
चंद्रः अर्कहस्तः ॥
अहस्पतिः पुं सूर्य्यः अर्कहस्तः
अहह व्य अद्भुते खेदः परि
क्लेशः प्रकर्षः संबोधने इति
मेदिनी ॥
अहहा व्य अद्भुते खेदं इत्य
मरटीकायां रायमुकुटादयः॥
अत्र अहह शब्दार्थोपिद्रष्टव्यः
अहार्य्यः पुं पर्वतः इत्यमरः॥
मेदिन्यौ ॥ (अं
अहार्य्य त्रि हर्तुमशक्यं अहर्तं
अहरणीये ॥ इतिमेदिनी ॥
अहिः पुं वृत्रासुरः सर्पः ॥
इत्यमरः सूर्य्यः पथिकः ॥
राहुः इत्यनेकार्थध्वनिमंजरी
अहिंसा स्त्री कुलिकवृक्षः ऊले
खाऊ इतिख्याता अस्यागुणाः
विषरोग दोषघ्न नाशित्वं इति ॥
राजवल्लभः
अहिका स्त्री शाल्मलीवृक्षः
इतिशब्दचंद्रिका ॥
अहिकांतः पुं वायुः इति हेम
चंद्रः
अहिछत्रः पुं देशविशेषः तत्
पर्य्यायः प्रत्यग्रथः २ मेषशृंगी॥

वृक्षः ॥ इतिहेमचंद्रः ॥
अहिछत्रा स्त्री शर्करा चिनिइति
भाषाइतिराजनिर्घंटः पुरी
विशेषः इतिज्योतिषतत्वं
अहिजित् पुं विष्णुः कालियनाग
दमनात् इंद्रः वृत्रासुरनाशनात्
अहितः त्रि शत्रुः॥इत्यमरः
अपथ्य इतिशब्दचंद्रिका ॥
अहितुंडिकः पुं भिक्षार्थसर्प
खेलकः तत्पर्य्यायः व्यालग्राही
२ इत्यमरः सापुडे इतिभाषा
अहिद्विट् ष पुं इंद्रः गरुडः॥
मयूरः नकुलः इति मेदिनी
अहिनकुलिका स्त्री अहिनकुल
योर्वैरं ॥
अहिपुत्रकः पुं नौकाविशेषः
तत्पर्य्यायः पोतः अरात्रः २
इतिहारावली ॥
अहिफेणं क्ली अफेने आफि
इतिभाषा इतिराजनिर्घंटः॥
अहिर्बुध्नः पुं शिवः इति हेम
चंद्रः रुद्रविशेषः इतिजटा॥
अहिर्बुध्नदेवता स्त्री उत्तरभाद्र
पद्नक्षत्रं॥ इति ज्योतिःशास्त्रं
अहिभयं क्ली राज्ञोस्वपक्षोद्भ
वभयं इत्यमरः सर्पभयं ॥
अहिभयदा स्त्री भुम्यामलकी॥



इतिराजनिर्घण्टः ॥
अहिभुक् पुं गरुडः मयूरः ॥
इत्यमरः नाकुली गंधनाकुली
इतिराजनिर्घण्टः ॥ (म
अहिमर्द्दनी स्त्री गंधनाकुलीना
कंदविशेषः इतिराजनिर्घण्टः ॥
अहिमारः पुं अरिमेदकवृक्षः
इतिराजनिर्घण्टः ॥
अहिमेदकः पुं अरिमेदकवृक्षः
इतिराजनिर्घण्टः ॥
अहिलता स्त्री गंधनाकुली ॥
तांबूली इतिराजनिर्घण्टः ॥
अहीरणिः पुं द्विमुखसर्पः इति
त्रिकाण्डशेषः ॥
अहे व्य क्षेपः वियोगः ॥
इतिशब्दमाला ॥
अहेरुः स्त्री शतमूली इत्यमर
अहो व्य पिगर्थः शोकः ॥
करुणार्थः विषादः संबोधने
प्रशंसा विस्मये पदपूरणे ॥
अस्तूया वितर्कः इतिमेदिनी ॥
अहोरात्रः पुं दिवानिशौ सत्त,
सूर्योदयद्वयपरिछिन्नत्रिंशन्मुहूर्त्त
त्मककालः इत्यमरः मनुष्याणां
मासेनैवैत्रोतदहोरात्रो भवति
मनुष्याणामेक वर्षेण देवानाम
होरात्रो भवति द्विसहस्रगुणित

मानुष्य चतुर्युगमानेन ब्रह्मणो
होरात्रो भवति तत्रमनुष्यमानेन
८६...... वर्षा भवंति ॥
अहोवत व्य अनुकंपा खेदः
संबोधने इति विश्वमेदिन्यौ
अह्नाय व्य झटिति द्रुते ॥
इत्यमरः ॥
अह्रिकः पुं बौद्धः क्षपणकः
इतित्रिकाण्डशेषः ॥
अह्नला स्त्री भल्लातकवृक्षः भेला
इतिभाषा इतिशब्दचंद्रिका ॥
अक्ष न व्याप्तौ संहतौ ॥
इतिकविकल्पद्रुमः ॥
अक्ष ऊ व्याप्तौ संहतौ ॥
इतिकविकल्पद्रुमः ॥
अक्षं क्ली इंद्रियं सौवर्च्चले
तुत्थे ॥ इतिमेदिनी ॥
अक्षः पुं कर्षपरिमाणं पाशकः
कलिद्रुमः इत्यमरः ज्ञातार्थे
शकटः व्यवहारः रुद्राक्षः ॥
इंद्राक्षः सर्पः चक्रे इति
मेदिनी आत्मा रावण पुत्रः ॥
इतिहेमचंद्रः जातोयः गरुडः
इतिशब्दरत्नावली संस्कृत
पलभा नघष्या चेद्राष्टि निघ्ना
पलभाद्विताच लेकावधिः स्यादिह
दक्षिणोक्षः ॥ इतिभास्वती प्र ॥

भापाः क्षांशस्तुरीययोगाद्रक्षः स
दक्षिणदिक् प्रदिष्टः इतिजात
कर्णवः दक्षिणेत्तरेखायां सा
तत्रविषुवत्प्रभा शंकुछायाहतौ
त्रिज्ये विषुवत्कर्णभाजिते स्व
स्वाक्षज्ये तयोश्चापे लंबाक्षौ दक्षि
णौ सदा इतिसूर्यसिद्धांतः ॥
अक्षकः पुं तिनिशवृक्षः इति
रत्नमाला ॥
अक्षजः पुं वज्रः इतिपुरुषो
त्तमः अस्थिज इतिक्षित्वपादः
अक्षतं क्ली लाजाः नपुंसके
इतिमेदिनी ॥
अक्षतः त्रि अहिंसितः ॥ इति
मेदिनी अखंडितः इतिशब्द
रत्नावली क्षतशून्यः ॥
अक्षतः पुं यवः इतिमेदिनी
अक्षतंडुलः इतिपुराणं ॥
शस्यमात्रे ॥ इत्यमरटीकायां
भानुदीक्षितः अक्षताः पुं भूम्नि
तिस्वानी ॥
अक्षता स्त्री कर्कटशृंगी काकडा
शृंगी इतिभाषा इतिशब्द
चंद्रिका पुरुषसंसर्गरहितस्त्री
इतिस्मृतिः ॥
अक्षदर्शकः पुं व्यवहारद्रष्टा
व्यवहाराणां ऋणदानादिविवा

दानां द्रष्टा निर्णेता धर्माध्यक्ष
इत्यर्थः इत्यमरः तट्टीकायां जज
इतिइंगराजीय भाषा ॥
अक्षदृक् पुं अक्षदर्शकः इति
हलायुधः ॥
अक्षदेवी न् त्रि द्यूतक्रीडाकारकः
इत्यमरः ॥
अक्षद्युः पुं अक्षक्रीडकः इति
व्याकरणं ॥
अक्षधरः पुं शाखोटवृक्षः
इतिभूरिप्रयोगः ॥
अक्षधूर्तः पुं द्यूतक्रीडकः तत्
पर्यायः धूर्तः २ अक्षदेवी ३
कितवः ४ द्यूतकृत् ५ इत्यमरः
जुयारी इतिभाषा ॥
अक्षधूर्तिलः पुं वृषः ॥ इति
हारावली ॥
अक्षपाटकः पुं धर्माध्यक्षः इति
जटाधरः ॥ जज इतिभाषा ॥
अक्षपादः पुं तार्किकः तत्
पर्यायः नैयायिकः २ इति
हेमचंद्रः ॥
अक्षपीडा स्त्री यवतिक्तालता
इतिराजनिर्घण्टः ॥
अक्षमः त्रि क्षमारहितः क्षमता
शून्यः ॥
अक्षमा स्त्री अक्षांतिः । ईर्षा ॥



इतिशब्दरत्नावली ॥
अक्षमाला स्त्री अक्षसूत्रे वसिष्ठ
पत्नी इति मेदिनी अक्षसूत्रेति
तान्त्रिकभाषया अकारादिक्षका
रान्तवर्णमाला रुद्राक्षमालाच
अक्षयः त्रि क्षयरहितः अव्ययः
अक्षयतृतीया स्त्री वैशाखशुक्ल
तृतीया। सात्र सत्ययुगाद्या ॥
तत्र स्नानदानादावक्षयफलमिति
स्मृतिः ॥ (ग
अक्षया स्त्री वारतिथिघटितयो
विशेषः। यथा अमावस्या सोमवा
रेण रविवारेण सप्तमी चतुर्थी
भौमवारे अक्षयाद्यपि चाक्षया
इति भविष्यपुराणं ॥
अक्षरः पुं शिवः विष्णुः इति
शब्दरत्नावली ॥
अक्षरं क्ली ब्रह्म अत्रकस्यचिद
मरटीकाकारस्य मते पुंलिङ्गोऽपि
अकारादिक्षकारान्तैक पंचा
शद्वर्णाः इति मेदिनी गगणे ॥
धर्मः तपस्या अपामार्गः ॥
इति हेमचन्द्रः मोक्षः इत्य ॥
मरः जले इति वेदप्रयोगः
अक्षरः त्रि अक्षरणीयः अच्युतः
अक्षरचंचुः पुं लेखकः इत्यमर
टीकायां वाचस्पतिः ॥

अक्षरचणः पुं लिपिकरः इत्य
मरः मुन्शी इति भाषा ॥
अक्षरचुञ्चुः पुं अक्षरचणः
लेखकः इत्यमरः ॥
अक्षरजननी स्त्री लेखनी कलमः
अक्षरजीवकः पुं लिपिकरः
इति हेमचन्द्रः ॥
अक्षरजीविकः पुं कायस्थः
लेखकः स्याल्लिपिकरः कायस्थोऽ
क्षरजीविकः इति हलायुधः अ
क्षरजीविनि त्रि ॥
अक्षरतूलिका स्त्री लेखनी इति
जटाधरः ॥
अक्षरविन्यासः पुं लिपिः ॥
लिखनं इत्यमरटीकायां भरता
द्यः ॥
अक्षरमुखः पुं शिष्यः छात्रः
इति त्रिकाण्डशेषः ॥
अक्षरसंस्थानं क्ली लिपिः।
लिखनं। इति इत्यमरः
अक्षवती स्त्री द्यूतक्रीडा पाशा
खेला इति भाषा इत्यमरः ॥
अक्षवाटः पुं मल्लभूमिः तत्
पर्यायः नियुद्धभूः २ इति हेम
चन्द्रः ॥ कुस्तिर फलका इतिभाषा
अक्षवित् त्रि द्यूतज्ञः व्यव
हारज्ञः ॥

अक्षसूत्रं क्ली अक्षमालाजप
माला इतिजटाधरः ॥
अक्षाग्रकीलकः पुं रथचक्ररो
धार्थशंकुः चाकाखिल इतिभा
षा तत्पर्यायः अणिः २ आणी ३
इत्यमरः ॥ (ता
अक्षान्तिः स्त्री परगुणासहिष्णु
ता तत्पर्यायः ईर्षा २ इत्यमरः ॥
अक्षारलवणं क्ली अशेषोवादि
भव्य गोक्षीरं गोघृत धान्यमुद्ग (क
तिल यव सैन्धव सामुद्रलवणानि
द्रव्यं यथा। गोक्षीरं गोघृतं
चैव धान्यं मुद्गास्तिलायवाः सा
मुद्रं सैन्धवं चैव अक्षारलवणं
स्मृतं इतिहारलताधृतस्मृतिः
अक्षि क्ली चक्षुः इत्यमरः ॥
अक्षिकः पुं रंजनद्रुः आच्
इतिभाषा इतिरत्नमाला ॥
अक्षिकूटकः पुं चक्षुस्तारा ॥
अक्षिगतं त्रि द्वेष्यः इत्यमर ॥
अक्षिभेषजः पुं पटिकालोध्रः
इतिराजनिर्घण्टः ॥
अक्षिरः पुं शोभञ्जनवृक्षः ॥
सामुद्रलवणे क्ली इत्यमरटीकायां
भरतः ॥
अक्षिविकूणितं क्ली कटाक्षः
अपाङ्गदृष्टिः इतिहेमचन्द्रः ॥

अक्षीकः पुं रंजनद्रुः आच्
इतिभाषा इतिरत्नमाला
अक्षीवं क्ली सामुद्रलवणं इत्य
मरकोषः ॥
अक्षीवं त्रि अमत्ते इति ॥
मेदिनी ॥
अक्षीवः पुं शोभञ्जनवृक्षः ॥
इत्यमरः ॥
अक्षुण्णः त्रि अक्षोदितः अचूर्णितः
अक्षुद्रः त्रि क्षोभरहितः ॥
अक्षोटः पुं अक्षोटवृक्षः सच
पर्वतजपीलुवृक्षः इत्यमरटी
कायां भरतः ॥ अखरोट इति
भाषा ॥ इतिराजनिर्घण्टः ॥
अक्षोडः पुं पर्वतीय पत्रपील
वृक्षः तत्पर्यायः कर्परालः २
कंदरालः ३ आक्षोडः ४ अक्षोटः
५ आक्षोटः ६ इत्यमरः तट्टीकाच
अक्षोडकः पुं पर्वतीय पत्र
पीलुवृक्षः इतिरत्नमाला ॥
अक्षोभः पुं हस्तिबन्धनस्तम्भः
तत्पर्यायः आलानं २ शंकुः ३
इतित्रिकाण्डशेषः क्षोभ ॥
रहिते त्रि ॥
अक्षौहिणी स्त्री संख्याविशेषयुक्त
सेना तद्यथा। २१८७० हस्तिनः
२१८७० रथाः ६५६१० घोटकाः।

१०९७५० पदातयः समुदायेन ॥ २१८७०० तथावोक्ते अते ॥ हिण्यामित्यधिके: समन्येताष्टभिः शतैः संयुक्तानि सहस्राणि गजानामेक विंशतिः एवमेव रथानान्तु संख्यानेकीर्त्तितं बुधैः पंचषष्टिसहस्राणि षट्शतानि दशैव तु । संख्यातास्तुरगास्तज्ज्ञैर्विनाश्वैस्तुरंगमैः नृणां शतसहस्रं तु सहस्राणि नवैव तु शतानि त्रीणि चान्यानि पंचाशच्च पदातयः इत्यमरभरतौ ॥

अक्ष्णे स्त्री कालः इत्युणादि कोषः ॥

आ

आ आकारः द्वितीयस्वरवर्णः आस्योच्चारणस्थाने कंठः सवर्दीर्घः प्लुतश्च भवति आकारं परमाश्चर्यं शंखज्योतिर्मयं प्रिये ब्रह्मविष्णुमयंवर्णं तथा रुद्रमयं प्रिये पंचप्राणमयं वर्णं स्वयं परमकुंडली इति कामधेनुतंत्रे ॥

आ अ स्मृतिः यथा आज्ञाते ॥ सज्जरापुरेयः वाक्यं यथा आ एवं मन्यसे इत्यमरः अनु ॥

केयासमुच्चयः इतिमेदिनी ॥ कुचित् निषिद्ध संधिवर्णः आशब्दः योऽव्ययसंधीयतेसइत्यर्थः इति भरतः ॥

आ अ एवं स्वीकारः ॥ इत्यमरः आः पु महेश्वरः इतिपुरुषोत्तमः ॥

आः स्व कोपः यथा आः पाप दुर्मुखः पीडा यथा आः शीते । इत्यमरभरतौ स्मृतिः स्पर्द्धा ॥ तर्जने ॥ इतिशाह्रत्नावली ॥

आर्कंपिते त्रि कंपविशिष्टे । तत्पर्य्यायः वेल्लिते २ प्रेंखिते । ३ आधूते ४ आधूते ५ चलिते ६ इत्यमरः ॥

आकरः पु याहरत्नादेरुत्पत्तिस्थाने तत्पर्य्यायः खनिः २ । इत्यमरः ॥ समूहः श्रेष्ठः इति मेदिनी ॥

आकर्णने क्ली श्रवणं

आकर्षः पु पाशकः पाशाइति भाषा अक्षक्रीडायाघगखेला इतिभाषा ॥ सारिफलकः छक इतिभाषा इत्यमरः ॥ ईंद्रिपं ॥ धनुरभ्यासवस्तु आकर्षणं ॥ इति मेदिनी ॥

आकर्षकः पु शिलाभेदः ढुंबक

पातर इति भाषा इतिशह्माला आकर्षकर्तरि त्रि ॥

आकर्षणं क्ली आकर्षःवलाद्रानयनं । खानन् इतिभाषा ॥

आकर्षणी स्त्री फलपुष्पाद्याकर्ष यष्टिकाविशेषः आकुषी इति भाषा

आकलनं क्ली आकांक्षा परिसंख्यावेष्टने इतिमेदिनी ॥

आकल्पः पु वेशः इत्यमरः ॥ कल्पने ॥ इति मेदिनी मेडने ॥ रोगः इति हेमचंद्रः ॥

आकल्पकः पु तमः मोहः ॥ ग्रंथिः ॥ उत्कंठ हर्षः इति मेदिनी ॥

आकषः पु प्रस्तरविशेषः कापातर इति भाषा इति शाह्रत्नावली ॥

आकस्मिकं त्रि अकस्मादुद्भवेहठाज्जातं ॥

आकांक्षा स्त्री इच्छा अभिलाषः इत्यमरः न्यायमते यत्पदस्मृते यत् पदान्वयबोधो न भवति तत्पदे तत्पदवत्ता प्रतीतेयपर्य्यवसान विरहः इत्यलंकारिकाः

आकायः पु निवासः ॥ इति वोपदेवः ॥

आकारः पु इंगिते अभिप्रायानुरूपचेष्टाविष्करणे संकेतद्वार इत्यादिभाषा आकृतिः मूर्त्तिः इत्यमरः ॥

आकारगुप्तिः स्त्री रत्यादिसूचकोमुखरागादि राकारः आकारोऽगवैकृतमितिवोपालितः गुप्तिगोपनं आकारस्यभयलज्जादिना गुप्तिराकारगुप्तिः इत्यमरटीकायां भरतः तत्पर्य्यायः । अवहित्थाः २ इत्यमरः अंगविकृतस्यरोमांचादे राच्छादनात् अवहिःस्थितिरवहित्था इति सारसुंदरी ॥

आकारगोपनं क्ली आकारगुप्तिः रत्यादिसूचक मुख रागादिगोपनं इतिहेमचंद्रः ॥

आकारणं क्ली ह्वा आह्वानेतांकन इति भाषा इत्यमरः ॥

आकालिकं त्रि द्वाणध्वंसि इति धरणिः समानकालीन जन्मविनाशशाली इति संक्षिप्तसारः ॥ अ ॥ कालसंभवं आरंभकालात् तत् स्वजातीयकालस्यापि निमित्तकालमारभ्य परेद्युर्यावत् कालः तत्पूर्वकालस्तावदकालसंभवः इति तिथितत्वे ॥

आकालिकी स्त्री विद्युत् इति हेमचन्द्रः ॥

आकाशः पुं क्ली पंचभूतान्तर्ग भूतविशेषः स तु शून्यः। तत् पर्य्यायः द्यौः २ द्योः ३ अभ्रं ४ अभ्रं ५ व्योम ६ पुष्करं ७ अंबरं ८ नभः ९ अन्तरीक्षं १० अन्तरिक्षं ११ गगणं १२ अनन्तं १३ सुरवर्त्म १४ खं १५ वियत् १६ विष्णुपदं १७ विहायः १८ इत्यमरः न्याय मते अस्य सामान्यगुणाः संख्या दिपंच विशेषगुणः शब्दः सतु नित्यः अशरीरीव असेंद्रियं ॥ करणं स त्वेकः किंतु उपाधिभेदेन नाना भवति वेदांतमते सजन्यः

आकाशजननी न पुं प्रगंडीमध्य स्तुद्रच्छिद्राणि यद्वारा अग्नेयास्त्र गुलिकाः प्रक्षिप्यन्ते इतिराज धर्म्मः ॥

आकाशप्रदीपः पुं तुलायांदी यमानलक्ष्मीदामोदरसंप्रदानाका शदीपः तथाच ब्रह्मपुराणे

तुलायां तिलतैलेन सायंसंध्या समागमे आकाशदीपं योददयात् मासमेकं निरंतरं सश्रीकाय श्रीपतये सश्रीमान् भविजायते

तु दामोदरायनभसि तुलायां लोलया सह प्रदीपं तेप्रयच्छामि नमोऽनंताय वेधसे इति मंत्रेण योदद्यात् प्रदीपं सर्पिरादिना आकाशेमंडपे वापि सचालष फलं लभेत् विष्णुवेश्मनि योदद्यात् कार्त्तिके मासि दीपकं अग्नि ष्टोम सहस्रस्य फलमाप्नोति मानवः ॥

आकाशमांसी स्त्री सूक्ष्मजटामां सी केदारे उत्पत्तिरस्याः ॥ तत्पर्य्यायः निरालंभा २ खसं भवा ३ शैवाली ४ सूक्ष्मपत्री ५ गौरी ६ पर्वतवासिनी ७ अभ्र ॥ मांसी ८ अस्या गुणाः हिमत्वं पित्तव्रण नाडीरोग नाशित्वं बलकारित्वंच इतिराजनिर्घंटः ॥

आकाशमूली स्त्री कुंभिका पाना इतिख्याता इतिहारावली ॥

आकाशरक्षी न पुं प्रगंडिस्थित प्रणिधिः दुर्गबहिः प्राचीरोपरि स्थितचरः इतिराजधर्म्मः ॥

आकाशवल्ली स्त्री लताविशेषः आकाशवेल अमरवेल इति ख्याता तत्पर्य्यायः खवल्ली २ दुःस्पर्शा ३ व्योमवल्लिका ४ अस्या

गुणाः मधुरत्वं कटुत्वं पित्त नाशित्वं शुक्रवर्द्धकत्वं रसायनत्वं बलकारित्वं दिव्यौषधिपरत्वं इतिराजनिर्घंटः ॥

आकाशवाणी स्त्री अशरीरिणी वाक् देववाणी इतिपुराणं ॥

आकाशसलिलं क्ली दिव्योदके इतिराजनिर्घंटः ॥

आकिंचनं क्ली अकिंचनता

आकीर्णं त्रि व्याप्ते तत्पर्य्यायः संकीर्णं २ संकुलं ३ इत्यमरः जलादिभिर्निरवकाशं इति भरतः ॥

आकुंचनं त्रि न्यायमते पंच प्रकारकर्म्मान्तर्गत कर्मविशेषः संकोचः ॥

आकुलं त्रि व्याकुले तत्पर्य्यायः व्यस्तं २ अप्रगुणं ३ इत्यमरः ॥

आकूतं क्ली अभिप्रायः आशयः इतिहेमचंद्रः ॥

आकृतिः स्त्री रूपे शरीरे ॥ जातिः ॥ इति मेदिनी ॥

आकृतिच्छत्रा स्त्री घोषातकी हृ श्वेतघोषा इति भाषा। इति रत्नमाला ॥

आकृष्टं त्रि कृताकर्षणे आकर्षितं ॥

आकोकेरः पुं मकरराशिः इति ज्योतिस्तत्वं ॥

आक्रंदः पुं रोदने आह्वाने मित्रे दारुणयुद्धे ॥ भ्राता ॥ इतिमेदिनी ध्वनिः नादः ॥ पार्ष्णिग्राहात् परोराजा इति धरणिः ॥

आक्रमः पुं आक्रमणे तत् पर्य्यायः अधिक्रमः २ क्रांतिः ३ इतिहेमचंद्रः ॥

आक्रमणं क्ली आक्रमकरणे पत्ने ॥

आक्रांतः त्रि कृताक्रमणः अधि क्रांतः आक्रमविशिष्टः इति हलायुधः ॥

आक्रीडः पुं राजपवने राज्ञः साधारणवने इत्यमरः ॥

आक्रोशः पुं क्रोधाकर्त्तव्यानि ष्ट्वयः तत्पर्य्यायः आक्षेपः २ अभिषंगः ३ शपथः ४ इति हेम चंद्रः ॥

आक्रोशनं क्ली अभिशापः तत् पर्य्यायः अभिषंगः २ अभीषंगः ३ । इत्यमरः ॥

आखंडलः पुं इंद्रः इत्यमरः

आखनिकः पुं चोरः उन्दुरुः शूकरः इति मेदिनी ॥

आखाते पुंक्ली अखाते । देव
खाते इत्यमरटीकायांरायमुकुटः
आखुः पुं मूषिकः इत्यमरः
मूकरः चौरः इति हेमचन्द्रः ॥
देवताडवृक्षः इतिरत्नमाला ॥ (खा.
आखुकर्णी स्त्री लताविशेषः मू
काणी इति भाषा तत्पर्य्यायः
द्रुषिका २ द्रवन्ती ३ चित्रा४ सु
वर्णी ५ उन्दुरुकर्णी ६ न्यग्रधी ७
मूषककर्णी ८ वृश्चिककर्णी ९ बहु
कर्णिका १० माता ११ भूमिचरी १२
चेडा १३ शम्बरी १४ बहुपादिका
१५ प्रत्यक्श्रेणी १६ वृषा १७ पुत्र
श्रेणी १८ अद्रिभूः १९ अस्ता ॥
गुणाः कटुत्वं उष्णत्वं कफपित्त
हरत्वं सारकत्वं आनाह ज्वर
शूलनाशित्वं परमपाचकत्वं
इतिराजनिर्घण्टः ॥
आखुगः पुं गणेशः इतिहेम
चन्द्रः ॥
आखुपर्णिका स्त्री लताविशेषः
इंडुरकाणी इतिभाषा इतिरत्न
माला ॥
आखुपर्णी स्त्री आखुपर्णिका ।
इतिरत्नमाला ॥
आखुपाषाणः पुं पाषाणभेदः
आखुपाषाणनामोऽयंलोहसंकर

कारकः । इति राजनिर्घण्टः ॥
आखुभुक् न पुं बिडालः इत्यमरः
आखुरथः पुं गणेशः इतिहला
युधः ॥
आखुविषहा स्त्री देवताडवृक्षः
इतिजटाधरः देवदालीलता
इतिराजनिर्घण्टः ॥
आखेटः पुं मृगया शिकार ॥
इति भाषा इत्यमरः ॥
आखेटकः पुं मृगया इतिशब्द
रत्नावली ॥
आखेटशीर्षकं क्ली कुट्टिमभेदः
सुडंग इतिभाषा इतिशब्दरत्ना
वली ॥
आखेटिकः पुं मृगयाकुशलकु
क्कुरः तत्पर्य्यायः आखेटिकः २
विष्वकद्रुः ३ इति हारावली
आखोटः पुं फलवृक्षविशेषः
आखरोट इतिभाषा तत्पर्य्यायः
पार्वतीयः २ फलस्नेहः ३ गुडा
शयः ४ कीरेष्टः ५ कंदरालः ६
मधुमज्जा ७ बृहच्छदः ८ अस्यगुणाः
मधुरत्वं बल्यकारित्वं । स्निग्धत्वं
उष्णत्वं वातपित्तनाशित्वं रक्त
दोषप्रशमनत्वं शीतलत्वं कफ
कोपनत्वं इतिराजनिर्घण्टः ॥
आख्या स्त्री नाम संज्ञा इत्यमरः

आख्याते त्रि कथिते उक्ते ।
इत्यमरः व्याकरणोक्तधातूत्तर
विहितति तिङ्प्रत्ययादि ॥ (ख्या
आख्यायिका स्त्री उपलब्धार्थिक
इत्यमरः इतिहास उपन्यास ॥
इतिख्याता ॥
आगः स् क्ली पापे अपराधः ॥
इत्यमरः ॥
आगते त्रि आयाते उपस्थिते
आगन्तुः त्रि अतिथिः इत्यमरः
आगमनशीलः अनियतः ॥
आगन्तुके त्रि आहार्य्ये अनित्य
स्थायि इतित्रिकाण्डशेषः ॥
आगमे क्ली तन्त्रशास्त्रे अस्यार्थः
आगतं पंचवक्त्रात्तु गतं च गिरिजा
नने मतं च वासुदेवस्य तस्मादागम
उच्यते इति तन्त्रशास्त्रे ॥
आगमः पुं शास्त्रमात्रे आग
मने इतिमेदिनी करे हेमचन्द्रो
साक्षिपत्रादिः इतिव्यवहार ॥
मातृका प्रकृतिप्रत्ययानुपघाति
कार्य्ये ॥ इति व्याकरणे ॥
आगमनं क्ली आङ्पूर्व्वगमधा
तोरनट प्रत्ययेतस्य रूपमिदं
आसा इति भाषा ॥ (स्त्रः
आगमावर्त्ती स्त्री वृश्चिकालीवृ
इतिराजनिर्घण्टः ॥

आगमिते त्रि अधीते । पठिते
इतिजटाधरः ॥
आगाधे क्ली अगाधे अतिगभीरे
इत्यमरटीकायांमथुरानाथः
आगोन्तुः त्रि आगन्तुः अतिथिः
इत्यमरटीकायां नीलकंठः
आगामी न् त्रि भविष्यत्कालः
इतिराजनिर्घण्टः ॥
आगारं क्ली गृहं इत्यमरटीका
आगुः र् स्त्री आगूः प्रतिज्ञा
इत्यमरटीकायां रमानाथः ॥
आगूः स्त्री प्रतिज्ञा इत्यमरः
आग्नीध्रे क्ली अग्नीध्रेहोत्रगृहे
इत्यमरटीकायां रमानाथः
आग्नेय्या अग्नीध्र सुपतिष्ठते इत्यत्र
अग्नीध्रमेऽउपमित्याख्यानदर्शनात
यनहारावरणीय ऋत्विजि पुं
आग्नेयं क्ली स्वर्णं इति राज
निर्घण्टः देशविशेषः इतिशब्द
रत्नावली रक्ते इति हेमचन्द्रः
इष्टे इति पाणिनिः ॥
आग्नेयः पुं अगस्त्यमुनिः इति
पाणिनिः अग्निसेवेथीयेत्रि
आग्नेयी स्त्री अग्निकोणस्वाहा
इति जटाधरः ॥
आग्रहः पुं अनुग्रहः आशक्तिः
आक्रमः ग्रहणे इतिमेदिनी

आग्रहायणः पुं मार्गशीर्षमासः इतिरायमुकुटः ॥

आग्रहायणिकः पुं अग्रहायण (मासः) मतभेदेवत सराघमासोयं ॥ (इति) अस्मिन्मासेह्याग्निकराशिस्थौ तत्पर्य्यायः मार्गशीर्षः २ सहाः ३ मार्गः ४ इत्यमरः ॥

आग्रहायणी मृगशिरोनक्षत्रे इत्यमरः आग्रहायणमासस्य पौर्णमासी ॥

आघटकः पुं रक्तापामार्गः इतिराजनिर्घंटः ॥

आघाटः पुं सीमा इति हेमचंद्रः अपामार्गः इति राजनिर्घंटः ॥

आघातः पुं वधस्थाने इति त्रिकांडशेषः हनने छेदने चोट कोप इत्यादिभाषा

आघातने स्त्री वधस्थाने इति हारावली हनने ॥

आघारः पुं हुते इतिहेमचंद्रः (ज्यं) ऋग्विदिनो स्रुवेण चतुरात्तं स्रुविदत्वा प्रजापतिं मनसा ध्यात्वात् सौमग्रेवीयव्यकोणादारभ्याग्नेयीं यावदविछिन्नहुतधारादानेपुनः स्रुवेण चतुरात्तं स्रुविदत्वाइंद्र त्वाग्नेनैर्ऋतकोणादारभ्यैशानीं यावदविछिन्नहुतधारादाने इति कालेसिः यजुर्वेदिनेतुस्रुवेण मंत्रोच्चारणपूर्वक पूर्वोक्तक्रमेण हुतधारादाने इतिपशुपतिः ॥

आघ्राणं स्त्री तृप्तिः इतिहेमचंद्रः गंधग्रहणे सोंका इति भाषा ॥

आघ्रातः त्रि शिंघितः आक्रांतः इतिमेदिनी तृप्तः इति ॥ हेमचंद्रः ॥

आघूर्णितं घूर्णितनेत्रादि ॥ घुराण इति भाषा ॥

आर्ची स्त्री पीतवर्णादीर्घवृंतेइषद् यदसन्निभ माक्षिकोत पत्रमधु अस्यगुणाः अतिशयवस्तुहित कारित्वे कफपित्त रक्तदोष नाशित्वेच इतिराजनिर्घंटः ॥

आङ् अ उपसर्गविशेषः अस्यार्थः ईषत् यथा आपिंगलः अ ॥ अभिव्याप्तिः । यथा आजन्मब्रह्मचारी सीमा यथा आसमुद्रक्षिती ॥ धातोर्योगजः यथा आ ॥ रोहति इत्यमरभरतौ समे ॥ तानात् ग्रहणे प्रत्याहृतिः ॥ इतिदुर्गादासः ॥

आंगं स्त्री कोमलांगी इति त्रिकांडशेषः ॥

आंगारं स्त्री अंगारसमूहः इति रायमुकुटः ॥

आंगिकः त्रि अंगनिष्पन्नभावव्यंजक भ्रूक्षेपादिः इत्यमरः ॥ मार्दंगिकः इतिशब्दरत्नावली

आंगिरसः पुं बृहस्पतिः इति अमरः ॥

आचमनं स्त्री वैधकर्मारंभात् वारत्रय जलपानानंतरंयथाक्रमाष्टांगस्पर्शी रूपस्तु द्विजनकर्त्तियानपर्य्यायः उपस्पर्शः २ इत्यमरः तत्रप्रमाणं प्रक्षाल्यपाणीपादौच त्रिः पिवेदंबुवीक्षितं संहत्यांगुष्ठमूलेनद्विः प्रमृज्यात्ततोमुखं संहत्यतिसृभिः पूर्व्वमास्यमेवमुपस्पृशेत् अंगुष्ठेनप्रदेशिन्याघ्राणं पश्चादनंतरं अंगुष्ठानामिकाभ्यांच चक्षुःश्रोत्रेपुनःपुनः नाभिं कनिष्ठांगुष्ठेन हृदयंततलेनवै सर्वाभिस्तुशिरः पश्चात् बाहूचाग्रेण संस्पृशेत् इतिदक्षः आयते पर्वणांकृत्वा गोकर्णाकृतिवत् करंसंहतांगुलिनातोयंशुष्कीतपाणिनाद्विजः मुक्तांगुष्ठकनिष्ठाभ्यांशेषेणाचमनंचरेत् माषमज्जनमात्रास्तुसंगृह्यत्रिःपिवेदपः इति भारद्वाजः अग्निस्वप्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः स्वकेरताल्पगाभिश्च यथासंख्यंद्विजातयः शुद्धेरन् स्त्रीचशूद्रश्च सकृतस्पृष्टाभिरंततः इतियाज्ञवल्क्यः हृद्गाभिः पूयते विप्रः कंठगाभिस्तु भूमिपः वैश्योद्भिः प्राशिताभिस्तु शूद्रः स्पृष्टाभिरंततः इति मनुः त्रियास्तेंदर्शिकं तीर्थं शूद्रजातस्तथैवच सकृदाचमनाच्छुद्धिरेतयोरेवचोभयोः इति मिताक्षरा ॥

आचमनकः पुं निष्ठीवनपात्रे पिकदान डाबर इतिभाषा तत्पर्य्यायः शेंठः २ कटकोलः ३ पतद्ग्रहः ४ इतिहारावली ॥

आचरणं स्त्री आचारः व्यवहारः

आचरितं त्रि कृताचरणं व्यवहृतं ॥

आचांतः त्रि कृताचमनः ॥

आचामः पुं आचमने इतिशब्दरत्नावली भक्तमंडः इत्यमरः ॥


आचारः पुं व्यवहारः तत्पर्य्यायः चरित्रं २ चरितं ३ चारित्रं ४ चरणं ५ वृत्तं ६ शीलं ७ । इतिहेमचंद्रः ॥

आचारवर्जितः त्रि आचारवहिर्भूतः इतिजटाधरः ॥

आचारी स्त्री हिलमोचिका इति

राजनिर्घंटः आचारविशिष्टे त्रि
आचार्य्यः पुं वेदाध्यापकः ।
वैदिकमंत्रव्याख्याकर्त्ता तत्
पर्य्यायः मंत्रव्याख्याकृत् २ इत्य
मरः द्रोणाचार्य्यः इतित्रिकांड ॥
शेषः ॥
आचार्य्या स्त्री मंत्रव्याख्याकर्त्री
इत्यमरसिंहः ॥
आचार्य्याणी स्त्री आचार्य्यपत्नी
इत्यमरः ॥
आचितं क्ली दशभारपरिमाणं
२५ मानइतिभाषा इत्यमरः ॥
आचितः पुं शाकटोभारः एक
गाडिरबोजा इतिभाषा इत्यमरः
ह्यस्युतपल्ले इतिमेदिनी ॥
आचितः त्रि संगृहीतः छन्नः
इतिमेदिनी ॥
आछ इ आयामे॥ इतिकवि ॥
कल्पद्रुमः ॥
आछन्न त्रि आछादिते आहते
आछादः पुं वस्त्रं इतिहेमचंद्रः
आछादनं क्ली वस्त्रे इत्यमरः॥
संपिधाने अपहतिमात्रे ॥
इति मेदिनी ॥
आछादिते त्रि कृताछादने॥
आहते ढाकाइतिभाषा ॥
आछुकः पुं हस्तविशेषःआच
इतिभाषातत्पर्य्यायःरंजनद्रुः
२ पत्तीकः ३ पत्रिकः ४ आच्छिकः
५ इतिरत्नमाला ॥
आछुरितं क्ली सशब्दहास्य नख
वाद्यं इति धरणिः ॥
आछुरितकं क्ली सोत्प्रासहासः
॥ इत्यमरः हास्य नखाघात
विशेषः इतिमेदिनीकर हेम
चंद्रौ ॥
आछोदनं क्ली मृगया इत्यमरः
आजं क्ली घृतं इतिजटाधरः
आजकं क्ली अजसमूहः छागलेर
पाल इतिभाषा इत्यमरः ॥
आजकारः पुं शिववृषः इति
शब्दरत्नावली ॥
आजगरं क्ली शिवधनुः इति
हेमचंद्रः ॥
आजन्म सुरभिपत्रः पुं मरुवकः
इतिराजनिर्घंटः ॥
आजानेयः पुं स्त्री कुलीनाश्वः
श्रेष्ठघोटकः इत्यमरः शक्ति।
भिर्भिन्नहृदयाः स्खलंतोपि पदे
पदे अज्ञानंतियतःसंत्ताआजा
नेयास्ततः स्मृताः इत्युक्ततंत्रे
आजिः स्त्री युद्धं समानभूमिः
इत्यमरकोष मेदिन्यौ क्षणे॥
इति हेमचंद्रः आक्षेपः इति

शब्दरत्नावली ॥
आजीवः पुं जीविका इत्यमरः॥
इ ॥
आज्ञुः स्त्री आज्ञः विशिष्टः इति
स्वामी ॥
आज्ञुः स्त्री वेतनं विनाकर्मकारः
वेगार इतिभाषा ॥ इत्यमरः ॥
आज्ञास्त्री आदेशः तत्पर्य्यायः
अववादः २ निर्देशः ३ निदेशः
४ शासनं ५ शिष्टिः ६ इत्यमरः॥
आज्ञा स्त्री आदेशः तत्पर्य्यायः
अववादः २ निर्देशः ३ निर्देशः
४ शासनं ५ शिष्टः ६ इत्यमरः॥
आज्ञाकारी त्रि आज्ञपाकर्मकारी
आज्ञावहः आज्ञानुवर्त्ती ॥
आज्ञाचक्रं क्ली षट्चक्रांतर्गतंषष्ठ
चक्रं। तथाचतंत्रे आज्ञानामां
बुजं तद्धिमकरसदृशंध्यानधाम
प्रकाशं हक्षाभ्यां वेकलाभ्यां
प्रविलसितवपुर्नेत्रपत्रं सशुभ्रं ॥
तन्मध्येहाकिनीसाशशिसमधवला
वक्त्रषट्कं दधाना विद्यां मुद्रां ॥
कपालं डमरु जयवटींबिभ्रतीशुद्ध
चित्तावत्तत् पद्मांतरालेनिवसति
चमनः सूक्ष्मरूपंप्रसिद्धं ॥ इति
श्रीतत्वचिंतामणिषष्ठप्रकाशः
आज्ञापकः त्रि आज्ञाकर्त्ता ॥
आज्ञापत्रं क्ली आदेशलिपिः ।
निदेशलखनं हुकुमनामा इति
पारस्यभाषा ॥
आज्ञापनं क्ली विज्ञापनंजानान
इतिभाषा
आज्ञातः त्रि आज्ञाप्तिविशिष्टः
लब्धाज्ञः आज्ञाप्राप्तः ॥
आज्यं क्ली घृतं इत्यमरः ॥
श्रीवासः इत्यजयपालः ॥
आज्यभागः पुं ऋग्वेदिनां अग्ने
रुत्तरभागे स्रुवेणाग्निसंप्रदानक
हुताहुतिः तद्दक्षिणभागे सोम
आज्यभागः पुं ऋग्वेदिनां अग्ने
रुत्तरभागे स्रुवेणाग्निसंप्रदानके
हुताहुतिः उद्दक्षिणभागे सोम
संप्रदानकाहुतिश्च इति कालु
सिः ॥ यजुर्वेदिनांतु अग्नेरुत्तरद
क्षिणयोः पश्चिमादिप्राच्यंतमुत
यारा। इति यज्ञुपतिः ॥
आंजनेयः पुं अंजनानामवानरी
पुत्रः सतु हनूमान् इतित्रिकांड
शेषः ॥
आजिनेयः पुं जंतुविशेषः आज
नाइ इति ख्यातः इतिशब्दमाला
आठिः पुं पक्षिविशेषः शराति
इतिख्यातः इत्यमरः ॥
आटाकनं क्ली वर्त्तमानंगमने
इति त्रिकांडशेषः ॥
आटीकरः पुं वृषः इतिभूरि
प्रयोगः ॥
आटोपः पुं दर्पः इतिहेम
चंद्रः वायुजन्य उदरगुडगुडाशब्दः
इतिवैद्यकः ॥



आडम्बरः पुं पटहः तूर्य्यरवः
गजेंद्रगर्जिते इत्यमरः आरंभः
इतित्रिकांडशेषः यत्न ॥
दर्पः इतिमेदिनी क्रोधः ॥
इतिस्वामी हर्षः इति शद्धरत्ना
वली ॥
आडिः स्त्री शरालिपक्षी इत्य
मरः स्वनामख्यातमत्स्यविशेषः
अस्यागुणाः गुरुत्वं स्निग्धत्वंवात
श्लेष्मप्रकोपनत्वं अतिबलशुक्र
मेधाग्निहद्धिकारित्वंच इतिराज
वल्लभः ॥
आडूः पुं उडुपः भेलो माड
इत्यादिभाषा इत्युणादिकोषः
आढकः पुं स्त्री चतुःप्रस्थपरिमा
आडी इतिभाषा इत्यमरः ॥ ती
द्रोणचतुर्थभागः इतिलीलाव
अष्टमुष्टिर्भवेत् कुंचिरित्यादिवच
नात् षष्ठ्यंवाशदधिक द्विशत
मुष्टिर्भवति व्यवहारे षोडशसेरो
विंशति सेरोवा वैद्यकमते ॥
अष्टशराव परिमाणं तत्पर्य्यायः
पात्रं २ कंसं ३ भाजनं ४ इति
परिभाषा अपचयविवक्षायां
आढकिकेत्यपिस्यात् इत्यमर
टीकासारसुंदरी आढिका इति
भरतः ॥

आढकिकः त्रि आढकपरिमित
बीजवपनादियोग्यक्षेत्रादिः इत्य
मरः ॥
आढकी स्त्री शमीधान्य विशेषः
अरहर इतिभाषा तत्पर्य्यायः
तुवरी २ वर्ष्या ३ करवीरभुजा ४
हृत्सवीजा ५ पीतपुष्पा ६ अस्या
गुणाः कषायत्वं मधुरत्वं कफपित्त
नाशित्वंच तद्दिदलगुणाः ईषद्वात
रुचिकारित्वं गुरुत्वं ग्राहित्वंच
पीतारक्तासिता त्रिविधेयं श्वे
तादोषदा लोहिता रुच्या
वल्या पित्ततापादिहत्सैव पीता
दीपनी पित्तदाहघ्नीसितैवतद्गुणे
वल्या इतिराजनिर्घंटः अमर
मतेतत्पर्य्यायः काक्षी २ मृत्स्ना
३ तुवरिका ४ मृतालकं ५ सुरा
ष्ट्रजं ६ भरत मल्लिकमते पतत्
षष्ठकं अरहरस्य सारसुंदरी।
मते तुवरिकाख्यगंधद्रव्यस्य।
केषांचिन्मते सुगंधिमृत्तिकायाः
आढकीनः त्रि आढकिकः इत्य
मरटीका ॥
आढ्यः त्रि धनवान् इत्यमरः
युक्तः विशिष्टः अन्वितः यथा
धनाढ्यः गुणाढ्य इत्यादिः ॥

आणकः त्रि अणकः अधमः
इतिरायमुकुटः
आणवीनं त्रि अणव्यं अणुधा
न्योद्भवोचितक्षेत्रं इत्यमर ॥
टीकायांरायमुकुटः ॥
आणिः पुं स्त्री अक्षाग्रकीलकः
अश्रिः सीमा इतिमेदिनी ॥
आतंकः पुं रोगः संतापः ॥
शंका मुरजध्वनिः इतिमेदिनी
करहमचंद्रौ ज्वरः इतिराज
निर्घंटः ॥
आतंचनं क्लीं प्रतीवापः गलित
स्य स्वर्णादेः ईश्वांतरेणावचूर्णने
इतिस्वामी नितेयणे इति
सभूतिः उपद्रवः इतिरायमुकुटः
द्रवद्रव्य प्रक्षेपणेचितचूर्णे ॥
इतिसारसुंदरी जवने वेगः ॥
आप्यायने तर्पणे इत्यमर ॥
मेदिन्यो
आततायीन् त्रि वधोद्यतः इत्य
मरः अग्निदोगरदश्चैव शस्त्रपाणि
र्धनापहः क्षेत्रदारापहारीचषडे
ते आततायिनः आततायिन
मायांतं हन्यादेवा विचारयन्
नाततायिवधेदोषो हंतुर्भवति
कश्चन इति भगवद्गीताटीकायां
श्रीधरस्वामी ॥

आतपः पुं रौद्रं तत्पर्य्यायः ॥
प्रकाशः २ द्योतः ३ इत्यमर ॥
दिनज्योतिः सूर्य्यालोकः ५
दिनप्रभा ६ रविप्रकाशः ७ प्रद्यो
तः ८ तमारि ९ तापनः १० द्युति
११ अस्यगुणाः कटुत्वं रूक्षत्वं
स्वेद मूर्छा तृष्णा दाहवैवर्ण्यजनक
त्वं नेत्ररोगप्रकोपनत्वंच इति
राजनिर्घंटः ॥
आतपत्रं क्लीं छत्रं इत्यमरः
आतपत्रकं क्लीं छत्रं इतिशद्ध
रत्नावली ॥
आतपवारणं क्लीं छत्रं इति
हेमचंद्रः ॥
आतपाभावः पुं छाया इति
राजनिर्घंटः ॥
आतरः पुं नद्यादितरणार्थदेय
कपर्दकादिः तत्पर्य्यायः तर
पण्य २ इत्यमरः पाराणिकडि
नौकाभाडा इतिभाषा ॥
आतर्पणं क्लीं प्रीणने तृप्तिः
मंगलालेपने अलिपना इति
भाषा इतिमेदिनी
आतापी पुं आतायीचिल्लः
इत्यमरटीकायांस्वामी
आतायीन् पुं चिल्लः चिलइति
भाषा इत्यमरः ॥



आतारः पु आतरः तरपण्य॥
इतिशब्दरत्नावली॥
आतिः पु पक्षी इतिसिद्धांत
कौमुद्यामुणादि वृत्तिः॥
आतिथेयः त्रि अतिथौसाधुः।
अतिथिसेवाकारकः इत्यमरः
आतिथ्यं त्रि अतिथ्यर्थवस्तु
अतिथिभक्तणादिद्रव्यं इत्यमरः
अतिथिसेवाच॥
आतिथ्यः पु अतिथिः॥इति
मेदिनी॥
आतुः पु भेलकः भेलामात
इत्यादिभाषा इतिशब्दमाला
आतुरः त्रि रोगी तत्पर्य्यायः
आमयावी २ विकृतः ३ व्याधितः
४ अपटुः ५ अभ्यमितः ६ अभ्यंतः
इत्यमरः (ता
आतम्प्रं स्त्री फलविशेषः आ
इतिभाषा अस्यगुणाः तृप्तिजन
कत्वं रक्तवर्द्धकत्वं स्वादुत्वं
शीतलत्वं बलमांसकारित्वं।
लघुत्वं दाह रक्त पित्त वायु
नाशित्वंच इतिद्रव्यगुणः॥
आतोद्यं स्त्री वाद्यं तच्चतुर्विधं
वीणादिवाद्यं ततं १ मुरजादि
वाद्यं आनद्धं २ वंशादिवाद्यं
सुषिरं ३ कांस्यतालादिवाद्यं

घनं ४ इत्यमरः॥
आत्तगंधः त्रि दूरीभूताहंकारः १
तत्पर्य्यायः अभिभूतः २
इतिहेमचंद्रः गृहीतगंधः॥
आत्तगर्वः त्रि अरिणागृहीतगर्वः
दूरीभूताहंकारः भग्नदर्पः॥
इत्यमरः॥
आत्मगुप्ता स्त्री लताविशेषः
आलकुशी इति भाषातत्
पर्य्यायः मर्कटी २ कंडुरा ३ अ
व्यंडा ४ कच्छुरा ५ जटा ६ जडा ७
सुकशिंबा ८ आमगुप्ता ९ ऋषभी
१० कपिकच्छुरा ११ इतिरत्नमाला
आत्मग्राहीन त्रि आत्मंभरिः स्वार्थी
आत्मघोषः पु काकः इत्यमरः
कुक्कुटः इतिशब्दचंद्रिका॥
न
आत्मघाती त्रि आत्महन्ता
व्यापादयेद्दृथात्मानं स्वयंयोऽग्नु
दकादिभिः विहितं तस्यना
शौचं नाग्निर्नाप्युदकादिकं इति
कूर्म्मपुराणं॥
आत्मजः पु पुत्रः इत्यमरः॥
आत्मजन्मा न पु पुत्रः इति शब्द
रत्नावली॥
आत्मजा स्त्री कन्या इत्यमरः॥
बुद्धिः॥ इतिशब्दरत्नावली

आत्मदर्शः पु दर्पणे॥इति
हेमचंद्रः॥
आत्मनीनः पु सूतः श्यालः॥
शालधारः विदूषकः इत्यजयः
आत्मनीने त्रि आत्मनेहिते।
इतिव्याकरणे पथ्ये इतिराज
निर्घंटः॥
आत्मबंधुः पु पितृष्वस्रपुत्रः॥
मातुलपुत्रः मातृष्वस्रपुत्रः इति
स्मृतिः॥
आत्मवीरः पु प्राणवान् श्या
लकः विदूषकः इतिमेदिनी
आत्मभूः पु ब्रह्मा कामदेवः
इत्यमरः विष्णुः शिवः इति॥
शब्दरत्नावली॥
आत्ममूली स्त्री डरालभाहस्तः
इतिशब्दमाला॥
आत्मंभरिः त्रि आत्मोदरमात्र
भरणकर्त्ता तत्पर्य्यायः कुक्षि
भरिः २ स्वोदरपूरकः ३ इत्य॥
मरः॥
आत्मयोनिः पु ब्रह्मा विष्णुः
शिवः कामदेवः॥इति मेदिनी
शब्दरत्नावल्यौ॥
आत्मरक्षा स्त्रीमहेंद्रवारुणी॥
हस्तः॥इतिराजनिर्घंटः॥
आत्मशल्या स्त्री शतावरी इति

राजनिर्घंटः॥
आत्मश्लाघा स्त्री आत्मगर्वः स्वीय
प्रशंसा॥
आत्महत्या स्त्री आत्मघातः स्ववधः
आत्महा न पु देवलः इतिशब्द
रत्नावली आत्मघाती नृदेह
माद्यं सुलभं सुदुर्लभं प्लवं सुकल्पं
गुरुकर्णधारं मयानुकूलेन नभस्व
तेरितं पुमान्भवाब्धिं नतरेत्स
आत्महा॥इति श्रीभागवते॥
आत्मा न पु यत्नः धृतिः बुद्धिः
स्वभावः ब्रह्म देहः इत्य
मरः मनः॥इति मेदिनी पर॥
व्यावर्त्तने इतिधरणी पुत्रः
इतिशब्दरत्नावली॥जीवः अर्कः
हुताशनः वायुः इति हेम॥
चंद्रः॥
आत्माधीनः पु पुत्रः प्राण॥
धारः॥श्यालकः विदूषकः
इति हेमचंद्रः॥
आत्माशी न पु मत्स्यः॥इति
त्रिकांडशेषः॥
आत्माश्रयः पु तर्कविशेषः तस्य
लक्षणं।स्वापेक्षापादकप्रसंग
त्वं अपेक्षाच ज्ञाप्तौ उत्पत्तौ॥
स्थितौच ग्राह्या तत्राद्ययथा॥

यतद्घटेज्ञाने यथेतद्घटेज्ञानजन्य
स्यात् यतद्घट ज्ञानभिन्नेस्यात् द्वि
तीयात् घटोऽयं यथेतद्घटेजनक
स्यात् अतद्घटेभिन्नः स्यात् तृती
याच्च अयं घटो यथे तद्घटवृत्तिः
स्यात् तथात्वेनोपलभ्येत इति
आत्मीयः त्रि स्वकीयः अंतरंगः
इति हेमचंद्रः ॥
आत्मोद्भवा स्त्री माषपर्णी इति
राजनिर्घंटः कन्या पुत्रे पुं ॥
आत्रेयः पुं अत्रिमुनिपुत्रः सच
दत्तः दुर्वासाः चंद्रश्च इति मे
दिनी शारीरस्यारसधातुः इति
हेमचंद्रः ॥
आत्रेयिका स्त्री ऋतुमती इति
हलायुधः ॥
आत्रेयी स्त्री पुष्पवती स्त्री नदी
विशेषः इतिमेदिनी ॥
आथर्वणं क्ली अथर्वणां समूहः
अथर्वनाम्ना मुनिना प्रोक्तो वेदः अ
थर्वा तेषां सङ्घः इत्यमरः ॥
शांतिगृहं इति हेमचंद्रः ॥
आथर्वणः पुं पुरोहितः अथर्व
वेदज्ञब्राह्मणः इतिहेमचंद्रः ॥
आदरः पुं आरंभः इति त्रि
कांडशेषः समादरः सम्मानः
आदर्य्यः त्रि आदरणीयः आद
र्तव्यः । आदरोपयुक्तः ॥
आदर्शः पुं दर्पणः टीका ॥
प्रतिपुस्तकं इतिमेदिनी ॥
आदानं क्ली ग्रहणं अश्वाभरणं
इति मेदिनी हेमचंद्रौ रोग ॥
लक्षणं इति राजनिर्घंटः ॥
आदानी स्त्री हस्तिघोषावृत्तः
इति रत्नमाला ॥
आदिः पुं पूर्वः प्रथमः इत्य
मरः पदांतेगणस्तबकः यथा
इत्यादिः ॥
आदिकविः पुं ब्रह्मा इति ॥
श्रीभागवते वाल्मीकिमुनिः
इतिहेमचंद्रः ॥
आदिकारणं क्ली पूर्वनिमित्तं
मूलहेतुः तत्पर्य्यायः निदानं
२ इत्यमरः ॥
आदितेयः पुं अदितिपुत्रः ।
देवः इत्यमरः ॥
आदित्यः पुं देवः सूर्य्यः इत्य
मरमेदिन्यौ द्वादशादित्यगणे
बहुवचनांतः इत्यमरः ॥ तत्र
त्यैकनामानि विवस्वान् १ अर्यमा
२ पूषा ३ त्वष्टा ४ सविता ५ भगः ६
धाता ७ विधाता ८ वरुणः ९ मित्रः
१० शक्रः ११ उरुक्रमः १२ एते
कश्यपस्य अदितिभार्य्यायांजाताः

कल्पांतरे त्वष्टृकन्यासंज्ञा आदित्य
पत्नी आदित्यतेजः सोढमसमर्था
अतस्तस्याः पितृकृतादित्यद्वादश
खंडाद्द्वादशादित्याः तेषां द्वादश
मासेष्वेकैकस्योदयः इति
पुराणं अर्कवृक्षः आकंद इति
भाषा इत्यमरः ॥
आदित्यपत्रः पुं क्षुपविशेषः
तत्पर्य्यायः अर्कपत्रः २ अर्कदलः
३ सूर्य्यपुत्रः ४ तपनच्छदः ५ कुष्ठारिः
६ विटपः ७ सुपत्रः ८ रविप्रियः ९
रश्मिपतिः १० रुद्रः ११ । अस्य
गुणाः । कटुत्वं उष्णवीर्य्यत्वं कफ
वातरोग जादरगुल्मारोचक ना
शित्वं अग्निसंदीपनत्वंच इति
राजनिर्घंटः ॥
आदित्यपुष्पिका स्त्री लोहितार्क
वृक्षः रांगा आकंद इति भाषा
इतिरत्नमाला ॥
आदित्यभक्ता स्त्री लताविशेषः
हुडहुडिया इति भाषा तत् ॥
पर्य्यायः वरदा २ अर्कभक्ता ३
सुवर्चला ४ सूर्य्यलता ५ सूर्य्यावर्त्ती
६ अर्ककांता ७ मंडूकपर्णी ८ सर
सभवा ९ सौरी १० सुतेजाः ११
अर्कहिता १२ वरिष्ठा १३ मंडूकी
१४ सुमनामा १५ देवी १६ मार्त्ती ॥
तंडवल्लभा १७ विक्रांता १८ भक्त
रेष्टा १९ । अस्यागुणाः हिमत्व
तिक्तत्वं कटुत्वं उष्णत्वं कफत्व
ग्दोषकंडुव्रण कुष्ठभूतग्रहोग्रशीत
ज्वरनाशित्वंच अन्यच्च स्वादुपारु
रसत्वं गुरुत्वं । अपित्तवर्द्धकत्वं ।
क्षाररसत्वं विष्टंभ वातनाशित्वंच
॥ इति राजनिर्घंटः ॥
आदित्यसूनुः पुं सुग्रीववानरः
इतिहेमचंद्रः यमः शने
श्चरः सावर्णिमनुः वैवस्वतमनुः
इति पुराणं ॥
आदिदेवः पुं नारायणः ॥ इति
त्रिकांडशेषः ॥
आदिवराहः पुं विष्णुः इति
त्रिकांडशेषः ॥
आदिमं त्रि आद्यं प्रथमभव
वस्तु इत्यमरटीका व्याकरणेच
आदिराजः पुं पृथुराजा इति
हेमचंद्रः ॥
आदिष्टं क्ली उच्छिष्टं इति मे
दिनी ॥
आदिष्टः त्रि आदेशितः आ
ज्ञप्तः ॥ इति मेदिनी कथितः
कृतादेशावर्णः ॥
आदीनवः पुं क्लेशः इत्यमरः
॥ दोषः ॥ दुरंतः इति मेदिनी ॥

आदीपने क्ली आलिंपना आलि
पना इति भाषा इति त्रिकाण्ड
शेषः ॥
आदृतः त्रि कृतादरः सादरः
आर्च्चितः पूजितः इत्यमरः ॥
आदृत्यः त्रि आदरणीयः आदर
योग्यः ॥
आदेशः पुं आज्ञा इति ॥
हेमचन्द्रः ज्योतिःशास्त्रफले ॥
इति सिद्धान्तशिरोमणिः वर्णस्य
वर्णान्तरेण प्राप्तिः प्रकृतिप्रत्य
योपधातिकार्य्यं इति व्याकरणं
आदेशिनि पुं दैवज्ञः गणकः
इति हेमचन्द्रः ॥
आदेष्टा पुं यागविषये ममेष्ट
संपादनाय यथार्थकर्म्म कुर्विति
ऋत्विजामादेशकः तत्पर्य्यायः
व्रती २ वष्टा ३ यजमानः ४ इत्य
मरः अन्वादेष्टा ५ याजकः ६ ॥
इति हेमचन्द्रः आदेशकर्त्ता ॥
आद्यः त्रि प्रथमः इत्यमरः ॥
आद्यं क्ली धान्ये इति राज
निर्घण्टः ॥ अदनीयद्रव्ये त्रि ॥
आद्यकविः पुं वाल्मीकिमुनिः
इतिभूरिप्रयोगः ॥
आद्यमाषकः पुं माषकपरिमाणे
पंचरत्तिकाः इत्यमरः ॥
आद्यबीजं क्ली आदिकारणे
इति जटाधरः ॥
आद्या स्त्री दुर्गा इति शब्दरत्नावली
काली तारा त्रिपुर ॥
सुन्दरी ॥ भुवनेश्वरी इति तन्त्र ॥
सार नीलतन्त्र योगिनीतन्त्राणि
आद्यूनः त्रि औदरिकः पेटूक इति
भाषा इत्यमरः आदिहीनः ॥
आद्योपान्तं क्ली पूर्वापरं इत्यक
नागादि इति भाषा ॥
आधमने क्ली बंधके इति स्मृतिः
आधाने क्ली गर्भाधाने अग्न्या
धानेस्थापितद्रव्ये इति स्मृतिः
आधानिकं क्ली गर्भाधानसंस्कारः
इति त्रिकाण्डशेषः ॥
आधारः पुं अधिकरणे आल
वाले अम्बुधारणे इति मेदिनी
क्षेत्रादिसेकार्थे सरणा वद्ध ॥
नाले जले निरुध्य यत्रस्थाप्यते स
आधारः बद्धकेदारादिः बांध इति
ख्यातः । इत्यमरटीकायां भरतः
शास्त्रार्थे जलबंधनमाधारः
इ... तिवैकुण्ठः क्षेत्रादिसेकार्थं
जलाधारवस्थानमाधार इति मधुः
आधार्मिकः त्रि अधार्मिकः इति
त्रिकाण्डशेषः ॥

आधिः पुं मनःपीडा प्रत्याशा ॥
बंधके व्यसने अधिष्ठाने ॥
इति मेदिनी ॥
आधिक्यं क्ली अधिकस्य भावः
अधिकत्वे अतिशयता ॥
आधिज्ञः त्रि वक्रः व्यथितः ॥
इत्यजयपालः ॥
आधिपत्यं क्ली अधिपतेर्भावः
स्वामित्वं प्रभुत्वं ऐश्वर्य्यं ॥
आधिभोगः पुं बंधकद्रव्यस्य
भोगः ॥
आधिमन्थवः पुं ज्वराग्निः इति
हारावली ॥
आधिवेदनिकं त्रि द्वितीयविवा
हार्थं प्रथमस्त्रियै देतन्तयनादि यथा
अधिवित्तस्त्रियै देयमाधिवेदनिकं
समं नदत्ते स्त्रीधने यस्यै दत्ते
त्वर्द्धं प्रकीर्त्तितं इति याज्ञवल्क्यः
आधुतः त्रि आधूतः कम्पितः
इत्यमरटीकायां रायमुकुटः ॥
आधुनिकः त्रि अधुनाजातः न
वः आधूतः त्रि कंपितः इत्यमरः
आधेयं त्रि आधारस्थितवस्तु
आधोरणः पुं हस्तिपकः माहुत
इति भाषा इत्यमरः ॥
आध्मातः पुं शब्दितः दग्धः
वातरोगविशेषः सेयतः इति
मेदिनी ॥
आध्मानः पुं वातव्याधिविशेषः
तस्य रूपं साटोपमत्युग्ररुजं ॥
आध्मातमुदरं भृशं आध्मानमिति
जानीयाद्घोरं वात निरोधजं ॥
इति निदानं ॥
आध्मानी स्त्री नलिकानामगंधद्रव्ये
इति राजनिर्घण्टः ॥
आध्या स्त्री चिंता स्मृतिः ॥ इति
शब्दरत्नावली ॥
आध्यानं क्ली ध्यानं चिंता ॥
इत्यमरः ॥
आध्यापकः पुं अध्यापकः इति
शब्दरत्नावली ॥
आनः पुं उच्छ्वासः वहिर्मुख
श्वासः इति हेमचन्द्रः
आनकः पुं पटहः भेरी ॥
मृदंगः शब्दकृन्मेघः इति
मेदिनी ॥
आनकदुन्दुभिः पुं वसुदेवः
इत्यमरः ॥
आनकदुन्दुभिः पुं स्त्री वृहड्ढक्का
॥ इत्यमरटीकायां भरतः ॥
आनतः त्रि नतः तत्पर्य्यायः
अवाग्रः २ अवनतः ३ इत्यमरः
आनद्धं क्ली चर्म्मवद्धमुखवाद्य
मात्रं तच्च मुरजादि इत्यमरः ॥



कल्पमात्रं तन्नुवेश भूयादि ॥ इत्यजयपालः ॥

आनद्धः त्रि संयितः बद्धः इति मेदिनी ॥

आननं क्ली मुखं इत्यमरः ॥

आनंदः पु आह्लादः तत्पर्य्यायः आनंदथुः २ शर्म्म ३ शातं ४ सुखं ५ मुत् ६ प्रीतिः ७ प्रमोदः ८ हर्षः ९ प्रमदः १० आमोदः ॥ संमदः १२ इत्यमरः वासु ॥ देवस्य वल्लविशेषः इति हेमचंद्रः ॥

आनंदः त्रि आनंदविशिष्टः हर्षयुक्तः सखी इत्यमरटीका ॥

आनंदथुः पु आनंदः हर्षः इत्यमरः तद्युक्ते त्रि ॥ स

आनंदनं क्ली गमनागमनसमये सुहृदादेरालिंगनादिरूपस्वागतादि प्रश्नादिद्वारानंदोत्पादने तत् पर्य्यायः सभाजनः २ स्वभाजनः ३ स्वभाजनः ४ आप्रश्नः ५ आमंत्रणं ६ इत्यमरः तट्टीका च ॥

आनंदपटः क्ली नवोढावस्त्रं ॥ इतिहारावली ॥

आनंदप्रभवं क्ली रेतः वीर्य्यं ॥ इतिहेमचंद्रः ॥

आनंदमयकोषः पु सत्वप्रधाना ज्ञाने तत्पर्य्यायः कारणशरीरं २ सुषुप्तिः ३ इतिवेदांतः ॥

आनंदा स्त्री विजया आराम शीतला इति राजनिर्घंटः ॥

आनंदिः पु आनंदः हर्षः ॥ इति शब्दमाला ॥

आनंदितः त्रि आनंदयुक्तः हृष्टः आह्लादितः ॥

आनंदीन त्रि आनंदविशिष्टः

आनंदी स्त्री हस्तविशेषः आकन पाता इति ख्याता इति शब्दचंद्रिका ॥

आनयः पु उपनयने इति हेमचंद्रः ॥

आनयनं क्ली स्थानांतरनयनं आना इति भाषा ॥

आनर्तः पु देशविशेषः द्वारका इतिख्याता नृत्यस्थाने युद्धे ॥ इत्यमरः जले इतिमेदिनी

आनर्तदेशवासीलोकः इत्य॥ मरटीका ॥

आनायः पु जाले इत्यमरः ॥

आनाय्य पु दक्षिणाग्निः इत्य॥ मरः गार्हपत्यादग्नेरानीय यो दक्षिणाग्निराधीयते तत्र इति भरतः होम करिवार निमित्ते घरेर इते आनिया दक्षिणदिशे ॥

राखा आगुन इतिभाषा ॥

आनाहः पु मूत्रपुरीषरोधक रोगः तत्पर्य्यायः । विबंधः २ इत्यमरः विष्टंभः ३ मलरोधनः ४ इतिराजनिर्घंटः तस्य संप्राप्ति॥ रूपे आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन प्रवर्त्तमानं न यथा स्वमेनं विकारमानाहमुदाहरंति ॥ इति निदाने दृष्टं इति रमानाथः ॥

आनिलिः पु हनूमान् इति त्रिकांडशेषः ॥

आनिली स्त्री स्वातीनक्षत्रं इति हेमचंद्रः ॥

आनीलः पु नीलघोटकः इति हेमचंद्रः ॥

आनुकूल्यं क्ली अनुकूलता

आनुपूर्वी स्त्री क्ली परिपाटी अनुक्रमः इत्यमरः ॥ यः

आनुमानिकः त्रि अनुमानसंबंधी अनुमानविषयीभूतः ॥

आनुरक्तिः स्त्री अनुरागः ॥

आनुविधित्सा उपकृते रेश॥ त्वपकारेच्छा इति पुराणे ॥

आनूपः पु अनूपदेशस्य जंतु मात्रं तच्च खड्गि महिष वराहादि एषां मांसगुणाः गुरुत्वं उष्णत्वं मधुरत्वं स्निग्धत्वं शुक्रकारित्वं वायुनाशित्वंच इतिराजवल्लभः

आनूपदेशजलगुणाः घनत्वं गुरुत्वं । पिच्छिलत्वं मधुरत्वं श्लेष्म जनकत्वं स्निग्धत्वं अग्निनाशित्वं प्रमेह श्लीपद कुष्ठ गलगंडादि रोगकारित्वंच इतिराजनिर्घंटः

आनृशंस्यं क्ली अनिष्ठुरता ॥

आंतरीक्षं क्ली अंतरीक्षं गगनं इति द्विरूपकोषः आंतरीक्ष भववस्तुनि त्रि ॥

आंतिका स्त्री अंतिका ज्येष्ठा भगिनी इति द्विरूपकोषः ॥

आंत्रिकः त्रि अंत्रेभवः अंत्र संबंधीयः ॥

आंदोल तकु दोलने ॥ इति कविकल्पद्रुमः ॥

आंदोलनं क्ली चलनं कंपनं

आंदोलितं त्रि कृतांदोलनं तत्पर्य्यायः चलितं २ कंपितं ३ धूतं ४ वेल्लितं ५ इति हेमचंद्रः

आंधसिकः त्रि पाचकः सूपकारः इत्यमरः ॥

आन्वयिकः त्रि प्रशस्तकुलजः सत्कुलोद्भवः तत्पर्य्यायः कौलः २ ॥ इति त्रिकांडशेषः ॥ अन्वय

संबंधी ॥
आन्वीक्षिकी स्त्री तर्कविद्यान्याय
विद्या इत्यमरः ॥
आपॢ न औ कि व्यापने ॥
इति कविकल्पद्रुमः ॥
आपः पुं अष्टवसुमध्ये वसुवि
आपः पुं अष्टवसुमध्ये वसुवि
शेषः इति जटाधरः ॥
आपस् स्त्री जले पापे इत्यु
णादिकोषः ॥ (दि
आपक्वं त्रि ईषत् पक्वकलाया
तत्पर्य्यायः पौलिः २ अभ्यूषः ।
इत्यमरः रूटी इति केचित् ॥
आपगा स्त्री नदी इत्यमरः ॥
आपणः पुं पण्यविक्रयशाला ॥
दोकान इति भाषा तत्पर्य्यायः
निषद्या २ विपणिः ३ पण्यवीथिके
४ इत्यमरः वत्त्कं हट्टे इत्यन्ये ॥
आपणादि द्वये हट्टे विपण्यादि
द्वये हट्ट गृहे इति केचित् इत्य
मरटीकायां भरतः ॥
आपणिकः पुं वणिकः दोकानि
मुदि व्यवसायी इत्यादि भाषा ॥
इत्युणादि कोषः ॥
आपतिकः पुं श्येनपक्षी । बाज
इति भाषा दैवायत्ते त्रि ॥
इत्युणादिकोषः ॥
आपत् स्त्री विपत् विपत्तिः ॥

इत्यमरः ॥
आपत्तिः स्त्री दोषः इति हेम ॥
चंद्रः प्रापणे आपत् ॥ इति ॥
मेदिनी ॥
आपत्प्राप्तः त्रि विपद्ग्रस्तः तत्
आपत्प्राप्तः त्रि विपद्ग्रस्तः तत्
पर्य्यायः आपन्नः २ ॥ इत्यमरः
आपद् स्त्री विपत्तिः इत्यमरः
आपदा स्त्री विपत्तिः इतिराय
मुकुटः ॥
आपनं क्ली मरीचं इति शब्द ॥
चंद्रिका प्रापणे ॥
आपनिकः पुं इंद्रनीलमणिः
किरातः इत्युणादिकोषः ॥
आपन्नः त्रि आपद्ग्रस्तः तत् ॥
पर्य्यायः । आपत् प्राप्तः २ इत्य
मरः प्राप्तः इति मेदिनी ॥
आपन्नसत्वा स्त्री गर्भवती इत्य ॥
मरः ॥
आपमित्यकं क्ली विनिमयात्
प्राप्तः बदलकरियालैयाद्रव्य
इति भाषा इत्यमरः ॥
आपवः पुं वशिष्ठमुनिः इति
महाभारतं ॥
आपस्तंभिनी स्त्री लिंगिनीलता
इति राजनिर्घंटः ॥
आपाकः पुं कुंभकार मृत् पात्र
दहनस्थानं पोयान् इति भाषा

इति जटाधरः ॥
आपातः पुं पतने तत्कालः ॥
इति मेदिनी पातने ॥ इति ॥
शब्दचंद्रिका ॥
आपानं क्ली मद्यपानार्थ सभा ।
तत्पर्य्यायः पानगोष्ठिका २ ॥
इत्यमरः मदखावारवक्क इति
भाषा ॥
आपालिः पुं केशकीटः उकुन
इति भाषा ॥ इति जटाधरः ॥
आपिंजरं क्ली स्वर्णं इति राज
निर्घंटः ॥
आपीडः पुं शिखास्थितमाल्य
तत्पर्य्यायः शेखरः २ इत्य ॥
मरः ॥
आपीतं क्ली माक्षिक धातुः ॥
इति राजनिर्घंटः ॥
आपीनं क्ली ऊधः गरुरपालान्
इति भाषा इत्यमरः ॥
आपीनः त्रि ईषत् स्थूलः सम्यक
स्थूलः ॥
आपीनः पुं कूपः इति बोप ।
देवः ॥ (ष्टक
आपूपिकः त्रि पिष्टकजीवी पि
विक्रयकर्त्ता । तत्पर्य्यायः कांद
विकः २ भक्ष्यकारः ३ इत्यमरः
मयरा हालुइकर रूटिवाला

इत्यादि भाषा ॥
आपूपिकं क्ली अपूपसमूहः बहु
पिष्टकं इत्यमरः
आपूप्यः पुं शक्तुः चूर्णिकः छातु
मयदा बेसन इत्यादि भाषा ॥
इति त्रिकांडशेषः ॥
आपूर्तिः स्त्री ईषत् पूरणे सम्यक
पूरणे ॥
आपूषं क्ली रंगे रां इति ॥
भाषा इति राजनिर्घंटः ॥
आपृच्छा स्त्री आभाषणं आलापः
इति हेमचंद्रः ॥
आपोक्लिमं क्ली लग्नात् तृतीयषष्ठ
नवमद्वादश लग्ने इति ज्योतिः
शास्त्रं ॥
आप्तः त्रि प्रत्ययितः विश्वस्तः
इत्यमरः प्राप्तः लब्धः सत्य
इति हेमचंद्रः ॥
आप्तः पुं भ्रम भ्रम प्रमाद विप्रलिप्सा
करणापाटव रूप दोषचतुष्टय रहि
तः सच ऋष्यादिः इति स्मृतिः
आप्तगर्भः त्रि प्राप्तहेकारः
आप्ता स्त्री जटा इति हारावली
आप्तिः स्त्री संबंधः योगः लाभः
प्राप्तिः इति हेमचंद्रः ॥
आप्तोक्तिः स्त्री सिद्धवाक्यं ।
तत्पर्य्यायः राद्धं २ सिद्धांतः ३

अभ्योतः ४ समय ५ आगमः ६
इतिहेमचंद्रः ॥
आप्यं त्रि जलविकारजे फेणादि
तत्पर्य्यायः अम्मयं २ इत्यमरः
आप्यं क्ली वाप्यहृतः कुड इति
भाषा इत्यमरटीकायां राय
मुकुटः ॥
आप्यायने क्ली तर्पणे प्रीणने
तृप्तिः इति राजनिर्घंटः ॥
आप्यायितः त्रि तृप्तः प्रीतः
आप्रछने क्ली गमनागमनादि
समये सुहृदादेरालिंगनारोग्यप्र
श्नस्वागतादिनानंदने इत्यमरः॥
आप्रछन्नं क्ली आप्रछनं। तत्
पर्य्यायः आनंदनं २ सभाजनं ३
इति हेमचंद्रः ॥
आप्रपदं क्ली पादाग्रपर्य्यंतं ॥
आप्रपदीनं त्रि पादाग्रपर्य्यंत
प्राप्तवस्त्रादि इत्यमरः ॥
आप्लवः पुं स्नाने इत्यमरः ॥
आप्लवव्रती पुं आप्लुतव्रती।
स्नातकब्राह्मणः इत्यमरटीकायां
भरतः ॥
आप्लावः पुं स्नाने इत्यमरः ॥
आप्लुतः पुं आप्लुतव्रती स्नातकः
इतिमेदिनी ॥
आप्लुतः त्रि स्नातः कृतस्नानः
इतिमेदिनी स्नाने क्ली इति हेम
चंद्रः ॥
आप्लुतव्रती न पुं समाप्तवेदाध्ययन
स्नानशीलः ब्रह्मचर्य्यत्यक्ताश्रमो गृहा
श्रमं गतः सः समाप्तवेदाध्ययनोयः
स्नानशील आश्रमांतरेन गतः सोपि
आप्लुतेस्नानेतत्र व्रती नित्यस्नायी
इतिव्युत्पत्तिः इत्यमरटीका
यां भरतः ॥
आप्सान पुं वायुः इति सिद्धांत ॥
कौमुद्यामुणादिवृत्तिः ॥
आफूकं क्ली अफेणं आफि
इति भाषा इतिवैद्यकं ॥
आबद्धः पुं दृढवंदने प्रेम
अलंकारः इति विश्वमेदिन्यो
योक्रे इति मेदिनी ॥
आबंधः पुं योक्रे योत दडी
इतिभाषा इत्यमर हेमचंद्रौ ॥
भूषणे प्रेम वंधने इति ॥
हेमचंद्रः ॥
आवलिः स्त्री आलिः श्रेणी
इत्यमरः ॥
आविद्धः त्रि वक्रः क्षिप्तः॥
इत्यमरः पराहतः इतिमे॥
दिनी॥ मूर्खः इति शब्दरत्नावली
आविधः पुं वेधनास्त्रं भ्रमर॥

तरपन इत्यादि भाषा इत्यमरः ॥
आविलः त्रि अनच्छः अनिर्मलः
इत्यमरः ॥
आविलकंदः पुं मालाकंदः ॥
इतिराजनिर्घंटः ॥
आवुत्तः पुं नाट्योक्तौ भगिनी
पतिः ॥ इत्यमरः ॥
आभरणं क्ली भूषणं अलंकारः
इत्यमरः
आभा स्त्री शोभा कांतिः इति
हेमचंद्रः दीप्तिः ज्योतिः ॥
आभातिः स्त्री छाया इति राज
निर्घंटः ॥
आभाषणं क्ली आलापः कथनं
इत्यमरः ॥
आभासः पुं सदृशः प्रतिविंबं
इतिवेदांतः दीप्तिः ॥ अभि
प्रायः ॥ [illegible]
आभास्वरः पुं चतुःषष्टिसंख्य
देवता विशेषः इत्यमरः ॥
आभिजनः पुं अभिजनस्यभावः
कुलसंबंधीयः गोड् पदवी इत्या
दिभाषा
आभिजात्यं क्ली अभिजातस्य
भावः कौलिन्यं पांडित्यं ॥
आभिथा स्त्री शब्दः इतिश
ब्दरत्नावली ॥
आभिघातकं क्ली शब्दः इतिशब्द
रत्नावली ॥
आभीरः पुं गोपः। आहिर इति
भाषा इत्यमरः ॥ सच ब्राह्मणा
दम्बष्ठायांजातः इतिमनुः ॥
आभीरपल्लिः स्त्री गोपपल्ली
गोयालापाडा इति भाषा इत्य
मरटीकायां रायमुकुटः ॥
आभीरपल्ली स्त्री गोपगृहसमूहः
गोपग्रामः। गोपगृहे गोप
स्थाने तत्पर्य्यायः घोषः २॥
इत्यमरः ॥
आभीरी स्त्री गोपस्त्रीजातिः
गोपपत्नी तत्पर्य्यायः महा
शूद्री २ इत्यमरः आहिरिणी
इतिभाषा ॥
आभीलं क्ली कष्टे कृछ्रे इत्य
मरः ॥
आभीलः त्रि कष्टयुक्तः इत्यमरः
भयानकः इतिमेदिनी ॥
आभीक्ष्ण्यं क्ली अत्यर्थं नित्यं
तद्युक्तक्रिया
रत्नावली ॥
आभेरी स्त्री रागिणी विशेषः
इतिहलायुधः ॥
आभोगः पुं परिपूर्णता इत्य
मरः वरुणस्यछत्रे यत्नः इति



मेदिनी
आमं त्रि पाकरहिते कोचा ॥
इतिभाषा तत्पर्य्यायः अपक्वं॥
२ असिद्धं ३ अमृतं ४ इतिरत्न
माला ॥ (मध्ये
आमे स्त्री षट्प्रकाराजीर्णरोग
रोगविशेषः तस्यकारणरूपे ॥
आमेविदग्धे विष्टब्धे कफपित्तानि
लैस्त्रिभिः अजीर्णके विदितैत्तिवन्
ध्यैरसशेषतः अजीर्णे पंचमे के
चिन्निर्दोषे दिनपाकिवदंति
यद्धेवाजीर्णे प्राकृते प्रतिवासरे
तत्रामे गुरुतोत् क्लेदः शोथो
गंडादिकूटगः उद्गारश्च यथाभुक्त
मविदग्धः प्रवर्त्तते इति निदाने
अन्यच्चाभुक्तमरावशेषं यत्रसंस्थ
यत्स्वयाचितं गतमामाशयेयस्मा
तस्मादाममितदुच्यते ॥ अन्नमन्नरसे
केचित् केचिच्चमलसंचये प्रथमे
दोषदुष्टिं च आममत्यभिधीयते
आमः पुं रोगमात्रे रोग ॥
भेदः इति मेदिनी मलवेष ॥
म्यरोगः इतिराजनिर्घंटः ॥
आमगंधि स्त्री विस्रामूत्रादिगन्ध
युक्ते ॥ अपक्वमांसादिगंधविशि
ष्टे तत्पर्य्यायः ॥ विस्रं ॥ विस्रं ३
इत्यमरः ॥

आमेडः पुं एरंडवृक्षः इति
राजनिर्घंटः शब्दरत्नावल्यां
आमनस्य स्त्री पीडाडःखे ॥
इत्यमरः ॥
आमंत्रणं स्त्री संबोधने इति
हेमचंद्रः ॥ आमंत्रणं इति जटा
धरः ॥ निमंत्रणं इति स्मृतिः
निमंत्रणविशेषः परकरणप्रत्य
वायोनास्ति यथा इह वायी तम
वान् इति मुग्धबोधव्याकरणं
आमयः पुं रोगः इत्यमरः ॥
आमयं स्त्री कुष्ठनामौषधिः कुड
इतिभाषा इतिराजनिर्घंटः ॥
आमयावी न त्रि रोगी इत्यमरः
आमर्षः पुं क्रोधः इत्यमर ॥
टीकायां भरतः ॥
आमलकः पुं वासकवृक्षः इति
शब्दचंद्रिका ॥
आमलकं स्त्री आमलकीविशेषः
काठआमला इतिभाषातत्पर्य्यायः
काष्ठधात्रीफलं २ लघ्वामलकं
३ लघुजातीफलं ४ अस्य गुणाः
कषायत्वं कटुत्वं शीतत्वं पित्त
स्रदोषनाशित्वं च इति राज
निर्घंटः ॥
आमलकी त्रि स्वनामख्यातफल
वृक्षविशेषः आमला इतिभाषा

आमोदी त्रि मुखवासनेः इत्य॥
मरः कर्पूरादिवाटकाकृतमुख
गंधः इति सारसुंदरी ॥ मुख
वासनवाटकादिः आमोदयुक्तः
कर्पूरादिरामोदी इतिभरतः ॥
नानाद्रव्यरचित पंचैकषायकवा
कर्पूरादिभिर्मुखवायपोग्यमुखवा
सनवाटकादिः इति सर्वस्वं ॥
गंधयुक्तः हर्षविशिष्टः ॥
आम्नायः पुं वेदः संप्रदायः ॥
गुरुपरंपरा प्राप्तोपदेश इति
यावत् इत्यमरः निगमः उप
देशः इति मेदिनी ॥ कुलं ॥
आगमः इतिहेमचंद्रः कुल ॥
क्रमः इति शब्दरत्नावली ॥
आम्बिकेयः पुं धृतराष्ट्रोराजा
इतित्रिकांडशेषः कार्त्तिकेयः ॥
आम्रः पुं फलवृक्षविशेषः आम
आंव इति भाषा तत्पर्य्यायः ।
चूतः २ रसालः ३ अतिसौरभ ॥
श्वेत सहकारः ४ इत्यमरः ॥
कामशरः ५ कामवल्लभः ६ का
मांगः ७ कीरेष्टः ८ माधवद्रुमः ९
भृंगाभीष्टः १० सीधुरसः ११ मधुली
१२ कोकिलोत्सवः १३ वसंत ॥
दूतः १४ अम्लफलः १५ मोदाख्यः
१६ मन्मथालयः १७ मधावासः १८

सुमदनः १९ पिकरागः २० नृप
प्रियः २१ प्रियांबुः २२ कोकिला
वासः २३ इतिराजनिर्घंटः ॥
बालाम्रफलगुणः वायुरक्तपित्तका
रित्वं इतिराजवल्लभः अपिच
कषायत्वं अम्लरसत्वं सुगंधित्वं
कफमयनाशित्वं अस्त्रकरत्वं पित्त
प्रकोपवायुरक्तदोषपटुत्वादि
रुचिप्रदत्वं च उन्नवन्नास्थितादक
इतिराजनिर्घंटः मध्याम ॥
गुणः पित्तकारित्वं
पक्वाम्रगुणः वर्णरुचिमांस
शुक्रबलकारित्वं पित्ताविरोधि
त्वं वायुनाशित्वं लघुत्वं गुरुत्वं
आनुलोमनत्वं इतिराजवल्लभः
अपिच त्रिदोषशमताकारित्वं
स्वादुत्वं पुष्टिजनकत्वं अधिक
धातुप्रवर्धकारित्वं तृप्तिकांति
कारित्वं तृष्णाश्रमश्वनत्वं च इति
राजनिर्घंटः मधुशुक्राम्रगुणः
क्षयरोगप्लीहवातश्लेष्म
रोगनाशित्वं हृतशुक्राम्र ॥
गुणः वातपित्तनाशित्वं ।
अग्निबलवर्णकारित्वं च दुग्ध
शुक्राम्रगुणः प्रीतलत्वं स्वा
दुत्वं गुरुत्वं स्निग्धत्वं भेदकत्वं ॥
वातपित्तहारित्वं शुक्रारक्तबल

वर्द्धकत्वञ्च तत्फलास्थिगुणाः
तृसाछर्द्दि मेहातीसार ॥
नाशित्वं इतिराजवल्लभः॥
तत्तरुगुणः कषायत्वं ॥
तन्मूलगुणाः सुगन्धित्वं कषा
यत्वं रुचिकारित्वं संग्राहित्वं॥
शीतलत्वञ्च तत्पुष्पगुणाः ॥
रुचिकारित्वं अग्निदीपनत्वञ्च
आम्रपेषीगुणाः काषायत्वं॥
अम्लत्वं भेदकत्वं कफ वात॥
नाशित्वञ्च कृत्रिमपक्वाम्रगुणाः
अम्लरसहानेर्मधुरत्वाच्च पित्त
नाशित्वं॥ चुषिताम्रगुणाः॥
परमरुचि बलवीर्य्यकारित्वंलघु
त्वं। शीतलत्वं। शीघ्र पाकित्वं॥
वातपित्तहारित्वं सारकत्वञ्च॥:
तद्गालितरसगुणाः बलकारि
त्वं गुरुत्वं वातहरत्वं सारकत्वं॥
हृद्यत्वं तृप्तिजनकत्वं अति॥
शयबृंहणत्वं कफवर्द्धकत्वञ्च॥
तत्खण्डगुणाः गुरुत्वं रो
चकत्वं गुरुपाकित्वं मधुरत्वं॥
बृंहणत्वं बलकारित्वं शीतलत्वं
वातनाशित्वञ्च अतिशयाम्ल॥
भक्षणगुणाः मन्दाग्नि विषम॥
ज्वर रक्तामय बद्ध गुदोदर नयना
मयकारित्वं। एतद्दम्लाम्लविक्षयेनत

मधुराम्रपरं मधुरसपरं नेत्र
हितत्वादि गुणत्वात् यद्यतिशय
भक्षणं करोति तदा शुण्ठीजलात्
पानं अथवा सौवर्च्चलेन सहन्ती॥
प्रयोक्तव्यं तत्पल्लवगुणाः
रुचिकारित्वं कफपित्त ॥
नाशित्वञ्च ॥ अम्लमामेजलं
खिन्नंमहितं हटूपाणिना सिता
शीतांभसि सुकं कर्पूरमरिचान्वितं
प्रपाणकमिदं श्रेष्ठं भीमसेनेन
निर्मितं सद्योरुचिकरं बल्यं
शीघ्रमिन्द्रियतर्पणं इति राज
निर्घण्टः ॥
आम्रगन्धकः पुं समष्ठिलवृक्षः
इतिराजनिर्घण्टः ॥
आम्रपेषी स्त्री शुष्काम्रखण्डं आम
षीइतिभाषा अस्य गुणाः अम्ल
त्वं कषायत्वं उष्णत्वं भेदकत्वं॥
कफवातनाशित्वञ्च॥ इति राज
वल्लभः ॥
आम्रातः पुं आम्रातकः इति
शब्दमाला ॥
आम्रातकः पुं वृक्षविशेषः
आमडा इतिभाषा तत्पर्य्यायः
पीतनः २ कपीतनः ३ इत्यमरः
वर्षपाकी ४॥ इति रत्नमाला
पीतनकः ५ कपिचूडा ६ अम्ब॥

वाटिकः ७ भृङ्गीफलः ८ रसाढ्यः ९
तनुक्षीरः १० कपिप्रियः ११ अम्ब
रातकः १२ अम्रवीयः १३ कपि
चूडः १४ इतिजटाधरः तस्य पक्व
फलगुणाः कषायत्वं अम्लत्वं॥
स्फुटकण्ठहर्षणत्वञ्च तत्पक्वफल
गुणाः मधुराम्लत्वं स्निग्धत्वं पित्त
कफनाशित्वञ्च इति राजनिर्घण्टः
अपिच तृप्ति बल विष्टम्भाजीर्ण
कारित्वं गुरुत्वञ्च इति राज
वल्लभः आम्रावर्त्तः इति राज
निर्घण्टः ॥
आम्रावर्त्तः पुं आम्रपुष्करसः तत्
पर्य्यायः आम्रातकः २ आम
सत्व इतिभाषा अस्य गुणाः तृष्णा
छर्द्दि वात पित्त हरत्वं सारकत्वं
रुचि कारित्वं सूर्य्यांशुभिःपाकों
लघुत्वञ्च पक्वस्य सहकारस्य कटे
विस्तारितो रसः घर्मशुष्कामुहुर्दत्त
आम्रातक इतिस्मृतः इति राज
निर्घण्टः ॥
आम्रेडितं क्ली द्विस्त्रिरुक्तं दुइ
तिनवार बला इति भाषा॥ इत्य
मरः ॥
आम्लवेतसः पुं अम्लवेतसवृक्षः
इतिराजनिर्घण्टः ॥
आम्ला त्रि तिन्तिडीवृक्षः इति॥

शब्दरत्नावली॥ श्रीवल्ली॥ इति
राजनिर्घण्टः ॥
आम्लिका स्त्री तिन्तिडीवृक्षः इत्य
मरटीकायां रायमुकुटः अम्लो
द्गारः इति शब्दमाला ॥
आम्लीका स्त्री तिन्तिडी वृक्षः इत्य
मरटीका ॥
आयः पुं धनागमः प्राप्तिः॥
लाभः स्त्र्यगाररक्षकः इति
हलायुधः ॥
आयःशूलिकः त्रि तीक्ष्णकर्म्मा
द्विप्रकारी इति भूरिप्रयोगः
आयतः त्रि दीर्घः लम्बा इति
भाषा॥ इत्यमरः ॥
आयतच्छदा स्त्री कदलीवृक्षः इति
त्रिकाण्डशेषः ॥
आयतने क्ली यज्ञस्थाने देव
स्थाने तत्पर्य्यायः चैत्यं २॥
इत्यमरः ॥
आयतिः स्त्री उत्तरकालः भवि
ष्यत् कालः प्रभावः कोशदण्डजं
तेजः॥ इत्यमरः दैर्घ्यं संगः
इति विश्व हेमचन्द्रौ प्रापणं
इति धरणी ॥
आयत्तः त्रि अधीनः वशीभूतः
इत्यमरः
आयतिः स्त्री दिने स्नेहः वशि॥

ङ्गे सामर्थ्ये सीमा इति विश्वः
हेमचन्द्रश्च शयने दैर्घ्ये ॥
आभावः भविष्यत् कालः इति
धरणी ॥
आपल्लकं क्ली अलकंठ इति ॥
हेमचन्द्रः ॥
आयसं क्ली लोहं इतिभारतः
राजनिर्घण्टश्च अयोनिर्मिते त्रि।
आयसी स्त्री लोहमयकवचः तत्
पर्य्यायः अंगरक्षिणी २ जालिक
३ जालप्राय ४ इतिहेमचन्द्रः
आयस्तः त्रि तेजितः क्षिप्तः
क्लेशितः ॥ कुपितः हतः इति
मेदिनी ॥
आयातं त्रि आगतं ॥
आयानं क्ली स्वभावः इतिजटा
धरः आगमनं ॥
आयामः पुं दैर्घ्यं इत्यमरः ॥
आयासः पुं श्रान्तिः तत्पर्य्यायः
श्रमः २ क्लमः ३ क्लेशः ४ परिश्र
५ प्रयासः ६ व्यायामः ७ इति
हेमचन्द्रः ॥
आयुः पुं क्ली जीवितव्याप्यका(लः)
॥ इति जटाधरः ॥ (आयुः)
आयुः स क्ली जीवितकालः पर
इत्यमरः तत्पर्य्यायः विजी ॥
वित २ नित्यगः ३ अनुबंधः ४

पुरुषाः सर्वसिद्धाश्चतुर्वर्षशतायु
षः कृतत्रेतादिकेऽप्येवयाद ॥
शोह्रसति क्रमात् इति वैद्यकं
आरोगाः सर्वसिद्धार्थाश्चतुर्वर्ष
शतायुषः कृतत्रेतादिषुह्येषा
मायुर्ह्रसति पादशः इतिमनुः
हृतं इतिराजनिर्घण्टः ॥
आयुक्तः त्रि कर्म्माध्यक्षः तत्
पर्य्यायः नियोगी २ कर्मसचिवः
३ व्यापृतः ४ इति हेमचन्द्रः
आयुधः पुं अस्त्रं इत्यमरः ॥
आयुध धर्म्मिणी स्त्री जयन्तीवृक्षः
इतिशब्दचन्द्रिका ॥
आयुधागारं क्ली अस्त्रगृहं से
लाखाना इति ख्यातं ॥ इति ॥
महाभारते राजधर्म्मः ॥
आयुधिकः पुं अस्त्रजीवी तत्
पर्य्यायः शस्त्राजीवः २ काण्डस्पृष्टः ३
आयुधीयः ४ इत्यमरः ॥
आयुधीयः पुं आयुधिकः इत्य
मरः ॥
आयुर्द्रव्यं औषधे इति ॥
रत्नमाला ॥
आयुर्वेदः पुं अष्टादशविद्यान्तर्गत
धन्वन्तरिप्रणीत विद्याविशेषः वै
द्यकशास्त्रं चिकित्साशास्त्रं ॥
आयुर्वेदी न त्रि आयुर्वेदज्ञः ॥

चिकित्सकः वैद्यः ॥ इति हेम ॥
चन्द्रः राजनिर्घण्टश्च ॥
आयुर्योगः पुं औषधे इति ॥
राजनिर्घण्टः ॥
आयुष्मान् त्रि चिरजीवी दीर्घायु
तत्पर्य्यायः जैवातृकः २ इत्य ॥
मरः ॥
आयुष्मान् पुं विष्कम्भाद्यसप्तवि
शतियोगान्तर्गत तृतीययोगः
तत्रजातफलं यस्यायुष्मान्ज(न्म)
कालेयनुष्मान् यानेयाने तस्यरे
षेशुकार्य्यं कुर्य्यान्नूनं क्रीडने ॥
पुष्पवाण्योदासेवी सेरल्वितागर्वि
तश्च इति दीपिका ॥
आयुष्यं त्रि पथ्यं इति राज ॥
निर्घण्टः ॥ आयुर्हितकारकं ॥
आयुस्करः त्रि परमायुर्जनकः
आयोगः पुं गन्धमाल्योपहारः
व्यापारः रोधः इति हेम ॥
चन्द्रः ॥
आयोगवः पुं शूद्राद्वैश्यायां
जातो जातिविशेषः ॥ इति हेम
चन्द्रः तस्यकर्मकाष्ठतक्षणं ॥
इतिमनुः ॥
आयोजनं क्ली उद्योगः आहरणं
आयोधनं क्ली युद्धं वधः इति
मेदिनी ॥

आरं क्ली मण्डायसं मुण्डलोहं ॥
इतिराजनिर्घण्टः पित्तलं ॥
इत्यमरटीका कोणः प्रान्तभागः
इत्यानन्दलहरीटीका ॥
आरः पुं मंगलग्रहः शनिः ॥
पित्तलं इतिहेमचन्द्रः वृक्ष
भेदः तत्पर्य्यायः मधुराम्लफलः
२ रेफल इति ख्यातः इति ॥
रत्नमाला ॥
आरकूटः पुं क्ली पित्तलं इत्य
मरः
आरग्वधः पुं वृक्षविशेषः सो
नालु सोंदालि इति ख्यातः तत्
पर्य्यायः राजवृक्षः २ संपाकः ३
चतुरंगुलः ४ आरेवतः ५ व्याधि
घातः ६ कृतमालः ७ सुवर्णकः ८
इत्यमरः मेथानः ९ रोचनः १०
दीर्घफलः ११ नृपद्रुमः १२ हेम
पुष्पः १३ राजतरुः १४ केदुर्यः १५ ज्व
रान्तकः १६ अरुजः १७ स्वर्णपुष्पः
१८ स्वर्णद्रुः १९ कुष्ठसूदनः २० कर्णि
भरणकः २१ महाराजद्रुमः २२
कर्णिकारः २३ स्वर्णांगः २४
इतिराजनिर्घण्टः प्रग्रहः २५
इतिरत्नमाला अस्यगुणाः अति
मधुरत्वं शीतलत्वं शूलज्वरकण्डु
कुष्ठमेह कफविष्टम्भनाशित्व च

इतिराजनिर्घण्टः आपिच ज्वर॥
हृद्रोग वातरक्तो दावर्त रोगे
अतिशयपथ्यत्वं मूढत्वंच अस्य
फलगुणाः मधुरत्वं शुक्रकारित्वं
वातपित्तहारित्वंच इति राज
वल्लभः
आरट्टः पुं देशविशेषः॥
आरट्टजः पुं आरट्टदेशोद्भवः॥
घोटकः इति जटाधरः त्रिकांड
शेषभूरिप्रयोगोच॥
आरणिः पुं आवर्त्तः तत्पर्य्यायः
कुलहुंडकः २ इतिहारावली
पाकमाराजल इत्यादिभाषा॥
आरण्यमुद्गा स्त्री मुद्गपर्णी मुगानी
इतिभाषा इतिराजनिर्घण्टः॥
आरण्यपशुः पुं अरण्यजातपशुः
सच सप्तधा यथा महिषः१ वानरः
२ ऋक्षः३ सरीसृपः४ रुरुः५
पृषतः६ मृगः७ इतित्रिकाण्डादि
तत्वैपेठीनसिः॥
आरण्यराशिः पुं सिंहराशिः॥
मकरप्रथमार्द्धः दिने मेव हष (?)
राशीइतिदीपिका॥
आरतिः स्त्री विरतिः निवृत्तिः
इत्यमरः॥
आरनालं क्ली कांजिकं इति
हेमचन्द्रः आरनालतगोधूमे॥

रामेस्यात्स्तुषीकृतैः पक्वैर्वा
संधितैस्ततुसौवीरसदृशो गुणैः
इतिराजनिर्घण्टः॥
आरनालकं क्ली कांजिकं कांजि
इतिभाषा इत्यमरः॥
आरंहं त्रि कृतारंभे आरंभी क्ली
आरभटी स्त्री नाट्यवृत्तिः इति
हेमचन्द्रः॥
आरंभः पुं प्रथमकृतिः तत्
पर्य्यायः प्रक्रमः १ उपक्रमः २ अ
भ्यादानं ३ उद्घातः ४ आरंभः ५
इत्यमरः अभ्यादानादित्रमारंभ
मात्रे प्रक्रमादियंच आरंभमात्रे
इत्येके केचित्तु प्रक्रमादिद्वयंप्र
थमारंभे अभ्यादानादित्रयंआ
रंभमात्रे इतिवद्बुभिरुक्तमपिन
साधु यतः प्रथमकृतिरेवआरंभः॥
तत्पूर्वद्वयं आरंभे शेषत्रयं आ
रंभे इत्याहुः इतिभरतः त्वरा
उद्यमः॥ वधः॥ दर्पः॥ इति॥
मेदिनी प्रस्तावना इति त्रि॥
कांडशेषः॥
आरवः पुं शब्दः इत्यमरः॥
आरक्तः पुं गजकुंभसंधिः॥
इतित्रिकांडशेषः॥
आरक्तं त्रि रक्ताशुकं इतिशब्द
रत्नावली रक्तवर्णीयं इतिविश्वः

आरा स्त्री चर्मभेदकास्त्रं तत्॥
पर्य्यायः चर्मप्रभेदिका २ इत्य॥
मरः
आराग्रं क्ली अर्द्धचंद्राग्रसमुखं
अर्द्धचंद्रखुरप्रादिधाराग्रं मुख
मुच्यते आराग्रंतुमुखंतेषांपुष्प
पत्रादिभेदतः इतिहलायुधः
आरात् अ दूरे निकटे॥
इत्यमरः॥
आरातिः पुं अरातिः शत्रुः।
इतिभरतः द्विरूपकोषश्च॥
आरात्रिकं क्ली नीराजननिमित्त
दीपः नीराजनानीराजनपात्रंच
आरति इतिभाषा तथाचहरि
भक्तिविलासे ततश्च मूलमंत्रेण
दत्वापुष्पांजलित्रयं महानीराजनं
कुर्य्यात् महावाद्यजयस्वनैःप्रज्व
लयेत्तदर्थंचकर्पूरेणघृतेनवा
आरात्रिकंशुभेपात्रे विषमानेक
वर्त्तिकं अन्यच्च आत्यन्त्रआरोचत (?)
पादतले चविसोहीनाभिदेशे (?)
मंडलेके। सर्वेषुचांगेषुपिसप्त (?)
वारानारात्रिकंभक्तजनस्तुकुर्य्या
आराधनं क्ली साधनं प्राप्तिः
तोषणं इत्यमरः पचनं इति
मेदिनी॥
आराधना स्त्री साधनातत्पर्य्यायः

सेवा २ भक्तिः ३ परिचर्य्या ४
प्रसादना ५ शुश्रूषा ६ उपास्तिः
वरिवस्या ८ पर्येष्टिः ९ उपचारः
१० इतिहेमचन्द्रः॥
आरामः पुं उपवनं बागान्
इतिभाषा इत्यमरः॥
आरामशीतला स्त्री सुगंधिपत्र
विशेषः बहुप्यादिवर्गे लिखिता (?)
तत्पर्य्यायः आनंदी २ शीतला
३ सुगंधिनी ४ रामा ५ महानंदा ६
गंधाढ्या ७ रामशीतला ८ अस्या
गुणाः तिक्तत्वं शीतलत्वं पित्त
हारित्वं दाहशोषप्रशमनत्वं
विस्फोटव्रणरोपणत्वंच इति
राजनिर्घण्टः॥
आरालिकः त्रि सूपकारः प
चकः इत्यमरः॥
आरावः पुं शब्दः इत्यमर॥
आरुः पुं हस्तभेदः कर्कटः
शूकरः इतिमेदिनी॥
आरुः पुं पिंगलवर्णः तद्युक्ते
त्रि इत्युणादिकोषः॥
आरुकं क्ली हिमालयेप्रसिद्धौ
षधीविशेषः आड इतिभाषा
तत्पर्य्यायः वीरसेनं २ वीरं॥
३ वीरारुकं ४ तत्पत्रपुष्पादि
भेदतः चतुर्जाति तेषांगुणाः



मधुरत्वे हिमत्वे अर्शःप्रमेह॥
गुल्मास्त्रदोषनाशित्वेच इतिराज
निर्घंटः ॥ (२
आकटः त्रि कृतारोहणःहस्त्यादि
उपरचड़ा थक इतिभाषा ॥
आरेवतं क्ली परेवतवृक्षफले
इतिराजनिर्घंटः ॥
आरेवतः पुं आरग्वधवृक्षः ॥
इत्यमरः ॥
आरोग्यं क्ली अरोगस्यभावः ॥
व्याध्यभावः तत्पर्य्यायः अना
मयं २ इत्यमरः पाटवं ३ ॥
लाघवं ४ वार्त्तं ५ इतिराज ॥
निर्घंटः ॥
आरोपणं क्ली न्यासः संस्थापनं
आरोपितं त्रि कृतारोपणं ॥
निहिते न्यस्ते इतिहलायुधः
कल्पिते ॥
आरोहः पुं दैर्घ्यं वरस्त्रियाः
श्रोणिः इत्यमरः अवरोहः ॥
आरोहणं ॥ गजारोहः समु ॥
च्छ्रयः इतिमेदिनी परिमाण।
विशेषः नितम्बः इति हेम ॥
चंद्रः ॥
आरोहकः त्रि आरोहणकर्त्ता
आरोहणं क्ली सोपाने सिंडि
इति भाषा समारोहः नीचा।

द्दूर्ध्वगमनमिति यावत् प्ररोहणं
अंकुरादि जन्म मिति यावत्
इति मेदिनी ॥
आर्किः पुं अर्कपुत्रः शनैश्चरः
इतिज्योतिषशास्त्रं ॥
आर्गलः पुं स्त्री अर्गलः खिल
इति भाषा॥इति द्विरूपकोषः
आर्ग्वधः पुं आरग्वधवृक्षः इति
शब्दचंद्रिका ॥
आर्ची स्त्री पीतादीर्घवृंतड़ाघड्
यदसत्रिभामत्तिका इतिराज
निर्घंटः ॥
आर्च्यं क्ली आर्चीनाम मक्षिकोत्
पन्नमधु तस्य गुणाः अतिशयचक्षु
र्हितकारित्वं।कफ पित्तास्त्रदोष
नाशित्वंच इतिराजनिर्घंटः॥
आर्त्तः त्रि पीडितः अस्वस्थः
आर्त्तगलः पुं नीलझिंटी तत्
पर्य्यायः वाणः २ वाणा ३ दासी ४
आर्त्तगलः ५ इत्यमरस्तट्टीकाच
आर्त्तवं क्ली स्त्रीरजः इत्यमरः
पुष्पं इतिमेदिनी ॥
आर्त्तवः त्रि ऋतूद्भवः इतिमे
दिनीकर हेमचंद्रौ ॥
आर्त्तवी स्त्री राजिनी चोटकी
इतिराजनिर्घंटः ॥
आर्त्तिः स्त्री पीड़ा धनुष्कोटः

इत्यमरटीकायां भरतः रोगः
इतिराजनिर्घंटः ॥
आर्द्र त्रि सजलवस्तु भिजाइति
भाषा तत्पर्य्यायः सार्द्र २
क्लिन्नं ३ क्लिमितं ४ तिमितं ५
समुन्नं ६ उन्नं ७ इत्यमरः ॥
आर्द्रकं क्ली मूलविशेषः आदा
इतिभाषा तत्पर्य्यायः शृंग ॥
वेरं २ इत्यमरः कटुभद्रं ३ ॥
कटूत् कटुं ४ इति केचित् गुल्म
मूलं ५ मूलजं ६ कंदरं ७ वेरं ८
महीजं ९ सेकतेष्टं १० अनूपजं
११ अपाकशाकं १२ चांद्राख्यं १३
राहुच्छत्रं १४ सुशाककं १५ शार्द्र
१६ आर्द्रशाकं १७ सच्छाकं १८
इति राजनिर्घंटः अस्यगुणाः
फलावात विबंधानाह शूलपित्त
नाशित्वं रुच्यत्वं रुचिशुक्रकारि
त्वंच इति राजवल्लभः अपिच
उष्णत्वं।कटुत्वं विपाके शीतत्वं
लघुत्वं अग्निदीपनत्वं शोथकंठ
मयनाशित्वंच इतिराजनिर्घंटः
लवणार्द्रकगुणाः भोजनाग्रेसदा
त्वं जिह्वाकंठविशोधनत्वं अग्नि
संदीपनत्वं रुच्यत्वं वात पित्त
कफभानो शरीरं वनवारिणं
पक यव निहस्तास्तिलवणार्द्रकके

शारी इति द्रव्यगुणाः ॥
आर्द्रमाषा स्त्री माषपर्णी माषाणी
इति भाषा इतिराजनिर्घंटः॥
आर्द्रशाकं क्ली आर्द्रक इति
राजनिर्घंटः ॥
आर्द्रा स्त्री अश्विन्यादिसप्तविंशति
नक्षत्रांतर्गत षष्ठनक्षत्रं अस्यरू
पं यथाहस्तुजलैकतारकामये
अस्याअधिष्ठात्रीदेवताशिवः
इतिकालिदासः मणितुल्यैकता
रात्मकं इति केचित् तत्र ॥
जातफलं स्तथाधिकोरुकशरीर
कीर्त्तिः कलिप्रियःकोपयुतोऽवि
नीतः।प्रसूतिकाले यदि भवेत् किला
र्द्रा न चार्द्रचेताः शरणागतेपि
इति कोष्ठीप्रदीपः ॥
आर्द्रालुब्धकः पुं केतुग्रहः इति
हलायुधः ॥
आर्य्यः त्रि मत् कुलोद्भवः इत्य
मरः पूज्य श्रेष्ठः बुद्धः इति॥
शब्दरत्नावली संगतः इत्यजयः
आर्य्यः पुं स्वामी बुद्धः इति ॥
हेमचंद्रः सुहृत् इत्यजयः
आर्य्यकः पुं पितामहः माता
महः इति शब्दमाला ॥
आर्य्यकं क्ली पिंडपात्रादि पित्
कार्य्यं इतित्रिकांडशेषः ॥

आर्य्यिका स्त्री श्रेष्ठास्त्री ॥ इति ॥
वोपदेवः ॥
आर्य्यपुत्रः पुं भर्त्ता स्वामी ।
इति हेमचंद्रः गुरुपुत्रः ॥
आर्य्यमिश्रः त्रि गौरवितः ॥
इति त्रिकांडशेषः ॥
आर्य्या स्त्री पार्वती इति त्रिकांड
शेषः छंदोविशेषः ॥ तस्या
लक्षणं यस्याः पादे प्रथमे द्वादश
मात्रास्तथा तृतीयेपि अष्टादश
द्वितीये चतुर्थके पंचदश सार्य्या
इति श्रुतबोधः अपि च लक्षणं तत्र
सप्तगणा गोपेता भवति नेह विष
मे जः षष्ठो ज नलघु वा प्रथमेर्द्धे
नियतमार्य्यायाः षष्ठ द्वितीयलात्
परके ह्ले मुखलाच्च सयति पदनिय
मः चरमेर्द्धे पंचमके तस्मादिह ॥
भवति षष्ठो लः सा नवधा पथ्या
विपुला चपला मुखचपला जघ
नचपला च गीत्युपगीत्युद्गीतय आ
र्य्यागीति अनवधार्य्या इति छंदो
मंजरी श्रेष्ठा ॥
आर्य्यावर्त्तः पुं विंध्यहिमालयो
र्मध्यदेशः तत्पर्य्यायः पुण्य ॥
भूमिः २ इत्यमरः ॥
आर्य्यिका स्त्री श्रेष्ठास्त्री ॥ इति ॥
वोपदेवः ॥

आर्षः पुं विवाहविशेषः यत्र
वरात् गोद्वयं गृहीत्वा तेनैव सह
कन्यादानं यज्ञस्यार्त्विजे दैव
आर्षश्चादाय गोयुगं वतद्दैशप्र
यन्तः पुमान् तु तत्र जस्त्वषडु इति
याज्ञवल्क्यः ऋषिप्रणीते त्रि
आर्षभिः पुं ऋषभपुत्रः सत
भरत राजचक्रवर्त्ती इति हेम
चंद्रः ॥
आर्षभी स्त्री कपिकच्छुः
इति राजनिर्घंटः ॥
आर्षभ्यः पुं षंडोपयुक्तवृषः ॥
तत्पर्य्यायः षंडतायोग्यः २ ॥
इत्यमरः षांडेर उपयुक्त षंडे
इति भाषा ॥
आर्हतः पुं जिनविशेषः तत्
पर्य्यायः वादवादी २ इति ॥
हेमचंद्रः ॥
आलं क्ली हरिताले इत्यमरः
अनल्प त्रि इति हेमचंद्रः ॥
आलगर्द्दः पुं अलगर्द्दः जल
सर्पः ॥
आलंभः पुं मारणं वधः इत्य
मरः ॥
आलंभ्या स्त्री वधार्हा हननीया
इति वोपदेवः ॥
आलंवः पुं अवलंवः आश्रयः

आलंवनं क्ली अवलंवनं विभाव
विशेषः यथा आलंवनोद्दीप
नाख्यौ तस्य भेदावुभौ स्मृतौ
आलंवनो नायकादिस्तमालंव्य र
सोद्गमात् इति साहित्यदर्पणे
आलयः पुं गृहं इत्यमरः ॥
आलवालं क्ली तरुमूलसेचना
स्वल्पजलाधारः थारमाल इति
भाषा तत्पर्य्यायः आवालं २
आवापः ३ इत्यमरः ॥
आलसः त्रि अलसः आलस्य
युक्तः इति द्विरूपकोषः ॥
आलस्यः त्रि अलसयुक्तः तत्
पर्य्यायः मंदः २ तंदपरिमृजः
३ शीतकः ४ अलसः ५ अनुष्णः ६
इत्यमरः ॥
आलस्यं क्ली अलसस्य भावः
अलसता तत्पर्य्यायः तंद्रा २
कौसीद्यं ३ इति हेमचंद्रः ॥
मंदता ४ मांद्यं ५ कार्य्यद्वेषः
६ राजनिर्घंटः ॥
आलातं क्ली अलातं अंगारः ॥
आलानं क्ली गजबंधनस्तंभः
इत्यमरः गजबंधन रज्जुः इति
नीलकंठः बंधने इति राय
मुकुटः रज्जुः इति मेदिनी ॥
आलापः पुं कथोपकथने

संभाषणे तत्पर्य्यायः आभा
षणं २ इत्यमरः ॥
आलाप्यः त्रि आलापयोग्यः
आलापनीयः ॥
आलावर्त्तं क्ली वस्त्रनिर्मितव्यजनं
कापडेर पाखा इति भाषा इति
हेमचंद्रः ॥
आलाबुः स्त्री अलाबुः लाउ इति
भाषा इति शब्दरत्नावली ॥
आलाबूः स्त्री अलाबुः इति शब्द
रत्नावली ॥
आलास्यः पुं कुंभीरः इति
हेमचंद्रः ॥
आलिः स्त्री वयस्या सेतुः
पंक्तिः इति मेदिनी अमरश्च
संततिः इति शब्दरत्नावली
आलिः पुं वृश्चिकः भ्रमरः ॥
इति हारावली अमरटीका च
आलिः त्रि विशदाशयः निर्म
लांतःकरणः इति मेदिनी ॥
अनर्थः इति हेमचंद्रः ॥
आलिंगनं क्ली प्रीतिपूर्वकपर
स्पराश्लेषः कोलाकोली इति
भाषा तत्पर्य्यायः अंगपालिः २
श्लिषा ३ इति त्रिकांडशेषः ॥
परिरंभः ४ परीरंभः ५ परिष्वंगः
६ संश्लेषः ७ उपगूहनं ८ इत्य



मरः तत्क्रमथा यथा। आमो
दालिंगने १ मुदितालिंगने २
प्रेमालिंगने ३ आनंदालिंगने
४ हृष्यालिंगने ५ मदनालिंगने
६ विनोदालिंगने ७ इति काम
शास्त्रे ॥
आलिंगी पुं आलिंग्यः मृदंग
विशेषः इत्यमरटीकायां स्वामी
शब्दरत्नावली च ॥
आलिंग्यः पुं यवाकृत्यमृदंगः
मादोल इति भाषा इत्यमरः
चतुरंगुलहीनोऽध्यार्द्धहस्तवैकांग
लेनयः यवाकृतिः स आलिंग्य
आलिंग्यस्त्वद्विवाद्यते ॥ इति श
ब्दार्णवः ॥
आलिंजरः पुं अलिंजरः जाला
इति भाषा इति त्रिकांडशेषः ॥
आलिंदः पुं अलिंदः बहिर्द्वार
प्रकोष्ठः गृहांतरशय्यार्थवेदिके
इति रायमुकुटः शब्दरत्नावली च
गृहैकदेशः इत्यमरमाला ॥
आलिंदकः पुं आलिंदः इति
शब्दरत्नावली ॥
आलिंपनं क्ली मंगल्लेपने आ
लिपना इति भाषा तत्पर्यायः
आतर्पणं २ आदीपनं ३ मंडो ॥
दकं इति त्रिकांडशेषः ॥


आली स्त्री सखी पंक्तिः वृश्चिकः
इत्यमरटीकायां भरतादयः ॥
सेतुः इति शब्दरत्नावली ॥
आलीढं क्ली धन्विनो दक्षिणजंघा
प्रसार वामपाद संकोच रूपाव
स्थाने इत्यमरः
आलीढं त्रि आश्रिते। भुक्ते ॥
इति मेदिनी ॥ लीढ
आलीढकं क्ली तणकानांस्य
क्रीडने वाकुरे खेला इति ॥
भाषा इति हारावली आरोल
कमिति क्वचित् पाठः ॥
आलीनकं क्ली वंगे री इति
भाषा इति हेमचंद्रः ॥
आलुः स्त्री स्वल्पवारिधानिका
वरीकारी इत्यादि भाषा तत्
पर्यायः कर्करी २ गल्लंतिका ३
इत्यमरः ॥
आलुः पुं पेचकः इति शब्द
रत्नावली कामालुः इति राज॥
निर्घंटः ॥
आलु क्ली भेलकः स्वनामख्यात
मूलविशेषः इति मेदिनी अस्य
गुणाः रक्तपित्तनाशित्वं गुरुत्वं
स्वादुत्वं शीतलत्वं स्तनदुग्धशुक्र
कारित्वं च इति द्रव्यगुणः ॥
आलुकः पुं कामालुः इति राज

निर्घंटः शेषनागः इति हेम ॥
चंद्रः ॥
आलूकं क्ली मूलविशेषः आलु
इति भाषा इति राजवल्लभः ॥
पलवालकं इति राजनिर्घंटः
आलेख्यं क्ली चित्रे इति हेम
चंद्रः ॥
आलेख्यशेषः त्रि मृतः इति
हेमचंद्रः ॥
आलोकः पुं दर्शने देखा।
इति भाषा द्योतः आलो ॥
इति भाषा बंदिभाषणे स्तुति
रीतियावत् इति मेदिनी ॥
आलोकनं क्ली दर्शने इत्यमरः
आलोचनं क्ली दर्शने विवेचने
आवनेयः पुं मंगलग्रहः इति
ज्योतिः शास्त्रे ॥
आवपनं क्ली द्रव्यस्थापनपात्रे
भांडे इत्यमरः सम्यक् क्षुरि
कर्मणि सम्यग्बीज तंतुवपने ॥
आवरणं क्ली फलके ढाल इति
भाषा इति हेमचंद्रः आच्छादने
ढाका इति भाषा ॥
आवरणशक्तिः स्त्री मायाशक्तिः
यया स्वल्पोपि मेघो बहुयोजन
विस्तीर्णमादित्यमंडलमवलोकयि
तृजन नयनपथपिधायकतया
कार

यतीवत्तथैवाज्ञानेपरिच्छिन्नमपि
आत्मानमपरिच्छिन्नमसंसारिणमव
लोकयितृबुद्धिपिधायकतयाच्छाद
यतीवतादृशसामर्थ्यं इति ॥
वेदांतः ॥
आवर्त्तः पुं जलभ्रमः घुर्ली इति
भाषा इत्यमरः चिंता आव
र्त्तनं इति मेदिनी मेघनायक
चतुष्टयांतर्गतमेघाधिपविशेषः
इति पुराणं ज्योतिषं च राजा ॥
वर्त्तनामेपि रत्ने इति राजनिर्घंटः
आवर्त्तं क्ली माक्षिकधातुः इति
राजनिर्घंटः ॥
आवर्त्तकी स्त्री लताविशेषः
भगतभल्ली इति कोंकणप्रसिद्धा
तत्पर्यायः तिंदुकिनी २ वि
भांडी ३ विषाणिका ४ रंगलता ५
मनोज्ञा ६ रक्तपुष्पी ७ मरुत्माली ८
पीतकीला ९ चर्मरंगा १० अस्या
गुणाः कषायत्वं आम्लत्वं शीतवीर्य
कारित्वं पित्तनाशित्वं च भद्रदं ॥
तिक्ताहृत्तः इति राजनिर्घंटः
आवर्त्तनं क्ली दुग्धदेशालाडने
आलुटोन इति भाषा धातुद्रव्य
स्य द्रवीकरणं गलान इति भाषा
इत्यमरटीका ॥ सूर्य्यस्य पश्चिमदिग
वस्थितच्छायायाः पूर्वदिग्गमनारंभ

कालः आवर्त्तनात् पूर्व्वाह्णोऽस्य ॥
पराह्णस्ततः परं इतिस्मृतिः ॥
आवर्त्तनी स्त्री धात्वादिद्रावणार्थ
मृत्पात्रं मुछी इतिभाषा तत्
पर्य्यायः तैजसावर्त्तनी २ मूषा ३
मूषः ४ इति शब्दरत्नावली ॥
आवर्त्तमणिः पुं राजवर्त्तनामो ॥
पलं इतिराजनिर्घण्टः ॥
आवर्त्तिनी स्त्री अजशृङ्गीवृक्षः
इतिरत्नमाला ॥
आवर्हितः त्रि उन्मूलितः उत्
पाटितः इतिहेमचन्द्रः ॥
आवलिः स्त्री श्रेणी पंक्तिः ॥
इत्यमरः ॥
आवली स्त्री आवलिः इत्यमरः
आवल्यं क्ली अबलस्यभावः दौ
र्बल्यं ॥
आवश्यकं त्रि अवश्यकर्त्तव्यं ॥
नैश्चयिके उचिते ॥
आवसथं क्ली गृहे इति हेम
चन्द्रः ॥
आवसथः पुं गृहे आश्रमे ॥
कोषः आर्य्याछन्दसो ग्रन्थभेदः
व्रतविशेषः इत्युणादिकोषः
आवसितं त्रि परिपक्वमर्द्दितं
धान्यं इतिभरतः वहुलितधान्यं
इतिसुभूतिः तेपत्रधान्यं ॥
इत्यन्ये तत्पर्य्यायः ऋद्धं २
इत्यमरः ॥
आवहः पुं सप्तवाय्वन्तर्गतवायु
विशेषः सचभूवायुः इतिपुराण
ज्योतिषे ॥
आवहमानं त्रि क्रमागते ॥
आवाधा स्त्री दुःखं पीडा इति
शब्दरत्नावली भूखण्डे त्रिकोण
क्षेत्रमध्यरज्जुनिक्षेपेण पतखण्डद्वयं
जायतेतत् इतिलीलावती ॥
आवापः पुं आलवाले इत्य
मरः वलयः शत्रुचिन्तने पान
भेदः इति हेमचन्द्रः भाण्डव
पनेपरिक्षेपः इतिमेदिनी ॥
निम्नोन्नतभूमिः इत्यजयः
पात्रं इति शब्दरत्नावली प्रधान
होमः इतिस्मृतिः ॥
आवापकः पुं वलयः इत्यमरः
आवापनं क्ली सूत्रयन्त्रं तांत्
इतिभाषा इतिशब्दमाला ॥
आवारि क्ली हट्टवेश्म दोकाम
हाटचालि इत्यादिभाषा इत्यु
णादिकोषः ॥
आवालं क्ली आलवालं इत्य
मरः वालकपर्य्यन्तं ॥
आवाल्यं क्ली वाल्यावस्थापर्य्यन्तं
आवासः पुं गृहे इतिहेम ॥

देहली ३ अम्बरः ४ उडुम्बरः ५
इतिहेमचन्द्रः ॥
उर्वी स्त्री अर्द्धपक्वतृणानलसे
यवगोधूममञ्जरी अस्यागुणाः
कफप्रदत्वं वलकारित्वंलघुत्वं
पित्तानिलापहत्वंच इति ॥
भावप्रकाशः ॥
उरगो सौत्रधातरवे ॥
इतिकविकल्पद्रुमः ॥
उरः स क्ली वक्षःस्थले इत्यम
तत्पर्य्यायः वक्षः २ वत्सं ३
क्रोडं ४ स्वत् ५ भुजान्तरं ६
इति राजनिर्घण्टः ॥
उरः स त्रि उत्तम श्रेष्ठः इति
मेदिनी ॥
उरः सूत्रिका स्त्री मुक्तारचितहार
इत्यमरः ॥
उरगः पुं सर्पः इत्यमरः ॥
सीसकं इतिराजनिर्घण्टः
उरगस्थानं क्ली पातालं इति
शब्दरत्नावली ॥
उरगाशनः पुं गरुडपक्षी इति
जटाधरः ॥
उरंगः पुं उरगमः इत्यमरः
टीकायां रायमुकुटः ॥
उरंगमः पुं स्त्री सर्पः इति ॥
व्याकरणे
उरणः पुं स्त्री मेषः इत्यमरः
मेचः इत्युणादिकोषः ॥
उरणाख्यः पुं दद्रुमहक्षः इत्यमर
टीकायांस्वामी ॥
उरणाख्याकः पुं दद्रुघ्नवृक्षः इति
शब्दरत्नावली ॥
उरणाक्षः पुं वृक्षविशेषः ।
पङ्वाडिइतिभाषा चांगेदा इति
केचित् तत्पर्य्यायः प्रपुन्नाडः
एडगजः २ दद्रुघ्नः ४ चक्रमर्द्दकः
५ पद्माटः इत्यमरः उरणाख्यः
७ प्रपुन्नडः ८ प्रपुन्नाडः ९ इति
तट्टीका ॥
उरणाक्षकः पुं उरणाक्षवृक्षः
इति शब्दरत्नावली ॥
उरभ्रः पुं स्त्री मेष इत्यमरः
उररी अव्य स्वीकारः विस्तारः
इत्यमरः ॥
उररीकारः पुं अङ्गीकारः इति
जटाधरः ॥
उररीकृतः त्रि अङ्गीकृतः ॥
विस्तृतः इत्यमरः
उरश्छद पुं कवच इत्यमरः
उरसिजः पुं स्तनः इति
हलायुधः ॥
उरसिलः त्रि प्रशस्तवक्षोयुक्तः
इत्यमरः ॥



उरस्कटः पुं वालयज्ञोपवीतके
बुकवाक्काड इति ख्याते ॥
पंचवटस्य तत्पर्य्यायः इति
त्रिकांडशेषः ॥
उरस्त्राणं क्ली वक्षस्त्राणकवचे
तत्पर्य्यायः नागोदरं २ इति
हारावली ॥
उरस्यः त्रि औरसजातः इत्यमरः
उरस्वान् [ते] त्रि प्रशस्तवक्षोयुक्तः
तत्पर्य्यायः उरसिलः ॥ २
इत्यमरः ॥
उरी व्य स्वीकारः विस्तारः
इत्यमरः ॥
[तः]
उरीकृतः त्रि अंगीकृतः विस्तृ
इत्यमरः ॥
उरुः त्रि महान् वड इतिभाषा
तत्पर्य्यायः वड्रः २ विपुलं ३
विशंकटं ४ पृथु ५ बृहत् ६
विशालं ७ पृथुलं ८ महत् ९
इत्यमरः ॥
उरुकालः पुं महाकाललता
माकालफलेरगाछ इतिभाषा
इतिरत्नमाला [जा]
उरुकालकः पुं महाकालल
इतित्रिकांडशेषः ॥
उरुगायः पुं श्रीकृष्णः इति ॥

श्रीभागवते ॥
उररी व्य उरी इतिभरतः
द्विरूपकोषश्च ॥
उरुवुकः पुं एरंडवृक्षः इत्यमर
टीकायांरायमुकुटः ॥
उरुवूकः पुं एरंडवृक्षः
इत्यमरः रुबुकेरंडः इति ॥
राजनिर्घंटः ॥
उरुश्रवाः [स] पुं राक्षसः ॥
इत्युणादिकोषः ॥
उरोजः पुं स्तनः इतिहेमचंद्रः
ऊर्जितं त्रि वर्द्धितं इति ॥
श्रीभागवते ॥
ऊर्णनाभः पुं मर्कटकः माकडसा
इतिभाषा इतिशब्दरत्नावली
ऊर्णा स्त्री मेषादिलोम भ्रूद्वय
मध्यावर्त्तः इत्यमरटीकायां
रमानाथः ॥
ऊर्द्द उ परिमाणे क्रीडायां
स्वादे इतिकविकल्पद्रुमः ॥
ऊर्द्रः पुं जलाखुः उद्विडाल इति
भाषा इतिशब्दरत्नावली ॥
उर्व इ हिंसे इतिकविकल्पद्रुमः
उर्वटः पुं वत्सरः इति ॥
त्रिकांडशेषः ॥
उर्वरा स्त्री सर्वशस्याढ्या भूमिः
भूमीमात्रे इतिहेमचंद्रः ॥

[(मप)]
उर्वशी स्त्री स्वनामख्यातस्वर्गवे
इत्यमरः तस्या उत्पत्तिर्हि विश्वे
नारायणोरुनिर्भिद्य संभूतावर
वर्णिनी मनीषादित्वात् हृस्वा
दिः उर्वशीरमणः पुं उर्वशीपतिः स
मचंद्रवंशीय राजविशेषः तत्
पर्य्यायः पुरूरवाः २ वैधः ३
ऐलः ४ इति हेमचंद्रः ॥
उर्वशीवल्लभः पुं ऐलनृपतिः
इतित्रिकांडशेषः ॥
उर्वारुः पुं इर्वारुः काकुड इति
भाषा इतिभरतः द्विरूपकोषश्च
उर्वी स्त्री पृथिवी इत्यमरः ॥
उल दाहे सौत्रधातुरयं ॥
इतिकविकल्पद्रुमः ॥
उलपः पुं प्रतानिनीलता ॥
सा तु त्रिपुषी द्राक्षातामूल्यादिः
तत्पर्य्यायः वीरुत् २ गुल्मिनी ३
इत्यमरः मेदिनीमते क्लीवमपि
तृणविशेषः उलुखड इति
भाषा इति विश्वमेदिन्यौ
उलिंदः पुं देशविशेषः ॥ [+]
[+ सुमारादेशविशेषः]
उलपः पुं क्ली गुल्मिनी शाखा
पत्रप्रचयप्रकलता इत्यमरटीका
सारसुंदरी काचिन्मेदिनी च ॥
उलपः पुं तृणविशेषः उलखड

इतिभाषा इति केचिद्विश्व ॥
मेदिन्यौ ॥
उलूपीन पुं शिशुकः इत्यमरः
उदाकृतिमत्स्यः इतिशब्दरत्नावली
उलूकः पुं पेचकपक्षी इत्यमरः
तत्पर्य्यायः तामसः २ घूकः ३
दिवांधः ४ कौशिकः ५ कुशिः ६
नक्तंचरः ७ निशाटः ८ काकारिः ९
घोरदर्शनः १० इतिराजनिर्घंटः
इंद्रः भारतयोधी स च ॥
शकुनिपुत्रः इतिहेमचंद्रः
उलूकं क्ली तृणविशेषः उलुखड
इतिभाषा तत्पर्य्यायः स्तम्बघ्नः
२ स्थूलकः ३ दर्भः ४ जूर्णाख्यः ५
खरच्छदः ६ उलपः ७ उलुप ८
इतिरत्नमालादयः ॥
उलूखले इत्यमरः
गुग्गुलुः इतिभरतः द्विरूप
कोषश्च ॥
उलूखलकं क्ली गुग्गुलुः इत्यमरः
उलूतः पुं अजगरः सर्पः इति
त्रिकांडशेषः ॥
उलूपी [न] पुं शिशुकः इत्यमरः
उपल इति ख्यातः श्रुतिचेवल
मत्स्यः शिशुमाराकृतिर्मत्स्य
भेदः इतिकलिंगादयः शिशु ॥

इतिख्यातः मत्स्यविशेषः इत्यन्ये
भांगाल इतिख्यातः इत्येके ॥
शिशुमार एव उच्यते इति सर्वस्व
तथा च रत्नकोषादौ उलुपी ॥
शिशुमारः स्यादुलूपी शिशुकस्तथा
इत्यमरटीकायां भरतः ॥
उलूपी स्त्री कौरव्यनामनागकन्या
सा च अर्जुनपत्नी इति
महाभारते ॥
उल्का स्त्री तेजः पुंजः इत्यमर
टीकायां भरतः अग्निशिखा ॥
अग्निः इत्युणादिकोषः ॥
आकाशात् पतिताग्निः इति ॥
तारामुकुटादयः अस्यालक्षणं
बृहत् शिखा च सूक्ष्माग्रा रक्तनील
शिखोज्ज्वला पौरुषीयप्रमाणेन
उल्का नानाविधास्मृता इति।
काश्यपः ॥
उल्कामुखी स्त्री जन्तुविशेषः
खैकशालि इति भाषा ॥
तत्पर्यायः शृगालिका २ ॥
लामालिका ३ दीप्तजिह्वा ४ किखिः
५ इति त्रिकाण्डशेषः ॥
उल्मुकं क्ली अंगारः इत्यमरः
उल्लंघने क्ली अतिक्रमणे डिंग
न इति भाषा इति पुराणं ॥
उल्वलः त्रि बहुरोमयुक्तः

तत्पर्यायः रोमशः २ इति ॥
हारावली ॥
उल्ललितः त्रि तरलितः
आंदोलितः इति जटाधरः
उल्लसनकं क्ली रोमांचः इति
हेमचंद्रः ॥
उल्लाघः त्रि गदान्निर्गतः नीरोगः
इत्यमरः शुचिः दक्षः ॥
हृष्टे मरीचमिति यावत् इति
विश्वमेदिन्यौ हृष्टमित्यत्र स्थले
मितिकस्यचिन्मेदिन्या पाठः
उल्लापः पुं शोकरोगादिनाध्वनि
विकारः तत्पर्यायः काकुवाक्
२ इति हेमचंद्रः ॥
उल्लासः पुं ग्रंथपरिच्छेदः इति
भूरिप्रयोगः यथा काव्यप्रकाशे
प्रथम उल्लास इति प्रयोगः
हृष्टिः इति श्रीभागवते ॥
आह्लादः प्रकाशः ॥
उल्लिखितः त्रि उत्कीर्णः तनूकृतः
इति मेदिनी चित्रितः ॥
शब्दरत्नावली [illegible] लिखितः
उल्लेखः पुं उच्चारणे कथने ॥
इति स्मार्त्तः ॥
उल्लेखनं क्ली वमने इति रत्नमाला
खनने यथा भूमेरुल्लेखने ॥
कुर्य्यात् इति स्मृतिः उच्चारणे

यथामास पक्ष तिथीनां च
निमित्तानां च सर्वशः उल्लेखन
मकुर्वाणो न तस्य फलभाग्भवेत्
इति तिथ्यादितत्वं ॥
उल्लोचः पुं चंद्रातपः चांदोया
इति भाषा तत्पर्यायः ॥
वितानं २ इत्यमरः ॥
उल्लोलः पुं महातरंगः वडढेउ
इति भाषा तत्पर्यायः ।
कल्लोलः २ इत्यमरः ॥
उल्वं क्ली जरायुः इत्यमरः गर्भः
इत्युणादिकोषः ॥
उल्वणं त्रि व्यक्ते स्पष्टे ॥
इत्यमरः ॥
उशती त्रि अकल्याणवाक् इति
शब्दरत्नावली ॥
उशनाः पुं शुक्राचार्य्यः इत्यमरः
उशिक (ज) पुं अग्निः हुते इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः
उशीस्त्री वांछा इत्युणादिकोषः
उशीनरः पुं देशभेदः तत्पर्यायः
गांधारः २ इति जटाधरः ॥
चन्द्रवंशोद्भवविशेषः स तु
शिविराजपिता इति श्रीभागवते
उशीरः पुं क्ली वीरणमूलं वेना
रमूलखश इत्यादिभाषा तत्पर्यायः

अभयं २ नलदं ३ सेव्यं ४
अमृणालं ५ जलाशयं ६ लामज्जकं
७ लघुलयं ८ अवदाहं ९
इष्टकापथं १० इत्यमरः उशीरं
११ मृणालं १२ लघु १३ लयं १४
अवदानं १५ रहं १६ कापथं १७
अवदाहेष्टकापथं १८ इंद्रगुप्तं
१९ इति तट्टीकायां भरतादयः
जलवासं २० हरिप्रियं
२१ वीरं २२ वीरणं २३
समगंधिकं २४ रणप्रियं २५
वीरतरु २६ शिशिरं २७
शीतमूलकं २८ वितानमूलकं
२९ जलमेदं ३० सुगंधिकं ३१
सुगंधिमूलकं ३२ केशं ३३ इति
राजनिर्घंटः अस्यगुणाः चर्म्म
दौर्गंध्य दाह पित्त रक्तरोग
नाशित्वं इति राजवल्लभः ॥
अपि च शीतलत्वं तिक्तत्वं
मोहभ्रमापहत्वं ज्वरार्त्ति पित्त
शमनकारित्वं जलसौगंध्य
दायकत्वं च इति राजनिर्घंटः
उशीरकं क्ली वीरणमूलं इति
रत्नमाला ॥
उशीरी स्त्री लघुकाशः छोटकाश
इति भाषा तत्पर्यायः मिषिः
२ गुडा ३ अश्वालः धनीरजः ५



शर ६ अस्य गुणाः मधुरत्वं ॥
शीतत्वं पित्तदाहक्षयरोग ॥
नाशित्वंच इति राजनिर्घण्टः
उष ॰ वधे दाहे ॥ इति ॥
कविकल्पद्रुमः ॥
उष ऊ वधे दाहे इति ॥
कविकल्पद्रुमः ॥
उषं क्ली पांशुजलवणे इति
रत्नमाला ॥
उषः पुं कामी गुग्गुलः ॥
रात्रिशेषः इति मेदिनी ॥
तारमृत्तिका इति शब्दरत्नावली
उषः[स] क्ली प्रत्युषः इत्यमरः
उषणं क्ली मरिचे इत्यमरः ॥
पिप्पलीमूले इति राजनिर्घण्टः
उषणा स्त्री पिप्पली इत्यमरः
शुण्ठी इति राजनिर्घण्टः चविके
इति रत्नमाला ॥
उषती स्त्री अकल्याणवाक्
इत्यमरः ॥
उषवः पुं सूर्य्यः ॥ अग्निः ॥
इत्युणादिकोषः ॥
उषर्बुधः पुं अग्निः इत्यमरः ॥
रक्तचित्रकः रौचिता इति भाषा
उषसी स्त्री संध्याकालः इति
मेदिनी ॥
उषास्त्री वाणराजसुता सात

अनिरुद्धभार्य्या रात्रिः इति
मेदिनी स्त्री गवी इति हेमचन्द्रः
उषास्थालीति यावत् इत्यमर
टीकायां रमानाथः ॥
उषा व्य रात्रिशेषः रात्र्यवसाने
इत्यमरमेदिन्यौ सा तन्न तत्र तेजः
परिहानि मारभ्य भानोर्वर्द्धोदये
यावत् भवति यथा अर्द्धास्तमयात्
संध्याव्यक्ती भूता न तारका यावत्
तेजः परिहानि रुषाभानो
रर्द्धोदयं यावत् इति तिथितत्वे
वराहवचनं
उषाकलः पुं कुक्कुटः इति
त्रिकाण्डशेषः ॥
उषापतिः पुं अनिरुद्धः सत्र ॥
कामदेवपुत्रः इत्यमरः ॥
उषारमणः पुं अनिरुद्धः इति
हलायुधः ॥
उषितः त्रि ध्युषितः दग्धः इति
मेदिनी त्वरिते इति धरणिः
स्थितः इति त्रिकाण्डशेषः ॥
उषितकुवीनः आषितकुवीनः
यत्र पुरा गावो भोजिताः
इत्यमरटीकायां रमानाथः
उशीरः पुं क्ली उशीरः वीरणमूले
इत्यमरटीकायां रायमुकुटः
उषेशः पुं अनिरुद्धः इति ॥

हेमचन्द्रः ॥
उष्ट्रः पुं वासरथः इति धरणी
पशुविशेषः उटु इति भाषा
तत्पर्य्यायः क्रमेलकः १ मयः २
महाङ्गः ४ इत्यमरः दीर्घगतिः
५ वली ६ करभः ७ दासेरकः ८
धूसरः ९ लम्बोष्ठः १० रवणः ११
महाजङ्घः १२ जवी १३ जाङ्घिकः १४
दीर्घः १५ शृङ्खलकः १६ महान् १७
महाग्रीवः १८ महानादः १९
महाध्वगः २० महापृष्ठः २१ बलि
ष्ठः २२ इति राजनिर्घण्टः ॥
उष्ट्रकाण्डी स्त्री पुष्पजातिभेदः
उटाटी इति ख्याता तत्पर्य्यायः
रक्तपुष्पी २ करभकाण्डिका ३
रक्ता ४ लोहितपुष्पी ५ कणिपुष्पी
अस्या गुणाः तिक्तत्वं उष्णत्वंच
कारित्वं रुक्रोगहारित्वंच अस्या
बीजगुणाः मधुरत्वं शीतत्वं
ग्रीष्मत्वं वृष्यत्वं संतर्पणत्वंच
इति राजनिर्घण्टः ॥
उष्ट्रधूसरपुच्छिका स्त्री हस्तवि
विविडीति भाषा इति रत्नमाला
उष्ट्रपादिका स्त्री वृक्षविशेषः
मदनमालीति ख्याता तत्पर्य्यायः
शीतभीरुः २ भद्रवल्ली ३
भूमिमल्ली ४ इति रत्नमाला

उष्ट्रशिरोधरं क्ली भगन्दररोग
विशेषः तस्य लक्षणं प्रकोपणैः
पित्तमति प्रकोपितं करोति
रक्तां पिडकां गुदागतां ॥
तदाशुपाका हिमपूति वाहिनी
भगन्दरं तूष्ट्रशिरोधरं वदेत् ॥
इति निदाने ॥
उष्ट्रिका स्त्री मृत्तिकाभाण्डभेदः
उष्ट्रभार्य्या इति मेदिनी ॥
हस्तिकालीहस्तः इति राजनिर्घण्टः
उष्ट्री स्त्री मृत्तिकाभाण्डः उष्ट्रस्त्री
इति हेमचन्द्रः तस्याः ॥
क्षीरगुणाः कुष्ठशोथपित्तार्शः
कफाटोपानाहोदरस्य जंतुगुल्म
श्वासाक्षाल नाशित्वं तदृधि
गुणाः अर्शः कुष्ठकृमिशूलोदर
रोगनाशित्वं कटुत्वं स्वादुत्वंच
तत्रवनीत गुणाः विपाके ॥
शीतलत्वं लघुत्वं व्रणकृमि
कफास्रवातविषनाशित्वंच
(शेषः) तद्घृत गुणाः मधुरत्वं विपाके
कटुत्वं शीतलत्वं कुष्ठकृमिविष
वातकफ गुल्मोदरनाशित्वंच
तन्मांसगुणाः शिशिरत्वं त्रिदोष
शमनत्वं लघुत्वं बलपुष्टिप्रदत्वं
रुचिकारित्वं मधुरत्वं वीर्य्य
वर्द्धनत्वंच इति राजनिर्घण्टः ॥

उष्णः पुं ग्रीष्मऋतुः तत्पर्यायः
ग्रीष्मः २ उष्मकः ३ निदाघः ४
उष्णोपगमः ५ उष्णागमः ६ तपः
७ इत्यमरः आतपः इति
हेमचन्द्रः पलाण्डुः इति
राजनिर्घण्टः उष्णवीर्य्यद्रव्यगुणाः
पित्तबलकारित्वं लघुत्वं ।
वातश्लेष्मनाशित्वञ्च इति
राजवल्लभः ॥
उष्णः त्रि निरालस्यव्यक्तिः तत्
पर्यायः दक्षः २ चतुरः ३
पेशलः ४ पटुः ५ सूत्थानः ६
इत्यमरः अप्रशीतः इति ॥
मेदिनी ॥ (माहिः
उष्णकः पुं ग्रीष्मकालः चक्र
इतिधरणिः ॥
उष्णकः त्रि त्ति प्रकारी आतुरः
इति मेदिनी प्रगुणः इति
धरणी ॥
उष्णनदी स्त्री वैतरणीनदी
उष्णरश्मिः पुं सूर्य्यः अर्कहस्तः
इत्यमरः ॥
उष्णवारणः पुं क्ली छत्रं इति
हारावली ॥
उष्णवीर्य्यः पुं शिशुमारः इति
हेमचन्द्रः तीक्ष्णतेजोषक
द्रव्यादिः ॥

उष्णा स्त्री क्षयव्याधिः संतापः
पित्ते इतिराजनिर्घः ॥
उष्णांशुः पुं सूर्य्यः इतिहेमचन्द्रः
उष्णागमः पुं ग्रीष्मकालः ॥
इत्यमरः ॥
उष्णाभिगमः पुं ग्रीष्मऋतुः
इतिशब्दरत्नावली ॥
उष्णासहः हेमन्तऋतुः इति
राजनिर्घण्टः ॥ (रोगे
उष्णिक स्त्री सप्ताक्षरच्छन्दः यथा
बाहुविरुग्नात् कुम्भीन्द्रान्मदलेखा
लग्नाभून्मुरशत्रोः कस्तूरीरसचर्चा
इतिछन्दोमंजरी ॥
उष्णिका स्त्री यवागूः याउइति
भाषा इत्यमरः ॥
उष्णीषः पुं क्ली शिरोवेष्टः पाग
इति भाषा इत्यमरः अस्य
गुणाः केश चक्षुराय्वर्द्धकत्वं
धूलि शीतोष्णनिवारकत्वञ्च इति
राजवल्लभः किरीटः विकृतरे
इतिमेदिनी ॥
उष्णोदकं क्ली तप्तजलं क्वाथ्य
मानं पादावशेषार्द्धावशेषपाद
हीनंजलं अस्यगुणाः सदापथ्यत्वं
कासज्वरविच्छेदकफवाताममेदो
नाशित्वं दीपनत्वं वस्तिशोधनत्वंच
रोगे उष्णोदकपानगुणाः श्लेष्म

संघातभेदकत्वं मारुतापकर्षित्वं
आशु अजीर्णजारकत्वं च नक्त
पादहीने वातघ्नं अर्द्धहीने तु
पित्तनुत् कफघ्नं पादशेषं ॥
पानीयं लघु दीपनं ॥ इति ॥
राजनिर्घण्टः ॥
उष्णोपगमः पुं ग्रीष्मकालः ॥
इत्यमरः ॥
उष्मः पुं ग्रीष्मकालः वसन्तका
इत्युणादिकोषः उष्मः कोथः
उष्मकः ग्रीष्मऋतुः इत्यमरः
ऊष्मा पुं ग्रीष्मकालः उत्तापः
इत्यमरटीकायां नीलकण्ठः
उष्मागमः पुं ग्रीष्मकालः इत्य
टीकायां रायमुकुटः ॥
उक्षः पुं वृषः ऋषभः इति
मेदिनी ॥ (षा
उक्षा स्त्री अर्जुनी गाइ इतिभा
उपचित्रा इंद्रकाणीतिभाषा
इति मेदिनी ॥
उक्ष वधे इतिकविकल्पद्रुमः
उक्षानः पुं देशविशेषः इति
भूरिप्रयोगः ॥
उक्ष० सेके इतिकविकल्पद्रुमः
उक्षः त्रि सिक्तः धौतः ॥
उक्षतरः पुं महावृषः इति ॥
हेमचन्द्रः ॥

उक्षा पुं वृषः इत्यमरः
ऋषभौषधिः इतिराजनिर्घण्टः

ऊ

ऊ ऊकारः सचषष्ठस्वरवर्णः अस्य
उच्चारणस्थानं तोष्ठः सचदीर्घः
प्लुतश्च भवति शंखकुन्देसमाकारे
ऊकारे परमकुण्डली पंचप्राणमये
वर्णे पंचदेवमये सदा पंचप्राण
युते वर्णे पीतविद्युल्लताद्या
धर्म्मार्थकाम मोक्ष सदासुख
प्रदायके इति कामधेनुतन्त्रे ॥
ऊ च वाक्यारम्भः रक्षा ॥
अनुकम्पा इति मेदिनी ॥
ऊः पुं महेश्वरः इतिपुरुषोत्तमः
चन्द्रः इति शब्दरत्नावली ॥
ऊढः त्रि विवाहितः इतिस्मृतिः
कृतवहनः ॥
ऊटकस्कटः त्रि कवचधारी ।
तत्पर्यायः सन्नद्धः २ वर्म्मितः
३ सज्जः ४ दंशितः ५ इत्यमरः
ऊढा स्त्री भार्या इति हेमचन्द्रः ॥
ऊते त्रि तेन संतते तत्पर्यायः
स्यूतं २ उतं ३ इत्यमरः ॥
वोनाकापड इति भाषा ॥
ऊतिः स्त्री रक्षणे स्यूतिः ॥
वोनासेलाइ इतिभाषा इति ॥

मेदिनी स्मारणे ॥ इति
शब्दरत्नावलीजवने इत्यमर
टीकायांस्वामी लीला इति
श्रीभागवते ॥
ऊधः क्ली आपीने गाइरपालान
इतिभाषा इत्यमरः ॥
ऊधस्य क्ली दुग्धे इतिहेमचंद्रः
ऊन तक परिहाणे इति ॥
कविकल्पद्रुमः ॥
ऊनं त्रि हीने न्यूने ॥
ऊम् व्य रोषोक्तिः प्रश्नः ॥
इति मेदिनी निंदा स्पर्द्धा ॥
इतिशब्दरत्नावली ॥
ऊमे क्ली देशविशेषः इति
सिद्धांतकौमुदी ॥
ऊय ई उ. सेवने तंतुसंताने
इतियावत् इतिकविकल्पद्रुमः
ऊरी व्य विस्तारः अंगीकारः ॥
इतिभरतोद्विरूपकोषश्च ॥
ऊरव्यः पु वैश्यः इत्यमरः ॥
ऊरी व्य विस्तारः अंगीकारः ॥
इत्यमरः ॥
ऊरीकृतः त्रि अंगीकृतः विस्तृतः
इत्यमरः ॥
ऊरुः पु जानूपरिभागः उरत्
इति भाषा तत्पर्य्यायः
सक्थि २ इत्यमरः ॥

ऊरुजः पु वैश्यः सलब्राह्मणः
ऊरुभ्यां जातः इत्यमरः ॥
ऊरुपर्व्वा पु क्ली जानु हांटु इति
भाषा इत्यमरः ॥
ऊररी व्य विस्तारः अंगीकारः
इतिभरतो द्विरूपकोषश्च ।
ऊरुस्तम्भः पु रोगविशेषः तस्य
निदाने शीतोष्ण द्रव संशुष्कगुरु
स्निग्धैर्निषेवितैः जीर्णाजीर्णे
तथायास संक्षोभस्वप्न जागरैः
तस्य संप्राप्तिः स श्लेष्म मेदः
पवनः साममत्यर्थ संचितं अति
भूयतां दोष मूरुवेत् प्रति
पद्यते सक्थ्यस्थिनी प्रपूर्य्यांतः
श्लेष्मणा स्तिमितेन च तदास्तनाति
तेनोरू स्तब्धो शीता वचेतनौ
तस्य रूपं परकीयाविव गुरू
स्यातामति भृश व्यथौ ध्यानांग
मर्द स्तैमित्य तंद्राच्छर्द्यरुचिज्वरैः
संयुतौ पादसदन कृच्छ्रोद्धरण
सुप्तिभिः तमूरुस्तम्भमित्याहु
राढ्य वातमथापरे इति ॥
हविनिश्चयसंग्रहे माधवकरः
ऊरुस्तम्भा स्त्री कदलीवृक्षः इति
राजनिर्घंटः ॥
ऊर्ज्ज कजीवने बले इति ॥
कविकल्पद्रुमः ॥

ऊर्ज्जः पु कार्तिकमासः उत्साहः
बलप्राणने इति मेदिनी ॥
कार्तिकनामसंवत्सरः ॥
ऊर्द्धं क्ली जले इति शब्दरत्नावली
ऊर्ज्जस्वलः त्रि अतिशयबलवान्
इत्यमरः ॥
ऊर्ज्जस्वन् क्ली अलंकारविशेषः
तस्य लक्षणं साहंकारत्वाभिधाने
तथाचोक्तं ऊर्ज्जस्वि रूढाहंकारं
तस्योदाहरणं यथा अपचल
मयूरहं भरासहिष्णुं जनमसमान
मन्यूर्जितं विवर्ज्य कृतवसति
मिवार्णवोपकण्ठेऽस्थिरमतलोत्र
तिष्ठन्तेगमेव इति भट्टिः ॥
ऊर्ज्जस्वी न त्रि अतिशबलवान्
इत्यमरः
ऊर्णनाभः पु कीटविशेषः
माकड़सा इतिभाषा तत्पर्य्यायः
लूता २ तंतुवायः ३ मर्कटकः ४
इत्यमरः
ऊर्णनाभिः पु मर्कटकः इति
शब्दरत्नावली
ऊर्णा स्त्री मेषादिलोमपसम्
इति भाषा भ्रुवोरंतरावर्त्तः ॥
इत्यमरः मत भ्रूद्वय मध्ये

वक्रवर्त्यादीनां महायोगिनांच
भवति इतिभरतः ॥
ऊर्णायुः पु मेषलोमकंबलः
मेषः इत्यमरः ऊर्णनाभः ॥
इतिहेमचंद्रः लूताभेदः इति ॥
मेदिनी ॥
ऊर्णु अ ल आच्छादने इति
कविकल्पद्रुमः
ऊर्द्दरः पु शूरः राक्षसः
इत्युणादिकोषः ॥
ऊर्द्धः त्रि उपरि उच्छ्रितः तुंगः
इति अत्रस्थवकारेतोर्द्धशब्दार्थे
मेदिनी अत्र ऊर्द्धशब्दो निर्व्वकारः
तडके वर्णदेशनायां उजिहीते
उत्क्रांति उद्रो हाङो उप्रत्ययः
आदिवर्णस्य ऊरादेशः इति
मधुमाधवादयः इतिमुग्ध
भेदाद्ध्वक शब्दस्य टीकायां भरतः
ऊर्द्धकः पु ऊर्द्धकः मृदंगविशेषः
इत्यमरटीकायां भरतमुकुटौ ॥
ऊर्द्धः त्रि उच्छ्रितः तुंगः ॥
उपविष्टात् इतिमेदिनी ऊर्द्ध
शब्दोदीर्घादिः सवकारो निर्व्वकारश्च
तथाच उपरिष्टान्यते इतिकृत
निरुक्तिरूर्द्धं प्राहो रकारवानिति

मृणाल तंतु सूक्ष्मः शुभायतपक्ष्म सभूत्यादयः कुर्वती रूपलै
प्रशस्तावर्त्तो महापुरुषलक्षणं संङ्गे भुवनं नीचमूर्द्धजैः तस्या

वलालीवान्वेति चित्रानागवमूर्द्ध
जैः इतिकीचकवधयमकं ऊर्द्ध
शाहोमकारांतोऽव्ययोदीर्घादि
र्वकारवान् तथाप्रदेतोऽनव्ययो
ऽभीति जयादित्यादयः ॥
ऊर्द्धकः पुं मृदंगविशेषः यथा
ऊर्द्धकोमी [illegible]तालो
ऽष्टांगुलोमुखे प्रतोर्द्धवायते।
तेषोवादने ड्रजनैनन इति ॥
भरतकृत शाहार्णवः अपिच
हरीतक्याकृति स्त्वकस्तथा ॥
लिंगोयवाकृतिः ऊर्द्धकोदंड
तुल्यः स्यान्मुरजाभेदतोमता ॥
अन्यटीकायांतु यवमध्यस्तथोर्द्ध
कः इत्यमरटीकायां सारसुंदरी
ऊर्द्धकेटी स्त्री महाशतावरी॥
इतिराजनिर्घंटः
ऊर्द्धजानुः त्रि उपविभागेस्थूल
जानुकः तत्पर्य्यायः ऊर्द्धज्ञुः २
इत्यमरः ॥
ऊर्द्धज्ञः त्रि ऊर्द्धजानुः इति
भरताद्विरूप कोषश्च ॥
ऊर्द्धज्ञुः त्रि ऊर्द्धजानुः इत्यमरः
ऊर्द्धदेवः पुं विष्णुः इति ॥
शाहरत्नावली ॥
ऊर्द्धदमः त्रि ऊर्द्धस्थः इति
त्रिकांडशेषः ऊर्द्धगम इति

शुक्तिसिद्धपादः ॥
ऊर्द्धपादः पुं शरभः इति
शाहरत्नावली ॥
ऊर्द्धपुंड्रः पुं तिलकविशेषः ॥
सतुब्राह्मणे ललाटे पुंड्रस्तुवत
चंदनादिनाकृतोर्द्धरेखात्रयः
यथा ऊर्द्धपुंड्रंत्रिपुंड्रंस्यात् ॥
त्रिपुंड्रेणोर्द्धपुंड्रकमिति ऊर्द्ध
पुंड्रं द्विजः कुर्याद्धारिमृद्भस्मचंदनैः
इत्यादिच वहवः ऊर्द्धपुंड्रं ॥
मृदाकुर्य्यात् त्रिपुंड्रं भस्मनासदा
तिलकं वै द्विजः कुर्य्याच्चंदनेन
यदृच्छया ऊर्द्धपुंड्रं द्विजः कुर्यात्
क्षत्रियस्तु त्रिपुंड्रकं अर्द्धचंदनंतु
वैश्यश्च वर्तुलं शूद्रयोनिजः
इतिआह्निकतत्त्व धृतब्रह्मांड
पुराणं ॥ स
ऊर्द्धरेताः पुं महादेवः इति
त्रिकांडशेषः भीष्मः मुनि
विशेषः तद्यथा सनकसनंद
सनातनसनत्कुमारादयः इति
महाभारते अस्यव्युत्पत्तिः ॥
ऊर्द्धरेतो यस्यनयततिवीर्य्य
यस्येत्यर्थः ॥
ऊर्द्धलिंगः पुं महादेवः इति
हेमचंद्रः ॥
ऊर्द्धलोकः पुं स्वर्गः इति ॥

तत्पर्य्यायः तिष्यफला २ अमृता ३
वयस्था ४ वयःस्था ५ कायस्था ६
इत्यमरस्तट्टीकाच श्रीफला ७
धात्रिका ८ शिवा ९ शांता १० धात्री
११ अमृतफला १२ वृष्या १३ वृत्त
फला १४ रोचनी १५ इतिराज ॥
निर्घंटः कर्षफला १६ तिष्या १७
इतिरत्नमाला अस्यागुणाः हरी
तकीगुणवद्गुणत्वंविशेषवलभुक्र
कारित्वंशीतवीर्य्यत्वंआम्लत्वातत्वं
युनाशित्वंशैत्यमाधुर्य्यात्पित्तना
शित्वंकषायरूक्षत्वात्कफनाशि
त्वंसर्वफलाधिकगुणत्वंभोजनाद्य
मध्यांत प्राशस्त्यं निरत्ययत्वं
दोषहरत्वंच अस्यमज्जगुणाः
तृष्णाछर्द्दिकफवायुनाशित्वंल
घुत्वंकषायत्वंवलकारित्वंचइति
राजवल्लभः अपिच लघुत्वंदाह
वमिमेहशोषनाशित्वंरसायन
त्वं कटुत्वं रुचिकरत्वं रक्तदोष
नाशित्वं श्रम विबंधाध्मानविष्टंभ
दोषप्रशमनकारित्वंच अस्यमज्ज
नोविभीतकमज्जवद्गुणत्वंच॥
इतिराजनिर्घंटः ततशुष्कफल
गुणाः कफपित्तनाशित्वं आम्लत्वं
स्वादुरूक्षत्व हाखापाके पित्तनाशि
त्वंच इतिराजवल्लभः ॥

आमवातः पुं स्वनामख्यात रोग
विशेषः तस्यसंप्राप्तिः विरुद्धा
हारचेष्टस्यमंदाग्नेर्निश्चलस्यच
स्निग्धंभुक्तवतोह्यन्नंव्यायामं कुर्व
तस्तथा वायुना प्रेरितोह्यामः
श्लेष्मस्थानंप्रधावति तेनात्यर्थं
विदग्धोसौधमनीः प्रतिपद्यते
वातपित्तकफैर्भूयोदूषितः सो
ऽन्नजोरसः स्रोतांस्यभिष्यंदयति
नानावर्णोऽतिपिच्छिलः व्याधी
नामश्रयोहयेषआमसंज्ञोतिदा
रुणः युगपत्कुपितावेतस्त्रिकसंधि
प्रवेशकौ स्तब्धंच कुरुतेगात्रमा
मवातः सउच्यते तस्यरूपं ॥
अंगमर्द्दो अरुचिस्तृष्णाह्यालस्यं
गौरवंज्वरः अपाकः शूनतांगा
नाममवातस्यलक्षणं सन्निधा
पित्तात् सदाहरागेचसशूलंपव
नात्तुगं स्तिमितं गुरुकंडूंचकफ
जुष्टंतमादिशेत् इतिनिदानं
आमातीसारः पुं षट्प्रकारातीसारमध्ये रोगविशेषः तस्य
संप्राप्तिरूपे । अन्नाजीर्णात् प्रद्रु
ताः क्षोभयंतः कोष्ठं दोषाधातु
संघात् मलांश्च नानावर्णानैकशः
सारयंति शूलोपेतंषष्ठमेनं वदंति
संसृष्टमेभिर्दोषैस्तुन्यस्तमप्स्वव



सीदति पुरीषं भूशं दुर्गन्धि पिच्छि
लं चामसंज्ञितं इतिनिदानं ॥
आमात्यः त्रि अमात्यः मन्त्री॥
इतिद्विरूपकोषः ॥
आमानस्यं क्ली आमनस्यपीडा
दुःखं इतिशब्दरत्नावली ॥
आमान्नं क्ली अपक्वान्नं कांचाँची
इत्यादिभाषा ॥
आमाशयः पुं अपक्वस्थानं तत्तु
नाभिस्तनयोर्मध्यभागः इतिशब्द
चंद्रिका ॥
आमिषं क्ली पुं मांसं इत्यमरः
भोग्यवस्तु संभोगः ॥ उत्
कोचः इतिमेदिनी सुंदरा ॥
काररूपादि लोभसंचयः इति
हेमचंद्रः लाभः कामगुणः
रूपं भोजनं इतिहारा
वली ॥ (ति
आमिषप्रियः पुं कंकपक्षीइ
राजनिर्घंटः ॥ मांसाभिलाषिणि
त्रि ॥
आमिषाशी (नें) त्रि मत्स्यमांस
भोजनशीलः तत्पर्यायः शौ
ष्कलः २ इत्यमरः ॥
आमिषी स्त्री मिषी जटामांसी
इतिकेचित् इत्यमरटीकायां ॥
भरतः ॥

आमिक्षा स्त्री शृतोष्णदुग्धे दधि
योगसंभावा या क्षीरसा इति॥
ख्याता । छाना इति केचित् ॥
इत्यमरः तत् पर्यायः दधिकूर्चि
का २ पयस्या ३ क्षीरसंतालिका ४
इतिराजवल्लभादयः ॥
आमीक्षा स्त्री आमिक्षा आवर्ति
ते तप्तक्षीरे दधियोगात् या ॥
वध्विकाकारा विकृतिर्जायते सा
इतिपुरुषोत्तमः ॥
आमुक्तः त्रि पिनद्धः परिहित
वस्त्रादिः इत्यमरः परिहित
कवचव्यक्तिः ॥
आमुपः पुं कंटकगुल्मवंशवि
शेषः वेउउवांश इतिख्यातः ॥
इतिशब्दचंद्रिका ॥
आमुष्यायणः त्रि ख्यातवंशोद्भवः
सत्कुलजातः इतित्रिकांडशेषः
आमूलं क्ली मूलपर्यंतं ॥
आमोदः पुं अतिदूरगामिगंधः
इत्यमरः गंधः हर्षः ॥ इति ॥
मेदिनी समहाङ्गन्धः इतिशब्द
रत्नावली ॥
आमोदनं क्ली आमोदकरणं
हर्षणं ॥
आमोदितः त्रि आनंदितः ॥
सुगंधितः ॥

चंद्रः ॥
आवाहनं क्ली आह्वाने निमंत्रणे
आवाहनी स्त्री मुद्राविशेषः
यथा हस्ताभ्यामंजलिं बद्ध्वाऽना
मिकामूलपर्वणोः अंगुष्ठौ निः
क्षिपेत् सेयं मुद्रात्वावाहनी स्मृता
इति तंत्र शास्त्रं ॥
आविः स व्य प्राकाश्येणाप्रस्फुटत्वे
तत्पर्यायः प्रादुः २ इत्यमरः ॥
आविकः पुं कम्बले इतिहला
युधः ॥
आविग्नः पुं अविघ्नः करमर्द्दकः
इतिशब्दरत्नावलीयाणिआमल
इतिख्यातः इत्यमरटीका सार॥
सुंदरी ॥
आविर्भावः पुं प्रकाशः देवाव
तरणे प्रादुर्भावः ॥
आविर्भूतः त्रि प्रकाशितः ।
अधिष्ठितः जन्मयुक्तः अवतीर्णः
प्रादुर्भूतः ॥
आविष्कारः पुं प्रकाशः ॥
आविष्कृतः त्रि प्रकाशितः तत्
पर्यायः प्रकटितः २ इतिहेम
चंद्रः ॥
आविष्टः त्रि प्रेतवाहितः भूता (दि
ग्रस्तः ॥ इति त्रिकांडशेषः आ॥
वेशयुक्तः । निविष्टः ॥

आवुकः पुं नाट्योक्तौ पिता॥
इत्यमरः ॥
आवृत् स्त्री अनुक्रमः परिपाटी
इत्यमरः ॥
आवृतः त्रि कृतावरणः तत्
पर्यायः वेष्टितं २ वलयितं ३
संवीतं ४ रुद्धं ५ इत्यमरः ॥
आवृतः त्रि कृतावरणः आवृतः
इत्यमरटीका ॥
आवेगः पुं त्वरा इति हेम॥
चंद्रः ॥
आवेपी स्त्री हट्टदारकहस्तः ॥
इत्यमरः राजनिर्घंटश्च ॥
आवेदनं क्ली निवेदनं ॥
आवेशः पुं अहंकारविशेषः तत्
पर्यायः संरंभः २ आटोपः ३
अपस्माररोगः इतिहेमचंद्रः
भूतादिनारोगः तत्पर्यायः
भूतसंचारः २ भूतक्रान्तिः ३ ग्रहा
मयः ४ इतिराजनिर्घंटः ॥ आ
सक्तिः अभिनिवेशः ॥
आवेशनं क्ली शिल्पशाला इत्य
मरः भूतावेशः प्रवेशः ॥
इतिमेदिनी कोषः इति ॥
धरणी परिवेशः इतिहेम॥
चंद्रः ॥
आवेशिकः त्रि आगतः अतिथिः

इत्यमरः स्वीये असाधारणे ॥
तत्पर्य्यायः आत्मसाधारणे २
प्रातिष्ठिते ३ इति त्रिकाण्ड
शेषः ॥
आवेष्टकः पुं प्राचीरादि इति
हलायुधः घेराव वेडा इत्यादि
आवाथने क्ली स्नाने । शुद्धिः ॥
आशंसा स्त्री इच्छा आकांक्षा ॥
इतिहेमचन्द्रः ॥
आशंसिता (वैं) त्रि आशंसाकर्त्री
आकांक्षाशीलः इत्यमरः ॥
आशंसुः त्रि आशंसिता इच्छुः
इत्यमरः ॥ (ऽः)
आशक्तः त्रि सम्यक्शक्तिविशि
आशंका स्त्री भयं त्रासः इति
हेमचन्द्रः ॥
आशानः पुं अशानहस्तः इति
भरतः द्विरूपकोषश्च ॥
आशयः पुं अभिप्रायः पनस
वृक्षः आधारः इतिविश्वमे ॥
दिन्यो विभवः किंयवानः ॥
चेतः अजीर्णे कोष्ठागारे । (हे)
इत्यजयपालः धर्म्मोधर्म्मः अदृ
इतिकुसुमाञ्जलिः ॥ (ष्टिः)
आशयाशः पुं आश्रयाशः अ
इत्यमरटीकायांस्वामी ॥
आशरः पुं अग्निः राक्षसः

इति मेदिनी ॥
आशा स्त्री दीर्घाकांक्षा आयता
तस्या दिक् इत्यमरः ॥
आषाढः पुं आषाढमासः
व्रतिनां पलाशदण्डः इत्यमरटीका
द्विरूपकोषश्च ॥
आषाढा स्त्री पूर्वाषाढा नक्षत्रे
उत्तराषाढा च ॥ (मूलः)
आशापुरसंभवः पुं भूमिजगु
इतिराजनिर्घण्टः ॥
आशाबन्धः पुं समाश्वासः प्र
त्याशा मर्कटजालकं माकड
सारजाल इति भाषा इति ॥
मेदिनी ॥
आशितं त्रि अशितं भुक्तं ॥
इतिजटाधरः ॥
आशितङ्गवीनं त्रि आशितङ्गवीने
गावायत्राशिताः पुरा पूर्वं ये
स्थाने गरु चरियाछे इति भाषा
इत्यमरः ॥
आशितंभवं क्ली अन्नादितृप्तौ
पुं इति मेदिनी ॥
आशिता (रु) त्रि बहुभोजनशीलः
अतिप्रायभोक्ता इति हेमचन्द्रः
आशिरः पुं राक्षसः ॥ अग्निः
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
आशी (स) स्त्री आशीः ॥ सर्प

दन्तः इत्यमरः हृहिनामौषधिः
इतिराजनिर्घण्टः ॥
आशी स्त्री हिताशंसने अहि
दन्तः सर्पविषे इति शब्दरत्ना
वली आशीताल्लुगतादंष्ट्रात
दष्टोन जीवति इतिविषविद्या
आशीर्वादः पुं आशीर्वचने ।
मंगलप्रार्थना ॥
आशीविषः पुं सर्पः इत्यमरः
आशुः पुं क्ली प्रावृट्कालसम्भु
त्रवधान्ये आउश इति भाषा तत्
पर्य्यायः व्रीहिः २ पाटलः ३
अस्य गुणाः मधुरत्वं पाकेऽम्ल
पित्तकारित्वं गुरुत्वं च इति
राजवल्लभः ॥ (मि)
आशु क्ली शीघ्रे द्रुते सत्वगा
चेत् त्रि इत्यमरः ॥
आशुगः पुं वायुः वाणः शी
घ्रगामिनि त्रि इत्यमरः ॥
आशुपत्री स्त्री शल्लकीलता इति
रत्नमाला ॥
आशुव्रीहिः पुं आशुधान्ये
इत्यमरटीकायां भरतमुकुटौ
आशुशुक्षणिः पुं अग्निः इत्य
मरः वायुः इति सिद्धान्तकौ
मुद्यामुणादि वृत्तिः ॥
आशोकुटी (न) पुं पर्वतः इति

शब्दमाला ॥
आश्चर्य्यं क्ली अपूर्वं तत्पर्य्यायः
विस्मयः २ अद्भुतं ३ चित्रं ४
इत्यमरः ॥
आश्मनः पुं अरुणः सूर्य्यसारथिः
इतित्रिकाण्डशेषः ॥
आश्रमः पुं क्ली शास्त्रोक्तधर्म
विशेषः आश्राम्यन्तिस्वेतयत्र
इत्यत्र । सचतुर्विधः ब्रह्मचर्य्यं १
गार्हस्थ्यं २ वानप्रस्थ्यं ३ सन्यासः ४
इति स्मृतिः ब्रह्मचारी गृही
वानप्रस्थः भिक्षुः इत्यमरः
मुनीनां वासस्थाने वने मठः
इतिमेदिनी ॥
आश्रमिकः त्रि आश्रमसम्बन्धः
इतिशब्दरत्नावली ॥
आश्रयः पुं राज्ञोसंध्यादिषड्
गुणान्तर्गत गुणविशेषः इत्यमरः
व्यपदेशः सामीप्यः आधारः
इति जटाधरः गृहे इति ॥
हेमचन्द्रः ॥
आश्रयाशः पुं अग्निः चित्रकवृक्षः
इत्यमरः ॥
आश्रयाशः त्रि आश्रयनाशकः
आश्रयध्वंसी इति मेदिनी ॥
आश्रवः पुं अङ्गीकारः क्लेशः
इतिमेदिनी दोषः इतिहेम



चंद्रः ॥
आश्रवे त्रि वचनस्थितः कथार
वाध्य इति भाषा इति मेदिनी ॥
आश्रिः स्त्री अश्रिः कोणः ॥
आश्रितः त्रि आश्रयप्राप्तः शर
णागतः न्यायमते परमाणवाका
शादिनित्यद्रव्यभिन्नसर्वद्रव्याणां
आश्रितत्वं साधर्म्यं ॥
आश्रुतः त्रि अंगीकृतः स्वीकृतः
इत्यमरः आकर्णितः कृत
श्रवणः ॥
आश्लेषः पुं आलिंगनं इति
हलायुधः एकदेशसंबंधः यथा
कानने रमे इति व्याकरणं ॥
आश्वं क्ली अश्वहंदः घोटक
समूहः इत्यमरः ॥
आश्वत्थं क्ली अश्वत्थवृक्षफलं
इत्यमरः
आश्वपालिकः पुं अश्वपालस्य
पुत्रः इति व्याकरणं ॥
आश्वयुजः पुं आश्विनमासः
इत्यमरः आश्विनसंबंधिनि त्रि
आश्वयुजी स्त्री आश्विनीपूर्णि
मा इति शब्दरत्नावली ॥
आश्वासः पुं निर्वृतिः आख्या ॥
यिका परिच्छेदः इति मेदिनी ॥

आश्विनः पुं वैशाखादिद्वादश
मासांतर्गत षष्ठमासः आश्विनी
नक्षत्रयुक्ता पौर्णमासी यत्र मासे
सः रवेः कन्याराशि इति कालः
तत्पर्य्यायः इषः २ आश्वयुजः ३
इत्यमरः शारदः ४ इति राज
निर्घंटः तत्रजातफलं राज्ञो
प्रियः काव्यकलाविदग्ध्यः स्याद्दंभ
गर्भायसुतीक्ष्णबुद्धिः सुखीवदा
न्योबहुमानशाली भक्तो भवेदाश्वि
नमासजन्मा इति कोष्ठीप्रदीपः
आश्विनेयौ पुं अश्विनीकुमारौ
इत्यमरः ॥
आश्वीनं त्रि यद्वर्त्म त्वकेनाश्वेन
एकेनदिनेन गम्यते तत् एक
घोडाय एकदिने यावार पथ
इति भाषा इत्यमरः ॥
आषाढः पुं वैशाखादिद्वादश
मासांतर्गत तृतीयमासः रवेर्मि
थुनराशिस्थिति कालः पूर्वोत्त
राषाढान्यतर नक्षत्रयुक्ता पौर्ण
मासी यत्र मासे सः तत्पर्य्यायः
शुचिः २ इत्यमरः ॥ तत्र जात
फलं अनल्पजल्पी प्रमदाभिलाषी
प्रमादशीलो गुरुवत्सलश्च बहु
व्ययो मंदहुताशनः स्यादाषाढ
मास प्रभवो मनुष्यः इति कोष्ठी

आश्वप्रमानं

प्रदीपः व्रतिनो पलाश दंडः
मलय पर्वतः इति मेदिनी ॥
आषाढकः पुं आषाढमासः
आषाढभवः पुं मंगलग्रहः
इति हारावली आषाढमास
जाते त्रि ॥
आषाढा स्त्री पूर्वाषाढानक्षत्रे
उत्तराषाढानक्षत्रे इति शब्द
रत्नावली ॥
आषाढाभूः पुं मंगलग्रहः इति
हेमचंद्रः ॥
आषाढी स्त्री आषाढमासस्य पू
र्णिमा इति मेदिनी ॥
आष्टं क्ली आकाशे इत्युणादि
कोषः ॥
आस त्रि उ०ल उपवेशने इति
कविकल्पद्रुमः विद्यमानतायां
इति तट्टीका ॥
आसं पुं धनुः इति हेमचंद्रः
आसक्तः त्रि आसक्तिविशिष्टः
तत्पर्य्यायः तत्परः २ प्रसितः
३ इत्यमरः ॥
आसक्तं क्ली नित्यं सततं ॥
अविरतं इति जटाधरः ॥
आसक्तिः स्त्री आनरक्तिः आसंगः
आसंगं क्ली अनवरतं नित्यं।
सततं उद्युक्ते त्रि इति जटाधरः

तुवरी सौराष्ट्रमृत्तिका इति या
दव इति राजनिर्घंटः आसक्तिः
आसंगिनी स्त्री वक्रवातः वात
भ्रमः चुकलिया वातास इति
भाषा इति त्रिकांडशेषः ॥
आसत्तिः स्त्री संगमः लाभः ॥
इति मेदिनी न्यायमते यदसन्नि
धानकारणं यत्पदार्थस्य यत्पदा
र्थेनान्वयापेक्षितस्तयोरव्यवधाने
नोपस्थितिः कारणं इति सि।
द्धांतमुक्तावली
आसनं क्ली पीठं पिड़ि चौकि
इत्यादि भाषा हस्तिस्कंधदेशः
यत्र महामात्रो निवसति विजि
गीषोर्ड गीदीनवर्ड्ड यतः स्थितिः
इत्यमरः यात्रानिवर्तने इति
मेदिनी अष्टांगयोगस्य तृतीय
योगांगे तत्र पंचप्रकारकरचरण
दिसंस्थानविशेषः यथा पद्मा
सनं स्वस्तिकाख्यं भद्रं वज्रासनं
तथा वीरासनमिति प्रोक्तं क्रमा
दासन पंचकं तेषां क्रमः ऊ
र्वोरुपरि विन्यस्य सम्यक् पादतले
उभे। अंगुष्ठौ चयात् हस्ता ॥
भ्यां व्युत्क्रमात्तथा पद्मासनमि
ति प्रोक्तं योगिनां हृदयंगमं।१
जान्वोरंतरे सम्यक् कृत्वा पादतले

उभे ऊरुकायोविशेमेत्री स्वस्ति मेदिनी ॥
केतत् प्रचक्षतो २ सीमन्याःपार्ष्णी
योर्न्यसेद्गुल्फयुग्मं सुनिश्चलं हृष्ट
णायः पादपार्ष्णिपाणिभ्यां परिवेष्ट्य
येत् भद्रासनं समुद्दिष्टं योगिभिः
सारकल्पितं ३ ऊर्वोः पादौ क्र
मान्न्यसेत् कृत्वाप्रत्यङ्मुखांगुली
करौ निदध्यादाख्यातं वज्रासनमनु
त्तमं ४ एकपादमथैकः कृत्वाविन्य
स्योरौतथेतरं ऊरुकायोवि॥
शेन्मत्रीवीरासनमितीरितं ५
इतितंत्रसारः अन्यच्च आस न:
नानिकुलेशानि यावंताजीवजंत
वस्तु शीतिलक्षाणि चैकैकेसमु
दाहृतं आसनेभ्यः समस्तेभ्यः।
सोक्तं ह्ययमुच्यते एकं सिद्ध
सनं नाम द्वितीयं कमलासनं
इतिनिरुक्त तंत्रे शृंगारास
नानिवेधयाहे दृष्ट्वाति
आसनः पुं जीवकवृक्षः इति
मेदिनी ॥
आसना स्त्री स्थिति इत्यमरः ॥
आसनि स्त्री विपणिः स्थितिः
इतिमेदिनी ॥
आसंदः पुं वासुदेवः इति
मेदिनी ॥
आसंदी स्त्री लघुखट्वा इति ॥

आसन्नः त्रि निकटः इत्यमरः
आसवः पुं मद्यविशेषः तत्
पर्य्यायः मैरेयं २ शीधुः ३ ॥
इत्यमरः आधुरिक्षुरसैः पक्वैर
पक्वैरासवो भवेत् मैरेयं धा॥
तकीपुष्प गुडधानाम्ल संहिते
इति माधवेनभेदः कृतस्तथापि
तत्त्वमनादृत्यैरमुक्तं इतिभरतः
मद्यमात्रे इतिराजनिर्घंटः ॥
आसवद्रुः पुं तालवृक्षः इति
राजनिर्घंटः ॥
आसादितः त्रि प्राप्तः लब्धः
इत्यमरः ॥
आसारः पुं धारासंपातः वेग
वृष्टिः प्रसरणं सैन्यानां सर्वे
तो व्याप्तिः इत्यमरः सुहृद्बले
इतिमेदिनी ॥
आसीनः त्रि उपविष्टः वसालोक
इत्यादिभाषा इतिजटाधरः ॥
आसीनप्रचलायितं क्ली उपविष्ट
निद्रावशेनदोलनं ढोला इति
भाषा इतिराजवल्लभः ॥
आसुतिः पुं मद्यसंधाने मद
चोयान इति भाषा इतिहेम
चंद्रः ॥
आसुतीवलः पुं यज्वा शौंडिकः

इति हेमचंद्रः ॥
आसुरः पुं आसुरः इति ॥
सिद्धांतकौमुद्यां मुण्डादिवृत्तिः
ब्राह्माद्यष्टधाविवाहांतर्गतवि
वाह विशेषः आसुरो द्रविणादाना
त् इति याज्ञवल्क्यः ज्ञातिभ्यो द्रवि
णं दत्त्वा कन्यायै चैव शक्तितः कन्या
प्रदानं स्वाच्छंद्यादासुरो धर्म उच्य
ते इतिमनुः ॥
आसुरं क्ली विड्लवणं इति
राजनिर्घंटः असुरस्यभावःअसुर
संबंधीयं त्रि इतिव्याकरणं ॥
आसुरी स्त्री राजिका राइसर्षी
इतिभाषा इतिराजनिर्घंटः
त्रिविधचिकित्सान्तर्गतचिकित्सा
विशेषः साच छेदभेदाद्यात्मि॥
का इति वैद्यकं शब्दचंद्रिका च
आसेचनः त्रि यस्य दर्शने तृप्ति
रेतानजायते सः तत्पर्य्यायः
अतृप्तिकृत् २ इतिहारावली
आसेचनकः त्रि असेचनकः आ
सेचनः इत्यमरटीकायां राय
मुकुटः ॥
आस्कंदनं त्रि तिरस्कारः रणः
शोषणं इतिमेदिनी ॥
आस्कंदितं क्ली अश्वगतिविशे(षः)
सचसमप्लुतिः ॥इत्यमरः ॥

आस्कंदितकं क्ली आस्कंदितं
अश्वानांपंचम गतिः तत्पर्य्यायः
धौरितं २ उपकंठं ३ ॥इति॥
हेमचंद्रः ॥
आस्तरः पुं करिकम्बले इति
हेमचंद्रः वस्त्राद्यास्तरणे ॥
आस्तरणं क्ली हस्तिपृष्ठस्थितचित्र
कम्बलं झुल इतिभाषा तत्
पर्य्यायः प्रवेणी २ वर्णः ३ परि
स्तोमः ४ कुथा ५ कुथः ६ इत्यमरः
प्रवेणिः ७ परिस्तोमः ८ कुथं ९
इत्यमरटीका ॥
आस्तिकः पुं मुनिविशेषः सतु
जरत्कारुमुनिपुत्रः तत्पिता
गर्भस्थे तं ज्ञात्वास्तीत्युक्त्वा गत
इत्यस्मादास्तिकः इति महा
भारतं ॥
आस्तिकः त्रि नास्तिकभिन्नः ईश्व
रोऽस्तीतिवादी वेदप्रामाण्य
वादी तत्पर्य्यायः श्रद्धालुः २
आस्तिः ३ इतिहेमचंद्रः ॥
आस्तिकार्थदः पुं जनमेजयो
राजा इति शब्दरत्नावली ॥
आस्तीकः पुं आस्तिकमुनिः इति
त्रिकांडशेषः ॥
आस्तीकजननी स्त्री आस्तिमाता
मनसादेवी इति शब्दरत्नावली ॥

आस्था स्त्री यत्नः आलम्बनं आ
आस्थाने अपेक्षा इति मेदिनी
कारहे हेमचंद्रो ॥
आस्थानं क्ली सभा इत्यमरः ॥
यत्नः इत्यजयः ॥
आस्थानी स्त्री सभ इत्यमरः ॥
आस्पदं क्ली प्रतिष्टा कर्म इत्य
मरः प्रभुत्वे इतिधरणी स्थाने
इतिहेमचंद्रः ॥
आस्पंदनं क्ली स्पंदने कंपने
आस्फालः पुं हस्तिकर्णास्फा
लिने इतिरकाण माडा इति भाषा
तत्पर्य्यायः कलम्कला ॥ इति
हारावली त्रिकांडशेषो ॥
आस्फालनं क्ली आटोपः प्रागल्भ्यं
आस्फजित् पुं सुक्राचार्यः इति
त्रिकांडशेषः ॥
आस्फोटः पुं आस्फोतवृक्षः
आकंद इति भाषा इतिशब्द॥
रत्नावली भूरादेवास्फादिशब्दः
इतिश्रीभागवतं ॥ (स्त:
आस्फोटकः पुं पर्वतजपीलुवृ
आकरोट इति भाषा इति शब्द
माला ॥
आस्फोटनं क्ली विकाशः मर्दने
इति धरणी बाहाद्दिशब्दः ताल
ठोका इत्यादिभाषा ॥

आस्फोटनी स्त्री वेधनिका तुरपन
भ्रमर इत्यादिभाषा इत्यमरः ॥
आस्फोटा स्त्री नवमल्लीवनम
ल्ली इतिशब्दरत्नावली
आस्फोतः पुं अर्कवृक्षः कोवि
दारकवृक्षः इतिमेदिनी भूप
लाशवृक्षः इति शब्दचंद्रिका
आस्फोतकः पुं अर्कवृक्षः इति
राजनिर्घंटः ॥
आस्फोता स्त्री अपराजिताथन
मल्लिका इतिमेदिनी सारिवा
वृक्षः इतिराजनिर्घंटः मल
विशेषः स्यायरमालीतिख्याता
अस्यागुणा कुष्टविषरोगनाशित्वं
इतिराजवल्लभः ॥
आस्यं क्ली मुखं मुखमध्ये मुख
भेवत्रि इतिमेदिनी ॥
आस्यपत्रं क्ली पद्मं इतिशब्द॥
चंद्रिका ॥
आस्यलांगलः पुं शूकरः इति
हेमचंद्रः
आस्यलोम क्ली श्मश्रु इतिहेम
चंद्रः ॥
आस्या स्त्री स्थितिः इत्यमरो
मेदिनी ॥
आस्यासवः पुं लाला मुखलाल
इत्यादिभाषा हेमचंद्रः ॥

आस्वपः पुं मूलानक्षत्रे इति
हेमचंद्रः ॥
आस्रवः पुं क्लेशः कष्ट इत्य
मरः ॥
आहव तेयः नियोगः इति
मेदिनी हच्छसंभावने इति
शब्दरत्नावली ॥ (षः
आहकज्वरः पुं नासारोगविशे
नासाज्वर इति ख्यातः तस्य
लक्षणं तनुनारकशेखनयुक्तो
पायुत्तोतरे गात्रे मूलज्वरकरः
श्लेष्मणाह्याहकः इति वै
द्यकं ॥
आहतः त्रि गुणितः ताडितः
इति मेदिनी ज्ञातः मिथ्याक्तः
इत्यजयः ॥
आहतं क्ली पुरातनवस्त्रं नूतन
वस्त्रं इति मेदिनी मृषार्थक॥
वाक्यं इत्यमरः ॥
आहतः पुं आनकः ढक्का इति
मेदिनी ॥
आहतलक्षणः त्रि गुणैःप्रतीतः
गुणेनख्यातः तत्पर्य्यायः कृत
लक्षणः २ इत्यमरः ॥
आहरः पुं उच्छासः अंतर्मुख
श्वासः इतिहेमचंद्रः ॥
आहरणं क्ली इच्छायानयने ॥

आहरः पुं यज्ञं यज्ञः इति
शब्दरत्नावली ॥
आहवनीयः पुं यज्ञाग्निविशेषः
इत्यमरः गार्हपत्या डहृत्य ॥
होमार्थं यः स ह्रियते सः इति
भरतः ॥
आहारः पुं द्रव्यगलाधःकरणं
तत्पर्य्यायः जग्धिः २ भोजनं ३
जेमनं ४ लेपः ५ निघसः ६ न्यादः
७ इत्यमरः जमनं ८ विघसः ९
इति तट्टीका अत्यवसानं १०
भक्षणं ११ अशनं १२ इतिरत्न
माला अभ्यवहारः १३ खदनं १४
निगरः १५ इति राजनिर्घंटः॥
अस्य गुणाः सद्यस्तृप्तिजनकत्वं
बलकारित्वं देहधारत्वंच इति
राजवल्लभः सत्रिविधः सात्विकः१
राजसिकः २ तामसिकः ३ सात्वि
काहारो यथा आयुःसत्वबलारोग्य
सुखप्रीतिविवर्द्धनाः रस्याःस्निग्धाः
स्थिराहृद्या आहाराःसात्विकप्रियाः
राजसिकाहारो यथा कट्वम्ल
लवणात्युष्णतीक्ष्णारूक्षविदाहिनःआ
हाराराजसस्येष्टा दुःखशोकामय
प्रदाः तामसिका हारो यथा ॥
यातयामंगतरसंपूतिपर्य्युषितंच
यत् उच्छिष्टमपि चामध्यंभोजनं॥

तामसस्त्रिविधं इतिश्रीभगवद्गीता
आहरणं इतिमेदिनी ॥
आहारसंभवः पुं शरीरस्थरसः ॥
धातुः इतिहेमचंद्रः ॥
आहार्य्य त्रि आगंतुकं इति
त्रिकांडशेषः आहरणीयं ॥
आहार्य्यः पुं नाट्यांगो व्यंजक।
विशेषः सतभूषादि नारचितः
इतिहेमचंद्रः ॥
आहार्य्यशोभा स्त्री कृत्रिमशोभा
चित्रभूषादिनाकृतद्युतिः इति
जटाधरः ॥
आहावः पुं कूपसमीपे पश्वादि
जलपानार्थकृतस्वल्पजलाशयः
चौवाच्छा इतिभाषा इत्यमरः ॥
युद्धं आह्वाने इतिधरणिः ॥
आह्निकः पुं पाणिनिसुनिः इति
त्रिकांडशेषः केतुग्रहः इति॥
हेमचंद्रः ॥
आहितः त्रि न्यस्तः अर्पितः
स्थापितः इतिहलायुधः ॥
आहितलक्षणः त्रि आहितल
गुणादिद्वाराख्यातः इत्यमर
टीकायांरमानाथः
आहिताग्निः पुं साग्निकः अग्नि
होत्रि इति स्मृतिः ॥
आहितुंडिकः पुं व्यालग्राही

सापुडिया इतिभाषा इत्यमरः ॥
शब्दरत्नावलीच ॥
आहुतं क्ली गृहस्थानांपंचमहा
यज्ञांतर्गत यज्ञ विशेषः सत
नृयज्ञः इति जटाधरः ॥
आहुतिः स्त्री देवोद्देशे मंत्रो
च्चारणपूर्वकोमोहविनिक्षेपः तत्
पर्य्यायः देवयज्ञः २ होमः ३
होत्रं ४ वषट्कारः ५ इतिहेम
चंद्रः ॥
आहुल्यं क्ली क्षुपविशेषः तर
वट इतिकाश्मीरादौख्यातः तत्
पर्य्यायः हुलराख्यं २ तगरं ३
तरवटं ४ पिंडीफलं ५ तपुष्पं ६
पीतपुष्पं ७ कांचनपुष्पकं ८ स्वल्प
मांगल्यकं ९ शरत्पुष्पं १० तस्य
गुणाः तिक्तत्वं शीतलत्वं वक्त्र
हितत्वं पित्त दाह मुखरोग कुष्ठ
कंडूतिजंतु मूल व्रण नाशित्वंच
इतिराजनिर्घंटः ॥
आहूतं त्रि कृताह्वाने इति॥
आहूतिः स्त्रि आह्वाने इति
शब्दरत्नावली
आहेयं त्रि अहिसंबंधि तद्विष
वल्मीकादि इत्यमरः
आहो व्य विकल्पः इत्यमरः
प्रश्नः विचारः इतिमेदिनीकर

हेमचंद्रौ ॥
आहोपुरुषिका स्त्री दर्पाद्यात्मनि
संभावना सा इत्यमरः अपि ॥
कार्य्यवचनेन शक्तेरभिख्याता
विष्करणं आत्मविषयकाप्यसि
द्धि जननशक्त्या विष्करणं इतिभरतः
आहोस्वित व्य आहो विकल्पः
इत्यमरटीका ॥
आह्नः पुं दिनसमूहः इति
व्याकरणं ॥
आह्निकः त्रि दिननिर्वर्त्यः दिन
साध्यः इतिमेदिनी दिन ॥
संबंधी ॥
आह्निकं क्ली भोजने प्रकरणे
समूहः ग्रस्थभागः नित्यक्रिया
इति मेदिनीकर हेमचंद्रौ
अथ रघुनंदन भट्टाचार्यकृता
ह्निकाचार तत्वोक्तकर्माणि संक्षे
पेण लिख्यते ॥
तत्र प्रथमयामार्द्धकृत्यं ॥ त्रि
ब्राह्ममुहूर्ते जागरित्वा ब्रह्मविष्णु
नवग्रहान् स्मृत्वा गुरु प्रणामकृ
त्वा आत्मानं ब्रह्मत्वेन संभाव्यतद्दि
कर्तव्य धर्मकर्मार्थ चिंतयेत्
ततः शयनादुत्थाय रात्रिवाससा
काष्ठं पृथिवीं नमस्कृत्य दक्षिणचरणं
भूमौविन्यस्यकर्कोटकनागदमयंतीनल

ऋतुपर्णा राजकार्त्तवीर्य्यार्जुनान्
स्मृत्वानेत्रमुखेवशत्वाल्पद्विरावामेत्
ततः नैर्ऋत्यादक्षिणस्यावादिशिमूत्र
पुरीषोत्सर्गं जलमृत्तिकाशौचंच
कृत्वाद्विरावम्य हरिस्मृत्वादिवासूर्य्य
रश्मौचंद्रं तारांवा तदसंभवे अ ॥
ग्निपश्येत् ॥
ततोदंतधावनं दंतकाष्ठाभावेनि
षिद्ध दिनेच द्वादश गंडूष जलैः
पंचैर्वीमुखे शोधयित्वा द्विरावामेत्
ततः प्रातः स्नानं तिलकं संध्यातर्पणंच
कृत्वासूर्य्यादयपर्य्यंतंगायत्रीजपेत्
स्नानाशक्तौआर्द्रवस्त्रेण गात्र
मार्जनं मंत्रस्नानंच कृत्वा संध्योपा
सनं कुर्य्यात्
ततआदर्शादि दर्शनं दधिदूर्वादि
मंगलद्रव्य स्पर्शनंच कुर्य्यात् इति
अथद्वितीय यामार्द्ध कृत्यं ॥
वेदविद्याद्यभ्यासः समित्पुष्पा
द्या हरणंच ॥
अथतृतीययामार्द्धकृत्यं ॥
गुरुदेवधार्म्मिकोपासनं कुटुंब
भरणार्थमीश्वरोपासनादिच ॥
अथ चतुर्थयामार्द्ध कृत्यं
मध्याह्नस्नानं तत्र परख्यातोदके
चेततदा समयंचत्रिनवामृत्पिंडान्
तीरे क्षिप्त्वानाभिमात्रोदकेकुशहस्तः



सशिरस्कमज्जनं कृत्वा द्विराचम्य सं
कल्प्य यथाविधि त्रिर्निमज्जेत् ॥
ततः स्नानवस्त्रपाणिव्यतिरेकेणां
गमार्जनं तिलकं तर्पणं च कुर्यात्
ततस्त्वष्टममुहूर्त्ते मध्याह्नसंध्यास
माध्याह्नस्य यज्ञं विधाय देवपूजनं हे
त्वापादोदकं नैवेद्यं च यथाकाले उ
प भुंजीत ॥
अथ पंचमयामार्द्ध कृत्यं ॥
वलिवैश्वदेव कर्म्मणी काम्यवलि
वामदेव्यगानं गाना शक्तौ तस्य त्रिः
पाठः पार्वण श्राद्धादि दिने पार्वण
श्राद्धानंतरं वलि वैश्वदेवकर्म्मणी
कर्त्तव्ये ॥ वलिकर्म्मानंतरं
मतिथिलाभार्थं मुहूर्त्तं ॥
गोदोहनकालं वा अभोजनेन
प्रतीक्षेत तल्लाभे मिष्टान्नादिकं दत्वा
तदनु व्रजेत् तदानीमतिथ्यलाभे
नित्यश्राद्धांतरमतिथीन् भोजयेत्
भोजनासामर्थ्ये भिक्षां दद्यात् अ
तिथ्यलाभे ब्राह्मणाय दानेन तदसंभ
वे अग्नौ जले वा किंचिदन्नं क्षिपेत्
ततो नित्यश्राद्धे वामदेव्यगानं ॥
तदशक्तौ ऋक् ऋक् ऋक् त्रयं पठेत्
नित्यश्राद्धकरणासामर्थ्ये वलि
तर्पणाभ्यां पितृयज्ञसिद्धिः ॥
ततो गोग्रासदानं गोनमस्कारं च

कुर्यात् ॥
ततो यथाविधि भोजनं विष्णुपादो
दकादिकं पूर्वमगृहीतं चेत् इदानीं
गृह्णीयात् ॥
ततः स्थानांतरं न गत्वा मृद्भिर्धर्षणे
मुखहस्तौ प्रोथयित्वा तृणादिना
दंतलग्न रसद्द्रव्यमपनीय जलगं
डूषैर्मुखाभ्यंतरं संशोध्य पाणि
पादौ प्रक्षालयेत् ॥
ततआसनस्य एव भूमौ पादौ संस्थाप्य
द्विराचम्य मुखं तुलसीपत्रादिनासं
प्रोक्ष्य दक्षिणपादांगुष्ठे दक्षिणह
स्तेन मंत्रेण जलं दद्यात्
ततो महीमार्जनाभावेऽशुचित्वा
दविलंवमेव भोजनपात्रमुद्धृत्य
उच्छिष्टमपनीय तत्स्थाने गोमयो
दकाभ्यां सिंचेत् ॥
ततः स्वस्थ आसने उपविश्य इष्टदेवता
नामस्मृत्वा अन्नजीर्णतार्थमंत्रपाठपूर्वकं
वामहस्तेनोदरं परिमृज्य पादशत
व्रजनानंतरं वामपार्श्वेन किंचित्
कालं शाययित्वा तांबूलादि मुखवासन
द्रव्यं भोक्तव्यमिति ॥
अथ षष्ट सप्तम यामार्द्धकृत्यं
इतिहासपुराणादि श्रवणं ॥
अथाष्टम यामार्द्ध कृत्यं ॥
लौकिक चिंताकरणं सायंसंध्यो

पासनं इष्टदेवतास्मरणादिकं च
कुर्यात् ॥
अथ रात्रि कृत्यं ॥
संध्यानंतरं मिष्टदेवतामंत्रजप
त्रिकालपाठस्तव नारायण
स्मरणानि कुर्यात्
ततोऽन्नादिपाके जाते पूर्ववद्वलि
वैश्वदेवकर्म्मणी कृत्वा अतिथिला
भेऽन्नादिकं तस्मै दत्वा अवश्यभर
णीयैः सह सार्द्धप्रहराभ्यंतरेऽन्नं ति
तत्र भुंजीत अन्नभोजनाभावे
तांबूलादिकं भोक्तव्यं प्रथम
यामाभ्यंतरे विद्याभ्यासं कुर्या
त् ततः शयने शुचिदेशे
खट्वोपरि शय्यां कृत्वा
शिरोदेशे पूर्णकुंभं ॥
निधाय रात्रिवासः परिधाय प्र
क्षालितपाणिपादो द्विराचांतः
पूर्वशिरा दक्षिणशिरा वा यम
नामस्मृत्वा यामद्वयाभ्यं
तरं शयीत
अथ दारीय गमनं ॥
ऋतौ निषिद्धेतरदिने स्त्रीसंभोगं
कृत्वा तौ दक्षिणपार्श्वेन स्वापये
त् ततः अविलंबेन मूत्रपुरीषोत्
सर्गवत् मृज्जलाभ्यां हस्तौ पादौ च
प्रक्षाल्य द्विराचम्य स्वापात् अ
नभिगमने न लिंगप्रक्षालनमाच

मनद्वयमात्रं च कुर्यात् स्त्रियास्तु
ऋतौ भर्त्तृगमनेऽपि लेपादिक्षालना
नंतरमाचमनमात्रं न स्नानं ॥
क्षालनादेः पूर्वं मूत्रपुरीषोत्
सर्गो न कुर्यात् संभोगानंतरं त
स्यां रात्रौ एकशय्यायां न शयीया
तां ऋतावपि गर्भवत्यपि का
मुकी मुपेयात् ॥
ऋतावभिगम्य प्रातर्नैमित्तिक
मंगस्पृश्य स्नानं कुर्यात् ॥
ऋते गमने पुत्रोत्पत्तिपर्य्यंत
मावश्यकं इत्याह्निकाचारतत्त्वो
क्त कर्म्मसमाप्तं
आह्लादः पुं आनंदः हर्षः
आह्लादितः त्रि आनंदितः हृ
ष्टः आह्वयः पुं नाम इत्यमरः
आह्वा स्त्री नाम संज्ञा इत्य
मरः ॥
आह्वाने क्ली आवाहने डाका
इति भाषा ॥
तत्पर्य्यायः हूतिः ॥
२ आकारणं ३ इत्यमरः नाम
इति शब्दरत्नावली ॥
आक्षपाटिकः पुं अक्षदर्शकः
धर्माध्यक्षः इति जटाधरः
आक्षपादः पुं नैयायिकः ॥
इति भूरिप्रयोगः
आहारणं स्त्री क्ली मैथुनं प्रति

आक्रोशः इत्यमरः परस्त्री ॥
निमित्ते पुंसः परपुरुषनिमित्ते
स्त्रियावा दूषणे यथा कुलागम्या
गमनस्त्वयास्मानीतं गच्छ इतिभरतः
छेनालि अपवाद इतिभाषा ॥
आक्षारिते त्रि परस्त्रियां पर ॥
पुरुषेवा मैथुनं प्रति मिथ्याद्
षिते अपवादयस्ते इत्यमरः ॥
आक्षिकः पुं आक्षकवृक्षः आ
वेरगाद इति भाषा इति रत्न
माला ॥
आक्षीवः पुं अक्षीवः शोभ
ञ्जन वृक्षः इतिरायमुकुटः
आक्षेपः पुं अपवादः । इत्य
मरः भर्त्सने आकर्षणे ॥
काव्यालंकारः इति मेदिनी ॥
आक्षेपकः पुं निंदाकरः व्याधः
इतिमेदिनी वातरोग ॥
विशेषः तस्य कारणं लक्षणं
यदातुधमनीः सर्वाः कुपितोऽभ्ये
तिमारुतः तदाक्षिपत्याशुमुहु
र्मुहुर्देहं मुहुश्चरः मुहुर्मुहुरत्न
दाक्षेपादाक्षेपक इति स्मृतः
इतिनिदाने ॥

आक्षोटः पुं अक्षोटवृक्षः पर्वत
जपीलुवृक्षः इतिशब्दरत्नावली
आक्षोडः पुं आक्षोटवृक्षः ॥

इत्यमरटीकायां भरतः
आक्षोदनं क्ली मृगया इत्यमरः

—

इ

इ इकारः तृतीय स्वरवर्णः अस्यो
च्चारणस्थानं तालु सचह्रस्वोदीर्घः
प्लुतश्चभवति इकारं परमानंद
सुगंधकुसुमच्छविं हरिब्रह्ममयं
वर्णं सदारुद्रयुतं प्रिये सदा
शक्तिमयंदेवि गुरुब्रह्ममयंतथा
सदाशिवमयंवर्णं परब्रह्मसम
न्वितं हरिब्रह्मात्मकं वर्णं गुणत्रय
समन्वितं इकारं परमेशानि स्वयं
कुंडली मूर्तिमान् इतिकामधेनुतंत्रे
इ ० गतौ इतिकविकल्पद्रुमः
इ उल अधिपूर्वोऽध्ययने इति
कविकल्पद्रुमः ॥
इ ल गतौ इति कविकल्पद्रुमः
अधिपूर्वः स्मृतौ अयमेववोप
देवन इकरूपेण गृहीतः
इ व्य भेदः क्रोधोक्तिः अपा
करणे अनुकंपा इतिमेदिनी॥
खेदः इतिहेमचंद्रः ॥
इः [स]व्य कोपः संतापः दुःख
भावना इतिशब्दरत्नावली ॥
इः पुं कामदेवः इतिएकाक्षरको
षमहलायुधौ ॥

इक्कट पुं तृण विशेषः उत् ॥
पर्य्यायः वहुमूलः २ इतित्रिकांड
शेषः कोशगाः ३ इत्कटः ४
इतिहारावली ॥
इख ० गतौ इति कविकल्पद्रुमः
इख इ गतौ इतिकविकल्पद्रुमः
इग इ गतौ इतिकविकल्पद्रुमः
इंग त्रि अद्भुते जंगमे इति
मेदिनी करहेमचंद्रौ ॥
इंगः पुं इंगिते ज्ञाने इति ॥
मेदिनीकर हेमचंद्रौ ॥ (ष्टा
इंगितं क्ली अभिप्रायानुरूपचे
ष्टाविष्करणे द्वार संकेत इत्यादि॥
भाषातत्पर्य्यायः आकारः २
इंगं ३ इत्यमरः गमने ॥
चेष्टा इतिहेमचंद्रः ॥
इंगुदः पुं इंगुदीवृक्षः इत्यमर
भरतौ
इंगुदी स्त्री वृक्षविशेषः इंगोट॥
इति भाषा जीयापुता इतिव
ंगदेशीयाः प्रमादेनवदंतितस्य
त पुत्रजीव इत्यादीनि नामानि
प्रसिद्धानि तत्पर्य्यायः ताप॥
सतरुः २ इत्यमरः हिंगुपत्रः
३ विषकंटः ४ अनिलांतकः ५
गौरत्वक ६ तनुपत्रः ७ मूलारिः ८
तापसद्रुमः ९ तीक्ष्णकंटः १० तैल

फलः ११ पूतिगंधः १२ विगंधकः
१३ कोष्टुफफलः १४ अस्यागुणाः
मदगंधित्वं कटुत्वं उष्णत्वं के
शित्वं लघुत्वं रसायनत्वं जंतु
वातामय कफ व्रणनाशित्वंच इति
राजनिर्घंटः ज्योतिष्मतीवृक्षः
नयाफट्की इति भाषा इति
रत्नमाला ॥
इंगलः पुं स्त्री इंगुदी वृक्षः इति
भरतादि रूपकोषश्च ॥
इकुकः पुं वृक्ष विशेषः टावा
नेबु इतिख्यातः इतिशब्दचंद्रिका
इच्छा स्त्री मनोधर्म्म विशेषः तत्
पर्य्यायः आकांक्षा २ वाञ्छा ३
दोहदः ४ स्पृहा ५ ईहा ६ तृट् ७
लिप्सा ८ मनोरथः ९ कामः १०
अभिलाषः ११ तर्षः १२ इत्य ॥
मरः न्यायमते अस्याः कारणं
निर्दुःखत्वे सुखेच्छातज्ज्ञानादे
वजायते इच्छात तदुपायेस्या
दिष्टोपायत्वधीर्यदि चिकीर्षाकृ
तिसाध्यत्वप्रकारेच्छातयाभवेत्
तद्धेतुः कृतिसाध्येष्टसाधनत्वमति
र्भवेत् अस्याः प्रति वंधः वल
वद्दिष्ट हेतुत्व मतिः स्यात् प्रति
वंधिका इतिभाषापरिच्छेदः ॥
इच्छावती स्त्री धनादीच्छायुक्ता स्त्री

तत्पर्यायः कारुकार २ । इत्य
मरः ॥
इक्षावसुः पुं कावेरः इतिजटा
धरः ॥
इकुः त्रि इक्षाविशिष्टः आकां
क्षायुक्तः इति व्याकरणं ॥
इजलः पुं हिज्जलवृक्षः हिज्जल
गाछ इति भाषा तत्पर्यायः ॥
निचुलः २ अंबुजः ३ इत्यमरः
इज्यः पुं बृहस्पति इतिज्योति
षे शब्दरत्नावलीच ॥
इज्यः त्रि गुरुः इति मेदिनी ॥
इज्या स्त्री दाने यज्ञः पूजा
संगमः इतिमेदिनी गौः ॥
इतिराजनिर्घंटः कुट्टनी इति
त्रिकांडशेषः (स्त्री
इज्याशीलः पुं पुनःपुनर्यज्ञक
तत्पर्यायः यायजूक २ इत्यमरः
इल्लाकः पुं मत्स्यविशेषः ।
इचला मोचाचिंडि इतिभाषा
इति त्रिकांडशेषः ॥
इठ० गत्यां इतिकविकल्पद्रुमः
इडचरः पुं षंडः षांड इति ॥
भाषा इत्यमरः ॥
इडा स्त्री बुधग्रहभार्यासा इक्ष्वाकु
राजकन्यागौः वचनं पृथ्वी
इतिमेदिनी स्वर्गः शरीरस्य ॥

दक्षिणभागस्थानाडी इतिहेम
चंद्रः ॥
इडाविका स्त्री वरटा बोलता
इतिभाषा इति शब्दचंद्रिका ॥
इडिका स्त्री पृथ्वी इतिशब्दरत्ना
वली ॥
इडिक्कः पुं वनछागलः इतिहेम
चंद्रः ॥
इडुरः पुं इडचरः वृषः इत्य
मरटीकायांस्वामी ॥
इतः त्रि गतः स्मृतः इति ॥
मेदिनी ॥
इतः स व्य नियमः पंचम्यर्थः
विभागः इति विश्वः ॥
इतरः त्रि अन्यः नीचः इत्य
मरः ॥
इतरविशेषः पुं अन्यप्रभेदः
इतरेतरं त्रि अन्याऽन्य ॥
परस्परं इति हेमचंद्रः ॥
इतरेद्युः स व्य इतरस्मिन्नहनि
अन्यादिने इत्यमरः ॥
इतस्ततः व्य अत्रतत्र पखाने
सेखाने इति भाषा ॥
इति व्य हेतुः प्रकरणं प्र ॥
काशः आदिः समाप्तिः इत्य
मरः निर्दर्शं प्रकारः अनु
कर्षः परकतिः इतिमेदिनी

इतिकथे त्रि अश्रद्धेये ॥ नष्टे ॥
इतिमेदिनी ॥
इतिकथा स्त्री अर्थशून्यवाक्यं
इतिमेदिनी ॥
इतिह व्य पारंपर्य्योपदेशः ॥
तत्पर्यायः ऐतिह्यं २ इत्यमरः
इतिहासः पुं पूर्ववृत्तांतः प्राचीन
कथा तत्पर्याया पुरावृत्तः २ ॥
इत्यमरः व्यासादि प्रणीत भार
तादि ग्रंथः इतिभरतः ॥ (उ
इत्कटः पुं वृक्षविशेषः उक
इति भाषा तत्पर्यायः वहुमूलः
२ वाठादीर्घः ३ खरछदः ४ इति
रत्नमाला ॥
इत्किला स्त्री रोचनाख्यगंधद्रव्ये
इति शब्दचंद्रिका ॥
इत्थं व्य इदंप्रकारं एइप्राकार
इति भाषा इतिवोपदेवः ॥
इत्यः त्रि गम्यः इतिव्याकरणं
इत्वरः त्रि क्रूरकर्मा पथिकः
दुर्विधः नीचः इतिहेमचंद्रः ॥
इत्वरी स्त्री असती इत्यमरो ॥
मेदिनीच अभिसारिका इति
हेमचंद्रः ॥
इदइ परमैश्वर्य्ये इति कवि ॥
कल्पद्रुमः ॥
इदं म त्रि परोक्षत्वाभावकसर्वना (म


एइ इति भाषा इतिव्याकरणं
इदंकार्य्या स्त्री दुरालभावृक्षः
इतिशब्दचंद्रिका (ति
इदानीं स व्य अस्मिन्काले संप्र
इत्यमरः वाक्यभूषणं इति
शब्दरत्नावली ॥
इदानींतनं त्रि इदानींभवं ॥
संप्रति जाते आधुनिके इति
व्याकरणं ॥
इदावत्सरः पुं संवत्सरादि
पंचांतर्गतवत्सरविशेषः अस्मिन्
वत्सरे अन्नवस्त्रदाने महाफलं
इति विष्णुधर्मोत्तरे ॥
इद्धं क्ली आतपः दीप्तिः इति
मेदिनी आश्चर्यं इति जटा
धरः ॥
इद्धः त्रि निर्मलः इतिशब्दरत्ना
वली
इध्मं क्ली अग्निसंदीपनकाष्ठं ।
ज्वालानिकाठ इतिभाषा इत्यमरः
इनः पुं सूर्यः प्रभुः नृपभेदः
इत्युणादिकोषः ॥
इनानी पुं वटपत्री वृक्षः इति
राजनिर्घंटः ॥
इन्दम्बरं क्ली इंदीवरं नीलोत
पलं इतिशब्दमाला ॥
इंदिन्दिरः पुं भ्रमर इतिहेम ॥

चंद्रः ॥
इंदिरा स्त्री लक्ष्मीः इतिजटाधरः
त्रिकांडशेषश्च ॥
इंदिरामंदिरं क्ली विस्नुः इति
राजवल्लभः ॥
इंदिरालयं क्ली पद्मं इतिशब्द
रत्नावली क्लीवत्वमभिधानात्
इंदिरावरं क्ली नीलोत्पलं ॥
इतिशब्दरत्नावली ॥
इंदिवरं क्ली नीलोत्पलं इति
शब्दमाला ॥
इंदीवरं क्ली नीलपद्मं तत्॥
पर्य्यायः नीलांबुजन्म २ इत्य
मरः कुवलयं ३ नीलाब्जं ४
नीलोत्पलं ५ इतिरत्नमाला॥
इंदिवरिणी स्त्री उत्पलिनी ॥
इतिराजनिर्घंटः
इंदीवरी स्त्री शतमूली इति ॥
मेदिनीराजनिर्घंटौ ॥
इंदीवारं क्ली इंदीवरं इत्य
मरटीकायां रायमुकुटः ॥
इंदुः पुं चंद्रः कर्पूरः इत्य॥
मरः ॥
इंदुकः पुं अश्मंतक वृक्षः इति
राजनिर्घंटः ॥
इंदुकमलं क्ली सितोत्पलं इति
राजनिर्घंटः ॥

इंदुकलिका स्त्री केतकी इति
राजनिर्घंटः ॥
इंदुकांतः पुं चंद्रकांतमणिः
इतिराजनिर्घंटः ॥
इंदुकांता स्त्री रात्रिः इतिहेम
चंद्रः ॥
इंदुजनकः पुं समुद्रः इतित्रि
कांडशेषः ॥
इंदुजा स्त्री नर्मदा नदी नर्वदा
इतिख्याता इतिहेमचंद्रः ॥
इंदुपुत्रः पुं बुधग्रहः इतिशब्द
रत्नावली ॥
इंदु पुष्पिका स्त्रीकलिकारीवृक्षः
विषलांगला इति भाषा इति
राजनिर्घंटः ॥
इंदुभृत् पुं शिवः इतिहेम
चंद्रः ॥
इंदुमती स्त्री पूर्णिमा इतिराज
निर्घंटः ॥
इंदुरत्नं क्ली मुक्ता इतिराज
निर्घंटः ॥
इंदुलेखा स्त्री अमृता सोमलता
शशिकला इतिमेदिनी यमा
निका इतिशब्दमाला ॥
इंदुलोहकं क्ली रौप्यं इति
राजनिर्घंटः ॥
इंदुवल्ली स्त्री सोमलता इति

जटाधरः ॥
इंदुव्रतं क्ली चांद्रायणव्रतं इति
त्रिकांडशेषः ॥
इंदूरः पुं मूषिकः इंदुर इति
भाषा इतिजटाधरः ॥
इंद्रः पुं देवराजः सतअदिति
पुत्रः पूर्वदिक पतिश्च तस्य॥
भार्य्या शची पुत्राः जयंतः ऋष
भः २मीढ्वांश्च ३ अस्त्रं वज्रं वाहने
ऐरावतः पुरी अमरावती वनं
नंदनं तत्पर्य्यायः मरुत्वान् २
मघवा ३ विडौजा ४पाकशासनः
५ वृद्धश्रवाः ६ सुनासीरः ७पुरु
हूतः ८ पुरंदरः ९ विस्नुः १०
लेखर्षभः ११ शक्रः १२शतमन्युः
१३ दिवस्पतिः १४ सुत्रामा १५
गोत्रभित् १६ वज्री १७वासवः १८
वृत्रहा: १९ वृषा २० वास्तोष्पतिः
२१ सुरपतिः २२ बलारातिः २३
शचीपतिः २४ जंभभेदी २५हरि
हयः २६ स्वाराट् २७नमुचिसूदनः
२८ संक्रंदनः २९ दुश्च्यवनः ३०
तुराषाट् ३१ मेघवाहनः ३२आ
खंडलः ३३ सहस्राक्षः ३४ऋभुक्षा
३५ इत्यमरः विष्कंभादि ॥
सप्तविंशति योगांतर्गतषड्विं
शयोगः तत्रजातफलंयथा॥

धीरो वलवान् गुणज्ञःमेधाधिकः
श्रीकमलाभ्युपेतःकिलेंद्रयोगो
यदिजन्मकाले महेंद्रतुल्यःपुरुषः
प्रसन्नः इतिकोष्ठीप्रदीपः ॥
अंतरात्मा आदित्य विशेषः
इतिमेदिनी कुटजवृक्षः ॥
रात्रिः इतिधरणी उपद्वीप ॥
विशेषः इतिशब्दमाला परमे
श्वरः इति वेदांतः ॥
इंद्रकं क्ली सभागृहं तत्पर्य्यायः
आस्थानगृहं २ इतिहेमचंद्रः
इंद्रकीलः पुं मंदारपर्वतः ॥
इतिहेमचंद्रः ॥
इंद्रकुंजरः पुं ऐरावतहस्ती ॥
इतिजटाधरः ॥
इंद्रकोषः पुं मंचः खट्वा॥
इति त्रिकांडशेषः तमंगकः
चोकला गौजला इत्यादिख्यातः
इतिहेमचंद्रः निर्यूहोपि ॥
निर्यूहः शेखरेद्वारे निर्यासे नाग
दंतके इतिमहेश्वरः ॥
इंद्रगोपः पुं रक्तवर्णकीटविशेषः
मखमली इति भाषा तत्पर्य्यायः
अग्निरजः २ वैराटः ३ तितिभः
४ अग्निकः ५ इति हेमचंद्रः
शक्रगोपः ६ वर्षाभूः ७ रक्तवर्ण
८ इतिराजनिर्घंटः ॥



इंद्रचंदनं क्ली हरिचंदनं इति॥
राजनिर्घंटः॥
इंद्रचिर्भिटी स्त्री लताविशेषः तत्
पर्य्यायः इंदीवरा २ युग्मफला
३ दीर्घवृंता ४ उन्मादिनी ५ पुष्प
मंजरिका ६ द्रोणी ७ करंभा ८
नलिका ९ अस्या गुणाः कटुत्वं
शीतत्वं पित्त श्लेष्मकासदोषव्रण
कृमि नाशित्वं वस्तिहितकारित्वंच
इतिराजनिर्घंटः॥
इंद्रच्छंदः पु क्ली सहस्रगुच्छहारः
इतिहेमचंद्रः॥
इंद्रजालं क्ली मायाकर्म भोज॥
वाजि भेल्कि इत्यादि भाषा॥
तत्पर्य्यायः कुहकं २ जालं ३ कु
सृतिः ४ युद्धे स्त्रद्रापायविशेषः
इतिहेमचंद्रः॥
इंद्रजालिकः त्रि कुहककारीवा
जिकर इतिभाषा इतिजटाधरः
इंद्रजित् पु रावण पुत्रः तत्
पर्य्यायः मेघनादः २ मंदोदरी
सुतः ३ इतिजटाधरः॥

न
इंद्रजिद्विजयी पु लक्ष्मणः इति
शब्दरत्नावली॥
इंद्रतूलं क्ली आकाशपतिततूलं
आकाश वुडिर सता इति भाषा
तत्पर्य्यायः हंसमूत्रकं २॥
ग्रीष्महासः ३ वंशकफः ४ वात
तूलं ५ मरुद्ध्वजः ६ इति हारा
वली॥
इंद्रतूलकं क्ली इंद्रतूलं इति
त्रिकांडशेषः॥
इंद्रदारुः पु देवदारुवृक्षः
इतिभावप्रकाशः॥
इंद्रद्रुः पु अर्जुनवृक्षः इत्य
मरः कुटजवृक्षः इति राज
निर्घंटः॥
इंद्रद्रुमः पु अर्जुनवृक्षः इति
शब्दरत्नावली
इंद्रनीलः पु मरकतमणिः पान्ना
इतिभाषा इति हेमचंद्रः॥
इंद्रनीलकः पु मरकतमणिः
इति शब्दरत्नावली॥
इंद्रपुष्पा स्त्री लांगलिकीवृक्षः
विषलांगुला इतिख्याता इति
रत्नमाला॥
इंद्रपुष्पिका स्त्री कलिकारी विष
लांगला इतिभाषा इतिराज
निर्घंटः॥
इंद्रप्रस्थः क्ली राजयुधिष्ठिरनिर्मित
नगरं अधुना दिल्ली इतिख्यातं॥
इतिमहाभारते॥

इंद्रप्रहरणं क्ली इंद्रस्यास्त्रंवज्रं
इतिहलायुधः॥
इंद्रभेषजं क्ली शुंठी इतिशब्द
रत्नावली॥
इंद्रमहकामुकः पु कुक्कुरः इति
त्रिकांडशेषः॥
इंद्रयव पु क्ली स्वनामख्याततिक्त
वीजविशेषः तत्पर्य्यायः क
लिंगं २ भद्रयवं ३ इत्यमरः॥
शक्राह्वः ४ शक्रवीजं ५ वत्सकः
वत्सकवीजं ७ भद्रजः ८ कुटजः
९ कुटजवीजं १० कलिंगवीजं ११
अस्य गुणाः कटुत्वं तिक्तत्वं॥
शीतत्वं कफ वात रक्त पित्तहर
त्वं दाहातिसारशमनत्वं ज्वर
दोषशूलमूल नाशित्वंच इति
राजनिर्घंटः
इंद्रलुप्तं क्ली मस्तकोद्भवरोगवि
शेषः टाक इतिभाषा तस्य॥
लक्षणं रोमकूपानुगं पित्तंवा
तेन सह मूर्च्छितं प्रच्यावयति
रोमाणि ततः श्लेष्मासृशोणितः
रुणद्धि रोमकूपांस्तु ततोऽन्येषा
मसंभवः तदिंद्रलुप्तं खालित्यं
रुज्येति च विभाव्यते इति नि
दानं खालित्यं रुज्येति तस्य
पर्य्याय कथने तथाच भोजः त
दिंद्रलुप्तं प्रत्याहुः खल्लीं रुज्यां च
केवन कार्तिकस्त्वाह इंद्रलुप्तं
श्मश्रूणि भवति खालित्यं शिरोरुह
ष्वेव रुज्या सवेदनेति आगमस्तत्र
नास्ति इति तट्टीका॥
इंद्रलुप्तः पु केशनाशकरोगः
तत्पर्य्यायः इंद्रलुप्तकः २ शक्रे
शघ्नः ३ इति राजनिर्घंटः॥
इंद्रलुप्तकं क्ली इंद्रलुप्तरोगः
इतिभूरिप्रयोगो जटाधरहेम
चंद्रौच॥
इंद्रवारुणिका स्त्री इंद्रवारुणीलता
इतिशब्दचंद्रिका॥
इंद्रवारुणी स्त्री लताविशेषः
राखाल ससा इति भाषा तत्
पर्य्यायः विशाला २ इत्यमरः
ऐंद्री ३ चित्रा ४ गवाक्षी ५
गजचिर्भटा ६ मृगेर्वारुः ७ पीट
स्कोकी ८ मृगादनी ९ इति॥
रत्नमाला इंद्रा १० आरुणा ११
गवादनी १२ क्षुद्रसहा १३ इंद्र
चिर्भिटी १४ सूर्य्या १५ विषघ्नी १६
गणकर्णिका १७ अमरा १८ माता
१९ सुकर्णी २० सुफला २१ तारका
२२ वृषभाक्षी २३ पीतपुष्पा २४
इंद्रवल्लरी २५ हेमपुष्पी २६ क्षुद्र
फला २७ वारुणी २८ वालक॥

प्रिया २९ रक्तैर्वारुः ३० विषलता
३१ शाकवल्ली ३२ विषापहा ३३
अमृता ३४ विषवल्ली ३५ अस्या
गुणाः तिक्तत्वं कटुत्वं शीतत्वं
रेचनत्वं गुल्मपित्तोदरश्लेष्म
कृमिकुष्ठज्वरापहत्वंच इति राज
निर्घंटः ॥
इंद्रवृद्धा स्त्री व्रणरोगविशेषः
तस्य लक्षणं पद्मकर्णिकवन्मध्ये
पिडकाभिः समाचितां इंद्रवृद्धां
स्तां विद्याद्वातपित्तोत्थितां भिष
क् इति निदाने ॥
इंद्रवृक्षः पुं देवदारु इति
जटाधरः ॥
इंद्रसावर्णिः पुं चतुर्दशमनुः
अस्मिन् मन्वंतरे वृहद्भानुरवतारः
शुचिरिंद्रः
देवाः अग्निबाहु शुचि शुद्धमाग
धाद्याः सप्तर्षयः उरुगंभीरबुध्या
द्यामनुपुत्रा भविष्यंति इति श्री
भागवते ॥
इंद्रसुतः पुं वालिनामवानरराजः
इति हेमचंद्रः अर्जुनवृक्षः ॥
इति राजनिर्घंटः जयंतः ॥
अर्जुनः ॥
इंद्रसुरसः पुं सिंदुवारवृक्षः ॥
निसिंदा इति ख्यातः इत्यमरः ॥

इंद्रसुरिसः पुं वृक्षविशेषः ।
निसिंदा इति भाषा तत्पर्य्यायः
इंद्राणी २ निर्गुंडी ३ सुरसा ४
इति रत्नमाला इंद्रसुरसः ५ सिं
दुवारः ६ इंद्राणिका ७ इत्यमरः
इंद्रा स्त्री फणिज्झकवृक्षः कार
जामी इति भाषा इति मेदिनी ॥
इंद्रपत्नी शची इति शब्दरत्ना
वली ॥
इंद्राग्निधूमः पुं हिमः इति हारा
वली ॥
इंद्राणिका स्त्री इंद्रसुरिसवृक्षः
इत्यमरः ॥
इंद्राणी स्त्री इंद्रभार्या तत् ॥
पर्य्यायः पुलोमजा २ शची ३
इत्यमरः पौलोमी ४ इति ॥
मेदिनी इंद्रसुरिसवृक्षः स्त्रीणां
करणे इति मेदिनी नील
सिंदुवारवृक्षः स्थूलैला सू
क्ष्मैला इति राजनिर्घंटः अष्ट
मातृकांतर्गतमातृकाविशेषः
इति स्मृतिः ॥
इंद्रानुजः पुं विष्णुः इति हेम
चंद्रः ॥
इंद्रायुधं क्लीं इंद्रधनुः रामधनुक
गेंडी इति भाषा इत्यमरः ॥
इंद्रारिः पुं असुरः इत्यमरः ॥

इंद्रावरजः पुं विष्णुः इत्यमरः ॥
इंद्राशनः पुं संविदावृक्षः सिद्धि
इति भाषा इति शब्दमाला
गुंजा कुंच इति भाषा इति ॥
हारावली
इंद्रियं क्लीं ज्ञानकर्मसाधनं
पर्य्यायः हृषीकं २ विषयि ३
इत्यमरः अक्षं ४ करणं ५ ग्रहणं
६ इति राजनिर्घंटः तत्र तु ॥
ज्ञानेंद्रियाणि पंच यथा कर्णः
त्वक् २ चक्षुः ३ जिह्वा ४ नासिका
५ कर्मेंद्रियाणि पंच यथा वाक्
१ पाणि २ पादः ३ पायुः ४ उपस्थः
५ अंतरिंद्रियाणि चत्वारि मनः १
बुद्धिः २ अहंकारः ३ चित्तं ४
मनस्तावदिंद्रियाणां नियामके
चतुर्दशदेवाः चतुर्दशेंद्रियाणां प
त्वारः तत्र श्रोत्रस्य देवता दिक्
त्वचो वातः चक्षुषः सूर्यः रसना
याः प्रचेताः घ्राणस्याश्विनौ वाचो
वह्निः हस्तस्य इंद्रः पादस्य ॥
विष्णुः पायोर्मित्रः उपस्थस्य प्र
जापतिः मनसश्चंद्रः बुद्धेश्चतु
र्मुखः अहंकारस्य शंकरः चित्त
स्याच्युतः इति वेदांतः न्याय ॥
मते पृथिव्या इंद्रियं घ्राणं जल
स्य जिह्वा तेजसश्चक्षुः वायो ॥

स्त्वक् आकाशस्य कर्णः शुक्रे
वीर्ये इत्यमरः ॥
इंद्रियस्वापः पुं प्रलयः इति
राजनिर्घंटः ॥
इंद्रियार्थः पुं इंद्रियजन्यज्ञान
विषयः यथा रूपं शब्दः गंधः
रसः स्पर्शः तत्पर्य्यायः ।
विषयः २ गोचरः ३ इत्यमरः
इंद्रियायतनं क्लीं शरीरं इति
हेमचंद्रः ॥
इंद्रेज्यः पुं वृहस्पतिः इति
शब्दरत्नावली ॥
इंध ई ध उ जि मुनौ इति कवि
कल्पद्रुमः ॥ (ष्ठादि
इंधनं क्लीं अग्निसंदीपनतृणका
तत्पर्य्यायः इध्मं २ एधः ३
समित् ४ एधं ५ इत्यमरः ॥
इल्वकाः स्त्री इल्वलाः मृगशिरो
नक्षत्रोपरिस्थितपंचताराः इत्य
मरटीकायां स्वामी ॥
इभः पुं स्त्री हस्ती उत्तरपदे ॥
श्रेष्ठवाचकः इत्यमरः ॥
इभकणा स्त्री गजपिप्पली इति
रत्नमाला ॥
इभदंता स्त्री नागदंतीवृक्षः इति
रत्नमाला ॥
इभनिमीलिका स्त्री वैदग्धी ॥



भेदाः इतित्रिकाण्डशेषः ॥
इभपालकः पुं हस्तिपकः
माहुत इति भाषा इतिहेम ॥
चंद्रः ॥
इभमाचलः पुं सिंहः ॥ इति
भूरिप्रयोगः ॥
इभषा स्त्री स्वर्णक्षीरीवृक्षः इति
रत्नमाला ॥
इभाख्यः पुं नागकेशरवृक्षः ॥
इतित्रिकाण्डशेषः ॥
इभोषणा स्त्री इभकणा गज
पिप्पली इति शब्दचन्द्रिका
इभ्यः त्रि धनवान् इत्यमरः ॥
इभ्यास्त्री हस्तिनी शल्लकी ॥
इतिमेदिनी ॥
इयं स्त्री इदंशब्दस्यस्त्रीलिंगे ॥
प्रथमायां रूपे य इस्त्री इतिभाषा
इतिव्याकरणं ॥
इयत् त्रि कियत् संख्याबोधकं
यतो इति भाषा इति व्याकरणं
इयत्ता स्त्री इयतो भावः सीमा
परिमाणं संख्या इत्यादि ॥
इरणं त्रि इरणं शून्यं ऊषर
भूमिः इत्यमरटीकायां रमानाथः
इरम्मदः पुं वज्राग्निः तत्पर्यायः
मेघज्योतिः २ इत्यमरः ॥ अ
न्योन्यसंघट्टनेन मेघाग्निःसूतय

ज्योतिर्हस्तोयंपततिसः मेघे
स्वपलक्षणं वातजाग्निरपि इति
भरतः ॥
इरा स्त्री भूमिः वाक्यं मद्यं ॥
जलं इत्यमरः सरस्वती इति
शब्दरत्नावली ॥
इरावरं क्ली करका हरिशल
इति त्रिकाण्डशेषः ॥
जलचरे भूचरेव त्रि ॥
इराजः पुं कंदर्पः इति हला
युधः ॥
इरावती स्त्री वटपत्रीवृक्षः पा
षाणभेदी विशेषः इतिराज
निर्घंटः ॥
हरिणं क्ली शून्यं ऊषरभूमिः
इत्यजयः ॥
इरिवेल्लिका स्त्री मस्तकोद्भवव्रण
जन्यपीडाविशेषः तस्यलक्षणं
पिडकामसृमांसगांयाहतामुग्ररु
जाज्वरां सर्वात्मिकां सर्वलिंगां
जानीयादिरिवेल्लिकां इति नि
दाने ॥
इरिमेदः पुं अरिमेदः विट्
खदिरः इति शब्दरत्नावली ॥
राजनिर्घंटश्च
इरेशः पुं विष्णुः इतिशब्दरत्ना
वली ॥ राजा वागीशः वरुणः

इर्वारुः पुं स्त्री कर्कटीकाकुड
इति भाषा इत्यमरः अस्य ॥
गुणाः स्वादुत्वं गुरुत्वं अजीर्ण
कारित्वं शीतलत्वंच ततपक्व
फल गुणाः दाहकर्दितसाक्रो
तिनाशित्वं इति राजवल्लभः ॥
इर्वारुशुक्तिका स्त्री इर्वारुविशेषः
फुटी इतिभाषा इतिहारावली
इर्वालुः पुं इर्वारुः इत्यमर
टीकायां रायमुकुटः ॥
इल प्र शयने गतौ क्षेपे ॥
इतिकविकल्पद्रुमः ॥
इलक क्षेपे इतिकविकल्पद्रुमः
इलविला स्त्री कुबेरमाता साच
विश्रवःपत्नी इति पुराणं
इला स्त्री वैवस्वतमनुकन्यासाच
विष्णुवरात् पुंस्त्वं प्राप्यसुद्युम्न,
नाख्याता पश्चात् शंकरशापकुमा
रवने प्रविश्य पुनः स्त्रीत्वं गतावुध
स्तां भार्य्यात्वेन स्वीकृत्यपुरूरवसं
जनयामास ततस्तस्याः पुरोहि
तो वशिष्ठ शंकरमाराध्य तस्यै
मासे स्त्रीत्वं मासे पुंस्त्वं दत्तवान्
इति श्रीभागवते कर्दमप्रजा
पतिपुत्र इलः कार्त्तिकेयजन्मोद्दे
शं प्रविश्य स्त्रीभूत्वा इलानाम्नाख्याता
ततः पार्वतीमाराध्यमासेस्त्रीत्वं

मासे पुंस्त्वंच प्राप्तवान् इति
रामायणं पृथिवी गौः ॥
वाक्यं इतिमेदिनी ॥
इलावृतं क्ली जम्बूद्वीपस्यनववर्षान्त
र्गत वर्षविशेषः इति त्रिकाण्ड
शेषः तत्र सुमेरु पर्वतोस्ति ॥
वेष्टयित्वा तस्य सीमा उत्तरे नील
पर्वतः दक्षिणे निषधः पश्चिमे
माल्यवान् पूर्वे गंधमादनपर्वतः
इतिश्रीभागवते ॥
इलिका स्त्री पृथिवी इतिशब्द
रत्नावली ॥
इली स्त्री इली करपालिका ।
हातकुरि इतिभाषा इत्यमर
टीकायां रायमुकुटः ॥
इलीशः पुं स्वनामख्यातमत्स्य
विशेषः इतिशब्दरत्नावली
इल्वलः पुं पक्षिविशेषः इति
शब्दचन्द्रिका ॥
इल्लिशः पुं इलीशमत्स्यः तत्
पर्यायः वारिकर्पूरः २ गौरेयः
३ शफराधिपः ४ जलताल ५
इति त्रिकाण्डशेषः अस्य गुणाः
पित्तश्लेष्माग्निवृद्धिकारित्वं मधु
रत्वं लघुत्वंच इतिराजवल्लभः ॥
राजनिर्घंटो ॥
इल्वकाः स्त्री इल्वलाःनिल्वकुच

नोतशाहोऽयं इति भारते हि
रूपकाश्च ॥
इल्वलः पुं दैत्यविशेषः सच
वातापेर्भ्राता मत्स्यविशेषः
इति मेदिनी ॥
इल्वलाः स्त्री मृगशिरानक्षत्रशि
रोदेशस्थिताः पंचताराः इत्यमरः
इव इ व्याप्तौ प्रीणने ॥ इति
कविकल्पद्रुमः ॥
इव व्य सादृश्य साम्ये इत्य
मरः ॥
इषीका स्त्री इषीका गजचक्षु
र्गोलकः इत्यमरटीकायां भरतः
इषवसपेगातो इति कवि॥
कल्पद्रुमः ॥
इष उञ्छे इति कवि
कल्पद्रुमः॥
इष ग आभीक्ष्ण्ये यो नः पुन्येन
करणे इति कविकल्पद्रुमः॥
इषः पुं आश्विनमासः इत्यमरः
इषिका स्त्री इषीका गजचक्षु
र्गोलकः तूलिका इत्यमरटी॥
कायां रायमुकुटः ॥
इषिरः पुं अग्निः इत्युणादि
कोषः
इषीका स्त्री गजादिकूटकः हस्ति
चक्षुर्गोलकः इत्यमर तूलिका
इति रायमुकुटः काशतृणे
इति हेमचन्द्रः ॥
इषुः पुं स्त्री वाणः इत्यमरः
इषुधिः स्त्री तूणः इत्यमरः
इषुपंथा स्त्री शरपुंखावृक्षः इति
राजनिर्घण्टः ॥
इष्टं क्ली यज्ञादिकर्मयधेप्सिते
कामे इत्यमरः संस्कारः ॥
इति मेदिनी ॥
इष्टः पुं यज्ञः इति मेदिनी ॥
एरंडवृक्षः इति शब्दचन्द्रिका
इष्टं त्रि आशंसिते वांछिते॥
पूजिते प्रिये इति मेदिनी ॥
इष्टका स्त्री गृहादिनिर्माणार्थदग्ध
मृत्तिकाखंडः। इट इति भाषा
इति लीलावती ॥
इष्टकापथं क्ली वीरणमूले इत्य
मरः इष्टका निर्मित पथे पुं ॥
इष्टगंधः त्रि सुगंधिद्रव्ये इत्यमरः
इष्टगंधं क्ली वालुका इति मेदिनी
इष्टा स्त्री शमीवृक्षः इति राज
निर्घण्टः ॥
इष्टापूर्त्तं क्ली यज्ञखातादिकर्म
इति हेमचन्द्रः यथा अग्निहोत्रं
तपः सत्यं वेदानां चानुपालनं
आतिथ्यं वैश्वदेवञ्च इष्टमित्यभिधी
यते वापीकूपतडागादिदेवता

यतनानि च अन्नप्रदानमारामाः
पूर्त्तमित्यभिधीयते इति मल
मासतत्त्वधृत जातूकर्णः ॥
इष्टार्थोद्युक्तः त्रि उत्सुकः उत्
साहयुक्तः इत्यमरः
इष्टिः स्त्री अभिलाषः यागः
इत्यमरः श्लोकसंग्रहः ॥ इति
मेदिनी
इष्टिकापथिकं क्ली लामज्जकतृ
इति राजनिर्घण्टः ॥
इष्टिपचः पुं दनुजः असुरः।
इति शब्दरत्नावली ॥
इष्टिमृष् पुं दैत्यः इति त्रि
कांडशेषः ॥
इष्टुः स्त्री इच्छा इत्युणादिकोषः
इष्मः पुं कामदेवः वसंतकालः
इति सिद्धांतकौमुद्यामुणादिवृत्तिः
इष्यः पुं वसंतकालः ॥ इति॥
हेमचन्द्रः ॥
इष्वः पुं उपदेष्टा इत्युणादि ॥
कोषः ॥
इष्वासः पुं धनुः इत्यमरः ॥
इष्वासः त्रि इषुक्षेपके तिरंदाज
इति ख्याते इति मेदिनी ॥
इह व्य अस्मिन् परदेशे पद॥
काले इत्यादिभाषा इति व्या॥
करणं
इहामुत्रफलभोगविरागः ऐहिक
पारत्रिकविषयभोगेभ्यो नितरां
विरतिः इति वेदांतः ॥
इक्षुः पुं स्वनामख्याततृणं आक
इति भाषा तत्पर्यायः रसालः
२ इत्यमरः कर्कोटकः ३ वंशः
४ कांतारः ५ सुकुमारकः ६ असि
पत्रः ७ मधुतृणः ८ वृष्यः ९ गुडतृणः
१० इति राजनिर्घण्टः भूरिपुष्पः
११ महारसः १२ असिपत्रं १३
तस्य भेदाः वंशकः १ कांतारः २
भीरुः ३ पौंड्रः ४ इति रत्नमाला
सामान्येक्षु गुणाः रक्तपित्तनाशि
त्वं। बलवृष्यकफकारित्वं पाके
मधुरत्वं स्निग्धत्वं शीतलत्वं
मूत्रशुद्धिकारित्वञ्च तस्य मूले
अतिमधुरत्वं मध्ये मधुरत्वं शेषे
त्वग्रभागे लवणरसत्वञ्च इति
राजवल्लभः मूलादौ मधुरत्वं
मध्ये अतिमधुरत्वं अग्रे क्रमात् लवण
त्वं नीरसत्वं च अभुक्ते रक्तभक्षण
गुणाः पित्तदाहत्वं भुक्ते वातप्रको
पणत्वं भुक्तिमध्ये गुरुतरत्वञ्च
इति राजनिर्घण्टः दंतनिष्पीडिते
क्षुरसगुणाः हिमत्वं शुक्रकारित्वं
तृप्तिजनकत्वं जीवनहितकारित्वं
वायुरक्तपित्तनाशित्वं स्वादुत्वं।



स्निग्धत्वं प्रीतिदातृत्वं रक्तवर्द्धक
त्वं मुखप्रह्लादकारित्वं धातु
वर्द्धकत्वञ्च इति राजवल्लभः ॥
अपि वातदोषश्रमशमनकारि
त्वं अल्पश्लेष्मदातृत्वं रुच्यत्वं॥
रुचिजनकत्वं मूत्रशुद्धिकारित्वं
देहस्य कान्तिदातृत्वं बलकारित्वं
पीयूषोपमत्वं त्रिदोषशमनत्वञ्च
इति राजनिर्घण्टः यन्त्रनिष्पीडित
रसगुणाः रक्तशुक्रकारित्वं प्रीत
त्वं सारकत्वं रुचिकरत्वं दाह
जनकत्वञ्च मूलाग्रजन्तुजग्धादि
पीडनात् मूलसंकरात् किञ्चित्काल
विधृतत्वाच्च विकृतिं याति यान्त्रिकः
इति राजवल्लभः अपि च दन्त
निष्पीडितरसगुणवद्गुणत्वं किं
चित पित्तवायुनाशित्वं अकोमलत्वञ्च
स्वादुत्वं शीतविष्टम्भदाहकारित्वञ्च
पर्य्युषिततद्रसगुणाः वातिकर
त्वं वातजनकत्वं जाड्यशैत्यप्राय
रोगदातृत्वं कफवायुकारित्वञ्च
इति राजनिर्घण्टः तत्पक्वरस ॥
गुणाः गुरुत्वं सतीक्ष्णत्वं कफ
वातनाशित्वञ्च इति राजवल्लभः
स्निग्धत्वं अतिशयगुरुत्वं अति
पाके विदाहत्वं पित्तास्रदोष
शोषकारित्वञ्च इति राजनिर्घण्टः

अस्य विकाराः लसीकाफाणित
गुडखण्डमत्स्यण्डिकासिताः ॥
निर्म्मलाल्पबीजाल्पयाः प्रीतवीर्य्याय
योत्तरे इति राजवल्लभः को
किलाक्षवृक्षः इति राजनिर्घण्टः
इक्षुकाण्डः पुं मुञ्जकः शरमुञ्ज
इति रत्नमाला इति शब्दचन्द्रिका
काशतृणं इति राजनिर्घण्टः ॥
इक्षुगन्धः पुं काशतृणं इति
भावप्रकाशः क्षुद्रगोक्षुरकवृक्षः
इति राजनिर्घण्टः ॥
इक्षुगन्धा स्त्री गोक्षुरकवृक्षः ॥
गोखुरी इति भाषा शुक्लभूमि
कूष्माण्डः कोकिलाक्षवृक्षः कुलि
याखारा इति भाषा काशतृणं
काशिया इति भाषा इत्यमरो ॥
मेदिनी च ॥
इक्षुगन्धिका स्त्री भूमिकूष्माण्डः
इति शब्दरत्नावली ॥
इक्षुतुल्या स्त्री तृणविशेषः आ
नाखु इति ख्याता तत्पर्य्यायः
इक्ष्वालिका २ अनिक्षुः ३ इक्षु
वालिका ४ इति रत्नमाला ॥
इक्षुदर्भा स्त्री तृणविशेषः तत्
पर्य्यायः सुदर्भा २ पत्रालुः ३ तृण
पत्रिका ४ अस्या गुणाः सम
धुरत्वं स्निग्धत्वं ईषत् काषायत्वं

कफपित्तहरत्वं रुचिजनकत्वं
लघुत्वं परमतृप्तिकारित्वञ्च इति
राजनिर्घण्टः ॥
इक्षुनेत्रं क्ली इक्षुमूलं इति राज
निर्घण्टः ॥
इक्षुपत्रः पुं यावनालनामधान्य
विशेषः जोयार इति भाषा ॥
इति राजनिर्घण्टः ॥
इक्षुभः पुं शरतृणं इति राज ॥
निर्घण्टः ॥
इक्षुवालिका स्त्री इक्षुतुल्या आ
नाखु इति ख्याता इति रत्नमाला
काशः काशिया इति भाषा ॥
इति राजनिर्घण्टः ॥
इक्षुमूलं क्ली इक्षुविशेषः तत्
पर्य्यायः इक्षुनेत्रं २ मोरटकं ॥
३ वंशनेत्रं ४ वंशमूलं ५ मोरटं ॥
६ वंशपूरकं ७ इति राज ॥
निर्घण्टः ॥
इक्षुयोनिः पुं पुण्ड्रकइक्षु इति
राजनिर्घण्टः ॥
इक्षुरः पुं कोकिलाक्षवृक्षः
कुलियाखारा इति भाषा इति
रत्नमाला इक्षुः गोक्षुरकवृक्षः
इति शब्दरत्नावली काशः इति
राजनिर्घण्टः ॥
इक्षुरकः पुं कोकिलाक्षवृक्षः

स्थूलशरः काशतृणं इति राज
निर्घण्टः ॥
इक्षुरसः पुं काशतृणं इति
भावप्रकाशः ॥
इक्षुरसक्वाथः पुं गुडः इति
हेमचन्द्रः ॥
इक्षुरसोदः पुं इक्षुसमुद्रः इति
जटाधरः ॥
इक्षुवल्लरी स्त्री क्षीरविदारी
क्षीरकन्दः इति राजनिर्घण्टः
इक्षुवल्ली स्त्री क्षीरविदारी इति
राजनिर्घण्टः ॥
इक्षुवाटिका स्त्री पुण्ड्रकः पुंडि
आखु इति भाषा इति राजनि
र्घण्टः ॥
इक्षुवाटी स्त्री पुण्ड्रकः इति राज
निर्घण्टः ॥
इक्षुवेष्टनः पुं भद्रमुञ्जः ॥ इति
राजनिर्घण्टः ॥
इक्षुशाकटं क्ली इक्षुक्षेत्रं इक्षु
भूमि इति भाषा इति व्याकरणं
इक्षुशाकिनं क्ली इक्षुक्षेत्रं इति
व्याकरणं ॥
इक्षुसारः पुं गुडः इति राज
निर्घण्टः ॥
इक्ष्वाकुः पुं वैवस्वतमनुपुत्रः
सत्यसत्ययुगे अयोध्यायां सूर्य्यवं

शीर्षादिराजः इतिपुराणं
इत्वाकुः स्त्री कटुतुंबीतितल्लाउ
इतिभाषा इत्यमरोमेदिनीच॥
इत्वारिः पुं काष्ठाहरणे इति
राजनिर्घंटः॥
इत्वालिकः पुं काष्ठाहरणे इति
भावप्रकाशः॥
इत्वालिका स्त्री इत्वतुल्याम्लानाख
इतिभाषा इति रत्नमाला॥
खाराडा इतिकेचित

ई

ई दीर्घ इकारः चतुर्थस्वरवर्णः अ
स्योच्चारणस्थाने तालु इकारेप॥
ईमध्यान्ति स्वयं परम कुंडलीब्रह्म
विष्णुमयं वर्णं तथा रुद्रमयं सदा
पंचदेवमयं वर्णं पीतविद्युल्लता
कृतिचतुर्ज्ञानमयं वर्णं पंचप्राण
मयं सदा इतिकामधेनुतंत्रे
ई ल कांतौ गतौव्याप्तौ॥
क्षेपे प्रजने खादने इति
कविकल्पद्रुमः॥
ई ङ य गतौ इति कविकल्पद्रुमः
ई च विषादः अनुकंपा इति
मेदिनी क्रोधः दुःखभावने
प्रत्यक्षे सन्निधिः इतिहेम
चंद्रः॥

ई: पुं कंदर्पः इतित्रिकांड
शेषः॥
ई: स्त्री लक्ष्मीः इतिविश्वमेदिन्यौ
ईख इ गतौ इतिकविकल्पद्रुमः
ईज उ गतौ कुत्से इति
कविकल्पद्रुमः॥
ईज इङ कुत्से गते इति॥
कविकल्पद्रुमः॥
ईड कत्थने इतिकविकल्पद्रुमः
ईड ङ ल स्तुतौ इतिकविक
ल्पद्रुमः॥
ईडा स्त्री स्तुतिः इतिहलायुधः
ईडितः त्रि स्तुतः कृतस्तवः
इत्यमरः॥
ईति स्त्री डिम्बः प्रवासः इत्य
मरो मेदिनीच कृषेः षड्प्रका
रोपद्रवविशेषः यथातिवृ
रनावृष्टिः शलभामूषिका
प्रत्यासन्नाश्चराजसः षडेतेईतयः
स्मृताः इतिस्मृतिः॥
ईदृक[श] त्रि अयमिव दृश्यते
ईदृगन्याय यद्प्रकार इत्यादि॥
भाषा इतिव्याकरणं॥
ईदृशः त्रि ईदृक एतत सदृशः
इतिव्याकरणं॥
ईदृक्षः त्रि ईदृशः इतिव्या
करणं॥

ईर कि गतौ प्रेरणे॥ इति॥
कविकल्पद्रुमः॥
ईर उ ल कंपे गतौ॥ इति॥
कविकल्पद्रुमः॥
ईरिणं त्रि शून्ये ऊषरभूमिः॥
इतिमेदिनी॥
ईरितं त्रि क्षिप्ते इत्यमरः॥
प्रेरिते कल्पिते गते कथिते॥
ईर्म्मं क्ली व्रणः इत्यमरः
ईर्या स्त्री भिक्षुव्रते इति जटा
धरः
ईर्वारुः पुं स्त्री स्फुटिः फुटी इति
भाषा इति शब्दरत्नावली॥
ईर्षा स्त्री अक्षमा इतिशब्दमाला
ईर्षालु त्रि ईर्षा विशिष्टः॥इति
हलायुधः॥
ईर्ष्य ० ईर्ष्य॥ इति कविकल्पद्रु[मः]
ईर्ष्या स्त्री परोत्कर्षासहिष्णुता
दोष इति भाषा तत्पर्यायः।
अक्षान्तिः २ इत्यमरः॥
ईर्ष्यालुः त्रि ईर्षाविशिष्टः अक्षा
ति युक्तः तत्पर्यायः कुहनः २
इति हेमचंद्रः॥
ईर्ष्य ० ईर्ष्य परामुदयासहिष्णु
तायामितियावत इतिकवि
कल्पद्रुमः
ईलिः स्त्री ह्रस्वगदाकारहस्तदं

सोठा इति ख्याता इतिभरतः
करकुरीतिख्याते एकधारा इति
ख्याते यवना सेवा इतिसार
सुंदरी॥
ईलितः त्रि स्तुत इत्यमरः॥
ईली स्त्री ह्रस्वगदाकारहस्तदंडः
तत्पर्यायः करपालिका २॥
इत्यमरः॥
ईश उ ल ऐश्वर्ये इतिकविकल्प
द्रुमः॥
ईशः पुं महादेवः ईशानको
णाधिपतिः॥इत्यमरः॥
ईशा त्रि ईश्वरे प्रभुः॥इति
मेदिनीकर हेमचंद्रौ॥
ईशसखा पुं कुबेरः इतिहेम
चंद्रः॥
ईशा स्त्री लांगलदंडः इत्यमरः
टीका शब्दरत्नावलीच दुर्गा
ईशादंतः पुं बृहद्दंत हस्तीतत्
पर्यायः महादंतः २ इति त्रि
कांडशेषः हस्तिदंतः इतिशब्द
रत्नावली॥
ईशानः पुं महादेवः इत्यमरः
एकादशरुद्रान्तर्गत रुद्रविशेषः
इतिपुराणं शिवाष्टमूर्त्यन्तर्गत
सूर्य्यमूर्तिः इतिस्मृतिरागमश्च
प्राचीहस्तः इति राजनिर्घंटः॥

ईशाने क्ली ज्योतिः इति ॥
मेदिनी ॥
ईशानी स्त्री दुर्गा इतितंत्रं ॥
शमीवृक्षः इतिराजनिर्घंटः
ईशिता स्त्री ईशित्वं अनिमाद्य
ष्टैश्वर्य्यांतर्गतैश्वर्य्यविशेषः इति
शब्दरत्नावली ॥
ईशिता त्रि ईश्वरः प्रभुः अधि
पतिः इत्यमरः ॥
ईशित्वं क्ली ईशिता देवानाम
ष्टैश्वर्य्यांतर्गतैश्वर्य्यविशेषः इति
हेमचंद्रः प्रभुत्वे येनस्थावरादि
सर्वभूतानि आज्ञाकारीणि भवेति
इत्यमरटीकासारसुंदरी ॥
ईश्वरः पुं शिवः कंदर्पः ॥
इतिमेदिनी विश्वद्भतत्वप्रधाना
ज्ञानोपहितचैतन्यं इति । वे
दांतः न्यायमते ईश्वरगुणाः ॥
संख्यादिपंच बुद्धिः इच्छायत्नश्च
ईश्वरस्वरूपंब्रह्मशब्दे द्रष्टव्यं ॥
ईश्वरे त्रि आढ्ये स्वामि इति ॥
विश्वमेदिन्यौ ॥
ईश्वरा स्त्री दुर्गालक्ष्मीःसरस्वत्या
शक्तिः इति शब्दरत्नावली ॥
ईश्वरी स्त्री ईश्वरा इतिशब्दरत्नाव
ली लिंगिनीक्षुपः वंध्याकर्कोटकी
क्षुपः रुद्रजटालता नाकुली

कंदः इतिराजनिर्घंटः ॥
ईष उ उंछे उहृतशस्यस्यशेषा
हरणे इतिकविकल्पद्रुमः
ईष उ दाने ईक्षणे हिंसेन ॥
सर्पणे इतिकविकल्पद्रुमः ॥
ईषः पुं इषः आश्विनमासः
इत्यमरटीकायां मथुरानाथः
ईषत् अ अल्पं किंचित् मनाक
इत्यमरः ॥
ईषत्करः पुं अल्पत्वःतत्पर्य्यायः
लेशः २ उपपदे ३ गंधः ४ अनु
वंधः ५ इतित्रिकांडशेषः ।
ईषत् क्रियमाणवस्तु इतिव्या
करणं ॥
ईषत्पांडुः पुं धूसरवर्णः इत्य
मरः ॥
ईषदुष्णं त्रि अल्पतप्तं तत्पर्य्यायः
कोष्णं २ कवोष्णं ३ कदुष्णं ४
मंदोष्णं ५ इति हेमचंद्रः ॥
ईषद्रक्तः पुं अल्पलोहितवर्णः
तत्पर्य्यायः । अव्यक्तरागः २ अ
रुणः ३ इत्यमरः ॥
ईषा स्त्री लांगलदंडः इत्यमरः
लांगलेरईष इतिभाषा ॥
ईषादंतः पुं दीर्घदंतहस्ती तत्
पर्य्यायः उदग्रदंतः २ इति
हेमचंद्रः ॥

ईषिका स्त्री हस्तिचक्षुर्गोलकः
इत्यमरटीकायां रायमुकुटः तू
लिका इत्यमरः अस्त्रविशेषः
यथासोऽभिमंत्र्य शरेषीकाममी
षिकास्त्रेण वीर्य्यवान् काकंतम
भिसंधाय ससर्ज पुरुषर्षभः इति
रामायणं ॥
ईषिरः पुं अग्निः इतित्रिकांड
शेषः ॥
ईषीका स्त्री तूलिकावीरण
शलाका इत्यन्ये अवर्तितमज्जा
वर्तितेवास्ववर्णं ज्ञातुंयन्निःक्षि
प्यते तत्रेत्यन्ये आवर्तितस्ववर्णं
द्रवाकारे यत्रनिःक्षिप्यते तत्रैव
केचित् इत्यमरटीकायां भरतः
ईष्मः पुं कामदेवः वसंतकालः
इति सिद्धांतकौमुद्यामुणादि
वृत्तिः ॥
ईह उ॰ चेष्टे इतिकविकल्पद्रु
ईहा स्त्री चेष्टा उद्यमः वांछा ॥
इच्छा इति त्रिकांडशेषः ॥
ईहामृगः पुं कुक्कुरप्रमाणहरि
णाकपिलवर्णजंतुविशेषः
धांगा इतिख्यातः इतिभरतःतत्पर्य्या
यः कोकः २ वृकः ३ इत्यमरः ॥
नाटकरूपकभेदः इतिमेदिनी
कारहेमचंद्रौ ॥

ईहावृकः पुं ईहामृगः इति
शब्दरत्नावली
ईक्ष उ दर्शने इतिकविकल्प
द्रुमः ॥
ईक्षणं दर्शने चक्षुः इत्य ॥
मरः ॥
ईक्षणा स्त्री दैवज्ञालक्षण
दिनाशुभाशुभनिरूपिणी इत्य
मरः

उ

उ उकारः पंचमस्वरवर्णः अस्यो
च्चारणस्थाने मूर्द्धा सवह्रस्वादीर्घः
प्लुतश्च भवति उकारंपरमेशानि
अधः कुंडलिनीस्वयंपीतचंपकसं
काशंपंचदेवमयं सदा पंचप्राण
मयं देवि चतुर्वर्गप्रदायकं इति
कामधेनुतंत्रं ॥
उ उ॰ शब्दे इतिकविकल्पद्रुमः
उ अ संबोधने रोषोक्तिः ॥
अनुकंपानियोगः पदपूरणे
पादपूरणे इतिमेदिनी ॥
प्रश्नः अंगीकारः इतिहेम
चंद्रः इदमेव ऊं इति ख्याते
उः पुं शिवः इतित्रिकांडशेषः
ब्रह्मा इतिकश्चिदेकाक्षरकोषः
उकनाहः पुं पीतरक्तवर्णाश्वः

सएव क्वचित् क्रमस्कक्कविः
इतिहेमचंद्रः ॥
उक्तं क्ली पकान्तरकंदः इति
मेदिनी वाक्यं ॥
उक्तः त्रि कथितः तत्पर्य्यायः।
भाषितः २ उदितः ३ जल्पितः ४
आख्यातः ५ अभिहितः ६ जपि
तः ७ इत्यमरः गदितः ८ निग ॥
दितः ९ इरितः १० उदीरितः ११
भणितः १२ लडितः
१४ रटितः १५ भाटतः १६ राढतः
१७ व्याहृतः १८ ॥
उक्तिः स्त्री कथनेतत्पर्य्यायः
व्याहारः २ लपिते ३ भाषिते ४
वचने ५ वचः ६ इत्यमरः ॥
उक्थं क्ली सामवेदः इत्युणादि
कोषः ॥
स
उक्थशास्त्रः पुं यजमानः ॥ इति
व्याकरणे ॥
उक्थ्या स्त्री छंदोविशेषप्रकान्तर
व्रतमुक्थ्यासाहिविद्या श्रीः १सर्व
गुरुः यथा श्रीस्तिसासा इति
छंदोमंजरी उः २ सर्वलघुः ॥
यथा उरवत इतिछंदो ॥
णिवः ॥
उख्य ० गतौ इतिकविकल्पद्रुमः

उख ३ गतौ इतिकविकल्पद्रुमः
उखर्वलः पुं तृणविशेषःतत
पर्य्यायः उखलः भूरिपत्रः २
सुतृणः ४ तृणोत्तमः ५ अस्यगुणाः
बलदातृत्वरुविकारित्वपशूना
सर्वदाहितकारित्वं इतिराज
निर्घंटः ॥
उखा स्त्री स्थाली होडि इति ॥
भाषा इत्यमरः ॥
उख्यं त्रि स्थालीपक्कमांसादि
तत्पर्य्यायः पैठरं २ इत्यमरः
उग्रं त्रि रौद्रं उत्कटं इत्य ॥
मरोमेदिनीच ॥
उग्रं क्ली वत्सनाभनामविषं
इतिराजनिर्घंटः ॥
उग्रः पुं महादेवः वायुमूर्तिरयं
इतिभविष्यपुराणं क्षत्रियात्
शूद्रायां जातः जातिविशेषः आ
गुरि इतिभाषा इत्यमरः अस्य
कर्म विलवासि गोधादिवधबंधनं
तथाचमनुः क्षत्रुग्रपुक्कसानांतु
बिलोकोवधबंधनं नक्षत्रगण
विशेषः सच पूर्वफल्गुणी पूर्वा
षाढा पूर्वभाद्रपद् मघा भरणी
अकः इतिज्योतिषशोभां।
जनहस्तः इति शब्दचंद्रिका के
रलदेशः इतिहेमचंद्रः ॥

उग्रकांडः कारवेलः करेला
इतिभाषा इतिराजनिर्घंटः ॥
उग्रगंधं क्ली हिंगु इतिराज
निर्घंटः ॥
उग्रगंधः पुं लशुनः कटुफलः
अर्जकवृक्षः इतिराजनिर्घंटः
चंपकः इतिशब्दचंद्रिका उत्
कटगंधयुक्तेत्रि ॥
उग्रगंधा स्त्री अजमोदावचा
छिक्किकौषधी इति मेदिनी
अजगंधा यवानी इति राज
निर्घंटः ॥
उग्रत्वं क्ली उग्रता उत्कटता
तत्पर्य्यायः चंडता २ इति
हेमचंद्रः ॥
उग्रधन्वा न पुं इंद्रः इतिहेमचंद्रः
उग्रनासिकः त्रि दीर्घनासिका
विशिष्टः इति हेमचंद्रः ॥
उग्रशेखरा स्त्री गंगा इतिशब्द
रत्नावली ॥
उग्रसेनः पुं मथुरादेशस्यराज

विशेषः सच आहुकपुत्रः केस
राजपिताच परीक्षित पुत्रः
इतिश्रीभागवते ॥
उग्रसेनजः पुं कंसनामासुरः (जः
इतित्रिकांडशेषः ॥
उग्रा स्त्री यवानीवचा इति

राजनिर्घंटः छिक्किकौषधी इति
हेमचंद्रः उग्रजाति स्त्री इति ॥
मनुः धन्याके इति रत्नमाला
प्रखरानारी ॥
उंकुणः पुं उत्कुणः उकुन इति
भाषा इतिशब्दमाला ॥
उच ३१ य समवायने मिश्रणे
इतिकविकल्पद्रुमः ॥
उचितं त्रि विदितं न्यस्तं ॥
परिमितं युक्तं इतिहेमचंद्रः
शास्त्रः इतिशब्दरत्नावली ॥
उच्चः त्रि उपरि उंचु इति
भाषातत्पर्य्यायः प्रांशु २ ॥
उन्नतं ३ उदग्रं ४ उच्छ्रितं ५
तुंगं ६ इत्यमरः उत्तुंगं ७
इतितट्टीका ॥
उच्चकैः स व्य उच्चैः अतिशयोच्चं
इतिद्विरूपकोषः ॥
उच्चटा स्त्री गुंज भूम्यामलकी ॥
नागरमुस्ता इतिराजनिर्घंटः
देभः वप्या लशुनप्रभेदः ॥

इतिहेमचंद्रः तृणविशेषः ॥
निर्विषी इतिख्याता चेंचुया इति
केचित् इत्यमरटीकायां भरतः
तत्पर्य्यायः चूडाला २ चक्रला ३
इत्यमरः श्वेतपत्रा ४ जटिला
५ मुक्रला ६ उत्तानकः ७ इतिरत्न

माला ॥

उच्चण्डः त्रि त्वरान्वितः अविलम्बितः इत्यमरः

उच्चतरुः पुं नारिकेलवृक्षः इति राजनिर्घण्टः ॥

उच्चतालं क्ली पानगोष्ठ्यां नृत्यं इति हेमचन्द्रः ॥

उच्चदेवः पुं श्रीकृष्णः इति त्रिकाण्डशेषः ॥

उच्चन्द्रः पुं रात्रिशेषः इति शब्दरत्नावली ॥

उच्चयः पुं परिधानवस्त्रग्रन्थिः तत्पर्य्यायः नीवी २ ॥ इति हेमचन्द्रः ॥

उच्चलं क्ली मनः इति हेमचन्द्रः

उच्चललाटा स्त्री उन्नतललाटवती इति त्रिकाण्डशेषः ॥

उच्चाटनं क्ली उत्पाटे उचाटन इति भाषा षट्कर्मान्तर्गताभिचार कर्मविशेष अस्य देवता ॥ दुर्गा तिथिः कृष्णा चतुर्दशी अष्टमी च वारः शनिः जपमाला सा ध्वस्यकेशा रुद्रग्रथित तुरंगदशनोद्भवा फलं उच्चाटनं स्मृते ॥ शान्तेर्भ्रंशानं परिकीर्त्तितं इति शारदातन्त्रे ॥

उच्चारः पुं विष्ठा इत्यमरः ॥

उच्चारणं

उच्चारणं क्ली कथनं वाग्निष्पत्ति करणं ॥

उच्चावचः त्रि अनेकप्रकारः तत्पर्य्यायः नैकभेदः २ इत्यमरः ॥

उच्चिङ्कटः पुं तृणगाडमत्स्यः कोपनपुरुषः इति मेदिनी ॥

उच्चूलः पुं ध्वजाद्यग्रमुखकूर्च्चः इति हेमचन्द्रः निशानेरपाग ॥ इति भाषा इहारयष्ठुकाम्रवचूलः

उच्चैः स्व उच्चे महत ॥ इत्यमरः ॥

उच्चैःश्रवाः स पुं इन्द्रघोटकः ॥ तस्यमरः समुत्पत्तिवर्णः समुद्रमथनोत्थितः इति श्रीभागवते ॥

उच्चैर्घुष्टं क्ली घोषणा इत्यमरः

उच्छ इ उच्छे इति कविकल्पद्रुमः

उच्छ इ बंधे समापने अति क्रमे ॥ वर्जने इति कविकल्पद्रुमः

उच्छन्नं त्रि नष्टं इति श्रीभगवद्गीता ॥

उच्छादनं क्ली उत्सादनं उद्वर्तनं गंधद्रव्यद्वारा शरीरनिर्मलीकरणं इत्यमरटीका ॥

उच्छिलीन्ध्र क्ली छत्रिका कौडक



क्षाता इति भाषा इति श्री
भागवते ॥
उच्छिष्टं त्रि भुक्तावशिष्टे येंठो
इति भाषा इति पुराणं त्यक्ते ॥
इति हेमचंद्रः ॥
उच्छिष्टभोजनः पुं देवनैवेद्य
वलिभोजनकर्ता इति हेम ॥
चंद्रः ॥
उच्छिष्टमोदनं क्ली सिक्थके मोम
इति भाषा इति राजनिर्घंटः ॥
उच्छीर्षकं क्ली उपधाने वालिश
इति भाषा इति हालायुधः ॥
उच्छूनं त्रि स्फीते उन्नते वर्द्धिते
तथा च प्राचीनाः कामिन्याः कि
यदुच्छूनमुरः प्रेयान् समीक्षते
नवाः शालिमिवोत्पन्नमतिदी
नः कृषीवलः ॥
उच्छृंखलं त्रि शृंखलारहितं तत
पर्य्यायः अवाधं २ उद्दाम ३ ॥
अनियंत्रितं ४ अनर्गलं ५ निरं
कुशं ६ इति हेमचंद्रः ॥
उच्छ्रयः पुं पर्वतहस्तादेरुच्चता
तत्पर्य्यायः उच्छ्रायः २ उत् ॥
सेधः ३ इत्यमरः ॥
उच्छ्रायः पुं उच्छ्रयः उच्चता
इत्यमरः ॥
उच्छ्रितं त्रि संजाते समुन्नद्धे
उन्नद्धे ॥ प्रवृद्धे इति मेदिनी ॥
त्यक्ते इति हेमचंद्रः ॥
उच्छ्वसितं त्रि प्रफुल्ले विकसिते
इति हेमचंद्रः ॥
उच्छ्वासः पुं अंतर्मुखश्वासः तत
पर्य्यायः आहरः २ आनः ३
इति हेमचंद्रः आख्यायिकापरि
च्छेदः आश्वासः इति मेदिनी
उज्जयनी स्त्री विशालानगरी
उजेन इति पश्चिमदेशख्याता
वंगदेशे तु उज्जनी इति त्रिकांड
शेषः अयं मालवदेशस्य नगरी
मोक्षदसप्तपुर्य्यंतर्गतपुरी पुरा
विक्रमादित्यराजधानी च अधुना
महाराष्ट्रेणाधिकृता ॥
उज्जयंतः पुं रैवतपर्वतः ॥ इति
हेमचंद्रः ॥
उज्जयिनी स्त्री उज्जयिनीनगरी
तत्पर्य्यायः विशाला २ अवन्ती ३
पुष्पकरंडिनी ४ इति हेमचंद्रः
उज्ज्ञासनं क्ली मारणे वधः
इत्यमरः ॥
उज्जृंभं त्रि प्रफुल्ले प्रस्फुटिते
इति हेमचंद्रः ॥
उज्जृंभितं त्रि प्रफुल्ले चेष्टायां ॥
क्ली इति मेदिनी ॥
उज्ज्वलं त्रि दीप्ते विशदे ॥

विकाशिते इति मेदिनी ॥
उज्ज्वलः पुं शृंगाररसः इत्यमरः
उज्ज्वलं क्ली स्वर्णे इति राजनिर्घंटः
उज्झ प्र त्यागे इति कविकल्पद्रु
मः उज्झः पुं त्यागः विसर्जनं ॥
उज्झितं त्रि उत्सृष्टे त्यक्ते ॥
वर्जिते इति हलायुधः ॥
उञ्छः पुं उञ्छशिले इति जटा
धरः ॥
(कण
उञ्छनं क्ली आपणादिपतिते
पादाने इति श्रीभागवते न
उञ्छन खेतमा लतुन बुन्यालन
कुड्याल तुन इत्यादि भाषा
उञ्छशिलं क्ली उञ्छवृत्तिः सात्
गृहीतशस्यस्य क्षेत्रात् शेषाक्षय
ने तत्पर्य्यायः ऋतं २ इत्यमरः
उञ्छशिलं ३ उञ्छः ४ उञ्छे ५
शिले ६ इति तट्टीका
उञ्छशीलः त्रि उञ्छजीवी उद्धृत
शस्यस्य शेषाहरणकर्ता इति
पुराणे छिवेरु इति भाषा ॥
उठः पुं तृणपर्णादिः इत्यमर
टीकायां भरतः ॥ (वित
उटजः पुं क्ली मुनीनां पत्रर
गृहे तत्पर्य्यायः पर्णशाला
इत्यमरः गृहमात्रे इत्यमरः ॥
माला ॥
उड ० उपघाते इति कविकल्प
द्रुमः ॥
उड ० संहतौ सौत्रधातुरयं
इति कविकल्पद्रुमः ॥
उडु क्ली स्त्री नक्षत्रं इत्यमरः
जले क्ली इत्यमरटीकायां भरतः
उडुपः पुं क्ली भेलके भेला
माडू इत्यादि भाषा तत्पर्य्यायः
प्लवः २ कोलः ३ इत्यमरः
चंद्रे पुं ॥ इति मेदिनी ॥
उडुपतिः पुं चंद्रः इति पुराणे
ज्योतिषे ॥
उडुपथः पुं आकाशे इति
हेमचंद्रः ॥
उडुम्बरः पुं उडुम्बरवृक्षः यज्ञ
डुमुर इति भाषा तत्पर्य्यायः
जंतुफलः २ यज्ञांगः ३ हेमदुग्धकः
४ इत्यमरः ब्रह्मवृक्षः ५ इति
रत्नमाला देहली गोवराठेर ॥
निवरकाठ इति भाषा पेडु ॥
नपुंसकमिति यावत् कुष्ठरोग
भेदः इति मेदिनी ॥
उडुम्बरं क्ली ताम्रे ॥ इति मेदिनी
कर्षपरिमाणे ॥ इति वैद्यक
परिभाषा ॥
उडुंबरपर्णी दन्ती स्त्री दंतीवृक्षः इति
शब्दचंद्रिका ॥



उड्डुपः पुं क्ली उडुपः भेला इति भाषा चंद्रे पुं इति द्विरूपकोषः ॥

उड्डयनं क्ली नभोगतिः उड इतिभाषा गतौ विरुत्योड्डयेन निराशतामिति नैषधः ॥

उड्डामरः त्रि श्रेष्ठे तत्पर्य्यायः उद्भटं २ उदारं ३ इति त्रिकाण्डशेषः ॥

उड्डीनं क्ली खगगतिक्रियापत्तिणे ऊर्द्ध्वगमने इत्यमरः ॥

उड्डीयमानः त्रि उड्डयनविशिष्टः पक्ष्यादिः उडेतमुड्डता इत्यादि भाषा ॥

उड्डीशः पुं आगमशास्त्रविशेषः शिवः इति मेदिनी ॥

उत व्य प्रश्नः वितर्कः इति मेदिनी अत्यर्थे संदेहः इति शब्दरत्नावली ॥

उतं त्रि तंतुसंतानः वोना इति भाषा तत्पर्य्यायः ऊतं २ स्यूतं ३ इत्यमरः ॥

उत व्य अत्यर्थे विकल्पः समुच्चयः वितर्कः प्रश्नः पादपूरणे इति मेदिनी ॥

उतथ्यः पुं मुनिविशेषः सच अंगिरः पुत्रः इति पुराणं ॥

उतथ्यानुजः बृहस्पतिः इति त्रिकाण्डशेषः ॥

उतथ्यानुजन्मा पुं बृहस्पतिः इति भूरिप्रयोगः ॥

उताहो व्य परिप्रश्नः विचारः इति मेदिनी विकल्पः इत्यमरः ॥

उताहोस्वित् व्य उताहो विकल्पः इत्यमरटीका ॥

उत्कः त्रि उन्मनाः अन्यमनस्कः इत्यमरः ॥

उत्कटं त्रि तीव्रं मत्तं। इति मेदिनी विषमे इति शब्दरत्नावली

उत्कटं क्ली गुडत्वक तेजपात इति ख्याते इति केचित् इत्य ॥ मरभरतौ दारचिनि इति ख्याते इति राजनिर्घण्टः ॥

उत्कटः पुं मदः इति शब्दरत्नावली संजातमदहस्ती इति हारावली शरः रक्तेक्षुः इति राजनिर्घण्टः ॥

उत्कटा स्त्री सैंहलीलता इति राजनिर्घण्टः ॥

उत्कंठ पुं शृंगारस्य षोडशबंधान्तर्गत त्रयोदशबंधः आसन यस्य प्रसिद्धिः तस्य लक्षणं नारी

पादौ च हस्तेन धारयेत् हलके पुनः स्तनार्पितकरः कामी बंधश्चोत्कंठसंज्ञकः इति रतिमंजरी ॥

उत्कंठा स्त्री उत्कलिका इष्टलाभे कालक्षेपासहिष्णुता इत्यमरः कामादिजातस्मृतिः इति भरतः उहाकुलकेन स्मरणं इति मधुः उत्कंठा दयित स्मरणं इति सु ॥ भूतिः प्रियाभिलाषादुन्मनस्कत्वं इत्यन्ये ॥

उत्कंठितं त्रि उत्कंठायुक्ते ॥ तत्पर्य्यायः उत्कं २ उत्सुके ३ उन्मनः ४ इति हेमचंद्रः ॥

उत्कंठिता स्त्री स्वीयादिनायिकाभेदः अस्याल्लक्षणं संकेतस्थलं प्रतिभर्त्तुरनागमनकारणं चिंतयति या अस्याश्चेष्टा अरतितेतापजृंभांगाकृष्टिकेपरुदितस्वावस्थाकथनादयः इति रसमंजरी

उत्कता स्त्री गजपिप्पली इति शब्दचंद्रिका उत्कस्यभावः ॥ उत्कंठा ॥

उत्करः पुं धान्यादिराशिः स्तूपः इत्यमरः ॥

उत्कर्षः पुं अतिशयः इत्यमरः अतिशययुक्ते त्रि स्वकालात् परकालकर्त्तव्यः इति स्मृतिः

उत्कलः पुं तद्देशः उडिशा इति भाषा इति त्रिकाण्डशेषः व्याधः पाखिमार इति भाषा इति शब्दमाला ॥

उत्कलं त्रि भारवाहके मुटे इति भाषा इति शब्दमाला ॥

उत्कलिका स्त्री उत्कंठा इत्यमरः कलिका इति त्रिकाण्डशेषः तरंगः हेला इति ॥ हेमचंद्रः ॥

उत्कलितः त्रि उन्मनाः हृद्धिमान् इति धरणी ॥


उत्का स्त्री उत्कंठितानायिका। इति रसमंजरी ॥

उत्काका स्त्री प्रतिवर्षप्रसूता गौः इति शब्दचंद्रिका ॥

उत्कारः पुं धान्योत्क्षेपणं ॥ तत्पर्य्यायः निकारः २ इत्यमरः धानस्तारा इति भाषा धान्यस्यराशीकरणं वा इति भरतः

उत्कुंठं क्ली उत्तानशयने चित्तहृद्यौ शेषा इति भाषा इति हारावली ॥

उत्कुणः पुं केशकीटः उकुण इति भाषा तत्पर्य्यायः मत्कुणः २ कोणकुणः ३ उद्देशः ४ किटिभः ५ इति हेमचंद्रः ॥



उत्कटः पुं कटे इति हारावली
उत्कृष्टे त्रि उत्कर्षविशिष्टे । अतिशययुक्ते प्रकृष्टे प्रशस्ते
उत्कृष्टभूमः पुं प्रशस्तभूमिः इति जटाधरः ॥
उत्कोचः पुं स्त्री घुस इति ख्यातः तत्पर्य्यायः प्राभृत २ ढौकन ३ लेचा ४ कौशलिक ५ आमिष ६ उपाहारः ७ प्रदा ८ आनेहार ९ हारः १० ग्राह्य ११ अयन १२ इति हेमचन्द्रः उपदानक १३ इति त्रिकाण्डशेषः अपप्रदान १४ इति भूरिप्रयोगः ॥
उत्क्रमः पुं व्यतिक्रमः विपरीतिः तत्पर्य्यायः व्युत्क्रमः २ अपक्रमः ३ इति हेमचन्द्रः ॥
उत्क्रोशः पुं स्त्री कुररपक्षी ॥ इत्यमरः ॥
उत्खला स्त्री मुरानाम गन्धद्रव्ये तत्पर्य्यायः तालपर्णी २ ताल ॥ पर्णी ३ तालाख्या ४ खण्ड ५ इति शब्दचन्द्रिका ॥
उत्खाते त्रि उन्मूलिते उप ॥ डान इति भाषा इति जटाधरः
उत्तं त्रि आर्द्रवस्त्र इत्यमरः
उत्तंसः पुं कर्णपूरः कर्णाभरणे शेखरः शिरोभूषणे ॥ इत्य ॥ मरः मतान्तरे क्लीवलिङ्गोपि
उत्तप्तं क्ली शुष्कमांसे इत्यमरः
उत्तप्तः त्रि तप्तः सन्तप्तः परिप्लुतः स्नातः इति मेदिनी
उत्तभिते त्रि उत्तम्भिते इति श्रीभागवते ॥
उत्तमः त्रि भेदः उत्कृष्टः तत्पर्य्यायः । प्रधान २ प्रमुखः ३ प्रवेकः ४ अनुत्तमः ५ मुख्यः ६ वर्य्यः ७ वरेण्यः ८ प्रवर्हः अनवरार्द्ध्यः १० परार्द्ध्यः ११ अग्र्यः १२ प्राग्रहरः १३ प्राग्र्यः १४ अग्र्यः १५ अग्रीयः १६ अग्रियः १७ इत्यमरः मुखः १८ अग्रणीः १९ इति तट्टीका ॥
उत्तमः पुं वैसिकनामनायकभेदः तस्य लक्षणं दयिताप्रमप्रकोपेपि उपचारपरायणः इति रसमञ्जरी प्रियव्रत राजपुत्रः स च तृतीय मनुः अस्मिन् मन्वन्तरे सत्यसेनावतारः सत्यजिदिन्द्र सत्यवेद ॥ ऋत भद्रादयो देवाः वशिष्ठसुताः प्रमदादयः सप्तर्षयः पवनसंजय यज्ञहोत्रादयो मनुपुत्राः इति श्रीभागवते ॥ (त्तौ
उत्तमफलिनी स्त्री डग्धिकाहत्तः राइ इति भाषा इति रत्नमाला ॥

उत्तमर्णः पुं ऋणदाता महाजन इति भाषा इत्यमरः ॥ तत्पर्य्यायः ऋणदः २ इति जटाधरः
उत्तमसंग्रहः पुं सम्यक्संग्रहणे तत्तु निर्जने परभार्य्या सह केशाकेशि परिपरालिङ्गन सहासनादिरूप मिथुनीभावः इति मिताक्षरा ॥
उत्तमसाहसः पुं दण्डविशेषः तत्र साधारण्येन साहसे यथा साशीतिपणसाहस्रो दण्ड उत्तमसाहसः इति याज्ञवल्क्यः सहस्रपणमितोपि यथा पणानां द्वे शते सार्द्धे प्रथमः साहसः स्मृतः मध्यमः पञ्चविज्ञेयः सहस्रन्त्वेव चोत्तमः इति मनुः ॥
उत्तमा स्त्री उत्कृष्टा नारी तत्पर्य्यायः वरारोहा २ मत्तकाशिनी ३ वरवर्णिनी ४ इत्यमरः मत्तकाशिनी ५ मत्तकाशिनी ६ इति तट्टीका डग्धिकाहस्तः इति मेदिनी स्वीयादिनायिकाभेदः अस्या लक्षणं अहितकारिण्यपि प्रिये हितकारिणी अस्याश्चेष्टा उत्तमायत्व इति रसमञ्जरी ॥
उत्तमाङ्गं क्ली मस्तके इत्यमरः
उत्तमारणी स्त्री इन्दीवरी इति ॥ राजनिर्घण्टः ॥
उत्तरं क्ली प्रतिवाक्ये इत्यमरः जवाव इति यावनी भाषा तस्य व्युत्पत्तिः उत्तीर्य्यते निस्तीर्य्यते प्रकृताभियोगोऽनेन तस्य स्वरूपं पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलमव्याख्यागम्यमित्युत्तरं तद्विदो विदुः तस्य भेदाः मिथ्या सम्प्रतिपत्तिश्च प्रत्यवस्कन्दनं तथा प्राङ्न्यायश्चोत्तराः प्रोक्ताश्चत्वारः शास्त्रवेदिभिः इति नारदः ॥
उत्तरः पुं विराटराजपुत्रः इति हेमचन्द्रः ॥
उत्तरः त्रि ऊर्द्ध्वे उदीची उत्तमः इति मेदिनी अमरश्च अनेतरे
उत्तरकालः पुं भविष्यत्कालः गौणकालः यथा एवमागामि यागीय मुख्यकालादथस्तनः सकाल उत्तरो गौणः कालः पूर्वस्य कर्म्मणः इति हरिहरपद्धतिः ॥
उत्तरकुरुः स्त्री जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः इति त्रिकाण्डशेषः
उत्तरकोशला स्त्री अयोध्यानगरी इति त्रिकाण्डशेषः ॥
उत्तरक्रिया स्त्री प्रेतिमक्रिया । सा च तत् सरिकश्राद्धादिपिण्डक्रिया

यथाप्रेतेपितृत्वमापन्नेसपिंडी
करणादनु क्रियन्ते याः क्रियाः
पित्र्याः प्रोच्यन्तिता नृपोत्तराः
इति विष्णुपुराणं ॥
उत्तरंगं क्ली द्वारोर्द्ध्वकाष्ठदारु
इति हेमचंद्रः उत्कृततरंगे त्रि
उत्तरणं क्ली नद्यादिपारगमने
उत्तरण इति भाषा (तृ)
उत्तरतः स अव्य उत्तर दिग्देशकालेषु
उत्तर हुइने इति भाषा इति
रायमुकुटः ॥
उत्तरपक्षः पुं विचारसिद्धांतः
समाधाने तत्पर्य्यायः सिद्धांतः
२ समाधिः ३ कृतांतः ४ इति
त्रिकांडशेषः सिद्धांतानुकूल
तर्कोपन्यासः इति स्मृतिः ।
उत्तरपादः पुं चतुष्पाद ॥
व्यवहारांतर्गत द्वितीयपादः
उत्तर इति इति व्यवहारतत्वं
उत्तरफल्गुणी अश्विन्यादिसप्त
विंशतिनक्षत्रांतर्गतद्वादशन
क्षत्रं अस्यारूपं दंतिगोतरमिलित
तारकद्वयं इति कालिदासः ॥
पर्य्यंकरूपंतारकाद्वयं इति ।
दीपिकटीका अस्या अधिष्ठात्री
देवता अर्य्यमा अस्याभिस्नगुणः
अस्यांजातफले दातादयालुः

स्वजने सुशीलो विपुलकीर्त्तिः
सुमतिः प्रधानः धीरान्तरोऽत्यंत
मृदुस्वभावश्चेदुत्तराफल्गुणिका
प्रसूतिः इति कोष्ठीप्रदीपः
उत्तरफाल्गुणी स्त्री उत्तरफल्गुणी
नक्षत्रे तत्पर्य्यायः उत्तरा २
अर्य्यमदेवा ३ इति हेमचंद्रः
उत्तरभाद्रपत् स्त्री उत्तरभाद्रपदा
नक्षत्रे इति ज्योतिषं ॥
उत्तरभाद्रपदा स्त्री अश्विन्यादि
सप्तविंशतिनक्षत्रांतर्गतषड्विंश
नक्षत्रे तत्पर्य्यायः प्रोष्ठपादा २
अहिर्बुध्न देवता ३ इति हेमचंद्रः
अस्यारूपं उत्तरे समुखिभार
मूर्त्ति भूस्तुतमोग मिलिते हि
तारके नीलचामरकचन्द्रसुमतो
लोचनाचलकलाः पलायिताः
इति कालिदासः पर्य्यंकरूपमष्ट
तारात्मकं इति दीपिकाटीका
अस्यां जातफले धनीकुलीनः
कृपालुः क्रियादौ भूपालमान्योबल
वान् महौजाः सत्कर्म्मकर्त्ता निज
बंधुभक्तो यदुत्तराभाद्रपदाप्रसूतः
इति कोष्ठीप्रदीपः ॥
उत्तरवादी न् त्रि उत्तरवक्ता ।
आसामी इति भाषा इति
व्यवहारतत्वं ॥

उत्तरसाक्षी न् त्रि स्वपक्षसंबंधिसा (क्षा)
परिभाषतो साक्षिणं यः स्वयं
शृणोति अर्थिनाश्रावितेवाऽसः
तथा च नारदः साक्षिणामपियः
साक्ष्यं स्वपक्षे परिभाषतो श्रव
णात् श्रावणाद्वापि स साक्ष्युत्तर
संज्ञकः परसाक्षी इति भाषा ।
इति व्यवहारतत्वं ॥ (यः)
उत्तरसाधकः त्रि साधकस्य
सहकारी ॥
उत्तरा स्त्री विराटराजकन्या
साभिमन्युपत्नी इति मेदिनी
उत्तरादिक् तत्पर्य्यायः ।
कौवेरी २ देवी ३ उदीची ४
इति राजनिर्घंटः अस्यादिशो
ऽधिपतिः कुवेरः कर्कटवृश्चिक
मीनराशयश्च यथा मेषसिंहधनुः
प्राच्यां दक्षिणस्यांतु तत्परे ॥
प्रतीच्यां तत्परेऽस्याः उदीच्यां च
ततः परे इति समयप्रदीपः
उत्तरात् अव्य उत्तरादिक् इत्यमर
टीकायां रायमुकुटः ॥
उत्तराधिकारी न् त्रि प्रथमाधिका
रिणः पश्चादधिकारी दायादः तथा
रिस इति यावनी भाषा ॥
उत्तराभासः पुं दुष्टोत्तरं तथा च
कात्यायनः प्रकृतेनत्वसंबंधमनु (न्व)

मतिभूरिव यत्नैकदेशव्यापिच
उक्तं नैवोत्तरं भवेत् ॥ इति
व्यवहारतत्वं ॥
उत्तरायणं क्ली सूर्यस्य उत्तर
दिग्गमनकालः सच माघादि
षण्मासात्मकः इति हेमचंद्रः
देवानां दिनं इति स्मृतिः ॥
उत्तराषाढा स्त्री उत्तराषाढानक्षत्रे
इति भरताद्विरूपकोषश्च ।
उत्तराशापतिः पुं कुवेरः इति
हलायुधः ॥
उत्तराषाढा स्त्री अश्विन्यादिसप्त
विंशतिनक्षत्रांतर्गतैकविंश
नक्षत्रं अस्यारूपं शूर्पाकृति ।
ताराचतुष्टयात्मकं अस्या अधि
देवताविश्वः इति कालिदासः
गजदंतवदष्टतारामयं इति
दीपिकाटीका तत्र जातफले
दातादयावान् विजयी विनीतः सत्
कर्म्मवेत्ता विभवैः समेतः कांता
सुताबाससुखान्वितोनवैश्वसुरेशः
पुरुषो मनीषी इति कोष्ठीप्रदीपः
उत्तरासंगः पुं उत्तरीयवस्त्रं ।
इत्यमरः ॥
उत्तरीयं क्ली उत्तरीयवस्त्रं दोकोठ
दोवृजा इत्यादि भाषा तत्
पर्य्यायः प्रावारः २ उत्तरासंगः ३

हृहतिका ४ संव्याने ५ इत्यमरः
उत्तरेण अ उत्तरदिग्देशकालः
इत्यमरटीकायां रायमुकुटः
उत्तरेद्युः स अ उत्तरस्मिन्नहनि
आगामिदिने इति शब्दरत्नाव
ली उत्तानं त्रि अगंभीरे ऊर्द्ध्वमुख
प्रायिते चित् इति भाषा इति
मेदिनी ॥
उत्तानकः पुं उच्चटावृक्षे इति
रत्नमाला ॥
उत्तानपत्रकः पुं रक्तैरण्डवृक्षः
इति राजनिर्घण्टः ॥
उत्तानपादः पुं राजविशेषः ॥
स तु स्वायंभुव मनुपुत्रः इति ॥
पुराणं ॥
उत्तानपादजः पुं उत्तानपाद
राजपुत्रः तत्पर्य्यायः ॥४
ज्योतीरथः २ ग्रहाधारः ३ ध्रुवः
इति हारावली ॥
उत्तानशयः त्रि अत्यन्तशिशुः
तत्पर्य्यायः डिंभः २ स्तनपाः ३
स्तनंधयी ४ इत्यमरः उत्तानसुप्तः
उत्तापः पुं तेजः उष्मा संतापः
उत्तारः त्रि महान् तत्पर्य्यायः
उदीर्णः २ उद्भटः ३ उदारः ४
उत्तमः ५ इति जटाधरः ॥
वमने इति प्रायश्चित्तविवेकादयः

उत्तारी त्रि चपलः । इति ॥
भूरिप्रयोगः ॥
उत्तालः त्रि उत्कटः श्रेष्ठः
विकरालः स्वेगमः इति मेदिनी
त्वरितः इति हेमचन्द्रः ॥
उत्तीर्णः त्रि मुक्ते पारगते ॥
उत्तुंगः त्रि उच्चः इति जटाधरः
उत्तुषः पुं भृष्टधान्यं तत्पर्य्यायः
खोलिकः २ लाजाः ३ खइ इति
भाषा इति हारावली ॥
उत्तेजना स्त्री प्रेरणा व्यञ्जकरणे
उत्तेजितं क्ली अश्वचतुर्थगतिः
सा च मध्यवेगतया गतिः तत्
पर्य्यायः रेचितं २। इति ॥
हेमचन्द्रः ॥ प्रेरिते त्रि ॥
उत्तेरितं क्ली अश्वपंचमगतिः
तत्पर्य्यायः उपकण्ठं २ आस्कन्दि
तकं ३ इति हेमचन्द्रः ॥
उत्तोलनं क्ली ऊर्द्ध्वनयने तोला
इति भाषा ॥
उत्त्यक्तः त्रि परित्यक्तः ।
ऊर्द्ध्वक्षिप्तः विरक्तः ॥
उत्त्रासः पुं भयं इति शब्दरत्ना
वली ॥
उत्थानं क्ली सैन्ये युद्धे ॥
पौरुषे पुस्तके उद्यमः ॥
उद्गमः हर्षः वास्तुतः अंगने

चैत्यः ॥ मलोत्सर्गः इति ॥
हेमचन्द्रः ॥ तंत्रे तत्र स्वमण्डले
सैन्ये चिन्ताव सन्निविष्टः ॥
उपविष्टः इत्यमरभरतौ ॥
उत्थापनं क्ली उत्तोलनं ॥
उपस्थितीकरणं ॥
उत्थितं त्रि वृद्धिमत् प्रोद्यते ॥
उत्पन्ने इत्यमरमेदिनीकरौ
उत्थिताङ्गुलिः पुं चपेटः विस्तृ
ताङ्गुलिकरतलं चापड इति
भाषा इति शब्दचन्द्रिका ॥
उत्पतः पुं पक्षी इति
त्रिकाण्डशेषः ॥
उत्पतनं क्ली उत्पत्तिः ॥
ऊर्द्ध्वगमने इति मेदिनी ॥
उत्पतिता त्रि ऊर्द्ध्वगमनशीलः
उपरिगमनकर्त्ता इत्यमरः ॥
उत्पतिष्णुः त्रि ऊर्द्ध्वगमनशीलः
तत्पर्य्यायः उत्पतिता २॥
इत्यमरः ॥
उत्पत्तिः स्त्री उत्पतनं तत्
पर्य्यायः जनुः २ जननं ३ जन्म ४
जनिः ५ उद्भवः ६ इत्यमरः ॥
उत्पन्नः त्रि उत्पत्तिविशिष्टः ।
जातः उद्भूतः ॥
उत्पलं क्ली नीलकमले ॥
कुष्ठौषधिः इति विश्वः पुष्पं ॥

इति मेदिनी जलजपुष्पमात्रे
तच्चपद्म कुमुदादि तत्पर्य्यायः
कुवलयं २ इत्यमरः तस्य गुणाः
कषायत्वं मधुरत्वं शीतत्वं ॥
पित्त कफ रक्त नाशित्वंच इति
राजवल्लभः जलपुष्पविशेषः
कोइँ इति भाषा तत्पर्य्यायः
अनुष्णं २ रात्रिपुष्पं ३ जलाह्वयं ४
हिमाब्जं ५ निशापुष्पं ६ अस्य
गुणाः शीतत्वं स्वादुत्वं पित्त
रक्तार्त्ति दोषनाशित्वं दाहश्रम
वमिभ्रान्ति कृमिज्वर हरत्वंच इति
राजनिर्घण्टः ॥
उत्पलः त्रि मांसशून्यः इति ॥
विश्वः हेमचन्द्रश्च ॥
उत्पलगन्धिकं क्ली चन्दनविशेषः
तत्पर्य्यायः कुललताभ्रं २ गोशीर्षं
३ इति शब्दमाला ॥
उत्पलपत्रं क्ली कुवलयदले
स्त्रीनखक्षते इति हेमचन्द्रः ॥
तिलके इति धरणी ॥
उत्पलशारिवा स्त्री श्यामलता
इत्यमरः ॥
उत्पलिनी स्त्री पद्मसमूहः इति
शब्दरत्नावली जलपुष्पविशेषः
कोका को त्री इति हिंदी भाषा।
तत्पर्य्यायः कैरविणी २ कुमुद्वती

३ कुमुदिनी ४ चंद्रेष्टा ५ कुवलयिनी
६ इंदीवरिणी ७ नीलोत्पलिनी ८
अस्यागुणाः हिमत्वं तिक्तत्वं ॥
रक्तामयपित्तनाशित्वं वातकफ
कासतृस्नाभ्रमवमिश्रमताकारि
त्वंचतस्यावीजगुणाः स्वादुत्वं रूक्षत्वं
हिमत्वं गुरुत्वंच इति
राजनिर्घंटः ॥
तत्पली स्त्री जषवर्पटी त्वंबेर ॥
वायुडा इतिभाषा इतिमेदिनी
उत्पवने क्ली कुशंडिकायांपवि
त्रमध्येन जलादेरुत्क्षेपणे ॥
तत्रक्रमः पवित्र द्वय मग्रे वाम
हस्तानामिकांगुष्ठाभ्यां मूले दक्षि
णहस्तानामिकांगुष्ठाभ्यां उत्तान
हस्ताभ्यां गृहीत्वा आज्यशक्तिय
तयोर्मध्ये नाग्रावाज्योत्क्षेपणं ॥
इतिकालेसिः पवित्रद्वयमग्रे
दक्षिणहस्तानामिकांगुष्ठाभ्यां
मूले वामहस्तानामिकांगुष्ठाभ्यां
गृहीत्वा दक्षिणहस्तोपरिभावेन
अधोमुखो वामहस्तपाणिः पवित्रमं
ध्येन प्रोत्क्षणं जलस्य किंचिदुत्तोल
ने इति पशुपतिः पशुपतकर्मेण
सामगानां मेक्षाकारेण पूर्ववत्कंपा
वित्रद्वयमध्यनाग्रावाज्योत्क्षेपणं
इतिभवदेवभट्टः ॥

उत्पक्ष्मः त्रि उन्मुखः ऊर्द्धदृष्टि ॥
विशिष्टः इति हेमचंद्रः ॥
उत्पाटने क्ली उत्तलने उत्पाडन
इतिभाषा ॥
उत्पाठिते त्रि कृतोत्पाठने ॥
तत्पर्यायः उन्मूलिते २
उत्खाते ३ इति जटाधरः ॥
आवर्हिते ४ उद्धृते ५। इति ॥
हेमचंद्रः ॥
उत्पातः पुं उत्पतति
अकस्मादापाति यः प्राणिनां
शुभाशुभ सूचक महाभूतविकार
भूकंपादिः इत्यमरटीकायां
भरतः तत्पर्यायः अजन्यं ॥
२ उपसर्गः ३ इत्यमरः स
त्रिविधः दिव्यः १ यथा अपर्वणि
चंद्रादित्यग्रासादिः आंतरीक्ष्यः
२ यथा उल्कापात निर्घातादिः
भौमः ३ यथा भूकंपादिः ॥
इतिदीपिका चंडीटीका
उत्पादकः पुं पशुविशेषः ॥
तत्पर्यायः शरभः ॥ २॥
कुंजराराति ३ अष्टपादः ४ इति
हेमचंद्रः ॥
उत्पादकः त्रि उत्पादयिता ॥
जनकः तथाचस्मृतिः उत्पादक
ब्रह्मदात्रोर्गरीयान्ब्रह्मदः पिता ॥

उत्पादने क्ली जनने उत्पत्ति ॥
करणे इति व्याकरणं ॥
उत्पादशयनः पुं स्त्री टिट्टिभपक्षी
इतिहेमचंद्रः ॥
उत्पादिका स्त्री देहिकानाम
कीटः इति त्रिकांडशेषः ॥
हिलमोचिका इतिशब्दचंद्रिका
पूतिका। इति भरतो ॥
द्विरूपकोषश्च ॥
उत्पाली स्त्री आरोग्यं इति ॥
शब्दचंद्रिका ॥
उत्पिंजलः त्रि भृशमाकुलः
अतिशयव्याकुलः तत्पर्यायः
समुत्पिंजः २ पिंजलः ३ इति
हेमचंद्रः ॥
उत्प्रेक्षा स्त्री अनवधाने इति
मेदिनी काव्यालंकारविशेषः
तस्यलक्षणं संभावनमथोत्प्रे
क्षाप्रकृतस्य समेन यत् अस्यार्थः
प्रकृतस्य उपमेयस्य समेन
उपमानेन यत् संभावनं मिथ्याते
वर्णने इति काव्यप्रकाशः ॥
उत्फलवने क्ली उत्फलने लाफी
इतिभाषा ॥
उत्प्लवा स्त्री नौका। इति
शब्दरत्नावली ॥
उत्फालः पुं लंफः ॥

उत्फुल्लः त्रि प्रफुल्लः विकसितः
इत्यमरः स्त्रीणां करणे उत्ताने
इतिमेदिनी ॥
उत्सः पुं प्रस्रवणं उनइ इति
भाषा इत्यमरः यत्रस्थानस्तुता
जलं गलति तत्र इतिभरतः
स्वाम्यादयस्तु अविच्छेदेनस्रवज्जले
यत्रस्थाने पतति निपत्यचबहुली
भवति तत्रेत्याहुः गिरेरुपरि
निर्झरादि प्रभव जलसंघाते
इतिसोजः अजसमेदवेगेन
स्रवज्जले इतिकोक्कः ॥
तनस्त्रः पुं क्रोडे इति ॥
जटाधरः ॥
उत्सर्गः पुं त्यागः दानं ॥
वर्जने सामान्यविधिः इति
हेमचंद्रः साग्निकर्तव्यक्रिया
विशेषः इति तिथ्यादितत्वं
अपवैथात् सर्गविधिः स्नान
संध्यादिमनानिकत्वानारायणनवग्रह
गुरुत्वंसंपूज्य देयद्रव्यं वामहस्तेन
धृत्वा दक्षिणहस्तेन त्रिरभ्युक्ष्य
तद्व्याप्यपति देवतां संप्रदानंच
अर्चयित्वा संकल्प्य कुशतिलजल
त्यागपूर्वकदाने। इतिस्मृतिः
उत्सर्जने क्ली उत्सर्गः तत्
पर्यायः त्यागः २ विहापितं ३

दाने ४ विसर्जने ५ विश्राणने ६
वितरणे ७ स्पर्शने ८ प्रतिपादने
९ प्रादेशने १० निर्वपणे ११
अपवर्जने १२ अंहतिः १३ ॥
इत्यमरः ॥
उत्सर्पिणी स्त्री जिनानां काल
विशेषः यथा कालो द्विविधो
ऽवसर्पिण्युत्सर्पिणीप्रभेदतः
सागरकोटिकोटीनां विंशत्या
स समाप्यते अवसर्पिण्यां षडरा
उत्सर्पिण्यां तएव विपरीताः
एवं द्वादशभिररैर्विवर्त्तितं का
लचक्रमिदं इतिहेमचंद्रः ।
उत्सर्य्या स्त्री प्रजननकालप्राप्त
गौः पाललनेन २ उपसर्य्या ३ इ
भाषा इतिजटाधरः ॥ (क
उत्सवः पुं नियताह्लादजनक
व्यापारः तत्पर्य्यायः क्षणः २
उद्धवः ३ उद्धर्षः ४ महः ५
इत्यमरः उत्सेकः इच्छाप्रसवः
कोपः इतिमेदिनी ॥
उत्सादनं क्ली समुल्लेखः ॥
उद्वाहने उद्वर्तने इतिमेदिनी
उत्सादितं त्रि हतोत्सादनं ।
उद्वर्त्तिते निर्मलीकृतशरीरे
उत्सारकः पुं द्वारपालः इति
हेमचंद्रः उत्सारणकर्त्ता ॥
उत्सारणं क्ली दूरीकरणेचालने
स्थानान्तरप्रापणे ॥
उत्साहः पुं उद्यमः तत्पर्य्यायः
अध्यवसायः २ इत्यमरः तत्पर्य्यायः
इतिमेदिनी कल्याणे भाव
विशेषः इतिशब्दरत्नावली
उत्साहवर्द्धनं क्ली उद्यमवृद्धिः
वीररसः इत्यमरः ॥
उत्सिच्यमानः त्रि उद्रिच्यमानः
वृद्धिमान् इतिश्रीभागवते ॥
उत्सिक्तः त्रि उद्धतः इति
त्रिकाण्डशेषः गर्वितः वर्द्धितः
उद्रिक्तः इतिश्रीभागवते ॥
उत्सुकः त्रि वाञ्छितकर्मोद्यतः
तत्पर्य्यायः इष्टार्थोद्युक्तः २
इत्यमरः उत्कंठितः ॥ इति
हेमचंद्रः ॥
उत्सूरः पुं दिनावसाने इति
हेमचंद्रः ॥
उत्सृष्टः त्रि हतोत्सर्गः तत्
पर्य्यायः त्यक्तः २ हीनः ३
विधुतः ४ समुज्झितः ५ धूतः ६
इत्यमरः ॥
उत्सेचनं क्ली ऊर्द्धसेकः उपलन
अपेचन् इत्यादिभाषा ॥
उत्सेधः पुं पर्वतवृक्षादीनां
देहे उच्छ्रयः शरीरे इत्यमरः

संहनने इतिहेमचंद्रः ॥
उत्तंसिमः पुं पुल्लरफले इति
शब्दचंद्रिका ऊर्द्धत्यके त्रि ॥
उत्तंसिका स्त्री कर्णभूषणवि
शेषः तत्पर्य्यायः कर्णान्दुः २ इति
हेमचंद्रः ॥
उत्क्षेपणं क्ली व्यजने धान्य
मर्द्दनवस्त्रे इतिमेदिनी उद्वेचनं
ऊर्द्धक्षेपणे षोडशपणे ॥
इतिहेमचंद्रः ॥
उद् अव्य विंशत्युपसर्गान्तर्गत
उपसर्गविशेषः अस्यार्थः ऊर्द्ध
उत्कर्षः प्राकट्ये नैकट्ये ॥
इति दुर्गादासः प्रकाशः ॥
विभागः प्राबल्ये अस्वास्थ्ये
शक्तिः प्राधान्ये बंधने भावः
मोक्षः लाभः ऊर्द्धकर्म ॥
इतिमेदिनी ॥ ली
उदं क्ली जले इतिशब्दरत्नाव
उदक् अव्य उत्तरदिग्देशकालाः
इति मेदिनी ॥
उदकं क्ली जले इत्यमरः ॥
उदकीर्णः पुं महाकरंजः इति
राजनिर्घंटः ॥
उदकीर्य्यः पुं करंजविशेषः
डालकरमचा उदकरंज इत्यादि
भाषा इति रत्नमाला ॥
उदक्या स्त्री रजस्वला ऋतुमती
इत्यमरः ॥
उदगद्रिः पुं हिमालयपर्वतः
इतिहेमचंद्रः ॥
उदगयनं क्ली उत्तरायणे इतिस्मृतिः
उदग्भूमः पुं सद्भूमिः उत्कृष्ट
स्थाने इतिजटाधरः ॥
उदग्रः त्रि उच्छ्रिते उच्चे इत्यमरः
उदग्रदन् पुं उच्चदंतहस्ती वृहद्दंत
युक्ते त्रि इति हेमचंद्रः ॥
उदजः पुं पशुप्रेरणे इत्यमरः
उदंचनं क्ली पिधानपात्रे ढाकुनि
इतिभाषा इतिहेमचंद्रः ॥
ऊर्द्धक्षेपणे ॥
उदंचितं त्रि ऊर्द्धक्षिप्ते इति
हेमचंद्रः पूजिते ॥
उदण्डपालः पुं मत्स्यविशेषः
सर्पभेदः ॥ इति मेदिनी ॥
उदधिः पुं समुद्रः इत्यमरः
उदधिक्राः पुं समुद्राक्रमणकर्त्ता
इतिव्याकरणं ॥
उदधिमलः पुं समुद्रफेणः
अस्यगुणाः शीतलत्वंकषायत्वं
अतिवीतिकारित्वंच । इति
राजवल्लभः ॥
उदधिमेखला स्त्री पृथिवी । इति
महाभारतं ॥

उदंतः पुं वार्त्ता साधुः ॥ इति
मेदिनी हरियाजने । इति
शब्दरत्नावली ॥
उदंतकः पुं वृत्तांतः वार्त्ता ॥
इतिशब्दरत्नावली ॥
उदंतिका स्त्री तृप्तिः ॥ इति
हारावली ॥
उदन्या स्त्री पिपासा इत्यमरः ॥
उदन्वान् पुं समुद्रः इत्यमरः
उदप० आख्यात सौत्रधात्वमरये
इतिकविकल्पद्रुमः ॥
उदपानं क्ली पुं कूपः इत्यमरः
उदयः पुं पूर्वपर्वतः उदयाचलः
समुन्नतिः इतिमेदिनी दीप्तिः
मंगलं इतिशब्दरत्नावली
उदयनं क्ली उदयः इतिमेदिनी
उदयनः पुं अगस्त्यमुनिः वत्सरा
जः इतिमेदिनी उदयनाचार्य्यः
सप्तकुसुमांजलिग्रंथकर्त्ता ॥
उदरं क्ली नाभिस्तनयोर्मध्यभागः
पेट इतिभाषा तत्पर्य्यायः ॥
पिचिंडः २ कुक्षी ३ जठरः ४ तुंदं
५ इत्यमरः युद्धं इतिमेदिनी ॥
उदररोगः पुं जठरव्याधिविशेषः
उदरी इतिभाषा तस्य निदान
सेप्ताष्टप्रकाराः रोगाः सर्वेतु
मेदोग्नौ सुतरामुदराणितु ॥

अजीर्णान्मलिनैश्चान्नैर्जायंते मल
संचयात् रुद्धास्वेदांबुवाहीनि
दोषाः स्रोतांसि संचिताः ॥
प्राणाग्न्यपानान् संदूष्य ॥
जनयेत्युदरं नृणां पृथग्दोषैः
समस्तैश्च प्लीहबद्धक्षतोदकैः
संभवंत्युदराण्यष्टौ तेषां लिंग
पृथक्पृथक् इतिनिदाने ॥
उदरग्रंथिः पुं गुल्मरोगः इति
हेमचंद्रः ॥
उदरत्राणं क्ली उदरबंधवस्त्रादि
तत्पर्य्यायः नागोदं २ इति ॥
हेमचंद्रः ॥
उदरथिः पुं समुद्रः सूर्य्यः इति
हेमचंद्रः ॥
उदरपिशाचः त्रि सर्वान्नखादकः
तत्पर्य्यायः सर्वान्नीनः २ सर्वान्न
भक्षकः ३ इतिहेमचंद्रः ॥
उदरंभरिः त्रि स्वोदरमात्रपूरकः
तत्पर्य्यायः कुक्षिंभरिः २
आत्मंभरिः ३ इतिहेमचंद्रः ॥
उदरामयः पुं रोगविशेषः
तत्पर्य्यायः अन्नरोगाधिः २ अतिसारः
३ इतित्रिकांडशेषः ॥
उदरावर्त्तः पुं नाभिः इति ॥
राजनिर्घंटः ॥
उदरिणी स्त्री गर्भवती इति ॥

हेमचंद्रः ॥
उदरिलः त्रि बृहदुदरयुक्तः ॥
भुँडा इतिभाषा तत्पर्य्यायः ॥
पिचिंडिलः २ बृहत्कुक्षिः ३ तुंदिः
४ तुंदिकः ५ तुंदिलः ६ उदरी ७
इतिहेमचंद्रः ॥
उदरी न् त्रि उदरिलः इति
हेमचंद्रः ॥
उदर्कः पुं उत्तरकालोद्भवफले
इत्यमरः भविष्यत् कालः इति
धरणी मदनकंटके मयना ॥
गाछरकांटा इतिभाषा इति
मेदिनी ॥
उदर्चिः स् त्रि उत्प्रभः इतिमेदिनी
उदर्चिः पुं अग्निः इतिमेदिनी
शिवः कंदर्पः इतिशब्दरत्नावली
उदर्दः पुं रोगविशेषः तस्य ॥
लक्षणं वरटीदष्टसंस्थानः शोथः
संजायते बहिः सकंडूस्तोद ॥
बहुलः छर्दिज्वर विदाहवान्
उदर्दमिति तं विद्यात्शीतपित्त
मथापरे वाताधिके शीतपित्त
मुदर्दश्च कफाधिके इतिनिदाने
उदलावणिकः त्रि लवणोदक
संसिद्ध व्यंजनादिः इति ॥
हलायुधः ॥

उदवसितं क्ली गृहं इत्यमरः ॥
उदश्वित् क्ली अर्द्धजलयुक्तघोले
इत्यमरः अस्यगुणाः लेयात् ॥
कुष्ठरोगनाशित्वं दाहतृष्णाश्रव
शोषनाशित्वं च इतिराजवल्लभः
उदात्तः पुं स्वरभेदः सत्त्ववेदगाने
उच्चैः स्वरः इत्यमरः दाने ॥
वाद्यविशेषः इतिशब्दरत्नावली
काव्यालंकार भेदः इतिमेदिनी
उदात्तं त्रि दयात्यागादिसंयुक्ते
इतिमेदिनी श्रेष्ठे दातृ ॥
महत् इतिहेमचंद्रः ॥
उदानः पुं कंठस्थवायुः इत्यमरः
तस्य कर्म्म ऊर्द्धनयनं इति ॥
श्रीधरस्वामी ऊर्द्धगमनवान् ॥
कंठस्थानी यांतः क्रमणवायुः इति
वेदांतः उदरावर्त्तः नाभिः ॥
सर्पविशेषः इतिमेदिनी पक्ष
इतिशब्दरत्नावली ॥
उदारः त्रि दाता महान्
अरज्वाशयः तत्पर्य्यायः दक्षिणः
२ सरलः ३ इत्यमरः ॥
उदावत्सरः पुं संवत्सरादि ॥
पंचांतर्गत वत्सर विशेषः ॥
अस्मिन्वर्षे रौप्यदाने महाफले
इतिविष्णुधर्मोत्तरे ॥
उदावर्त्तः पुं रोगविशेषः ॥




तत्पर्य्यायः गुदग्रहः २ इति ॥
हेमचंद्रः मलमूत्रवायुरोधक
रोगः तस्यनिदाने संप्राप्तिश्च ॥
वातविन्मूत्रजृंभास्तुतवोद्गार।
वमींद्रिये तहस्तोक्कृतनिद्राणां
हत्याद्यावर्तसंभवः इतिनिदाने
उदासः पुं उत् क्षेपः उद्भावः ॥
उदास्यपुंके त्रि ॥
उदासीनः पुं परतरः इत्यमरः
विजिगीषोः शत्रुमित्रभूमितो
व्यवहितः व्यवहितत्वादेव ॥
नोपकारी नाप्ययकारीकेवल
मूर्द्धमासीनइव इतिभरतः ॥
उदास्थितः पुं चरः द्वारपालः॥
अध्यक्षः इति हेमचंद्रः ॥
प्रव्रज्यावसितः नष्टसंन्यासः॥
इतिमेदिनी ॥ यः
उदाहरणं स्त्री दृष्टांतः तत्पर्य्या
उपोद्घातः २ उदाहारः ३
इतिशब्दरत्नावली पंच॥
न्यायावयवोंतर्गतमिदं ॥
उदाहारः पुं उदाहरणं इत्यमरः ॥
प्रकृतोपपादकदृष्टांतादिः इति
भरतः वृक्ति प्राप्त्यर्थनिदर्शनं
इतिसंज्ञः प्रकृतसिद्धार्थचिंता
इतिरायमुकुटः ॥
उदितः त्रि उक्तः वद्धः इत्यमरः

उद्गतः प्राप्तोदयः इति ॥
मेदिनी ॥
उदितोदितः त्रि शास्त्रज्ञः ॥
इति स्मृति ॥
उदीची स्त्री उत्तरादिक् इत्यमरः
उदीचीनं त्रि उदीच्यांभवं ।
उत्तरदिग्जातवस्तु इति हेमचंद्रः
उदीच्यः पुं शरावतिनद्याः ॥
पश्चिमोत्तरदेशः इत्यमरः ॥
उदीच्यं क्ली वालनामगंधद्रव्ये
वालइतिख्याते इत्यमरः॥
उदीरणं क्ली कथनं इतिहलायुधः
उदीर्णः त्रि उदारः महान् इति
जटाधरः ॥
उदुम्बरः पुं उडुंबरवृक्षः ॥
यज्ञडुमुर इति भाषा तत्पर्य्यायः
क्षीरवृक्षः २ हेमदुग्धः ३ सदाफलः
४ कालस्कंधः ५ यज्ञयोग्यः ६
यज्ञीयः ७ सुप्रतिष्ठितः ८ शीतवल्कः
९ जंतुफलः १० पुष्पशून्यः ११ पवित्रकः
१२ सौम्यः १३ शीतफलः १४
अस्यपक्वफलगुणाः मधुरत्वं।
हिमत्वं कृमिकारित्वंरक्तपित्त
तृष्णा मूर्च्छादाहनाशित्वंच अस्य
त्वपक्वफलगुणाः अतिशयशीतत्वं
मधुरत्वं पित्तश्रमशोषहारित्वंच
अस्यामफलगुणाः कषायत्वं

अग्निदीपनत्वं रुचिकारित्वं ॥
मांसवर्द्धकत्वं रक्तविकारकारित्वं
अस्यत्वग्गुणाः शीतत्वंकषायत्वं
व्रणनाशित्वं गर्भिणीगर्भ ॥
संरक्षकत्वं स्तनदुग्धदातृत्वंच
इतिराजनिर्घंटः कुष्ठविशेषः।
देहली गोवरादेस्तनीचेरकाठ ॥
इतिभाषा पंडकः नपुंसकं ॥
इतिहेमचंद्रः ॥
उडुंबरं क्ली ताम्रे इत्यमरः ॥
उडुंबरदला स्त्री दंतीवृक्षः इति
राजनिर्घंटः ॥
उडुम्बरपर्णी स्त्री उडुंबरपर्णी।
दंतिकावृक्षः इत्यमरः ॥
उदूखलं गुग्गुलुः इतिमेदिनी
तंडुलकंडनार्थकाष्ठमितपात्रे
उखलि इति भाषा तत्पर्य्यायः
उलूखलं २ इत्यमरः ॥
उद्गूढः त्रि ऊढः स्थूलः इति
मेदिनी।
उद्गतं त्रि उद्वांते ऊर्द्धितवस्तु॥
इत्यमरः ऊर्द्धगते उदिते ॥
उद्गमः पुं ऊर्द्धगमने उदयः।
उद्गमनीयं क्ली धौतवस्त्रद्वये
धोयायोड इति भाषा इत्यमरः
उद्गाढं क्ली अतिशयःतद्युक्तेत्रि
इत्यमरः ॥

उद्गाता पुं सामवेदज्ञः ॥
सामवेदविद्ब्राह्मणः इत्यमरः॥
उद्गावः पुं उद्गमने इत्यमरः ॥
शाहः इति भरतः केदराजेने।
ढेकार इति भाषा इति ॥
जटाधर तत्र नागवायुकर्म्म॥
इति क्षीरस्वामी ॥
उद्गीते त्रि उद्वेगीते इति ॥
देवीमाहात्म्य ॥
उद्गीथः पुं सामवेदभेदः प्रणवः
इत्यमरटीकायांभरतः सामवेद
ध्वनिः इत्यरुणः ॥ सामगाने
इतिसारसुंदरीसाम्नो ॥
द्वितीयोऽध्यायः इतिभगीरथः
उद्गूर्णं त्रि उद्यते इत्यमरः ॥
उत्तोल्यधृत वस्त्रादि इतिभरतः
उद्ग्राहः पुं उद्ग्रहणं ऊर्द्धीकृत्य
कस्यचित् ग्रहणं इत्यमरः ॥
विद्याविचारः इतिभरतः ॥
उद्ग्राहितः त्रि उद्धीर्णः वद्धः
ग्राहितः ॥ इति मेदिनी ॥
उपन्यस्तः इति हेमचंद्रः ॥
उद्घः पुं प्रशस्तः प्रकांडः ॥
इत्यमरः ॥
उद्घनः पुं यत्रकाष्ठेकाष्ठं ॥
निधायतक्ष्यतेतत् परकाठ इति
भाषा॥ इत्यमरः ॥



उद्घर्षणं स्त्री गात्रादिघर्षणं ॥
इष्टकयाउद्घर्षणगुणाः कंडुकोठ
नाशित्वं वह्निताग्नितेजनत्वं ॥
शिरासुखकारकत्वंच इति ॥
राजवल्लभः ॥
उद्घमे स्त्री मांसे इतिहारावली
उद्घाटः पुं गृहभेदः टौकिर॥
घर थाना इत्यादि भाषा इति
त्रिकांडशेषः ॥ (लनार्थ
उद्घाटकं स्त्री कूपाज्जलोत्ता।
यंत्रविशेषः तत्पर्य्यायः ॥
घटीयंत्रं २ इतिहेमचंद्रः ॥
उद्घाटनं स्त्री कूपात्जलोत्ताल
नार्थ रज्जुसहितघटः तत्पर्य्यायः
इति भरतः ॥
उद्घाटनः त्रि कृतोद्घाटने ॥
खोला इति भाषा ॥
उद्घाटितज्ञः त्रि प्राज्ञः इति॥
त्रिकांडशेषः ॥
उद्घातः पुं आरंभः इत्यमरः ॥
शास्त्र ग्रन्थपरिच्छेदः इति।
त्रिकांडशेषः पादस्खलने ॥ (प्रा
समुपक्रमः पवनाभ्यासयोगा

कुंभकादित्रयं उद्गमः मुद्गरे ॥
इतिमेदिनी ॥ (मः
उद्दञ्श त्यागे इतिकविकल्पद्रु

उद्दंशः पुं कीटविशेषः ॥
तत्पर्य्यायः मत्कुणः २ कोलकुणः
३ किटिभः ४ उत्कुणः ५ । इति
हेमचंद्रः ॥
उद्दंडपालः पुं सर्पविशेषः ॥
मत्स्यभेदः ॥ इतिमेदिनी ॥
उद्दंतुरः त्रि उत्तुंगः करालः
उत्कटदंतः इति मेदिनी ॥
उद्दानं स्त्री बंधने इत्यमरः ॥
उद्दमः क्ली वाडवाग्निः ॥
मध्यःलग्नः इतिविश्वः ॥
उद्दामः त्रि बंधनरहितः स्वतंत्रः
उद्दामदंतुरविधुंतुददंतघातैः
इतिप्रव्रज्या ॥
उद्दामः पुं वरुणः इतिमेदिनी
उद्दालः पुं बहुवारकवृक्षः
इत्यमरः वनकोद्रवः इति
रत्नमाला ॥
उद्दालकः पुं बहुवारकवृक्षः
इतिशब्दरत्नावली ॥
उद्दितः त्रि बद्धः इत्यमरः
टीकायांभरतः ॥
उद्दीपकः त्रि उद्दीपनकर्त्ता

उद्दीपनं स्त्री प्रकाशनेविभाव
विशेषः यथा आलंबनोद्दीपनाख्यौ
तस्यभेदावुभौस्मृतौ उद्दीपन ॥

विभावास्ते रसमुद्दीपयंतिये
तेव। आलंबनस्यचेष्टाद्यादेश
कालादयस्तथा चेष्टादीत्यादि
शब्दात् रूपभूषणादयः का
लादि इत्यादिशब्दात् चंद्रचंदन
कोकिलालाप भ्रमरझंकारादयः
इतिसाहित्यदर्पणे ॥
उद्दीप्तः त्रि प्रकाशितः ॥
उद्दीप्रं स्त्री गुग्गुलुः इत्यमर
टीकायां भरतधृत वाचस्पतिः
तद्देशः पुं अनुसंधाने अन्वेषा
णे उद्देशकः त्रि उद्देशकर्त्ता
उदाहरणे इतिलीलावती ॥
उद्देश्यः त्रि उद्देष्टव्यः ॥
उद्देशनीयः प्रयोजने ॥
उद्देहिका स्त्री कीटविशेषः
तत्पर्य्यायः उपजिह्विका २
उत्पादिका ३ वटिः ४ दिवी ५
इतिहारावली।
उद्धतः पुं राजमल्लः इति ॥
त्रिकांडशेषः ॥
उद्धते त्रि अविनीते इति ॥
हेमचंद्रः ॥ (मानः
उद्धतमनस्कत्वं स्त्री गर्वः अभि।
इतिशब्दरत्नावली ॥
उद्धरणं स्त्री उद्धारः वांतान्ने।


उन्मूलन इतिमेदिनी मुक्तिः
इतिशब्दरत्नावली ॥
उद्धर्षः पुं उत्सवः इत्यमरः ॥
उद्धर्षणं स्त्री रोमांचः इति
हेमचंद्रः ॥
उद्धवः पुं उत्सवः इत्यमरः ॥
यज्ञाग्निः यादवविशेषः इति
मेदिनी वृष्णीनांसंमतोमंत्री
कृष्णस्यदयितः सखाशिष्यो
बृहस्पतेः साक्षादुद्धवो बुद्धि
सत्तमः इतिश्रीभागवते ॥
उद्धानं स्त्री चुल्ली इत्यमरः ॥
उद्धानः त्रि उद्गमः वमितः इति
मेदिनी ॥
उद्धांतः पुं निर्मदहस्ती इत्यमरः
उद्धांतः इतिरमानाथः ॥
उद्धारः पुं ऋणं इत्यमरः ॥
उद्धृतिः इतिमेदिनी ॥
उद्धारं स्त्री उद्धाने उनत आकाशो
स्वामी ॥
उद्धारणं स्त्री उद्धारकरणे
उन्मालने ॥
उद्धारास्त्री गुडूची इतिशब्दचंद्रिका
उद्धूषणं स्त्री रोमांचः इति
हलायुधः ॥
उद्धृतः त्रि कृतोद्धरणे तोला।

इति भाषा तत्पर्य्यायः सनुदकः
२ इत्यमरः उतद्दित्नः यति ॥
मुक्तेज्झितः इतिमेदिनी ॥(पो
उद्ध्माने स्त्री चुल्ली इत्यमरटीका
भरतः ॥
उद्धः पुं नदः इतिव्याकरणं ॥
उद्बुद्धः त्रि विकसितः इति
हलायुधः ॥
उद्घोषः पुं किंचित् स्नानं ॥
उद्भटः पुं कच्छपः सूर्य्यः इति
मेदिनी ॥ (का
उद्भटः त्रि प्रवरः इतिनैषधटी
श्रेष्ठाशयः तत्पर्य्यायः महेच्छः
२ उदारः ३ उदात्तः ४ उदीर्णः ५
महाशयः ६ महामनाः ७ महात्मा
८। इति हेमचंद्रः ॥
उद्भवः पुं जन्म उत्पत्तिः ॥
इत्यमरः ॥
उद्भिजः त्रि उद्भिज्जः इत्यमर ॥
टीकायांरमानाथः ॥
उद्भिज्जं त्रि उद्भिद्यजातमात्रे।
उद्भूततरु गुल्मादि इत्यमरः ॥
उद्भित् त्रि उद्भिज्जं इत्यमरः ॥
तद्रूपंयथा हृक्षः १ गुल्मः २
लता ३ वल्ली ४ तृणं ५ (चः
उद्भिदे त्रि अगुल्मादिततः पर्य्या
उद्भित् उद्भिज्जे ३। इत्यमरः ॥

उद्दिज्ज ४ इतिरमानाथः ॥
उद्भिदं स्त्री पांशुलवणं पांश
लोन इतिभाषा इतिरत्नमाला
उद्भूते त्रि उत्पन्ने जाते ॥
उद्भूतरूपं स्त्री नयनगोचररूपं
यथा उद्भूतरूपंनयनस्यगोचरो
द्रव्याणि तद्वेति पृथक्त्व संख्या
विभागसंयोगपरापरत्वस्नेह द्रववं
परिमाणयुक्तं क्रियाजातीयोग
इतिसमवायेचताहृषं गृह्णाति
वक्तः संबंधादौलोकोद्भूतरूपयोः
इतिभाषापरिच्छेदः ॥
उद्भ्रमः पुं उद्वेगः इत्यमरः ॥
उद्भ्रांते स्त्री बाहुमध्यमध्यमंडलाकार
खड्गभ्रामणे इतिमहाभारते ॥
उद्यः पुं नदः इतिहेमचंद्रः ॥
उद्यतः पुं ग्रंथपरिच्छेदः इति
जटाधरः ॥
उद्यते त्रि उत्तोलनयुक्तवस्त्रादि
उद्यत शस्त्रादि तत्पर्य्यायः ॥
उद्गूर्णं २ इत्यमरः ॥
उद्यमः पुं उद्योगः तत्पर्य्यायः ॥
गुरणं २ इत्यमरः गूरणं
गोरणं ४ इतितट्टीका उत्साहः
५ अध्यवसायः ६ उद्योगः ७ इति
जटाधरः ॥
उद्याने स्त्री राजः साधारणवनं ॥

तत्पर्य्यायः आक्रीडः २ ॥
निःसरणे प्रयोजने इत्यमरः ॥
उद्यानपालः त्रि उद्यानरक्षकः
माली इति भाषा ॥
उद्यतः त्रि उद्यमयुक्तः उद्योग
विशिष्टः इत्यमरटीकायांभरतः
उद्योगः पुं यत्नः चेष्टा ॥
तत्पर्य्यायः उत्साहः २
अध्यवसायः ३ उद्यमः ४ इति
जटाधरः ॥ (गी
उद्योगी न् त्रि उद्योगविशिष्टः उद्य
तथाच उद्योगिनं पुरुष ॥ति
सिंहमुपैतिलक्ष्मीर्दैवेनदेयमिति
कापुरुषा वदंति दैवंनिहत्य ॥
कुरुपौरुषमात्मशक्त्यायत्नेकृते
यदिनसिद्ध्यति कोऽत्रदोषः ॥
इतिहितोपदेशः ॥
उद्योतः पुं आलोकः ज्योतिः
इतिहलायुधः ॥
उद्रः पुं जलजंतुविशेषः ॥
उद्बिडाल इति भाषा इत्यमरः
उद्रंकः पुं पुरविशेषः ॥
व्योमचारिपुरे क्षोभ मृद्रंकः ॥
प्रतिमार्गिकः इति जटाधरः ।
उद्रंगः पुं व्योमचारिपुरं तत् ॥
पर्य्यायः खपुरं २ ऊर्द्धगपुरं
३ हरिश्चंद्र पुरं ४ क्षोभे ५

प्रतिमार्गिकः ६ अङ्गा ७ अङ्गः ८
इतित्रिकांडशेषः ॥
उद्रथः पुं रथकीलं ताम्रचूड
पक्षी इतिमेदिनी ॥
उद्रिक्ते त्रि स्फुटे स्पष्टे इति ॥
जटाधरः ॥
उद्रेकः पुं उपक्रमः वृद्धिः
उद्रेका स्त्री महानिम्बः इति
राजनिर्घंटः
उद्वत्सरः पुं वत्सरः इति ॥
हेमचंद्रः ॥
उद्वंधने स्त्री ऊर्द्धवंधने गलायरज्जु
देतन फांसीदेत टाङ्गान
इत्यादिभाषा इतिस्मृतिः ॥
उद्वमने स्त्री उद्गीरणे तुलिया
फेलन वांतिकरणं इत्यादिभाषा
उद्वर्तः त्रि अतिरिक्तः उवरनवाड
इत्यादिभाषा यथा उद्वर्तोहि
ग्रंथः समधिकफलमावहेत् इति
व्याकरणटीका ॥
उद्वर्तने स्त्री उत्पतने विलेपने
वर्षणे इति मेदिनी शरीर
निर्मलीकरण गंधद्रव्यादि तत्
पर्य्यायः उत्सादने २ इत्यमरः
हरिद्रा बेसन उवटन इत्यादि
भाषासामान्यादर्द्वतनगुणाः कफ
वायुभेदो वातरोगनाशिनं ॥



अगस्त्येर्य्यं चर्म्मनिर्म्मलकारित्वेच
हारिद्राग्रहहर्तृनगुणाः केतूवेवर्ण
हृत्तत्राहारित्वेतिलोद्वहेनगुणाः
केतूहृत्वात्ता तद्दोषनाशित्वे
इतिराजवल्लभः ॥
उद्वहेवे स्त्री अतहीसः इति
त्रिकाण्डशेषः ॥
उद्वहितः त्रि उद्धृतः इति भूरि
प्रयोगः उद्वाहित इति वा पाठः
उद्वहः पुं पुत्रः इति हेमचन्द्रः
समवायान्तर्गतवायुविशेषः स
सप्तस्कन्धवायोरुर्द्धस्थितः इति
सिद्धान्तशिरोमणिः ॥
उद्वहा स्त्री कन्या पुत्री इति
हेमचन्द्रः ॥
उद्वान्तः त्रि उद्वमितः उद्वान्तः
इत्यमरटीकायां मुकुटः ॥
उद्वान्तः त्रि वमितवस्तु तत
पर्य्यायः उद्गतं २ इत्यमरः ।
उद्वान्तः पुं निर्मदहस्ती इति
मेदिनीकर जटाधरौ ॥
उद्वासनं क्ली मारणं वधः
इत्यमरः ॥
उद्वाहः पुं विवाहः इत्यमरः
तस्य लक्षणं भार्य्यात्वसम्पादकं
ग्रहणं तत्स्वीकाररूपस्नान
विशेषस्य समवाय विषयतयो
भेदात्वरकन्ययोर्विवाहकर्त्तृत्व
कर्म्मत्वे सत्व स च अष्टविधः ब्राह्मादय
यथा यथाकालेनालङ्कृता कन्या यत्र दीयते
स ब्राह्मः १ यत्र यज्ञस्थायर्त्विजे
कन्यादाने स दैवः २ यत्र
वरात् गोद्वयं गृहीत्वा तेनैव सह
कन्यादाने स आर्षः ३ यत्र
अनयासह धर्म्मं चरतामिति नियमं
कृत्वाकन्यादाने स कायः ४ यत्र
धनं गृहीत्वा कन्यादाने स आसुरः
यत्र कन्यावरयोरन्योन्यानु ॥
रागात् त्वं मे भार्य्या त्वं मे
पतिरिति निश्चयः स गान्धर्व्वः ६
यत्र बलात्कारेण कन्याहरणं
स राक्षसः ७ यत्र सुप्तायां मत्तायां
प्रमत्तायां वा कन्यायां निर्जने
गमनं स पैशाचः ८ तस्य निर्णयः
सगोत्रामनवरवयस्कां समान
प्रवरां पित्रपेक्षयोर्द्धतनषण्णां
पुरुषाणां पुत्रकन्यासन्तति
परम्परया प्रत्येकसप्तमीपर्य्यन्तां
अधस्तने तदपेक्षया सप्तमी
पर्य्यन्तां पित्रबन्ध्वपेक्षयोर्द्धतन
त्रयाणां प्रत्येकापेक्षया सप्तमी
पर्य्यन्तां अधस्तने तदपेक्षया सप्तमी
पर्य्यन्तां मातामह समानोदकां
मातामहापेक्षयोर्द्धतनचतुर्णां

पुरुषाणां पुत्रकन्यासन्तति
परम्परया प्रत्येकापेक्षया ॥
पञ्चमी पर्य्यन्तां अधस्तने ॥
तदपेक्षया पञ्चमी पर्य्यन्तां
मातृबन्ध्वपेक्षयोर्द्धतन चतुर्णां
प्रत्येकापेक्षया पञ्चमीपर्य्यन्तां
अधस्तने तदपेक्षया पञ्चमीपर्य्य
न्तां च कन्यां परित्यज्य उद्वाहः कर्त्तव्यः
पितृबन्धुमातृबन्धुविरहे पितयो
र्योग्यतामवलम्ब्य सप्तमीपर्य्य
न्तायाः पञ्चमी पर्य्यन्तायाश्च कन्यायाः
परिहारः वर्जनीयानां कन्यानां मध्ये
पितृमातृगोत्रान्तरितानां विवाह्या
पञ्चसप्तमगणनप्रतियोगि पितृ
पितृबन्धुपञ्चमगणनप्रतियोगि
मातामह मातृबन्धुगोत्रमादायैव
त्रिगोत्रगणने च इत्यसगोत्रा
विवाहे दोषाभावः मातृ
सपत्नीभ्रातृकन्या तद्दौहित्री
अध्यापयितृकन्या शिष्यकन्या
ब्रह्मदगुरुकन्याश्च परित्याज्याः विवाहः
कर्त्तव्यः अथ कन्यादानाधिकारिणः
आदौ पिता तदभावे पितामहः
तदभावे भ्राता तदभावे पितृ ॥
ज्ञातिः तदभावे मातामहः ॥
तदभावे मातुलः तदभावे माता
तदभावे मातामह ज्ञातिः ॥
एतेषामप्यभावे कन्या स्वयंवरं
कुर्य्यात् अथ विवाह पूर्व कर्त्तव्य
कर्म्म अवश्यभावि शुभाशुभ
ग्रहादिदोषशान्त्यर्थं होमादिरूप
गोवस्त्रदाने ततो नान्दीश्राद्धं ॥
लग्नसमये वरे उपस्थिते स्वस्ति
वाचनादिकं विधाय वरेण स्वाचारादि
ततः कन्यादाने यथाशक्ति धनदानञ्च
ततः स्वगृह्योक्तविधिनाग्निस्थापन
कुशण्डिकां समाप्य पाणिग्रहणं
सप्तपदीगमनञ्च कर्त्तव्यं ॥
ज्येष्ठेऽकृतविवाहे निर्वाहकर्त्ता
कनिष्ठः परिवेदन दोषविशिष्टो
भवति ज्येष्ठः परिवित्तः साकन्या
परिवेदनीया कन्यादातापरिदायी
तत्पुरोहितपरिकर्त्ता ते
सर्वे पतिताः किन्तु देशान्तरस्थ
क्लीबैकाण्ड वैमात्रेय वेश्यासक्त
शूद्रतुल्यातिरोगि जड मूकान्ध
बधिर कुब्ज वामन कुण्ठातिवृद्ध
नैष्ठिक ब्रह्मचारि वानप्रस्थाभिशस्त
कृषिसक्त नृपसक्त धनवृद्धिप्रसक्त
कामकारि स्तनकोन्मत्त चौरेषु
ज्येष्ठेष्वनूढेष्वपि कनिष्ठविवाहे
नदोषः एवं विकृतरूपानूढा
ज्येष्ठा कनिष्ठायाः सोदराया
ऊढायाः परिवेदनाय नभवति

इत्युद्वाहतत्त्वं ॥
उद्वाहनं क्ली विवाहः तत्पर्यायः
रणरणः २ इतित्रिकाण्डशेषः
द्विसीत्यं द्विवारकृष्टक्षेत्रं इति
हेमचन्द्रः
उद्वाहनी स्त्री वराटकः कडि इति
भाषा इति हेमचन्द्रः ॥
उद्वाहिकः त्रि उद्वाहसम्बन्धी
उद्वाहितः त्रि उद्वाहितः उद्धृतः
उद्वाहिनी स्त्री रज्जुः इतिमेदिनी
उद्वाहुः त्रि ऊर्द्ध्वबाहुः उद्वेग
शब्दार्थे हेमचन्द्रेणलिखितः ॥
उद्वाहुलकं क्ली ऊर्द्ध्वीकृतबाहुः
उद्वेगशब्दार्थे मेदिनी करेण
लिखितं
उद्विग्नः त्रि उद्वेगयुक्तः ॥
उद्वृत्तः त्रि उत्पलितः उत्क्षिप्तः
परिभुक्तोज्झितः उद्वान्तः इति
हेमचन्द्रः मेदिनीच उद्वृत्तः ॥
उद्वेगं क्ली गुवाकफलं इत्यमरः
उद्वेगः पुं उद्वेजने तत्पर्यायः ॥
उद्भ्रमः २ इत्यमरः चमत्कारः
इति भरतः विरहजन्यदुःखं ॥
इति रसमञ्जरी भयं इति ॥
हेमचन्द्रः उद्वाहुलकं उद्भ्रमने
इति मेदिनी ॥
उद्वेगः त्रि स्थिमितः शीघ्रगामी

ऊर्द्ध्वबाहुः इति हेमचन्द्रः ॥
उद्वेजनं क्ली उद्वेगः ॥
उधः क्ली ऊधः गरुडपालान्
इति भाषा इत्यमरटीकायां ॥
रमानाथः ॥
उध्रस ग उञ्छे इति कविकल्पद्रुमः
उध्रस क उत्क्षेपे उञ्छे इति ॥
कविकल्पद्रुमः ॥
उन्द इ य क्लेदे इति कविकल्पद्रुमः
उन्दरुः पुं उन्दुरुः इति ॥
द्विरूपकोषः ॥
उन्दुरः पुं मूषिकः इन्दुर इति
भाषा इति भरतो द्विरूपकोषश्च
उन्दुरुः पुं जन्तुविशेषः इन्दुर
इति भाषा तत्पर्यायः मूषिकः
२ आखुः ३ [illegible] गिरिका ४
बालमूषिका ५ नेउठे इन्दुर इति
भाषा इत्यमरः ॥ ता
उन्दुरुकर्णी स्त्री आखुकर्णील
इति राजनिर्घण्टः ॥
उन्दुरुः पुं मूषिकः इति ॥
हेमचन्द्रः ॥
उन्नः त्रि क्लिन्नः इत्यपरः इति
हेमचन्द्रः ॥
उन्नतः त्रि वर्द्धितः तत्पर्यायः
उच्चः २ प्रांशुः ३ उदग्रः ४
उच्छ्रितः ५ तुङ्गः ६ इत्यमरः ॥

उन्नतनाभिः त्रि उच्चनाभियुक्तः
तत्पर्यायः तुन्दिः २ इति ॥
हलायुधः ॥
उन्नतानतं त्रि उच्चनीचस्थानादि
तत्पर्यायः बन्धुरं २ इत्यमरः
उन्नतिः स्त्री गरुडभार्या समृद्धिः
उदयः इति हेमचन्द्रः ॥
उन्नतीशः पुं गरुडपक्षी इति
त्रिकाण्डशेषः ॥
उन्नमितः त्रि उत्तोलितः
ऊर्द्ध्वीकृतः इति श्रीधरस्वामी
उन्नयः पुं ऊर्द्ध्वनयने इत्यमरः
उन्नयनं क्ली वितर्कः इति ॥
हेमचन्द्रः ऊर्द्ध्वप्रापणे ।
उत्तोलने तोलन उठान ॥
इत्यादि भाषा ॥
उन्नायः पुं उन्नयः उन्नयनं ॥
इत्यमरः ॥
उन्नाहं क्ली काञ्जिकं इति ॥
हेमचन्द्रः ॥
उन्निद्रः त्रि प्रफुल्लः विकसितः
इति हेमचन्द्रः ॥
उन्मत्तः त्रि उन्मादयुक्तः वातुल (त
चित्तविभ्रमविशिष्टः पागल इति
भाषा तत्पर्यायः उन्मादवान्
२ इत्यमरः ॥
उन्मत्तः पुं धुस्तूरः मुचुकुन्दवृक्षः

इति मेदिनी ॥
उन्मदः त्रि उन्मादयुक्तः उद्गतमदः
तत्पर्यायः उन्मदिष्णुः २
इत्यमरः ॥ (लः
उन्मदिष्णुः त्रि उन्मदः उन्मादशी
इत्यमरः ॥
उन्मनाः स् त्रि उत्कण्ठितचित्तः
तत्पर्यायः उत्कः २ इत्यमरः
उन्मथः पुं मारणं वधः इति
हेमचन्द्रः ॥
उन्माथः पुं कूटयन्त्रं मृग
वधोपयुक्तयन्त्रं आमिषं दत्वा
मृगपक्ष्यादिबन्धनार्थं यत्संस्थानयेत्र
निवेश्यते सः इत्यमरः मारणं
घातकः इति मेदिनी ॥
उन्मादः पुं वातिकरोगविशेषः
तत्पर्यायः चित्तविभ्रमः २ ॥
इत्यमरः मतिभ्रंशः ३ उन्मनाः
४ इति राजनिर्घण्टः अस्य ॥
सम्प्राप्तिः मदयन्त्युद्धता दोषा ॥
यस्मादुन्मार्गमाश्रिताः मानसोऽयं
मतो व्याधिरुन्माद इति कीर्त्तितः
तस्य प्रकाराः एकैकशः सर्वशश्च
दोषैरत्यर्थमूर्च्छितैः मानसेन तत
दुःखेन सपञ्चविध उच्यते ॥
विषाद्भवति षष्ठश्च यथास्वं तत्र
भेषजं अस्य निदानं विरुद्ध

दुष्टाशुचि भोजनानिष्टदर्शनादे
वगुरुद्विजानां उन्मादहेतवर्भयहर्ष
पूर्वोमनोऽभिघातो विषमाश्च॥
चेष्टाः अस्यरूपैमेत्ल्यसत्वस्य
मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं
प्रदूष्य स्रोतांस्यधिष्ठाय मनो
वहानि प्रमोहयंत्याशु जनस्य
चेतः धीविभ्रमः सत्वपरिप्लवश्च
पर्य्याकुला दृष्टिरधीरता च
अबद्धवाक्त्वं हृदयं च शून्यं
सामान्यमुन्मादगदस्य लिंगमिति
निद्राग्रेष्यः औत्सुकासंतापादि
कारित मनोविपर्य्यासस्तद्व्य
प्रियाश्रितहृष्याव्यापारः इति
रसमंजरी॥
उन्मादः त्रि उन्मादरोगयुक्तः
क्षिप्तः उन्मत्तः पागल इति
भाषा इत्यमरटीकायां नीलकंठः
उन्मादनः पुं कामदेवस्य पंच
बाणांतर्गत बाणविशेषः इति
त्रिकांडशेषः॥ (शिष्टः
उन्मादवान् त्रि उन्मादरोगवि
उन्मत्तः इत्यमरः॥
उन्मानः पुं द्रोणपरिमाणं इति
वैद्यकपरिभाषा॥ (न्तः
उन्मिषितः त्रि प्रफुल्लः विकसि
इतिहेमचंद्रः॥

उन्मीलनं क्ली उन्मेषः वत्तमेला
इति भाषा इति हेमचंद्रः॥
विकाशः॥
उन्मीलितः त्रि विकसितः॥
प्रस्फुटितः [illegible]
उन्मुखः त्रि ऊर्द्धमुखः तत्पर्य्यायः
उत्पश्यः २ इतिहेमचंद्रः॥
उन्मुद्रः त्रि प्रफुल्लः विकसितः
इतित्रिकांडशेषः॥
उन्मूलिते त्रि उत्पाटिते
इतिहेमचंद्रः॥
उन्मेष क्ली वत्तुन्मीलनं वत्त
मेला इति भाषा इतिहेमचंद्रः
उपव्य प्रादिविंशत्युपसर्गांतर्गत
उपसर्गविशेषः अस्यार्थः अनुग्र
गतिः पश्चाद्भावः अनुकंपा॥
आधिक्यं हीनः सामीप्यं
प्राधान्यं इतिदुर्गादासः
दाक्षिण्यं सामर्थ्यं अत्ययः॥
भूषणं दोषाख्यानं निदर्शने
आश्चर्य्यकरणं दाने मारणे
व्याप्तिः लिप्सा उपालंभने॥
पूजा उद्योगः इतिशब्दरत्नावली
उपकंठः त्रि निकटः इत्यमरः
उपकंठ क्ली ग्रामांत तत्पर्य्यायः
उपशल्यं २ इतित्रिकांडशेषः
आस्कंदितं अश्व पंचम गतिः

इतिहेमचंद्रः कंठसमीपे॥
उपकरणं क्ली नृपादीनां छत्र
चामरादि तत्पर्य्यायः परिच्छदः
२ परिवर्हः ३ तंत्रं ४ इति
हेमचंद्रः भोजनादौ व्यंजनादि
पूजादौ नैवेद्यादि। मृग
वेधनादौ जालादि॥
उपकारः पुं उपकृतिः विकीर्ण
पुष्पादिः इति हेमचंद्रः
मेदिनी च॥
उपकारिका स्त्री उपकारकर्त्री
पिष्टभेदः इतिमेदिनी॥
राजगृहं इत्यमरः कुम्भूलः॥
मराथि इति भाषा इति
केचिदाहुरितिभरतः॥
उपकारी स्त्री राजगृहं इति
भरत एतद्द्विरूपकोषः॥
उपकारीन् त्रि उपकारविशिष्टः
उपकारकर्त्ता॥
उपकार्य्यः त्रि उपकाराचितः
इतिमेदि॥
उपकार्य्या स्त्री राजगृहं इत्यमरः
कुम्भूलः मराथि इतिभाषा
इतिकेचिदाहुरितिभरतः॥ (कः
उपकुंचिः स्त्री सूक्ष्मकृष्णजीरे
इतिरत्नमाला॥
उपकुंचिका स्त्री कृष्णजीरकः

सूक्ष्मैला इत्यमरः॥
उपकुंभं क्ली कुंभसमीपं इति
व्याकरणं
उपकुर्वाणः पुं ब्रह्मचर्य्यानंतरं
यो गृहस्थो भवति सः इति
पुराणं॥
उपकुल्या स्त्री पिप्पली पिपुल
इति भाषा इत्यमरः॥
उपकूपजलाशयः पुं कूपसमीपे
शिलादि निबद्धं पशुपानार्थंकृत
कूपोद्धृतांबुस्थानं इत्यमरः॥
उपक्रंता त्रि उपक्रमकर्त्ता।
आरंभकर्त्ता इतिव्याकरणं॥
उपक्रमः पुं ज्ञात्वारंभः॥
अयमस्योपायः अनेनेतत्
सिध्यतीति ज्ञात्वा प्रथमारंभः
उपधा राज्ञा धर्मकामार्थभयैः
अमात्यादेर्यत् परीक्षणं भावतत्व
निरूपणं प्रक्रमः प्रथमारंभः
इत्यमरः विक्रमः चिकित्सा।
इतिमेदिनी पलायनं इति॥
हेमचंद्रः॥
उपक्रोशः पुं निंदा इत्यमरः
उपक्रोष्टा पुं स्त्री गर्द्दभः इति
श्रीभागवतं निंदकः॥
उपक्वणः पुं प्रक्वणः वीणाशब्दः
इत्यमरटीकायां रायमुकुटः॥

उपगतः त्रि अङ्गीकृतः स्वीकृतः
इत्यमरः कृतमैथुनः ॥
उपगमः पुं अङ्गीकारः निकट
गमने इतिमेदिनी ॥
उपगूहने क्ली आलिंगने इत्यमरः
उपग्रहः पुं वंदी वंदुयान ॥
इतिभाषा इत्यमरः उपयोगः ॥
अनुकूलः इतिमेदिनी ॥ रः
उपग्रहणं क्ली उपाकरणेसंस्का
पूर्वक श्रुति ग्रहणे इत्यमर
टीकायांरायमुकुटः ॥
उपघ्राणः पुं उपढौकने ॥
भेटा डालि इत्यादि भाषा ॥
इत्यमरः ॥
उपघातः पुं रोगः इति ॥
राजनिर्घंटः ॥
उपघ्नः पुं निकटाश्रयः इत्यमरः
उपचक्रः चक्रवाकपक्षिविशेषः
अस्यमांसगुणाः लघुत्वलघुत्वं
उष्णवीर्यत्वे कटुपाकित्वेस्त्वाग्नि
हृद्धिकारित्वंच इतिराजवल्लभः
उपचयः पुं वृद्धिः उन्नतिः ॥
लग्नात् तृतीय षष्ठ दशमैका
दश स्थानानि इति ज्योतिषं
उपचरितं त्रि उपासितं ॥
सेवितं इत्यमरः ॥
उपचर्या स्त्री चिकित्सा इति
हलायुधः ॥
उपचाय्यः पुं यज्ञाग्निः इत्यमरः
उपचारः पुं रोगप्रतिकारः ॥
तत्पर्यायः उपचर्या चिकित्सा
२ रुक्प्रतिक्रिया ३ निग्रहः ४
वेदनानिग्रहः ५ क्रिया ६ उपक्रमः
७ शमः ८ इतिराजनिर्घंटः
सेवा व्यवहारः उत्कोचः ॥
इतिहेमचंद्रः ॥
उपचार्य्यः पुं चिकित्सा इति
हेमचंद्रः ॥
उपचितः त्रि दग्धः समृद्धः
इति विश्वमेदिन्यौ समाहितः
इतिविश्वः हेमचंद्रश्च निदिग्धः
लेपादिनावर्द्धितः इत्यमरः
उपचित्रा स्त्री मूषिकपर्णी उंदर
कानि इति भाषा इत्यमरः ॥
दंतीहस्तः इतिराजनिर्घंटः
उपजापः पुं भेदः विच्छेदः
इत्यमरः ॥
उपजिह्वा स्त्री कीटविशेषः
तत्पर्यायः उपदेहिका २ वम्री
३ उपदीका ४ इति हेमचंद्रः
आलजिह्वा इति ख्याता च
उपजिह्विका स्त्री घंटिका ॥
आलजिव इति भाषा तत्
पर्यायः प्रतिजिह्वा २ इति

राजनिर्घंटः कीटभेदः । तत्
पर्यायः उत्पादिका २ वादः ३
उद्देहिका ४ दिवी ५ इति ॥
हारावली ॥
उपजीविका स्त्री उपजीव्ये ॥
जीवनोपायः ॥
उपजोषं अ आमोदः इत्यमरः
उपज्ञा स्त्री आद्यज्ञाने इत्यमरः
तन्नुविनोपदेशेन प्रथमज्ञाने
यथावाल्मीकेः श्लोकनिर्माणेज्ञा
ने उपढौकनं क्ली पारितोषिकद्रव्य
भेटि डालि इत्यादिभाषा तत्
पर्यायः प्राभृतं २ प्रदेशनं ३
उपायनं ३ उपायस्ये ४ उपहारः
५ उपदा ६ इत्यमरः ॥
उपतप्ता पुं उपतापकमात्रे
तत्पर्यायः स्पर्शः २ स्प्रष्टा ३
इत्यमरः स्पष्टा ४ स्पर्ष्टा ५ इति
तट्टीका रोग इत्यन्ये इति ॥
भरतः ॥
उपतापः पुं त्वरा उत्तापः ॥
रोगइतिमेदिनी अशुभे ॥
पीडा इति शाहरत्नावली ॥
उपत्यका स्त्री पर्वतनिकटभूमिः
इत्यमरः ॥
उपदंशः पुं मद्यपानरोचक
तद्भक्ष्यद्रव्ये तत्पर्यायः ॥
अवदंशः २ चखणं ३ मद्यपासनं
४ इतिहेमचंद्रः मेढ्ररोग
विशेषः वात इतिभाषा तस्य
निदानं यथा हस्ताभिघातान्नख
दंतघातादधावनादत्युपसेवनाद्वा
योनि प्रदोषाच्चभवंति शिश्ने
पंचोपदंशाविविधा पचारैस्तच
वातिकादि भेदेन पंचविधः
तेषांप्रत्येकंलक्षणमुच्यते यथा
सतोद भेदस्फुरणैः सकृष्णैः
स्फोटैर्व्यवस्येत पवनोपदंशं
पीतैर्बहुक्लेदयुतैः सदाहैः
पित्तेनवक्तात् पिशितावभासैः
सकंडुरैः शोथयुतैर्महद्भिः ॥
शुक्लैर्घनैः स्राव युतैः कफेन
नानाविधस्राव रुजोपपन्नमसाध्य
माहुस्त्रिमलोपदंशं तेषां
असाध्य लक्षणं यथा ।
विशीर्णमांसं क्रिमिभिः प्रजग्धं
मुष्कावशेषं परिवर्जयेत्तं संजात
मात्रे नकरोति मूढः क्रियांनरो
योविषयेप्रसक्तः कालेनशोथ
क्रिमिदाहपाकैः प्रशीर्णशिश्नो
म्रियते सतेन श्रृंकुरैरिव ॥
संजातेरूपमध्ये पीडे सेस्थितेः
क्रमेण जायते वर्त्ति स्रावच्चु
शिखोपमा कोषस्याभ्यंतरेसंधौ

पर्वसंधिगतापिवा सवेदना ज्ञा
पिच्छिलावहुश्चिकित्स्यात्रिदोष
लिंगवतीति ख्याता लिंगार्शः
इति चापरे इति निदाने ॥
समष्ठिलहस्तः शिग्रहस्तः इति
राजनिर्घंटः देशान्ते ॥
उपदर्शकः पुं द्वारपालः इत्यमर
टीकासारसुंदरी ॥
उपदा स्त्री उपढौकनं इत्यमरः
उपदानकं क्ली उत्कोचः इति
त्रिकांडशेषः ॥
उपदिष्टः त्रि उपदेशप्राप्तः ॥
उपदी स्त्री वंदाकः परगाछा ॥
इति भाषा इति राजनिर्घंटः ॥
उपदेवता स्त्री यक्षभूतादिः ॥
उपदेशः पुं मंत्रकथने । तत्
पर्य्यायः दीक्षा २ यथा चंद्रसूर्य्य
ग्रहे तीर्थे सिद्धक्षेत्रे शिवालये
मंत्रमात्रप्रकथनमुपदेशः स
उच्यते इति रामार्चनचंद्रिका
कलावत्यादिदीक्षायामसामर्थ्ये
संदेयो यथा तत्राप्यशक्तः
कश्चिच्चेदन्नमभ्यर्च्यसादरं ।
तदंबुनाभिषिच्यार्थवा मूलेन
केकरं निधायाष्टोत्तरजपेनकर्णे
उपदिशेत्तस्य विधिः इति विश्व
सारतंत्रं हितकथने शिक्षणे

उपदेशी त्रि उपदेष्टा ॥
उपदेष्टा ऋ त्रि उपदेशकर्त्ता
उपदेहिका स्त्री कीटविशेषः
तत्पर्य्यायः उपजिह्वा २ वम्री ३
उपदीका ४ इतिहेमचंद्रः ॥
उपद्रवः पुं उत्पातः इति ॥
हलायुधः रोगारंभकदोष
प्रकोपजन्योऽन्यो विकारः इति
वैद्यकं ॥
ऊ
उपद्रष्टा त्रि उपदर्शकः ।
उदासीनवोधरूपत्वेन गुणप्रचार
दर्शी इति गीताटीका ॥
उपधर्म्मः पुं पाषंडः इति
श्रीभागवते ॥
उपधा स्त्री राज्ञो धर्म्मकामार्थ
भयैरमात्यादेर्य्यत् परीक्षणं
इत्यमरः पदानामुपांत्यवर्णे
इति व्याकरणे ॥
उपधातुः पुं अष्टप्रधानधातु
सदृशधातुः सप्तसप्तधा यथा
माक्षिके १ तुत्थकं २ अभ्रं ३
नीलांजनं ४ मनःशिला ५ हरिताले
६ रसांजनं ७ शारीरस्थधातु ॥
अथोपधातुः सप्तधा यथा ॥
रसात् स्तनदुग्धं १ रक्तात् स्त्रीरजः
२ मांसात् वसा ३ मेदसो घर्म्मः ४

अस्थ्नोदंतः ५ मज्जनः केशाः ६
शुक्रात् ओजः ७ इति वैद्यकं ॥
उपधानं क्ली शिरोधानं वालिश
इति भाषा तत्पर्य्यायः उपबर्हः
२ इत्यमरः गेंडुः ३ इति ॥
जटाधरः विषे प्रणयः इति ॥
मेदिनी व्रते इति हेमचंद्रः ॥
उपधानीयं क्ली उपधानं इति
शब्दरत्नावली ॥
उपधिः पुं कपटः इत्यमरः ॥
रथचक्रं इति हेमचंद्रः ॥
उपधूपितः त्रि आसन्नमरणः
परिधूपितः इति मेदिनी ॥
उपधृतिः स्त्री किरणः इति
हेमचंद्रः ॥
उपनतः त्रि उपस्थितः इति
हेमचंद्रः ॥
उपनयनं क्ली ब्राह्मण क्षत्रिय
वैश्यानां यज्ञसूत्र धारणादिरूप
प्रधानसंस्कारः तत्पर्य्यायः ॥
वटूकरणं २ इति त्रिकांडशेषः
उपनायः ३ उपनयः ४ आनयः
इति हेमचंद्रः तस्य कालः ।
ब्राह्मणस्य गर्भावधिषोडशवर्ष ॥
पर्य्यंतं तत्र गर्भाष्टमवर्षो मुख्यः

क्षत्रियस्य द्वाविंशति वर्ष पर्य्यंत
तत्रैकादशवर्षो मुख्यः वैश्यस्य
चतुर्विंशति वर्षपर्य्यंतं तत्र द्वादश
वर्षो मुख्यः इति स्मृतिः ॥
तस्यानुष्ठानक्रमः तत्र प्रथमे
प्रातः कृतस्नानः कृतवृद्धिश्राद्धः
पिता कृतवृद्धिश्राद्धेन पित्रान्य
एव वाचार्य्याहृतं स्तदसंभवे माणवक
हेतोर्वा समुद्भवनामानमग्निं
संस्थाप्य विरूपाक्ष जपांते
कुशंडिकां समाप्य माणवकं
प्रातर्भोजयित्वा अग्न्युत्तरतानीत्वा
शिखया सह मुंडिते स्नापिते
कुंडलाद्यलंकृते क्षौमवस्त्राहृते
तदसंभवे शुक्ला हृत कार्पासेक
वस्त्राहृते माणवकं दक्षिणे पूर्वाभि
मुखं निधाय प्रकृत कर्म्मारंभे
समंत महाव्याहृति होमं कुर्यात्
तत आचार्य्यः पंचभिर्मंत्रैः
पंचाहुतीर्जुहुयात् तत आचार्य्यः
उदगग्रेषु कुशेषु कृतांजलिः
प्राङ्मुख ऊर्द्धस्थितेनाग्न्याचार्य्ययो
र्मध्ये माणवकोपि कृतांजलि
राचार्य्याभिमुख उदगग्रेषु कुशेषु
ऊर्द्ध्वस्थितेन माणवकस्य दक्षिणतः

स्थितो मंत्रवान् ब्राह्मणमाणवकस्य
अंजलिमुदकेन पूरयति पश्चात्
आचार्य्यस्यापि ततो गृहीत
जलांजलिं माणवके पश्यन् मंत्रे
जलांजलिराचार्य्यो गृहीत ॥
जपति तत आचार्य्यो माणवकं
मंत्रं पाठयति ततो माण ॥
वकस्याभिवादनार्थं देवताश्रयं
नक्षत्राश्रयं गोत्राश्रयं वा माणवक
नामकल्पयित्वा आचार्यो माणवके
कथयति तत आचार्य्यो माणवकं
मंत्रेण नामधेयं पृच्छति माणवकः
पूर्वाचार्य्य कल्पितं नाम मंत्रेण
कथयति तत आचार्य माणवको
पूर्वगृहीत जलांजली त्यजेतां ।
आचार्यस्तु दक्षिणेन पाणिना
माणवकस्य सांगुष्ठं दक्षिणं पाणिं
मंत्रेण गृह्णाति ततो गृहीत
माणवक हस्तो मंत्रं जपत्याचार्यः
ततो माणवकमाचार्यो मंत्रेण
प्रदक्षिणेन भ्रामयित्वा प्राङ्मुख
करोति ततो माणवस्य दक्षिण
स्कंधे स्पृष्ट्वा अवतीर्णेन दक्षिण
पाणिना अथवहितं नाभिहितं
आचार्यो मंत्रेण स्पृशति ततो
माणवकस्य नाभ्यरूपरिदेशे ॥
मंत्रेण आचार्य्यः स्पृशति ततः
मानवकस्य हृदयदेशं मंत्रेणाचार्य्यः
स्पृशति ततो दक्षिणेन पाणिना
स्पृशन् मंत्रं जपति ततो वामेन
पाणिना माणवकस्य वामस्कंधं
स्पृशन् मंत्रं जपति ततो वामेन
स्पृशन्नाचार्य्यो मंत्रं जपति
अथाचार्य्यो माणवकं मंत्रेण
संबोधयति अथ संबोधिते
माणवके आचार्य्यः मंत्रेण प्रेषयति
ब्रह्मचारी तु सर्वं ब्रवाछमिति ब्रुयात्
ततोऽग्नेरुत्तरभागे गत्वा आचार्य्य
उदगग्रेषु कुशेषु प्राङ्मुख ॥
उपविशति तत आचार्य्याभिमुखो
माणवकः पातित दक्षिणजानुः
उदगग्रेषु कुशेषु उपविशति ततः
प्रवरसंख्यायांच वा त्रयो वा मेखला
यज्ञोपवीतरूपग्रंथयः कर्त्तव्याः
अथैनं माणवक माचार्य्यस्त्रिः
प्रदक्षिणं कारयित्वा त्रिहतां मुंज
मेखलां परिधापयन् मंत्रं हृदये
वाचयति ततो यज्ञोपवीतं
कृष्णसाराजिनान्वितं आचार्य्यो
माणवकं मंत्रेण परिधापयेत्
ततो माणवक आचार्यस्य उपसत्त्रो
भवति ततस्तं अपसत्त्व माणवकं
आचार्य्यः प्रथमे पादं पादं ॥
ततोऽर्द्धर्चं ततः कृत्स्नां सावित्रीं।

अध्यापयेत् तत आचार्य्यो
माणवकं महाव्याहृतीरेकैकशः
कृत्वा प्रणव यविकामध्यापयेत्
ततो वैल्वं पालाशं वा माणवक
परिमाणं दंडं माणवकाय प्रयच्छे
त् आचार्य्यो माणवकं मंत्रं वाचय
अथ गृहीत दंड ब्रह्मचारी ॥
ततो मातरं वेथून् ततः पितरं
ततः पितरं वेथून् ततोऽन्या ॥
प्रार्थयेत् ततः सर्वं लब्धभैक्ष
आचार्य्याय वेदयेत् ततः
पूर्ववदाचार्यो व्यस्त समस्त
महाव्याहृति होमं कृत्वा प्रादेश
प्रमाणं हुत्वाक्त समिधं
तूष्णीमग्नौ हुत्वा प्रकृत कर्मसमा
उदीच्य शाट्यायन होमादि॥
वामदेव्य गानान्तं कर्म निर्वर्त्तयेत्
ततः यदि पितैवाचार्य्यस्तदा ॥
कर्मकारयितृ ब्राह्मणाय दक्षिणां
दद्यात् अथान्यश्चाचार्य्यस्ततः
तदायेन हुतः तस्मै दक्षिणां
दद्यात् ब्रह्मचारी तु तस्मिन्नेव स्थाने
दिनान्ते यावत्तावत्तिष्ठेत् ततः
प्राप्तायां संध्यायां संध्यामुपास्य
कुशकंडिकोक्त विधानेन समुद्भव
नामानमग्निं संस्थाप्य मंत्रं जपन्
दक्षिणं जानु भूमौ निधाय दक्षिण
पश्चिमोत्तर क्रमेण उदकांजलि
मेक मग्निपर्य्युक्षणेन च कृत्वा
समिद्धोमं कुर्य्यात् ततः प्रादेश
प्रमाण हुताक समिधत्रयं गृहीत्व
आघारयोस्तूष्णीं मध्ये समंत्रके
अग्नौ जुहुयात् ततः कर्मशेषोक्त
क्रमे दक्षिणपश्चिमोत्तर क्रमेण
उदकांजलि सेकं कुर्य्यात् ततः
ब्रह्मचारी अग्निमभिवाद्य मंत्रेणाग्नि
विसृज्य [illegible] संध्यायां
भिक्षालब्धमन्नं क्षारलवणवर्ज्जितं
सहुत मुदकेनाभ्युक्ष्य भक्षण
प्रकरणोक्त विधिना भुंजीत
एतद्ब्राह्मिकर्म समावर्तन पर्य्यंत
प्रत्यहं सायं प्रातः कर्त्तव्यं
इत्युपनयन कर्म समाप्तं इति
भवदेवभट्टः ॥
उपनायः पुं उपनयने इति
हेमचंद्रः ॥
उपनाहः पुं वीणादितंत्रबंधन
स्थाने तत्पर्य्यायः निबंधनं २
इत्यमरः व्रणलेपपिंडः प्रलेप
इति भाषा इति मेदिनी ॥
उपनिधिः पुं उपन्यस्तवस्तु स्थाप्य
द्रव्यं तत्पर्य्यायः न्यासः २

इत्यमरः ॥
उपनिषत् स्त्री धर्मः वेदान्तशास्त्रे
निर्जनस्थाने इति मेदिनी ॥
समीपसदने इति त्रिकाण्डशेषः
तत्त्वे इत्यमरटीकायां भरतः ॥
उपनिष्करं क्ली पुरपथः इत्यमरः
राजपथः इति हेमचन्द्रः
उपनिष्क्रमणं क्ली राजपथः इति
हेमचन्द्रः निष्क्रमणनामसंस्कारः
उपनीतः पुं कृतोपनयनः इति
स्मृतिः निकटप्राप्तेत्रि ॥
उपन्यासः पुं वाक्योपक्रमः
तत्पर्यायः ॥ वाङ्मुखं २
इत्यमरः ॥
उपपतिः पुं जारः नौ इति
भाषा इत्यमरः तस्य लक्षणं ॥
आचारहानिहेतुः पतिः स्त्रीणां
चतुर्विधः सार्वकालिकपरांग
पराङ्मुखत्वेसति सर्वकालमनु
रक्तोऽनुकूलः १ सकलनायिकावि
षयसमसहजानुरागो दक्षिणः २
भूयोनिःशंकः कृतदोषोपिभूयो
निवारितोपि भूयःप्रश्रयपरायणो
धृष्टः ३ कामिनीविषयकपटपटुः
शठः ४ इति रसमञ्जरी ॥
उपपत्तिः स्त्री संगतिः निर्हृतिः
समाधाने सिद्धान्तः ॥

उपपदं क्ली लेशः इति
त्रिकाण्डशेषः समीपोच्चारणीय
पदं यथा गामोतरे शर्म्म ॥
कुमादि समति ख्यातस्वार्थ
बोधकपदे यथा प्रहारादौ
प्रादि इति व्याकरणं
उपपातकं क्ली पापविशेषः
तत्र ऊनपंचाशद्विधं यथा
गोवधः १ अयाज्ययाजनं २
परदारगमनं ३ आत्मविक्रयः ४
गुरुत्यागः ५ मातृत्यागः ६ पितृ
त्यागः ७ वधो शुश्रूषाद्यकरणे
त्यागः स्वाध्यायत्यागः ८ सतत
सर्वदा ब्रह्मयज्ञत्यागः अधीत
वेदाविस्मरणेच अग्नित्यागः ९ सतत
स्मार्ताग्निहोत्रत्यागः सुतत्यागः
१० सन्ततस्यसंस्कारभरणाद्यकरणं
परिवित्तिता ११ सानकनिष्ठेन
आदौ विवाहे कृते ज्येष्ठस्यपरि
वेदनं १२ तत्र अकृतस्य कृतदारज्येष्ठ
सत्वे कनिष्ठस्य तयोः कन्यादानं
१३ तयोर्याजनं १४ तत्र तयोरेव
विवाहादौ यौरहित्यं कन्यायाः
दूषणं १५ तत्र मैथुन वर्जमंगुली
प्रक्षेपादिना दूषणं अंगुल्या योनि
विदारणमिति यावत् वार्धुष्यं
१६ तत्र निषिद्ध वृद्धिजीवनं ॥

व्रतलोपः १७ सतत ब्रह्मचारिणो
मैथुने उडाग विक्रयः १८
आराम विक्रयः १९ दाराविक्रयः
२० अपत्य विक्रयः २१ व्रात्यता
२२ सात यथाकालमनुपयने
बांधवत्यागः २३ भृताध्यापनं २४
तत्र प्रतिनियत वेतन ग्रहण
पूर्वमध्यापने भृताध्ययने २५
तत्र वेतन प्रदान पूर्वकाध्ययने
अपण्यानां विक्रयः २६ सतत तिल
लाक्षागोरसादीनां ब्राह्मणेन
विक्रयः सर्वाकरेष्वधीकारः २७
सततस्वर्णाद्युत्पत्तिस्थानेषु राजा
ज्ञया अधिकारः महायन्त्रप्रवर्तने २८
तत्र महतो उदकप्रवाहप्रतिबं
धहेतूनां सेतुबंधादीनां प्रवर्तने
अथवा तैलादि यंत्रस्य प्रवर्त
नेजानादियंत्रस्यव तषधिहिंसने
२९ तत्र धान्यादीनां यथा
कथंचिन्नाशः स्त्र्याजीवः ३० सतत
भार्य्यादि स्त्रीणां वेश्यात्वे कृत्वा
तदुपजीवनं अभिचारकर्म्म ३१
तत्र श्येनादिना यज्ञेन ॥
अनपराद्धस्य मारणे मूलकर्म्म
३२ तत्र मंत्रौषधादिना ॥ (मारणे)
वशीकरणं इंधनार्थमशुष्कद्रु
छेदने ३३ आत्मार्थे क्रियारंभः


३४ सतत अनातरस्य देवपितृ
पुद्देशमंतरेण पाकाद्यनुष्ठाने
निंदितान्नस्य भक्षणे ३५ तत्र
लशुनादेः सकृदनिच्छया अथवा
गणकदेवल तस्करान्नभक्षणे
अनाहिताग्निता ३६ सतत
समर्थस्य श्रौतस्मार्ताग्न्यपरिग्रहः
स्तेयं ३७ तत्र स्वर्णद्व्यादन्य
सारद्रव्यापहरणं देवर्षि ॥
पितॄणां ऋणाशोधनं ३८
असत् शास्त्राभिगमने ३९ तत्र
श्रुतिस्मृति विरुद्ध शास्त्र
शिक्षणं पाखंड शास्त्राभ्यासो वा
कौशीलव्यक्रिया ४० सतत नौर्य्य
त्रिकस्य सततानुष्ठाने धान्यस्तेये
४१ पशुस्तेये ४२ कुप्यस्तेये ४३
मद्यपस्त्रीनिषेवने ४४ स्त्रीवधः ४५
शूद्रवधः ४६ वैश्यवधः ४७ क्षत्रिय
वधः ४८ नास्तिक्यं ४९ तत्र अदृष्टार्थ
कर्माभावबुद्धिः नास्ति परलोक
इति वा इति मनुः मूलपाणिश्च
उपपात्यं क्ली उपपातकं इति
स्मृतिः ॥
उपपुरं क्ली शाखानगरं इति
हेमचन्द्रः ॥
उपपुराणं क्ली व्यासोक्ताष्टादश
पुराणसदृशानामन्यमुनिप्रणीताष्टदशा

पुराणे यथा आद्ये
सनत्कुमारोक्तं २ नारसिंहमतः
परं ३ तृतीयं वायवीयञ्च ४
कुमारेणानुभाषितं चतुर्थं
शिवधर्म्माख्यं ५ साक्षान्नन्दीश
भाषितं दुर्वाससोक्तमाश्चर्यं ६
नारदीयमतः परं ७ नन्दिकेश्वरं
युग्मञ्च ८ तथैवोशनसेरितं ९
कापिलं १० वारुणं ११ शाम्बं १२
कालिकाह्वयमेव च १३ माहेश्वरं
१४ तथा पद्मं १५ दैवं १६
सर्वार्थसाधकं पराशरोक्तमपरं
१७ मारीचं १८ भास्कराह्वयं १८
इति कूर्मपुराणे ॥
उपपुष्पिका स्त्री जृम्भा हाइ इति
भाषा तत्पर्यायः हापिका २
इति हारावली ॥
उपप्रदानं क्ली उत्कोचः घुस
इति भाषा इति हेमचन्द्रः ॥
उपप्लवः पुं राहुग्रहः विप्लवः
उत्पातः इति मेदिनी ग्रहणे
यथा उपप्लवे चन्द्रमसो रवेश्च
इति स्मृतिः ॥
उपभृत् स्त्री चक्राकारयज्ञपात्रं
इत्यमरः ॥
उपभोगः पुं भोजनातिरिक्त ॥
भोगः तत्पर्यायः निर्वेशः २
॥ इत्यमरः ॥
उपमा स्त्री उपमाने सादृश्ये
इत्यमरः ॥
उपमाता स्त्री धात्री इति जटाधरः
मातृसदृशी सा षड्विधा यथा मातुः
स्वसा मातुलानी पितृव्यस्त्री पितृ
स्वसा श्वश्रूः पूर्वजपत्नी च मातृतुल्याः
प्रकीर्त्तिताः इति स्मृतिः ॥
उपमानकर्म्मरि त्रि ॥
उपमानं क्ली उपमा इत्यमरः
उपमितिः स्त्री उपमा । इति
शब्दरत्नावली न्यायमते सादृश्य
ज्ञानजन्यज्ञाने यथा गोसदृशो
गवयपदवाच्य इत्याकारकज्ञाने
अस्य करणं गवादिसादृश्यवत्
पिण्डप्रत्यक्षं । अस्य व्यापारः
अतिदेशवाक्यार्थस्मरणं इत्युपमान
खण्डे अपि च ग्रामीणस्य प्रथमतः
पश्यतो गवयादिकं सादृश्यधी
र्गवादीनां यास्यात् सोपमितिः
स्मृता वाक्यार्थस्यातिदेशस्य
स्मृतिर्व्यापार उच्यते गवयादि
पदानां तु शक्तिधीरुपमाफलं
पदज्ञानं तु करणं शक्तिधीरुपमफलं
इति भाषापरिच्छेदः ॥
उपमेतः पुं शालवृक्षः इति
शब्दचन्द्रिका ॥

उपयन्ता पुं पतिः इति जटाधरः
उपयमः पुं विवाहः इत्यमरः
उपयाचकः त्रि समीपयाच्ञाकर्त्ता
उपयाचितं त्रि स्वेष्टसिद्धये देवाय
देयं वस्तु तत्पर्यायः दिव्य ॥
दोहदं २ इति त्रिकाण्डशेषः ॥
उपयाचितकं त्रि उपयाचितं
स्वेष्टलब्धये देवदेयं इति ॥
जटाधरः ॥
उपयामः पुं विवाहः इत्यमरः
उपयुक्तः त्रि योग्यः उचितः
उपयोगः पुं आचरणे इति ॥
विजय रक्षितः इष्टसिद्ध्यर्थ ॥
व्यापारः इति विश्वमिश्रः ॥
उपयोगिता स्त्री उपयोगिनो भावः
फलसाधनता प्रयोजने ॥
आनुकूल्ये ॥
उपयोगी न् त्रि उपयुक्त इत्यादिः
क्रियासाधने अनुकूलः ॥
उपयोषं व्य उपजोषं आनन्दः
इत्यमरटीकायां भरतः ॥
उपरक्तः पुं राहुग्रस्तः सूर्य्यश्चन्द्र
इत्यमरः राहुः इति ॥
हेमचन्द्रश्च ॥
उपरक्तः त्रि व्यसनार्त्तः ॥
दैव मानुषान्यतर पीडायुक्तः
इत्यमरः ॥
उपरतः त्रि मृतः इति स्मृतिः
विरतः ॥
उपरतस्पृहः त्रि सत्यपि सति
स्वगतधनेच्छारहितः स्वसमानाधि
करण स्वत्व समान कालीनेच्छा
प्रागभावासमान कालीनेच्छा
ध्वंसवान् इति दायतत्त्वं ॥
इच्छारहितः ॥
उपरतिः स्त्री विरतिः इति
हेमचन्द्रः निगृहीतेन्द्रियाणां
विषयेभ्य उपरमणं अथवा विहित
कर्म्मणां विधिना परित्यागः इति
वेदान्तः ॥
उपरमः पुं उपरतिः इति ॥
हेमचन्द्रः ॥
उपरसः पुं उपधातुः तद्यथा
खर्परं अञ्जनं कंकुष्ठं ॥
गन्धारी गैरिकं क्षितिनागः
शैलेयं इति राजनिर्घण्टः ॥
उपरक्षणं क्ली रक्षणार्थं सैन्य
स्थापने चौकी इति ख्याते ॥
तत्पर्यायः सज्जनं २ इत्यमरः
उपरागः पुं राहुग्रस्तश्चन्द्रः सूर्य्यश्च
इत्यमरः राहुः विगानं ॥
परीवादः इति हेमचन्द्रः ॥
दुर्नयः ग्रहकल्लोलः व्यसने
इति मेदिनी ॥

उपरामः पुं निवृत्तिः तत्पर्य्यायः
आरतिः २ अवरतिः ३ विरतिः
४ इत्यमरः विरामः ५ आरामः ६
उपरतिः ७ उपरमः ८ ॥
उपरि अ ऊर्द्ध्वं उपर इति भाषा
इति व्याकरणं ॥
उपरिष्टात् अ उपरि ऊर्द्ध्वं ॥
इति हेमचंद्रः ॥
उपरीतकः पुं शृंगारबंधविशेषः
आसन बांधन इत्यादि भाषा ॥
तस्य लक्षणं यथा एकपादम्
रौ हृत्वा द्वितीयः स्कंधसंस्थिते नारी
कामयते कामी बंधः स्यादुपरीतकः
इति रतिमंजरी अत्र
विपरीतकोपि पाठः ॥
उपरोधः पुं अनुरोधः ॥
उपरोधकं क्ली गर्भागारं ॥
वासगृहं इति शब्दरत्नावली
उपर्य्युपरि अ ऊर्द्ध्वोर्द्ध्वं ।
उपरा उपरि इति भाषा ॥
सामीप्यं यथा उपर्य्युपरि ग्रामं
इति व्याकरणं ॥
उपलः पुं पाषाणः रत्नं इति
मेदिनी ॥
उपलप्रियः पुं वमस्नामवनतं
इति राजनिर्घंटः ॥
उपलब्धा स्त्री आख्यायिका ॥ इत्यमरः हितोपदेशादिकथा
उपलब्धिः स्त्री मतिः प्राप्तिः
ज्ञानं इति मेदिनी ॥
उपलभेदी पुं पाषाणभेदीवृक्षः
इति राजनिर्घंटः ॥
उपलंभः पुं अनुभवः इत्यमरः
उपलभ्यः त्रि लब्धः लब्धोपयुक्तः
यथा उपलभ्यः साधुः इति ॥
मुग्धबोधव्याकरणं ॥
उपलम्भः पुं आश्रयः अवलंबं
उपलक्षणं क्ली अजहत्स्वार्थलक्षणा
एकपदेन तदर्थान्यपदार्थकथनं
यथा देशान्तरे मृतपत्नी साध्वी ॥
तत्पादुकाद्वयं निधायोरसि
संप्रहृष्टा प्रविष्टा जातवेदसं ॥
अत्र पादुकाद्वयमित्युपलक्षणं
द्रव्यान्तरमपि इति सुहितत्व
स्वसिद्धये पराक्षेपः परार्थं स्व
समर्पणं उपादानलक्षणेवस्तुका
मुद्दैव साद्दिथा यथा कुंताः
प्रविशंति इत्युपादाने गंगायां
घोषः इत्युपलक्षणं इति ॥
काव्यप्रकाशः ॥
उपला स्त्री शर्करा इति मेदिनी
उपलिंगं क्ली उपद्रवः अरिष्टं ॥
इति हेमचंद्रः ॥
उपलेपनं क्ली गोमयादिलेपनं

इति त्रिकांडशेषः ॥
उपवटः पुं प्रियालवृक्षः इति
राजनिर्घंटः ॥
उपवनं क्ली कृत्रिमवनं बागान
इति भाषा तत्पर्य्यायः ॥
आरामः २ इत्यमरः ॥
उपवर्तनं क्ली जनपदः जनपद
समुदायः जनपदैकदेशः ॥
सजलनिर्जलस्थानमात्रे इति
भरतः तत्पर्य्यायः देशः २
विषयः ३ इत्यमरः ॥
उपवर्षः पुं मुनिविशेषः ॥
तत्पर्य्यायः हलभूतिः २
कृतकोटिः ३ अयाचितः ४ इति
त्रिकांडशेषः ॥
उपवर्हः पुं उपधानं बालिश।
इति भाषा इत्यमरः ॥
उपवल्लिका स्त्री अमृतस्रवालता
इति राजनिर्घंटः ॥
उपवसथः पुं ग्रामः इति
हेमचंद्रः ॥
उपवस्तः क्ली उपवासः इत्यमरः
उपवासः पुं अनाधानं
इति मलमासतत्वे अहोरात्र ॥
भोजनाभावः तत्पर्य्यायः ॥
उपवस्तं २ इत्यमरः उपोषितं
३ उपोषणं ४ औपवस्तं ५
इति तट्टीका अस्य प्रमाणं ॥
उपावृत्तस्य पापेभ्यो यस्तु वासो
गुणैः सह उपवासः स विज्ञेयः
सर्वभोगविवर्जितः अस्यार्थः
उपावृत्तस्य निवृत्तस्य पापेभ्यः
पापकर्मभ्यः गुणाः सर्वभूतेषु दया
क्षान्तिः अनसूया शौचं अनायासः
मंगलं अकार्पण्यं अस्पृहा च
सर्वभोगविवर्जितः शास्त्राननुमत
नृत्य गीतादि सुख रहितः ॥
वैधोपवासे भोजन चतुष्टय
निवृत्तिमाह महाभारते साय
माद्यन्तयोरह्नोः सायं प्रातश्च
मध्यमे उपवासकाले प्रेप्सावर्ज्यं
भक्तचतुष्टये उपवासदिने
वर्जनीयानि अंजने रोचने ।
गंधः पुष्पं माल्यं अलंकारः
दंतधावनं गात्राभ्यंगः
शिरोभ्यंगः तांबूलं यत्नान्यत्
बलरागकृत् दिवास्वापः ॥
अक्षक्रीडा मैथुनं स्त्रीणां
सरागसंभाषणस्पर्शादिषु
पुत्रोत्पत्तिपर्यन्तं ऋतौ सकृत्
स्त्रीगमने न दोषः तन्दुलीयाः
दिनी वर्जनीयानि कांस्यपात्रे
भोजनं मांसभोजनं सुरापानं
मधुपानं लोभः वितथभाषणं



व्यायामः व्यवायः दिवास्वापः
अञ्जनं शिलापिष्टभक्षणं ॥
मसूरभक्षणं पुनर्भोजनं अध्व
गमनं यानं आयासः पुत ॥
क्रीडाभ्यंगः परान्नं तैले ॥
चणके कोरदूषके शाके ॥
अधिकहते अत्यंबुपाने इति ॥
एकादशी तवे उपवासासमर्थो
प्रतिनिधिः पुत्रं वा विनयोपेतं
भगिनीं भ्रातरं तथा एषामभाव
एवान्यं ब्राह्मणं विनियोजयेत्
इति स्कंदपुराणे भार्य्या भर्त्तृ ॥
व्रतं कुर्य्यात् भार्य्यायाश्च पतिस्तथा
असामर्थ्ये द्वयोस्ताभ्यां व्रतभंगो
न जायते इति गरुडपुराणे ॥
तदनुकल्पः नक्तं हविष्यान्न
मनोदनं च फलं तिलाः क्षीरं ॥
मप्यो तु वाज्यं पंचगव्यं यदि
वाथ वायुः प्रशस्तमुत्तरमुत्तरं व
इति वायुपुराणे उपवासासमर्थ
श्चेदेकं विप्रं तु भोजयेत् ।
तावद्धनानि वा दद्यात् यद्भक्ताद्विगु
भवेत् सहस्रसम्मितो देवी ॥
जपेद्वा प्राणसंयमान् कुर्याद्वादश
संख्याकान् यथाशक्ति व्रतेनवा:
इति ब्रह्मवैवर्त्तपुराणे अष्टौ
तान्यव्रतघ्नानि आपो मूलं फलं पयः
हविर्ब्राह्मणकाम्या च गुरोर्वचन
मौषधं इति बौधायनः
उपवासी न त्रि उपवासयुक्तः
अहोरात्रभोजनाभावविशिष्टः
उपवाह्यः पुं राजवाहकहस्ती
तत्पर्य्यायः राजवाह्यः २ इति
हेमचंद्रः ॥
उपविषं क्ली कृत्रिमविषे ॥
तत्पर्य्यायः चारः २ गरः ३
इति हेमचंद्रः ॥
उपविषा स्त्री अतिविषा आतैष
इति भाषा इत्यमरः ॥
उपविष्टः त्रि आसीनः बसा इति
भाषा । इति हेमचंद्रः ॥
उपवीतं क्ली वामस्कंधार्पितं
यज्ञसूत्रे यज्ञसूत्रमात्रे पैता ॥
इति भाषा इत्यमरः ॥
उपवेदः पुं प्रधान वेदातिरिक्त
वेदः स च चतुर्विधः आयुर्वेदः १
धनुर्वेदः २ गंधर्ववेदः ३ स्थापत्य
वेदः ४ इति श्रीभागवते
उपवेषणं क्ली स्थितिः बैसन
इति भाषा अस्य गुणाः मेदो
वृद्धिश्लेष्मसौकुमार्य्यसुखकारित्वं
इति राजवल्लभः ॥
उपव्याघ्रः पुं चित्रकः चिताबाघ
इति भाषा इति राजनिर्घंटः ॥

उपशमः पुं शमता तत्पर्य्यायः
शमः २ शांतिः ३ शमथः ४ ॥
तृष्णाक्षयः ५ इति हेमचंद्रः ॥
उपशयः पुं निदानपंचकांतर्गत
रोगज्ञानजनकः तस्य लक्षणं ॥
हेतुव्याधिविपर्य्यस्तविपर्य्यस्तार्थ
कारिणां औषधान्नविहाराणा
मुपयोगं सुखावहं विद्यादुप ॥
शयं व्याधेः स हि सात्म्यमिति स्मृतः
इति निदाने ॥
उपशल्यं क्ली ग्रामप्रांतभागः त
पर्य्यायः ग्रामांतं २ इत्यमरः ॥
उपशायः पुं पर्य्यायशयनार्थकः
प्राहरिकादीनां क्रमेण शयने
तत्पर्य्यायः विशायः २ इत्यमरः
उपश्रुतं त्रि प्रतिश्रुतं अंगीकृतं
इत्यमरः ॥
उपश्रुतिः स्त्री दैवप्रश्नः यथा
नक्तं निर्गत्य यत् किंचित् शुभाशुभ
करं वचः श्रूयते तद्विदुर्धीरा दैव
प्रश्नमुपश्रुति इति हारावली ॥
उपसंग्रहः पुं पादस्पर्शपूर्वक ॥
नमस्कारः तत्पर्य्यायः पादग्रहणं
२ अभिवादनं ३ इति हेमचंद्रः ॥
उपसंग्राह्यः त्रि उपसंग्रहणीये ॥
अभिवाद्ये पादग्रहीतव्ये ॥
इति हलायुधः ॥
उपसंव्यानं क्ली परिधानवस्त्रं
इत्यमरः ॥
उपसत्तिः स्त्री संगमात्रे ॥
प्रतिपादे सेवा इति
हेमचंद्रः ॥
उपसदनं क्ली गृहसमीपे
उपसन्नः त्रि उपनतः उपस्थितः
इति हेमचंद्रः ॥
उपसंपन्नः त्रि यज्ञार्थहतपशुः
तत्पर्य्यायः प्रमीतः २ प्रोक्षितः
३ पाकेन रूपरसादि सम्पन्न
व्यंजनादिः तत्पर्य्यायः प्रणीतः
२ इत्यमरः पर्य्याप्तः संस्कृतः
शामः मृतः इति हेमचंद्रः
उपसरः पुं स्त्रीगव्यादिषु
पुंगवादीनां प्रथमगर्भाधानाय
मैथुनाभियोगः तत्पर्य्यायः
प्रजनः २ इत्यमरः ॥
उपसर्गः पुं रोगभेदः उपप्लवः
इति मेदिनी धातोः पूर्ववर्त्ति
विंशति संख्यक प्राद्यव्ययं
यथा प्र परा अप सम्
नि अव अनु निर् दुर् वि
अधि सु उद् परि प्रति अभि
अति अपि उप आङ् अस्य
प्रमाणं निपाताश्चादयो ज्ञेयाः
उपसर्गाश्च प्रादयः द्योतकत्वात्

क्रियायोगे लोकादवगताइमे त्रिधा धात्वर्थं बाधते कश्चित् यथा आदत्ते कश्चित्तमनुवर्त्तते यथा प्रस्तुते तमेव विशिनष्ट्यन्यः यथा प्रणमति उपसर्गगतिस्त्रिधा अपिच उपसर्गेण धात्वर्थो ॥ बलादन्यत्र नीयते नीहाराहार संहारप्रतीहारप्रहारवत् इति मुग्धबोधटीकायां दुर्गादासः

उपसर्जनं क्ली प्रधानभिन्नतत् पर्य्यायः अप्रधानं २ अप्राग्र्य ३ इत्यमरः ॥

उपसर्यकः त्रि उपसर्यणकर्त्ता उपासकः ॥

उपसर्य्या स्त्री प्राप्तगर्भग्रहणकाला गौः ऋतुमती गौः तत्पर्य्यायः काल्या २ इत्यमरः ॥

उपसार्य्यः त्रि समीपगमनीयः इति पाणिनिः ॥

उपसूर्य्यकं क्ली वेदसूर्य्यमंडले इत्यमरः सूर्य्यमुपगतं उपसूर्य्यं स्वार्थिकः वेदपक्षे उपसूर्य्यमिव उपसूर्य्यकं इवार्थिके

उपसृष्टं क्ली मैथुनं इति ॥ त्रिकाण्डशेषः उपसृष्टस्तु त्रि तथा च याज्ञवल्क्यः तेनोपसृष्टो लभते न राज्यं राज्यनंदनः

उपस्करः पुं व्यंजनादिसंस्कारार्थं धान्याकसर्षप पिष्टादिः वेसार वाटना इत्यादि भाषातत् ॥ पर्य्यायः वेसवारः २ इत्यमरः गृहवासोपकरणं तद्वट्टपाडपल सूर्पादिकनक कुंडलहारादि इति श्रीकृष्णतर्कालंकारः तथाच याज्ञवल्क्यः गृहोपस्करवाद्यानां दोह्याभरणकर्म्मिणां मूल्यं लब्धेन यत्किंचित्शुल्के तत्पारिकीर्तितं

उपस्त्री स्त्री उपपत्नी ठेमनी इतिभाषा

उपस्थः पुं लिंगे भगः ॥ क्रोडः इतिमेदिनी गुह्यद्वारे इतिहेमचंद्रः निकटे त्रि ॥ इतिशब्दरत्नावली ॥

उपस्था स्त्री त्रि भृत्यः प्रेष्यो भृत्य उपस्थाता सेवकोऽभिसेवो ऽनुगः इति शब्दमाला ॥

उपस्थितः त्रि समीपस्थितः तत्पर्य्यायः उपनतः २ उपसन्नः ३ इति हेमचंद्रः स्पष्टः । प्रोत्थितः इति जटाधरः ॥

उपस्पर्शः पुं स्पर्शमात्रे स्नाने आचमनं इति मेदिनी ॥

उपस्पर्शनं क्ली उपस्पर्शः इति धरणिः ॥

उपस्वत्वं क्ली उत्पन्नं लभ्यं ॥ हि स्वत्वास्पदीभूतभूम्यादिलब्धधनं

उपहतः त्रि नष्टः उत्पातग्रस्तः अशुद्धद्रव्यं ॥

उपहसितं क्ली हास्यभेदः ॥ इतिजटाधरः

उपहारः पुं उपढौकनद्रव्यं तत्पर्य्यायः प्राभृतं २ प्रदेशनं ३ उपायनं ४ उपग्राह्यं ५ उपदा ६ इत्यमरः ॥

उपहालकः पुं कुंतलदेशः इतिहेमचंद्रः ॥

उपहासः पुं परीहासः निंदार्थ वाक्यादिः विद्रूपठाट्टा इत्यादि भाषा उपहासाय किं न स्यात् असत्संगा मनीषिणां इति ॥ मलमासतत्वं ॥

उपह्वरं क्ली निर्जनस्थानं निकट इत्यमरः ॥

उपह्वरः पुं रथः इत्युणादिकोषः

उपांशुपात्यधर्म्मः पुं शूद्र ॥ स्वामिकमात्रस्यपाकार्थं ब्राह्मणगृहे समर्पणं इति शुद्धतत्वं कल्पतरुः ॥

उपांशुः पुं जपभेदः इति ॥ मेदिनी जिह्वोष्ठौ चालयेत् ॥ किंचिद्देवता गतमानसः निज श्रवणयोग्यः स्यादुपांशुः सजपः स्मृतः इत्यागमः

उपांशु अ विजनेरहः इत्यमरोमेदिनी च ॥

उपाकरणं क्ली संस्कारपूर्वकश्रुति ग्रहणं इत्यमरः पशूनां ॥ संस्कारपूर्वकहननं इति स्मृतिः

उपाकर्म्म क्ली उपाकरणं इत्यमर टीकायां रायमुकुटः ॥

उपाकृतः पुं यज्ञे अभिमंत्र हतः पशुः इत्यमरः उपद्रवः इतिहेमचंद्रः ॥

उपाकृतं त्रि उपद्रुतं इति मेदिनी ॥

उपाख्यानं क्ली पूर्ववृत्तांतकथनं आख्यानं वर्णनं ॥

उपागमः पुं स्वीकारः निकट गमनं इत्यजयः ॥

उपाग्रहणं क्ली उपाकरणं संस्कारपूर्वकवेदग्रहणं इत्यमर टीकायां रायमुकुटः ॥

उपांगः पुं तिलके तत्पर्य्यायः पत्रावली ३ पत्रलेखा ४ पत्रांगुलिः ५ पुंड्रः ६ तमालपत्रकं ७ चित्रकं ८ इतिजटाधरः ॥

उपात्तः पुं निर्म्मदहस्ती इति हलायुधः ॥

उपात्ययः पुं प्रगततोलोक
व्यवहाराद्व्यतिक्रमः अतिक्रमः
क्रमोल्लंघनं द्वयोः पर्य्यायः
पर्य्यायः २ अतिपातः ३
इत्यमरः ॥
उपादानं क्ली स्वस्वविषयेभ्य॥
इंद्रियाकर्षणे तत्पर्य्यायः ॥
प्रत्याहारः २ इत्यमरः हेतुः
इतित्रिकांडशेषः न्यायमते ॥
समवायकारणे प्रहतिजनक
ज्ञानेच ॥
उपादेयः त्रि ग्राह्यः उत्तमः
उत्कृष्टः इति वेदांतः ॥
विधेयकर्म इतितिथितत्वं।
उपाधिः पुं धर्मचिंता कुटुंब
व्यापृतः इत्यरः छले ॥
विशेषणे इतिमेदिनी ॥
नामचिह्ने इतिशब्दरत्नावली
न्यायमते साध्यव्यापकत्वे ॥
सतिहेतोरव्यापकः यथा
धूमवान् वह्निरित्यत्र आर्द्रेंका
हे उपाधिः अल्पप्रयोजनं ॥
व्यभिचारस्यानुमानेऽलंकार
मतेजाति गुण क्रियापदका
स्वरूपः ॥
उपाध्यायः पुं अध्यापकः ॥
इत्यमरः ॥

उपाध्याया स्त्री अध्यापिका ॥
विद्योपदेशिनी इत्यमरः ॥
उपाध्यायानी स्त्री उपाध्यायपत्नी
इत्यमरः ॥
उपाध्यायी स्त्री अध्यापकभार्य्या
इत्यमरः ॥
उपानत् ह स्त्री चर्म्मादिनिर्मित
पादकोषः जुता इतिभाषा ॥
तत्पर्य्यायः पादुका २ पादूः ३
इत्यमरः ॥
उपांतः त्रि निकटं इतिहेमचंद्रः
उपायः पुं राजादीनां शत्रुवशी
करणहेतवस्तुष्टये यथासाम २
दानं २ भेदः ३ दंडः ४ इत्यमरः
उपगतिः इतिमेदिनी ॥
स्वार्थसंपादकः साधने ॥
उपायनं क्ली उपहारः उप
ढौकनद्वयं इत्यमरः व्रतादि
प्रतिष्ठा इति स्मृतिः समीप
गमने ॥
उपार्जनं क्ली अर्जनं ॥
धनाद्याहरणे स्वत्वहेतुभूत
व्यापारः इतिस्मृतिः [illegible]
उपालंभः पुं दुर्वाक्यं इति ॥
हलायुधः स्वगुणाविष्करणेन
स्तुतिपूर्वकः यथा महाकुलस्य
भवतः किमिद मूचितमिति ॥

निंदापूर्वकमपाय यथा वैधकौलस्य
भवतस्तदिदमुचितमिति भानुजिः
इत्यमरटीकासारसुंदरी ॥
उपाहतः त्रि अप्रशस्त्यर्थे ॥
पुनः पुनर्भूमौ लुठिताश्वः
इत्यमरः निहतः ॥
तथावैकादशीतत्वे उपावृत्तस्य
पापेभ्यो यस्तु वासो गुणैः सह
उपवासः सविज्ञेयः सर्वभोग
विवर्जितः ॥
उपासकः पुं स्त्री शूद्रः इति
राजनिर्घंटः ॥
उपासकः त्रि उपासनाकर्त्ता
सवर्यंच विधः वैष्णवः १ शाक्तः २
शैवः ३ सौरः ४ गाणपत्यः ५
त्रिविधश्च यथा दिव्यः १ वीरः २
पशुः ३ इत्यागमः अपिच सात्विकः
१ राजसिकः २ तामसिकश्च ३
उपासंगः पुं तूणीरः इत्यमरः
उपासनं क्ली शराभ्यासः शुश्रूषा
इत्यमरः विहिंसने इति ॥
विश्वः आसने इतिमेदिनी ॥
उपासना स्त्री सेवा तत्पर्य्यायः
वरिवस्या २ शुश्रूषा ३ परिचर्य्या
४ उपासनं ५ इत्यमरः ॥
उपासितः त्रि कृतोपासनः
तत्पर्य्यायः वरिवसितः २

वरिवस्यितः ३ उपचरितः ४
इत्यमरः ॥
उपास्तिः स्त्री सेवा इतिहेमचंद्रः
उपाहितः पुं अग्न्युत्पातः सत
उल्कापातादिः इत्यमरः ॥
उपाहितः त्रि संयोजितः
इत्यमरः आरोपितः इति ॥
मेदिनी ॥
उपेंद्रः पुं विष्णुः इत्यमरः
उपेक्षणं क्ली वर्जनं त्यजनं
उपेक्षा स्त्री अस्वीकारः त्यागः
सत्युद्धविषये क्षुद्रोपायः
मायोपेक्षेंद्रजालानि क्षुद्रोपाया
इमेत्रयः इतिहेमचंद्रः ॥
उपोढः त्रि निकटः विवाहितः
इतिमेदिनी ॥
उपोढः पुं व्यूहः इतिधरणी
उपोती स्त्री पूतिका इति ॥
शब्दरत्नावली ॥
उपोदकी पूतिका पूइशाक
इति भाषा तत्पर्य्यायः कलम्बी
पिच्छिला ३ पिच्छिलच्छदा ४
मोहनी ५ मदशाकः ६ विशाला ७
बलिपोदकी ८ अस्यागुणाः
कषायत्वं उष्णत्वं कटुत्वं मधुरत्वं
निद्रालस्य रुचि विष्टंभश्लेष्म
कारित्वंच इतिराजनिर्घंटः

उपोदिका स्त्री पूतिका इत्यमरः
अस्या गुणाः सारकत्वं स्निग्धत्वं
बलश्लेष्मकारित्वं हिमत्वं च इति
राजवल्लभः ॥
उपोदीका स्त्री पूतिका इति
भरतः द्विरूपकोषश्च ॥
उपोद्घातः पुं उदाहरणं
इत्यमरः आरंभः इति भरतः ॥
उपोषणं क्ली उपवासः इति ॥
त्रिकांडशेषः ॥
उपोषितं क्ली उपवासः इत्यमर
टीकायां भरतः
उप्तः त्रि कृतवपनः बोना इति
भाषा ॥
उप्तकृष्टं त्रि बीजवपनानंतर
कर्षितक्षेत्रं तत्पर्यायः ॥
बीजाकृतं २ इत्यमरः ॥
उभ्रष्ठा आर्जवे इतिकविकल्पद्रु(मः)
उभयथा पूर्णे इतिकविकल्पद्रुमः
उभयः त्रि युगलं दुई इति ॥
भाषा इति शब्दचंद्रिका ॥
स (र्थे)
उभयतः अ पार्श्व द्वये उभयथा
इतिव्याकरणं [illegible]
उभयद्युः अ उभयदिने दिनद्वये
इत्यमरः ॥
उभयेद्युः स अ उभयदिने ॥

इत्यमरः ॥
उमः पुं रोषः अंगीकारः
प्रश्नः इति मेदिनी क्रोधवर्जितः
इति शब्दरत्नावली ॥
उमा स्त्री दुर्गा अतसी कीर्तिः
हरिद्रा कांतिः इति मेदिनी
शांतिः इति शब्दरत्नावली ॥
उमाकट्टः पुं उमाधूलिः मसिनार
धूला इति भाषा इति व्याकरणं
उमागुरुः पुं हिमालयपर्वतः
इति त्रिकांडशेषः ॥
उमापतिः पुं शिवः इत्यमरः
उमावनं क्ली पुरविशेषः ॥
तत्पर्यायः देवीकोटः २
कोटीवर्षं ३ बाणपुरं ४
शोणितपुरं ५ इति हेमचंद्रः
उमासुतः पुं कार्त्तिकेयः इति
हेमचंद्रः ॥
उमेशः पुं महादेवः इति
हेमचंद्रः ॥
उंभ यथा पूर्णे इतिकविकल्पद्रुमः
उंतु इति वपादः ॥
उम्यं क्ली औमीनं अतसीक्षेत्रं
हरिद्राक्षेत्रं च इति भरतः ॥
द्विरूपकोषश्च ॥
उम्बरः पुं द्वारोर्द्ध्वकाष्ठं।
तत्पर्यायः गृहावग्रहणी

हेमचंद्रः ॥
ऊर्द्धस्थः त्रि उपरिस्थितः ॥
तत्पर्यायः ऊर्द्धदमः २ इति
त्रिकांडशेषः
ऊर्द्धस्थितिः स्त्री ऊर्द्धावर्त्तः सत
अश्वस्य पृष्ठस्थाने तत्पर्यायः
वरुथकं २ इति त्रिकांडशेषः
उपरिस्थितिः उपरिस्थाने
ऊर्द्धासितः पुं कारवेल्लः
करेला इति भाषा इति
त्रिकांडशेषः ॥
ऊर्म्मिः स्त्री पुं तरंगः प्रकाशः
वेगः भंगः वस्त्रसंकोचरेखा
वेदना पीडा इति मेदिनी ॥
उत्कंठा इति हेमचंद्रः ॥
शोक मोहौ जरा मृत्यू क्षुत्
पिपासे षडूर्म्मयः इति ॥
श्रीभागवतटीका ॥
ऊर्म्मिका स्त्री उत्कंठा भृंगनादः
वस्त्रभंगः अंगुलीयकं ॥
वीचः इति हेमचंद्रः ॥
ऊर्म्मिमान् त्रि वक्रः टेडुवेला
तिया इति भाषा इत्यमरः ॥
तरंगयुक्तः ॥
ऊर्म्मिमाली पुं समुद्रः इति
त्रिकांडशेषः ॥
ऊवरा स्त्री उर्वरा सर्वशस्याढ्या

इति शब्दरत्नावली ॥
ऊर्वशी स्त्री उर्वशी स्वर्गवेश्या
विशेषः इत्यमरटीकायां
रायमुकुटः ॥
ऊर्वसी स्त्री उर्वशी इत्यमरटीका
सारसुंदरी ॥
ऊर्व्वंगं क्ली गोमयच्छत्रिका
तत्पर्यायः दिलीरं २ शिलींध्रकं
३ वशारोहं ४ गोलासं ५ इति
हारावली ॥
ऊषा स्त्री देवताडकतृणं इति
शब्दचंद्रिका ॥
ऊलपीलन् पुं उलूपी शिशुमारः
इत्यमरटीकासारसुंदरी ॥
ऊलूकः पुं उलूकः पेचकः
इत्यमरटीकायां रायमुकुटः
ऊष रोगे इतिकविकल्पद्रुमः
ऊषः पुं क्षारमृत्तिका इत्यमरः
ऊषं क्ली प्रभाते इति शब्दरत्नावली
ऊषकं क्ली प्रत्यूषे इति ॥
शब्दरत्नावली ॥
ऊषणं क्ली मरिचे इति हेमचंद्रः
ऊषणा स्त्री उषणा पिप्पली इति
शब्दरत्नावली ॥
ऊषरः त्रि क्षारभूमी लोना जायगा
(भूमी ॥) इति भाषा तत्पर्यायः ऊषवान्
२ इत्यमरः ॥

ऊषरजे क्ली पांशुलवणे ॥
रोमकनामायस्कांतभेदः इति
राजनिर्घंटः ॥
ऊषवान् त्रि ऊषरभूमी इत्यमर
ऊषा स्त्री उषा अनिरुद्धभार्य्या
इतिशब्दरत्नावली ॥
ऊह उ॰ वितर्के संदेहाहिवारे
इतिकविकल्पद्रुमः ॥
ऊहः त्रि वितर्कः तत्पर्य्यायः
अध्याहारः तर्कः २ इत्यमरः
अपूर्वोत्प्रेक्षणे इतिजैमिनिः
असमवेतार्थक पदत्याग ॥
पूर्वक समवेतार्थकपद समभि
व्याहारकरणे ॥ इति ॥ (अस्य
आहतत्वटीका सौकांक्षवाक्य
पदांतरेण आकांक्षापूरणे ॥
ऊहनी स्त्री सम्मार्जनी बोहारी इति
भाषा इति शब्दरत्नावली

ऋ

ऋ ऋकारः सप्तमस्वर्णः ॥
अस्योच्चारण स्थानं दंतः सत् (कारं
ह्रस्वो दीर्घः प्लुतश्च भवति ऋ
परमेशानि कुंडली मूर्त्तिमान् स्वयं
अत्र ब्रह्मा च विष्णुश्च रुद्रश्चैव वरानने
सदाशिवयुते वर्णे सदा ईश्वर ॥
संयुते पंचवर्णमयं वर्णं लनुतीन

मयेतया रक्तविद्युल्लताकारं
ऋकारं प्रणमाम्यहं इति ॥
कामधेनुतंत्रे ॥
ऋ ० प्रापणे गत्यां इति
कविकल्पद्रुमः ॥
ऋ इल गत्यां इतिकविकल्पद्रुमः
ऋ र न हिंसने इतिकविकल्पद्रुमः
ऋच्छ गहणे वाक्ये देवमातरि
स्त्री इतिमेदिनी परिहासः
वाक्यविकारः इतिशब्दरत्नावली
ऋक् चे स्त्री वेदविशेषः ऋग्वेदः
इत्यमरः अस्य एकविंशति
शाखाः वेदमंत्रविशेषः तस्य
लक्षणं यत्रार्थ वशेन पाद
व्यवस्थितिः अस्यार्थः यत्रार्थवशेन
एकान्वयित्वेनानुष्टुवादिपादस्थितिः
इतिजैमिनिः ॥
ऋक्थं क्ली धने इत्यमरः स्वर्णे
इत्युणादिकोषः ॥
ऋच ष स्तुत्यां इतिकविकल्पद्रुमः
ऋचीषं क्ली पिष्टकभर्जनपात्रे
इतिहेमचंद्रः ॥
ऋ क प्राप्तौ गमने मोहे ॥
इतिकविकल्पद्रुमः ॥
ऋकवा स्त्री वेपणा इत्युणादिकोषः
ऋज उ गत्यां स्थैर्य्ये ऊर्जने ॥

अर्ज्जने इति कविकल्पद्रुमः ॥
ऋज उ॰ भृजि इतिकविकल्पद्रुमः
ऋजीषं क्ली पिष्टपचने विष्टक
भर्जनपात्रे इतिहेमचंद्रामरौ
नरकविशेषः अत्र पिष्टपचन
प्रतेपः इतिमनुः ॥
ऋजु त्रि अवक्रे सोजा इति ॥
भाषा तत्पर्य्यायः अजिह्मः २
प्रगुणः ३ इत्यमरः ॥
ऋजुकायः पुं कश्यपमुनिः
जटाधरः अवक्रशरीरे त्रि
ऋज्रः पुं नायकः इत्युणादिको
षः ऋजासनः पुं मेघः इति
सिद्धांतकौमुदी ॥
ऋण द उ ग गतौ इति
कविकल्पद्रुमः ॥ (धा
ऋणं क्ली धारः देना इतिभा
तत्पर्य्यायः पर्य्युदंचनं २ ॥
उद्धारः ३ इत्यमरः पुनर्देय ॥
त्वेनस्वीकृत्य यत् गृहीतं इति
जगदीशः अस्यविवरणं ऋणं
दानग्राहे द्रव्यं कुसीदाख्य
ऋणं यथा स्यान्न लाभ ॥
निमित्तं यद्दानं गृहणमित्यते
तत्कुसीदमिति प्रोक्तं तेन वृत्तिः
कुसीदिनां इतिनारदः । (ते
अस्यार्थः स्थाने मूलधनावस्था

लाभो वृद्धिः दानग्रहणपदे
कर्मणयनटा साध्ये तेनमूलधनाव
स्थाने सत्येव यो लाभस्तदर्थं
यद्दानं धनिकेन दीयमाने मूलधने
अधमर्णेन च ग्रहणं तथा स्वीकृत्य
गृह्यमाणे यत् ग्रहणं इति रत्नाकरादयः
कलाभूत्येन अवश्यापाकरणीयत
रूपगुणयोगाद्योगं प्रयोगः
अतएव वाणिज्यार्थं प्रयुक्तस्य मर्णत्वे
इति मिश्राः ॥ अपिच
कुत्सितात् सीदतश्चैव निर्विशंकैः
प्रगृह्यते चतुर्गुणं वाष्टगुणं
कुसीदाख्यमृणं तेन इति
बृहस्पतिः अस्यार्थः कुत्सितात्
सीदतश्चावमर्णात् सकलं धनेपत्
गृह्यते निर्विशंकैः उत्तमर्णैः
चतुर्गुणं वेति वाकारोऽन्यास्याये
तेन द्विगुणादिलाभः ऋणत्रय
विशेषो यथा देवानां च ॥
पितॄणां च ऋषीणां च तथा नरः
ऋणवान् जायते यस्मात्तस्मात्ते
प्रयत्नतः सदा तत्परिशोधने
माद्र देवानामनृणो जंतु ॥
यज्ञैर्भवति मानवः अल्पविनश्च
पूजाभिरूपवासैर्व्रतैस्तथा
श्राद्धेन प्रजया चैव पितृणां
मनृणो भवेत् ऋषीणां ब्रह्मचर्य्येण

ऋतेन तपसा तथा इति
विसृष्टधर्मा नरः ॥
ऋणमत्कुणः पुं लग्नकः जामि
इतिभाषा इति शब्दरत्नावली
ऋणमार्गणः प्रतिभूः जामिन
इतिभाषा इति हारावली ॥
ऋणमुक्तिः स्त्री ऋणपरिशोध
तत्पर्य्यायः विगणनं २ इति
त्रिकाण्डशेषः ॥
ऋणमोक्षः पुं ऋणपरिशोध
इति हारावली ॥
ऋणादानं क्ली अधमर्णात् उत्त
मर्णस्य धनग्रहणं तत्त्वष्टादश
विवादान्तर्गतव्यवहारविवादः तच्च
सप्तविधं यथा इदमृणं देयं १
इदमदेयं २ अनेनाधिकारिणा
देयं ३ अस्मिन्समये देयं ४
अनेन प्रकारेण देयं ५ इत्यधमर्णे
पञ्चविधं उत्तमर्णेन दानविधिः ६
आदानविधिश्च ७ इति द्विविधं
अथ याचनारदः ऋणं देयमदेयञ्च
येन यत्र यथा भवेत् दान
ग्रहणधर्मश्च ऋणादानमिति
स्मृतं अदेयमिति यदुक्तं तदाह
कात्यायनः नस्त्रीभ्यो दासबालेभ्यः
प्रदद्यात् किञ्चिद्बुधः दाता ॥
न लभेत तद्धतेभ्यो दत्तं तु यद्धनं ॥

तत्र विशेषमाह बृहस्पतिः ॥
(न परिपूर्णं गृहीत्वापि बन्धं वा साधु
लग्नकं लेख्यारूढं साक्षिमद्वा ऋणं
दद्यात् धनी सदा इति ॥
विवादार्णवसेतुः अस्यार्थः
न ऋणोद्ग्राहणं शब्दद्रष्टव्यं ॥
ऋणान्तकः पुं मङ्गलग्रहः इति
शब्दरत्नावली ॥
ऋणापनोदनं क्ली ऋणापनयनं
(न धारशोधनं ॥
(मर्णेन ऋणी न त्रि ऋणग्रस्तः धारी
ऋणोद्ग्राहणं क्ली अधमर्णगृहीतर्ण
ग्रहणं यत्र ऋणं प्रार्थनकाले
प्रार्थितोपि ऋणी न ददाति तत्र
धनिकेन यत् कर्त्तव्यं तदाह मनुः
यैर्यैरुपायैरर्थं स्वं प्राप्नुयादुत्त
मर्णिकः तैस्तैरुपायैः संगृह्य
साधयेदधमर्णिकं धर्मेण
व्यवहारेण छलेनाचरितेन च
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च
अधमर्णः पूर्वं पूर्वं सामर्थ्याभावे
उत्तरोत्तरं संगृह्य वशीकृत्य॥
धर्मं बृहस्पतिराह सुहृत्सम्बन्धि
सन्दिष्टैः सामोक्त्यानुगमेन च
प्रायेण वा ऋणी दाप्यो धर्म एष
उदाहृतः अस्यार्थः ऋणिकस्य
ये सुहृत्सम्बन्धिनस्तेषु सन्देशा

योपत्र सामवचनं पश्चादनुगमनं
प्रायोपवेशनं वा धनिकस्यैष धर्म
ऋणोद्ग्राहणोपायः व्यवहारे॥
कात्यायनः पर्य्यावरुद्ध ऋणिकः
प्रकाशं जनसंसदि यावन्न॥
दद्याद्देयं च देशाचारस्थितिर्यथा
अस्यार्थः यावद्दानं जनसंसदि
ऋणिकस्य धनिकेन धारणं व्यव
हारः छलाचरित बलात्कारेषु
बृहस्पतिः छद्मना याचयित्वार्थं
मानीय ऋणिकाद्धनमाहरेत्
तादिवाहृत्य दाप्यते यत्र सोपधिः
अस्यार्थः ऋणिकस्य धनमपहृ
तादिवाक्यमानामाहृत्यवा यत्रदा
प्यते तत्र साधनोपायः सोपधिः
सकलमुच्यते पुत्रदारपशून्
रुद्ध्वा कृत्वा द्वारोपवेशनं ॥
यत्रर्णी दाप्यते ऽर्थं स्वं ॥
तदाचरितमुच्यते बद्ध्वा स्वगृह
मानीय ताडनाद्यैरुपक्रमैः
ऋणिका दाप्यते यत्र बलात्कारः
स उच्यते अनयोरर्थः पुत्रदार
पश्वादिरोधो द्वारोपवेशनं च य
उद्ग्राहणोपायस्तदाचरितमुच्यते
स्वगृहमानीय ताडनादिलक्षण
उद्ग्राहणोपायो बलात्कारः ॥
उच्यते कोऽधर्णः ॥

केनोपायेन साध्य स्तदाह ॥
कात्यायनः राजानं स्वामिनं
विप्रं सान्त्वेनैव प्रसाधयेत् ॥
ऋक्थिनं सुहृदं वापि छलेनैव
प्रसाधयेत् ऋक्थिनं दाया- ॥
तथा वणिजः कर्षकांश्च वशिल्पिन
श्चाब्रवीद्गुः देशाचारेण दाप्याः
स्तुदुष्टान् सेपीऽदापयेत् ॥
यत्र धने न लभ्यते तत्राह
बृहस्पतिः निर्धनं ऋणिकं कर्म
गृहमानीय कारयेत् शौण्डिकाद्यै
ब्राह्मणस्तु दापनीयः शनैः शनैः
याज्ञवल्क्यः हीनजातिं परिक्षीण
मृणार्थं कर्म कारयेत् ब्राह्मणस्तु
परिक्षीणः शनैर्दाप्यो यथोदयं
यथोदयं यथा धनोत्पत्ति
रित्यर्थः व्यापार द्वारा
न ब्राह्मणस्य ऋण शोधनमाह
कात्यायनः कर्म्मणा त्वविदग्धब्रान्
समहीनोस्तु दापयेत् ॥ ऋण
शोधनाय निर्दिष्टे कर्म्मकारयित
रुत्तमर्णस्य दण्डमाह कात्यायनः
यदि स्याद्वचनादिष्ट मशुभं
कर्म कारयेत् प्राप्नुयात् साहसं
पूर्वं मृणान्मुच्येत चर्णिकः यदि
पक्षमहिंसासंधनमृणिको दातुं
न शक्नोति तदा चक्रवृद्ध्यास्वकृष्या



धारयेत् यथा बृहस्पतिः । पूर्ण
वधौ ऋणं तल्लाभमृणमृत्राहयेद्
नीकारयेद्वाधनी लेख्यं वक्रहेतु
अवस्थया तथाह बृहस्पतिः
हिरण्ये द्विगुणीभूते मृते नष्टे
ऽधमर्णिके द्रव्यं तदीयं संगृह्य
विक्रीणीत ससाक्षिकं रक्षेद्वा
कृतमूल्येन दशाहं जनसंसदि
ऋणानुरूपं परतो गृहीतान्यत
यर्जयेत् स्वधनेव स्थिरीकृत्य
गणनाकुशलैर्णवैः तदुक्त्वा
ति विदिते प्रभृत्वापराधृयात्
यथाविषयं धर्मादीन् ॥
धनसाधनोपायात् प्रभुर्ज्ञानो
नराज्ञा निवर्त्तनीय इत्याह मनुः
यः स्वयं साधयेदर्थं मुत्तमर्णो
ऽधमर्णिकात् स राज्ञानाभि
योक्तव्यः स्वकं संसाधयन् धने
धनवता ऋणिकेनादत्ते ऋणे ॥
राजा स्वयं विंशतितमभागं गृह्णी
यात् उत्तमर्णायदापयेत् इत्याह ना
रदः ऋणिकः सधनो यस्तु दौरात्म्या
न प्रयच्छति राज्ञा दापयितव्यः
स्यात् गृहीत्वाश्रीतु विंशकं
यद्यस्य धर्मिकः सकलमृणोद(न)
नमर्थ्यः प्राक्तनु सारेणादत्वा पूर्व
कृतस्य लेख्यस्य पृष्ठेऽभिलिखेत्

यत्नावद्दत्ते उत्तमर्णेन उपगते
प्राप्तमिति धनी तस्यैव लेख्यस्य
पृष्ठे दद्यादभिलिखेत् इत्याह
याज्ञवल्क्यः लेख्यस्य पृष्ठे
ऽभिलिखेत् दत्वा दत्वा धनं ऋणी
धनी चोपगतं दद्यात् स्वहस्त
परिचिह्नितं इति
विवादार्णवसेतुः ॥
ऋत १ गत्यां स्पर्द्धने ॥
ऐश्वर्य्य ह्रणयो इति ॥
कविकल्पद्रुमः ॥
ऋतं क्ली उञ्छशिले जले सत्ये
इति मेदिनी ॥
ऋतः त्रि दीप्तः पूजितः इति
मेदिनी ॥
ऋतधामा (न) पुं विष्णुः इति
त्रिकाण्डशेषः ॥
ऋतिः स्त्री कल्याणं वर्त्म
जुगुप्सा स्पर्द्धा इति मेदिनी
गमने अशुभे इति धरणी
ऋतीया स्त्री घृणार्थकः जुगुप्सा
तत्पर्य्यायः अर्त्तने २ हृणीया
३ इत्यमरः ॥
ऋतुः पुं कालविशेषः स त
षड्विधः यथा मार्गशीर्षपौषौ हिमः १
माघफाल्गुनौ शिशिरः २ चैत्र
वैशाखौ वसन्तः ३ ज्येष्ठाषाढौ

ग्रीष्मः ४ श्रावणभाद्रौ वर्षा ५
आश्विनकार्त्तिकौ शरत् ६ ॥
इत्यमरः सत्रिविधोपि ।
कार्त्तिकाग्रहायणपौषमाघाः
शीतः फाल्गुनचैत्रवैशाख
ज्येष्ठाः ग्रीष्मः २ आषाढश्रावण
भाद्राश्विनाः वर्षा ३ इति विधोपि
कार्त्तिकादिषण्मासाः शीतः १
वैशाखादिषण्मासाः ग्रीष्मः २
इति स्मृतिः स्त्रीकुसुमे इति ॥
विश्वमेदिन्यौ तत्पर्य्यायः ॥
रजः १ पुष्पं २ आर्त्तवं ३ ॥
इत्यमरः दीप्तिः इति मेदिनी
उणादिकोषः मासः सुवीरः
इति विश्वः ॥
ऋतुप्राप्तः त्रि फलेग्रहिः ॥
अवन्ध्यहन्नादिः इति शब्दचन्द्रिका
ऋतुमती स्त्री ऋतुयुक्ता स्त्री
तत्पर्य्यायः रजस्वला २ स्त्रीधर्मिणी
३ अवी ४ आत्रेयी ५ मलिनी ६
पुष्पवती ७ उदक्या ८ इत्यमरः
ऋतुराजः पुं वसन्तकालः ॥
इति राजनिर्घण्टः ॥
ऋतुवृत्तिः पुं वत्सरः इति
त्रिकाण्डशेषः ॥
ऋतुसंधिः पुं ऋतुद्वयसंधिका(लः)
स च ऋत्वोरंत्यादिसमाहोतथा च

वाग्भटः ऋत्वोरन्त्यादिसप्ताहावृत
सेथिरितिस्मृतः तत्र पूर्वो विधि
स्त्याज्यः सेवनीयः परो विधिः
ऋतुस्नाता स्त्री रजस्वला स्त्रियाः
चतुर्थाहकर्त्तव्यस्नाने इति स्मृतिः
तत्स्नानानन्तरं भर्त्तृवदनं द्रष्टव्यं
नान्यस्य भर्त्तृ सन्निधाने भर्त्तारं
मनसि ध्यात्वा सूर्य्यं विलोकयेत्
इति काशीखण्डं ॥
ऋते अ विना वर्जने इत्यमरः
ऋत्विक् (न्) पुं पुरोहितः तत्पर्य्यायः
याजकः इत्यमरः ॥
ऋद्धं क्ली सम्पन्नधान्ये इति
मेदिनी परिपक्कमर्द्दितधान्यं
इत्यमरटीकायां भरतः ॥
बहुलितधान्ये इति सुभूतिः
तत्पर्य्यायः आवसितं २
इत्यमरः अवसितं ३ इति
तट्टीकासिद्धान्तः इति ॥
हेमचन्द्रः ॥
ऋद्धः त्रि समृद्धः संपन्नः
इति मेदिनीकरहेमचन्द्रौ
ऋद्धिः स्त्री अष्टवर्गान्तर्गतौषध
विशेषः तत्पर्य्यायः योग्यं २
सिद्धिः ३ लक्ष्मीः ४ इत्यमरः
प्राणप्रदा ५ हृद्या ६ । इति
रत्नमाला प्राणदा ७ जीवदात्री

सिद्धा योग्या ९ छेत्तनीया १०
रंगामी ११ मंगल्या १२ लोककांत्या
१३ जीवश्रेष्ठा १४ यशस्या १५
अस्या गुणाः मधुरत्वंसस्निग्धत्वं
अतितिक्तत्वं शीतलत्वं रुचि
मेधाकारित्वं श्लेष्मकुष्ठकृमि
नाशित्वंच इतिराजनिर्घंटः
अस्याः रूपंयथा ऋद्धिर्वृद्धिश्च
कन्दौद्वौ भवतः कोशयामले
श्वेतलोमान्वितः कंदोलताजा
लः सरंध्रकः सएवऋद्धिर्वृद्धि
श्चभेदमप्यनयोर्ब्रुवे तूलग्रंथि
समाऋद्धिर्वामावर्त्तफलाचसा
वृद्धिस्तु दक्षिणावर्त्तफलाप्रो
क्तामहर्षिभिः औषधकरणेऋद्धि
वृद्धिस्थाने वाराहीकंदः अथवा

वृद्धिस्थाने वाराहीकंदःअथवा
बलादेय इति परिभाषा ॥
समृद्धिः इति मेदिनी ॥
पार्वती इतिशब्दरत्नावली ॥
ऋध उ यत्न इर वृद्धौ इति
कविकल्पद्रुमः
ऋफ श दाने स्यादयं ॥
हिंसायां निंदायां युद्धे
इतिकविकल्पद्रुमः ॥
ऋभुः पुं देवता इत्यमरः ॥
ऋभुक्षः पुं इंद्रः स्वर्गः वज्रं
इतिशब्दमुकुटः

ऋभुक्षाः पुं इंद्रः इत्यमरः ॥
ऋम्फ पश वधे इतिरिम्फधातौ
शाकापांडुर्गादासः ॥
ऋश्यः पुं स्त्री मृगविशेषः इति
शब्दरत्नावली ॥
ऋष इ श गतौ । इति ॥
कविकल्पद्रुमः ॥
ऋषभः पुं वृषः कर्णरंध्रं ॥
कुंभीरपुच्छः उत्तरपदे श्रेष्ठः
इतिमेदिनी पर्वतविशेषः
इतिधरणी वराहपुच्छः ॥
आदि जिनः इति हेमचंद्रः ॥
भगवदवतारविशेषः सत
सत्ययुगे अग्नीध्रसुतनाभिराजपुत्र
त्वेनजातः तस्य पुत्रः जडभरतः
इति श्रीभागवते स्पष्टवर्णितः ॥

इति श्रीभागवते स्पष्टवर्णित ॥
गतौषधविशेषः तत्पर्य्यायः
वृषः १ ऋषभकः २ वीरः ३ इति
रत्नमाला गोपतिः ४ धीरः ५
विषाणी ६ दुर्द्धरः ७ ककुद्मान् ८
पुंगवः ९ वोढा १० शृंगी ११ ॥
धुर्य्यः १२ भूपतिः १३ कामी १४
हस्तिप्रियः १५ उक्षा १६ लांगूली
१७ गौः १८ वंधुरः १९ गोरक्षः
२० वनवासी २१ अस्यगुणाः
मधुरत्वं शीतत्वं रक्तपित्त
विरेकनाशित्वं शुक्रश्लेष्मकारित्वं

दाहक्षयज्वर हरत्वंच । इति
राजनिर्घंटः सप्तस्वरांतर्गत
द्वितीयस्वरः सतुगोस्वरतुल्यस्वरः
ज्ञातकस्वरतुल्यस्वर इति केचित्
अस्योत्पत्तिः नाभिमूलात्पवन
णोत्थितः कंठशीर्षसमाहतः ऋषभवन्न
र्दतीति हेतुना ऋषभः स्मृतः
इतिसंगीतदामोदरः ॥
ऋषभध्वजः पुं शिवः ॥
अर्हद्विशेषः इतिमेदिनी ॥
ऋषभी स्त्री नराकारस्त्री शूकशिं
वी शिराला विधवा ॥ इति ॥
मेदिनी ॥
ऋषिः पुं ज्ञानसंसारयोःपारंगता
शास्त्रकृदाचार्यः रिषिर्दृशादिश्च
विद्याविदग्धमतयोरिषयःप्रसिद्धाः
इतिप्रयोगात् इतिभरतः ॥
तत्पर्य्यायः सत्यवचाः २ ॥
शापास्त्रः ३ सतुसप्तविधःयथा
व्यासाद्या महर्षयः १ भेलाद्याः
परमर्षयः २ कण्वाद्यादेवर्षयः ३
वशिष्ठाद्या ब्रह्मर्षयः ४ सुश्रुता
द्याःश्रुतर्षयः ५ ऋतुपर्णाद्याराज
र्षयः ६ जैमिन्याद्याः कांडर्षयः ७ इति
त्रिकांडशेषः तथाच रत्नकोषे
सप्तब्रह्मर्षिदेवर्षिमहर्षिपरमर्षयः
कांडर्षिश्चश्रुतर्षिश्चराजर्षिश्चक्रमा

वराः मन्वंतरभेदे सप्तर्षि ॥
नामानियथा १ स्वायंभुवमन्वंतरे
मरीचिः अत्रिः अंगिराः पुलस्त्यः
पुलहः क्रतुः वशिष्ठः ॥ २
स्वारोचिषे ऊर्जस्तंभादयः ३
उत्तमे वशिष्ठसुताःप्रमदादयः
४ तामसे ज्योतिर्धामादयः ५
रैवते हिरण्यरोमा वेदशिरा
ऊर्द्ध्वबाहुरित्यादयः ६ चाक्षुषे
हविष्मद्वीरकादयः ७ वैवस्वताख्य
वर्त्तमानमन्वंतरे कश्यपः अत्रिः
वशिष्ठः विश्वामित्रः गौतमः
जमदग्निः भरद्वाजः ८ सावर्णिके
गालवः दीप्तिमान् परशुरामः
अश्वत्थामा कृपः ऋष्यशृंगः
व्यासः ॥ ९ दक्षसावर्णिके
द्युतिमदाद्याः १० ब्रह्मसावर्णिके
हविष्मत् सुकृत सत्यजय ॥
मूर्त्याद्याः ॥ ११ धर्मसावर्णिके
अरुणादयः १२ रुद्रसावर्णिके
तपोमूर्त्यादयः १३ देवसावर्णिके
निर्मोक तत्वदर्श्याद्याः १४ इंद्र
सावर्णिके अग्निबाहुशुचिशुद्ध
मागधाद्याः सप्तर्षयः ॥ इति
श्रीभागवते ज्योतिःशास्त्र ॥
सप्तर्षयः मतेवशिष्ठपत्न्यारुंधतीसहित
वर्त्तमान मन्वंतरीयसप्तर्षिणा

महानक्षत्रे स्थितिः तस्योदये
तेषां चोदयो भवति कार्त्तिकेऽ
मते प्रानिलोकादूर्द्धं ऋक्षलोका
त्त्रयः तेषां स्थितिः वेदः ॥
किरणे इति मेदिनी ॥
ऋषिकुल्या स्त्री नदी इति
हेमचंद्रः ॥
ऋषिजांगलिकी स्त्री ऋक्षगंधा
वृक्षः ऋषिजांगल इतिख्यातः
इतिरत्नमाला ॥
ऋषिप्रोक्ता स्त्री माषपर्णी वृक्षः
इतिरत्नमाला ॥
ऋष्टिः स्त्री खड्गः इत्यमरः
ऋष्यः पुं स्त्री मृगविशेषः ॥
इत्यमरः ॥
ऋष्यकेतुः पुं अनिरुद्धः इति
त्रिकांडशेषः अस्यरूपांतराणि
ऋष्यकेतुः । ऋष्यकेतनः ॥
रिष्यकेतुः विष्यकेतुः ॥
ऋष्यगता स्त्री ऋष्यप्रोक्ता वृक्षः
इति शब्दरत्नावली ॥
ऋष्यगंधा स्त्री वृक्षविशेषः ॥
ऋषिजांगल इतिख्यातः तत्
पर्य्यायः ऋक्षगंधा २ ॥
ऋषिजांगलिकी ३ इतिरत्नमाला
ऋष्यप्रोक्ता स्त्री शतमूली ॥
शूकशिम्बी अतिबला इति

मेदिनी ॥
ऋष्यमूकः पुं पर्वतविशेषः
इतिजटाधरः स तु दक्षिणदेश
पम्पासरोवरकूलस्थितः यत्र
वालिभयात् सुग्रीवादयः पंच
वानराः स्थिताः इति ॥
रामायणं ॥
ऋष्यशृंगः पुं मुनिविशेषः ॥
स तु विभांडकसुतः तस्य भार्या ॥
लोमपादराजकन्या शान्ता इति
रामायणं ॥
ऋक्षन वधे इति
कविकल्पद्रुमः ॥
ऋक्षः पुं पर्वतविशेषः भल्लूकः
श्योणाकवृक्षः इतिमेदिनी ॥
श्योनाकप्रभेदः ॥ इति
राजनिर्घंटः ॥
ऋक्षं स्त्री पुं नक्षत्रं इति ॥
मेदिनी राशिः इतिज्योतिषं ॥
ऋक्षगंधा स्त्री वृक्षविशेषः
वीरताड इति ख्यातः तत् ॥
पर्य्यायः छगलान्त्री २ आवेगी ३
वृद्धदारकः ४ जुंगः ५ इत्यमरः
ऋषिजांगल इतिख्यातो वृक्षश्च
तत्पर्य्यायः ऋष्यगंधा २
ऋषिजांगलिकी ३ । इतिरत्नमाला
क्षीरविदारीवृक्षः तत्पर्य्यायः ॥

महाश्वेता २ क्षीरिका ३ ॥
ऋक्षगंधिका ४ इतिशब्दरत्नावली
ऋक्षगंधिका स्त्री क्षुद्रभूमिकूष्मांडः
तत्पर्य्यायः क्षीरविदारी २ ॥
महाश्वेता ३ इत्यमरः ॥
ऋक्षरं क्ली वारिधारा । इति ॥
मेदिनी ॥
ऋक्षरः पुं ऋत्विक् इति मेदिनी
ऋक्षराजः पुं जांबवान् इति ॥
रामायणं ॥
ऋक्षेशः पुं चंद्रः इति
हलायुधः ॥

ॠ

ॠ दीर्घ ॠकारः स तु अष्टम
स्वरवर्णः अस्योच्चारणस्थानं मूर्द्धा
स प्लुतश्च भवति इति ॥
व्याकरणं ॠकारं परमेशानि ॥
स्वयं परम कुंडली पीत
विद्युल्लताकारं पंचदेवमयं सदा
चतुर्ज्ञानमयं वर्णं पंचप्राणयुते
सदा त्रिशक्तिसहितं वर्णं ॥
प्रणमामि सदाप्रिये इति ॥
कामधेनुतंत्रे ॥
ॠ गि गत्यां इतिकविकल्पद्रुमः
ॠ च वाक्यारंभः रक्षा ॥ इति
मेदिनी निंदा भयं ॥

इतिशब्दरत्नावली ॥
ॠ क्ली रक्षः इतिमेदिनी
ॠः स्त्री देवमाता दानवमाता
स्मृतिः गतिः इति मेदिनी ॥
ॠः पुं भैरवः दनुजः ॥
इतिमेदिनी ॥

ऌ ऌकारः स तु नवमस्वरवर्णः
अस्योच्चारणस्थानं दंतः स
ह्रस्वदीर्घः प्लुतश्च भवति इति
व्याकरणं ऌकारं चंचलापांगि
कुंडलीपरदेवता ब्रह्मादयः
सर्वे तिष्ठंति सततं प्रिये पंच
देवमयं वर्णं चतुर्ज्ञानमयं सदा
पंचप्राणयुतं वर्णं तथा गुण
त्रयात्मकं बिंदुत्रयात्मकं वर्णं
पीतविद्युल्लताकारा इति
कामधेनुतंत्रे ॥
ऌ क्ली देवमाता इतिमेदिनी
ऌकारः कोषश्च भूमिः कुध्रः
पर्वतः इति मेदिनी ॥

ॡ

ॡ दीर्घ ॡकारः स तु दशमस्वरवर्णः
अस्योच्चारणस्थाने दंतः । स
प्लुतश्च भवति इतिव्याकरणं
ॡकारं परमेशानि पूर्णचंद्र सम



श्भे पंचदेवात्मकं वर्णपंच प्राणात्मक सदा गुणत्रयात्मकं वर्णंतथा विंदुत्रयात्मकं। चतुर्वर्गप्रदेदेविस्वयंपरमेकुंडली इतिकामधेनुतंत्रे ॥

२ व्य देवनारी नार्य्यात्मा ॥ माताइतिमेदिनी ॥

२ स्त्री दैत्यस्त्री इत्येकाक्षर ॥ कोषः दनुजमाता कामधेनु माताइतिकश्चिदेकाक्षरकोषः ॥

२ः पुं सर्वः महादेवः इति कश्चिदेकाक्षरकोषः ॥

ए ऐणिः

ए एकारः सप्तएकादशस्वर अस्योच्चारण स्थानंतालुकंठ अस्यदीर्घः प्लुतश्चभवतिइति व्याकरणे एकारं परमे दिव्ये ब्रह्मविष्णुशिवात्मकं रंजिनी कुसुम प्रख्येपंचदेवमयंसदा पंचप्राणात्मकं वर्णं तथाविंदु त्रयात्मकं चतुर्वर्गप्रदेदेविस्वयं परमकुंडली इतिकामधेनुतंत्रे ॥

ए व्य स्मृतिः अस्याअनुकंपा आमंत्रण आकाने ॥इति त्रिकांडशेषः ॥ मेदिनी ॥

एः पुं विष्णुः इत्येकाक्षरको त्रिकांडशेषः ॥

एकं त्रि मुख्यं अन्यत् केवलं इत्यमरः आदिसंख्या इतिमेदिनी अथैकवाचकानि परमात्मा १ विष्णुः २ क्षितिः ३ गणेशदंतः ४ शुक्रचक्षुः ५ इति कविकल्पलता अग्निः ६ सूर्यः ७ देवराजः ८ यमः ९ इति ॥ महाभारतेवनपर्व ॥

एककः त्रि असहायः एकला इतिभाषा तत्पर्यायः एकः २ एकाकी ३ इत्यमरः ॥

एकाकी त्रि एककः इत्यमरः

एककुंडलः पुं वलरामः कुवेरः इतिमेदिनी ॥

एकगुरुः पुं सतीर्थः एकगुरुर शिष्यइतिभाषा इत्यमरः ॥

एकचक्रे स्त्री पुरीविशेषः तत्पर्यायः हरिगृहं २ अंभपुरी ३ इतित्रिकांडशेषः ॥

एकचरः पुं हिंस्रपशुविशेषः गंडारइतिभाषा तत्पर्य्यायः ॥ खड्गीनसः २ गलेन साहः ३ गंडकः ४ इतित्रिकांडशेषः ॥

एकचारी न पुं बुद्धसहचारीइति त्रिकांडशेषः ॥

एकजन्मा न पुं राजा इति

एकतमः त्रि वहूनां मध्येएकः इतिव्याकरणं ॥

एकतरः त्रि द्वयोर्मध्ये एकः इतिव्याकरणंभिन्नः इत्यमरः ॥ टीकायांभरतः ॥

एकतास्त्री एकत्वं एक्यं ॥ इतिव्याकरणं ॥

एकतानः त्रि एकाग्रः एक विषयासक्तचित्तः इत्यमरः ॥

एकतालं पुं इत्यमरटीकायां स्वामी ॥

एकतालः पुं समन्वितलयः नृत्यगीतवाद्यानांसाम्ययत्र ॥ समताल इतियस्याख्या ॥ इत्यमरभरतौ ॥

एकतीर्थी न पुं सतीर्थः गुरुभाइ इतिभाषा

एकत्र व्य एकस्मिन् एकसंगे इति भाषाइतिव्याकरणं ॥

एकदंष्ट्रः पुं गणेशः इति ॥ त्रिकांडशेषः ॥

एकदंतः पुं गणेशः इत्यमरः

एकदा व्य एकस्मिन्काले तत् पर्य्यायः युगपत् २ इत्यमरः ॥

एकदृक पुं महादेवः काकः काणेत्रि इतिहेमचंद्रः ॥

एकदेहः पुं बुधग्रहः ॥ इति त्रिकांडशेषः ॥

एकधाव्य एकप्रकारः इति व्याकरणं ॥

एकधुरः त्रि एकभारवाहक गवादिः एकपिठागरू इतिभाषा तत्पर्य्यायः एकधुरीणः २ एकधुरावहः ३ इत्यमरः ॥

एकधुरावहः त्रि एकधुरः इत्यमरः ॥

एकधुरीणः त्रि एकधुरः एकभारवोढा इत्यमरः एकस्य रथस्य लांगलादेर्वा धुरंवहति यः इत्यमरटीकायां भरतः ॥

एकनटः पुं मुख्यनटः तत्पर्य्यायः कथकः २ इतित्रिकांडशेषः कथाप्राणः ३ इतिशब्दरत्नावली

एकपत्नी स्त्री पतिव्रता इति त्रिकांडशेषः ॥

एकपत्रिका स्त्री गंधपत्रवृक्षः इतिराजनिर्घंटः ॥

एकपदं क्ली तत्कालः इति मेदिनी ॥

एकपदः पुं शृंगारबंधविशेषः तस्यलक्षणं पादमेकं हृदि स्थाप्य द्वितीयं स्कंधसंस्थितं स्त्रीनो धृत्वा रमेत्कामी बंधस्त्वेकपदः स्मृतः इति रतिमंजरी ॥

एकपदी स्त्री पंथाः इत्यमरः॥
एकपत्नः त्रि सहायः॥ इति
त्रिकांडशेषः ॥
एकपात् पुं शिवः इति ॥
त्रिकांडशेषः ॥
एकपिंगः पुं कुवेरः इत्यमरः॥
एकपिंगलः पुं कुवेरः इत्यमरः
टीकायांभरतः ॥ भाव
एकभक्तव्रते क्ली रात्रिभोजना
विशिष्ट दिवाभोजने तथाच
स्कंदपुराणे दिनार्द्धसमयेतीते
भुज्यते नियमेन यत् एकभक्त
मिति प्रोक्तं रात्रौ न नक्तकं च तत्
एकमूला स्त्री शृगालपर्णी ॥
अतसी इति वैद्यकं ॥
एकयष्टिका स्त्री हारविशेषः
एकनरिहार इति भाषा तत्
पर्य्यायः एकावली २ इत्यमरः
एकराजः पुं भृंगराजहस्तः॥
इति जटाधरः ॥
एकलः त्रि एकाकी एकला
इति भाषा इति पद्यावली ॥
एकलिंगे क्ली स्थानविशेषः
तथाच स्वगामे पंचक्रोशांतरे
यत्र न लिंगांतरं मीक्ष्यते ॥
तदेकलिंगमाख्यातं तत्र सिद्धि
रनुत्तमा

एकलिंगः पुं कुवेरः इति ॥
शब्दरत्नावली ॥
एकवर्णी स्त्री वाद्यभेदः तत्
पर्य्यायः करताली २ केकमाला
३ कलंकषा ४ ॥ इति
शब्दरत्नावली
एकवर्षिका स्त्री एकहायनी गौः
एकवत्सेरबकमा इति भाषा
इति हेमचंद्रः ॥
एकवादः पुं डिंडिमवाद्यं॥
इति शब्दरत्नावली ॥
एकवीरः पुं वृक्षभेदः तत्
पर्य्यायः महावीरः २ सकृद्वीरः ३
सुवीरकः ४ अस्य गुणाः ॥
मदकारित्वं अम्लत्वं कटुत्वं
तोदवातनाशित्वं वदूलीकटि
दृष्ट्यादिवलपत्ताभिघाति हारित्वं
इति राजनिर्घंटः ॥
एकहंसः पुं स्थानभेदः यथा
चतुः क्रोशांतरे यत्र न हंसोतंरं
मीक्ष्यते एकहंसः स विज्ञेय इति
आगमः ॥
एकशफः पुं घोटकः इति
त्रिकांडशेषः एकखुरजंतुमात्रे
यथा खरोऽश्वोऽश्वतरो गौरः॥
शरभश्चमरी तथा एते चैकशफाः
ततः शृणु पंचनखान् यथा इति

श्रीभागवते ॥
एकशृंगः पुं विष्णुः इति
त्रिकांडशेषः एकशृंगयुक्त
पशुमात्रे ॥ (शेषः
एकषष्टिः स्त्री संख्याविशेषः वि
६१ एकषष्ठि इति भाषा ॥
इत्यमरः ॥
एकसर्गः त्रि एकाग्रः इत्यमरः
एकस्वरः पुं डमरु वाद्यं इति॥
शब्दरत्नावली ॥ (एक
एकहायनी स्त्री एकवर्षीयगवी
वत्सेरवा कुर इति भाषा तत्
पर्य्यायः एकाब्दा २ इत्यमरः
एकाकी न त्रि सहायरहितः तत्
पर्य्यायः एकः २ एककः ३
एकला इति भाषा इत्यमरः
एकाग्रः त्रि अनन्यवृत्तिः तत्
पर्य्यायः एकतानः २ अनन्यवृत्तिः
३ एकायनः ४ एकसर्गः ५ एकाग्र्यः
६ एकायनगतः ७ इत्यमरः॥
अनाकुलः इति मेदिनी ॥
एकाग्र्यः त्रि एकाग्रः इत्यमरः
एकांगः पुं बुधग्रहः इति
त्रिकांडशेषः ॥
एकांगे क्ली चंदने इति॥
हारावली
एकादश न त्रि संख्याविशेषः॥
एगारे इति भाषा तद्वाच्यौ
रुद्रः २ दुर्योधन सेनापतिः २
इति कविकल्पद्रुमः ॥
एकादशी स्त्री तिथिविशेषः
सानु शुक्ल पक्षे सूर्य्यमंडलात्
चंद्रमंडलस्य निर्गम रूपैकादश
कला क्रियारूपा कृष्णपक्षे
सूर्य्यमंडले चंद्रमंडलस्य प्रवेश
रूपैकादश कलाक्रिया रूपा
तत्पर्य्यायः हरिवासरं ॥ २
हरिदिनं ३ इति स्मृतिः तत्र
जातफलं क्रोधात्कटः क्लेशसहः
सुभाषी यागादिकर्ता स्वजनैक
भर्त्ता महामतिर्देव गुरु प्रियः
स्यादेकादशीजन्मनुजोऽतिहृष्टः
इति कोष्ठीप्रदीपः तत्र ॥
उपवासविधिः पारणदिने द्वादशी
लाभे सर्वएव पूर्णामेकादशीं
मुपवसेयुः तदलाभे गृही पूर्वां
तदन्यः परां विधवाप्युपवसेत्
पूर्णात उदयात् शाकयदाविष
मुहूर्तद्वयलंघुता सेपूर्णैकादशी
ज्ञेया तत्रैवोपवसेत् गृही
इति गरुडोक्ता यदा ॥
पूर्वदिने दशम्या परदिने द्वादश्या
युक्तैकादशी तदा उत्तरामुपोष्य
द्वादश्यां पारणं कुर्य्यात् परदिने



द्वादश्यां निर्गमे श्रेयो दशम्यामपि
यदा न सूर्य्योदयानन्तरं दशमी
युतैकादशी अथच परदिने न
निःसरति तदा तां विहाय द्वादशी
मुपवसेत् यदा न सूर्य्योदय ॥
प्राक्कालीनदशमीविद्धैकादशी
परदिनेच न निःसरति तदा
तामुपवसेत् यदा तद्विधा सती
परदिनेपि निःसरति तत्परदिनेच
द्वादशी तदा तां विहाय खण्डा
मुपोष्य द्वादश्यां पारयेत् ॥
यदा तूभयदिने तद्विधैकादशी
परदिनेच नद्वादश्यां तदाषष्टि
दण्डात्मिकां विहायामुपोष्य ॥
परदिने द्वादश्याद्यपादमुपोर्य्य
पारयेत् वैष्णवस्तत्रापिशुक्ल
पक्षे परामुपोष्य त्रयोदश्यां
पारयेत् सर्वस्यां कृष्णैकादश्यां
वैष्णवानां सपुत्राणां गृहस्थानां
मुपवासो नित्यः। ब्राह्मणस्य
विधवानां नित्यः वैष्णवेतरेषां
नाद्वाणां हरिशयनवर्त्तिनीषु
कृष्णैकादशीषु उपवासो नित्यः
अपुत्रवतां गृहिणां तु सर्वास्वेव
नित्याधिकारः काम्योपवासे तु
विशेषेणैव सर्वेषामधिकारः
नित्योपवासे विष्णुकादिदोषो

नास्ति अष्टाहादधिको मर्त्यो ॥
ऽपूर्णाशीतिवत्सरो नित्याधिकारी
विधवानां तु सर्वास्वेव नित्याधिकारः
तत्र मलमासादिदोषो नास्ति ॥
इत्येकादशीतत्त्वोक्तव्यवस्था
अथ हरिभक्तिविलासोक्तैकादशी
व्यवस्था लिख्यते तत्रादौ उपवास
पूर्वदिनकृत्यं प्रातःस्नानादिकं
कृत्वा सवैष्णवो धौत वस्त्रकः ॥
व्रतं संकल्प्य कुर्वीत वैष्णवैश्च
महोत्सवे इति कारिका ॥
संकल्पमन्त्रः दशमीदिनमारभ्य
करिष्येहं व्रतं तव त्रिदिने
देवदेवेश निर्विघ्नं कुरु केशव
तत्र रुक्माङ्गदराजवाक्यं ॥
नारदीये प्रातर्हरिदिने लोका
स्तिष्ठध्वं चैकभोजनाः अक्षार
लवणाः सर्वे हविष्यान्ननिषेविनः
अवनीतल्पशयनाः प्रियासङ्ग
विवर्जिताः स्मरध्वं देवमीशानं
पुराणं पुरुषोत्तमं ॥
अथान्यनियमाः स्कान्दे ॥
कांस्यं मांसं मसूरंच क्षौद्रं चानृत
भाषणं पुनर्भोजन मायासं
दशम्यां परिवर्जयेत् पारण
दिनेऽपि निषिद्धद्रव्याण्यपि
निषिद्धानि ततो व्रतस्य ॥

नित्यत्वमाह कएनः एकादश्या
मुपवसेन्न कदाचिदिति क्रमेन
आग्नेयेच उपोष्यैकादशी ॥
राजन्यावदाप्नुः प्रकृतिभिः
भोजन निषेधो नारदीये ॥
यमोत्तरखण्डेच रटन्तीह ॥
पुराणानि भूयोभूयो वरानने
नभोक्तव्यं नभोक्तव्यं संप्राप्ते ॥
हरिवासरे पक्षद्वयेपिनित्यत्वं
विष्णुरहस्ये शुक्लेवायदिवाकृष्णे
विष्णुपूजन तत्परः एकादश्यां
नभुञ्जीत पक्षयोरुभयोरपि।
संक्रान्त्यादावपिनित्यत्वं ॥
कात्यायनः संक्रान्तौ रविवारे
वा यदाचैकादशी भवेत् उपोष्या
सा महापुण्या सर्वपापहराति
थिः उपवासदिने श्राद्धनिषेधः
यमोत्तरखण्डे एकादश्यां तु
प्राप्तायां मातापित्रोर्मृतेऽहनि
द्वादश्यां तत्प्रदातव्यं नोपवास
दिने क्वचित् अथ॥
अधिकारिणः यमोत्तरखण्डे
वर्णिनां आश्रमाणांच स्त्रीणांच
वृद्धवर्षाणि एकादश्युपवासस्तु
कर्त्तव्यो नान्नसंशयः कात्यायन
स्मृतौ अष्टवर्षाधिको मर्त्यो ॥
ह्यपूर्णाशीतिवत्सरः एकादश्या

मुपवसेत् पक्षयोरुभयोरपि
अशक्तौ प्रतिनिधिः ॥
वायुपुराणे उपवासेत्वशक्तस्य
आहिताग्नेरथापिवा पुत्रान्वा
कारयेदन्यान् ब्राह्मणान् वापि
कारयेत् अथवा विप्रमुख्येभ्यो
दानं दद्यात् स्वशक्तितः उपवासं तु
कुर्वाणः पुण्यं शतगुणं भवेत्
मार्कण्डेय पुराणेच एकभक्तेन
नक्तेन बालवृद्धातुरः क्षिपेत्
पयोमूलफलैर्वापि ननिर्द्वादशिको
भवेत् अनुकल्पापवादः ॥
गरुडपुराणे मद्धयने ॥
मडत्याने मत् पार्श्वपरिवर्त्तने
फलमूलहारी हृदिशल्ये
ममार्पयेत् एकादशी ॥
माहात्म्यं तत्त्वसागरे एकादशी
समं किंचित् पावनं नचविद्यते
स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्र
प्रदायिनी गारुडेच एकादशी
व्रतं भक्त्या यः करोति नरः सदा
स विष्णु लोकं व्रजति यानि
विष्णोः सरूपतां ॥
उपवास दिन निर्णयः सौरे॥
धर्मोत्तरे एकादशीमुपवसेत्
द्वादशी मथवापुनः विमिश्रां
वापिकुर्वीत न दशम्यायुतां॥

क्वचित् विद्धोपवास ॥
दोषमाह वशिष्ठः दशम्येकादशी
यत्र तत्र नोपवसेद्बुधः अपत्यानि
विनश्यन्ति स्वर्गलोकं न गच्छति
द्वादश्युपवासफले स्कान्दे ॥
ऊर्द्ध्वं हरिदिनेन स्यात् द्वादशी॥
ग्राह्ये ततः द्वादश्यामुपवासो
ऽत्र त्रयोदश्यां तु पारणं ॥ एवं
कुर्वन् नरो भक्त्या विष्णुसायुज्य
माप्नुयात् अन्यथा कुरुते यस्तु
स याति नरकं ध्रुवं ॥ (ते)
सम्पूर्णा लक्षणेन विद्धा लक्ष
भविष्यपुराणे आदित्योदय॥
वेलायाः प्राङ्मुहूर्त्तद्वयान्विता ॥
एकादशी च संपूर्णा विद्धान्या परि
कीर्त्तिता ॥ अरुणोदय ॥
विद्धापरित्याग माह कण्वः ॥
अरुणोदयवेलायां दशमीसंयुता
यदि अत्रोपोष्या द्वादशी स्यात्
त्रयोदश्यां तु पारणं ॥ ॥
वेधस्तु विधः ब्रह्मवैवर्ते अरुण
उदयवेधः स्यात् सार्द्धं तु घटिकाद्वयं
अतिवेधो द्विघटिकः प्रभा॥
संदर्शनाद्रवेः महावेधोपि
तत्रैव दृश्यते अर्कोऽनदृश्यते ॥
तुरीयस्तत्र विहितो योगः सूर्योदये
बुधैः अरुणोदयेविद्धोपवास॥

दोषः याम्ये अरुणोदयकाले
नवेधं दृष्ट्वा चतुर्विधं महिते
ये प्रकुर्वन्ति यावदाहूतनारकाः
शुद्धा विशेषपरित्यागः ॥
गारुडे संपूर्णैकादशी यत्र प्रभाते
पुनरेव सा वेलेव त्रयोदश्या
घटिकैकापि दृश्यते गृहस्थोपि
परां कुर्यात् पूर्वां नोपवसेत्तदा
अथाष्टमहाद्वादशीनो विशेषतो
निरूपणं ब्रह्मवैवर्ते उन्मीलनी
वंजूली च त्रिस्पृशा पक्षवर्द्धिनी
जया च विजया चैव जयन्ती पाप
नाशिनी द्वादश्योष्टौ महापुण्याः
सर्वपापहरा द्विज तिथियोगेन
जायन्ते चतस्रश्चापरास्तथा ॥
नक्षत्रयोगाच्च बलात् पापं
प्रशमयन्ति ताः अथोन्मीलनी
ब्रह्मवैवर्ते एकादशी च संपूर्णा
वर्द्धते पुनरेव सा द्वादशी च न वर्द्धेत
कथितोन्मीलनी सा पापघ्ने ॥
संवर्द्धैकादशी कार्या द्वादशी
मिश्रितानरैः प्रातर्भवतु वा मा वा
यतो नित्यमुपोषणं अथ
वंजुली ब्रह्मवैवर्ते द्वादश्येव
विवर्द्धेत न चैवैकादशी यदा
वंजुलीति भृगुश्रेष्ठ कथिता पाप
नाशिनी भागवतादितन्त्रे ॥

संपूर्णैकादशी त्याज्या परतो ॥
द्वादशी यदि उपोष्या द्वादशी
शुद्धा द्वादश्यामेव पारणं ॥
अथ त्रिस्पृशा ब्रह्मवैवर्तपुराणे
अरुणोदय आद्या स्यात् द्वादशी
सकलं दिने अन्ते त्रयोदशी प्रात
स्त्रिस्पृशा साहरेः प्रिया॥
नारदीये एकादशी द्वादशी च
रात्रिशेषे त्रयोदशी त्रिस्पृशानाम
सा प्रोक्ता ब्रह्महत्यां व्यपोहति
अथ पक्षवर्द्धिनी ॥ (ते)
दर्शश्च पौर्णमासी च संपूर्णा वर्द्धे
यदि द्वितीये हि द्विजश्रेष्ठ ॥
सा भवेत् पक्षवर्द्धिनी ॥
ब्रह्मवैवर्ते कुहूराके यदा ॥
वृद्धिं प्रयाते पक्षवर्द्धिनी ॥
विहायैकादशीं तत्र द्वादशीं
समुपोषयेत् अथ जयादिः॥
ब्रह्मवैवर्ते पुष्य श्रवणपुष्याय (?)
रोहिणीसंयुतास्तु ताः उपोषिताः
संफला द्वादश्योष्टौ पृथक् पृथक्
अथोपवासदिनकृत्यं ॥
देवलः गृहीत्वौदुम्बरं पात्रं
वारिपूर्णमुदङ्मुखः उपवासन्तु
गृह्णीयाद्यद्वा संकल्पयेद्बुधः तत्र
संकल्पमन्त्रः एकादश्यां निराहारः
स्थित्वाहमपरेऽहनि भोक्ष्यामि॥

पुण्डरीकाक्ष शरणं मे भवाच्युत
पुष्पाञ्जलिं त्रयदाने मंत्रपूत
जलपाने वाह मार्कण्डेयः ।
अष्टाक्षरेण मंत्रेण त्रिजप्तेनाभि
मन्त्रितं उपवासफलं प्रेप्सुः ॥
पिबेत्तोयं समाहितः देवाग्रेने ॥
ततः कृत्वा पुष्पाञ्जलिमर्घ्यापिवा
संकल्पं मंत्रमुच्चार्य देवाय
विनिवेदयेत् ॥ संकल्पादेः ॥
विशेषः नारदीये पूर्णायाः संग
दोषैकादश्याः स्नानपूजने
वर्जयेति नराः पूर्वान् यामांश्च
चतुरो द्विज तदूर्द्ध्वं स्नानपूजादि
कर्त्तव्यं तदुपोषितैः न दिवा॥
शुद्धिमाश्रिता नरैः रात्रौ विधीयते
दिनकार्यमशेषं च कर्त्तव्यं शर्वरी
मुखे पूजाजागरणविधिः ब्राह्मे
एकादश्यामुभौ पक्षौ निराहारः
समाहितः स्नात्वा सम्यग्विधानेन
धौतवासा जितेन्द्रियः संपूज्य
विधिवद्विष्णुं श्रद्धया सुसमाहितः
पुष्पैर्गन्धैस्तथा धूपैर्दीपै
र्नैवेद्यकैः परैः उपहारैर्बहु॥
विविधैर्जपहोमप्रदक्षिणैः स्तोत्रैः
नानाविधै नृत्यगीतवाद्यैः॥
मनोरमैः ॥ एवं संपूज्य ॥
विधिवद्रात्रौ कुर्यात् प्रजागरं॥

अथ जागरणलक्षणं स्कान्दे ॥
शृणु नारद वक्ष्यामि जागरस्य ॥
तु लक्षणं येन विज्ञातमात्रेण ॥
दुर्लभो न जनार्दनः । गीतं वाद्यञ्च
नृत्यञ्च पुराणपठनं तथा । धूपं
दीपञ्च नैवेद्यं पुष्पगन्धानुलेपनं
फलमर्घ्यञ्च श्रद्धा च दानमिन्द्रिय
निग्रहः । सत्यान्वितं विनिद्रञ्च मुदा
युक्तं क्रियान्वितं । साश्चर्य्यञ्चैव ॥
सोत्साहं पापालस्यादिवर्जितं ॥
प्रदक्षिणाभिः संयुक्तं नमस्कार ॥
पुरःसरं नीराजनसमायुक्तं ॥
मनिर्विण्णेन चेतसा यामे यामे
महाभाग कुर्य्यादारात्रिकं हरेः ।
एतैर्गुणैः समायुक्तः ॥
कुर्य्याज्जागरणं ॥ रनः
अथ पारणदिनकृत्यं कात्याय
प्रातः स्नात्वा हरिं पूज्य ॥
उपवासं समर्पयेत् पारणेन्तु ततः
कुर्य्यात् व्रतसिद्ध्यै हरिं स्मरन् ॥
तथा समर्पणमन्त्रः ॥ अज्ञान
तिमिरान्धस्य व्रतेनानेन केशव ॥
प्रसीद सुमुखो नाथ ज्ञानदृष्टि
प्रदो भव ॥ अथ पारणे
द्वादशीलङ्घने दोषः स्कान्दे ॥
पारणाहनि संप्राप्ते द्वादशीं ॥
यो व्यतिक्रमेत् त्रयोदश्यान्तु ॥

भुञ्जानः स तज्जन्मानि नारकी
अथ द्वादश्यत्यल्पत्वे कृत्यसमाधाने
देवीरहस्ये अत्यल्पे द्वादशी ॥
कुर्य्यात् नित्यकर्माह्नि उदये
अत्यल्पा चेन्निशी योर्द्धमामध्याह्निक
मेव तत् ॥ अथ संकटे ॥
पारणसमाधाने कात्यायनः । मन्त्रं
जपित्वा हृदये निवेद्यापारणे
व्रती अद्भिस्तु पारणं कुर्य्यात्
संकटे विषमे सति ॥ अथ ॥
हरिवासरकाल पारणनिषेधः
विष्णुधर्मोत्तरे द्वादश्याः प्रथमः
पादो हरिवासरसंज्ञकः । तमति
क्रम्य कुर्वीत पारणं विष्णुतत्परः ॥
अथ द्वादशीदिने वर्जनीयानि
स्कान्दे लोहं मांसं सुरां
तैलं व्यायामं क्रोधमैथुने ॥
परान्नं कांस्यं तांबूलं लोभं ॥
निर्माल्यलंघनं द्वादश्यां ॥
द्वादश्येतानि वै सर्वः परिवर्जयेत्
अपि च वितथभाषणं प्रवासः
दिवास्वप्नः अञ्जनं शिलापिष्टं ।
मसूरं पुनर्भोजनं हिंसा चणकं ॥
कोरदूषकं औषधं एतानि ॥
पुराणोत्तरोक्तान्यपि वर्जनीयानि
इति श्रीहरिभक्तिविलासे ॥
ऽयैकादशीव्यवस्था समाप्ता ॥

अथ पश्चिमदेश प्रसिद्धनाना ॥
पुराणोक्त षड्विंशत्येकादशी ॥
नामानि लिख्यन्ते अग्रहायणस्य
कृष्णैकादशी उत्पन्ना १ शुक्ला
मोक्षा २ पौषस्य कृष्णैकादशी ॥
सफला ३ शुक्ला पुत्रदा ४ माघस्य
कृष्णैकादशी षट्तिला ५ शुक्ला
जया ६ फाल्गुनस्य कृष्णैकादशी
विजया ७ शुक्ला आमर्द्दकी ८
चैत्रस्य कृष्णैकादशी पापमोचनी
९ शुक्ला कामदा १० वैशाखस्य
कृष्णैकादशी वरूथिनी ११ शुक्ला
मोहनी १२ ज्यैष्ठस्य कृष्णैकादशी
अपरा १३ शुक्ला निर्ज्जला १४
आषाढस्य कृष्णैकादशी योगिनी
१५ शुक्ला पद्मा १६ श्रावणस्य ॥
कृष्णैकादशी कामिका १७ शुक्ला
पुत्रदा १८ भाद्रस्य कृष्णैकादशी
अजा १९ शुक्ला वामना २० आश्वि
नस्य कृष्णैकादशी इन्दिरा २१ शुक्ला
पापाङ्कुशा २२ कार्त्तिकस्य ॥
कृष्णैकादशी रमा २३ शुक्ला
प्रबोधिनी २४ मलमासस्य ॥
शुक्लैकादशी सुभद्रा २५ कृष्णा
कमला २६ इत्येकादशी ॥
प्रकरणं समाप्तं ॥
एकाद्वविंशतिः त्रि एकोन ॥

विंशतिः १९ इति व्याकरणं ॥
एकानंशा स्त्री पार्वती । इति
त्रिकाण्डशेषः ॥
एकान्ते क्ली अत्यन्ततत्पर्यायः
अतिशयः १ भरः २ अतिवेलं ॥
४ भृशं ५ अत्यर्थं ६ अतिमात्रं
७ उद्गाढं निर्भरं ९ तीव्रं १० ॥
नितान्तं ११ गाढं १२ वाढं १३
दृढं १४ भेदगामिनि त्रि ॥
इत्यमरः । निर्ज्जने ॥
एकान्नविंशतिः त्रि एकोन
विंशतिः १९ इति व्याकरणं
एकाह स्त्री एकहायनी एक
वत्सरवयस्का गवी इत्यमरः ॥
एकायनः त्रि एकाग्रः एक
विषयासक्तचित्तः इत्यमरः ॥
एकायनगतः त्रि एकाग्रः
इत्यमरः ॥
एकावली स्त्री एकयष्टिका एकना
हार इति भाषा इत्यमरः ॥
एकाश्रितगुणः पुं एकैकवृत्तिधर्म्मः
तद्यथा रूपं १ रसः २ गन्धः ३
स्पर्शः ४ एकत्वं ५ एकपृथक्त्वं ६
परिमाणं ७ परत्वं ८ अपरत्वं ९
बुद्धिः १० सुखं ११ दुःखं १२
इच्छा १३ द्वेषः १४ यत्नः १५
गुरुत्वं १६ द्रवत्वं १७ स्नेहः १८

संस्कारः १९ अष्टक्षं २० शाहः॥
इतिसिद्धांतमुक्तावली ॥
एकाष्ठीलः पुं वकवृक्षः इति
कश्चिदमरः ॥ (रः
एकाष्ठीला स्त्री वकवृक्षः इत्यम
पाठा आकनादि इतिभाषा॥
इतिराजनिर्घंटः
एकाक्षः पुं काकः इति॥
शब्दचंद्रिका काणे त्रि ॥
एकायः त्रि एकपक्षः सहायः
सहभावी इतित्रिकांडशेषः॥
एकोशिका स्त्री वृक्षविशेषः
आकनादि इति भाषा इति॥
रत्नमाला॥
एज ऋ उ दीप्तौ इति ॥
कविकल्पद्रुमः ॥
एज ऋ कम्पे इतिकविकल्पद्रुमः
एठ उ बाधने इतिकविकल्पद्रुमः
एडः त्रि बधिरः इत्यमरः ॥
एडकः पुं मेषः इत्यमरः ॥
वनकमलः इति त्रिकांडशेषः
एडका स्त्री मेषी इत्यमरटीकायां
रायमुकुटः ॥
एडगजः पुं चक्रमर्दकः ॥
चाकुंदिया इतिभाषा इत्यमरः॥
अस्यगुणाः वायुकफकुष्ठनैरा
गुल्मोदररोगापहो नाशित्वं॥

कटुत्वंच इतिराजवल्लभः॥
एडमूकः त्रि बधिरः मूकश्चवके
श्रोतमक्षिणितः वाक्श्रुति॥
वर्जितः इत्यमरः शठः इति
मेदिनी ॥
एडुकं क्ली एडूकं इतिभरतः
द्विरूपकोषश्च ॥
एडूकं क्ली अंतर्गलकीकसकुंभे
इत्यमरः कीकसमिव ॥
कीकसे यत् कुड्ये छिद्राविडा
इतिख्यात मित्यन्ये इति
सारसुंदरी कीकसमस्थि एतत्
काष्ठादि कठिन द्रव्यापलक्षणे
कीकसमिव कीकसे किलिंजादीति
मधुः मध्यसंस्थापिताष्ठ्यादि
कुड्यमेडूकमुच्यते इति ॥
माधवः ॥
एडोकं क्ली एडूकं इति भरत
धृतद्विरूपकोषः ॥
एणः पुं स्त्री हरिणः इति॥
राजनिर्घंटः मृगविशेषः ॥
इत्यमरः अस्यमांसगुणाः॥
कषायत्वं मधुरत्वं पित्तरक्त॥
कफज्वरनाशित्वं संग्राहित्वं
रोचनत्वं रुच्यत्वं बलकारित्वं
इतिराजवल्लभः ॥ (वल्ली
एणकः पुं एणः इतिशब्दरत्ना

एणतिलकः पुं चंद्रः इति॥
हारावली ॥
एणभृत पुं चंद्रः इतिहेमचंद्रः
एते त्रि आगते इतिमेदिनी॥
कर्बुरवर्णयुक्ते इत्यमरः ॥
एतः पुं मृगः इति शब्दरत्नावली
कर्बुरवर्णः इतिमेदिनी ॥ (म
एतद् त्रि पुरोवर्तिवाचकसर्वना
शब्दः यह इति भाषा इति ॥
व्याकरणे ॥
एतनः पुं निश्वासः इति॥
हेमचंद्रः ॥
एतर्हि अव्य एतस्मिनकालेसंप्रति
इत्यमरः ॥
एतप्राः पुं ब्राह्मणः इत्युणादि
कोषः ॥
एतश्नाः (स) पुं ब्राह्मणः इत्युणादि
कोषः ॥
एतावत त्रि एतत परिमाणं॥
इतिव्याकरणं ॥
एध उ वृद्धौ इति॥
कविकल्पद्रुमः ॥
एधः पुं इंधने ज्वालानिकाष्ठ
इतिभाषा इत्यमरः ॥
एधः (स) क्ली इंधने इत्यमरः॥
एधतुः पुं पुरुषः अग्निः ॥
इतिमेदिनी ॥

एधत् त्रि वर्द्धिते वृद्धियुक्ते ॥
इतिशब्दरत्नावली ॥
एधितः त्रि वर्द्धितः वृद्धिप्राप्तः
इत्यमरः ॥
एनः (स) क्ली पापे अपराधः इति
मेदिनी निंदा इति ॥
शब्दरत्नावली ॥
एरका स्त्री तृणविशेषः तत्
पर्य्यायः गुंद्रमूला २ शिम्बी ३
गुंद्रा ४ शारी ५ अस्या गुणाः।
हिमत्वं शुक्रवृद्धिकारित्वं
वस्तुहितत्वं वातकोपनत्वं ॥
मूत्रकृच्छ्राश्मरीदाहपित्तशोणित
नाशित्वंच। इतिराजनिर्घंटः॥
एरंगः पुं मत्स्यभेदः रेगा ॥
इतिख्यातः अस्यगुणाः मधुरत्वं
स्निग्धत्वं विष्टंभित्वं शीतलत्वं
गुरुत्वंच इतिभावप्रकाशः॥
एरंडः पुं वृक्षविशेषः भेरेंडा
इतिभाषा तत्पर्य्यायः ॥
व्याघ्रपुच्छः २ गंधर्वहस्तकः ३
उरुबूकः ४ रुबुकः ५ चित्रकः ६
चंचुः ७ पंचांगुलः ८ मंडः ९
वर्द्धमानः १० व्याघ्रकः ११ इत्यमरः
उरुबुकः १२ रुबूकः १३ रुबुक
१४ रुवकः १५ बुकः १६ आमंडः
१७ आमंडः १८ व्याघ्रमनः १९

इति तट्टीकायां भरतः कोतः॥
२० तरुणः २१ शुक्लः २२ वातारिः
२३ दीर्घपत्रकः २४ इति ॥
राजनिर्घण्टः अस्य तैलस्य गुणाः
मधुरत्वं गुरुत्वं अतिश्लेष्मवर्द्धत्वं
वातरक्तगुल्महृद्रोगजीर्णज्वर
नाशित्वंच इति राजवल्लभः ॥
अपिच कृमिदोषसकलरोगशूला
कुष्ठ नाशित्वं स्वादुत्वं ॥
रसायनोत्तमत्वं पित्तप्रकोपनत्वं
अतिदीपनत्वं आमवात ॥
नाशित्वंच इतिराजनिर्घण्टः
अस्य भेदकत्व गुणाप्यस्ति ॥
श्वेतेरण्डगुणाः कटुत्वं तिक्तत्वं
उष्णत्वं कफार्त्ति ज्वरवायुकास
नाशित्वं रसाढ्यत्वंच इति ॥
राजनिर्घण्टः अस्य मूलगुणाः
शूलवायु कफनाशित्वं शुक्र
कारित्वंच इति राजवल्लभः ॥
एरेण्डकः पुं एरेण्डवृक्षः इति।
भरतः हिरूपकोषश्च ॥
एरेण्डपत्रि स्त्री देतीवृक्षः ॥
इतिराजनिर्घण्टः ॥
एरेण्डफला स्त्री देती वृक्षः इति
राजनिर्घण्टः ॥
एरेण्डा स्त्री पिप्पली इति॥
शब्दचन्द्रिका ॥

एर्वारुः पुं कर्कटाभेदः तत्
पर्य्यायः ख्यालपत्रा २ लोमशा
३ स्थूला ४ तोयफला ५
हस्तिदंतफला ६ कर्कटा ७
अस्य गुणाः पित्तहरत्वं
सुशीतलत्वं मधुरत्वं मूत्रामयघ्नत्वं
रुचिप्रदत्वं संतापमूर्च्छापहरत्वं
तृप्तिदातृत्वं अतिसेवितश्चेत्
वातप्रकोपकारित्वंच इति
राजनिर्घण्टः ॥
एलकः त्रि मेषः इति ॥
राजनिर्घण्टः ॥
एलंगः पुं मत्स्यभेदः ॥
रायकडा इति भाषा रायखोडा
एलोगा इत्यपि ख्यातः ॥
अस्य गुणाः। मधुरत्वं हृद्यत्वं॥
संग्राहित्वं कफवातनाशित्वं
मेधाग्नि पुष्टिकारित्वं शीतलत्वं
गुरुत्वं श्लेष्मप्रसादनत्वंच इति
राजनिर्घण्टः ॥
एलवालु क्ली एलवालुके इति
शब्दरत्नावली ॥ (विशेषः
एलवावालुके क्ली सुगंधिद्रव्य
लालुका इति ख्यातं तत्
पर्य्यायः एलेयं २ सुगंधि ३
हरिवालुकं ४ वालुकं ५ इत्यमरः
हरिवासुकं ६ इतितट्टीका॥

आलुकं ७ एलववालुकं ८ ॥
कपित्थत्वक् ९ गंधत्वक् १० कुष्ठ
गंधिः ११ अस्य गुणाः अम्लत्वं॥
कषायत्वं कफवातमूर्च्छाति ॥
ज्वरदाहनाशित्वं परमरुचि॥
कारित्वंच इतिराजनिर्घण्टः ॥
एलविलः पुं एलविलः कुवेरः
इत्यमरटीका ॥ (वि
एलास्त्री फलवृक्षविशेषः एला
इतिभाषा तत्पर्य्यायः बहुल ॥
गंधा २ पेठी ३ द्राविडी ४
कपोतपर्णी ५ वाला ६ बलवती
७ हिमा ८ चन्द्रिका ९ सागर।
गामिनी १० गंधालीगर्भः ११ ॥
एलीका १२ कायस्था १३ इति
राजनिर्घण्टः साहिविधा सूक्ष्मा
गुजराठी एलावि इति भाषा
स्थूलाच वडएलावि इतिभाषा
आद्यायाः पर्य्यायः उपकुंचिका
१ तुत्था २ कोरंगी ३ त्रिपुटा ४
त्रुटिः ५ इत्यमरः वयस्था ६
तीक्ष्णगंधा ७ सूक्ष्मैला ८ त्रिपुटी ९
इतिरत्नमाला द्वितीयायाः पर्य्यायः
पृथ्वीका २ चन्द्रबाला ३ निष्कुटिः
४ बहुला ५ इत्यमरः स्थूला
६ माल्लेया ७ ताडकाफले ८
इतिरत्नमाला एलाद्वयगुणाः


शीतलत्वं तिक्तत्वं उष्णत्वं ॥
सुगंधित्वं पित्तरोगकफनाशित्वं
हृद्रोगकारित्वं मलार्त्ति चेति
पुंस्त्वघ्नत्वं स्थविरस्य गुणाढ्यत्वंच
इतिराजनिर्घण्टः अपिच मूत्र
कोष्ठवद्ध तस्माकुहिवायुनाशित्वं
इतिराजवल्लभः सूक्ष्मैला ॥
विशेषगुणाः कफश्वासकासार्शो
मूत्रकृच्छ्रनाशित्वं इतिराजनिर्घण्टः
एलापत्रः पुं नागभेदः इति
जटाधरः ॥
एलापर्णी स्त्री वृक्षविशेषः कोठा
आमरुली एलानी इति ॥ भाषा
तत्पर्य्यायः सुवहा २ रास्ना ३॥
युक्तरसा ४ इत्यमरः ॥
एलीका स्त्री सूक्ष्मैला इति
राजनिर्घण्टः ॥
एव अव्य अवधारणे यथा ॥
त्वमेवजानासि तत्पर्य्यायः
एवं २ तु ३ पुनः ४ वा ५
इत्यमरः वै ६ तु ७ इति ॥
सभूतिः सादृश्ये इतिभरतः
नियोगः वाक्यपूरणे ॥
चारनियोगः विनिग्रहः इति
मेदिनी गमनकर्त्तरि त्रि इति
सिद्धांतकौमुदी ॥
एवं अव्य साम्ये सादृश्ये ॥

एषाऽग्निरेव विप्रः अग्नि
रित्यर्थः तत्र पर्य्यायः तत्र २
वा ३ यथा ४ तथा ५ इव ६ ॥
वत्स्यानेव इति केचित् पठंति
इदंप्रकारं यथा एवं वादिनि
विप्रर्षौ तत्पर्य्यायः इत्थं २
अवधारणे यथा एवमेतत् ॥
अस्य पर्य्यायः एवशब्दे लिखितः
इत्यमरः अंगीकारः ॥
अर्थप्रश्नः परिकृतिः इच्छा ॥
इति मेदिनी ॥ (द्रुमः
एष ऋड गतौ इति कविकल्प
एषः पुं पुरोवर्तिपुरुषः ॥
एतद्शब्दस्य पुंलिंगे रूपोयं ॥
एषणः पुं लोहमयबाणः इति
हलायुधः ॥
(नला
एषणिका स्त्री स्वर्णकारादीनां
निकि इति भाषा तत्पर्य्यायः
नाराची २ इत्यमरः ॥
एषणी स्त्री व्रणमार्गानुसारिणी
वेलकार इति भाषा तुलाभेदः
निकि इति भाषा इति
मेदिनी ॥
एषा स्त्री इच्छा इति जटाधरः
एतद् शब्दस्य स्त्रीलिंगेपि ॥
रूपोऽयं ॥

ऐ

ऐ ऐकारः सतद्वादशस्वरवर्णः
अस्योच्चारणस्थाने तालुकंठश्च
सवर्णस्तेन भवति एकारपरमे ॥
दिव्यं महाकुंडलिनी कोटि ॥
चंद्रप्रतीकाशं पंचप्राणमयं ।
सदाब्रह्म विष्णुमयं गुणतया
रुद्रमयं प्रिये सदाशिवमयं ॥
वर्णं विंदुत्रयसमन्वितं इति
कामधेनुतंत्रं ॥
ऐ अ आह्वाने स्मरणे ॥
आमंत्रणे इति मेदिनी ॥
ऐः पुं महेश्वरः इति ॥
एकाक्षरकोषः ॥
ऐकागारिकः त्रि चौरः इत्यमरः
एकागारवासी ॥
ऐकाह्निकं त्रि एकाहनिष्पन्ने
एकदिनांतरभवे इति वैद्यकं ॥
ऐक्यं क्ली एकस्यभावः एकता
ऐंगुदं क्ली इंगुदीतरुसफले
इत्यमरः ॥
ऐडुकं क्ली एडुकं इति भरतः
द्विरूपकोषश्च ॥
ऐणेयं त्रि एणस्य चर्म्मादि इत्यमरः
ऐणिकः त्रि एणहंता ॥ इति
व्याकरणं ॥

ऐणेयं त्रि एणस्य चर्म्मादि ॥
इत्यमरः स्त्री एणा रतिबंधविशेषः
इति हेमचंद्रः
ऐतिह्यं क्ली पारंपर्योपदेशः ॥
तत्पर्य्यायः इतिह ३ ॥
इत्यमरः ॥
ऐंद्रवं क्ली मृगशिरोनक्षत्रं ॥
इति ज्योतिषं ॥
ऐंद्रवी स्त्री सोमराजी इति
वैद्यकं
ऐंद्रं क्ली ज्येष्ठनक्षत्रं इति ॥
जटाधरः मूलविशेषः ॥
वनआदा इति भाषा तत् ॥
पर्य्यायः वनार्द्रका २ वनजा ३
आरण्यार्द्रिका ४ अस्य गुणाः ॥
कटुत्वं अम्लत्वं रुचि वल्ह्यग्नि
कारित्वं च इति राजनिर्घंटः ॥
इंद्रसंबंधिनि त्रि वालिवानरे
पुं ॥
(कः
ऐंद्रजालिकः पुं इंद्रजालकारः
तत्पर्य्यायः प्रतीहारकः २
मायाकारकः ३ कौसृतिकः ४
मायावी ५ व्यंसकः ६ मायी ७
मायिकः ८ इति जटाधरः ॥
ऐंद्रलुप्तिकः त्रि केशघ्नरोगे
विशिष्टः टेको इतिभाषा ॥
तत्पर्य्यायः खल्लीटः २ खलति
३ इति भूरिप्रयोगः ॥
ऐंद्रिः पुं जयंतनामा इंद्रपुत्र
काकः इति मेदिनी वालि ॥
नामवानरराजः इति ॥
त्रिकांडशेषः अर्जुनः इति
हेमचंद्रः ॥
ऐंद्रियकं त्रिप्रत्यक्षे इंद्रिय
ग्राह्ये इत्यमरः
ऐंद्री स्त्री शची दुर्गा इति
शब्दरत्नावली अलक्ष्मीः इति
त्रिकांडशेषः इंद्रवारुणी
राखाल शसा इति भाषा इति
रत्नमाला पूर्वादिक इत्यमर
टीकायां रमानाथः ॥ एला
एलाचि इति भाषा इति ॥
राजनिर्घंटः ॥
ऐभी स्त्री हस्तिघोषा लता इति
राजनिर्घंटः ॥
ऐरावणः पुं ऐरावतहस्ती ॥
इत्यमरः ॥
ऐरावतः पुं इंद्रहस्ती सतु शुक्ल
वर्णः चतुर्दंतः समुद्रमथनोत्थितः
पूर्वदिग्गजश्च तत्पर्य्यायः ॥
अभ्रमातंगः २ ऐरावणः ३
अभ्रमुवल्लभः ४ इत्यमरः ॥
नागरंगः लकुचवृक्षः नाग
भेदः इति मेदिनी ॥



ऐरावतं क्ली इंद्रस्य ऋजुदीर्घधनुः
रामधनुक इति भाषा ॥ इति
मेदिनी ॥ (षः
ऐरावती स्त्री विद्युत्विशुद्धिषु
इति मेदिनी ऐरावतभार्या ॥
इत्यमरटीकायां स्वामी वट
पत्रीवृक्षः इति राजनिर्घंटः
ऐवाल देशीय नदी विशेषः ॥
अधुना रावी इति ख्याता ॥
ऐरिणं क्ली पांशवलवणं इति
राजनिर्घंटः ॥
ऐरेयं क्ली मद्यं इरायाः ऐरेय
स्वार्थेस्य प्रत्यये वृद्धिः ॥
ऐलः पुं इलापुत्रः सत चंद्र
वंशीयो राजा पुरूरवाः इति ॥
हेमचंद्रः ॥ (इति
ऐलवालुकं क्ली ऐलवालुके
शब्दरत्नावली ॥
ऐलविलः पुं इलविलापुत्रः
सत कुबेरः इत्यमरः तस्य ॥
रूपांतराणि ऐडविडः ऐडविलः
ऐलविलः ॥ (ऐड्य ओ
ऐलेयं क्ली ऐलवालुकनामगं
इत्यमरः ॥
ऐशानी स्त्री ईशानकोणः इति
जटाधरः ॥ (२
ऐशिकः त्रि ईशसंबंधी इश्वो


इति भाषा ॥
ऐशी त्रि ईश्वर संबंधी ईश्वरेर
ऐश्वरी इति भाषा ॥
ऐश्वर्यं क्ली ईश्वरस्य धर्म्मः ॥
पर्य्यायः विभूतिः २ भूतिः ३
सचाष्टविधो यथा अणिमा १ ॥
लघिमा २ प्राप्तिः ३ प्राकाम्यं ४
महिमा ५ ईशित्वं ६ वशित्वं ७
कामावशायिता ८ इत्यमरः ॥
ऐषमः अ वर्तमान वत्सरः
इत्यमरः ॥
ऐषमंतनः त्रि ऐषमः संबंधी ऐः
वत्सरेर इति भाषा ॥ इति ॥
पाणिनिः ॥
ऐषमस्त्यः त्रि ऐषमस्तनः इति
पाणिनिः ॥
ऐहिकं त्रि इहभवं इहकालेर
इति भाषा इति व्याकरणं ॥
ऐक्षवं त्रि इक्षुविकारः इक्षुसंबंधि
गुडादि । इति स्मृतिः ॥

ओ

ओ लृकारः । सत त्रयोदशस्वरवर्णः
अस्योच्चारणस्थानं लृष्टः कंठश्च
सत्तुल्यस्थानभवति दीर्घः प्लुतश्च
भवति लृकारे चैव ल यौगिये च
देवमये सदा एक विद्युल्लताकारे

त्रिगुणात्मानमीश्वरं पंचप्राण
मयं वर्णं नमामि देवमातरं ॥ (तो
एतद्वर्णं महेशानि स्वयं परमकुंड
इति कामधेनु तंत्रे ॥
तव संबोधने आह्वाने ॥
स्मरणे अनुकंपा इति मेदिनी
तद्विशेषः तव तम प्रणवः इति
वेदागमौ
तः पुं ब्रह्मा इत्येकाक्षरकोषः
तुकं क्ली गृहे आश्रयः इत्यमर
टीकायां भरत धृतः ॥
तकः स क्ली आश्रयः गृहे इत्यमर
तुकणः पुं केशकीटः उकुण
इति भाषा इति शब्दरत्नावली
तुकाणः पुं यूकः उकुण इति
भाषा इति शब्दरत्नावली ॥
तुकुलः पुं गोधूमकतसापकः
अस्य गुणाः गुरुत्वं हृद्यत्वं ॥
मधुरत्वं बलकारित्वं रुक् ॥
वातापहत्वं स्निग्धत्वं रुच्यत्वं
मदविवर्द्धनत्वं च इति राजनिर्घं
टः तकोटनी स्त्री यूकः इति
शब्दरत्नावली ॥ (ओदा
तकुणी स्त्री तुकणः उकुणा इति
इति शब्दरत्नावली ॥
तव अः घोषणे भूषणे तामर्ष्यां
निवारणे इति कविकल्पद्रुमः ॥

तुचः पुं तुतनृत्यगीतवाद्ये ॥
समूहः इत्यमरः जलवेगः ॥
परंपरा उपदेशः इति ॥
मेदिनी ॥
तुंकारः पुं प्रणवः इत्यमरः ॥
तुंकारा स्त्री बुद्धशक्तिविशेषः ॥
इति त्रिकांडशेषः ॥
तजतक बले तेजसि इति ॥
कविकल्पद्रुमः ॥
तजः स क्ली दीप्तिः अवष्टंभः
प्रकाशः बले इति मेदिनी
प्रथम तृतीय पंचम सप्तम
नवमैकादशराशयः इति ॥
ज्योतिषे गौडी रीतिकाव्यगुणः
तस्य लक्षणं बहुसमाससंयुक्त
वर्णपदाडम्बरः तद्यथा तुजः
प्रसादमाधुर्य गुणत्रितयभेदतः
गौडवैदर्भपांचालीरीतयः परि
कीर्तिताः तुजः समासभूयस्त्व
मोसलंयदडम्बरं तत्प्रोदाहरणं
यथा गंगा तुंग तरंग संगत ॥
जटाजूटाग्रजाग्रत्फणिस्फूर्जित
(अमला कृति भी तिसंभूत चमत्कारस्फुरत्
संभ्रमा आनंदामृतवापिका ।
विदधती वितरे गिरिशाभोस्त्वा
पायादेव सदा भगवती
लज्जावती पार्वती ॥ इति ॥



काथवेद्विकारसादि ॥ ष:
तन्त्रथाख्या भाषा राजत्वान्नविशे
तस्यगुणाः सर्वशारीरस्थिरत्वे
स्निग्धत्वे शीतलत्वे स्थिरत्वे ॥
शुक्लवर्णत्वे कफात्मकत्वे शरी
रस्यबलपुष्टिकारित्वे चरुदितिच
तिपक्कुड्ड कमीषत्सपीतकेभवः
शरीरे संजाते तत्राशत्राशा ॥
मुञ्चति भ्रमरैः फलपुष्पेभ्यो
यथाले भ्रियते मधु तद्वदोजः
शरीरेभ्यो धातुः संभ्रियते तृणं
इतिवैद्यकेतजोऽरेतोपि ॥
इतिभरतः ॥
तउवः पुं पंचस्वरपुरकरागः
सत ऋषभवर्जितः षडगमयति
तडिका स्त्रीधान्यविशेषः ॥
उडिधान् इतिभाषातत्पर्य्यायः
तडीनीवारः ३ इतिरत्नमाला
अस्यगुणाः शोषणत्वे रूक्षत्वे
कफवायुवर्द्धकत्वे पित्तनाशित्वे
च ॥ इति राजवल्लभः ॥
तडी स्त्री तडिकाधान्ये इति

रत्नमाला ॥
तडुः पुं जवापुष्पवृक्षः देश
विशेषः उडिस्या इतिख्यातः ॥

तत्रबहुवचनेंतः इतिमेदिनी
तडुपुष्पं क्ली जवा इत्यमरः ॥ वा
हुडात्स तडु पुष्पपाठेन तथाजवा
पाठेनतडुहस्तः तडुस्यपुष्पंवोच्यते
इत्याहुः । हस्तेष्वत पतिपद्या
तडुपुष्पमस्यइति तडुः स्यदोड्र
पुष्पेव जवाघ इत्यमारकः इति
रायमुकुटः तडु पुष्पकुसमपि
ऽन्विके इतिहारानंदः इत्यमर
टीकायांभरतः ॥
तड्राख्या स्त्री जयापुष्पवृक्षः इति
राजनिर्घंटः ॥
गुणकर्म्मप्रपसाख्ये हरीकरणे
इतिकविकल्पद्रुमः ॥
तनुः पुं स्त्रीविडालः इत्यमरः
मदनाहा स्त्री महासमेगा इति
राज[illegible]ंटः ॥
तद[illegible] स्त्री महासमेगावला
इति [illegible]निर्घंटः
तदनी स्त्री वलावलेडा इति
भाषा इतिमेदिनी ॥
तम व्य प्रणवः सतत्रकारोकार

मकार वर्ण त्रयात्मकः तथाच
इकं प्रकारो विसृष्टदिष्ट ॥
उकारस्तु महेश्वरः मकारेणोच्यते

तुलाभरणेनत्रयोमताः अनुमतिः
इतिविश्वः उपक्रमः ॥
अंगीकारः अयाहृतिः मेगल
इतिमेदिनी ॥
तुले त्रि आंई भिजा इति ॥
भाषा इतित्रिकांडशेषः ॥ बः
तुल पुं स्वनामख्यातमूलविशे
षूरणः इतित्रिकांडशेषः
तुलज इत्यपरो । इति ॥
कविकल्पद्रुमः ॥
उल्लड इ कि उल्लेये इति ॥
कविकल्पद्रुमः ॥
तुल्लः पुं तुल्लः तत्पर्य्यायः ॥
सूरणः २ कंदः ३ अर्शोघ्नः ४
वित्रदेडकः ५ इतिरत्नमाला
अस्यगुणाः अग्निदीपनत्वे ॥
रुचिकारित्वे कफनाशित्वे ॥
विशदत्वे लघुत्वे अर्शोघ्न ॥
अप्यत्वेवशाम्यकेदललेहोषलः
इतिराजवल्लभः ॥
तुषः पुं दाहः तत्पर्य्यायः
शोषः २ इत्यमरः शोषः ३
इतिभरतः ॥
तुषणः पुं कदुरसः काल इति
भाषा इतिहेमचंद्रः ॥
तुषणी स्त्री शाकविशेषः पुरीति
इति भाषा अस्यागुणाः कफवायु

नाशित्वे इतिराजवल्लभः ॥
तुषधिः स्त्री फलपाकांतव त्रादिः
कदली धान्यमित्यादिः इत्यमरः
तुषधी स्त्री तुषधिः इतिभरतः
तुषधीपतिः पुं चंद्रः इति
हेमचंद्रः ॥
तुषधीशः पुं चंद्रः कर्पूरे
इत्यमरः ॥
तुष्टः पुं दंताच्छादकावयवः
उपरठोठ इति भाषा तत
पर्य्यायः रदनच्छदः २ दशनवासः
३ इत्यमरः दंतवासः ४ दंतवस्त्र
५ रदच्छदः ६ इतिराजनिर्घंटः
तस्यद्विवचने तुष्टौ तुष्टाधराविति
यावत् ॥
तुष्टपुष्पः पुं बंधूकपुष्पवृक्षः
इति राजनिर्घंटः ॥
तुष्टरोगः पुं आस्यरोगतर्गतोष्ट
भवव्याधिः सच वात पित्त
कफसन्निपात रक्तमांसमेदो
अभिघातजत्वेनाष्टविधः तेषां
यथाक्रमेण लक्षणानि यथा कर्कशौ
परुषौ स्तब्धौ कृष्णौ तीव्ररुजान्वितौ
दाल्येते परिपाट्येते ॥
तुष्टौ मारुत कोपतः ॥
चीयेते पिडकाभिस्त सरुजाभिः
समंततः सदाहपाक पिडका ॥

पीताभासोचपित्ततः सवर्णाभिन्न
वीयेते पिडकाभि रवेदनो ॥
भवतस्तु कफाद्दोष्टो पिच्छिलो
प्रीतस्तोगुरु सहतक्षसो सहत
पीतो सहत स्वेतो तथैवच ॥
सन्निपातेन विज्ञेया वनेकपिडका
चित्रा खर्जूर फल वर्णाभिः
पिडकाभिर्निपीडितो रक्ताय ॥
रुष्टो रुधिरं स्रवतः शोणितप्रभो
गुरुस्थूलोमा सक्रुष्टोमासपिंड
वहुत्रोतो जतवभ्रात्र मूर्छितेनर
स्योमयलोमसुखात सर्पिषेड प्रती
दाष्टोमेदसाकेडुर्गो उरु स्वच्छे
स्फटिकसंकाशभासावेस्ववेतो
भूषणतयोदृश्णा नर्त्तरोहेन्महुतेच
नगकुति नुष्ठोपर्ण वहीर्येते
पोपोलेचाभिन्नातः इति
निदाने ॥
तुष्टी स्त्री विश्वफलेतैलाकुचा
इतिभाषा इतिरत्नमाला ॥
तुष्टोपमफला स्त्री विंविकाइति
जटाधरः ॥

उ

उकारः सतुः चतुर्दश स्वरवर्णः
अस्योच्चारणस्थानं ओष्ठः केचन
दीर्घस्तु तस्य भवति न्हस्वः

रक्तविपुल्लताकारे उकारे ॥
कुंडलीरूपे अत्रब्रह्मादयः सर्वे
तिष्ठंति सततं प्रिये पंचप्राण ॥
मयेवर्णे सदाशिवमये सदा
सदाईश्वरसंयुक्तं चतुर्वर्गप्रदायकं
इतिकामधेनुतंत्रे ॥
उम् आह्वाने संवोधने ॥
इतिमेदिनी विशेषः निर्णयः
इति शब्दरत्नावली ॥
ॐ च मूद्राणां प्रणवः यथा
चतुर्दशस्वरोयोऽसौसेतुरोकार
संज्ञितः सवानुस्वारनादाभ्यां
शूद्राणां सेतुरुच्यते इति ॥
तत्रसारस्वतकालिकापुराणं ॥
उः पुं जनेतः इत्येकाक्षरकोषः
निस्वनः इतिमेदिनी ॥
ऊः स्त्री विश्वंभरा इतिमेदिनी
उखं त्रि स्थालीपक्कान्नादि ॥
उखायां निष्पन्नं इत्यर्थेस्यप्रत्ययः
उचिती स्त्री उचित्यं इति
लिंगादिसंग्रहे अमरः ॥
उचित्यं क्ली उचितस्यभावः ॥
उपयुक्तता योग्यत्वं इत्यमरः ॥
उडुम्बरः पुं चतुर्दशयमान्तर्गत
यमविशेषः इतिमेदिनी ॥
उडुंबरं क्ली कुष्ठरोगविशेषः
इतिमेदिनी तस्य लक्षणं ॥

रुग्दाहरागकंडूभिः परीतं रोम ॥
पिंजरं उडुंवरफलाभासं कुष्ठ
मोडुम्बरं वदेत् इतिनिदाने ॥
ताम्रइतिजटाधरः ताम्र
पात्राद्येति जटाधरः [illegible] ॥
उत्कर्ष्यं क्ली उत्कर्षता ॥
उत्तानपादिः पुं ध्रुवः इत्यमरः
सत उत्तानपाद राज पुत्रः ॥
स्वायंभुवमनु पौत्रः ग्रहाणा
मुपरिस्थित निश्चल तारावि
उत्सर्गिकः त्रि सामान्यविधि
रुत्सर्गस्तस्यभावः सामान्यत्वं
इति स्वामी ॥
उत्संक्य क्ली उत्केदा इति ॥
हेमचंद्रः
उदनिकः त्रि सूपकारः इत्यमरः
उदरिकः विजिगीषाविवर्जितः
उदरमात्रपूरकः पेटुक इति ॥
भाषातत्पर्यायः आघुनः २
इत्यमरः विजिगीषाव्यवहारः
कश्चित् प्रकर्षोवा आलस्याद
तीविहीनोयः केवलमुदराधीनः
इति भरतः स्वादरपूरणशक्ति
निमित्तक निंदा ॥
विजिगीषा तयारहितः इति
रमानाथः
उदश्वितं क्ली अर्द्धजलयुक्त ॥

घोलं इतिरामचंद्रः ॥
उदश्वितकं क्ली अर्द्धजलमिश्रित
घोलं इति हेमचंद्रः ॥
उदार्य्यं क्ली उदारता । इति ॥
हेमचंद्रः ॥
उदास्यं क्ली उदासस्यभावः
वैराग्यं अनुरागादि शून्यता
यथा उदास्यं संविदवलंवित
शून्यमुद्राभस्मिन् दृशोः पतितता
मवलोकायभ्याः इत्यादिनैषधे
दौणी विलिखन हेतोर्वयमपि
कुर्म्माः किमौदास्यमिति पद्यावली
उद्दालकं क्ली वल्मीककाष्ठकीट
निर्मितमधु तस्यगुणाः कषायत्वं
उष्णत्वं कटुत्वं कुष्ठविषरोग ॥
नाशित्वंच इति राजवल्लभः ॥
उद्धत्यं क्ली उद्धतस्यभावः यथा
अस्यानस्य गुणांही नामोद्धत्याद
तदिस्मृता अभंगदोषसंबोध
रक्तास्तिवैद्धतादिकृत इति
साहित्यदर्पणे ॥
उद्भिज्जं क्ली पांशुलवणं इति
राजनिर्घंटः ॥
उद्भिदं क्ली सांभरिलवणं अस्य
गुणाः तीक्ष्णत्वं अनुत्केदकारित्वं
तारयुक्तत्वं कटुत्वं तिक्तत्वं ॥
कोष्ठबद्धतानाद्य शूलनाशित्वंच

इति राजवल्लभः उद्भिदोजाते ॥
जले तस्य गुणाः मधुरत्वं पित्त
प्रशमनत्वं अविदाहित्वं इति
राजवल्लभः [illegible] (ले
औद्वाहिकं क्ली भार्य्याप्राप्तिका
लब्धं भार्य्याधनं इति दायभागः
तत् भ्रातृभिरविभाज्यं यथा
पितृद्रव्याविनाशेन यदन्यत्
स्वयमर्जयेत् मैत्रमौद्वाहिकं चैव
दायादानां न तद्भवेत् ॥ इति ॥
याज्ञवल्क्यः ॥
उपगवः पुं उपगोरपत्यं ॥
इति भरतः उपसमीपे गौर्यस्य ॥
इति उपगुर्गोपः लक्षणया तत्
पुरोहिते उपगु शब्दः यथा ॥
हारीतः ये वर्णा याजयेद्यस्तु ॥
स तद्वर्णत्वमाप्नुयात् सद्यो वेषेण
दर्शेश्चेत्येवमेवाब्रवीद्भृगुः ॥
तथा च लक्षणया उपगु पद ॥
वाच्यः तस्यापत्यमौपगवः ॥
इति श्रीभागवतटीकायां स्वामी
औपगवकं क्ली औपगवसमूहः
इत्यमरः ॥
औपग्रस्तिकः पुं राहुग्रस्तचंद्रः
सूर्य्यश्च इति शब्दरत्नावली ॥
औपनिधिकं क्ली उपनिधिः ॥
प्रीत्या भोगार्थमर्पितद्रव्यं इति ॥

स्मृतिः ॥
औपम्यं क्ली सादृश्यं तत्पर्य्यायः
अनुकारः अनुहारः ३ साम्यं ४
तुला ५ उपमा ६ कक्षः ७ उपमाने
इति हेमचंद्रः ॥
औपयिकः त्रि उपयुक्तः ॥
इत्यमरः ॥
औपरोधिकं पुं पीलुदंडः ॥
तत्पर्य्यायः पैलवः २ इति
हेमचंद्रः उपरोधसंबंधिनि त्रि
औपवस्तं क्ली उपवासः इति
हेमचंद्रः ॥
औपसर्गिकः पुं सन्निपातरोग
विशेषः तस्य लक्षणं कफोनु
लोमवातेन यदि पित्तानुगो भवेत्
स्वेदशोफादिभिर्जुष्टस्तदा भवति
मानवः प्रतिलोमः पुनस्तेन
स्वास्थ्यमयाति तत्क्षणात् ॥
औपसर्गिक एवान्यः सन्निपात
उदाहृतः इति वैद्यके ॥
उपसर्गसंबंधिनि त्रि ॥
औपस्थ्यं उपस्थेंद्रियसुखं ॥
इति श्रीभागवतं ॥
औमीनं त्रि उमाक्षेत्रे मसिनार
खेत इति भाषा ॥
औरगं क्ली अश्लेषानक्षत्रं इति
जटाधरः सर्पसंबंधिवस्तुनि त्रि ॥

औरभ्रः पुं कंबलः तत्पर्य्यायः
ऊर्णायुः २ आविकः ३ रल्लकः ४
इति हेमचंद्रः ॥
औरभ्रकं क्ली मेषसमूहः ॥
भेडारपाल इति भाषा ॥
इत्यमरः ॥
औरसः पुं स्त्री स्वजातपुत्रः तत्
पर्य्यायः औरस्यः २ इत्यमरः
उरस्यः ३ इति तट्टीका ॥
द्वादशविध पुत्रांतर्गत श्रेष्ठ
पुत्रोयं सतु सवर्णायां भार्य्यायां
स्वयंजनितः यथा सवर्णायां
संस्कृतायां स्वयमुत्पादितमौरसं
विद्यात् इति बौधायनः ॥
औरसो धर्मपत्नीज इत्यादि ॥
याज्ञवल्क्यः ॥
औरस्यः पुं स्त्री औरसपुत्रः ॥
इत्यमरः ॥
और्द्ध्वदेहिकं त्रि मृतार्थं तद्दहनादे
इत्यमरः यदह्नि मृतस्तदहः ॥
प्रभृति सपिंडीकरणात् सर्वं
प्रेतकृत्यं हृतकं घटपिंडादि
दानं तत इति भरतः ॥
और्द्ध्वस्रोतसिकः त्रि शैवः ॥
इति त्रिकांडशेषः ॥
और्वः पुं वाडवानलः इत्यमरः
सतु भूगोलस्य दक्षिणसीमा

तत्र सर्वे नरकाः दैत्याश्च वसंति
इति सिद्धांतशिरोमणिः पंच
प्रवरांतर्गत मुनिविशेषः इति
पुराणं ॥
और्वं क्ली पांशुलवणं इति
राजनिर्घंटः ॥
और्वशेयः पुं अगस्त्यमुनिः इति
हेमचंद्रः ॥
औलूकं क्ली उलूकसमूहः
पेचारफांक इति भाषा इति
जटाधरः ॥
औलूक्यः पुं वैशेषिकः ॥
वैशेषिक दर्शनवेत्ता इति ॥
हेमचंद्रः ॥
औशीरं क्ली शयनासने इत्यमरः
शयने स्वापः शय्या वा आसने
पीठादि शयनासने समुदित
मिति स्वामी उपयोगीति सुभूतिः
इत्यमरटीकायां भरतः उशीरजे ।
चामरः दंडः इति हेमचंद्रः ॥
औशीरः पुं चामरदंडः इत्यमरः
औषणं क्ली कटुरसः उषणं
मरिचं तस्य भावः ॥
औषधं क्ली रोगनाशकद्रव्यं
औषधि भवं भवार्थेऽस्य प्रत्ययः
तत्पर्य्यायः भेषजं २ भैषज्यं
३ अगदः ४ जायुः ५ इत्यमरः

जैत्रे ६ आयुर्योगेः ७ महारतिः
८ अमृतं ९ आयुर्द्रव्यं १० इति
वैद्यकं ॥
औषरं क्ली पांशवलवणं ॥
अयस्कांतभेदः इति राजनिर्घंटः
औषरकं क्ली मृत्तिकालवणं
खारी लोण इति भाषा तत्पर्यायः
सार्वगुणं २ सर्वसं सर्पलवणं ३
ऊषरकं [illegible] बहुलवणं ८
मेलकं लवणं ७ मिश्रं ८ अस्य
गुणाः पटुत्वं सारत्वं तिक्तत्वं ।
वातकफनाशित्वं विदाहित्वं ।
पित्तमलबंधमूत्रसंशोषकारित्वं च
इति राजनिर्घंटः ॥ (ल
औष्ट्रकं क्ली उष्ट्रसमूहः उंटेरपा
इति भाषा इत्यमरः ॥ (ता
औष्ण्यं क्ली उष्णस्य भावः उष्ण
औत्सकं क्ली उत्सगसमूहः पंडे
गरूरपाल इति भाषा इत्यमरः


अं

अं अनुस्वारः पंचदशस्वरवर्णः
विंदुमात्रानुनासिकवर्णः इये
आकारउच्चारणार्थः वोपदेवेनास्य
नुरिति संज्ञाकृता सतुनकार ।
मकारस्थानेपि भवति ॥
नुवीपूर्वेण संवंधो मूर्द्धन्योनुयः
गामिनो चत्वारो योगवाहाख्या
णात्वकर्म्मण्येवोमताः इति
दुर्गादासः अंकेरा विंदु ॥
संयुक्तं पीत विद्युत्समप्रभे
पंचप्राणात्मकं वर्णं ब्रह्मादि
देवतामयं सर्वज्ञानमयं वर्णं
विंदुत्रय समन्विते इति ॥
कामधेनुतंत्रे ॥
अं क्ली परंब्रह्म इत्येकाक्षर
कोषः ॥

अः (र्णा

अः विसर्गः द्विविंदुमात्रकंठ
उये अकारउच्चारणार्थः स्व
षोडश स्वरवर्णः वोपदेवनास्य
विरिति संज्ञाकृता सतु सकार
रकारयोः स्थानेपि भवति ॥
अः कारं परमेशानि विसर्ग
सहितं सदा अः कारं परमेशानि
रक्तविद्युत् प्रभामयं पंचदेव
मयोवर्णः पंचप्राणमयः सदा
सर्वज्ञानमयोवर्णः आत्मादितत्त्व
संयुतः विंदुत्रयमयोवर्णः
शक्तित्रयमयः सदा किशोर
वयसाः सर्वेगीतवाद्यादितत्पराः
शिवस्य युवती पत्नाः स्वयं कुंडली
मूर्तिमान् इति कामधेनुतंत्रे
अः पुं महेश्वरः इत्येकाक्षर
कोषः ॥

ककारः सतव्यंजन प्रथमवर्णः
अस्योच्चारणस्थाने कंठः इति ॥
व्याकरणं अधुना संप्रवक्ष्यामि ॥
ककारतत्त्व मुत्तमं रहस्यं ॥
परमाश्चर्य्यं त्रैलोक्यानां च संशृणु
वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिण ॥
रेखिका अधोरेखा भवेत् ॥ ॥
रुद्रो मात्रा साक्षात् सरस्वती ॥
कुंडलीअंकुशाकारा मध्ये शून्यः
सदाशिवः जवायावकसंकाशा
मेरवावरानने शरच्चंद्रप्रतीकाशा ।
इत्तरेखाव मूर्तिमान् तायो ॥
रेखावराहे हेमहामरकतद्युतिः
शरच्चंद्रसमाकीर्तिर्मात्रासाक्षात् ।
सरस्वती कुंडलीअंकुशायातकोटि
विद्युल्लताकृतिः कोटिचंद्र ॥
प्रतीकाशोमध्येशून्यः सदाशिवः
शून्यगर्भस्थिता काली कैवल्यपद
दायिनी ककाराज्जायते सर्वं ॥
कामं कैवल्यमेवच अर्थश्चजायते
देवितथा धर्मश्चनान्यथा ककारः
सर्ववर्णानां मूलप्रकृतिरेवच ॥
ककारः कामदा कामरूपिणी ॥
स्फुरद्वया कामनीया महेशानि
स्वयं प्रकृति सुंदरी माता सा ॥
सर्वदेवानां कैवल्य पददायिनी
ऊर्द्धकोणस्थिताका मा ब्रह्मशक्ति
रिती रिता वामकोणस्थिताज्येष्ठा
विष्णुशक्तिः रितीरिता दक्षकोण
स्थिता विद्रौद्री संहाररूपिणी
ज्ञानात्मा सतु चार्वंगि कलाचतुष्ट
यात्मकं इच्छाशक्तिर्भवेद्ब्रह्मा
विष्णुश्चज्ञानशक्तिमान् क्रियाशक्ति
र्भवेत् रुद्रः सर्वशक्तिमूर्तिमान्
आत्मविद्या शिवस्तत्र सदा मेत्रः
प्रतिष्ठितः आसनं त्रिपुरादेव्याः
ककारं पंचदेवतं ईश्वरो ॥
यस्तुदेवेशि त्रिकोणे तस्य संस्थितिः
त्रिकोणमेतत् कथितं योनि
मंडलमुत्तमं केरले प्रपदे ॥
यस्याः कामिनी सा प्रकीर्तिता
तेजवा यावक सिंदूर सदृशी
कामिनी परो चतुर्भुजा
त्रिनेत्रा च बाहुवल्ली विराजिता
कदंब कोरकाकार स्तनद्वय
विभूषिता रत्नकंकणकेयूरमेगदे
रूपशोभिता रत्नहारैः ॥
पुष्पहारैः शोभिता परमेश्वरी
एवं हि कामिनी ध्यात्वा ककारे
दशधा जपेत् प्रकुल्लेच
ततो ध्यात्वा जपस्य फलभाग्भवेत्
एतत्ते कथितं देवि ककारं ।
तत्त्वमुत्तमं इति कामधेनुतंत्रे
कं क्ली शिरः जलं सुखं इति



मेदिनी केशः इति धरणी
कः पुं ब्रह्मा विष्णुः कामदेवः
अग्निः वायुः यमः सूर्य्यः
आत्मा दक्षः राजा शेषः ॥
मयूरः इति मेदिनी मनः
शरीरं कालः धने शब्दः ।
इत्यनेकार्थकोषः प्रकाशः
इत्येकाक्षरकोषः (द्वि
कः त्रि सर्व्वनामके किं इत्य
भाव इति विश्वः ॥
केशः पुं क्ली कंसः पानपात्रे
इत्यमरटीका ॥ (त्रे
कंसं क्ली पुं मद्यादिपानपात्र
तत्पर्य्यायः पानभाजने २
इत्यमरः कंशः ३ कांस्यं ४
इति तट्टीका तैजसद्रव्यं ।
स्वर्णरजतादि निर्म्मितपात्रम्
द्रोमान विशेषः तत्र आढक
परिमाणे इति मेदिनी ॥
ताम्रवंग मिश्रितधातुविशेषः
कांसा इति भाषा तत्पर्य्यायः
कांस्य २ कंसास्थि ३ लोहजं ४
इति त्रिकाण्डशेषः ॥ (इति
कंसः पुं विष्णुद्वेष्टृसुरविशेषः
हेमचन्द्रः सत मथुरादेशराजा
यदुवंशीयोग्रसेनराजपुत्रः
श्रीकृष्णमातुलः तेन वधः श्यामः

इति श्रीभागवते ॥
कंसकं क्ली वर्त्तरोगघ्नधातु
विशेषः तत्र हीराकसी प्रभेदः
तत्पर्य्यायः पुष्पकासीसं २
नयनौषधं ३ इति हेमचन्द्रः
कंसकारः पुं स्त्री जातिविशेषः
कांसारि इति भाषा तस्योत्पत्ति
र्यथा वैश्यायां ब्राह्मणाज्जातो
अम्बष्ठो गान्धिको वणिक् ॥
कंसकार शंखकारौ ब्राह्मणात्
संबभूवतुः इति ब्रह्मवैवर्त्तपुराणे
अपि च विश्वकर्म्मा च शूद्रायां
वीर्य्याधानं चकार सः ततो बभूवुः
पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शंखकारः
कुविन्दकः कुम्भकारः कंसकारः
षडेते शिल्पिनो नराः इति
ब्रह्मवैवर्त्तपुराणे ॥
कंसजित् पुं श्रीकृष्णः इति
हलायुधः ॥
कंसवती स्त्री कंसभगिनी
सा उग्रसेनसुता वसुदेवानुज
पत्नी च इति श्रीभागवते ॥
कंसहा पुं विष्णुः इति हेमचन्द्रः
कंसा स्त्री कंसभगिनी सा ॥
उग्रसेन सुता वसुदेवानुज
पत्नी च इति श्रीभागवते ॥

कंसारातिः पुं विष्णुः इत्यमरः
कंसारिः पुं श्रीकृष्णः इति
शब्दरत्नावली
कंसास्थि क्ली कांस्यधातु इति
त्रिकाण्डशेषः ॥
कंसोद्भवा स्त्री सुगन्धिमृत्तिका
विशेषः तत्पर्य्यायः आढकी
तुवरी ३ काक्षी ४ मृत्तालुकं ५
सौराष्ट्री ६ पार्वती ७ कालिका ८
पर्पटी ९ सती १० इति हेमचन्द्रः
कक इ ऊ व्रजने इति ॥
कविकल्पद्रुमः ॥
कक ङ इ लौल्ये गर्वे चापले
इति कविकल्पद्रुमः ॥ (पु
कक्केदः पुं सर्पाः इत्युणादिकोषः
कक्कोजलः पुं स्त्री चातकपक्षी
इति राजवल्लभः ॥
ककुत् स्त्री वृषाङ्गविशेषः
षाँडेर कुट् इति भाषा ध्वजः ॥
चरः इति मेदिनी ॥
ककुत्स्थः पुं सूर्य्यवंशीयराज
विशेषः सत अयोध्याधिपतिः
शशादराजपुत्रः इक्ष्वाकुराज
पौत्रश्च इति श्रीभागवते ॥
ककुदः पुं क्ली प्राधान्ये राज
चिह्ने तत्त्वश्वतरकुञ्जरादि वृषाङ्गे
कुठ इति भाषा इत्यमरः ॥

गर्भताग्रभागः इति तट्टीकायां
स्वामी ॥
ककुद्मान् पुं वृषः इति
हेमचन्द्रः पर्वतः इत्यमर
टीकायां स्वामी ऋषभौषधं इति
राजनिर्घण्टः अत्र ककुदपवाद
विषये मतुप् सर्वोऽपि निविशते
इति न्यायात् वत प्राप्तो मतुप्
प्रत्ययः ॥
ककुद्मती स्त्री कटिः पाछा इति
भाषा इत्यमरः ॥
ककुन्दरं क्ली ककुन्दरे नितम्बस्य
कूपकद्वये इत्यमरटीकायां ।
रमानाथः राजनिर्घण्टश्च ॥
ककुप् स्त्री दिक् इत्यमरः
प्रवेणी शोभा चंपकमाला
इति मेदिनी शास्त्रे इति ॥
विश्वः ॥
ककुभः पुं अर्जुनवृक्षः
वीणाङ्ग तत्पर्य्यायः प्रसेवकः
२ इत्यमरः वीणाप्रान्तवक्रकाष्ठ
देशाधः शब्दगाम्भीर्य्यार्थं दारुमयं
भाण्डं यच्चर्म्मणाच्छाद्य दीयते
तत्रेत्यन्ये वीणास्थितालाबुफले
इत्यपरे इति भरतः रागः ॥
विशेषः इति मेदिनी ॥
ककुभ् स्त्री रागिणी विशेषः ॥



तस्यानामांतरंककुहः तस्यालक्षणं
पीते वसानवसने सकेशी ॥
वेनेरुदंती पिकनाद हूना ॥
विलाकयंती ककुभाऽतिभीता
मूर्त्तिः प्रदिष्टाककुभस्यधेयं
इतिसंगीतदामोदरः ॥
ककुभा स्त्री दिक इत्यमरटीकायां
रायमुकुटः रागिणी विशेषः
इतिहलायुधः ॥ (द्रव्य
ककुभादानी स्त्री नलीनामगंध
इति शब्दचंद्रिका ॥
कक्कु० हासे इति कविकल्पद्रुमः
कक्कोलः पुं क्ली सुगंधिद्रव्य
विशेषः कांकला इति भाषा
अस्यगुणाः कटुत्वं लघुत्वं ॥
सुगंधित्वं कफवातनाशित्वंच
इतिराजवल्लभः ॥ (षः
कक्कोलकं क्ली गंधद्रव्यविशे
कांकला इति ख्याते तत्र ॥
पर्य्यायः कोलकं २ कोषफलं
३ इत्यमरः कृतफलं ४ ॥
कटुकफलं ५ द्वेष्यं ६ स्थूलमरिचं
७ कक्कोलं ८ माधवोचितं ९
कालं १० कटुफलं ११ मरिचं १२
अस्य गुणाः कटुत्वं तिक्तत्वं ।
उष्णत्वं वक्त्रजाड्यहरत्वं
दीपनत्वं पाचनत्वं रुचिकारित्वं

कफवातरोग नाशित्वंच इति
राजनिर्घंटः ॥ (मः
कक्कुख हासे इतिकविकल्पद्रु
कक्खटः त्रि कठिनः इत्यमरः
कक्खटपत्रकः पुं वृक्षविशेषः
पाट इतिभाषा तत्पर्य्यायः ॥
पट्टः २ राजशणः ३ शणः ४
चिमः ५ इतिशब्दमाला ॥
कक्खटी स्त्री खटिका खडी
इति भाषा तत्पर्य्यायः ॥
वर्णलेखा २ कठिनी ३ खटी ४
इति त्रिकांडशेषः ॥
कख यम हासे । इति ।
कविकल्पद्रुमः ॥
कख्या स्त्री कक्षा हर्म्यादि ॥
प्रकोष्ठः इति शब्दरत्नावली
कग मष क्रियासु क्रियामात्रे
इतिकविकल्पद्रुमः
कंकः पुं पक्षिविशेषः कांक
इति भाषा तत्पर्य्यायः ॥
लोहपृष्ठः २ इत्यमरः ॥
मर्दशवदनः ३ खरः ४ रणालंकरणः
५ कूटः ६ आमिषप्रियः ७ इति
राजनिर्घंटः यमः क्षत्रद्विजः
इति मेदिनी युधिष्ठिरराजः
इतित्रिकांडशेषः क्षत्रियः ॥
इति शब्दमाला कंसस्यभ्राता ॥

सत्व उग्रसेन पुत्रः ॥ इति
श्रीभागवते महा राजचूतः ।
इतिराजनिर्घंटः ॥ (षः
कंकटः पुं कवचः इत्युणादिको
प्रतिसंस्कृतनामरत्नं ॥
कंकटकः पुं सन्नाहः संजोया
इति भाषा इत्यमरः ॥ (भरण
कंकणं क्ली स्वनामख्यातहस्ता
तत्पर्य्यायः करभूषणं २ ॥
इत्यमरः हस्तसूत्रे मंडने ॥
शेखरे इति विश्वः ॥ (का
कंकणी स्त्री किंकिणीक्षुद्रघंट
इत्यमरटीकायांभरतः ॥
कंकणीका स्त्री क्षुद्रघंटिका इति
सिद्धांतकौमुद्यामुणादिवृत्तिः
कंकतं क्ली कंकतिकाचिरुणी
इतिख्याते इत्यमरटीकायां
भरतः ॥
कंकतः पुं वृक्षः इत्युणादिकोषः
कंकतिका स्त्री केशप्रसाधनार्थं
काष्ठादि निर्मितं द्रव्यं चिरुणी
कांकुइ इत्यादिभाषा तत्पर्य्यायः
प्रसाधनी २ इत्यमरः कंकती ॥
३ कंकतं ४ प्रसाधनं ५ इति ॥
तट्टीका अस्यगुणाः धूलीजंतु[illegible]
कंडूशिरोदरोग नाशित्वं कांति
केशवृद्धि केशप्रसन्नताकारित्वंच

। इति राजवल्लभः नागवला
इतिवैद्यकं ॥
कंकती स्त्री कंकतिका इत्यमर
टीकायां भरतः ॥
कंकत्रोटः पुं मत्स्यविशेषः
कांकिला इति भाषा तत्पर्य्यायः
जलव्यायः २ इति त्रिकांडशेषः
कंकत्रोटिः पुं मत्स्यविशेषः
कांकिला इतिभाषा तत्पर्य्यायः
जलसूचिः २ इतिजटाधरः
कंकपत्रः पुं बाणविशेषः इति
हलायुधः ॥
कंकमाला स्त्री करतालीवाद्यं ।
इतिशब्दरत्नावली
कंकमुखः पुं संदंशः संडाशि
इति भाषा इति हेमचंद्रः ॥
निर्वर्त्तते साध्यवगाहनेच शल्य
प्रवृत्त्याद्धरतेच यस्मात् यंत्रेष्वतः
कंकमुखं प्रधानं स्यात्तेषु सर्वेषु
विकामिचैव इतिसुश्रुते क्लीवं
कंकरं क्ली तक्रं इति हेमचंद्रः
कंकरः त्रि कुत्सितः इति
हेमचंद्रः ॥
कंकरालः पुं निकोचकवृक्षः
इतिशब्दचंद्रिका काकरोल इति
ख्यातलताच ॥
कंकलोड्रं क्ली अंकलोड्रं ॥

चढिचिता विंचोड मूल इतिच
भाषा अस्य गुणाः गुरुत्वे अजीर्ण
कारित्वे शीतलत्वे । इति ॥
कोष्ठद्राजवल्लभः ॥
केकशत्रुः पुं इक्षियर्णी इति
शब्दचंद्रिका ॥
केकशायः पुं कुक्कुरः इति ॥
शब्दमाला ॥
केका स्त्री उग्रसेनराजकन्या ॥
सातु वसुदेवानुजपत्नी इति
श्रीभागवते गोशीर्षचंदने ॥
तद्यथा गोशीर्षं चंदने कुंकुम
ताम्र सुत पलगंधिके केका
इत्यादि शब्दमाला ॥
केकालः पुं शरीरास्थि इत्यमरः ॥
समुदित शरीरास्थि संघात ॥
त्वङ्मांसरहितः इति भरतः ॥
तत्पर्य्यायः करंकः २ ॥
अस्थिपंजरः ३ इति वैद्यकं ॥
केकालमालीन् पुं महादेवः ॥
इति शब्दरत्नावली ॥
केकुः पुं उग्रसेनपुत्रः सतु कंसस्य
भ्राता इति श्रीभागवते ॥
केगुलणं इति द्विरूपकोषः ॥
केकुष्ट स्त्री पर्वतीयमृत्तिकावि
शेषः तत्पर्य्यायः कालकुष्टं शैले
य २ रंगदायकं ४ रेचकं ५ पुलकं
६ शोधकं ७ कालपालकं ८
तत्र द्विधा रजताभे स्वर्णाभे च
अस्य गुणाः कटुत्वे उष्णत्वे ॥
कफवात व्रण मूल नाशित्वे
रेचकत्वे च इति राजनिर्घंटः
अपिच पीत प्रभं गुरु स्निग्ध
श्रेष्ठं केकुष्ट मादिमं श्यामे पीते
लकुत्सक सत्वे नेष्टं हिरण्यके
केकेरुः पुं काकविशेषः ॥
तत्पर्य्यायः हारवल्लिभुक २
इति त्रिकांडशेषः ॥ २
केकेलिः पुं अशोकवृक्षः इति
राजनिर्घंटः ॥
केकेल्वः पुं वाल्हूकं इति ॥
शब्दमाला ॥
केकेलिः पुं अशोकवृक्षः इति
त्रिकांडशेषः ॥
केख स्त्री भोगः इति शब्दमाला
केगुः पीततंडुला कांगणि
इति भाषा तत्पर्य्यायः प्रियंगुः
इत्यमरः २ कंगूः ३ प्रियंगूः ४
इति तट्टीका ॥
केगुका स्त्री केगुः अस्य गुणाः
धातु शोषणत्वे पित्त श्लेष्म
नाशित्वे रूक्षत्वे वायुवर्द्धकत्वे
पुष्टिकारित्वे गुरुत्वे भग्नसंधान
कारित्वे च इति राजवल्लभः ॥

केगुनी स्त्री धान्यविशेषः कांग
इति भाषा तत्पर्य्यायः प्रियंगुः
२ कंगु ३ चीनकः ४ पीततंडुलः
५ अस्थलसकुमारः ६ अस्या गुणाः
मधुरत्वे रुचिकारित्वे कषायत्वे
स्वादुत्वे शीतलत्वे वातकारित्वे
पित्तदाह नाशित्वे रूक्षत्वे ॥
भग्नास्थि वंध कारित्वे च इति ॥
राजनिर्घंटः ॥
केगुनीपत्रा स्त्री पन्योधातरणी
इति राजनिर्घंटः ॥
केगुलः पुं पाणिः इति ॥
शब्दचंद्रिका ॥
कच रवे इति कविकल्पद्रुमः
कच इ वंधे लिपि इति ॥
कविकल्पद्रुमः ॥
कच उ वंधे दीप्तौ ॥ इति ॥
कविकल्पद्रुमः ॥
कचः पुं केशः इत्यमरः ॥
वृहस्पति पुत्रः वंधः शुष्कव्रणः
इति मेदिनी मेघः इति ॥
शब्दमाला ॥
कचंगणं स्त्री विक्रयस्थाने ॥
तत्पर्य्यायः निमृटः २ पण्याजि
३ इति त्रिकांडशेषः ॥
कचंगलः पुं समुद्रः इति ॥
त्रिकांडशेषः ॥
कचपं स्त्री तृणं पत्रे ॥
इत्युणादिकोषः ॥
कचपक्षः पुं केशसमूहः ॥
इत्यमरः ॥
कचपाशः पुं केशसमूहः
इत्यमरः ॥
कचमालः पुं धूमः इति ॥
हारावली खलमाल इति च पाठः
कचरिफला स्त्री शमीवृक्षः
इति राजनिर्घंटः ॥
कचहस्तः पुं केशसमूहः इत्यमरः
कचा स्त्री हस्तिनी इति मेदिनी
शोभा इति शब्दरत्नावली ॥
कचाकु त्रि दुराधर्षं दुःशीले ॥
इति मेदिनी ॥
कचाकुः पुं सर्पः इति मेदिनी
कचाटुरः पुं पक्षिविशेषः
डाक इति भाषा तत्पर्य्यायः
शितिकंठः २ दात्यूहः ३ काकमद्गुः
४ इति त्रिकांडशेषः ॥
कचामेदं स्त्री वालकेवाला
इति भाषा इति राजनिर्घंटः
कचुः स्त्री कचवी स्वनामख्यातवृक्षः
इति पुराणं ॥
कच्छठं स्त्री जलपिप्पली इति
वैद्यकं ॥
कच्छरं त्रि मलिने इत्यमरः ॥



कुत्सितं इति मेदिनी ॥
कच्छं क्ली नक इति मेदिनी
कच्चित् अ कामप्रवेदने इष्ट
परिप्रश्नः इत्यमरः यथा ॥
कच्चित् जीवति मेतातः ॥
कच्छः पु अनूप प्रायस्थाने ।
कछाड़ इति भाषा इत्यमरः ॥
सिंधुनां सरसां च प्रांतभागः ॥
इति मधुः जलाप्रायप्रांतदेशः
इति भानुजीः नदीपर्वतादि
समीपे इति भरतः तुन्नवृक्षः
तूंद् इति भाषा परिधानांचले
काछा कोंचा कॅङुसी इति भाषा
इत्यमरमेदिनीकरौ शेषस्य ॥
पर्यायः कक्षा २ कच्छा ३
कच्छाटिका ४ इतिहेमचंद्रः
कच्छटिका ५ कच्छाटिका ६ इति
शब्दरत्नावली तस्य प्रमाणं ।
वामे पृष्ठे तथा नाभौ कक्षात्रय
मुदाहृतं एभिः कक्षैः परीधत्ते
यो विप्रः स शुचिः स्मृतः इति
स्मृतिः परिधानाद्बहिः कक्षा
निबद्धा ह्यासुरी भवेत् इति ॥
योगि याज्ञवल्क्यः नौकांगं
इति हेमचंद्रः ॥
कच्छः त्रि जलप्रांतः इति नानार्थ
अमरः ॥

कच्छटिका स्त्री कच्छः कछाड़ इति
भाषा इति शब्दरत्नावली ॥
कच्छपः पु जलजंतुविशेषः
काछिम् इति भाषा तत्पर्यायः
कूर्मः २ कमठः ३ इत्यमरः ॥
गूढांगः ४ धरणीधरः ५ कच्छेष्टः ६
पल्वलावासः ७ दृढकः ८
अस्य मांसगुणाः वातहृत्त्वं
शुक्रवृद्धिकारित्वं चक्षुर्हितत्वं
बलवर्द्धनत्वं मेधास्मृतिकारित्वं
पथ्यत्वं शोषदोषनाशित्वंच
तस्य चर्म्म पित्तनाशकं पादः
कफहारकः अंडं तु वाजीकरंच
नेत्रहितः इति राजनिर्घंटः
कुबेरस्य निधिविशेषः मल्लस्य
बंधविशेषः इतिमेदिनी ॥
मदिरायंत्र विशेषः इति ॥
शब्दचंद्रिका ॥
कच्छपी स्त्री कूर्मी तत्पर्यायः
डुलिः २ डुलिः ३ कमठी ३ (वीणा
वीणाविशेषः सा तु सरस्वतीवी
इत्यमरः क्षुद्ररोगविशेषः
इति मेदिनी ॥
कच्छपिका स्त्री क्षुद्ररोगविशेषः
तस्य लक्षणं ग्रथिताः पंचवाषट्वा
दारुणाः कच्छपोन्नताः ॥
कफानिलाभ्यां पिडका ज्ञेयाः

कच्छपिका ॥ बुधैः ॥
प्रमेही येन या जाता दश ॥
पिडकांतर्गत पिडकाविशेषः
तस्य लक्षणं सदाहाकूर्म्म ॥
संस्थानाज्ञेया कच्छपिका बुधैः
इतिनिदानं ॥
कच्छरुहा स्त्री दूर्वा इति जटाधरः
कच्छा स्त्री परिधानापरांचल
इति हेमचंद्रः चीरिका ॥
झिंझी पोका इति भाषा वाराही
इति मेदिनी ॥
कच्छाटिका स्त्री कच्छटिका इति
शब्दरत्नावली ॥
कच्छुः स्त्री रोगविशेषः ॥ का
तस्य लक्षणं सूक्ष्मा बह्व्यः पिड
स्रावयुक्ताः पामेत्युक्ता कंड्डुमत्यः
सदाहाः सैव स्फोटैस्तीव्रदाहैः
रूपेता ज्ञेया पाण्योः कच्छू ॥
रुग्रास्फिचोश्च इति निदानं ॥
कच्छघ्नी स्त्री पटोलः क्षुपभेदः
इतिराजनिर्घंटः ॥
कच्छुरः त्रि कच्छुरोगयुक्तः ॥
खोसरोगी इति भाषा तत् ॥
पर्यायः पामनः २ इत्यमरः ॥
पुंश्चलः इति मेदिनी ॥
कच्छुरा स्त्री शूकशिम्बी शटी
दुरालभा इति मेदिनी ॥

यवासः इति राजनिर्घंटः
ग्राहिणीहस्तः लौह ३ इति भाषा
इति रत्नमाला ॥
कच्छूः स्त्री रोगविशेषः खोस
पाचड़ा इति भाषा तत् ॥
पर्यायः पाम २ पामा ३ विचर्च्चिका
४ इत्यमरः ॥
कच्छुमती स्त्री शूकशिम्बी इति
शब्दचंद्रिका ॥ (इति
कच्छोटिका स्त्री कच्छः काछा
भाषा इति हेमचंद्रः ॥
कच्छोरं क्ली शठी इति रत्नमाला
कच्ची स्त्री कंदविशेषः कचु इति
ख्याता तत्पर्यायः वितुंडा २
इति जटाधरः अस्या गुणाः
भेदकत्वं गुरुत्वं कटुत्वं ॥
आमवायु पित्तकारित्वं ॥
पिच्छिलत्वंच इति राजवल्लभः
कज्ज इ रुहो जन्मनि सौत्रधातुरयं
इति कविकल्पद्रुमः ॥
कज्जं क्ली कमलं इति राजनिर्घंटः
कज्जलं क्ली अंजनं काजल
इति भाषा इति हेमचंद्रः ॥
तत्पर्यायः लोचकः २ इति
त्रिकांडशेषः ॥
कज्जलः पुं मेघः इति ॥
शब्दमाला ॥



कज्जलध्वजः पुं दीपः इति
त्रिकाण्डशेषः ॥
कज्जलरोचकः पुं क्लीं दीपाधा
पिलसुज दे‍को इत्यादिभाषा
तत्पर्य्यायः कौमुदीवृक्षः २
दीपवृक्षः ३ शिखातरुः ४ दी
पध्वजः ५ इति जटाधरः ज्योत्स्ना
वृक्षः ६ इति त्रिकाण्डशेषः ॥
कज्जली स्त्री मत्स्यविशेषः ॥
तत्पर्य्यायः कज्जला २ अनेता ३
इति शब्दरत्नावली मिश्रित
रसगन्धके इति वैद्यकं ॥
कंचटं क्ली जलजशाकविशे
कोचडादाम इति भाषा तत्
पर्य्यायः जलभूः २ लांगली ३
इति शब्दचन्द्रिका शारदी ४
तोयपिप्पली ५ शकुलादनी ६
इति रत्नमाला जलतण्डुलीयं ७
इति भावप्रकाशः तस्य गुणाः
श्लेष्मकारित्वं धारकत्वं हिमत्वं
पित्तरक्तनाशित्वं लघुत्वं च ॥
इति राजभः अपिच ॥
तिक्तत्वं वातहरत्वं च इति ॥
भावप्रकाशः ॥
कंचडः पुं कंचट प्रभेदः ॥
तत्पर्य्यायः कंचडः २ काचः ३
चक्रमर्दः ४ श्रेउपः ५ इति

शब्दचन्द्रिका ॥
कंचारः पुं सूर्य्यः इति जटाधरः
कंचिका स्त्री वंशशाखा कंची इति
भाषा तत्पर्य्यायः कुंचिका २
ह्लसुः ३ इति शब्दचन्द्रिका ॥
लुड्स्फोटः इति वैद्यकं ॥
कंचुकः पुं सर्पत्वक् सांपको खोलो
इति भाषा तत्पर्य्यायः निर्मोकः
२ भटादे खोला इति सन्नाहः
सांजोया इति भाषा तत्पर्य्यायः
वारवाणः २ वाणवारः ३ इत्यमरः
भरतो चोलके कांचुलि इति ॥
भाषा तत्पर्य्यायः चोलः २ ॥
कंचुलिका ३ कूर्पासकः ४ अंगिका
५ वर्द्धापक गृहीतकुस्थितवस्त्र
इति हेमचन्द्रः वस्त्र ॥
इत्युणादिकोषः ॥
कंचुकालुः पुं सर्पः इति
शब्दचन्द्रिका ॥
कंचुकी न पुं महल्लरक्षकः ॥
अन्तःपुराध्यक्षः सतु वहिः
सेवकेतीनां पुरस्त्रीणां प्रेरक
पुरुषान्तरवारणाय राज्ञा ॥
ह्यागारे यो वेत्रधरो नियुक्तः
तत्पर्य्यायः सौविदल्लः २ ॥
स्थापत्यः ३ सौविदः ४ इत्यमरः
यवः चणकः सर्पः इति ॥

राजनिर्घण्टः ॥ षिङ्गः ॥
जोंगकद्रुमः इति मेदिनी ॥
कंचुकी ओषधिभेदः इति
मेदिनी स्त्रीरीशब्दस्तः इति
रत्नमाला ॥
कंचुलिका स्त्री कंचुकः स्त्रीणामं
गिका चोलि इति भाषा ॥
इति हेमचन्द्रः ॥
कंजे क्ली अमृते पद्मे इति
मेदिनी ॥
कंजः पुं ब्रह्मा केशः इति ॥
मेदिनी ॥
कंजकः पुं पक्षिविशेषः मैय
इति भाषा इति शब्दचन्द्रिका।
कंजजः पुं ब्रह्मा इति शब्दरत्नावली
कंजनः पुं कंदर्पः इति ॥
त्रिकाण्डशेषः पक्षिविशेषः
मयना इति भाषा इति
शब्दचन्द्रिका ॥
कंजरः पुं ब्रह्मा सूर्य्यः ॥
उदरो हस्ती इत्युणादिकोषः
कंजलः पुं मदनपक्षी मयना
इति भाषा इति शब्दचन्द्रिका
कंजारः पुं जठरं ऋषिः ॥
विरिंचिः वारणः मुनिः ॥
इति मेदिनी ॥
कंजिका स्त्री ब्रह्मयष्टिका वृक्षः

वामनहाटी इति भाषा इति
शब्दरत्नावली ॥
कट गत्यां इति कविकल्पद्रुमः
कट इ गत्यां इति कविकल्पद्रुमः
कट इ गत्यां इति कविकल्पद्रुमः
कठ इत्यां इ कविकल्पद्रुमः
वर्षणे इति कविकल्पद्रुमः
कटः पुं हस्तिगण्डस्थले ॥
कटिदेशः तत्पार्श्वस्थ किलिंजकः
मोडर दरमा इत्यादि भाषा
इत्यमरः काशादिरचितरज्जुः
येन कुसूले वेष्टने कुसूलं च
मराय इति टीकान्तरं तृणरचित
टाटी इति ख्यात इत्यन्ये इति
तट्टीकायां भरतः अतिशयः
शारः समयः इति मेदिनी तृणे
इति धरणी शवः शवरथः
नृषधी श्मशाने इति हेमचन्द्रः
तत्तिकाष्ठे तक्का इति भाषा
इति शब्दरत्नावली ॥
कटः त्रि क्रियाकारः इति ॥
हेमचन्द्रः ॥
कटकः पुं क्ली पर्वतमध्यभागः
तत्पर्य्यायः नितम्बः २ इत्यमरः
मेखला ३ इति भरतः ॥
वलयः चक्रे इत्यमरः ॥
हस्तिदन्तमण्डने सामुद्रलवणे

राजधानी इतिमेदिनी नगरी ॥
इति शब्दरत्नावली सेना ॥
इतिहेमचंद्रः सानुः पर्वतस्य
समभूभागः इति विश्वः ॥
कटकीन पुं पर्वतः । इति
त्रिकांडशेषः ॥
कटकोलः पुं निष्ठीवनपात्रे
पिकदानी इति भाषा । इति
त्रिकांडशेषः ॥
कटखादके त्रि खादके भक्षके
इति मेदिनी ॥
कटखादकः पुं काचकलसः
काकः जम्बूकः इति मेदिनी।
कटंकटेरी स्त्री हरिद्रा इति
त्रिकांडशेषः दारुहरिद्रा ॥
इतिरत्नमाला ॥
कटप्रः पुं महादेवः राक्षसः ॥
विद्याधरः अक्षदेवनः इति
मेदिनी कीटः इतिसिद्धांत ॥
कौमुद्यामुणादिवृत्तिः ॥ (प्रः
कटभंगः पुं शस्यानां हस्तेन छे-
दनं दिवा मस्तके डा कुड न।
इत्यादि भाषा नृपात्ययः ॥
राजविनाशः इति मेदिनी ॥
कटभी स्त्री ज्योतिष्मतीलता
नयाफट्किी इतिभाषा इत्यमरः
अपराजिता वृक्षभेदः ॥

अत्पर्यायः नाभिका २ शौंडी
३ पादली ४ किणिही ५ मधुरेणुः
६ कट्फला ७ कैडर्य्यः ८ श्यामला
९ अस्यागुणाः कटुत्व उष्णत्व
गुल्मविषाध्मान शूलदोषनाशित्व
वातकफाजीर्ण रोगशान्तिकारित्व
श्वेता चेत् गुणप्रकत्वंच तत्
फलं तद्गुणं ज्ञेयं विशेषात्
कफघ्न कृत् इति राजनिर्घंटः
वृक्षभेदः कोठाशिरीष इति
ख्यातः इतिरत्नमाला ॥
कटमालिनी स्त्री मदिरा इति
शब्दमाला ॥
कटम्बः पुं वाद्यभेदः वाणः
इत्युणादिकोषः ॥
कटम्भरा स्त्री कटुकी इत्यमरः
कटंभरा इतिचपाठः ॥
कटंभरः पुं श्योनाकवृक्षः इति
राजनिर्घंटः कटभीवृक्षः इति
वैद्यके ॥
कटंभरा स्त्री राजवला इत्यमरः
प्रसारणी गंधभादालिया इति
भाषा रोहिणी कटुकी इति ॥
भाषा हस्तिनी कलंबिका
गोला वर्षाभूः मूर्वा इति ॥
मेदिनी ॥
कटभ्रणः पुं भीमसेनः इति

त्रिकांडशेषः ॥
कटशर्करा स्त्री गोगेष्टीलता
इति ख्याता इतिहारावली ॥
कटाकुः पुं पक्षी इतिसिद्धांत
कौमुद्यामुणादिवृत्तिः ॥
कटायने स्त्री वीरणं इति
शब्दरत्नावली ॥
कटारः पुं नागरः कामी इति
शब्दमाला ॥
कटाहः पुं कूर्मकर्परः ॥ (त्रे
द्वीपप्रभेदः तैलादिपाकपा
जायमानविषाणाग्रमहिषीशा-
वकः इतिमेदिनी नरकः इति
हारावली कर्परः इतिजटाधरः
कूपः इतिशब्दरत्नावली ॥
कटाक्षः पुं अपांगदर्शने ॥
आड्चकेदेखन इति भाषा
इत्यमरः ॥ (षः
कटिः पुं स्त्री शरीरावयवविशे
कांकालि इतिभाषा तत्पर्यायः
कटः २ श्रोणिफलकं ३ श्रो-
णी ४ ककुद्मती ५ इत्यमरः
श्रोणिफलं ६ कटी ७ श्रोणिः ८
इतितट्टीका कलत्रं ९ कटीरं
१० कांचीपदं ११ इतिहेमचंद्रः ॥
अत्र पूर्वत्र द्वयं कटिपार्श्वः इति
भरतः ॥

(नाला कटित्रं स्त्री रसना कटिवस्त्रं
वटिवर्म्म इति मेदिनीकर
हेमचंद्रौ ॥
कटिप्रोथः पुं कटिदेशस्थमांस
पिंडे गदवला पोदरपेलो ॥
इतिभाषा तत्पर्यायः स्फिक्
२ इत्यमरः स्फूलकः ३ ॥
कटीप्रोथः ४ इतिरभसः
कटिः ५ प्रोथः ६ इतिकेचित्
स्फूलः ७ इति भरतः ॥
कटिरोहकः पुं हस्ति
पृष्ठाङ्गारोहकः इतिशब्दमाला
कटिल्लकः पुं कारक पुं कारवेल्लः
करेला इति भाषा इत्यमरः ॥
कटिशीर्षकः पुं कटिदेशः
इतिहलायुधः ॥
कटिशृंखला स्त्री क्षितिका
कटिभाष्य क्षुद्रघंटिका इति
हारावली ॥
कटिसूत्रं स्त्री कटालंकारविशेषः
वेद्रहार गोट इत्यादिभाषा ॥
इतिहलायुधः ॥
कटी पुं हस्ती इतित्रिकांडशेषः
कटी स्त्री पिप्पली श्रोणिदेशः
इतिमेदिनी ॥
कटीतलः पुं गुप्तखङ्गः ॥
वांकाखांडा इति भाषा इति



त्रिकाण्डशेषः ॥ (टुः
कठीरे क्ली कठिः इति हेमच
कठीरः पुं जघने केदरः ॥
इत्युणादिकोषः कठिः ॥ इति
जटाधरः ॥
कठीरकः पुं नितम्बः इति
त्रिकाण्डशेषः ॥
कटु क्ली अकार्य्ये इत्यमरः ॥
दूषणे इति विश्वः ॥
कटुः पुं रसविशेषः झाल इति
भाषा इत्यमरः अस्य गुणाः ॥
कंठजदोष शोषय मंदाग्नि ॥
श्वित्ररोगनाशित्वं अस्य बहुसे
वनेन भ्रमशालत्वं वीर्यबलापहत्वं
च राजनिर्घण्टः अपिच ॥
अरोच्य पित्ताग्नि वायुकारित्वं
क्रिमि कंडु विषरोगस्तनडुग्ध
मेदः स्थौल्य नाशित्वं लघुत्वं
अतिप्राय भक्षणे भ्रमसैथिल्यं
तालुशोषातिदाह कारित्वंच
इति राजवल्लभः चपकहस्तः
इति शब्दचन्द्रिका चीनकर्पूरः
पटोलः कट्वीलता ॥ इति ॥
राजनिर्घण्टः ॥
कटुः स्त्री कटुकी इत्यमरः ॥
प्रियंगुहस्तः राजिका इति
विश्वमेदिन्यौ ॥

कटुः त्रि मत्सरः तीक्ष्णः ॥
इत्यमरः कटुरसयुक्तः सुगंधिः
इति मेदिनी अप्रियः इति ॥
त्रिकाण्डशेषः दुर्गंधः इत्यमर
टीकायांस्वामी ॥
कटुकः पुं पटोलः इति
राजनिर्घण्टः सुगंधितृणे इति
शब्दरत्नावली कुटजहस्तः
अर्कहस्तः इति शब्दचन्द्रिका
राजसर्षपः इति हारावली
कटुकं क्ली त्रिकटु इति मेदिनी
तत्र शुंठी पिप्पली मरिचंच
कटुकंदः पुं शिग्रुहस्तः आर्द्रके
लशुने इति मेदिनी ॥
कटुकफलं क्ली कक्कोलकके
इति राजनिर्घण्टः ॥
कटुका स्त्री स्वडुवंवहस्तः क्षुत
विशेषः कटुकी इति भाषा
तत्पर्यायः जननी २ तिक्ता ३
रोहिणी ४ तिक्तरोहिणी ५
चक्रांगी ६ मत्स्यपित्ता ७
चक्रुला ८ शकुलादनी ९ सादनी
१० शतपर्वा ११ द्विजांगी १२
मसिभेदिनी १३ अशोकरोहिणी
१४ कृष्णा १५ कृष्णभेदी १६
महौषधी १७ कट्वी १८ अंजनी १९
कांडरुहा २० कटुः २१ कटुरोहिणी

२२ केदारकटुका २३ अरिष्टा २४
वामघ्नी २५ इति राजनिर्घण्टः
कटम्बरा २६ कटंभरा २७ अशोका
२८ रोहिणी २९ इत्यमरः ॥ (त्वे
तट्टीकाच अस्य गुणाः अतिकटु
तिक्तत्वं शीतत्वं पित्तरक्तदाह
बलाशारोचकश्वासज्वरनाशित्वं
हृद्विकारित्वंच इति राजनिर्घण्टः
सारकत्वं रूक्षत्वं कफनाशित्वंच
इति राजवल्लभः तांबूली ॥
इति शब्दचन्द्रिका कुलिकहस्तः
इति रत्नमाला ॥ (लाउ
कटुकालाबुः पुं कटुतुम्बी तित
इति भाषा इति रत्नमाला
कटुकी स्त्री कटुका कटुकी इति
भाषा इति मेदिनी ॥
शब्दरत्नावली ॥
कटुकीटकः पुं मशकः इति
जटाधरः ॥
कटुक्वाणः पुं टिट्टिभपक्षी इति
हेमचन्द्रः ॥
कटुग्रंथि क्ली पिप्पलीमूलं शुंठी
इति राजनिर्घण्टः ॥ (क
कटुचातुर्जातकं स्त्री एलात्व
पत्रक मरिचात्मकचतुष्कं इति
राजनिर्घण्टः ॥
कटच्छदः पुं तगरहस्तः इति

शब्दरत्नावली ॥
कटुतिक्तकः पुं शणहस्तः इति
राजनिर्घण्टः भूनिंबः इति ॥
वैद्यके ॥
कटुतिक्तिका स्त्री कटुतुंबी इति
शब्दरत्नावली ॥
कटुतुंडी स्त्री लताप्रभेदः ॥
कटुतराइ इति ख्याता ॥
तत्पर्यायः तिक्ततुंडी २
तिक्ताख्या ३ कटुका ४ कटुतुंडिका
५ विषा ६ अस्या गुणाः कटुत्वं
तिक्तत्वं कफवाति विषारोचक
रक्तपित्तनाशित्वं सदापथ्यत्वं
रोचनत्वंच इति राजनिर्घण्टः ॥
कटुतुम्बी स्त्री लताविशेषः
तितलाउ इति भाषा तत्पर्यायः
इक्ष्वाकुः २ इत्यमरः ॥
कटुकालाबुः ३ नृपात्मजा ४ इति
रत्नमाला कटुतिक्तिका ५ इति
शब्दरत्नावली कटुफला ६ तुम्बिनी
७ कटुतुम्बिनी ८ बृहत्फला ९
राजपुत्री १० तिक्तबीजा ११ तुंबिका ११
१२ अस्या गुणाः कटुत्वं तीक्ष्णत्वं
वांतिकारित्वं श्वासवातकास
शोथ व्रण शूकविषनाशित्वं
शोधनत्वंच इति राजनिर्घण्टः
पांडु क्रिमि कफ वायु नाशित्वं

लच पाकित्वेच इति राजवल्लभः
कटुत्रये क्ली त्रिकटु इति राजनि
र्घंटः कटुदला स्त्री कर्कटी काकुड
इति भाषा इति राजनिर्घंटः
कटुनिष्पावः पुं नदीनिष्पावः
इति राजनिर्घंटः ॥
कटुपत्रः पुं पर्पटः सितार्जकः
इति राजनिर्घंटः ॥
कटुपत्रिका स्त्री क्षारीवृक्षः इति
राजनिर्घंटः ॥
कटुफलः पुं पटोलः इति ॥
राजनिर्घंटः ॥
कटुफला स्त्री श्रीवल्लीवृक्षः इति
राजनिर्घंटः ॥
कटुभंगः पुं सुंठी । इति ॥
त्रिकांडशेषः ॥
कटुभद्रे क्ली सुंठी इति ॥
राजनिर्घंटः आर्द्रके इति ॥
केचित् ॥
कटुमंजरिका स्त्री अपामार्गः
इति राजनिर्घंटः ॥
कटुमोदे क्ली जवादिनामगंधे
इति राजनिर्घंटः ॥
कटुरे क्ली तक्रे इति जटाधरः
कद्वरे इत्यपिपाठः ॥
कटुरवः पुं मेडूकः इति
राजनिर्घंटः ॥

कटुरोहिणी स्त्री कटुकी इत्यमरः
कटुवार्त्ताकी श्वेतकंटकारी
इति राजनिर्घंटः ॥
कटुबीजा स्त्री पिप्पली इति
राजनिर्घंटः ॥
कटुशृगाले क्ली गौरसुवर्णशाके
इति राजनिर्घंटः ॥
कटुस्नेहः पुं सर्षपः इति ॥
त्रिकांडशेषः गौरसर्षपः इति
राजनिर्घंटः ॥
कटुत् कटे क्ली आर्द्रके इति
रत्नमाला ॥
कटूत कटके क्ली सुंठी इति
राजनिर्घंटः ॥
कटोसिस्त्री [illegible] नाम ख्यातपा
वादि इति भाषा इति
ब्रह्मवैवर्त्तपुराणं ॥
कटोलः पुं चंडालः इत्युणादि
कोषः कटुरसः इति सिद्धांत
कौमुद्यामुणादिवृत्तिः ॥
कटोलवीणा स्त्री वीणाविशेषः
केंडरा इति ख्याता इति ॥
शब्दरत्नावली ॥
कट्फलः पुं वृक्षविशेषः
कायफल इति भाषा तत्
पर्य्यायः श्रीपर्णिका २ कुमुदिका
३ कुंभी ४ कैटर्य्य ५ इत्यमरः ॥

सोमवल्कः ६ सोमवृक्षः ॥
रोहिणी ८ इति रत्नमाला ॥
कुम्भगर्भः ९ श्वेतस्त्री १० भद्रावती
११ महाकुंभी १२ रामसेनकः १३
कुमुदा १४ उग्रगंधः १५ भद्रा १६
रंजनकः १७ लघुकाश्मर्य्यः १८
श्रीपर्णी १९ अस्य गुणाः कटुत्व
उष्णत्व कासश्वासज्वरोग्रदाह
नाशित्व रुचिकारित्व मुखरोग
शमकत्वेच इति राजनिर्घंटः
कफरोगनाशित्व इति ॥
राजवल्लभः ॥
कट्फल स्त्री गंभारीवृक्षः इति
रत्नमाला वृहती काकमाची
देवदाली ॥ वार्त्ताकी ॥
मृगेर्वारुः इति राजनिर्घंटः
कट्वंगः पुं श्योनाकवृक्षः ॥
इत्यमरः दिलीपराजः इति
त्रिकांडशेषः ॥
कट्वरे क्ली दधिसरः इति रत्नमा
ला जने इत्युणादिकोषः तक्रे
यथारब्धः ससारकस्यात्र तक्रे
कट्वर मुच्यते इति वैद्यके ॥
कट्वी स्त्री कटुका लताविशेषः
तत्पर्य्यायः कटुकवल्ली २
सकाशा ३ काष्ठवल्लिका ४ सुवल्ली
महावल्ली ६ पशुमोहनिका ७ कटुः

८ अस्यागुणाः मधुरत्वे शीतत्वे
कफश्वासनानाज्वर हारित्वे
रुचिकारित्वे राजयक्ष्मनिवारण
त्वेच इति राजनिर्घंटः ॥
कठ इकि आध्याने उत्केत ॥
पूर्वकस्मरणे इति कविकल्पद्रुमः
कठ तेकने डुःखेनजीवने ॥
इति कविकल्पद्रुमः ॥
कठ इउ आध्याने । इति ॥
कविकल्पद्रुमः ॥
कठः पुं मुनिविशेषः कठशाखा
ध्ययनकर्त्ता ॥ कठप्राख्यानः ॥
ऋषिभेदः इति हेमचंद्रः ॥
ब्राह्मणः इति त्रिकांडशेषः
कठमर्द्दः पुं शिवः इति
त्रिकांडशेषः ॥
कठरः त्रि कठिनः इति
जटाधरः ॥
कठाहकः पुं दात्यूहपक्षी इति
शब्दरत्नावली ॥
कठिंजरः पुं तुलसीवृक्षः
तत्पर्य्यायः पर्णासः २ कुठेरकः
३ । इत्यमरः ॥
कठिने त्रि कठरे तत्पर्य्यायः
कक्खटं २ क्रूरं ३ कठोरं ४
निष्ठुरं ५ दृढं ६ जठरं ७ मूर्त्तिमत्
८ मूर्त्तं ९ इत्यमरः खक्खटं ॥

१ कठोल ११ जरठं १२ ॥
इति तट्टीकायां स्वयं इति ॥
मेदिनी ॥
कठिने क्ली स्त्री स्थाल्यां इति
मेदिनी शब्दरत्नावल्यौ ॥
कठिलष्टकः पुं कर्कपः इति
राजनिर्घण्टः ॥
कठिना स्त्री गुड शर्करा इति
विश्व मेदिन्यौ ॥
कठिनिका स्त्री कठिनी खडी
इति भाषा इति हारावली
कठिनी स्त्री खडिका खडी इति
भाषा इति मेदिनी तत्पर्यायः
पाकशुक्ला २ अनिलाधातुः ।
कक्खटी घटी ५ खडी ६
वर्णलेखिका ७ इति रत्नमाला
धातूपलः ८ कठिनिका ९ इति
हारावली ॥
कठिल्लः पुं कारवेल्लः करला
इति भाषा इत्युणादिकोषः ॥
कठिल्लकः पुं कारवेल्लः पुनर्णा २
वा तुलसी इति त्रिकाण्डशेषः ॥
कठी स्त्री ब्राह्मणी इति जटाधरः
कठेरः पुं कृच्छ्रजीवी दरिद्रः
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
कठोरः त्रि कठिनः इत्यमरः ॥
कठोलः त्रि कठोरः इत्यमर ॥

टीकायां नीलकण्ठः ॥
कड इक भेदे रक्षणे इति ॥
कविकल्पद्रुमः ॥
कड ३ उ. न दर्पे हर्षे इत्यर्थः
इति कविकल्पद्रुमः ॥
कड श अदने दर्पे इति ॥
कविकल्पद्रुमः ॥
कडः त्रि मूकः इति हलायुधः
कडके क्ली लवणविशेषः काकच
इति भाषा तत्पर्यायः सामुद्रं
२ त्रि कूटं ३ इति रत्नमाला
अस्यगुणाः सामुद्र
कडंगः पुं सुराविशेषः ॥
इत्युणादिकोषः ॥
कडंगरः पुं तुषे आगडा
इति भाषा इत्यमरः ॥
कडत्रे क्ली पात्रविशेषः इति
उणादिकोषः ॥
कडम्बः पुं शाकनाडिका डांठा
इति भाषा तत्पर्यायः कलम्बः
इत्यमरः कोणे प्रांतभागः
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
कडम्बी कलम्बी शाके इति
शब्दरत्नावली ॥
कडारः पुं पिंगवर्णः ॥
तद्वर्णयुक्ते त्रि इत्यमरः कडार
लक्षणबहुव्रीहिवत् इत्यन्ये इति भरतः

दासः इति मेदिनी ॥
कडितुलः पुं खड्गः ॥ इति
शब्दरत्नावली ॥
कड्डुः कार्कश्ये इति
कविकल्पद्रुमः ॥
कण ऋ आर्तस्वरे इति
कविकल्पद्रुमः ॥
कणम गतौ इति कविकल्पद्रुमः
कणक निमीलने । इति ॥
कविकल्पद्रुमः
कणः पुं अतिसूक्ष्मः धान्यांशः
इत्यमरः तस्य स्त्रीलिंगे कणी
कणिका वनजीरकः इति
राजनिर्घण्टः ॥ (२ः
कणगुग्गुलुः पुं गुग्गुलुभेदे
तत्पर्यायः गंधराजः २ स्वर्णकणः
३ सुवर्णः ४ कणकः ५ कणपीतः ६
सुरभिः ७ पलंकषः अस्यगुणाः
कटुत्वं उष्णत्वं सुगंधित्वं वात
शूलगुल्मोदराध्मानकफनाशित्वं
रसायनत्वं च इति राजनिर्घण्टः
कणजीरः पुं श्वेतजीरकः इति
राजनिर्घण्टः ॥ (तत
कणजीरकं क्ली स्थूलजीरकं
पर्यायः स्थूलजीरः सुगंधः २
इति रत्नमाला शब्दचन्द्रिकाच
कणभक्षकः पुं भारद्वपक्षी

इति राजनिर्घण्टः ॥
कणलाभः पुं आवर्त्तः
जलेर घुर्णि इति भाषा इति
त्रिकाण्डशेषः ॥
कणा स्त्री जीरके कुम्भमक्षिका
पिप्पली इति मेदिनी ॥
श्वेतजीरके इति राजनिर्घण्टः
अल्पे यथा कदलीफलमध्यस्थे
कणमात्रमपक्वके ॥ इति
तिथ्यादितत्त्वे ॥
कणाटीनः पुं खञ्जनपक्षी इति
त्रिकाण्डशेषः ॥
कणानिरः पुं खञ्जनपक्षी इति
शब्दरत्नावली ॥
कणाटीरकः पुं खञ्जनपक्षी
इति शब्दरत्नावली ॥
कणादः पुं स्वनाम ख्यात ॥
मुनिविशेषः तत्पर्यायः ॥
काश्यपः २ इति त्रिकाण्डशेषः ॥
सच वैशेषिकदर्शनकर्त्ता ॥
स्वर्णकारः कलादो रुक्मकारक
इत्यमरोपरि कणाद इत्यपि
पाठः इति सारसुन्दरी ॥
कणिकः पुं कणशत्रुः ॥
नीराजनविधिः इति सारस्वतः
शुष्कगोधूमचूर्णं इति ॥
राजनिर्घण्टः ॥



कणिका स्त्री अन्यन्तसूक्ष्मवस्तु
अग्निमेथवृक्षः इति मेदिनी ॥
कणा तंडुलविशेषः इत्यमर
टीकायांरायमुकुटः ॥
कणितं क्ली पीडितानांशब्दः
इति हेमचन्द्रः ॥
कणिशं क्ली शस्यमंजरी ॥
धान्यादिशीष इति भाषा ॥
इत्यमरः ॥
कणी स्त्री कणिका इत्यमर
टीकायांभरतः ॥
कणीकं त्रि अल्पं इत्युणादिको
कणीयः[स] त्रि अत्यल्पं इत्यमरः
कनिष्ठे इति तट्टीका ॥
कणेरः पुं कर्णिकारवृक्षः ॥
इत्युणादिकोषः ॥
कणेरा स्त्री वेश्या हस्तिनी ॥
इत्युणादिकोषः ॥
कणेरुः स्त्री वेश्या करिणी
कर्णिकारवृक्षे पुं इति मेदिनी ॥
केटकः पुं क्ली लट्टशत्रुः ।
मत्स्याद्यस्थि लेखायं कादि ॥
रोमालिः रोमांचः कुमारी ॥
कांटा इति भाषा इति मेदिनी ॥
केंडू इति दीपिका ॥
केटकः पुं रूक्षांगे लट्टशत्रुः
लोमहर्षः इत्यमरः ॥

कर्मीस्थाने दोषः इति जटाधरः
मकरः इति विश्वः वेणुः ॥
इति हेमचन्द्रः ॥
केटकद्रुमः पुं शाल्मलिवृक्षः
इति राजनिर्घंटः ॥
केटकशाहता स्त्री गृहकन्या
हृतकुमारी इति भाषा इति
राजनिर्घंटः ॥
केटकफलः पुं पनसवृक्षः
इत्यमरटीकायांभरतः ॥
गोक्षुरवृक्षः इति रत्नमाला
केटकहृताकी स्त्री वार्ताकीइति
राजनिर्घंटः ॥
केटकश्रेणी स्त्री केटकारीइति
शब्दचंद्रिका
केटकागारः पुं सरटजंतुः इति
राजनिर्घंटः ॥
केटकाख्यः पुं कुब्जकवृक्षः
राजनिर्घंटः ॥
केटकारिका स्त्री स्वनामख्यात
लतावृक्षः तत्पर्यायः निदिग्धिका
२ स्पृशी ३ व्याघ्री ४ बृहती ५
प्रचोदनी ६ कुली ७ लट्टा ८
दुस्पर्शा ९ राष्ट्रिका १० इत्यमरः
अनाक्रांता ११ भंटाकी १२
सिंही १३ धावनिका १४ इति
रत्नमाला कंठकारी १५ केटिकिनी

१६ दुष्प्रधर्षिणी १७ निदिग्धा
धावनी १९ लट्टकेंठिका २०
वहुकंटा २१ लट्टफला २२
कंठालिका २३ चित्रफला २४
अस्या गुणाः कटुत्वं उष्णत्वं ॥
दीपनत्वं श्वासकास प्रतिश्याय
दोष कफ वात ज्वर नाशित्वं च
इति राजनिर्घंटः तस्या नाशित्वं
पित्त कफ कंडू कुष्ठ कृमिनाशित्वे
लघुत्वं उष्णत्वं कटुत्वं ॥
तिक्तत्वंच इति राजनिर्घंटः ।
राजवल्लभौ ॥
केटकारी स्त्री केटकारिकावृक्षः ।
इति राजनिर्घंटः शाल्मलीवृक्षः
इति जटाधरः विकंकतवृक्षः
वइचि इति भाषा इति ॥
शब्दरत्नावली ॥
केटकालः पुं पनसवृक्षः इति
शब्दचंद्रिका ॥
केटकालुकः पुं यवासवृक्षः
राजनिर्घंटः ॥
केटकाशनः पुं उष्ट्रः इति
त्रिकांडशेषः ॥
केटकाष्ठीलः पुं मत्स्यविशेषः
तत्पर्यायः कुलिशः २ इति
त्रिकांडशेषः ॥


केटकिनी स्त्री वार्ताकी इति
शोणकिंटीमधुरखर्जूरी इति
राजनिर्घंटः ॥
केटकफलः पुं वृक्षविशेषः
कांठाल इति भाषा तत्पर्यायः
पनसः २ इत्यमरः पलसः ३ ।
केटकीफलः ४ केटकफलः ५
इति तट्टीका महासर्जः ६ फलिनः
९ मूलफलदः ११ अपुष्पफलदः १२
पूतफलः १३ अस्य गुणाः केटफल
शब्दद्रुमाः समष्टिलवृक्षः इति
राजनिर्घंटः ॥
केटकिलः पुं देशविशेषः
वेडुवाश इति भाषा इति ॥
शब्दचंद्रिका ॥
केटकिलता स्त्री त्रपुषी शषा
इतिभाषा इति राजनिर्घंटः ॥
केटकी[२] पुं मत्स्यः । इति ॥
शब्दरत्नावली खदिरवृक्षः इति
शब्दमाला मदनवृक्षः इति
रत्नमाला गोक्षुरवृक्षः वंशः
बदरवृक्षः इति राजनिर्घंटः
केटकी स्त्री वार्ताकीविशेषः
कांटावागुन इति भाषा अस्या गुणाः
कटुत्वं तिक्तत्वं उष्णत्वं रक्त
पित्तप्रकोपणत्वं कंडूकफहारित्वं

दोषलत्वंच इतिराजवल्लभः
कंठकीद्रुमः पुं खादरवृक्षः
इतिरत्नमाला ॥
कंठकीफलः पुं कंटकिफलं
कांठाल इति भाषा इत्यमरः
टीकायांभरतः ॥
कंठकुरंठ पुं फिंटी इति ॥
राजनिर्घंटः ॥
कंठतनुः स्त्री बृहती इति
राजनिर्घंटः ॥
कंठदला स्त्री केतकी इति
राजनिर्घंटः ॥
कंटपत्रः पुं विकंकतवृक्षः
बैइचि इतिभाषा इतिशब्दमाला
कंठपत्रफला स्त्री ब्रह्मदंडीवृक्षः
इति राजनिर्घंटः ॥
कंठपादः पुं विकंकतवृक्षः
इति राजनिर्घंटः ॥
कंटफलः पुं लद्रगोक्षुरः॥
पनसः धुस्तूरः लताकरंजः
इतिराजनिर्घंटः तेजः खलः
एरंडः इति केचित् ॥
कंठफला स्त्री देवदालीलता
इति राज निर्घंटः ॥
कंठलः पुं वृक्षविशेषः बावला
इति भाषा तत्पर्यायः ॥
बावलः २ स्वर्णपुष्पः इत्युत्पु (वः

इति शब्दचंद्रिका ॥ (इति
कंठवल्ली स्त्री श्रीवल्लीवृक्षः
राजनिर्घंटः ॥
कंटवृक्षः पुं तेजःफलवृक्षः इति
राजनिर्घंटः ॥ (ठाल
कंठाफलः पुं पनसवृक्षः कां
इतिभाषा इतिशब्दमाला॥
अस्यपक्कफलगुणाः समधुरत्वं
रक्तवर्द्धकत्वं स्निग्धत्वं शीतलत्वं
दुर्जरत्वं वायुपित्त नाशित्वं
श्लेष्मशुक्रबलप्रदत्वंच इति
राजवल्लभः पिच्छिलत्वं गुरुत्वं
रुच्यत्वं भ्रमदाहविशोषनाशित्वं
रुचिकारित्वं ग्राहित्वंवइति
राजनिर्घंटः तद्बीजगुणाः
रक्तपित्त नाशित्व स्वादुत्वंफल
तुल्यगुणत्वंच इतिराजवल्लभः
इषत्कषायत्वं मधुरत्वं रुचिवायु
वृद्धिकारित्वं गुरुत्वं त्वग्दोष
तत्फलविकारनाशित्वं इति
राजनिर्घंटः तस्यापक्कस्य
गुणाः कषायत्वं स्वादुत्वं वायु
कारित्वं इति राजवल्लभः॥
शीतलत्वंच वृंतशुष्कस्य तस्य
गुणाः स्निग्धत्वं रुच्यत्वं बलप्रदत्वं
छर्दिनाशित्वं अचलत्वात् शुक्र
कारित्वं वातपित्त नाशित्वंच

तन्मज्जगुणाः शुक्रकारित्वंवात
पित्तकफनाशित्वंच विशेषात्
पनसेवर्ज्यं गुल्मिभिर्मंदवह्निभिः
इतिराजनिर्घंटः ॥
कंठाग्रगला स्त्री नीलझिंटी इति
राजनिर्घंटः ॥
कंठालुः पुं वेशः बृहती ॥
वार्त्ताकी खर्ज्जूरः इति
राजनिर्घंटः ॥
कंठाह्वये स्त्री पद्मकंदः इति
राजनिर्घंटः
कंटीनः पुं कलायः अपामार्गः
खदिरः गोक्षुरः इति ॥
राजनिर्घंटः ॥
कंठः त्रि ग्रीवा पुरोभागः तत्
पर्यायः गलः २ इत्यमरः अत्र
विशुद्धनाम षोडशदलपद्ममस्ति
यथातदुक्तंतंत्रे विशुद्धाख्येदले।
षोडशपत्रकंस्वरैः षोडशभि
र्युक्तं धूम्रवर्णे महाप्रभे ॥
विशुद्धपद्ममाख्यातमाकाशाख्य
महाद्भुतं इतिगौतमतंत्रे
निकटः ध्वनिः इतिमेदिनी
कंठः पुं मदनवृक्षः इतिमेदिनी
होम कुंडाद्बहिरंगुलिपरिमित
स्थाने यथाखातद्बाहिरंगुल
कंठः सर्वकुंडेष्वयंविधिः इति

तिथ्यादितत्वं ॥
कंठकणिका स्त्री वीणा इति
हेमचंद्रः ॥
कंठतलासिका स्त्री अश्वग्रीवावेष्टक
रज्जुचर्म्मादि इति शब्दमाला
कंठनीडकः पुं चिलपक्षी चिल
इति भाषा इतित्रिकांडशेषः
कंठनीलकः पुं उल्कामसाल इति
भाषाइति शब्दमाला ॥ (क
कंठपाशकः पुं हस्तिगलवेष्ट
रज्जुः इतिशब्दमाला ॥
कंठभूषा स्त्री कंठाभरणं
ग्रीवालंकारः तत्पर्यायः॥
ग्रैवेयकं २ इत्यमरः ॥ (णिः
कंठमणिः पुं गलदेशधारणीयम
तत्पर्यायः काकलं २ इति
त्रिकांडशेषः ॥
कंठ्यः त्रि कंठाद्भवशब्दादिः इति
व्याकरणं ॥
कंठाग्निः पुं पक्षी। इति
त्रिकांडशेषः ॥
कंठालः पुं शूरणः युद्धं नौका
खनित्रं इतिविश्वः क्रमेलकः
गोणीप्रभेदः इतिमेदिनी
कंठाला स्त्री जालगोणिकाइति
त्रिकांडशेषः मेदिनीच
कंठिकास्त्री कंठाभरणं एकनरी



केंडी इति भाषा इति हेमचंद्रः
कंठीस्त्री अश्व कंठ वेष्टन रज्जु
वर्मादि इति शब्दमाला गलः
इत्यमरटीकायां भरतः ॥
कंठीरवः पुं सिंहः इति ॥
त्रिकांडशेषः पारावतः इति
राजनिर्घंटः मत्तहस्ती इति
सारस्वतः ॥
कंठीरवी स्त्री वासकवृक्षः इति
राजनिर्घंटः ॥
कंठेकालः पुं महादेवः इति
त्रिकांडशेषः ॥ (लादि
कंडनं क्ली उदूखलादिना तंडु
निर्मलीकरणं कांडा इति भाषा
इति हेमचंद्रः ॥
कंडनी स्त्री उदूखलं इति
त्रिकांडशेषः ॥ (डी
कंडरा स्त्री महास्नायुः महाना
इति हेमचंद्रः ॥ (डः
कंडुः स्त्री कंडूः इति रायमुकु
कंडुरः पुं कारवेल्ललता कंदर
तृणं इति राजनिर्घंटः ॥
कंडुरा स्त्री कपिकच्छुः स्वल्पत्त
पर्णी इति राजनिर्घंटः ॥
कंडूः स्त्री रोगविशेषः चुलकानि
चास इत्यादि भाषा तत्पर्यायः
खर्जूः २ कंडूया ३ इत्यमरः

कंडूतिः ४ इति तट्टीका ॥
कंडूयनं ५ इति राजनिर्घंटः
कंडूकरी स्त्री शूकशिम्बीवृक्षः
शब्दचंद्रिका ॥
कंडूघ्नः पुं आरग्वधः गौरसर्षपः
इति राजनिर्घंटः ॥
कंडूतिः स्त्री कंडूः चुलकानि इति
भाषा इति भरत हलायुधौ ॥
कंडूयनं क्ली कंडूः इति हलायुधः
कंडूया स्त्री कंडूः इत्यमरः ॥
कंडूरा स्त्री विशेषः आकुशी
इति भाषा तत्पर्यायः ॥
आत्मगुप्ता २ जडा ३ अव्यंडा ४
प्रावृषायणी ५ ऋष्यप्रोक्ता ६
शूकशिम्बिः ७ कपिकच्छुः ८ मर्कटी
९ इत्यमरः अजहा १० अव्यंडा
११ कंडुरा १२ शूकशिम्बी १३
शूकशिम्बा १४ कपिकच्छूः १५ इति
तट्टीका ऋषभः १६ स्वगुप्ता १७
इति रत्नकोषः ॥
कंडूलः पुं शूरणः इति
राजनिर्घंटः कंडूयुक्ते त्रि ॥
कंडोलः पुं नल वंशादिरचित
धान्यादि स्थापन पात्रं डोल
इति भाषा तत्पर्यायः पिटः २
इत्यमरः पिटकः ३ पेटकः ४
इति भरतः उष्ट्रः इत्युणादि ॥
कोषः ॥

कंडोलकः पुं कंडोलः । इति
हेमचंद्रः ॥
कंडोलवीणा स्त्री चंडालवीणा
कंदडा इति ख्याता तत्पर्यायः
चांडालिका २ कंडोलवल्लकी ३
इत्यमरः चंडालिका ४ कंडोल
वीणा ५ इति भरतः ॥
कंडोली स्त्री कंडोलवीणा इति
शब्दरत्नावली ॥ (को
कंडोष्ठः पुं शूककीटः शूयापो
इति भाषा इति शब्दचंद्रिका ॥
कन्वः पुं मुनिविशेषः इति ॥
मेदिनी सतु पुरुवंश जाता
ऽप्रतिरथनाम क्षत्रियपुत्रः यथा
स्तुमति र्ध्रुवो ऽप्रतिरथः कण्वो
ऽप्रतिरथात्मजः तस्य मेधातिथि
स्तस्मात् प्रस्कण्वाद्या द्विजातयः
इति श्रीभागवतं ॥
कण्वं क्ली पापं इति मेदिनी
कतः पुं मुनिविशेषः इत्युणादि
कोषः कतक वृक्षः ॥ इति
राजनिर्घंटः ॥
कतकः पुं वृक्षविशेषः निर्मली
इति भाषा तत्पर्यायः ॥ (लः
अंबुप्रसादः २ कतः ३ तिक्तफ
४ हृद्यः ५ छेदनीयः ६ गुच्छफलः
कतफलः ८ तिक्तमरिचः ९ अस्य

गुणाः कटुत्वं तिक्तत्वं उष्णत्वं
चक्षुर्हितत्वं कविकारित्वं कृमि
दोष मूलदोषनाशित्वंच तस्य
बीजे अंबुप्रसादनं ॥ इति
राजनिर्घंटः ॥
कतफलः पुं कतकवृक्षः इति
राजनिर्घंटः ॥ (माला
कतमालः पुं अग्निः इति शब्द
कवमालः खतमालस्य पाठः
कति त्रि कियत [illegible] कत
इति भाषा इति व्याकरणं ॥
कतिपयः त्रि कति कतिगुलि
इति भाषा इति व्याकरणं ॥
कत्तृणं क्ली सुगंधि तृणविशेषः
रामकर्पूर इति ख्याते तत्
पर्यायः पौरं २ सौगंधिकं ३
ध्यामं ४ देवजग्धकं ५ रौहिषं ६
इत्यमरः सुगंधं ७ तृणशीतं ८
सुशीतलं ९ इति रत्नमाला ॥
रोहिषतृणं १० कात्तृणं ११ भूति
१२ भूतिकं १३ श्यामकं १४
ध्यामकं १५ धूलि १६ मुकुलं १७
देवदग्धकं १८ अस्य गुणाः (दि
कटुत्वं तिक्तत्वं कफ वातघात्व्या
दोष बाल ग्रह विनाशित्वंच
राजनिर्घंटः अष्टिः वाकुलिया
इति भाषा इति मेदिनी ॥



कत्थोषे क्ली मद्ये इति ॥
त्रिकाण्डशेषः ॥
कत्थ उ श्लाघे इति कविकल्पद्रु
कत्र तक शैथिल्ये इति ॥
कविकल्पद्रुमः ॥
कत्सवरं क्ली स्कंधः इति ॥
शब्दचंद्रिका ॥
कथ त क वाक्यप्रबंधे इति
कविकल्पद्रुमः ॥
कथं वा कथम् किंप्रकारे इति
व्याकरणं ॥
कथकः त्रि रक्ता कथोपजीवी
नाटकवर्णनकर्त्ता तत्पर्यायः
एकलटः २ कथाप्राणः ३ इति
शब्दरत्नावली ॥
कथंकथिकः त्रि प्रष्टा प्रश्नकर्त्ता
इति त्रिकाण्डशेषः भूरिप्रयोगो ॥
कथंकथिता स्त्री ह्रक्काप्रश्नः
इति हेमचंद्रः ॥ (भाषा
कथनं क्ली कथा कहन इति
इति हलायुधः ॥
कथम् वा हर्षः गर्हा प्रकारार्थः
संभ्रमः प्रश्नः संभावना ॥
इति मेदिनी ॥ (मरः
कथा स्त्री प्रबंधकल्पनाइत्य
प्रबंधेन कल्पना अथवा प्रबंधस्य
अभिधेयस्य कल्पना रचना

इति सारसुंदरी प्रबंधस्य ॥
कल्पना रचना बहुवृत्तान्तलोक
सत्या इति भरतः प्रबंधकल्पनां
स्तोकसत्यां प्राज्ञाः कथां विदुः
परंपराश्रया या स्यात् सा ॥
मतारख्यायिका क्वचित् इति
कोलाहलाचार्य्यः ॥
कथाप्रसंगः जल्पाकः इति
शब्दरत्नावली वातुलः विषवैद्यः
इति मेदिनी ॥ (नाटक
कथाप्राणः त्रि कथकः सतु
वक्ता इति शब्दरत्नावली ॥ (ति
कथितः त्रि उक्तः कहावला इत्य
भाषायथा कथितो वंश ॥
विस्तारो भवता सोमसूर्य्ययोः
इति श्रीभागवते ॥
कद इ रोदने आह्वाने
वैक्लव्ये इति कविकल्पद्रुमः
कदष म उ वैक्लव्ये विह्वली
भावे इति कविकल्पद्रुमः ॥
कदः पु मेघः इति शब्दरत्नावली
कदकः पु वितानं चांदेया ॥
इति भाषा इति हेमचंद्रः ॥
कदध्वा न पु निंदितपथः तत्
पर्य्यायः व्यध्वः २ दुरध्वः ३ विपथः
४ कापथः ५ इत्यमरः ॥
कदनं क्ली पापं मर्द युद्धे ॥

इति मेदिनी मारणे इति
भूरिप्रयोगः जराचरश्च ॥
कदन्नं क्ली कुत्सितान्ने इति
व्याकरणं ॥
कदंबं क्ली निकुरंबं समूहः इति
मेदिनी ॥
कदंबः पु वृक्षविशेषः कदम
इति भाषा तत्पर्य्यायः नीपः
२ प्रियकः ३ इति प्रियः ४ इत्यमरः
कादंबः ५ इति तट्टीका ॥
षट्पदेष्टः ६ प्रावृषेण्यः ७
हरिप्रियः ८ इति रत्नमाला
हलप्रियः ९ सुरभिः १० ललनाप्रियः
११ कादम्बर्य्यः १२ सीधुपुष्पः १३
महाढ्यः १४ कर्णपूरकः १५ अस्य
गुणाः तिक्तत्वं कटुत्वं कषाय
त्वं वातकफपित्तार्त्ति नाशित्वं
शीतलत्वं शुक्रवर्द्धनत्वं च इति
राजनिर्घंटः अत्र नीपहलिप्रियो
धाराकदम्ब वाचिनावपि कदंब
सामान्यत एवोक्तौ यथा सांकः
नीपो महाकदम्बः स्याद्धाराकदं
ब इत्यपि ह्लिनीपोऽल्पप्रसवश्च
हलप्रियः कदंबकः इत्यस्य भेदः
तथा रत्नेपि हारिद्रस्तबकोवल्लः
धूलीकदंबका धाराकदंबः ध्वनिपर
प्रियः हलप्रियः केशराढ्यः ।

प्रावृषेण्यः कदंबकः नीपो महा
कदम्बोपि तथा बहुफलो मतः
इत्यमरटीकायां भरतः ॥
सर्षपः इति मेदिनी देवताडक
वृक्षः इति रत्नमाला ॥
कदंबकं क्ली समूहः इत्यमरः
कदंबकः पु हरिद्रुः सर्षपः
इति राजनिर्घंटः कदंबवृक्षः
इति शब्दरत्नावली ॥
कदम्बदः पु सर्षपः इति ॥
शब्दचंद्रिका ॥
कदंबपुष्पा स्त्री मुंडितिकावृक्षः
मुंडरी इति भाषा इति रत्नमाला
कदंबपुष्पी स्त्री महाश्रावणिकावृक्षः
मुंडिरी इति भाषा इति ॥
राजनिर्घंटः शब्दचंद्रिका च
कदंबी स्त्री देवदालीलता इति
राजनिर्घंटः ॥
कदरं क्ली पायसभेदः इति
शब्दमाला ॥
कदरः पु श्वेतखदिरः कांथा
बावला इति भाषा तत्पर्य्यायः
सोमवल्कः २ इत्यमरः ॥
कुलशाल्यः ३ खदिरोपमः ४ इति
रत्नमाला क्रकचः करात इति
भाषा व्याधिभेदः कड़ा ॥
ज्ञामुड़ा इति भाषा इति मेदिनी



तस्यलक्षणं शार्करोन्मथिते ॥
यादृच्छेत वा कंटकादिभिः
ग्रस्थिः कोल वडनस्माज्जायते
कदरं तत् इति निदानं ॥
क्रकचः इतिहारावली ॥
कदर्यः त्रि क्षुद्रः कृपणः इत्यम
आत्मानं धर्मकृत्यं च पुत्रदारांश्च
पीडयन् यो लोभात् ॥
संचिनोत्यर्थान् स कदर्य इति
स्मृतः इतिस्मृतिः ॥
कदलः पुं कदलीवृक्षः पृश्नीलता
इतिमेदिनी ॥
कदलकः पुं कदलीवृक्षः इति
शब्दरत्नावली ॥
कदला स्त्री पृश्नी चाकुलिया इति
भाषा डिम्बिकाशाल्मलीवृक्षः
इतिमेदिनी ॥
कदली स्त्री वृक्षविशेषः ॥
कला इति भाषा तत्पर्यायः
वारणबुसा २ रम्भा ३ मोचा ४ ॥
अंशुमत्फला ५ काष्ठीला ६
इत्यमरः कदलः ७ वारणबुषा ८
वारबुषा ९ इतिलद्टीका ॥ ली ॥
सुफला १० सुकुमारा ११ सकृत्फली
१२ गुच्छफला १३ हस्तिविषाणी १४
गुच्छदंतिका १५ निःसारा १६
राजेष्टा १७ बालकप्रिया १८
ऊरुस्तंभा १९ भानुफला २०
वनलक्ष्मीः २१ अस्याः पक्वफल
गुणाः कषायत्वं मधुरत्वं बल
कारित्वं शीतलत्वं पित्तास्र
विमर्दनत्वं गुरुतरत्वं मंदानल
अपथ्यत्वं सद्यः शुक्रविवर्द्धनत्वं
क्लमतृष्णाहरत्वं कांतिदात्वं
दीप्ताग्नौ सुखदत्वं कफामयकरत्वं
संतर्पणत्वं दुर्जरत्वं च मोचक
गुणाः रूक्षत्वं कफकृमिनाशित्वं
कुष्ठप्लीहज्वरहरत्वं अग्निदीपनत्वं
वस्तिशोधनत्वं च अस्यामूल ॥
गुणाः बलकारित्वं वातपित्त
नाशित्वं गुरुत्वं च माणिक्य
मर्त्यामृतचंपकाद्याः भेदाः कदल्या
बहवो वसंति तेषां गुणास्त्वधिका
भवंति निर्दोषता स्याल्लघुताव
तेषां इतिराजनिर्घंटः ॥
चंपकाख्य कदली फल गुणाः
वातपित्तहरत्वं गुरुत्वं शुक्र
वृद्धिकारित्वं अतिशीतलत्वं
रसेपाकेमधुरत्वं च दुर्जरत्वं ॥
तक्कतालसुकेकदले दुर्जरं ॥
इति राजवल्लभः हरिणा ॥
विशेषः पताका इति ॥
मेदिनी करिवैजयंती हारितिः ॥
उपरे निशान इतिभाषा ॥

इतिहलायुधः ॥
कदक्षरं क्ली कुत्सितवर्णः ॥
कदाच कस्मिन् कालेकवेकथन
इतिभाषा इतिव्याकरणं ॥
कदाकारः त्रि कुत्सिताकारः
कदाख्य क्ली कुष्ठवृक्षः कुडइति
भाषातत्पर्यायः कौबेरं २ ॥
कुष्ठं ३ वाप्यं इतिशब्दचंद्रिका
कदाचन अव्य कस्मिन्कालेकोनो
समये इतिभाषा इतिव्याकरणं
कदाचित् अव्य कस्मिंश्चित्काले
तत्पर्यायः जातु २ इत्यमरः ॥
कर्हिचित् ३ इतिहेमचंद्रः ॥
कदुष्णं क्ली ईषदुष्णं तत्पर्यायः
कोष्णं २ कवोष्णं ३ मंदोष्णं ४
तद्वति त्रि इत्यमरः ॥
कद्रथः पुं कुत्सितरथः इति
व्याकरणं ॥
कद्रुः पुं पिंगलवर्णः तद्वति त्रि
इत्यमरः ॥
कद्रुः स्त्री नागमाता इतिमेदिनी
सातु दक्षकन्या कश्यपपत्नी च
इतिपुराणं ॥
कद्रुपुत्रः पुं नागः इति ॥
शब्दचंद्रिका ॥
कद्रुसुतः पुं नागः तत्पर्यायः
काद्रवेयः २ इतिशब्दरत्नावली
कद्रुकालुः ३ कद्रुपुत्रः ४ इति
शब्दचंद्रिका ॥
कद्वदः त्रि कुत्सितवक्ता तत्
पर्यायः गर्ह्यवादी २ इत्यमरः
दुर्वाक् ३ अतिकुत्सितः इति
हेमचंद्रः ॥
कन इ नि दीप्तौ गतौ द्युतौ
इतिकविकल्पद्रुमः
कनकं क्ली स्वर्णं इत्यमरः
कनकः पुं पलाशवृक्षः
नागकेशरवृक्षः धुस्तूरवृक्षः
कांचनालवृक्षः कालीयवृक्षः
चम्पकवृक्षः इतिमेदिनी ॥
कासमर्द्दवृक्षः कृष्णगुग्गुलवृक्षः
इतिराजनिर्घंटः लाक्षातरुः
इतिशब्दमाला ॥
कनकदंडकं क्ली राजछत्रं इति
त्रिकांडशेषः ॥
कनकपलः पुं पलपरिमाणे
तच्च सुवर्णादि परिमाणकषोडश
माषकं तत्पर्यायः कुरुविस्तः २
इतिहारावली ॥
कनकप्रभा स्त्री महाज्योतिष्मती
इतिराजनिर्घंटः ॥
कनकप्रसवा स्त्री स्वर्णकेतकी इति
राजनिर्घंटः ॥
कनकरंभा स्त्री स्वर्णकदली

इतिराजनिर्घण्टः ॥
कनकरसः पुं हरितालं इति राजनिर्घण्टः ॥ (इति
कनककलोद्भवः पुं गलःधूना भाषा इति राजनिर्घण्टः ॥
कनकक्षारः पुं टङ्कणःसोहागा इतिभाषा इतिराजनिर्घण्टः॥
कनकाचलः पुं सुमेरुपर्वतः इति सिद्धान्तशिरोमणिः स्वर्णाचलः मेरुः दानविशेषः इतिस्मृतिः ॥
कनकाध्यक्षः पुं सुवर्णरक्षकः तत्पर्य्यायः भौरिकः २ ॥ इत्यमरः ॥
कनकारकः पुं कोविदारवृक्षः इति राजनिर्घण्टः ॥ (तत्र
कनकालुका स्त्री स्वर्णकलसः पर्य्यायः भृङ्गारः २ इत्यमरः ॥
कनकाह्वं क्ली नागकेशरपुष्पं इतिराजनिर्घण्टः ॥
कनकाह्वयः पुं धुस्तूरवृक्षः इत्यमरः नागकेशरवृक्षः इति शब्दचन्द्रिका ॥ (दुः
कननः त्रि काणः इतिहेमचं
कनिष्ठः त्रि अतियुवा अल्पः पश्चाज्जातः तत्र पर्य्यायः जघन्यजः २ यवीयान् ३ अवरजः ४ अनुजः ५ इत्यमरः कनीयान्
कन्यसः ७ यविष्ठः ८ इतिभरतटीका सारसुन्दरी ॥
कनिष्ठकं क्ली तृणकतृणं इति राजनिर्घण्टः ॥
कनिष्ठा स्त्री दुर्बलाङ्गुलिः कड़े आङ्गुल इति भाषा इत्यमरः मेदिनी कनीयसी धीरादि त्रिलक्षणे द्विधा भेदान्तर्गतनायिकाविशेषः अस्या लक्षणं परिणीतत्वे सति भर्तुर्न्यूनस्नेहा इति रसमञ्जरी
कनी स्त्री कन्या इति हेमचन्द्रः
कनीचिः स्त्री गुंजा कुंच इति भाषा इति शब्दरत्नावली पुष्पयुक्त लता शकटः इत्युणादिकोषः मूर्द्धन्यणमध्योपि पाठः ॥
कनीनिका स्त्री चक्षुस्तारा कनिष्ठाङ्गुलिः इति मेदिनी
कनीनी स्त्री कनिष्ठाङ्गुलिः ॥ इत्यमरटीका ॥
कनीयसं क्ली ताम्रं इतिहेमचन्द्रः
कनीयान् स त्रि अनुजः अतियुवा अत्यल्पः इतिमेदिनी
कन्तुः पुं कामदेवः इति त्रिकाण्डशेषः हृदयं इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
कंथा स्त्री स्यूतकर्पटः कांथा इति भाषा इति स्त्रीलिङ्गसंग्रहे ॥

अमरः मृन्मयभित्तिः कांथ इति भाषा इतिमेदिनी उशीनराख्य जनपद प्रसिद्ध ग्रामाणांनामसु विषयभूतेषु षष्ठ्यन्तात्परा कंथा क्लीवेस्यात् यथासौसमीरा ॥ कंथा सौ सौमिकं च आह्वीना कथा आह्विकंथं इत्यमरः ॥ टीकायां भरतः ॥
कंथारी स्त्री वृक्षविशेषः तत्पर्य्यायः कंथारी २ कंथा ३ कण्टा दुर्द्धर्षा ४ तीक्ष्णाकण्टका ५ तीक्ष्णा ६ क्रूरगंधा ७ दुष्प्रवेशा ८ अस्यागुणाः कटुत्वं तिक्तत्वं ॥ उष्णत्वं कफवातशोषरक्तशोधि ज्वरनाशित्वं दीपनत्वं रुचिकारित्वंच इतिराजनिर्घण्टः ॥
कंदं क्ली पुं सूरणः शस्यमूले इतिमेदिनी शृजने इति ॥ राजनिर्घण्टः ॥
कंदः पुं मेघः इतिमेदिनी ॥ योनिरोगविशेषः तस्यनिदान लक्षणं यथा दिवास्वप्नादति ॥ क्रोधाद्व्यायामादति मैथुनात् क्षताच्च नखदन्ताद्यैर्वातायाः कुपितायदा पूयशोणितसंकाशं लकुचाकृतिसन्निभं उत्पद्यते ॥ पदोयानौ नाम्नाकंदस्तुयोनिजः
सचतुर्विधः वातिकः पैत्तिकः २ श्लैष्मिकः ३ सान्निपातिकश्चेति एषां यथाक्रमं लक्षणानि । रूक्षं विवर्णं स्फुटितं वातिकं तं विनिर्दिशेत् दाहरागज्वरयुतं विद्यात् पित्तात्मकंतु तं नीलपुष्पप्रतीकाशं कंडूमंतं कफात्मकं सर्वलिङ्गसमायुक्तं सन्निपातात्मकं विदुः सन्निपातात्मकोऽसाध्यः शेषाःकृच्छ्रप्रसाधनाः इति माधवकरः
कंदगुडूची स्त्री गुडूचीविशेषः तत्पर्य्यायः कंदोद्भवा २ कंदामृता ३ वक्रच्छिन्ना ४ बहुरुहा ५ पिण्डालुः ६ कंदरोहिणी ७ इतिराजनिर्घण्टः ॥
कंदटं क्ली श्वेतोत्पलं ॥ सादासुंदि इति भाषा इति शब्दरत्नावली ॥
कंदफला स्त्री इन्द्रकारवल्ली इतिराजनिर्घण्टः ॥
कंदमूलं क्ली मूलकं इति राजनिर्घण्टः ॥
कंदरं क्ली आर्द्रकं इति ॥ राजनिर्घण्टः ॥
कंदरः पुं स्त्री गुहा इति ॥ मेदिनी कृत्रिमोऽकृत्रिमो वा ॥

सजलो निर्जलो वा गुहाकारो॥
गिरिनितंबदेशः इतिभरतः॥
तत्पर्य्यायः दरी २ कंदरा ३॥
इत्यमरकंदरी ४ इति ॥
पंजिका दरः ५ इति स्वामी
कंदरः पु अंकुशः इति॥
मेदिनी॥
कंदरा स्त्री गुहा इत्यमरः॥
कंदराकरः पु पर्वतः इति
हारावली॥
कंदरालः पु गर्दभांडवृक्षः
प्लक्षवृक्षः इतिमेदिनी॥
अक्षोटवृक्षः इतिराजनिर्घंटः
कंदरालकः पु प्लक्षवृक्षः इति
शब्दरत्नावली॥
कंदरी स्त्री गुहा इत्यमरः॥
कंदरोद्भवा स्त्री लघुपाषाण
भेदीवृक्षः इति राजनिर्घंटः
कंदर्पः पु कामदेवः॥
इत्यमरः॥
कंदर्पकूपः पु योनिः इति॥
जटाधरः॥
कंदर्पजीवः पु कामवृद्धिनाम
वृक्षः इति राजनिर्घंटः॥
कंदर्पमुषलः पु लिंगः इति
त्रिकांडशेषः॥
कंदर्पशृंखलः पु स्त्रेगारबंध

विशेषः तस्य लक्षणं नारी॥
पदद्वयं स्यात्प्रकांतस्योरुद्वयोपरि
कटिं वेष्टयेदाम्य बंधः॥
कंदर्पशृंखल इतिरतिमंजरी॥
कंदलं त्रि कपालः उपरागः॥
नवांकुरः कलध्वनिः इति॥
मेदिनी अपवादः इति
शब्दरत्नावली॥
कंदलः पु कनकं युद्धं॥
कपालः इति धरणी
कंदलता स्त्री मालाकंदः इति
राजनिर्घंटः॥
कंदली स्त्री मृगविशेषः यस्य
चर्मप्रावद्रियते गुल्मप्रभेदः॥
कदलीइति मेदिनीपताका॥
इतित्रिकांडशेषः पद्मबीजं॥
इतिराजनिर्घंटः॥
कंदली कुसुमं स्त्री शिलींध्रे॥
इतिजटाधरः॥
कंदवर्द्धनः पु सूरणः इति
राजनिर्घंटः॥
कंदवल्ली स्त्री वंध्याकर्कोटकी
इतिराजनिर्घंटः॥
कंदबहुला स्त्री त्रिपर्णिकाइति
राजनिर्घंटः [illegible]
कंदसूरणः पु लशुनः इति॥
राजनिर्घंटः॥

कंदसंज्ञे क्ली योनिरक्रोगा॥
विशेषः तत्पर्य्यायः योन्यर्शः
२ इति त्रिकांडशेषः तस्य॥
निदानादिकं शब्दे द्रष्टव्यं॥
कंदसारं क्ली नंदनवने इति
त्रिकांडशेषः॥
कंदाढ्यः पु धरणीकंदः इति
राजनिर्घंटः॥
कंदार्हः पु सूरणः इति॥
राजनिर्घंटः॥ (हः
कंदालुः पु कासालुः धरणीकं
त्रिपर्णिका इतिराजनिर्घंटः
कंदरी स्त्री लज्जालुवृक्षः इति
वैद्यकं॥
ने
कंदी पु सूरणः इति॥
राजनिर्घंटः
कंदुः पु स्त्री लोहमयपाक॥
पात्र ताम्रया इति लोहताला हता
इतिच भाषा तत्पर्य्यायः॥
स्वेदनी २ इत्यमरः॥
कंदुकः पु गेंडुकः गेंडु इति॥
भाषा इत्यमरः॥ (ना
कंदुपक्वं क्ली जलोपसेकं विना
केवलपात्रे यत् वह्निनापक्वं भृष्ट
तंडुलादि यथा कंदुपक्वानि
तैलेन पायस दधि शाकवः॥

द्विजैरेतानि भोज्यानि शूद्रगेह
कृतान्यपि इतितिथ्यादितत्वे
कूर्मपुराणं॥
कंदोटं क्ली नीलोत्पले इति
शब्दरत्नावली॥
कंदोटः पु मुक्तोत्पले इति
शब्दरत्नावली॥
कंदोतः पु कुमुदे इति॥
त्रिकांडशेषः॥
कंधः पु मेघः इति॥
शब्दरत्नावली॥
कंधरः पु मेघः इतिमेदिनी
मारिषवृक्षः इतिराजनिर्घंटः
ग्रीवा इत्यमरटीका सारसुंदरी
कंधरा स्त्री ग्रीवा इत्यमरः॥
कंधिः स्त्री ग्रीवा समुद्रे पु॥
इतिराजनिर्घंटः॥
कंत्रे क्ली घातके मूर्छा इति
शब्दमाला कल्प मितिच पाठः
कन्यका स्त्री कुमारी इति॥
त्रिकांडशेषः यथा अष्टवर्षा
भवेद्गौरी नववर्षा च रोहिणी
दशमे कन्यका प्रोक्ता अतऊर्द्धं
रजस्वला इति स्मृतिः॥
कन्यकाजातः पु स्त्रीअविवाहिता
पुत्रः तत्पर्य्यायः कानीनः २
इत्यमरः॥

कन्याकापतिः पुं जामाता इति
शब्दरत्नावली॥
कन्यसः पुं कनिष्ठभ्राता ॥
इत्यमरटीकायां सारसुंदरी ॥
कन्यासा स्त्री कनिष्ठभगिनी ॥
इत्यमरटीका ॥
कन्या स्त्री कुमारी इत्यमरः ॥
सा तु दशमवर्षीया इति स्मृतिः
नारी तुषधीविशेषः घृतकुमा
री इति ख्याता इति मेदिनी ॥
स्थूलैला वाराही केदः वंध्या
कर्कोटकी इति राजनिर्घंटः
मेषादिद्वादशराश्यंतर्गत॥
षष्ठराशिः सा तु उत्तरफल्गुनी
शेषपादत्रय हस्तासमुदायचित्रा
प्रथमार्द्धेन भवति तदधि
ष्ठातृदेवतायाः स्वरूपं यथा जले
नौकास्थ शस्याग्निधारिणी स्त्री इति
दीपिकाग्निपिचयोर्द्धियात्
स्त्री द्वितनुर्यामा भूमि शामकृत्
शीतसौमादयत्नाकन्याद्विशब्दशुभ
भूमिवैश्यरूक्षात्वसंगमप्रसवा
शुभाव इति नीलकंठीताजकः॥
मतांतरे सा तु पृष्ठोदया ॥
दिनबला पिंगलवर्णा दक्षिण
दिक्स्वामिनी वायुप्रकृतिः
शीतलस्वभावा मृदुभूमिचरा

वैश्यवरूला स्पयोगा ॥
खंडत शब्दा अल्पसंताना अल्प
पुं सेगाव तत्र जातफलं ॥
वेदशास्त्रविद्यावान् स्थानरोषे
खेदितः भार्यायासदाविरस्य
इति ज्योतिषे जन्मकालीन॥
चेद्राश्रिते तद्राशिफलं भवति
गेशाधिनिश्रमदराजनप्रबलकेलि
विलासकुतूहलैः विमलशील
सुताजननोत्सवैः सुविधिना
विधिना सहितः पुमान् इति
कोष्ठीप्रदीपः तस्या उदये॥
तस्यामेक लग्ने भवति तस्यमाणात
शास्त्रपरिमाणे दशांगुलाधिक
पंचांगुल प्रभेदेश वतेमानेन
विज्ञायतांपश ऊनत्रिशत् ॥
पलाधिकपंचदेशः इति ज्योतिषे
तत्र जातफलं कन्यालग्ने जो
मर्त्यो नानाशास्त्रविशारदः
सौभाग्यगुणसंपन्नः सुंदरः सुरत
प्रियः इति कोष्ठीप्रदीपः ॥
कन्याका स्त्री कुमारी इति
शब्दरत्नावली ॥
कन्याकुब्जः पुं कान्यकुब्जदेशः
इति हेमचंद्रः ॥
कन्याटः पुं वासगृहं इति
त्रिकांडशेषः ॥

कन्यापितिः पुं जामाता इति॥
जटाधरः ॥
कन्यापालः पुं पालवणिक
शूद्रजातिविशेषः इति॥
त्रिकांडशेषः
कन्यारामः पुं बुद्धभेदः इति
त्रिकांडशेषः ॥
कनिका स्त्री कन्यका इति
शब्दरत्नावली ॥ (पोष्का
कन्दुषं क्ली हस्तपुष्टः हातेर
इति भाषा इति हारावली ॥
कपवलते सौत्रधातुरयं ॥
इति कविकल्पद्रुमः॥
कप इ उ सेचलने इति ॥
कविकल्पद्रुमः ॥ (हारः
कपटः पुं क्ली अपधार्थिनव
प्रतारणा तत्पर्यायः व्याजः २
दंभः ३ उपधिः ४ छद्म ५ कैतवं
६ इत्यमरः ॥
कपटिकः त्रि कपटविशिष्टः
इति शब्दरत्नावली॥ (सं)
कपटिनी स्त्री चीडानामगंधद्रव्य
इति राजनिर्घंटः ॥
कपटी स्त्री परिमाणविशेषः
एकआकाडु इति भाषा इति
शब्दरत्नावली ॥
कपटी त्रि कपटविशिष्टः॥

कपटधारी इति शब्दरत्नावली
कपटेश्वरी स्त्री श्वेतकंटकारी
इति राजनिर्घंटः ॥
कपर्दः पुं शिवजटा इत्यमरः
वराटकः इति मेदिनी ॥
कपर्दकः पुं शिवस्यजटाजूटः
वराटकः कडि इति भाषा इति
मेदिनी शेषस्यपर्यायः वराटः
२ कपर्दः ३ वराटिका ४ चराचर
५ चरः ६ वर्ज्यः ७ बालक्रीडकः ८
अस्यगुणाः कटुत्वं तिक्तत्वं
उष्णत्वं कर्णशूल व्रण गुल्मशूल
नेत्रदोषनाशित्वंच तस्यभेदाः
स्वर्णवर्णसिंही १ धूम्रवर्णाव्याघ्री
२ पीतपृष्ठासितोदरा मृगी ३
श्वेतवर्णा हंसी ४ नातिदीर्घिका
विदेता ५ इति राजनिर्घंटः॥
न
कपर्दी पुं शिवः इत्यमरः॥
कपाटं त्रि स्वनामख्यात ॥
द्वाराच्छादककाष्ठादि तत्पर्यायः
अररं २ इत्यमर कवाटः ३
कपाटी ४ कवाटी ५ अररी ६
अररिः ७ इति टीका ॥
कपालः पुं क्ली शिरोऽस्थि॥
माथारखुलि इति भाषा तत्
पर्यायः कर्परः २ इत्यमरः ॥

घटादेः खंडे खापरा खोला शब्दचंद्रिका ॥

इत्यादिभाषा समूहः इति मेदिनी कुष्ठरोगविशेषः इति हेमचंद्रः तस्य लक्षणं यथा कृष्णारुणकपालभं यद्रूक्षं परुषं तनु कापालं तोदबहुलं तत् कुष्ठं विषमं स्मृतं ॥ इति ॥ माधवकरः ॥

कपालनालिका स्त्री तर्कुः टेको इति भाषा इति त्रिकांडशेषः ॥

कपालभृत् पुं शिवः इत्यमरः

कपालिका स्त्री दंतरोगविशेषः तस्य लक्षणं कपालेष्विव ॥ दीर्यंते सदंतानां सच शर्करा कपालिकेति पठिता सदा दंतविनाशिनी इति माधवकरः

कपालिनी स्त्री दुर्गा इति ॥ हेमचंद्रः ॥

कपाली [न्] पुं महादेवः इति हलायुधः स्वनामख्यातजातिविशेषः स च ब्राह्मणकन्यायां तीवराज्जातः इति पराशर ॥ पद्धतिः ॥

कपिः पुं वानरः इत्यमरः ॥ सिह्लकः मधुसूदनः इति मेदिनी धात्रिका इति शब्दमाला करंजभेदः इति ॥

कपिकच्छुः स्त्री वृक्षविशेषः आलकुशी इति भाषा तत्पर्यायः आत्मगुप्ता २ जडा ३ अव्यंडा ४ कंडूरा ५ प्रावृषायणी ६ ऋष्यप्रोक्ता ७ शूकशिम्बिः ८ मर्कटी ९ इत्यमरः स्वगुप्ता १० अजहा ११ कंडुरा १२ प्रावृषायिणी १३ प्रावृषा १४ शूकशिम्बी १५ शूकशिम्बा १६ कपिकच्छुः १७ इति भरतः स्वयंगुप्ता १८ महर्षभी १९ लांगली २० कंडुली २१ चंडा २२ दुरभिग्रहा २३ कपिरोमफला २४ गुप्ता २५ दुःस्पर्शा २६ अजडा २७ प्रावृषेण्या २८ वहरी २९ गुरुः ३० आर्षभी ३१ शिंबी ३२ वराहिका ३३ तीक्ष्णा ३४ रोमालुः वनशूकरी ३६ कीशरोमा ३७ रोमवल्ली ३८ अस्या गुणाः स्वादुरसत्वं शुक्रवृद्धिकारित्वं वातक्षयपित्तास्रविहत व्रणनाशित्वंच शीतत्वंच तस्या बीजगुणाः वातशमनत्वं परम॥ वाजीकरत्वंच इतिराजनिर्घंटः

कपिकच्छुफलोपमा स्त्री जतुका लता इतिराजनिर्घंटः ॥

कपिकच्छुरा स्त्री कपिकच्छुः इति

शब्दमाला ॥

कपिकंदुकं क्ली शिरोऽस्थि ॥ माताखुलि इति भाषा इति शब्दचंद्रिका ॥

कपिका स्त्री नीलसिंधुवारवृक्षः इतिराजनिर्घंटः

कपिकोलिः पुं कोलिविशेषः शियाकुल इतिभाषा इति रत्नमाला ॥

कपिचूडा स्त्री आम्रातकवृक्षः इतिराजनिर्घंटः ॥

कपिचूतः पुं आम्रातकवृक्षः इतित्रिकांडशेषः ॥

कपिजः पुं तुरुष्कः शिलारस इतिभाषा इतिराजनिर्घंटः ॥

कपिजंघिका स्त्री तैलपिपीलिका इतिराजनिर्घंटः ॥

कपिंजलः पुं चातकपक्षी ॥ तन्मांसगुणाः लघुत्वं शीतत्वं कफरक्तपित्तनाशित्वं ॥ अग्निदातृत्वंच इतिराजवल्लभः पक्षिविशेषः तत्पर्यायः ॥ तेजलः २ तन्मांसे ॥ शुक्रवृद्धिकरत्वं इतिराजनिर्घंटः तित्तिरपक्षी इतित्रिकांडशेषः

कपितैलं क्ली तुरुष्कनामगंधद्रव्यं इति भावप्रकाशः ॥

कपित्थः पुं वृक्षविशेषः कतवेल इति भाषा तत्पर्यायः दधित्थः २ ग्राही ३ मन्मथः ४ दधिफलः ५ पुष्पफलः ६ दंतशठः ७ इत्यमरः कपित्थः ८ इतिभरतः ॥ मालूरः ९ मंगल्यः १० नीलमल्लिका ११ ग्राहिफलः १२ चिरपाकी १३ ग्रंथिफलः १४ कुचफलः १५ कपिष्टः १६ गंधफलः १७ दंतफलः १८ करभवल्लभः १९ कठिनफलः २० करंजफलकः २१ अस्यामफलगुणाः अम्लत्वं उष्णत्वं कफनाशित्वं ग्राहित्वं वातवर्द्धकत्वं ॥ कंठरोगजिह्वाधिकजडताकारित्वं त्रिदोषवर्द्धकत्वं विषहरत्वं ॥ रोचकत्वंच तस्य पक्वफलगुणाः दोषत्रयहरत्वं मधुराम्लरसत्वं ॥ गुरुत्वं श्वासवमिश्रमक्लम हरत्वं हिक्कापनोदत्वं ॥ ग्राहित्वं रुचिप्रदत्वं । ततः सर्वदासेव्य इतिराजनिर्घंटः कपित्थमामं कंठघ्नं विषदं ग्राहि वातलं मधुराम्लकषायत्वात् सौगंध्याच्च रुचिप्रदं इति राजवल्लभः ॥

कपित्थत्वक् क्ली पल्लवालके इति राजनिर्घंटः ॥




कपित्थपर्णी स्त्री वृक्षविशेषः
कपित्थानीतिख्याता तत्पर्य्यायः
विरजा २ सुरसा ३ चित्रपत्रिका
४ इतिरत्नमाला॥
कपित्थास्यः पुं वानरविशेषः
तत्पर्य्यायः गोलांगूल २ ॥
दधिशोणः ३ नगाटनः ४ इति
त्रिकांडशेषः॥
कपिध्वजः पुं अर्जुनः इति
त्रिकांडशेषः
कपिनामा पुं सिल्हकः इति
रत्नमाला॥ (र्गः
कपिपिप्पली स्त्री रक्तापामा
इति वैद्यके सूर्य्यावर्त्तवृक्षः
इतिरत्नमाला
कपिप्रभा स्त्री कपिकच्छुः इति
शब्दरत्नावली
कपिप्रभुः पुं रघुनाथ इति॥
शब्दरत्नावली॥
कपिप्रियः पुं आम्रातकः इति
राजनिर्घंटः कपित्थः इति।
जटाधरः॥
कपिरथः पुं श्रीरामः इति॥
शब्दरत्नावली
कपिलः पुं मुनिविशेषः॥
सतत्त्वज्ञानभक्तिसांख्ययोगप्रचार
श्रीभगवदवतारः कर्दमप्रजापते

रौरसाद्देवहूति गर्भजातः॥
इति श्रीभागवते अग्निः॥
कुक्कुरः इति हेमचंद्रः॥
सिल्हकनामगंधद्रव्यं इति॥
रत्नमालापिंगलवर्णः तद्युक्ते
त्रि इत्यमरः नीलपीतः॥
कपिलः इतिभरतः कपिलो
रोचनाकवि रित्यन्ये इति
भरतः
कपिलद्युतिः पुं सूर्य्यः इति
शब्दचंद्रिका॥
कपिद्राक्षा स्त्री द्राक्षाविशेष
तत्पर्य्यायः मृद्वीका २ गोस्तनी
३ कपिलफला ४ अमृतरसा ५
दीर्घफला ६ मधुवल्ली ७ मधुफला
८ मधुली ९ हरिता १० हारहूरा
११ सुफला १२ मृद्वी १३ हिमोत्तरा
१४ पथ्यिका १५ हैमवती १६
शतवीर्य्या १७ काश्मरी १८
अस्या गुणाः मधुरत्वं शीतत्वं
लघुत्वं मद हर्ष दातृत्वं दाह॥
मूर्छा ज्वर श्वास तृष्णा हृल्लास
नाशित्वंच इतिराजनिर्घंटः॥
कपिलद्रुमः पुं कालीनामसुगंधि
काष्ठे इतिशब्दचंद्रिका॥
कपिलधारा स्त्री स्वर्णदी तीर्थभेदः
इतिहेमचंद्रः॥

कपिलशिंशपा स्त्री शिंशपावृक्ष
विशेषः तत्पर्य्यायः कपिला २
पीता ३ सारिणी ४ कपिलाक्षी ५
भस्मगर्भा ६ कुशिंशपा ७ अस्या
गुणाः तिक्तत्वं शीतवीर्य्यत्वं ॥
आमयवात पित्तज्वर छर्दिहिक्का
नाशित्वंच इतिराजनिर्घंटः॥
कपिला स्त्री पुंडरीकनामदिग्गज
पत्नी भस्मगर्भा शिंशपा रेणुका॥
नामगंधद्रव्यं इत्यमरः॥
गोविशेषः इति हेमचंद्रः॥
सा तु स्वर्णवर्णा इति पुराणं॥
शूद्रकन्या शिंशपा राजरीतिः
इति राजनिर्घंटः॥
कपिलाश्वः पुं इंद्रः इति॥
त्रिकांडशेषः॥
कपिलाक्षी स्त्री मृगेर्वारुः॥
कपिलशिंशपा इति राजनिर्घंटः
कपिलोमफला स्त्री कपिकच्छुः
इति राजनिर्घंटः॥
कपिलोमा स्त्री रेणुका इति
राजनिर्घंटः॥
कपिलोहं क्ली पित्तलं इति
हेमचंद्रः॥
कपिलिका स्त्री गजपिप्पली इति
रत्नमाला
कपिवक्त्रः पुं नारदः इति॥

त्रिकांडशेषः॥
कपिवल्ली स्त्री गजपिप्पली
इत्यमरः॥
कपिशः पुं शावः कृष्णपीत
मिश्रितवर्णः तद्युक्ते त्रि॥
इत्यमरः सिल्हकनामगंधद्रव्ये
इतिमेदिनी॥
कपिशांजनः पुं शिवः इति
त्रिकांडशेषः॥
कपिशापुत्रः पुं पिशाचः इति
शब्दमाला॥
कपिशी स्त्री माधवी मदिरा॥
इतिमेदिनी जटाधरश्च॥
कपिशीका स्त्री मदिरा इति
त्रिकांडशेषः॥
कपिशीर्षं क्ली प्राकाराग्रे तत्
पर्य्यायः खोडकशीर्षकं २
कपशीर्षं ३ इतित्रिकांडशेषः
कपिशीर्षकं क्ली हिंगुलं इति
शब्दचंद्रिका॥
कपीकच्छुः पुं कपिकच्छुः इति
शब्दरत्नावली॥
कपीज्यः पुं क्षीरिकावृक्षः
इति जटाधरः॥
कपीतनः पुं श्वेतबुह्नावृक्षः इति
रत्नमाला
कपीतनः पुं आम्रातकवृक्षः॥



गर्द्दभाण्डवृक्षः शिरीषवृक्षः ॥
इत्यमरः अश्वत्थवृक्षः इति
मेदिनी गुवाकवृक्षः बिल्ववृक्षः
इति शब्दरत्नावली ॥
कपीन्द्रः पुं हनूमान् इति ॥
शब्दरत्नावली ॥
कपीष्टः पुं राजदनीवृक्षः
कपित्थः इति राजनिर्घण्टः ॥
कपोतः पुं गृहकपोतः ॥
पायरा इति भाषा तत्पर्यायः
कलवः इति भाषा तत्पर्यायः
कलरवः २ पारावतः ३ इत्यमरः
पारावतः ४ कपः ५ रक्तलोचनः
६ इति भरतः गृहकुक्कुटः ७
यथा मार्जार इति ते दुःखं ॥
याह प्रगृहकुक्कुटे इति प्रयोगात्
इति सारसुन्दरी वनकपोतः
घुघु इति भाषा तत्पर्य्यायः ॥
चित्रकण्ठः २ इति मेदिनी ॥
काकदेवः ३ धूम्रः ४ धूम्रलोचनः
५ दहनः ६ अग्निसहायः ७ भीष
णः ८ गृहनाशनः ९ तन्मांसगुणाः
वीर्य्यवल्लहितकारित्वं स्वादुत्वं
कफपित्तास्त्रनाशित्वं च इति
राजनिर्घण्टः मधुरत्वं शीतत्वं ॥
कषायत्वं वातपित्तनाशित्वं ॥
सार्षपतैल भर्जनेन विरुद्धत्वंच
इति राजवल्लभः ॥

कपोतकं क्ली सौवीराञ्जने ॥
इति राजनिर्घण्टः ॥ (द्रव्ये
कपोतचरणा स्त्री नलीनामगन्ध
इति जटाधरः ॥
कपोतपालिका स्त्री विटङ्कः
सौधादिषु पोतकाष्ठादिरचितपक्षि
स्थाने पायरार घोप इति ॥
भाषा इत्यमरः ॥ (का
कपोतपाली स्त्री कपोतपालि
इति हलायुधः ॥
इति हलायुधः ॥
कपोतवङ्का स्त्री ब्राह्मीवृक्षः
इति राजनिर्घण्टः ॥
कपोतवर्णी स्त्री सूक्ष्मैला इति
राजनिर्घण्टः ॥
कपोतवाणा स्त्री नलिकानाम
गन्धद्रव्ये इति राजनिर्घण्टः ॥
कपोतसारं क्ली स्रोतोञ्जने
इति राजनिर्घण्टः ॥
कपोताङ्घ्रिः स्त्री नलीनाम
गन्धद्रव्ये इत्यमरः ॥
कपोताभः पुं कपोतवर्णः
इति हेमचन्द्रः ॥
कपोतारिः पुं श्येनपक्षी इति
शब्दरत्नावली ॥
कपोलः पुं सृक्कनिर्ण्यकसन्निधि
भागः गाल इति भाषा तत् ॥
पर्य्यायः गण्डः २ इत्यमरः ॥

बलः ३ इति राजनिर्घण्टः ॥
कफः पुं शरीरस्थधातुविशेषः
तत्पर्य्यायः श्लेष्मा २ सेचातः ३
सौम्यधातुः ४ घनः ५ बली ६
अस्य गुणाः गुरुत्वं स्थैर्य ॥
विश्लेषकारित्वं मृदुत्वं प्रमर्दनत्वं
स्निग्धत्वं कठत्वं शीतत्वं ॥
जडताकारित्वं शुक्लत्वं शीते
वसन्ते निशामुखे पूर्वाह्णे भुक्ते च
प्रकोपनत्वं इति राजनिर्घण्टः ॥
अस्य प्रकोपहेतुः गुरुमधुर ॥
रसातिस्निग्धदुग्धेक्षुद्रवदधि
दिननिद्रा पूपसर्पिः प्रपूरैः तुहिन
पतनकाले श्लेष्मणः संप्रकोपः
प्रभवति दिवसादौ भुक्तमात्रे ॥
वसन्ते तस्य कर्माणि ॥
श्लैमित्यं मधुरास्यता शिशिरता
प्रोत्सेको प्रसेको मल प्राचुर्य्यं ॥
स्थैरता रसश्च लवणः कटू ॥
शीतस्वप्नता आलस्यं विस्फारिता
कठिनता शोथारुचि स्निग्धता
तन्द्रा नस्पृष्टदेहकास गुरुता ॥
एताः कफोत्था रुजः अस्य ॥
प्रशामनताकारणे गुरुशी मृदु ॥ (ला
स्निग्धमधुर स्थिरपिच्छिलाः श्लेष्म
प्रशमेयान्ति विपरीतगुणैर्गुणाः ॥
रूक्ष क्षार कषाय तिक्त कटुक ॥

व्यायाम निष्ठीवन स्त्री सेवोध्व
निशुद्ध जागर रति क्रीडा ॥
पदाघातने धूमाम्बुस्त्र शिरो
विरेक वमन स्वेदपनाहादिके
पानाहार भेषज मिदं ॥
श्लेष्माणमुग्रं जयेत सच ॥
पंचविधोयथा अवलंबकक्लेदक
क्लेदकः रसकोपरः बोधक
स्तर्पकश्चेति श्लेष्मा पंचविधः स्मृतः
एतेषां लक्षणानि यथा ॥
कफधाम्नां तु श्लेष्माणां यत्
करोत्यवलंबनं ततो ऽवलंबका
ख्याति श्लेष्माआमान्तरः स्थितः
१ आमाशयाश्रितः सोऽन्न ॥
क्लेदनात् क्लेदकः स्मृतः रसक
श्लेषणात् सन्धेः सकलसन्ध्यावस्थितः
३ रसनावस्थित स्वेष बोधको
रसबोधनात् ४ शिरसिप्रस्थित
श्लेष्मा तर्पको नेत्रतर्पणा ५
अस्य स्थानानि उरः कण्ठ शिरः
क्लोमपर्वाण्यामाशयो रसः मेदो
घ्राणंच जिह्वाच कफस्थाना मुरःपरे
तत् प्रकृतिकस्य लक्षणं ॥
गंभीर बुद्धिः स्थूलाङ्गः स्निग्धकेशो
महाबलः स्वप्ने जलाशयालोकी
श्लेष्मप्रकृतिको नरः तस्य ॥
विकृतस्य कर्म स्नेहो बंधः ॥

स्थिरत्वेच गौरवं हृष्टतावलं ॥
तमाभूति श्लेष्म कफ ॥
कर्माविकारजं इति
सुखबोधः फेनःयथाम्रव्धिकफः
इत्यादि ॥
कफकूर्चिका स्त्री लालालात्
थुतु सिकुलि इत्यादि भाषा तत्
पर्य्यायः स्तणीका २ स्यंदनी ३
लाला ४ आस्यासवः ५ इति
हेमचंद्रः
कफघ्नी स्त्री हस्तुषाभेदः इति
राजनिर्घंटः ॥
कफाणिः पुं स्त्री कफोणिः इति
हेमचंद्रः ॥
कफवर्द्धनः पुं पिंडीतगरवृक्षः
इति त्रिकांडशेषः श्लेष्मवृद्धि॥
कारके त्रि [illegible] इति वैद्यकं ॥
कफविरोधि क्ली मरिचे इति
राजनिर्घंटः ॥
कफोलकः पुं बर्बूरवृक्षः इति
राजनिर्घंटः ॥
कफारिः पुं शुंठी इति ॥
राजनिर्घंटः ॥ (ग्रः
कफी त्रि श्लेष्मयुक्तः तत्पर्य्या
श्लेष्मलः २ श्लेष्मणः ३ इत्यमरः
गजे पुं इति सारस्वतः ॥
कफेलूः त्रि कफायुक्तः इति

सिद्धांतकौमुद्या सुगणादिवृत्तिः
कफोणिः पुं भुजमध्यग्रंथिः ॥
कनुइ इतिभाषा तत्पर्य्यायः
कूर्परः २ इत्यमरः
कव ञरङ स्तौतो वर्णे इति
कविकल्पद्रुमः ॥
कबंधं क्ली जले इत्यमरः ॥
कबंधः पुं राहुः रक्षोविशेषः
उदरे इतिमेदिनी ॥ (मूर्द्ध
कबंधः पुं क्ली क्रियायुक्तापकलेवरं इत्यमरः यथा ॥
कबंधाश्छिन्न शिरसः खड्गशक्त्यृष्टि
पाणयः इति देवीमाहात्म्ये ॥
अपिच नागानां मयुत ॥
तुरंगनियुतं सार्द्धरथानांशते
पत्तीनांदशकोटयोनिपतिता
एकःकबंधोरणे तादृक्कोटि
कबंध नर्त्तनविधौ खेलत्खेलत
खेचिण श्यां कोटि निपातने
रघुपतेः कोदंडघंटारवः इति।
प्राचीनाः ॥
कपित्थः पुं कपित्थवृक्षः ॥
इत्यमरटीका कपित्थः ॥
इत्यमरमालायां यादवः ॥
कविलः पुं कपिलवर्णः इति
भरतोद्धिरूपकोषश्च ॥
कम उ कड स्पृहि इति ॥

कविकल्पद्रुमः ॥
कम उ ङ कांतौ इति ॥
कविकल्पद्रुमः ॥
कम् अव्ययं जले शिरः सुखे ॥
मंगले पादपूरणे इति ॥
शब्दरत्नावली ॥
कमठं क्ली भांडभेदः तत्तु ॥
मुनीनां जलपात्रे इतिमेदिनी
कमठः पुं कच्छपः इत्यमरः ॥
वंशः २ इति शब्दरत्नावली ॥
दैत्यविशेषः मुनिभाजने ॥
इति हेमचंद्रः शल्लकी इति ॥
धरणी ॥
कमठी स्त्री कच्छपी इत्यमरः
कमंडलुः पुं क्ली संन्यासिनां
मृत्काष्ठादिमयपात्रे तत्पर्य्यायः
कुंडी २ इत्यमरः करकः ३
लक्षवृक्ष इतिमेदिनी ॥
कमंडलुतरुः पुं लक्षवृक्षः
इतिरत्नमाला ॥
कमनं त्रि कामुके अभिरूपे
इतिमेदिनी ॥ (ह्मः
कमनः पुं कामः अशोके
इति मेदिनी ब्रह्मा इति ॥
हेमचंद्रः ॥
कमनच्छदः पुं कंकपक्षी इति
हेमचंद्रः ॥

कमनीयं त्रि कामनायोग्ये तत्
पर्य्यायः चारु २ हारि ३ रुचिरं
४ मनोहरं ५ वल्गु ६ कांतं ७
अभिरामं ८ बंधुरं ९ वामं १० ॥
रुच्यं ११ सुषमं १२ शोभनं १३
मंजु १४ मंजुलं १५ मनोरमं १६
साधु १७ रम्यं १८ मनोज्ञं १९
पेशलं २० ह्रद्यं २१ सुंदरं २२
काम्यं २३ कम्रं २४ २५ ॥
मधुरं २६ प्रियं २७ इति ॥
हेमचंद्रः ॥
कमंधं क्ली कबंधं जले ॥
इत्यमरटीकायां रायमुकुटः
कमरः त्रि कामी इत्युणादिकोषः
कमलं क्ली जलजपुष्पविशेषः
तत्पर्य्यायः पद्मं २ पाथोजं ॥
२ नलं ३ नलिनं ४ अंभोजं ५
अंबुजन्म ६ अंबुजं ७ श्रीः ८
अंबुरुहं ९ अंबुपद्मं १० सुजलं ११
अंभोरुहं १२ सारसं १३ पंकजं
१४ सरसीरुहं १५ कुटपं १६ ॥
पाथोरुहं १७ पुष्करं १८ वार्जं
१९ तामरसं २० कुशेशयं २१
कंजं २२ कजं २३ अरविंदं २४
शतपत्रं २५ बिसकुसुमं २६
सहस्रपत्रं २७ महोत्पलं २८
वारिरुहं २९ सरसिजं ३०



सलिलजं ३१ पंकेरुहं ३२ राजीवं
३३ अस्य गुणाः शीतलत्वं ॥
स्वादुत्वं रक्तपित्तश्रमार्त्तिनाशित्वं
सुगंधित्वं भ्रांतिसंतापशांति ॥
परमतृप्ति कारित्वंच इति॥
राजनिर्घंटः जले ॥
ताम्रे क्लोम औषधे इति॥
मेदिनी सारसपक्षी इत्यमरः
कमलः पुं मृगविशेषः इति
मेदिनी ॥
कमला स्त्री लक्ष्मीः वरस्त्री इति
मेदिनी ॥
कमलासनः पुं ब्रह्मा इत्यमरः
कमलिनी स्त्री पद्मिनी पद्माकरः
इति शब्दरत्नावली
कमलोत्तरं क्ली कुसुंभपुष्पं
इत्यमरः ॥
कमा स्त्री शोभा इति ॥
राजनिर्घंटः ॥
कमिता स्त्र त्रि कामुकः इत्यमरः
कंपः पुं गात्रादिचलने तत्
पर्य्यायः वेपथुः २ इत्यमरः
वेपनं ३ वेपः ४ कंपनं ५ इति
राजनिर्घंटः ॥
कंपनं त्रि कंपयुक्तः कांपन्या
इति भाषा तत्पर्य्यायः चलनं॥
२ कंप्र ३ चलं ४ लोलं ५॥


चलाचलं ६ चंचलं ७ तरलं ८
पारिप्लवं ९ परिप्लवं १० इत्यमरः
चपलं ११ चटुलं १२ इति ॥
तट्टीका कंप्र क्ली इति ॥
मेदिनी ॥
कंपनः पुं शिशिरऋतुः इति
राजनिर्घंटः ॥
कम्पलक्ष्मा २ पुं वायुः इति
शब्दरत्नावली ॥
कंपाकः पुं वायुः इति ॥
हेमचंद्रः ॥
कंपितं क्ली चलनं तत्पर्यायः
कंपनं २ कंपः ३ वेपनं ४
वेपथुः ५ इति शब्दरत्नावली
कंपयुक्ते त्रि ॥
कंपिलः पुं रोचनी कमलागुडि
इति भाषा तस्य रूपांतराणि
कांपिलः कम्पिलः कम्पीलः
कम्पिल्यः इत्यमरटीकायां
मुकुटादयः ॥
कंपिलकः पुं वृक्षविशेषः
कमिला इति देशांतरभाषा
तत्पर्य्यायः रक्ताङ्गः २ रेची ३
रेचनकः ४ रंजकः ५ लोहिताङ्गः
६ कंपिलः ७ रक्तचूर्णकः ८
तस्य गुणाः विरेचकत्वं कटुत्वं
उष्णत्वं व्रण कफ कास नेत्र क्रिमि

नाशित्वं लघुत्वंच इति ॥
राजनिर्घंटः ॥
कंयुः त्रि कंयुक्तः कंयान्वितः
इत्यमरः ॥
कंव गतौ इति कविकल्पद्रुमः
कंवरः पुं चित्रवर्णः कर्बुरवर्णः
तद्वति त्रि इति शब्दरत्नावली
कंवलं क्ली जलं इति मेदिनी
कंवलः पुं स्वनामख्यात मेषादि
लोमरचित वस्त्रासनादि तत्
पर्य्यायः रल्लकः २ इत्यमरः॥
नागराजः सास्ना प्रावारः॥
कृमिः उत्तरासंगः इति॥
मेदिनी मृगविशेषः इति ॥
जटाधरः ॥
कंवलिवाह्यके क्ली वृषवहनीय
शकटे तत्पर्य्यायः गन्त्री २॥
इत्यमरः ॥
तट्टीका
कंवातायी पुं शंखविल्लः इति॥
महाभारतं ॥

कंविः स्त्री दर्विः हाता इति
भाषा इत्यमरः वंशांशः ॥
वांशेरपात इति भाषा इति
मेदिनी
कंवुः पुं क्ली शंखः इत्यमरः स्वामी ॥

कंवुः पुं वलये शंबूकः हस्ती
इति मेदिनी कर्बुरवर्णः ॥
ग्रीवा नलके कांपाहाउ इति
भाषा इति हेमचंद्रः ॥
कंवुका स्त्री अश्वगंधा वृक्षः इति
रत्नमाला ॥
कंवुकाष्ठा स्त्री अश्वगंधा वृक्षः
इति राजनिर्घंटः ॥
कंवुग्रीवा स्त्री कम्बाकृतिरेखा
त्रययुक्तग्रीवा इत्यमरः ॥
कंवुपुष्पी स्त्री शंखपुष्पी वृक्षः इति
राजनिर्घंटः ॥
कंवुमालिनी स्त्री शंखपुष्पी इति
राजनिर्घंटः ॥
कंवोजः पुं शंखविशेषः ॥
देशभेदः हस्तिप्रभेदः ॥
इति मेदिनी ॥
कंभारी स्त्री गंभारी वृक्षः इति॥
शब्दमाला राजनिर्घंटौ ॥
कंभु क्ली उशीरं उशीरे इति॥
राजनिर्घंटः ॥

कम्रः त्रि कामुकः मैथुनेच्छा
विशिष्टः इत्यमरः ॥
कयस्था स्त्री वयस्था काकोली
इति ख्याता इत्यमरटीकायां



करः पुं राजस्वं खाजाना इति
पारस्यभाषा तत्पर्य्यायः ॥
भागधेयः २ बलिः ३ इत्यमरः
कारः ४ इति तट्टीका प्रत्यायः
५ इतिमेदिनी ॥ अथ
राज्ञो करग्रहण प्रकारः क्रय
विक्रयादिना लाभादीन् संप्रेक्ष्य
राज्ञा करो ग्रहीतव्यः यथा क्रय
विक्रयमध्वानं भक्तं च सपरिव्ययं
योगक्षेमं च संप्रेक्ष्य वणिजो
दापयेत् करान् यथा फलेन
युज्येत राजा कर्त्ता च कर्म्मणां तथा
वेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं
करान् राज्ञा राज्यात् वार्षिकः
करोऽल्पाल्पकः ग्रहीतव्यः यथा
यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्स
षट्पदाः तथाल्पाल्पो ग्रहीतव्यो
राष्ट्राद्राज्ञाब्दिकः करः ॥
मूलदधिकयोः पशुहिरण्ययोः
पञ्चाशद्भागरूपः करो ग्राह्यः ॥
धान्यानां भूम्युत्कर्षापकर्षापेक्ष
या कर्षकाणां क्लेशलाघवगौरवा
पेक्षया च षष्ठोऽष्टमो द्वादशो वा
भागो राज्ञा ग्रहीतव्यः यथा
पञ्चाशद्भाग आदेयो राज्ञा पशु
हिरण्ययोः धान्यानामष्टमो भागः
षष्ठो द्वादश एव वा द्रुमांसमधु

सर्पिरादीनां षड्भागो लाभात्
ग्रहणीयः यथा आददीताथ
षड्भागं द्रुमांसमधुसर्पिषां
गन्धौषधिरसानाञ्च पुष्पमूल
फलस्य च पत्रशाकतृणानाञ्च
चर्म्मणां वैदलस्य च मृन्मयानाञ्च
भाण्डानां सर्व्वस्याश्ममयस्य च ॥
अतिक्षीणधनोऽपि राजा श्रोत्रिय
ब्राह्मणात् करं गृह्णीयात् यथा
म्रियमाणोऽप्याददीत न राजा
श्रोत्रियात् करं न च क्षुधास्य ॥
संसीदेच्छ्रोत्रियो विषये वसन्
इति मनुः वर्षोपलः ॥
किरणः हस्तः हस्तिशुण्डः इति
मेदिनी कर्म्मोपपदे कर्त्तृवाचकः
यथा सुखकरः इत्यादि ॥
करकं क्ली पुं करकः कमण्डलुः
इति मेदिनी ॥
करकः पुं दाडिमवृक्षः ॥
राजकरः पक्षिविशेषः लट्टा
करञ्जवृक्षः इति हेमचन्द्रः ॥
पलाशवृक्षः इति हारावली
कोविदारवृक्षः बकुलवृक्षः
करीरवृक्षः नारिकेलास्थिमाला
इति भाषा इति राजनिर्घण्टः
करकंटकः पुं नखः इति ॥
त्रिकाण्डशेषः ॥

करका स्त्री पुं मेघभवशिला
शिल इति भाषा तत्पर्य्यायः
वर्षोपलः इत्यमरः मेघोपलः
इति मेदिनी ॥
करकाम्भाः पुं नारिकेलवृक्षः ॥
इति त्रिकाण्डशेषः
करग्रहः पुं विवाहः इति ॥
त्रिकाण्डशेषः करग्रहणञ्च
करघर्षणः पुं दधिमन्थनदण्डः
तत्पर्य्यायः वैशाखः २ दधिचारः
तक्रोटः ४ इति हारावली ॥
करघर्षिणी स्त्री ॥
करघर्षी पुं मन्थानदण्डः इति
शब्दमाला ॥
नारिकेलफलास्थि नारिकेलेर
खोल इति भाषा इति मेदिनी
शरीरास्थि इति हेमचन्द्रः ॥
इक्षुभेदः इति राजनिर्घण्टः ॥
करङ्कशालिः पुं करङ्कनामेक्षुः
इति राजनिर्घण्टः ॥ (अ
करच्छदः पुं शाखोटवृक्षः सेहुड
इति भाषा इति भावप्रकाशः
करच्छदा स्त्री सिन्दूरपुष्पीवृक्षः
इति राजनिर्घण्टः ॥
करजं क्ली व्याघ्रनखनामगन्ध
इत्यमरः ॥

करजः पुं करञ्जवृक्षः नखः
इति मेदिनी
करजाख्यः पुं नखीनामगन्धद्र
इति रत्नमाला ॥
करज्योडिः पुं हस्तज्योडिवृक्षः
इति राजनिर्घण्टः ॥
करञ्जः पुं वृक्षविशेषः करमचा
इति भाषा स षड्विधः तत्र
अकरञ्ज पर्य्यायः नक्तमालः
२ पूतिकः ३ चिरविल्वकः ४
पूतिपर्णः ५ वहुफलः ६ रोचनः ७
इति राजनिर्घण्टः चिरविल्वः ८
करजः ९ कौरजकः १० इत्यमरः
चिरिविल्वः ११ इति तट्टीका
अस्य फलगुणाः कटुत्वं उष्णत्वं
वस्तिहितत्वं वातनाशित्वञ्च इति
राजनिर्घण्टः वातकफमेहार्शः
कृमिकुष्ठनाशित्वञ्च तत्पत्र
गुणाः कफवातार्शःकृमिशोथ
नाशित्वं भेदकत्वं पाके कटुत्वं
वीर्य्योष्णत्वं पित्तवर्द्धकत्वं ॥
लघुत्वञ्च इति भावप्रकाशः
तत्तैलगुणाः अतिस्निग्धत्वं वात
नाशित्वं स्थिरदीप्तिदातृत्वं
नयनामय वातरोगकुष्ठकण्डू
विसूचिकानाशित्वं तीक्ष्णत्वं



उष्णत्वं लेपेन नानाविधवर्म्मदो
ष नाशित्वञ्च इति राजनिर्घण्टः
किटिमत्वं कृमिनाशित्वं ॥
रक्तपित्तदोषकारित्वञ्च इति
राजवल्लभः अथ नाटाकरञ्जः
पर्य्यायः प्रकीर्य्यः २ पूतिकरजः
पूतिकः ३ कलिकारकः ४ इत्यमरः
पूतीकरञ्जः ५ प्रकीर्य्यः ६ सकेट
कः ७ इति रत्नमाला षड्ग्रन्थः ॥
कांटाकरञ्ज गांटियाकरञ्ज इति
भाषा मार्कटी माकडाकरञ्ज
इति भाषा अंगारवल्लरी ॥
विषकरञ्ज इति भाषा इत्यमर
भरतौ अथ अंगारकरञ्जः ॥
पर्य्यायः करमर्द्दी १ वनेतुद्रा २
करामर्दः ३ करमर्दकः ४ इति ॥
रत्नमाला कृष्णपाकफलः ५ अविग्नः
६ सुषेणः ७ इत्यमरः अस्यफल
गुणाः पिपासानाशित्वं रुचि
पित्तकारित्वं गुरुत्वञ्च इति ॥
राजवल्लभः राजनिर्घण्टोक्त गुण
पर्य्यायो करमर्द्दक शब्दे द्रष्टव्याः ॥
करञ्जकः पुं करञ्जवृक्षः ॥
इत्यमरः भृंगराजवृक्षः इति
जटाधरः ॥
करञ्जफलकः पुं कपित्थवृक्षः
इति राजनिर्घण्टः

करटः पुं काकः हस्तिगण्डः
इत्यमरः कुसुम्भवृक्षः ॥ निंद्य
जीवनः एकादशाहादिश्राद्धे
दुर्द्दुरूढः नास्तिक इति यावत्
वाद्यविशेषः इति मेदिनी
करटकः पुं काकः इति ॥
शब्दरत्नावली ॥
करटी स्त्री दुःखदोग्ध्री गवी इति
हेमचन्द्रः ॥
करटी पुं स्त्री हस्ती इति
हेमचन्द्रः ॥
करडुः पुं पक्षिविशेषः ॥
करकठिया इति भाषा इति
हेमचन्द्रः ॥
करणं क्ली साधकतमे इत्यमरः
तत्तु षट्कारकान्तर्गतकारक
विशेषः तस्य लक्षणं क्रियाया
साध्यायां बहूनां कारणानां मध्ये पा
कारणान्तरव्यवधानाभावेन द्रुतक्रि
यानिष्पत्तिकारणं विवक्षितं तस्मिन्
करणत्वं प्रकीर्त्तितं तेन दात्रेण
धान्यं लुनातीत्यत्र हस्तादेः ॥
कारणत्वेपि दात्रस्यैव करणत्वं
विवक्षितं तथा चोक्तं कारणा
ऽव्यवधानेपि क्रियानिष्पत्तिकारणं
यद्दै विवक्षितं तेषु करणत्वं
प्रकीर्त्तितं इति मुग्धबोधटीकायां

दुर्गादासः तिथिर्द्धपरिमित
ववाद्येकादशसंख्यककालविशेषः
तेषां नामानि ववः १ वालवः २
कौलवः ३ तैतिलः ४ गरः ५
वणिजः ६ विष्टिः ७ शकुनिः ८
चतुष्पदः ९ किंस्तुघ्नः १० नागः ११
तेषां यथाक्रमेणाधिष्ठातृदेवाः
इन्द्रः १ कमलजः २ मित्रः ३ अर्य्य
मा ४ भूः ५ श्रीः ६ यमः ७ कलिः ८
वृषः ९ फणी १० मारुतः ११ ॥
एकैकस्मिन् तिथौ द्वे द्वे करणे
भवतः तेषां ववादयः सप्त ॥
अष्टकृत्वा शुक्लप्रतिपच्छेषार्द्ध
मारभ्य कृष्णपक्षीयचतुर्द्दशी ॥
प्रथमार्द्धपर्य्यन्तं भवन्ति शेषाश्चत्वारः
कृष्णचतुर्द्दशीशेषार्द्धवधिशुक्ल
प्रतिपत् प्रथमार्द्धपर्य्यन्तं नियमेन
भवन्ति अतो ध्रुवाणि करणानि
पूर्व्वसप्तान्यध्रुवाणि तेषामानयन
क्रमो यथा तिथिर्द्विघ्ना करोनाग
शिष्टा करणमादिमे परेदले तु ॥
सैकं तत् करणं ववपूर्व्वकं इति
ज्योतिषे क्षेत्रे गात्रे ॥
इन्द्रिये इत्यमरः हेतुः कर्म ॥
हल्लेयः नृत्यप्रभेदः ॥
गीतविशेषः क्रियाभेदः ॥
संवेशने कायस्थः इति मेदिनी ॥

कायस्य संहतिः वर्णानां ॥
स्पष्टतादि योगिनामासनादि
कृतादि इति हेमचन्द्रः ॥
करणः पुं शूद्रावैश्ययोर्जात
जातिविशेषः इत्यमरः अयं
लिखनवृत्तिः कायस्थ इति ख्यातः
इति भरतः ॥
करणत्राणं क्ली मस्तके इति
हेमचन्द्रः ॥
करणीयं त्रि कर्त्तव्यं कार्य्यं
इति व्याकरणं ॥ (इति
करण्डः पुं मधुकोषाः मौचाक
भाषा असिः कारण्डवपक्षी
डल्लके इति मेदिनी हेमचन्द्रश्च
वंशादिरचितभाण्डविशेषः
समुद्गश्च साजि झांपि इत्यादि
भाषा इत्यमरः ॥
करण्डी पुं मत्स्यः इति ॥
त्रिकाण्डशेषः ॥
करतलः पुं हस्ततलः हातेर
तेलो इति भाषा यथा करतल
तालतरल वलयेति जयदेवः
अपि चाननः करतलीकृत्यापि
हालाहलं विषं अभक्षयत्
महादेवः कृपया भूतभावनः
इति श्रीभागवते ॥
करताले क्ली वाद्यविशेषः यथा




शिवागारे फलकंव सूर्य्यागारेव
फलके दुर्गागारे शिवार्ये ॥
मधुरीव नवादेवेत् फलके
कांस्य निर्गत करतालके ॥
इतितिथ्यादितत्वे रघुनंदन॥
भट्टाचार्य्येण व्याख्याते ॥
करताली स्त्री वाद्यविशेषः॥
करताल खरताल इतिख्याता
तत्पर्य्यायः करर्द्धिः २ इति
त्रिकाण्डशेषः करतलध्वनिः
तथाच यथानस्यात्तालीकपट
करतालीयद्रवः इत्युद्भटः
करतोया स्त्री स्वनामख्यात
उत्तरदेशस्थनदी विशेषः तत्
पर्य्यायः सदानीरा २ इत्यमरः
करद्रुमः पुं कारेकरवृक्षः इति
राजनिर्घण्टः ॥
करपत्रं स्त्री क्रकचः करात इति
भाषा इत्यमरः जलक्रीडा॥
इतिजटाधरः ॥
करपत्रवान् पुं तालवृक्षः इति
शब्दचन्द्रिका ॥
करपत्रिका स्त्री जलक्रीडाइति
[illegible] ॥
करपर्णः पुं भिण्डावृक्षः ॥
रक्तैरण्डः इतिराजनिर्घण्टः
करपल्लवः पुं अंगुलिः यथा
करपल्लवसंगीनि तैस्माच्छस्त्रसर्वतः
इतिदेवीमाहात्म्यं ॥
करपात्रं क्ली जलक्रीडा इति ॥
हारावली ॥
करपालः पुं खड्गः इत्यमरः
करपालिका स्त्री ह्रस्वगदाकार
हस्तदण्डः सोटा इतिख्यातः इति
भरतः एकधारास्त्रं इतिस्वामी
तत्पर्य्यायः इली २ इत्यमरः ॥
इली ३ इलिः ४ करवालिका ५
इतितट्टीका ॥
करवालः पुं नखं इति शब्दमाला
खड्गः तरवाल इतिभाषा ॥
इत्यमरटीकायांभरतादयः ॥
करवालिका स्त्री करपालिका
इत्यमरटीकायांरायमुकुटादयः
करभः पुं मणिबंधावधि ॥
कनिष्ठापर्य्यन्तं करस्यबहिर्भागः
उष्ट्रशिशुः इत्यमरः ॥
करिशावकः इत्यमरटीका ॥
सारसुन्दरी उष्ट्रः इतिमेदिनी ॥
नखनामगंधद्रव्यं इति ॥
नखनाम गंधद्रव्यं इति ॥
करभकाण्डिका स्त्री उष्ट्रकांडीवृक्षः
इतिराजनिर्घण्टः
करभप्रिया स्त्री क्षुद्रदुरालभा
इतिराजनिर्घण्टः ।

करभवल्लभः कपित्थवृक्षः ॥
पीलुवृक्षः इतिराजनिर्घण्टः ॥
करभादनी स्त्री क्षुद्रदुरालभा इति
राजनिर्घण्टः ॥
करभी न पुं हस्ती इतिराजनिर्घण्टः
करभी स्त्री उष्ट्री तत्पर्य्यायः ॥
वामी २ इतिजटाधरः ॥
करभीरः पुं सिंहः इतिशब्द॥
रत्नावली ॥
करभूषणं क्ली कंकणं इत्यमरः
हस्ताभरणमात्रंच ॥
करमर्द्दः पुं गुवाकवृक्षः इति
त्रिकाण्डशेषः ॥
करमरी न पुं वेदीकयेदी इति
करमरी न पुं वन्दी कयेदी इति
भाषा इति त्रिकाण्डशेषः ॥
करमर्द्दः पुं करमर्दकवृक्षः इति
शब्दरत्नावली ॥
करमर्द्दकः पुं वृक्षविशेषः या
आमला इति भाषा इत्यमरटीका
सारसुन्दरी करौंदा इतिकरमचा
इतिच भाषा इतिरत्नमालाराज
निर्घण्टादयः तत्पर्य्यायः कृष्ण
पाकफलः २ आविग्नः ३ सुषेणः
इत्यमरः कृष्णपाकः ५ पाकफलः
६ कृष्णफलः ७ पाककृष्णफलः ८
कृष्णफलपाकः ९ पाककृष्णः १० फल
कृष्णः ११ पाकफलकृष्णः १२ वनालयः
१३ वलाकः १४ करांबूकः १५ वोलः
१६ वषः १७ आविग्नः १८ इति
तट्टीकायां भरतः करमर्द्दी १९
वनेक्षुद्रा २० कराम्लः २१ इतिरत्न
मालाकरमर्द्दः २२ पाणिमर्द्दः २३
तद्बालफलगुणाः तिक्तत्वं अ
म्लत्वं दीपनत्वं दाहरक्तत्वंच
तत्पक्वफलगुणाः त्रिदोषशमनत्वं
अरुचि विषनाशित्वंच इति
राजनिर्घण्टः पिपासानाशित्वं
आम्लत्वं रुचि पित्तकारित्वं गुरु
अम्लत्वं रुचि पित्तकारित्वं गुरु
त्वंच इतिराजवल्लभः ॥
करमर्द्दी स्त्री करमर्द्दकवृक्षः इति
रत्नमाला ॥
करमालः पुं खलमालः धूमः
इतिहेमचन्द्रः ॥
करमाला स्त्री करपर्वरूपमाला
यथा अनामिकाद्वयंपर्वकनिष्ठा
दित्रयं तथा तर्जनी मूलपर्य्यन्तं
करमाला प्रकीर्त्तिता इतितंत्र
मालतंत्रे सामान्यविषये ॥
तर्जनीमध्यमाऽनामाकनिष्ठाचेति
ताः क्रमात् तिस्रो ऽङ्गुल्यस्त्रि



इतित्रिकाण्डशेषः ॥ (मरः
पर्वीणोमध्यमाद्वैकपर्विकापर्वं करभः पुं दधिमिश्रितसक्तुः इत्य
हयंमध्यमायामेहत्वेनोपकल्पयेत् करंभः दधिसक्तवः
इतिशिवरहस्यीयशक्तिमित्र ॥ करंभकं क्ली
विषये अनामामूलमारभ्य ॥ तत्पर्य्यायः कर्कसारः २ इति ॥
कनिष्ठादि क्रमेणतुतर्जनीमध्य हारावली ॥
पर्य्यन्तमष्टपर्वंसंजपेत् इति करंभा स्त्री शतावरीप्रियंगुहस्तः
सनत्कुमारसंहितावचने शक्ति इतिराजनिर्घण्टः ॥
तेरेषामष्टवारविषये अनो करहहः पुं नखः इत्यमरः ॥
मिकात्रयेपर्वकनिष्ठावपर्वि करर्द्धिः स्त्री करताली इतित्रि
कामध्यमायाच तर्जनीमूल काण्डशेषः ॥ (इत्य॥
पर्विका करमालासमाख्याता करवालिका स्त्री करपालिका
आरभ्यानामिकांतरातूतर्जन्य मरटीकायांभरतः ॥ (ति
शेनयामध्येयोजयेत्तूसतुपायं करवी स्त्री कवरी हिंगुपत्रेर
इत्न इति शक्तिविषयेमुण्डमा। शब्दचंद्रिका ॥
ल्लातेत्रे तथा अनामामूल ॥ करवीरः पुं खड्गः दैत्यविशेषः
मारभ्यप्रादक्षिण्यक्रमेणलम इतिमेदिनी पुमश्याने इतिहेमचंद्रः
(तीरे
(पर्वेस
अध्यमामूलपर्य्यंतं जपेद्दश वंद्रः ब्रह्मावर्त्तदृषद्वतीनदी
इदमपि भक्तिविषये अष्टवार चंद्रशेखरराजपुरे इतिकालिका
परे इतिप्रपामारहस्ये ॥ पुराणे ४९ अध्यायः इत्तवि
शेषः करवी इति
करमुक्तं क्ली भाषा तत्पर्य्यायः (प्रतः
अस्त्रविशेषः बरछीभाँ
लाइत्यादिभाषा इतिहलायुधः प्रतिहासः २ शतप्रासः ३चं
करभः पुं करभः इत्यमरटीका ४ हयमारकः ५ इत्यमरः पती
कोनीलकेदः मिश्रितेत्रि इति हासः ६ इतितट्टीका अश्वघ्नः ७ (ग्रो
हयारिः ८ अश्वनारक ९ शीतकुं
हेमचंद्रः ॥
करम्बितः त्रि मिश्रितःखचितः ९ लगारिः ११ इतिरत्नमाला ॥

अश्वहा १२ वीरः १३ हयमारः १४ पार्श्वसम्मिताः इतिकात्यायन
हयघ्नः १५ शतकुंदः १६ अश्मतोय दर्शनात् इतितिथ्यादितत्वे
कः १७ वीरकः १८ कुंदः १९ शक्कुंदः २० करशीकरः पुं हस्तिशुण्डनिर्गत
श्वेतपुष्पकः २१ अश्वांतकः २२ न जलकणा तत्पर्य्यायः वमथुः
खराह्वः २३ अश्वनाशनः २४ स्थ इत्यमरः ॥
लगन्धः २५ दिव्यपुष्पः २६ हरिप्रि करसूकः पुं नखः त्रिकाण्ड ॥
यः २७ गौरीपुष्पः २८ सिद्धपुष्पः २९ शेषः ॥ (तः
अस्यगुणाः कटुत्वे तीक्ष्णत्वे करहाटः पुं पद्ममूले मदनवृ
कुष्ठकंडूति नाशित्वे व्रणार्त्तिवि इतिमेदिनी महापिंडीतरुः
षविस्फोटकशमनत्वेअश्वमृति इतिराजनिर्घण्टः ॥
त्वेच इतिराजनिर्घण्टः ॥ करहाटकः पुं मदनवृक्षः इत्यमरः
करवीरकः पुं अर्जुनवृक्षः इति हस्तीयस्वर्णे क्ली ॥ (वा
राजनिर्घण्टः खड्गः इतिशब्दमाले करामर्दः पुं करमर्द्दवृक्षः करम
विषभेदः सतुकरवीरस्यमूले ॥ इतिभाषा इतिशब्दरत्नावली
इतिहेमचंद्रः ॥ करमुकः पुं क्रमुकफलवृक्षः
करवीरकंदसंज्ञः पुं तैलकंदः पाणिग्रामला इति भाषा इति
इतिराजनिर्घण्टः ॥ (ट शब्दचंद्रिकाभरतधृतवाचस्पतिश्च
करवीरभुजा स्त्री आढकीवृक्षःअ करामर्दकः पुं करमर्दकवृक्षः इति
रहर इति भाषा इतिराजनिर्घण्टः राजनिर्घण्टः ॥
करवीरी स्त्री अदितिः करायिका स्त्री बलाकापक्षी
श्रेष्ठगवी ॥ क्षुद्रबकः ॥
पुत्रवती इति मेदिनी ॥ इतिभूरिप्रयोगः ॥
करशाखा स्त्री अंगुली इत्यमरः करारोटः पुं अंगुरीयके इति
आसांपरिमाणं यथा अष्टभिस्तै त्रिकाण्डशेषः ॥ (कालतुलसी
र्भवेत ज्येष्ठं मध्यमे सप्तभिर्यवैः करालं क्ली कृष्णकुठेरकः
कन्यसे षड्भिरुद्दिष्टमेवंगुलमुनि इतिभाषा इतिमेदिनी ॥
सत्तम मानेत पार्श्वेनषड्यवाः करालः पुं सर्जरसयुक्तैतैलगर्जन



तैल इति भाषा इति मेदिनी ॥
करालः त्रि दन्तुरः दांता इति भाषा
तुङ्गः उँचु इति भाषा भीषणः ॥
भयानक इति ख्यातः इति मेदिनी
करालकः पुं कृष्णतुलसी इति रत्न
माला करालशब्दार्थश्च ॥
करालत्रिपुटा स्त्री लङ्काधान्यं
इति राजनिर्घण्टः ॥
कराला स्त्री शारिवा अनन्तमूल
इति ख्याता इति रत्नमाला ॥
करालिकः पुं वृक्षः इति हेमच
द्रः कराली स्त्री अग्नेः सप्तजिह्वान्त
र्गतजिह्वाविशेषः इति जटाधरः
करिकणावल्ली स्त्री चविकाहस्तः
वइ इति भाषा इति राजनिर्घण्टः ॥
करिगर्भः पुं नागकेशरचूर्णके
इति हारावली ॥
करिगर्जित न क्ली हस्तिगर्जने तत्
पर्यायः बृंहितं २
इत्यमरः ॥
करिजः हस्तिशिशुः इति शब्द
माला ॥
करिणी स्त्री हस्तिनी तत्पर्यायः
धेनुका २ वशा ३ इत्यमरः ॥
करिदारकः पुं सिंहः इति शब्द
रत्नावली ॥
करिपत्रं क्ली तालीशपत्रे इति
राजनिर्घण्टः ॥ (इत्य
करिपिप्पली स्त्री गजपिप्पली
मरः ॥
करिपोतः पुं करिशावकः इति
हलायुधः ॥ (लत
करिबन्धः पुं हस्तिबन्धनस्तम्भः
पर्यायः आलानं २ इति हारा
वली ॥
करिमाचलः पुं सिंहः इति
त्रिकाण्डशेषः ॥
करिमुखः पुं गणेशः इति
त्रिकाण्डशेषः ॥
करिरः पुं क्ली करीरः इति शब्द
रत्नावली ॥
करिशावकः पुं हस्तिशिशुः तत्
पर्यायः कलभः २ करभ इत्यपि
पाठः इत्यमरः करिपोतः ३
इति हलायुधः करिजः ४ इति
शब्दमाला ॥
करी न् पुं हस्ती
इत्यमरः ॥
करीरः पुं क्ली वंशाङ्कुरः बांश
कोंड इति भाषा इत्यमरः
अस्य गुणाः श्लेष्मनाशित्वे कषा
यत्वे दाहजनकत्वे च इति राज
वल्लभः ॥
करीरः पुं घटः इति मेदिनी ॥

मरुभूमिज उष्ट्रप्रियः केरकिहस्तः
करील इति भाषा तत्पर्यायः
क्रकरः २ ग्रन्थिलः ३ इत्यमरः
क्रकचः ४ इति तट्टीका निष्कपिका
५ करीरः ६ गूढपत्रः ७ करकः ८
तीक्ष्णकण्टकः ९ अस्य गुणाः ॥
आध्मानकारित्वे कषायत्वे ॥
कटुत्वे उष्णत्वे अतिशयकफ
कारित्वे श्वासानिलाशोषक
सर्वशूल विच्छर्दिखर्जूव्रणदोष
नाशित्वे च इति राजनिर्घण्टः
करीरा स्त्री चीरिका किक्षिपोका
इति भाषा हस्तिदन्तमूले ॥
इत्युणादिकोषः ति
करीरिका स्त्री हस्तिदन्तमूले इ
त्रिकाण्डशेषः ॥ (ले
करीरी स्त्री चीरिका हस्तिदन्तमू
इति मेदिनी ॥ (टे
करीषः पुं क्ली शुष्कगोमये घु
इति भाषा इत्यमरः तत् ॥
पर्यायः गोग्रन्थिः २ छगणः ३
इति हेमचन्द्रः ॥ (ङ्किः
करीषाग्निः पुं शुष्कगोमयव
घुटेर आगुन इति भाषा तत्
पर्यायः छगणः २ इति ॥
त्रिकाण्डशेषः ॥
करुणः पुं वृक्षविशेषः करुणा
नेउरगाछ इति भाषा तत्फल ॥
गुणाः कफवातामयमेदोनाशित्वे
पित्तप्रकोपकत्वे च इति
राजवल्लभः वृक्षभेदः इति ॥
त्रिकाण्डशेषः शृङ्गाराद्यष्ट ॥
रसान्तर्गत तृतीयरसः इत्यमरः
तस्य लक्षणं इष्टनाशादनिष्टाप्तेः
करुणाख्यो रसो भवेत् धीरैः
कपोतवर्णोयं कथितो यमदैवतः
शोकोऽस्य स्थायिभावः स्यात् शोच्य
मालम्बनं मतं तस्य दाहादिकावस्था
भवेदुद्दीपनं पुनः अनुभावा
दैवनिन्दा भूपातक्रन्दितादयः ।
वैवर्ण्योच्छ्वास निःश्वास स्तम्भ ॥
प्रलपनानि च निर्वेदमोहापस्मार
व्याधि ग्लानि स्मृति श्रमाः
विषाद जडतोन्माद चिन्ताद्या
व्यभिचारिणः शोच्यो विनष्टबन्धु
प्रभृति यथा राघव विलासे ।
विपिने क्व जटानिबन्धनं तव चेदं
क्व मनोहरं वपुः अनयोर्घटना
विधेः स्फुटं ननु खड्गेन शिरीषकर्त्तनं
अत्र राम वनवास जनित ॥
शोकार्त्तस्य दशरथस्य दैवनिन्दा
एवं बन्धुवियोगविभवनाशादावपि
उदाहार्य्यं धीरपाषण्ड ॥
महाभारते स्त्रीपर्वणि बोद्धव्यः

इति साहित्यदर्पणे ॥
करुणामल्ली स्त्री नवमल्लिका इति शब्दचन्द्रिका ॥
करुणविप्रलम्भः पूर्वरागादिचतुर्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भविशेषः अस्य लक्षणं यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः यथा कादम्बर्य्यां पुण्डरीकमहाश्वेतावृत्तान्ते पुनर्लभ्ये शरीरे तदेवालभ्ये ॥ करुणाख्यप्रवासः किंचात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गारः सङ्गमप्रत्याशया रतेरुद्भवात् प्रथमन्तु करुणएवेत्यभियुक्ता मन्यन्ते यच्चात्र सङ्गमप्रत्याशानन्तरमपि भवतो विप्रलम्भशृङ्गारस्य प्रवासाख्यो भेद एवेति केचिदाहुः तदन्ये मरणरूपविशेषसम्भवात् भिन्नमपि मन्यन्ते इति साहित्यदर्पणे ॥
करुणा स्त्री परदुःखहानीच्छा तत्पर्य्यायः कारुण्यं २ घृणा ३ कृपा ४ दया ५ अनुकम्पा ६ अनुक्रोशः ७ इत्यमरः ॥ सूकः ८ इति हेमचन्द्रः ॥

करुणापरः त्रि दयापरः तत्पर्य्यायः दयालुः २ कृपालुः ३ सूरतः ४ इति हेमचन्द्रः ॥
करुणी स्त्री पुष्पवृक्षविशेषः ककरणिकरुणि इति कोकणप्रसिद्धा तत्पर्य्यायः श्रीपुष्पी २ रक्तपुष्पी ३ वारिणी ४ राजप्रिया ५ राजपुष्पी ६ सूक्ष्मा ७ ब्रह्मचारिणी ८ अस्याः गुणाः कटुत्वं तिक्तत्वं उष्णत्वं कफमारुताध्मानविषविकारजन्तुदोषनाशित्वञ्च इति राजनिर्घण्टः ॥
करेटः पुं नखः इति ॥ त्रिकाण्डशेषः ॥
करेटव्या स्त्री यन्नकूपती इति त्रिकाण्डशेषः ॥
करेटुः पुं पक्षिविशेषः ॥ करकटिया इति भाषा तत्पर्य्यायः कर्कटेटुः २ इत्यमरः करेटुः ३ कर्कराटुकः ४ इति हेमचन्द्रः
करेणुः पुं हस्ती इत्यमरः कर्णिकारवृक्षः इति विश्वः ॥
करेणुः स्त्री हस्तिनी इत्यमरः
करेणुभूः पुं पालकाप्यमुनिः इति हेमचन्द्रः ॥
करेणुसुतः पुं मुनिविशेषः इति

त्रिकाण्डशेषः ॥
करेणूः पुं स्त्री हस्ती हस्तिनी इत्यमरटीकायां रायमुकुटः ॥
करेडुकः पुं भूतृणे इति ॥ राजनिर्घण्टः ॥
करेवरः पुं तुरुष्कः शिलारस इति भाषा इति राजनिर्घण्टः ॥
करोटं क्ली शिरोस्थि इति ॥ भरतो द्विरूपकोषश्च ॥
करोटिः स्त्री शिरोस्थि माथार खुलि इति भाषा इत्यमरः ॥
करोटी स्त्री शिरोस्थि इति भरतो द्विरूपकोषश्च ॥
कर्कहासे सौत्रधातुरयं ॥ इति कविकल्पद्रुमः
कर्कः पुं शुक्लाश्वः इत्यमरः कुलीरः दर्पणः घटः कर्कटराशिः अग्निः इति हेमचन्द्रः शाकरत्नावलीच कर्कलवः इति राजनिर्घण्टः ॥
कर्कचिर्भटी स्त्री चिर्भिटाकर्कटीभेदः इति राजनिर्घण्टः ॥
कर्कटः पुं लताविशेषः तत्पर्य्यायः कर्कः २ लताधात्री ३ लताम्लकरसः ४ कर्कफलः ५ इति कोष्ठीप्रदीपः ॥ जलजन्तुविशेषः काकडा इति भाषा तत्पर्य्यायः कर्कटकः २ कुलीरः ३ कुलीरकः ४ सदंशकः ५ पंकवासः ६ तिर्य्यग्गामी ७ अस्य गुणाः सृष्टविण्मूत्रत्वं भग्नसंधानत्वं वायुपित्तनाशित्वञ्च कृष्णकर्कटगुणाः बलकारित्वं ईषदुष्णत्वं अनिलापहत्वञ्च इति राजनिर्घण्टः पक्षिविशेषः करकटिया इति भाषा इति मेदिनी पद्मकन्दः तुम्बी इति जटाधरः मेषादिद्वादशराश्यन्तर्गतचतुर्थराशिः स तु पुनर्वसुशेषपादेन सह पुष्याश्लेषाभ्यां भवति अस्य देवता कुलीराकृतिः स तु स्थूलोदयः श्वेतवर्णः कफप्रकृतिः स्निग्धः जलचरः विप्रवर्णः उत्तरदिक्स्वामी बहुस्त्रीसङ्गः बहुसन्तानश्च अत्र जातस्य फलं कपटमन्त्रत्वं मृदुभाषित्वं मैत्रित्वं अप्रवासित्वं अरुणित्वञ्च इति ज्योतिषे जन्मकालीनचन्द्रस्थितेतद्राशिफलं कनककलामलनिर्मलहृदयः सुरूपः गेयजलाशयकेलयः किलनरास्तु कुलीरगते विधौ सम्मतः समनोऽखिलव्ययः इति कोष्ठीप्रदीपः ॥ तस्योदये तन्त्राक्लिष्टभवति तस्याङ्गानि तत्प्रतिमाके यथा

राजनिर्घण्टः ॥
दशाङ्गुलाधिकपञ्चाङ्गुलप्रभे कर्कटाह्वा स्त्री कर्कटशृङ्गीवृक्षः
कलिकाताख्यदेशे वर्त्तमानेन
विशायन्ते श्रोचन्ताग्रिशब्दःपिक इति वैद्यकं ॥ (इति
पञ्चदेशः इति ज्योतिषं ॥ कर्कटः स्त्री कर्कटी काकुड
तत्रजातफलं कर्किलं श्रेष्ठं भाषा इति शब्दरत्नावली
त्वन्नोभोगी सर्वजनप्रियः मिष्टा कर्कटिनी स्त्री राजहरिद्रा इति
त्रयात भोगी च जायते सज्जनप्रियः राजनिर्घण्टः ॥ (इति
कर्कटी स्त्री शाल्मलिफले
इति कोष्ठीप्रदीपः
कर्कटकः पुं कुलीरः इत्यमरः मेदिनी सर्पः इति शब्दरत्नावली
कर्कटशृङ्गिका स्त्री कर्कटशृङ्गी देवदालीलताकर्कटशृङ्गी ॥
गीवृक्षः इति शब्दरत्नावली वृक्षः पर्वीरुः बडकाकुड
कर्कटशृङ्गी स्त्री वृक्षविशेषः इति भाषा चोटिकावृक्षः ॥
काकडाशिंगी इति भाषा तत्र फललताविशेषः काकुड इति
पर्यायः कर्कटाख्या १ महाघोषा भाषा तत्पर्यायः कर्कटली २
२ शृङ्गी ३ कुलीरशृङ्गी ४ चक्राङ्गी कर्कटीपत्रिक ३ पीनसाक्षुद्रफला
६ कुलिंगी ७ कास नाशिनी ८ त्रपुषा ६ हस्तिपर्णी ७ लोमशकण्ड
इति रत्नमाला घोषा ९ ॥ ८ मूत्रला ९ बहुकंदा १० इति
वनमूद्गा १० चक्रा ११ शिखरी राजनिर्घण्टः कर्कटाह्वः ११
कर्कटोमा १२ कर्कटी खविषा शान्तनुः १२ इति रत्नमाला ॥
लिका १४ कौलीरा १५ वंशपत्रा १७ विभिटी १३ वालुकी १४ वर्बीकः १५
वल्लीगा १८ अस्या गुणाः तिक्तत्वं त्रपुषी १६ इति हेमचन्द्रः
गुरुत्वं उष्णत्वं वायु हिक्का ॥ अस्या गुणाः मधुरत्वं शीतत्वं
इति सारं कास श्वास पित्तास्र तिक्ताधारत्व रक्तपित्तनाशित्वं
नाशित्वंच इति राजनिर्घण्टः कफदोषकारित्वं चपक्काया
कर्कटाख्या स्त्री कर्कटशृङ्गीवृक्ष स्त्र मूत्ररोधार्त्ति नाशित्वं इति
क्षः इति रत्नमाला राजनिर्घण्टः ॥ (आ
कर्ककः पुं विल्ववृक्षः इति कर्कटुः पुं कारुड्यत्नीकाकटि

इति भाषा इति शब्दरत्नावली ॥ कर्करीका स्त्री कर्करी इत्युणादि
कर्कन्धुः पुं स्त्री कोलिवृक्षः ॥ कोषः ॥
इत्यमरटीकायां स्वामी ॥ कर्करेटुः स्त्री पक्षिहस्ता धाने
कर्कन्धुः पुं स्त्री वदरीवृक्षः । गलाडिपि इति भाषा तत्र ॥
इत्यमरः ॥ पर्यायः अङ्कोट्ट २ अङ्गुलि
कर्कर त्रि कठिने इति ॥ तोरणः ३ इति हारावली ॥
मेदिनी ॥ (शाल+ कर्करेडुः पुं करेडुपक्षी ॥
कर्करी स्त्री चूर्णिजनकल्लइया करकटिया इति भाषा इत्यमरः +
+इति हारावली ॥ कामलहः इक्षुः खड्गः ॥
कर्करः पुं दर्पणः इति मेदिनी इति हेमचन्द्रः ॥
कर्करागः पुं कालकण्ठ पक्षी कर्कशः त्रि साहसिकः कठोर
इति शब्दमाला ॥ अमसृणः दुस्पर्शः इत्यमरः
कर्कराटुः पुं कटाक्षः इति क्रूरः निर्दयः इति मेदिनी ॥
जटाधरः कृपणः इति विश्वः ॥
कर्कराटुकः पुं कर्करेटुपक्षी कर्कशाकन्दः पुं पटोलः इति
कर्करिया इति भाषा इति शब्दमाला शाकोटवृक्षः शेवडा
शब्दरत्नावली ॥ इति भाषा इति त्रिकाण्डशेषः
कर्करोधकः पुं अन्धकूपः इति कर्कशाङ्कदा स्त्री कोशातकी
त्रिकाण्डशेषः ॥ फिंगा इति भाषा दण्यवृक्षः
कर्कशालः पुं स्त्री चूर्णकुन्तलः इति राजनिर्घण्टः ॥
हेमचन्द्रः कर्कशदलः पुं पटोलः इति
कर्करी स्त्री स्वल्पवादिपानिका रत्नमाला ॥
झारी इति भाषा तत्पर्यायः कर्कशदला स्त्री दग्धावृक्षः इति
आलुः २ गलन्तिका ३ इत्यमरः राजनिर्घण्टः ॥
आलुः ४ आकः ५ इति तट्टीका कर्कशवाक्य स्त्री निष्ठुरवचने



परुषावाक् इतिशब्दरत्नावली
कर्कशा स्त्री वृश्चिकालीवृक्षः इति
राजनिर्घण्टः ॥
कर्कशिका स्त्री वनकोलिः इति
रत्नमाला ॥
कर्कसारं क्ली करम्भके दधिसक्तौ
इतिहारावली ॥
कर्कारुः पुं कूष्माण्डः इत्यमरः ॥
कर्कारुकः पुं कालिङ्गवृक्षः
इतिहारावली
कर्किः पुं कर्कटराशिः इति ॥
ज्योतिषं ॥
कर्कोटः पुं नागराजविशेषः
इति त्रिकाण्डशेषः ॥
कर्कोटकः पुं बिल्ववृक्षः ॥
कद्रुपुत्रनागराजविशेषः इति
मेदिनी इक्षुः इतिराजनिर्घण्टः
फललताविशेषः काँकरोल
इतिभाषा तत्पर्य्यायः ॥ (कः
किलासघ्नः २ तिक्तपत्रः ३ सुगन्ध
४ इतिहेमचन्द्रः अस्यगुणाः ।
श्वेतकफपित्तनाशित्वं रुचि
कारित्वञ्च इतिराजवल्लभः
कर्कोटकी स्त्री पीतघोषावृक्षः
इतिरत्नमाला ॥ (सेल
कर्कोटिका स्त्रीकर्कोटकः काँक
इतिभाषा तत्पर्य्यायः
कूष्माण्डी २ कर्कोटी ३ तत्फलं
कारवेल्लक तुल्य गुणं इति
राजनिर्घण्टः ॥
कर्च्चूरं क्ली कर्च्चूरं । स्वर्णं ॥
कच्चूरमपिपाठः इत्यमरटीकायां
कर्च्चूरः पुं वृक्षविशेषः कच्चूर
इति भाषा तत्पर्य्यायः ॥
द्राविडः २ कर्पूरः ३ दुर्लभः ४
गन्धमूलकः ५ वेधमुख्यः ६ गन्धसारः
७ जटालः ८ अस्यगुणाः कटुत्वं
तिक्तत्वं उष्णत्वं कफकासः ॥
गलगण्डादि दोष नाशित्वं ॥
मुखवैशद्य जनकत्वञ्च इति ॥
राजनिर्घण्टः ॥
कर्च्चूरकः पुं कर्च्चूरकः ॥
काँचाहलद् इतिभाषा इत्यमर
टीकायांस्वामी ॥
कज्जी पीडे इतिकविकल्पद्रुमः
कर्ण तक भिदि इति ॥
कविकल्पद्रुमः ॥
कर्णः पुं श्रवणेन्द्रियं कान इति
भाषा तत्पर्य्यायः शब्दग्रहः २
श्रोत्रं ३ श्रुतिः ४ श्रवणं ५ श्रवः ६
इत्यमरः श्रोत्रं ७ इति ॥
तट्टीका वचोग्रहः ८ इति ॥
राजनिर्घण्टः कर्णस्तु श्रवणेन्द्रियस्य
॥ गोलकं स्थाने तत्रश्रोत्रमिन्द्रियं ॥

तत्र कर्ण शष्कुल्यवच्छिन्ननभो
भागः तस्य देवतादिक्विषयः
शब्दः इति श्रीभागवते ॥
युधिष्ठिराग्रजः सतु कुन्त्याः कन्या
काले सूर्य्यांशसञ्जातः तत
पर्य्यायः राधेयः २ वसुषेणः ३
अर्कनन्दनः ४ चर्म्मांतककवातकः
दोषेशः ६ सूतपुत्रकः ७ इति
त्रिकाण्डशेषः चम्पाधिपः ८
अङ्गराट् ९ राधासुतः १० अर्कतनयः
११ इतिहेमचन्द्रः अङ्गाधिपः ॥
१२ इति भूरिप्रयोगः सुवर्णालि
वृक्षः इतिमेदिनी ॥
कर्णकण्डुः पुं कर्णरोगविशेषः
तस्य निदाने मारुतः कफसंयुक्तः
कर्णकण्डुं करोतिच इति ॥
माधवकरः
कर्णकीटी स्त्री कीटविशेषः
कानकोटारी केर्ण इत्यादि
भाषा तत्पर्य्यायः कर्णजलौका
शतपदी ३ इतिहेमचन्द्रः ॥
चित्राङ्गी ४ इति राजनिर्घण्टः
वृश्चिका ५ कर्णकण्डुभिः ६ इति
शब्दमाला ॥
कर्णगूथः क्ली कर्णमलं ॥
कानेरखलि इति भाषा इति
हारावली
कर्णगूथकः पुं कर्णविशेषः
तस्यनिदाने पित्तोष्मशोषितः
श्लेष्मा जायते कर्णगूथकः इति
माधवकरः ॥
कर्णजलूका स्त्री कर्णकीटी इति
शब्दरत्नावली ॥ (त्यमरः
कर्णजलौका स्त्री शतपदी इ
कर्णजलौकाः स्त्री कर्णजलौका
इत्यमरटीकायां भरतः ॥
कर्णजाहं क्ली कर्णमूले इति
मुग्धबोधव्याकरणं ॥
कर्णजित् पुं अर्जुन इति ॥
हेमचन्द्रः ॥ (र्णभूषणं
कर्णदर्पणः पुं ताडङ्कनामक
कानतड्का इतिभाषा इति
त्रिकाण्डशेषः ॥
कर्णकण्डुभिः स्त्री कर्णकीटी इति
शब्दमाला ॥
कर्णधारः पुं नाविकः कोयारि
माजि इत्यादि भाषा इत्यमरः
कर्णपाली स्त्री कर्णलूः कानवाला
इति भाषा इति हारावली ॥
कर्णपुष्पः पुं मोरटलता इति
राजनिर्घण्टः ॥
कर्णपूः स्त्री कर्णराजपुरे तत
पर्य्यायः चम्पा २ मालिनी ३
लोमपादपूः ४ इतिहेमचन्द्रः ॥

कर्णपूरः पुं शिरीषवृक्षः ॥ नीलोत्पले अवतंसः इति मेदिनी अशोकवृक्षः इति राजनिर्घण्टः ॥
कर्णपूरकः पुं कदम्बवृक्षः इति राजनिर्घण्टः ॥
कर्णप्रतिनाहः कर्णरोगविशेषः तस्य सम्प्राप्तिरूपे सकर्णगूथो द्रवतां यदा गतो विलायितो घ्राणमुखं प्रपद्यते तदा स कर्णप्रतिनाहसंज्ञितो भवेद्धि कार्यः शिरसार्द्धभेदकृत् ॥ इति ॥ माधवकरः ॥
कर्णफलः पुं मत्स्यविशेषः कानालिमाछ इति भाषा अस्य गुणः अजीर्णरोग श्लेष्मकारित्वं इति राजवल्लभः ॥
कर्णमलं क्ली कर्णजं वलं तत्पर्यायः कर्णगूथं २ इति हारावली ॥
कर्णमुकुरः पुं ताडङ्कनामकर्णभूषणं इति भूरिप्रयोगः ॥
कर्णमोटी स्त्री चामुण्डादेवी इति हेमचन्द्रः ॥
कर्णलतिका स्त्री पालिः कानेर पाता इतिभाषा इति हेमचन्द्रः ॥

कर्णवंशः पुं मंचः इति हारावली ॥
कर्णवर्जितः पुं सर्पः इति शब्दचन्द्रिका कर्णहीने त्रि ॥
कर्णवेधः पुं कर्णषट्कदोषनिवारणार्थं कर्णस्य वेधने कानविधान इति भाषा सोदरभ्रातृणां संस्काराणां वयोवर्णापर्य्य क्रमः कर्णवेधस्या संस्काररूपत्वात् ततथा नियमः यथाघटा ऽत्यन्तद्वये तिष्ठेत् संभवो ऽप्यपरस्यच कर्णषट्कं ॥ विजानीयात्तद्धिते तत्रयस्यच इत्याशंक्य तयोर्मध्ये शुद्धिर्यस्यास्य वत्सरे कर्णवेधो हितस्तस्य नान्यस्य ह्यविचारणात् तत्र कर्णौ यतिमाशंकां भानोः शुद्ध्या समेपित्रे कर्णौ वेधेन दोषः ॥ स्यादन्यथा मरणं भवेत् इति मलमासतत्वे गौडव्यवचनं अस्य कालनियमो यथा राजमार्त्तण्डे जन्मतो मासे नव चेत्रपोडेन वर्षयुग्मे न हरौ प्रसुप्ते रवौ च कृष्णे नवकत्रयदलेन जन्मभे कर्णविधिः प्रशस्तः दीपिकायां तो ॥ जन्मतो हम्भमास सप्तमे वा विजन्मा ज्ञात् समाच्युते पालेऽर्केलग्नविस्तुग्म

मृडभस्वात्मनराशादित्यभे सौम्ये लग्नाय त्रिकोणकेटकगतैः पापैस्त्रिलाभारिगैः राजो ऽर्हकृति ॥ वेधइज्ये सितेभे लग्ने तु काले शुभे अस्त्रापि तिथ्यादिविशुद्धे वर्जयेत् गर्गः कर्णवेधव्रते कुर्याद्दक्षिणगते स्थितेरवौ दक्षिणगते स्थिते भंगो नैव ॥ कुर्यात् कथंचन इति ज्योतिषतत्वे ॥ (नास्य
कर्णवेधनी स्त्री हस्तिकर्णवेध तत्पर्यायः नाली २ कर्णिरा ॥ इति त्रिकाण्डशेषः ॥
कर्णवेष्टकं क्ली कुण्डलं इति हेमचन्द्रः ॥
कर्णवेष्टने क्ली कुण्डलं इत्यमरः
कर्णशष्कुली स्त्री कर्णगोलके तत्पर्यायः वेष्टने २ इति ॥ हेमचन्द्रः ॥
कर्णस्रावः पुं कर्णरोगविशेषः तस्य निदान संप्राप्तिरूपाणि शिरोभिघातादथवा निमज्जतो जले प्रपाकादथवापि विद्रधेः स्रवेद्धि पूयं श्रवणोनिलाहितः स कर्णसंस्राव इति प्रकीर्तितः इति माधवकरः ॥
कर्णस्फोटा स्त्री लताविशेषः ॥ कानफाटा इतिभाषातत् ॥ पर्य्यायः कृतिस्फोटा २ त्रिपुटा ३ कृष्णतण्डुला ४ चित्रपर्णी ५ कोपलता ६ चन्द्रिका ७ अर्द्धचन्द्रिका ८ अस्या गुणाः कटुत्वं तिक्तत्वं हिमत्वं सर्वविषग्रहभूतादि दोषसर्वव्याधि नाशित्वंच इति राजनिर्घण्टः ॥
कर्णक्ष्वेडः पुं कर्णरोगविशेषः तस्य लक्षणं वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनं ॥ करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते इति माधवकरः ॥
कर्णाटः पुं स्वनामख्यातदेशविशेषः इति शब्दरत्नावली
कर्णाटी स्त्री रागिणीविशेषः इति हलायुधः सातु मालवरागस्य पत्नी इति संगीतदामोदरः ॥ हंसपदीवृक्षः इति राजनिर्घण्टः
कर्णानुजः पुं युधिष्ठिरराजा त्रिकाण्डशेषः ॥ (इका
कर्णान्दुः स्त्री कर्णपालीकानेर इति भाषा उत् ह्विलिका ॥ कानकडा इति ख्याता इति हेमचन्द्रः ॥
कर्णान्दूः स्त्री कर्णान्दुः कर्णपाली इतिहारावली ॥



कर्णभरणकः आरग्वधवृक्षः
इति राजनिर्घण्टः ॥
कर्णिरा स्त्री कर्णवेधनी इति
त्रिकाण्डशेषः ॥
कर्णिरिः पुं अर्जुनः इति ॥
पुराणे नदीसर्जवृक्षः आजन्
इति भाषा इति राजनिर्घण्टः ॥
कर्णस्फालः पुं कुलकला
हस्तिकर्णस्फालने इति ॥
त्रिकाण्डशेषः ॥
कर्णिका स्त्री कर्णाभरणविशेषः
कानतड्का इति भाषा तत् ॥
पर्यायः तालपत्रं २ इत्यमरः ।
ताडंकः ३ दन्तपत्रं ४ इति
भरतः करिहस्ताङ्गुलिः करिणः
शुण्डाग्रवर्त्त्यङ्गुल्याकृतिः पद्मबीज
कोषी इत्यमरः करमध्याङ्गुलिः
क्रमुकादिकाण्डः वोटा ॥
इति भाषा इति मेदिनी ॥
लेखनी इति हारावली ॥
अग्निमन्थवृक्षः अजशृङ्गीवृक्षः
इति राजनिर्घण्टः ॥
कर्णिकाचलः पुं सुमेरुपर्वतः
इति हेमचन्द्रः ॥
कर्णिकारः पुं वृक्षविशेषः ॥
कणियार इति भाषा तत्पर्यायः
द्रुमोत्पलः २ परिव्याधः ३ ॥
इत्यमरः द्रुतोत्पलः ४ इति
रत्नमाला आरग्वधविशेषः
छोटसोनालु इति भाषा तत्
पर्यायः राजतरुः २ प्रग्रहः ३
कृतमालकः ४ सुफलः ५ चक्रः ६
परिव्याधः ७ व्याधिरिपुः ८
पिण्डीतकः ९ लघ्वारग्वधः १०
अस्य गुणाः सारकत्वं तिक्तत्वं
कटुत्वं उष्णत्वं कफशूलोदर
कृमिमेह नाशित्वं व्रणगुल्म
निवारणत्वञ्च इति राजनिर्घण्टः
कर्णिकी पुं हस्ती इति जटाधरः
कर्णी पुं वर्षपर्वतसप्तकान्तर्गत
पर्वतविशेषः यथा हिमवान्
हेमकूटश्च निषधो मेरुरेव च
चैत्रः कर्णी च सप्तैते वर्ष ॥
पर्वताः इति हारावली ॥
कर्णीरथः पुं क्रीडार्थनिर्मित
स्वल्परथः पुरुषस्कन्धनीयमानरथः
इति भगीरथः ॥ स्त्रीवहनार्थ ॥
सुपरिवस्त्राच्छादितरथविशेषः
इति मंजरी चतुर्दोल इति ख्यात
इति पितृचरणाः इति सारसुन्दरी
स्त्रीरत्नवहनार्थं सुपरिवस्त्राच्छादित
मनुष्यवाह्ययानविशेषः इति
भरतः तत्पर्यायः प्रवहणं २ ॥

हयनं ३ इत्यमरः प्रहरणं ४
डयनं ५ इति तट्टीका ॥
कर्णीसुतः पुं कंसासुरः इति
त्रिकाण्डशेषः ॥
कर्णेजपः त्रि अप्रकाशेनान्
शवोपकारकर्णेलग्नित्वा परापकारं
वदति यो जनः ठक इति ख्यातः
तत्पर्यायः सूचकः २ पिशुनः ३
दुर्जनः ४ खलः ५ इत्यमरः कर्णे
जपादिद्वये परापकारवादिनि
पिशुनादि त्रये परस्परभेदन
शीले कर्णेजपादिपञ्चके सूचके
इति केचित् त्रयमिति केचित्
इति भरतः ॥
कर्णेन्दुः पुं कर्णेन्दुः अर्द्धचन्द्राकृत
कर्णभूषणे इति शब्दरत्नावली
कर्त्तृ तक शैथिल्ये इति ॥
कविकल्पद्रुमः ॥
कर्त्तनं क्ली छेदने नारीणां सूत्र
निर्मितिः काटनाकाटा इति
भाषा इति मेदिनी ॥
कर्त्तरी स्त्री कृपाणी इत्यमरः
पत्रीकृत स्वर्णादेः कर्त्तनोपायः
काति इति ख्यातः नापित ॥
केशकर्त्तनिका कोचि इति भाषा
काटारी इति ख्याता च इति ॥
भरतः ॥
कर्त्तव्य त्रि करणीये करणं ॥
योग्ये कार्य्ये इति व्याकरणं ॥
कर्त्ता क त्रि कारकः इति मेदिनी
(चित) षट्कारकान्तर्गत कारकविशेषः
वोपदेवेनास्य चेष्टा कृता ॥
अत्र उक्तार्थे प्रथमा अनुक्तार्थे
तृतीया विभक्तिर्भवति तस्य ॥
लक्षणं क्रियानुकूलकृतिमत्त्व इति
सारमंजरी यः करोति सः
इति सर्वप्राकृत्याश्रयः इति
तार्किकाः चेतनेतरव्यापार
ऽव्यवधानेन धात्वर्थनिष्पादक
चेतनः कर्मकरणादि कारकचक्र
(ति) प्रयोक्ता वा इति शाब्दिकविवेकः
क्रियामुख्य प्रयोजको कर्त्ता
इति क्रमदीश्वरः स तु पञ्चविधः
क्रियामुख्यः १ हेतुकर्त्ता २
प्रयोजकः ३ अनुमन्ता ४ ग्रहीता
५ तथा च क्रियामुख्यो भवेत् ॥
कर्त्ता हेतुकर्त्ता प्रयोजकः ॥
अनुमन्ता ग्रहीता च कर्त्ता पञ्चविधः
स्मृतः इति गोयीचन्द्र टीका ॥
कर्त्ता पाल चक्रवर्त्ती स च त्रिविधः
सात्त्विकः १ राजसः २ तामसः ३
सात्त्विको यथा मुक्तसङ्गो ॥
ऽनहंवादी धृत्युत्साहसमन्वितः
सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता

सात्विक उच्यते राजसो ॥
यथा रागी कर्मफलप्रेप्सुर्लुब्धो
हिंसात्मकोऽशुचिः हर्षं
शोकान्वितः कर्त्ता राजसः
परिकीर्त्तितः तामसो यथा
अयुक्तः प्राकृतः स्तब्धः शठो
नैष्कृतिकोऽलसः विषादी दीर्घ
सूत्रीच कर्त्ता तामस उच्यते इति
श्रीभगवद्गीता ॥
कर्त्ता ३ पु परमेष्ठी ब्रह्मा इति
मेदिनी ॥
कर्त्तृका स्त्री क्षुद्र खड्गः यथा।
हास्ययुक्तो त्रिनेत्रोऽव कपाल
कर्त्तृका करो इति तन्त्रसारे ॥
धूपामध्याने ॥ (र्त्तः
कर्त्तृत्वे स्त्री कर्तुर्भावः कर्त्तृत्व
यथा न कर्त्तृत्वं न कर्म्माणि लोकस्य
सृजति प्रभुः इति भगवद्गीता ॥
कर्त्रे न क यो षितेल्प । इति॥
कविकल्पद्रुमः ॥ (ली
कर्द्दी स्त्री कर्त्तरी इति शब्दरत्नाव
कारिका इति मुग्धबोध ॥
व्याकरणं ॥
कर्द्द १ कुत्सितरवे इति
कविकल्पद्रुमः उदात्ते इति
रमानाथः ॥
कर्द्दः पु कर्द्दमः कादा इति

भाषा इति शब्दरत्नावली ॥
कर्द्दटः पु करहाटः पंकः
पंकारः इति मेदिनी ॥ (कृ
कर्द्दनं क्ली उदरशब्दः पेटडाड
इति भाषा इति हेमचन्द्रः ॥
कर्द्दमं क्ली मांसं इति ॥
शब्दचन्द्रिका ॥
कर्द्दमः पु कर्द्दः कादा इति
भाषा तत्पर्य्यायः निषद्वरः २
जम्बालः ३ पंकः ४ शादः ५
इत्यमरः अस्य गुणाः शीतलत्व
शूलत्व विषरोग वेदना दाह॥
शोथ नाशित्वं व्रणशोधन।
रोपनत्वं च इति राजवल्लभः
प्रजापति विशेषः स तु ब्रह्मण
श्छायाया जातः तस्य भार्य्या
स्वायंभुवमनुकन्या देवहूतिः पुत्रः
कपिलदेवः कन्याः कलाद्यानव
इति श्रीभागवते पापं ॥
इत्युणादिकोषः ॥
कर्द्दमाटकः पु विष्ठादिनिक्षेप
स्थाने इति शब्दरत्नावली ॥
कर्द्दमी स्त्री शुक्ररहदः इति
वैद्यके ॥ (ली
कर्पटः पु मलिनत्वादि दुष्टजी
वस्त्रखण्डं नेकडा इति ख्यातः
तत्पर्य्यायः नक्तकः २ इत्यमरः

नक्तकः ३ इति भरतः ॥ (स्त्र
कर्पटधारी न त्रि मलिनजीर्णव
स्त्रखण्डधारी भिक्षुकः । इति॥
शब्दरत्नावली ॥
कर्पाटकः त्रि कर्पटधारी इति
शब्दरत्नावली ॥
कर्पटी त्रि कर्पटधारी इति॥
शब्दरत्नावली ॥
कर्परः पु कपालः माताखुलि
इति भाषा इत्यमरः शस्त्रभेदः
कटाहः इति मेदिनी ॥
उडुम्बरः इति शब्दचन्द्रिका ॥
कर्पराशः पु शर्करा लोलाकुवि
इति भाषा इति शब्दरत्नावली
कर्परालः पु कंदरालः ॥
पर्वतज पील्लुवृक्षः आखरोट
इति भाषा इत्यमर टीकायां
रमानाथः ॥ (षः
कर्पविकान्तस्ये स्त्री तुत्यविशे
कर्परी इति हेमचन्द्रः ॥
कर्परी स्त्री क्वाथोद्भवतुत्थं ॥
दारुहरिद्रा काथोद्भवतुत्थिया।
इति भाषा तत्पर्य्यायः दार्विका
इत्यमरः तुत्थाञ्जनं इति ॥
तट्टीकायां स्वामी ॥
कर्पासः पु स्त्री कार्पासः कापास
इति भाषा इत्यमर टीका ॥

कर्पासी स्त्री कार्पासी कापास
गाछ इति भाषा इति भरतः ॥
कर्पूरः पु क्ली स्वनामख्यातः ॥
हस्तनिर्याम श्वेतवर्ण सुगंधिद्रव्य
कपूर इति हिंदी भाषा तत
पर्य्यायः घनसारः २ चंद्रसंज्ञः
३ सिताभ्रः ४ हिमवालुका ५
इत्यमरः सिताभः ६ इति ॥
तट्टीका घनसारकः ७ सितकरः
८ शशी ९ शशांकः १० शिला ११
शीतांशुः १२ हिमवालुकः १३
हिमकरः १४ शीतप्रभः १५ शांभवः
१६ शुभ्रांशुः १७ स्फटिकाभ्रः १८
कारमिहिका १९ ताराभ्रः २०
चंद्राईकः २१ वेधः २२ लोकतुषारः
२३ गौरः २४ कुमुदः २५ ॥
अस्य गुणाः शिशिरत्वं तिक्तत्वं
कटुत्वं श्लेष्म रक्तपित्त तृष्णा
विदाह कंठस्य दोषोथ रोग ॥
नाशित्वं च कर्पूरो नूतनस्तिक्तः
स्निग्धश्चाप्यास्रदाहहृतः स्थिरो
दाहशोषघ्नः सधौतः शुभकृत्परः
इति राजनिर्घण्टः अपिच पाके
शीतलत्वं चक्षुर्हितकारित्वं
पक्वकर्पूरादपक्वस्याधिकगुणत्वं च
इति राजवल्लभः तद्भेदा यथा
पोतासः १ भीमसेनः २ सितकरः ॥



३ शंकरावाससंज्ञः ४ योग्नुः ५ पिञ्जः ६ अब्दसारः ७ हिमवालुकः ८ जूतिका ९ तुषारः १० हिमः ११ शीतलः १२ पत्रिकाख्यः १३ इति राजनिर्घण्टः ॥

कर्पूरकः पुं कर्चूरकः कचूरकः इति शब्दचन्द्रिका ॥

कर्पूरतिलका स्त्री उमासखीभेदः जया इति शब्दमाला ॥

कर्पूरतैलं क्ली कर्पूरस्नेहः तत्पर्य्यायः हिमतैलं २ ॥ सुधांशुतैलं ३ शीतांशुतैलं ४ तुहिनांशुतैलं ५ सितांशुतैलं ६ अस्य गुणाः कटुत्वं उष्णत्वं कफवातामयनाशित्वं रदार्त्तिपित्तकारित्वञ्च इति राजनिर्घण्टः ॥

कर्पूरनालिका स्त्री पक्वान्नविशेषः कपूरनारि नेत्रयाला इति च ॥ खाता बधाहुताख्यया समितया कल्वलैवपुटे ततः लवंगायण कर्पूरे सुतया सितयान्वितः ॥ पचेदाज्येन सिद्धैषा ज्ञेया ॥ कर्पूरनालिका सेयावसदृशी ज्ञेया गुणैः कर्पूरनालिका ॥ इति भावप्रकाशः ॥

कर्पूरमणिः पुं पाषाणभेदः ॥ कर्पूरमणि नामाये सुगन्धावातादिदोषघ्नत् इति राजनिर्घण्टः ॥

कर्फरः पुं दर्पणः इति जटाधरः

कर्व ० गतौ इति कविकल्पद्रुमः

कर्वरः पुं व्याघ्रः इति मेदिनी

कर्वरी स्त्री शिवा व्याघ्री इति मेदिनी ॥

कर्वुदारः पुं कोविदारवृक्षः ॥ इति शब्दमाला श्वेतकाञ्चनः अस्य गुणाः ग्राहित्वं रक्तपित्तरोगविशेषेण पथ्यत्वञ्च इति राजवल्लभः नीलझिंटी इति शब्दचन्द्रिका ॥

कर्वदारकः पुं श्लेष्मातकवृक्षः इति राजनिर्घण्टः ॥

कर्वूरं क्ली स्वर्णं धुस्तूरवृक्षः इत्यमरः जलं इति मेदिनी ॥

कर्वुरः पुं राक्षसः नानावर्णः तत्पर्य्यायः चित्रं २ किर्म्मीरः ३ कल्माषः ४ शवलः ५ एतः ६ तद्वति त्रि इत्यमरः शटी ॥ इत्यमरटीका पाये ॥ इति ॥ मेदिनी नदीनिष्पावधान्ये इति राजनिर्घण्टः ॥

कर्वूफलः पुं साकुरुण्डवृक्षः इति राजनिर्घण्टः ॥ (पातल

कर्वुरा स्त्री कृष्णवृन्ता वृक्षः इति भाषा इति मेदिनी ॥

वर्वरा वावुइतुलसी इति भाषा इति जटाधरः ॥

कर्वुरी स्त्री दुर्गा इति ॥ त्रिकाण्डशेषः ॥

कर्वूरं क्ली स्वर्णं इति मेदिनी ॥ हरितालं इति त्रिकाण्डशेषः ॥

कर्वूरः पुं शटी इत्यमरः ॥ राक्षसः इत्युणादि कोषः ॥ (भा

द्राविडकः कांवहलदि इति भा इति शब्दरत्नावली ॥

कर्वूरकः पुं हरिद्राभवृक्षः (तः) कांवहलदि इति ख्यातः इति भे कालहरिद्रा इति सारसुन्दरी ॥ कर्पूरहरिद्रा इति सारमञ्जरी काकवसेतः इति भगीरथः ॥ कालहरिद्रेति ख्यातः इति टीकासर्वस्वे हरिद्राभ कचोरा इति ख्यातः इति मधुमाधवी तत्पर्य्यायः द्राविडकः २ ॥ काल्पकः ३ वेधमुख्यकः ४ इत्यमरः कार्त्यकः ५ इति टीकासर्वस्वे

कर्म्म क्ली क्रिया इत्यमरः ॥ षट्कारकान्तर्गत कारकविशेषः वोपदेवेनाप्यट इति संज्ञाकृता अत्र द्वितीया विभक्तिर्भवति ॥ तस्मिन् उक्ते प्रथमा तस्य लक्षणं पारसमवेतत्थात्त्वर्धजन्यफलशालित्वे कर्म्मत्वे इति सारमञ्जरी ॥ यत्क्रियते तत् इति प्रसिद्धं करोतेर्निखिलक्रियावाचकत्वात् कर्तुर्व्यापारेण यत् साध्यते तदित्यर्थः अतएव क्रियाव्याप्यं कर्म्मेति क्रमदीश्वरः तच्चतुर्व्विधं निर्वर्त्यं १ यथा घटं करोति पुत्रं प्रसूते विकार्य्यं २ ॥ तच्च द्विविधं प्रकृतेरुच्छेदकं प्रकृतेर्गुणान्तराधायकञ्च आद्यं यथा काष्ठं भस्म करोति अन्त्यं यथा सुवर्णं कुण्डलं करोति तथा चोक्तं भर्तृहरिणा ॥ यदसज्जायते पूर्व्वं जन्मना यत् प्रकाशते तन्निर्व्वर्त्यं विकार्य्यञ्च कर्म्म द्वेधा व्यवस्थितं प्रकृत्युच्छेदसम्भूतं किञ्चित् काष्ठभस्मवत् अन्यद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् प्राप्यं ३ यथा ग्रामं गच्छति वेदं पठतीत्यादि अनीप्सितञ्च ४ पापं त्यजति इत्यादि इति मुग्धबोधटीकायां दुर्गादासः सप्तपदार्थान्तर्गत तृतीय पदार्थः तच्च पञ्चविधं यथा उत् क्षेपणं ततोऽवक्षेपणमाकुञ्चनं तथा प्रसारणञ्च गमनं कर्म्माण्येतानि पञ्चैवाभुमतोवेने



स्पंदनोर्द्ध ज्वलनमेव तिर्य्यग्
गमनमथात्र गमनमेव लभ्यते
इति भाषा परिच्छेदः ॥ (दि
कुसुमाञ्जलिमते यागहिंसा
तत्तु त्रिविधं सात्विकं १
राजसं २ तामसं ३ सात्विकं यथा
नियतं संगरहितमरागद्वेषतः
कृतं अफलप्रेप्सुना कर्मयत्तत्
सात्विकमुच्यते राजसं यथा
यत्तु कामेप्सुना कर्म साहंकारे
णवा पुनः क्रियते बहुलायासं
तद्राजसमुदाहृतं तामसं यथा
अनुबंधं क्षयं हिंसामनपेक्ष्य च
पौरुषं मोहादारभ्यते कर्म
यत्तत्तामसमुच्यते ॥ इति
श्रीभगवद्गीतायामष्टादशाध्या-
ये इति ज्योतिषं ॥ (श्री
कर्मकरः त्रि मूल्यं गृहीत्वा क-
र्मकारकः मजुरठिकावाकर इत्यादि
भाषा तत्पर्य्यायः भृतकः २
भृतिभुक् ३ वैतनिकः ४ ॥
वेतनोपजीवी तत्पर्य्यायः ॥
भरण्यभुक् २ इत्यमरः ॥
कर्मण्यभुक् ३ इति तट्टीका ॥
कर्मकर्त्री मात्रेव ॥

लता इति मेदिनी दासी ॥
इति शब्दरत्नावली ॥
कर्मकारः पुं वर्णसंकरजाति
विशेषः लौहकारः कामार
इति भाषा स तु शूद्रायां
विश्वकर्मणो जातः इति ब्रह्मवैवर्त्ते
पुराणं वृषः इति शब्दचन्द्रिका
कर्मकारः त्रि वेतनं विनाभार
बहनादिकर्मकारकः वेगार इति
भाषा तत्पर्य्यायः कर्मक्रियः २
इत्यमरः ॥
कर्मकीलकः पुं रजकः इति
त्रिकाण्डशेषः ॥
कर्मजः पुं कलियुगः इति
शब्दरत्नावली वटवृक्षः इति
जटाधरः ॥ क्रियाजन्ये त्रि ॥
कर्मजगुणः पुं क्रियाजन्यगुणः
तद्यथा संयोगः विभागः ॥
वेगः इति भाषापरिच्छेदः ॥
कर्मठः त्रि कर्मकुशलः यथा
सत्कर्मठः कर्मसु तानुबंधि इति
भट्टिः प्रयत्नेन प्रारब्धकर्म ॥
समापयिता यः तत्पर्य्यायः
कर्मशूरः २ इत्यमरः ॥ (डूः
कर्मण्यः त्रि कर्मयोग्यः क्रिया

कर्मकरः पुं यमः इति मेदिनी केजुया इति भाषा कर्मण्या ॥
कर्मकरी स्त्री मूर्वालता बिंबिका भाज्यते इत्यर्थे यप्रत्ययः इति

संक्षिप्तसारव्याकरणे ॥
कर्मण्यभुक् त्रि भरण्यभुक् ॥
वेतनोपजीवी इत्यमरटीकायां
स्वामी ॥
कर्मण्या स्त्री वेतने मूल्ये ॥
इत्यमरः ॥
कर्मन्दी २ पुं भिक्षुः संन्यासी
इत्यमरः ॥

कर्मफले क्ली कर्मविपाकः ॥
कर्मरंगफले इति मेदिनी ॥
कर्मभूः स्त्री कृष्टभूमिः तत्पर्य्यायः
कर्मान्तः २ इति हेमचन्द्रः ॥
कर्मभूमिः स्त्री आर्य्यावर्त्ते देशः
इति हेमचन्द्रः ॥
कर्ममूले क्ली कुशतृणे इति
शब्दचन्द्रिका ॥
कर्मयुगे क्ली कलियुगे इति ॥
त्रिकाण्डशेषः ॥
कर्मरंगः पुं क्ली फलवृक्षविशे (षः
कामरांगा इति भाषा तत्
पर्य्यायः शिरालः २ बहुदलः ३
रुजाकरः ४ इति शब्दचन्द्रिका
कर्मारः ५ कर्मारकः ६ पीतफलः
७ कर्मरः ८ मुद्गरकः ९ मुद्गरः
धराफलः ११ कर्मारकः १२
अस्य गुणः अम्लत्वं उष्णत्वं ॥
वातहारित्वं पित्तकारित्वंच

इति राजनिर्घण्टः तीक्ष्णत्वं
कटुपाकित्वं अम्लपित्तकारित्वंच
इति राजवल्लभः तत्पक्वफल
गुणः मधुराम्लत्वं बलपुष्टिरुचि
प्रदत्वंच इति राजनिर्घण्टः ॥
कर्मरी स्त्री वंशरोचना इति
राजनिर्घण्टः ॥
कर्मवज्रः पुं शूद्रः इति
महाभारते ॥
कर्मवाटी स्त्री तिथिः इति
हेमचन्द्रः ॥
कर्मविपाकः पुं कर्मजन्यफलस्य
परिपाकः रोगादिरूपजन्मान्तरीया
ऽशुभकर्मफलभोग इति यावत्
शातातप भृगुभरद्वाजाः पाप
रोगप्रायश्चित्तानां विवरणग्रन्थः
प्रायश्चित्तविहीनपापिनां नरकान्ते
प्रतिजन्म तत्पापसूचकरोग
युक्ते शरीरे भवति नृणां
दुष्कर्मजा रोगा जप देवार्चन
होमदानादिभिः शाम्यन्ति
महापातकजा रोगाः सप्तजन्मसु
जायन्ते तद्यथा कुष्ठं राजयक्ष्मा
प्रमेहः ग्रहणी मूत्रकृच्छ्रं
अश्मरी कासः अतीसारः
भगन्दरः दुष्टव्रणः गंडमाला
पक्षाघातः अक्षिनाशश्च ॥
इत्यादयः अत्र संपूर्णप्रायश्चित्ते



उपपापोद्भवा रोगाः यथ॥
जन्मसु जायंते तद्यथा जलोदर
यकृत् प्लीहा शूल व्रणः॥
श्वासः जीर्णज्वरः छर्द्दिः॥
भ्रमः मोहः गलग्रहः॥
रक्तार्बुदे विसर्पः इत्यादयः॥
अत्र अर्द्धे प्रायश्चित्ते॥
पापसमुद्भवारोगाः त्रिषुजन्मसु
जायेते तद्यथा दंडपतानकः
चित्रवपुः कंपः विचर्च्चिका॥
वल्मीकः पुंडरीके इत्यादयः॥
अत्र षडंशे प्रायश्चित्ते॥
अतिपापात् अर्शआद्याः रोगा॥
भवंति अन्येवहुधारोगसंकराश्च
अथ दानादिषु साधारण॥
विधिः गोदाने सुशीलासवत्सा
पयस्विनी गौः वृषदाने॥
शुक्लवस्त्रकांचनसहितः शुभो
ऽनड्वान् भूदाने दश निवर्त्तन॥
परिमिता भूः सुवर्णदाने शत
निष्कस्वर्णं तदर्द्धं वा॥ अश्व
दाने उपस्करसहितसुशीलाश्वः
महिषदाने स्वर्णशृंगकमहिषी
गजमहादाने सुवर्णकक्षसहित
गजः [illegible]॥
पुण्यदाने ब्राह्मणभोजने सहस्र
द्विजभोजिमिष्टान्नदाने रुद्रजपे॥
लक्षसंख्यक पुण्यकारणकेवल

पूजनानंतरं एकादश रुद्रजपः
तद्दशांश सघृत गुग्गुल होमः
वरुणमंत्रैरभिषेचनं च धान्य
दाने षष्टिसंख्यक खारीपरिमित
धान्यं वस्त्रदानेक कर्पूरमिश्रित
पट्टवस्त्रद्वयं अथ॥
प्रायश्चित्तग्रहणानुष्ठानादि दश
ये चाष्टचत्वारो वा ब्राह्मणानुपवेश्य
तेषामनुज्ञया प्रायश्चित्तमुपक्रम्य
विसृष्टे पूजयन्निजकामयासंकल्प
द्विजेभ्यो यथाशक्तितो दक्षिणां च
दत्वा तान् वस्त्रालंकारैरलंकृत्य रुद्र
प्रमाणेन प्रायश्चित्तं याचेत् तेषा
मनुज्ञया प्रायश्चित्तं यथाविधि
कृत्वा परिपूर्णार्थान् तान् यथाविधि
अभ्यर्च्य तेभ्योऽनुज्ञानाशिषश्च
प्रतिगृह्य ब्राह्मणान् भोजयित्वा
बंधुभिः सह भोक्तव्य इति
शातातपीय कर्मविपाक प्रथमा
ऽध्याय विवरणं जन्मांतरीय॥
महापातकशेष चिन्हकुनखादि
रोगाणां प्रायश्चित्तं पराक॥
व्रतं महापातकादिति पातकस्य।
गुरुत्वात् केचन गलत्कुष्ट
रोगस्य प्रायश्चित्तं द्विगुणं इति
स्मार्ताः अथ शातातपोक्त॥
हिंसास्तेयाऽगम्यागमनाऽगति
प्रायश्चित्तानि क्रमेण लिख्यंते॥

पापी रोगी
ब्रह्महा- पांडुकुष्ठी

प्रायश्चित्ते
यजमानस्तत्दिन पंचपल्लव पंचवर्णसंयुक्त
वस्त्रैः कलशान् संस्थाप्य तन्मध्ये कुंभोपरि।
रौप्यमष्टदलपद्मं विन्यस्य तदुपरि पलार्द्धार्द्ध
परिमित सुवर्णनिर्मित दशहस्तं चतुर्मुखदेवं
संस्थाप्य तस्य त्रिकाले पुरुषसूक्तेन पूजयेत्
ततः पूर्वादि कुंभेषु ब्रह्मचारिणा ब्राह्मणाः
ऋग्वेद प्रभृतीन् स्वस्ववेदान् शनैः पठेयुः ततो
मध्यकुंभे तिलाक्तहोतहेमभिघृतानि॥
पुरःसरं दशांशेन होमं कुर्यात् ततो ब्राह्मणे
द्वादशाहमिदं कर्म समाप्य तत्र पीठे यथावि
धि यजमानमभिषिंचेत् ततो यजमानो ब्राह्म
णेभ्यो यथाशक्ति गोभूहेमतिलोदकानि दत्वा
कुंभादीन् आचार्याय निवेदयेत्॥ १८॥

गोवधी-|कुष्ठी--
पंचपल्लवयुक्तपंचवर्णसमन्वित रक्तचंदन
लिप्तांग रक्तपुष्पावरान्वितेक रक्तकुंभं॥
दक्षिणस्यां दिशि संस्थाप्य तत्र तिलचूर्णपूरित
ताम्रपात्रं विन्यस्य तदुपरि निष्कमित सुवर्ण
निर्मित यमदेवं पुरुषसूक्त मंत्रेण संपूज्य॥
पापं मे शमयेति वदेत्। ततः सामविद्
ब्राह्मणस्तत्र कलशे सामपारायणं कुर्यात्॥

ततो दशांशं सघृतं दत्वा पात्रमाल्याभिषेचनं
कुर्यात् ततो यमोपि महिषारूढो दंडपाणि
र्भयानकः दक्षिणाशापति देवो मम पापं॥
व्यपोहतु इति मंत्रे यजमानो यमं विसृज्य
तं आचार्याय निवेद्य
सद्भक्तिमाचरेत्॥



पापी	रोगी	प्रायश्चित्तं
पितृहा —	चेतनाहीनः	त्रिंशत् प्राजापत्यानि कृत्वा पलपरिमितां सुवर्णनावं कारयित्वा ताम्रपात्रे तृणमये कुंभस्थापयित्वा निष्कपरिमित स्वर्णनिर्मिते विष्णुप्रतिमां वस्त्रेणावेष्ट्य विधानतः पूजयेत् तत्सर्वं ब्राह्मणाय दत्वा ब्राह्मणं विसर्जयेत् अन्येभ्योऽपि विप्रेभ्यो भूयसीं दक्षिणां दद्यात्
मातृहा	अंधः —	पितृहवत् प्रायश्चित्तं कुर्यात् ॥
भ्रातृहा	मूकः —	चांद्रायण व्रतं चरित्वा समन्वितजगन्मातःशङ्खः ब्रह्मादि देवते दुष्कर्मकरणात् पापात् पाहिमां परमेश्वरि इमं मंत्रं समुच्चार्य पलपरिमित सुवर्ण सहित पुस्तकं ब्राह्मणाय दत्वा तं ब्राह्मणं विसर्जयेत्
बालघाती	भूतवक्ता:	ब्राह्मणोद्वाहने यथाविधि हरिवंशश्रवणं च कुर्यात् महारुद्रजपानं कारयेत् तद्दशांशेन अष्टुत्तसंख्याक हूर्व्यावहुत्वा दक्षिणासहितनिष्क परिमितैकादशस्वर्णानि द्विजानुसारतः एकादश पलानि च दद्यात् अन्यब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात् तत आचार्यो वरुणदेवत मंत्रैर्दम्पती स्नापयेत् यजमान आचार्याय वस्त्रालंकरणानि दद्यात् ॥ ॥
गोत्रहा —	कुष्ठी निर्वंशश्च	शतप्राजापत्य व्रतं चरित्वा ब्राह्मणाय भूमि दक्षिणां दत्वा भारतं शृणुयात् ॥ ॥
स्त्रीहंता —	अतिसारी	दशाश्वत्थवृक्षान् रोपयेत् शाकराधेनुं दद्यात् शतं ब्राह्मणांश्च भोजयेत् ॥

पापी	रोगी	प्रायश्चित्तं
राजहा —	क्षयरोगी	गोभूहिरण्यमिष्टान्नजलवस्त्राणि घृतधेनुं तिलधेनुं च दद्यात् ॥
वैश्यहंता	रक्तकुष्ठी	चत्वारि प्राजापत्य व्रतानि चरित्वा सप्तधान्यानि उत्सृजेत् ।
शूद्रहन्ता	दंडापतानकः	
कारुहंता	रूक्षः —	शुक्लवर्णवृषभं दद्यात्
गजघाती	सर्वकार्यकामिहीनः	प्रासादं कारयित्वा गणेशप्रतिमां स्थापयेत् अथवा कुलस्य शतकैः पूजेच्च गणेशपूर्वकं लक्षसंख्यक गणेशमंत्रं जपेत्
उष्ट्रहंता	विकृतस्वरः	कर्पूरकं फलं दद्यात् ॥
अश्वहंता	वक्रतुण्डः	शतपलानि चंदनानि दद्यात्
महिषीघाती	कुलगुल्मी	निष्कत्रयपरिमित स्वर्णमयीं महिषीं दद्यात्
खरहंता	खरोमा	कुलगुल्मिवत् प्रायश्चित्तं कुर्यात् ॥
तरक्षुहंता	केकरेक्षणः —	गुल्ममयीं धेनुं दद्यात् ॥
शूकरहंता	दन्तुरः	सदक्षिणं घृतकुंभं दद्यात्
हरिणघाती	खञ्जः	पलपरिमितस्वर्णमश्वं दद्यात्
शृगालहा	विपादकः	खञ्जवत् प्रायश्चित्तं कुर्यात्
अजाघाती	अधिकांगः	विचित्रवस्त्रयुक्तां अजां दद्यात् ॥
उरभ्रघाती	पांडुरोगी	ब्राह्मणाय पलपरिमित कस्तूरिकां दद्यात्
मार्जारहा	पीतपाणिः	निष्कमित स्वर्णनिर्मितं पारावतं दद्यात्
शुकशारिकाघाती	स्खलितवाक	ब्राह्मणाय सदक्षिणं शास्त्रपुस्तकं दद्यात् ।
बकघाती	दीर्घनसः	शुक्लां गां दद्यात् ॥



पापी रोगी । प्रायश्चित्तं

काकघाती कर्णहीनः कर्णागोदद्य हिंसायांनिष्कृतिरियं
ब्राह्मणे समुदाहृता तदर्द्धार्द्ध प्रमाणेन
क्षत्रियादिष्वनुक्रमात् इति शातातपोक्त
कर्मविपाक द्वितीयाध्याय हिंसाप्रायश्चित्त
विवरणं ॥

सुरापः — श्यावदंतः प्राजापत्य व्रतंचरित्वा सप्ततुलापरिमित
शर्करादत्वा महारुद्र जप्त्वा तद्दशांशेन तिलै
हुत्वा वरुणदेवत मंत्रैरभिषेकं कुर्यात्
मद्यपः रक्तपित्ती सर्पिषोघटं सहिरण्यं मधुनो ऽर्द्धघटं च
दद्यात् ॥

अभक्ष्य कृमिको भीमपंचकोपवासं कुर्यात् ॥
भोक्ता दरः
रजस्वला कृमिलो त्रिरात्रं गोमूत्र यावकं भुञ्जीत ॥
दृष्टान्न॥ दरः
भोक्ता
अस्पृश्य कृमिलो त्रिरात्रमुपवसेत् ॥
स्पृष्टान्न दरः
भोक्ता
परान्नविघ्न अजीर्णी यथाविधिलक्षहोमं कुर्यात् ॥
कर्त्ता —
दूर्वसति मंदो प्राजापत्यत्रयं कृत्वा शतं द्विजान् भोजयेत्
कदन्नदः दराग्निः

विषदः — छर्दिरोगी दशपयस्विनीर्गा दद्यात् ॥
मार्गहा पादरोगी अश्वं दद्यात् ॥
पिशुनः श्वासकासी सहस्रपलसम्मितं घृतं दद्यात् ॥

पापी रोगी । प्रायश्चित्तं

मूर्ख्यः अपस्मारी ॥ ब्रह्मकूर्च्चमयीं धेनुंदत्वा सदक्षिणां
गोदद्यात् ॥
परोप शूली — — अन्नदानेरुद्रजपेन प्रकुर्वीत
तापी रक्तातिसारी उदपानेवटवृक्षारोपणेन कुर्यात्
सुरालयी
जलेवा सासेव्याप्यस्वर्गाढेन गोह्यदानेन प्राजापत्य
शकृन्मूत्र गुदरोगी मेकैवकुर्यात् ॥
कारी । पकृतप्लीह पलत्रयपरिमितं सुवर्णरूप्य ताम्रान्वित
गर्भपात जलोदर जलधेनुं दानेकुर्यात् ॥
कर्त्ता — रोगी
प्रतिमा अप्रतिष्ठः वत्सरत्रयपर्य्यंते प्रतिदिनेअश्वत्थसेवनानंतरं
भंगकारी गृत्वोक्तविधि समांगम्याप्तदाहृयेन स्वपूजिते
विघ्नराजेन संस्थापयेत् ॥
दुष्टवाग्मी खंडितः दुग्धसमन्वितं घटद्वयं पलद्वय
परिमितं रूप्यं च द्विजातये दद्यात्
परनिंदा
वान् खल्वाटः कांचनसहितं धेनुं दद्यात्
सभायां पक्षघात सत्यवर्जितेन निष्कत्रय परिमितं हेमदद्यात्
पक्षपाती वान्

परोप
हासकृत् काणः सकांचनां गां दद्यात् इति शातातपोक्त
कर्मविपाक तृतीयाध्याय प्रकीर्ण
प्रायश्चित्त विवरणं ॥ ॥

विप्रहेम
स्वत् — षोडशपणत्रयान्वितं सुवर्णशतं दद्यात् ॥



पापी	रोगी	प्रायश्चित्तं
ताम्रचौरः	उदुम्बरी	प्राजापत्यव्रतं शतपलपरिमित ताम्रदानेच कुर्य्यात्॥
कांस्यहारी	पुण्डरीक समन्वितः	ब्राह्मणमलंकृत्य तस्मै शतपलं कांस्य दद्यात्॥
मुक्तिहारी	पाण्डुमूर्द्धजः	उपवासानन्तरं पलशत शुक्तिं दद्यात्॥
त्रपुहारी	नेत्ररोगवान्	उपोष्य विधिवत् हुतधेनुं दद्यात्॥
दुग्धहारी	बहुमूत्रकः	ब्राह्मणाय यथाविधि दुग्धधेनुं दद्यात्
दधिचौरः	मदवान्	विप्राय दधिधेनुं दद्यात्
मधुचौरः	नेत्ररोगवान्	उपवासं कृत्वा धेनुं दद्यात्
इक्षुविकारहारी	उदरगुल्मवान्	गुडधेनुं प्रदद्यात्॥
लोहहारी	कर्बुरांगः	एकदिनमुपोष्य शतपल लोहं दद्यात्॥
तैलचौरः	कण्ड्वादि पीडितः	उपोष्य विप्राय तैलघटद्वयं दद्यात्॥
आमान्नहारी	हीनदीप्तिः	निष्कद्वयस्वर्णनिर्मिताम् अश्विनीकुमारौ दद्यात्
पक्वान्नहारी	जिह्वारोगी	लक्षसंख्यक गायत्रीं जपेत् तिलकर(?)ाकं तद्दशांशहोमं च कुर्य्यात्
फलहारी	व्रणिताऽङ्गुलिः	द्विजानयेऽयुतसंख्यक नानाफलं दद्यात्
ताम्बूलहारी	श्वेतोष्ठः	सदक्षिणाकम् विद्रुमद्वयं दद्यात्॥
शाकहारी	नीललोचनः	ब्राह्मणाय महानीलमणिद्वयं दद्यात्
कंदमूलहारी	ह्रस्वपाणिः	यथाशक्ति देवगृहे उद्यानं च कुर्य्यात्॥


पापी	रोगी	प्रायश्चित्त
सौगंधिकहारी	दुर्गंधांगः	अष्टौलक्षसंख्यक पद्मैर्होमं कुर्य्यात्
दारुहारी	खिन्नपाणिः	विप्राय पलद्वयपरिमित कुंकुमं दद्यात्
विद्यापुस्तकहारी	मूकः	ब्राह्मणाय सदक्षिणं न्यायेतिहासं दद्यात्॥
वस्त्रहारी	कुष्ठी	निष्कमितहेम निर्मित प्रजापति वस्त्रयुग्मं च दद्यात्॥
ऊर्णाहारी	लोमशः	केवलान्वित निष्कमित स्वर्णनिर्मित वह्निमूर्तिमर्चयित्वा ब्राह्मणं दद्यात्
पट्टसूत्रहर्ता	विलोमा	धेनुं दद्यात्
औषधाय हर्ता	सूर्यावर्त रोगी	मासं व्याप्य सूर्यार्घ्यं कांतनंच दद्यात्
रक्तवस्त्र प्रवाल हारी	रक्तवान्	मनिरागसमन्वितां सवत्सां महिषीं दद्यात्
विप्ररत्नापहारी	अनपत्यः	महारुद्रजपादिकं कुर्य्यात् तद्दशांशं पलाशसमिद्भिर्यथाविधि जुहुयात् भूतवत्सोक्त सर्वकर्म च कुर्य्यात्
देवहारी	विविधज्वरी	नवज्वरे कोटि रुद्रं जपेत् महाज्वरे॥ महारुद्रं रौद्रज्वरे अतिरौद्रं वैसवज्वरे महारौद्रेतिरौद्रं च जपेत्॥
नानाविध द्रव्यचौरः	ग्रहणीयुतः	शक्त्यानुसारेण वस्त्राणि हेम च दद्यात्

इति शातातपीय कर्मविपाक चतुर्थोऽध्यायोक्त लोय(?) प्रायश्चित्त विवरणे




पापी	रोगी ।	प्रायश्चित्तं
मातृगामी	लिंगहीनः	अन्ततः कृष्णमाल्यादि भूषित कृष्णवस्त्र समाकृत कुंभे विन्यस्य तदुपरि कांस्यपात्रे निष्कद्वयमित सुवर्णनिर्मित नरवाहनं कुबेरं पुरुषसूक्तेन यजेत् अथर्ववेदविद्ब्राह्मण स्तत्र अथर्वोक्तकर्म कुर्यात् ब्राह्मणाय विंशति निष्कपरिमित सुवर्णनिर्मितपुत्रिकां निष्पापोऽहमिति ब्रुवन् दद्यात् निधीनामधिपो देवः शंकरस्य प्रियः सखा सौम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु इति मंत्रेण तं कुबेरं आचार्याय दद्यात् ॥
चांडालीगामी	हीनमुष्कः	मातृगामिवत् प्रायश्चित्तं कुर्यात् ॥
गुरुजायाभिगामी	मूत्रकृच्छ्री	नीलवस्त्राच्छिन्न नीलमाल्यादि भूषित कुंभं पश्चिमस्यां दिशि संस्थाप्य तदुपरि ताम्रपात्रे षड्निष्कसुवर्णनिर्मित वरुणं पुरुषसूक्तेन यजेत् सामवेदी ब्राह्मणः तत्र सामवेदमाचरेत् विंशतिनिष्कमित सुवर्ण पुत्तलिकां निष्पापोऽहमिति सुब्रह्मण्याय दद्यात् यादसामधिपो देवो विश्वेषामपि पावनः संसाराब्धौ कर्णधारो वरुणः पावनोऽस्तु मे इति मंत्रेण आचार्याय स्वर्णवरुणं दद्यात् ॥
स्वसुतागामी	रक्तकुष्ठी	पूर्वतः पीतमाल्यादि भूषित पीतवस्त्र समाकृतकलशे संस्थाप्य तस्योपरि स्वर्णपात्रे निष्कषट्कमित सुवर्णनिर्मित वासवं पुरुषसूक्तेन यजेत् तत्र ऋग्यजुःसामानि समाचरेत् ब्राह्मणः ॥

पापी	रोगी	प्रायश्चित्तं
		तं पूज्य निष्पापोऽहमिति ब्रुवन् तस्मै प्रात । सुवर्णनिर्मित पुत्रिकां दद्यात् । देवानामधिपो देवो वज्री विष्णुनिकेतनः शतयज्ञसहस्राक्षः पापं मम निकृंततु इति मंत्रं पठेत् ॥
भ्रातृजायाभिगामी	गुल्मकुष्ठी	स्वसुतागमन प्रायश्चित्तस्यार्धं कृत्वा। केतिलकरणकदशांशहोमेव कुर्यात्
पुत्रजायाभिगामी	कृष्णकुष्ठी	एतदेव प्रायश्चित्तं कुर्यात्
अगम्याभिगामी	क्षयमेहली	कार्पासभारकांस्यदोह संयुक्त सवत्सकतिल षष्टिमित हेमधेनुं सुरभी वैष्णवी माता मम पापं व्यपोहतु इमं मंत्रमुच्चार्य दद्यात् ॥
तपस्विनीसंगमी	अश्मरीगदी	मधुधेनुं हिरण्यसहित प्रातर्द्रोणपरिमित तिलं च दद्यात् ॥
पितृष्वसृगंता	दक्षिणाक्षिव्रणी	शक्तितः अजां दद्यात् ॥
मातुलानीगंता	पृष्ठकुब्जः	कृष्णाजिनं प्रदद्यात् ॥
मातृष्वसृगंता	वामांगे व्रणवान्	दासदाने अगम्यागमन प्रायश्चित्तं च कुर्यात् ॥
मृतभार्याभिगामी	मृतभार्यः	एकब्राह्मणं विवाहयेत् ॥
स्वगोत्रस्त्रीप्रसंगी	भगंदररोगी	महिषीं दद्यात् ॥
तपस्विनीप्रसंगी	प्रमेहगदी	मासं व्याप्य रुद्रं जपेत् यथाशक्ति कांचनं दद्यात्
दीक्षितस्त्रीप्रसंगी	दुष्टरक्तरोगी	प्राजापत्यद्वयं कुर्यात् ॥



पापी	रोगी	प्रायश्चित्तं
स्वजातिस्त्रीगामी	हृदयव्रणी	प्राजापत्यद्वयंकुर्य्यात
पशुयोनिगामी	मूत्राघाती	तिलपात्रद्वयंदद्यात
अन्ययोनिगामी	गुदस्तंभी	मासंव्याप्यप्रतिदिनेसहस्रसंख्याक मलकरणकशिरःस्नानंकुर्य्यात स्त्रीणामपितत्तत् पुरुष संसर्गात तत् पुरुष संसर्गात्तत् प्रायश्चित्ते इतिशातातपीयकर्मविपाकेपंच माध्यायोक्तागम्यागमन प्रायश्चित्तविरणे
— — — — पाप युक्तः	वरणविशेष विशिष्टः	और्ध्वदेहिक पूर्वकालीन तत् प्रभादि कर्तव्य प्रायश्चित्ते
कुमारीगेता	व्याघ्रादि हतः	परकन्याविवाहयेत
विषदः —	सर्पदष्टः	नागबलिदाने कांचदानेच कुर्य्यात
कूपनाशकः	गजहतः	चतुर्निष्कमित हेमगजंदद्यात
राजकुमारघ्नः	राजहतः	हिरण्मय पुरुषंदद्यात ॥
पशुहिंसकः	चौरहतः	धेनुंदद्यात ॥
मित्रभेदी	वैरिहतः	वृषं दद्यात
कदर्शिः	वृकहतः वृषहतः	यथाशक्ति कांचनंदद्यात
गुरुघाती	शय्यामृतः	निष्कमित सुवर्णनिर्मित पात्रस्थितविष्णु प्रतिष्ठित तूली समन्वित शय्यांदद्यात
मत्सरी	शौचहीन मृतः	द्विनिष्कस्वर्णज हरिंदद्यात
द्रोही — —	संस्कार हीनमृतः	कुमारं विवाहयेत ॥

पाप		
युक्तः	मरणविशेष विशिष्टः	और्ध्वदेहिकपूर्वकालीन प्रभादि कर्तव्यप्रायश्चित्ते ॥
निक्षेपहारकः	कुक्कुरहतः	अत्रप्रायश्चित्तस्यानुक्तत्वात् व्याघ्रादिहत अग्न्यादिपदर्शनात्तु तत्रोक्तप्रायश्चित्ते युक्ते ॥
पाशिकः	अरण्य सूकरहतः	पूर्ववत् ॥
कृतवासाः निकृंतनश्च	कृमिहतः	द्विजायगोधूमान्नंदद्यात
शोकरद्रोही	शृंगिहतः	वस्त्रसंयुक्त वृषभंदद्यात
सूचकः	शकटहतः	उपस्करान्विते अश्वंदद्यात
मेदिनीचौरः	भृगुपात हतः	धान्यपर्वतंदद्यात
यज्ञहानिकर्ता	वह्निहतः	स्वशक्तित उपानहंदद्यात
दक्षिणचौरः	दवहतः दारुहतः	सदनेसत्रोकुर्य्यात ॥
क्रतुनिंदकःश्रुति निंदकोपिपापः	शस्त्रहतः	दक्षिणांमहिषीं दद्यात
द्विजनिंदाकर्ता	प्रस्तरहतः	सवत्सां पयस्विनीं गांदद्यात
कुमतिप्रदः	विषहतः	क्षेत्रसंयुक्तां मेदिनींदद्यात
हिंस्रः	उद्बंधनमृतः	पयस्विनीं गांदद्यात
सेतुभेदी	जलहतः	निष्कत्रयमितस्वर्णंवरुणंदद्यात
राजदंतिहृत	हृदहतः	स्वर्णसंयुते सौवर्ण वृषंदद्यात
लोहहृत	तालीसार मृतः	तिलतोलसंख्याक गायत्रीजपेत
स्वदेयकार्यकारकः	साकल्यादि हतः	यथोचितरुद्रंजपेत



पाप	मरणविशेष	ऊर्द्ध्वदैहिक पूर्वकालीन ७आदि
शुक्लः	विशिष्टः	कर्त्तव्यप्रायश्चित्तं ॥
अनध्याये	विद्युद्धतः --	विद्यादानंकुर्य्यात्
ऽध्ययन		
कर्त्ता	अस्पर्शसंसर्गीमृतः	वेदपारायणं कुर्य्यात्
अस्पर्शी	वांतश्चित्यमृतः	सम्झास्त्रपुस्तकं दद्यात्
प्राणघ्नकृत्	अस्पर्शास्पर्शान	
	मृतश्च --	
मद्य	पतितमृतः --	षोडशप्राजापत्यानिकुर्य्यात्
विक्रेता		नवतिकृच्छ्राणिचरेत्
द्विजवधकृत्	अनपत्यमृतः	निष्कत्रयमितंस्वर्णंदद्यात्
	हयाहतः ---	कनकनिर्म्मित कपिंदद्यात्
	कपिहतः	शतंद्विजान् भोजयेत्
	विष्टविकामृतः	तिलधेनुं दद्यात्
	केठकवलमृतः	अष्टौकृच्छ्रान् समाचरेत् इत्यगतीनो
	केशरोग मृतः	विशेषप्रायश्चित्तं ॥

अगतीनांसाधारणप्रायश्चित्तं

सफल समधान्योपरिपंचपल्लव सर्वौषधि संयुक्ते कुम्भवस्त्रसमाक्षतसकालमूलेकलसंस्थाप्यतत्रमहिषासनसंस्थितेबहुभुजेदंडहस्तेस्वर्णकेऽलसंयुतेनिष्कपरिमिते प्रेतरूपिणंपुरुषंसंस्थाप्यपूजयेत् प्रत्यहं पुरुषसूक्तेनकुम्भेनतर्पयेत् तत्रकलसे षडंगरुद्रंजपेत् यमसूक्तेन यमपूजादिकं आत्मविशुद्ध्यं गायत्रीजपं ॥

ग्रहशांति पूर्वकं दर्शश्राद्धतिलहोमेव कुर्य्यात् अज्ञातगोत्रविप्राय सतिलमुदकं दद्यात् इमेतिलमयं पिंडं मधु सर्पिः समन्विते ददामि तस्मै प्रेताय यःपीडां कुरुतेमम इतिमंत्रेण मधुशर्करायुक्त प्रस्थमितकुम्भ तिल पिष्टपिंडंप्रेतरूपायदद्यात् यजमानः प्रेतमुद्दिश्यतिलपात्रसंयुतान् द्वादश कुम्भकलसान् विप्रमुद्दिश्यैकं कलसंवदद्यात् वरायुधधरः शुचिराचार्य्यः वरुणदैवत मंत्रैः कलसोदकै दंपती अभिषिंचेत् ततोयजमान आचार्य्यायदक्षिणांदद्यात्नारायणबलिंचकुर्य्यात् एवं कृते ॥ विधानेन प्रकुर्य्यादौर्द्ध्वदैहिकं ॥ ततः प्रेतत्वनिर्मुक्ताः पाविता स्वपितास्तथा दद्युःपुत्रांश्च ॥ पौत्रांश्च आयुरारोग्यसंपदः ॥ इति शातातपीय कर्म्मविपाक महाध्यायोक्ता ऽगति प्रायश्चित्त विवरणं ॥

कर्म्मशीलः त्रि यःफलनिरपेक्षः स्वभावेन कर्म्मकरोतिसः तत् पर्य्यायः कार्म्मः २ इत्यमरः ॥

कर्म्मशूरः त्रिकर्म्मठः फलपर्य्यंत कर्म्मसमापकः इत्यमरः कर्म्मसचिवः पुं कर्म्मोपयुक्तसचिवः अक्षपटलाध्यक्षादिः इत्यमरः कर्म्मसंन्यासिकः पुं इतिः संन्यासी इतिहलायुधः ॥ कर्म्मसाक्षी न पुं सूर्य्यः इति हेमचंद्रः कर्म्मक्षमः त्रि कर्म्मकरणसमर्थः तत्पर्य्यायः अलंकर्म्मीणः २ इत्यमरः ॥ कर्म्मांतः पुं कर्म्मभूः कृष्टभूमिः इतिहेमचंद्रः ॥ कर्म्मारः पुं कर्म्मकारः कामार इतिभाषा वेणुः बांश इति ख्यातः कर्म्मरंगः कामरांगा इति भाषा इति राजनिर्घंटः ॥ कर्म्मार्हः पुं पुरुषः इति राजनिर्घंटः क्रियायोग्ये त्रि कर्म्मिष्ठः त्रि क्रियावान् अतिशय कर्म्मविशिष्टः इति व्याकरणं कर्म्मी त्रि कर्म्मविशिष्टः कर्म्म विद्यते अस्येतिकर्म्मन् इनिः कर्म्मीरः पुं किर्म्मीरवर्णः इत्यमरटीका ॥



कर्मेन्द्रिये क्ली कर्मनिष्पादकविषय
पंचकं यथा वाक् १ पाणिः २
पादः ३ पायुः ४ उपस्थः ५ इति
वेदांतः ॥
कर्व दर्पे इति कविकल्पद्रुमः ॥
कर्वः पु कामः उंदरुः इति ॥
सिद्धांतकौमुद्यां उणादिवृत्तिः ॥
कर्वटः पु क्ली द्विशतग्राममध्ये
मनोरमस्थाने ग्रामशतस्य जनाः
क्रयविक्रयादिना सेवादिना वा
येन ग्रामेण जीवंति सः इति
केचित् वस्तुतः समग्रामः इत्येके
वस्तुतः समे शहस्थाने इत्यपरे ॥
इत्यमरटीकायां भरतः वस्तुतः
शतग्रामसेव्यहस्थाने इति ॥
सारसुंदरी
कर्वटे क्ली पुरे नगरे इति
जटाधरः
कर्बुरः पु राक्षसः इति ॥
सिद्धांतकौमुद्यां उणादिवृत्तिः
व्याघ्रः इति मेदिनी ॥
कर्वरी स्त्री शिवा इति विश्वमेदिन्यौ
हिंगुपत्री इति जटाधरः ॥
कर्वुरः पु राक्षसः इति
शब्दार्णवः चित्रवर्णः इत्यमरः
शटी इति भरतः ॥

कर्बूरः पु राक्षसः शटी
इत्यमरः ॥
कर्पूरः पु कर्बूरः कचूर इति
हिंदीभाषा इतिराजनिर्घंटः
कर्षः पु क्ली षोडशमाषकपरिमाणे
अशीतिरक्तिका तत्पर्यायः
अक्षः २ इत्यमरः वैद्यकमते
तोलकद्वये तत्पर्यायः सुवर्णं
१ अक्षः ३ बिडालपदकं ४ पिचुः
५ पाणितलं ६ उडुंबरं ७ तिंडुकं
८ कवडग्रहः इति परिभाषा ॥
दशमाषकः इति राजनिर्घंटः
कर्षः पु कर्षणे इतिमेदिनी
विभीतकवृक्षः इति शब्दरत्नावली
कर्षकः त्रि कृषिजीवी कृषाण इति
भाषा तत्पर्यायः क्षेत्राजीवः
२ कृषिकः ३ कृषीवलः ४ इत्यमरः
कार्षकः ५ इति तट्टीका
आकर्षणकर्मीच (आ
कर्षणं क्ली कृषिकर्मलांगलादि
भूम्यादिखनने वा इति भाषा
इति हेमचंद्रः आकर्षणं टोनव
इति भाषा कर्षणिः स्त्री असती
इत्युणादिकोषः ॥
कर्षणी स्त्री क्षीरिणीवृक्षः इति
राजनिर्घंटः ॥

कर्षफलः पु विभीतकवृक्षः
इत्यमरः
कर्षफला स्त्री आमलकीवृक्षः
इतिरत्नमाला
कर्षार्द्धे क्ली तोलकपरिमाणे
इतिवैद्यपरिभाषा ॥
कर्षिणी स्त्री क्षीरिणीवृक्षः ॥
अश्वमुखवेष्टनरज्जुस्थितलौहे
तत्पर्यायः खलीनः २ कवीयं ३
कविका ४ इतिजटाधरः ॥
कर्षूः पु वार्त्ता करीषाग्निः
इत्यमरः वार्त्ताऽत्र कृषिः इति ॥
रमानाथः जीविका इति ॥
भरतः ॥
कर्षूः स्त्री कुल्या अल्पा कृत्रिमा
सरित् इत्यमरः नदीमात्रे ॥
इतिरत्नकोषः इत्युज्वलः इति
मेदिनी तद्यथा चतुरंगुल ॥ला
दृष्टी खातवदंतरा खपायः ला
वितस्त्यायता लिप्तः कर्षूः कुर्यात्
कर्षूसमीपे अग्नित्रयमुपसमाधा
य परिस्तीर्य्य तत्रैकैकस्मिन्नाहुति
त्रये जुहुयात् इति श्राद्धविवेक
धृविसमसूत्रे ॥
कर्हि व कदा कस्मिन्काले ॥
कधन कबे इति भाषा इति
व्याकरणं ॥

कर्हिचित् व कस्मिंश्चित् काले
कोनकाले इति भाषा तत्
पर्यायः जातु १ कदाचित् २
इतिहेमचंद्रः ॥
फल उ॰ संख्याये शब्द इति
कविकल्पद्रुमः
कल न क गतौ संख्याये
इति कविकल्पद्रुमः ॥
कलंक तुदे प्रेरणे इति
कविकल्पद्रुमः
कलं क्ली शुक्रे इतिमेदिनी
कोलिवृक्षः इति शब्दचंद्रिका
कलः पु मधुरास्फुटध्वनिः इत्यमर
सालवृक्षः इति राजनिर्घंटः
कलः त्रि अजीर्णः इतिमेदिनी
कलकः पु शकुलमत्स्यः इति
हेमचंद्रः ॥
कलकंठः पु कलध्वनिः हंसः
पारावतः पिकः इतिमेदिनी
कलकलः पु कोलाहलः
सालनिर्यासः इति मेदिनी ॥
कलघोषः पु कोकिलः इति
शब्दरत्नावली ॥
कलंकः पु चिह्नं अपवादः
लोहमले इतिमेदिनी
कलंकषः पु सिंहः इति
शब्दमाला ॥



कलंकया स्त्री करताली इति
शब्दरत्नावली ॥
कलंकी ३ अपवादग्रस्तः यथा
कलंकी जायते विलेषणग्याति
अविवेके इति तिथ्यादितत्त्वे
विह्वशुक्रः लोहमलविशिष्टः
अत्र कलंक शब्दात्स्वार्थेइन्
कलंकरः पुं आवर्तः जलभ्रमः
इति त्रिकाण्डशेषः ॥
कलंजः पुं विषाक्तहृत ॥
मृगपक्षिणा इति त्रिकाण्डशेषः
ताम्रकूटः दोक्तानामाक इति
भाषा यथा विसुसिद्धान्त ॥
सारावल्यां वैद्यके अथ धूमप
पीयूषपान गुणाः कलंज सेवेष्ट
नधूमपानात्स्याद्देतमुहृदिशुखरोग
हानिः कफकुमामज्वरहानि
हृद्गुणो धर्मविद्याप्रवर्णकसेव्यं
कलटं क्ली गृहाच्छादने चाल
इति भाषा इति शब्दरत्नावली
कुटलमिति च पाठः ॥ (का
कलंकूलिका स्त्री इक्कावती का
तत्पर्यायः लोकिनी २ लंजिका
इति त्रिकाण्डशेषः ॥
कलत्रं क्ली श्रोणिः भार्य्या
इत्यमरः राज्ञां दुर्गस्थाने ॥
इति हेमचंद्रः ॥

कलधूतं क्ली रूप्यं इति
राजनिर्घण्टः ॥
कलधौतं क्ली स्वर्णं रजतं ॥
इति मेदिनी कलध्वनिः इति
विश्वः (ल:
कलध्वनिः पुं पारावतः कोकि
मयूरः इति मेदिनी ॥ (ध्व
मधुरास्फुट शब्दः इति कलशब्दा
भ्रमरः ॥
कलनं क्ली विहे दोषः इति
हलायुधः गर्भे स्थिते शुक्र ॥
योनितेतनु एकरात्रेण भवति
इति श्रीभागवते ॥
कलनः पुं वेतसवृक्षः इति ॥
राजनिर्घण्टः ॥
कलना स्त्री वशीभूतत्वे वशता
यथा करालेयत्त्वेड कवलित
वतः कालना इत्यानेदल हरी
जल्पना च ॥
कलंदरः पुं वर्णशंकरजाति ॥
विशेषः सतुलेदात् तीवर कन्यायां
जातः इति ब्रह्मवैवर्त्तपुराणे
कलंदिका स्त्री सर्वविद्या इति
हेमचंद्रः ॥
कलंकुः स्त्री ब्रोली शाकः इति
राजनिर्घण्टः ॥
कलभः पुं करभः पुं हस्तिशावक

इति भाषा सत्पंचवर्षपर्य्यन्ते
इति सुभूतिः तत्पर्य्यायः
करिशावकः २ इत्यमरः दुर्दान्तः
इयालः ४ धतूरवृक्षः इति
राजनिर्घण्टः ॥
कलभवल्लभः पुं पीलुवृक्षः इति
राजनिर्घण्टः ॥
कलभी स्त्री चव्यवृक्षः इति
राजनिर्घण्टः ॥
कलमः पुं स्वनामख्यातलिपि
साधनवस्तु तत्पर्य्यायः लेखनी
२ वर्णतूली ३ अक्षरतूलिका ४
इति जटाधरः स्वनामख्यात ॥
शालिधान्य विशेषः अस्य गुणाः
रक्तदोष त्रिदोष नाशित्वं ॥
वक्तहितकारित्वं कषायत्वं च इति
राजवल्लभः चौरः इति मेदिनी
कलमोत्तमः पुं गंधशालिः
इति राजनिर्घण्टः
कलंबः पुं शरः शाकनाडिका
इत्यमरः कदंबः इति विश्वः
कलंबकः पुं धाराकदंबः इति
राजनिर्घण्टः (इति
कलंबिका स्त्री कलंबीशाकः
शब्दरत्नावली ग्रीवापश्चान्नाडी
तत्पर्य्यायः मन्या २ इति ॥
हेमचंद्रः ॥

कलंबी स्त्री जलजलताशाक
विशेषः कलमी इति भाषा तत्
पर्य्यायः कडंबी २ कलंबुः ३
कलंबिका ४ इति शब्दरत्नावली
अस्य गुणाः स्तन्यदुग्ध शुक्रश्लेष्म
कारित्वं मधुरत्वं कषायत्वं ॥
गुरुतरत्वं च इति राजवल्लभः
कलंबुटं क्ली हैयंगवीने नवनीते
इति हारावली
कलंबूः स्त्री कलंबीशाकः इति
शब्दरत्नावली ॥
कलरवः पुं कपोतः पायरा
इति भाषा इत्यमरः कोकिलः
इति राजनिर्घण्टः मधुरास्फुट
ध्वनिः इति कलशब्दार्थे अमरः
कललः पुं क्ली जरायुः गर्भवेष्टन
चर्म इत्यमरः ॥
कललजः पुं रालः धुना इति
भाषा इति राजनिर्घण्टः
कललजोद्भवः पुं सालवृक्षः
इति राजनिर्घण्टः ॥
कलविंकः पुं चटकः इत्यमरः
कलिंगकवृक्षः इति मेदिनी
कलंकः श्वेतचामरः इति ॥
सारस्वतः
कलशः त्रि जलाधारविशेषः
कलशी इति ख्यातः तत्पर्य्यायः



घटः २ कुटः ३ निपः ४ इत्यमरः
कलसः ५ कलसिः ६ कलसी ७
कलसं ८ कलशिः ९ कलशी १०
कलशं ११ इति तट्टीका कुंभः ॥
१२ करीरः १३ इति हेमचंद्रः ॥
कलावती दीक्षा प्रकरणोक्ता ॥
तस्य परिमाणं यथा पंचाशदंगुल
व्यामउत्सेधः षोडशांगुलः ॥
कलसानां प्रमाणंतु मुखमष्टांगु
लस्मृतं षट्त्रिंशदंगुलं कुंभे
विस्तारोन्नतिशालिनं षोडशं
द्वादशं वापि ततो न्यूनं न कारयेत्
इति तंत्रसारः ॥ या
कलशः स्त्री पृश्निपर्णी वा कुलि
इति भाषा इत्यमरः ॥ घटः
इत्यमरटीकायां रायमुकुटः ॥
कलशी स्त्री स्वनामख्यातजल
पात्रं पृश्नीपर्णी इत्यमरटीकायां
रायमुकुटः ॥
कलसः त्रि कलशः घटः इति
हेमचंद्रः द्रोणपरिमाणे पुं ॥
इति वैद्यकपरिभाषा ॥
कलसिः पुं पृश्निपर्णी इत्यमर
टीका शब्दरत्नावली च गगरी
इत्यमरटीका हारावली च ॥
कलसी स्त्री पृश्निपर्णी इति ॥
शब्दरत्नावली कलसः इत्यमर
टीका ॥
कलसीसुतः पुं अगस्त्यमुनिः
इत्यमरटीकायां वाचस्पतिः
कलसोदधिः पुं समुद्रः कलस इव
उदधिः मेघनाधारत्वात् इति
महाभारते ॥
कलहः पुं क्ली विवादः लडाइ
झगडा इति भाषा तत्पर्य्यायः
युद्धं २ आयोधनं ३ जन्यं ४
प्रधनं ५ प्रविदारणं ६ मृधं ७
आस्कंदनं ८ संख्यं ९ समीकं १०
सांपरायिकं ११ समरः १२ अनीकः
१३ रणः १४ विग्रहः १५ संप्रहारः
१६ अभिसंपातः १७ कलिः १८
संस्फोटः १९ संयुगः २० अभ्यमर्द्दः
२१ समाघातः २२ संग्रामः २३
अभ्यागमः २४ आहवः २५ समुदायः
२६ संयत् २७ समितिः २८ आजिः
२९ समित् ३० युत् इत्यमरः
समीकं ३२ सांपरायकं ३३
संस्फेटः ३४ युत् ३५ इति
तट्टीका ॥
कलहः पुं वाटः खड्गकोषः
भेडने इति मेदिनी ॥
कलहंसः पुं हंसविशेषः
वालिहांस इति भाषा तत्पर्य्यायः
कादंबः २ इत्यमरः कलनादः

मरालकः ४ इति राजनिर्घंटः
राजहंसः नृपोत्तमः इति
विश्वमेदिन्यौ परात्मा ब्रह्म
इति शब्दरत्नावली
कलहनाशनः पुं पूतिकरंजः
इति शब्दमाला ॥
कलहप्रिया स्त्री सारिकापक्षी
इति राजनिर्घंटः नारदे पुं
इति महाभारते
कलहांतरिता स्त्री नायिका
भेदः अस्यालक्षणं यतिमव
मन्यपश्चात् परितप्ता अस्याः
क्रिया भ्रांतिः संतापः सम्मोहः
निश्वासः ज्वरः प्रलापादिः
इति रसमंजरी
कलास्त्री मूलधनवृद्धिः सूद इ
भाषा शिल्पादि अंशमात्रं ॥
चंद्रस्य षोडशांशः कालमानः
सतु त्रिंशत्काष्टात्मकः इति
मेदिनी स्त्री रजः नौका ॥
कपटः इति विश्वः राशे
स्त्रिंशद्भागोंऽशस्तस्य षष्टिभागः
यथा विकलानां कलाषष्ट्या तत्
षष्ट्याभाग उच्यते तत्रिंशता ॥
भवेद्राशिर्भगणो द्वादशैव ते
इति सूर्यसिद्धांतः अथ चैव
तेषोकाश्चतुःषष्टिकलालिख्यते
गीतं १ वाद्यं २ नृत्यं ३ नाट्यं ४
आलेख्यं ५ विशेषकच्छेद्यं ६
तंडुल कुसुम वलि विकाराः ७
पुष्पास्तरणं ८ दशनवसनांगरागाः
९ मणिभूमिकाकर्म १० शयनरचनं
११ उदकवाद्यं १२ उदकघातः १३
चित्रायोगाः १४ माल्यग्रथनविक
ल्पाः १५ शेखरापीडयोजनं १६
नेपथ्ययोगाः १७ कर्णपत्रभंगाः १८
गंधयुक्तिः १९ भूषणयोजनं २०
ऐंद्रजालं २१ कौचुमारयोगाः २२
हस्तलाघवं २३ चित्रशाकपूपभक्ष्य
विकारक्रिया २४ पानकरसरागासव
योजनं २५ सूचीवापकर्माणि २६
सूत्रक्रीडा २७ प्रहेलिका २८
प्रतिमाला २९ दुर्वचकयोगाः ३०
पुस्तकवाचनं ३१ नाटकाख्यायिका
दर्शनं ३२ काव्यसमस्यापूरणं ३३
पट्टिका वेत्रवाणविकल्पाः ३४
तर्ककर्माणि ३५ तक्षणं ३६
वास्तुविद्या ३७ रूप्यरत्नपरीक्षा ३८
धातुवादः ३९ मणिरागज्ञानं ४०
आकरज्ञानं ४१ वृक्षायुर्वेदयोगाः
४२ मेषकुक्कुटलावकयुद्धविधिः ४३
शुकसारिकाप्रलापनं ४४
उत्सादनं ४५ केशमार्जनं ॥
कौशलं ४६ अक्षरमुष्टिकाकथनं



४७ म्लेच्छितकविकल्पाः ४८ देश
भाषा ज्ञानं ४९ पुष्पशकटिका
निमित्त ज्ञानं ५० यन्त्रमातृका ५१
धारणमातृका ५२ संपाठ्यं ५३
मानसीकाव्य क्रिया ५४ क्रिया
विकल्पाः ५५ छलितक योगाः ५६
अभिधान कोषछंदो ज्ञानं ५७
वस्त्रगोपनानि ५८ द्यूतविशेषः
५९ आकर्षक्रीडा ६० बालक
क्रीडनकानि ६१ वैनायिकीनां
विद्यानां ज्ञानं ६२ वैजयिकीनां
विद्यानां ज्ञानं ६३ वैतालिकीनां
विद्यानां ज्ञानं ६४ इति
श्रीभागवतटीकायां श्रीधरस्वामी
क्वचित्पुस्तके सूचीवापकर्मसूत्र
क्रीडा इत्येके पेगं उदकं
वीणा डमरुक वाद्यानि वैतालि
कीनामित्यत्र वैयासिकीनामिति
च पाठः ॥ कलाकुलं क्ली
विषं इति ॥
राजनिर्घण्टः ॥
कलाकेलिः पुं कामदेवः ।
इतित्रिकाण्डशेषः
कलाङ्कुरः पुं सारसपक्षी
कंसासुरः इतित्रिकाण्डशेषः
कलाचिका स्त्री प्रकोष्ठः सतु
कफोणेरधो मणिबन्धपर्य्यन्तः

इति हेमचन्द्रः
कलाची स्त्री कलाचिका इति
शब्दरत्नावली
कलादः पुं स्वर्णकारः इत्यमरः
कलानिधिः पुं चन्द्रः इत्यमरः
कलानुनादी
कलानुनादी पुं शलभः भ्रमरः
कलविंकः चटकः कपिञ्जलः
चातकः इति मेदिनी ॥
कलान्तरं क्ली सूदः लाभः सच
इति भाषा इति लीलावती ॥
कलापः पुं समूहः मयूरपिच्छः
इति काञ्ची भूषणं तूणः चन्द्रः ॥
विदग्धः व्याकरणविशेषः
इति मेदिनी ग्रामविशेषः ॥
यथा देवापिर्योगमास्थाय ॥
कलापग्राममाश्रितः सोमवंशे
कलौ नष्टे कृतादौ स्थापयिष्यति
इति श्रीभागवते कलापकः पुं
हस्तिकण्ठबन्धः इति हेमचन्द्रः
कलापिनी स्त्री रात्रिः नागरमुस्ता
इति राजनिर्घण्टः ॥
कलापी पुं प्लक्षवृक्षः मयूरः
इति मेदिनी कोकिलः इति
धरणी ॥
कलापूर्णः पुं चन्द्रः इति ॥

शब्दचन्द्रिका ॥
कलाभृत् पुं चन्द्रः इति
हेमचन्द्रः ॥
कलामकः पुं कलमधान्यं इति
हेमचन्द्रः ॥
कलाम्बिका ऋणानां प्रयोगः
ऋणदाने धारदेया इति भाषा
इति त्रिकाण्डशेषः
कलायः पुं शमीधान्यविशेषः
मटरकेराउला इति भाषा तत्
पर्य्यायः सतीलकः २ हरेणुः ३
खण्डिकः ४ इत्यमरः त्रिपुटः ५
अतिवर्तुलः ६ इति रत्नमाला
शुद्धशाकः ७ शमनः ८ नीलकः ९
कण्ठी १० सतीलः ११ हरेणुकः १२
सतीनः १३ सतीनकः १४ ॥
अस्य गुणाः वातकृत्पित्तप्रदोष
कारित्वं पित्त दाह कफ ॥
नाशित्वं शीतत्वं कषायत्वंच
अस्य शाकगुणाः मधुरत्वं ॥
पित्तश्लेष्महरत्वं गुरुत्वं कषायत्वं
रसत्वं रुक्षत्वं मलभेदित्वं ।
वायुकोपनत्वंच इति राजनिर्घण्टः
कलायनः पुं नर्त्तकः इति ॥
शब्दरत्नावली
कलायास्त्री गण्डदूर्वा इति
राजनिर्घण्टः ॥

कलालापः पुं भ्रमरः इति
राजनिर्घण्टः ॥
कलावती स्त्री तुम्बुरुगन्धर्वस्य वीणा
इति हेमचन्द्रः श्रीराधामाता ॥
सा तु वृषभानुपत्नी इति ब्रह्म
वैवर्त्तपुराणम् आगमोक्तो विशेषः
यथा रतिस्त्वकलावतीति निष्
काद्यजयदेवः दीक्षाविशेषः
तस्याः क्रमो मन्त्रं विना लिख्यते
शिष्यः पूर्वमुपोषितः कृतनित्य
क्रियः स्वस्तिवाचन पूर्वकं संकल्पं
कुर्य्यात् ततो गुरुं वरयात् अथ
गुरुश्च अस्य द्वारदेशे सामान्यार्घ्यं
कुर्य्यात् तदर्घ्यजलेन द्वारमभ्युक्ष्य
द्वारपूजां कुर्य्यात् ततो दक्षिण
पादपुरःसरं द्वारं वामशाखां
स्पृशन् दक्षिणाङ्गं संकोचयन्
मण्डपान्तः प्रविश्य नैरृत्यां ॥
वास्तुपुरुषं ब्रह्माणंच संपूज्य
देयमन्त्रेण दिव्यदृष्ट्यावलोकनेन
दिव्यान् विघ्नानुत्सार्य्य अस्त्रमन्त्रेण
जलेनान्तरीक्षगान् विघ्नानुत्सार्य्य
वामपार्ष्णि घातत्रयेण भौमान्
विघ्नानुत्सार्य्य सर्षपास्त्रमन्त्राभि
मन्त्रितं विकिरमादाय भूत
निवारणार्थं मन्त्रेणानेन विकिरेत्
तत आसनमन्त्रेण कल्पा मन्त्रेण

स्वस्तिकादिक्रमेणे पविशेष ॥
उपविश्य वा विघ्नानुत्सारयेत्
भूतः पंचगव्येन मूलेन मंडपं ॥
प्रोक्षयेत् ततः स्वदक्षिणे पूजा
द्रव्याणि वामे सवासितं पूर्णकुंभ
हस्तप्रक्षालनार्घ्यपात्रमेकं ९९
देशे स्थापयेत् सर्व दिस्तृहत
प्रदीपाद्युत्थापयित्वा ऽपुटांजलि ॥
भूत्वा वामे गुरु परमगुरु परापर
गुरून् प्रणम्य दक्षिणे गणेशं मध्ये
स्वेष्टदेवतां च प्रणम्य अस्त्रमंत्रेण गंध
पुष्पाभ्यां करौ संशोध्य ऊर्ध्वोर्ध्व ॥
तालत्रयं दत्वा छोटिकाभिर्दश
दिग्बंधनं कृत्वा वह्निबीजेन जल
धारया वह्निप्राकारं विचिंत्य ॥
भूतशुद्धिं कुर्य्यात् ततो मातृका
न्यासः प्राणायामः पीठन्यासः
ऋष्यादिन्यासः मंत्रन्यासः ततो
मुद्राप्रदर्शनं ध्यानं मानसपूजां
अर्घ्यस्थापनं च कुर्य्यात् ततो
ऽर्घ्यपात्रात् किंचित् जलं ॥
प्रोक्षणीपात्रे निक्षिप्य
तेनोदकेनात्मानं पूजोपकरणं च
मूलेन त्रिरभ्युक्ष्य पीठमंत्रेण
शरीरे धर्मादीन् पूजयेत् ततो
हृत्पद्मस्य पूर्वादिकेसरेषु पीठ
शक्तीः संपूज्य मध्ये पीठमनुं ॥

यजेत् तत्र हृदये मूलदेवतां
नैवेद्यं विनागंधाद्यैः पूजयेत्
ततः उत्तमांग हृदय मूलाधारपाद
सर्वांगेषु मूलेन पंचपुष्पांजलीन् दत्वा
यथाशक्ति मंत्रजप्तजपं समर्पयेत्
सर्वमेतत् प्रोक्षणीपात्रस्थ
वारिणा विदध्यात् ततः प्रोक्षणा
स्थं विसृज्य पूर्ववदा पूर्य्य बहिः
पूजामारभेत् तत्र शारदोक्त
सर्वतोभद्रमंडलाद्यन्यतममंडले
विधाय तत्र पुटे संस्थाप्य मंडले
संपूज्य शालिभिः कर्णिकामापूर्य
तदुपरि तंडुलानास्तीर्य्य तदु
दर्भानास्तीर्य्य विष्टरं वा तत्र सपुंके
तदुपरि न्यसेत् ततो मंडले
पीठोक्तदेवताः पूजयेत् ततो
मंडले प्रादक्षिण्येन वह्नेर्दशकला
विन्यस्य पूजयेत् ततो हेमादि
रचितं कुंभं अस्त्रमंत्रेण प्रक्षाल्य
वेष्टनागुरुकर्पूरैर्धूपयित्वा त्रिगुण
तन्तुना संवेष्ट्य कुंभं संपूज्य तत्र
विष्टरादौ नवरत्नानि च प्रक्षिप्य
प्रणवमुच्चरन् कुंभपीठयोरैक्यं
विभाव्य पीठे स्थापयेत् कुंभे।
प्रादक्षिण्येन सूर्य्यस्य द्वादशकला
विन्यस्य संपूजयेत् ततः क्षीरद्रुम
कषायेण पल्लवान्तरम्भेन वा तीर्थ

जलैर्वा सुवासितजलैर्वा आत्मा
भेदेन मातृकां मंत्रं च प्रति ॥
लोमतो जपन् पूरयेत् कुंभं ॥
देवताधिया ततश्चंद्रस्यामृतादि
षोडशकला जले प्रादक्षिण्येन
विचिंत्य मंत्रेण संपूज्य शंखं ततो
क्षीरद्रुम कषायादिद्रव्येणापूर्य्य
गंधाष्टकं विलोड्य तस्मिन् जले
सकलाः कला आवाह्य पूजयेत्
तत्रादौ ब्रह्मणो दशकला पूजयेत्
ततो मूलमंत्रं प्रतिलोमेन जपन्
मंत्रस्य देवतां मनसा ध्यायन्नासां
प्राणप्रतिष्ठां कृत्वा गंधादिभिः
पूजयेत् ततः प्रत्येकेन पूजयेत्
ततः सूर्य्यस्य तपिन्यादि द्वादश
कलाः आवाहनादिकं कृत्वा
संपूज्य प्रत्येकं पूजयेत् तत ॥
चंद्रस्यामृतादि षोडश कलाः
प्राणप्रतिष्ठादिकं कृत्वा संपूज्य
प्रत्येकेन पूजयेत् ततः
पंचाशत् कलाः पूजयेत् यथा
सृष्ट्यादि कवर्गादशकलाः प्रा
णप्रतिष्ठादिकं कृत्वा पूर्ववत्
संपूज्य प्रत्येकेन पूजयेत्
ततो जरादि टवर्गादशकलाः
प्राणप्रतिष्ठादिकं कृत्वा संपूज्य
प्रत्येकेन पूजयेत् ततस्तीक्ष्णादि

पवर्गादशकलाः प्राणप्रतिष्ठादिकं
कृत्वा संपूज्य प्रत्येकेन पूजयेत्
ततः पीतादि सवर्ग पंचकलाः
प्राणप्रतिष्ठादिकं कृत्वा संपूज्य
प्रत्येकेन पूजयेत् ततो
विहृत्यादि अवर्ग षोडशकलाः
प्राणप्रतिष्ठादिकं कृत्वा पूजयेत्
शक्तेन प्रत्येकमावाहपाद्या
दिभिः पूजयेत् ततः कलात्मके
तत्र प्रोत्स्य काद्यं कुंभे निक्षिपेत्
ततो ऽश्वत्थ पनस चूतपल्लवे
विद्रवल्लीवेष्टितैः कल्पवृक्षबुद्ध्या
कुंभवक्त्रं पिधाय तस्मिन् वक्त्रे
सफलाक्षतं चषकं कल्पवृक्षफल
बुद्ध्या स्थापयेत् ततः कुंभे
निर्मलेन क्षौमयुग्मेन संवेष्ट्य
मूलेन कुंभमूर्त्तिं संकल्प्य यथोक्त
रूपेण देवतां ध्यात्वा तस्या
आवाहनादिकं कृत्वा पूजयेत्
देवतांगे अंगन्यासं कृत्वा
धेनुमुद्रां परमीकरणमुद्रे प्रदर्श्य
प्राणप्रतिष्ठां कृत्वा षोडशोपचारा
दिभिः पूजयेत् ततोऽष्टोत्तर
सहस्रं शतेन वा संख्यया जपं
समर्पयेत् ततो मंत्रस्य दश
संस्कारान् कृत्वा गुरुः शिष्यमानीय
मंत्रेण शिष्या नेत्रवस्त्रेणाच्छाद्य



शिष्याञ्जलिपुष्पैः पूजयित्वा गुरुः
स्वयमेव मन्त्रं जपन् कलसे देवता
प्रीत्यै निवेदयेत् ततो नेत्रं बन्धयेत् ॥
हृदीकृत्य दर्भास्तरे मासीनं शिष्य
सकृत् पूजनक्रमाद् भूतशुद्ध्यादिकं
विधाय तत्तन्मन्त्रोक्तन्यासान् शिष्यस्य
देहे कुर्य्यात् कुम्भस्थां देवतां ।
पुनः पञ्चोपचारैः संपूज्यालोकितं
शिष्यमन्यस्मिन्नुपवेशयेत् ततो
मङ्गलाचारपूर्वकं तत्कुम्भे
समुद्धृत्य तन्मुखस्थान् सद्रुम
रूपान् पल्लवान् शिष्यशिरसि
निधाय मातृकां मनसा जपन् मूलेन
साधितेन तोयेन शिष्यं संहितोक्ता
ऽभिषेकमन्त्रैः अभिषिञ्चेत् ॥
शिष्योऽपि शिष्टजलेनाचम्य वाससी
परिधाय गुरोः सन्निधावुपविशेत्
ततस्तामेव गुरुरात्मनो देवतां
शिष्ये संक्रान्तां तयोरैक्यं ॥
विभाव्य गन्धादिभिः पूजयेत्
ततो मन्त्रेण शिष्यस्य शिखां
बद्धा संरक्ष्य शिष्यशरीरे ॥
कल्पान्न्यासं कुर्य्यात् ततः ॥
शिष्यशिरसि हस्तं दत्त्वाऽष्टोत्तर
शतं जप्त्वा अमुकमन्त्रं तेऽहं
ददामीति शिष्यहस्ते जलं दद्यात्
ददस्वेति शिष्यो ब्रूयात् तत

ऋष्यादियुक्तं मन्त्रं गुरुर्द्विजातीनां
दक्षिणकर्णे त्रिः श्रावयेत् वामे
सकृत् स्त्रीशूद्राणां वामकर्णे त्रिः
श्रावयेत् दक्षिणे सकृत् ततः ॥
शिष्यो गुरुचरणे पतितएव ॥
तिष्ठेत् ततो गुरुः मन्त्रेण
तमुत्थापयेत् ततः शिष्यो लब्ध
मन्त्रं अष्टोत्तरशतं जपेत् ततः ॥
शिष्यः कृष्णतिलजलाभ्यां गुरवे
दक्षिणां सुवर्णं काञ्चनं वा दद्यात्
दीक्षाग्रहणसामर्थ्यं निवेदयेत्
अन्यांश्च ब्राह्मणान् परितोषयेत्
गुरुः स्वशक्तिरक्षार्थाय अष्टाधिके
सहस्रं शतं वा मन्त्रं जपेत् । ततः
शिष्यो मिष्टान्नपानादिना ब्राह्मणान्
परितोष्य स्वयं भुञ्जीत दीक्षा ॥
दिवसे गुरुः शिष्याय रूपं वासो
दोषः इति तन्त्रसारोक्ता ॥
कलावतीदीक्षा समाप्ता ॥
कलाविकः पुं कुक्कुटः इति
त्रिकाण्डशेषः ॥
कलाविकलः पुं चटकः इति
शब्दरत्नावली
कलाहकः पुं काहलवाद्यं ॥
इति शब्दरत्नावली
कलिः पुं विभीतकवृक्षः । शूरः
विवादः युद्धं अन्त्ययुगं ॥

इति हेमचन्द्रः । तद्युगमाने
द्वात्रिंशत्सहस्राधिकचत्वारिंश
ल्लक्षवत्सराणि तस्य गताब्दाः ४९४ शाक
पर्य्यन्ते ५५ ९९ अत्र धर्म्मस्यैकपादः
अधर्म्मस्य त्रिपादाः आयुः शतवर्षा
णि अवतारः श्रीकल्किः तद्युगशेषः
पापिनां विनाशाय भगवत् शम्भला
ऽवतारः कल्किर्भविष्यति तद्युग
धर्म्मो यथा कलौ तु धर्म्मपादानां
तुर्य्यांशः धर्म्महेतुभिः पापमानैः
तीयमानोऽस्तं तेनापि विनङ्क्ष्यति
तस्मिन् लब्धा दुराचारा निर्दयाः
एकवैरिणः दुर्भगा भूरितर्षाश्च भूय
दासोत्तराः प्रजाः यदा मायान्ते
तदा निद्रा हिंसा विषाद शोक
मोहो भयं दैन्यं सकलिः तामसः
स्मृतः यस्मात् तदा दृष्टा मर्त्याः
स्तद्भाग्या महाशनाः कामिनो वित्त
हीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः
दस्यूत्कृष्टा जनपदा वेदाः पाषण्ड
दूषिताः राजानश्च प्रजाभक्षाः
शिश्नोदरपरा द्विजाः अव्रता
बटवोऽशौचा भिक्षवश्च कुटुम्बि
नः तपस्विनो ग्रामवासा न्यासिनो
ऽत्यर्थलोलुपाः ह्रस्वकाया
महाहारा बहुपत्या गतह्रियः
शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरु

साहसाः पणयिष्यन्ति वेलज्ञाः
किराटकूटकारिणः अनापद्यपि
मंस्यन्ते वार्त्तां साधुजुगुप्सितां
पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्य
खिलोत्तमं भृत्यं विपन्नं पतयः
कौलं गाश्चापयस्विनीः पितॄन्
भ्रातॄन् सुहृदो ज्ञातीन् हित्वा सौरत
सौहृदाः ननान्दृश्यालसंवादा
दीनाः स्त्रैणाः कलौ नराः शूद्राः
प्रतिग्रहीष्यन्ति तपो वेषोप
जीविनः धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा
अधिरुह्योत्तमासनं नित्य
मुद्विग्नमनसो दुर्भिक्षकरकर्षिताः
निरन्ने भूतले राजन् अनावृष्टि ॥
भयातुराः वासोऽन्नपानशयन
व्यवायस्नानभूषणैः हीनाः पिशाच
सन्दर्शना भविष्यन्ति कलौ प्रजाः
कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्त
सौहृदाः त्यक्ष्यन्ति हि प्रियान् ॥
प्राणान् हनिष्यन्ति स्वकानपि
न रक्षिष्यन्ति मनुजाः स्थविरौ
पितरावपि पुत्रान् भार्य्यां च कुलजां
क्षुद्राः शिश्नोदरम्भराः कलौ न
राजन् जगतां परं गुरुं त्रिलोक
नाथानतपादपङ्कजं प्रायेण मर्त्त्या
भगवन्तमच्युतं यक्ष्यन्ति पाषण्ड
विभिन्नचेतसः कलिकृत ॥



दोषविनाशोपायः यथा॥
यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान्
विमुक्तकर्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यंति न तं कलौ जनाः
पुंसां कलिकृतान् दोषान् द्रव्य-
देशात्मसंभवान् सर्वान् हरति
चित्तस्थो भगवान् पुरुषोत्तमः
श्रुतः संकीर्तितो ध्यातः पूजित-
श्चादृतोऽपि वा नृणां धुनोति
भगवान् हृत्स्थो जन्मायुताशुभं
यथा हेम्नि स्थितो वह्निर्दुर्वर्णं हंति
धातुजं एवमात्मगतो विष्णु॥
योगिनामशुभाशयं विद्यातपः-
प्राणनिरोधमैत्रीतीर्थाभिषेकव्रत-
दानजप्यैः नात्यंतशुद्धिं लभते-
ऽन्तरात्मा यथा हृदिस्थे भगवत्य-
नंते तस्मात्सर्वात्मना राजन् हृदिस्थं
कुरु केशवं म्रियमाणो ह्यवहित-
स्ततो याहि परां गतिं कलेर्दोष-
निधे राजन्नस्ति ह्येको महान् गुणः
कीर्तनादेव कृष्णस्य मुक्तसंगः परं
व्रजेत् कृते यद्ध्यायतो विष्णुं॥
त्रेतायां यजतो मखैः द्वापरे
परिचर्यायां कलौ तद्धरिकीर्तनात्
उपगतेषु धर्माः सौराष्ट्रा-
वंत्याभीराश्च शूरा अर्बुदमालवाः

व्रात्या द्विजा भविष्यंति शूद्रप्राया
जनाधिपाः सिंधोस्तटं चंद्रभागां
कौंतीं काश्मीरमंडलं भोक्ष्यंति
शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्चसः
तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च
भूभृतः एतेऽधर्मानृतपराः फल्गुदा-
स्तीव्रमन्यवः स्त्रीबालगोद्विजघ्नाश्च
परदारधनादृताः उदितास्तमित-
प्राया अल्पसत्वाल्पकायुषः असंस्कृताः
क्रियाहीना रजसा तमसावृताः
प्रजास्ते भक्षयिष्यंति म्लेच्छा राजन्य-
रूपिणः तन्नाथास्ते जनपदा-
स्तच्छीलाचारवादिनः अन्योन्यतो
राजभिश्च क्षयं यास्यंति पीडिताः
ततश्चानुदिनं धर्मः सत्यं शौचं
क्षमा दया कालेन बलिना राजन्
नंक्ष्यत्यायुर्बलं स्मृतिः वित्तमेव
कलौ नृणां जन्माचारगुणोदयः
धर्मन्यायव्यवस्थायां कारणं बलमेव हि
दांपत्येऽभिरुचिर्हेतुर्मायैव
व्यावहारिके स्त्रीत्वे पुंस्त्वे च हि
रतिर्विप्रत्वे सूत्रमेव हि॥
लिंगमेवाश्रमख्यातावन्योन्या-
पत्तिकारणं अवृत्त्या न्यायदौर्बल्यं
पांडित्ये चापलं वचः अनाढ्यतैवा-
साधुत्वे साधुत्वे दंभ एव हि स्वीकार
एव चोद्वाहे स्नानमेव प्रसाधनं

दूरे वार्ययनं तीर्थं लावण्यं केशधा-
रणं उदरंभरता स्वार्थः सत्यत्वे
धार्ष्ट्यमेव हि दाक्ष्यं कुटुंबभरणं
यशोऽर्थे धर्मसेवनं एवं प्रजाभि-
र्दुष्टाभिराकीर्णे क्षितिमंडले
ब्रह्मविट्क्षत्रशूद्राणां यो बली
भविता नृपः प्रजा हि लुब्धै राजन्यै-
र्निर्घृणैर्दस्युधर्मभिः आच्छिन्न-
दारद्रविणा यास्यंति गिरिकाननं
शाकमूलामिषक्षौद्रफलपुष्पा-
ष्टिभोजनाः अनावृष्ट्या विनंक्ष्यंति
दुर्भिक्षकरपीडिताः शीतवातातप-
प्रावृड्हिमैरन्योऽन्यतः प्रजाः
क्षुत्तृड्भ्यां व्याधिभिश्चैव
संतप्स्यंते च चिंतया त्रिंशद्विंश-
ति वर्षाणि परमायुः कलौ नृ-
णां क्षीयमाणेषु देहेषु देहिनां
कलिदोषतः वर्णाश्रमवतां धर्मे
नष्टे वेदपथे नृणां पाषंडप्रचुरे
धर्मे दस्युप्रायेषु राजसु चौर्या-
ऽनृतवृथाहिंसानानावृत्तिषु वै
नृषु शूद्रप्रायेषु वर्णेषु छागप्रा-
यासु धेनुषु गृहप्रायेष्वाश्रमेषु यौ-
नप्रायेषु बंधुषु अणुप्रायास्वोष-
धीषु शमीप्रायेषु स्थास्नुषु विद्यु-
त्प्रायेषु मेघेषु शून्यप्रायेषु सद्म-
स्वित्थं कलौ गतप्राये जनेषु खर

धर्मिषु धर्मत्राणाय सत्वेन भगवान्
अवतरिष्यति इति श्रीभागवते
कलिः स्त्री कलिका इति मेदिनी
कलिकः पुं क्रौंचपक्षी इति॥
शब्दरत्नावली॥
कलिका स्त्री अस्फुटितपुष्पं तत्
पर्यायः कोरकः २ इत्यमरः
कलिः ३ कली ४ कोरकं ५
इति तट्टीका वीणामूलं इति
हेमचंद्रः॥ (न्यतर
कलिकापूर्वं क्ली रागप्रधाना
बहुकर्मसाध्य स्वर्गादिफलजनका
अपूर्वोत्पत्तौ नतु प्रत्येक
कर्मजन्यमदृष्टं इति स्मृतिः
कलिकारः पुं धूम्याटपक्षी
पीतमल्लकपक्षी पूतिकरंजः
इति मेदिनी कलिकारकः
पुं पूतिकरंजः॥
काटाकरंज नाटाकरंज इति
भाषा इत्यमरः नारदमुनिः
इति हेमचंद्रः॥
कलिकारी स्त्री उपविषभेदः
विषलांगलीया इति भाषा
तत्पर्यायः लांगली १ हलिनी २
गर्भपातनी ४ दीप्ता ५ विशल्या ६
अग्निमुखी ७ हली ८ नक्ता ९
इंद्रपुष्पिका १० विद्युज्ज्वाला ११

अग्निजिह्वा २३ व्रणहृत् २४
पुष्पसौरभा २४ स्वर्णपुष्पा २५
वह्निशिखा २६ अस्या गुणाः ॥
कटुत्वं उष्णत्वं कफवातउष्णत्वं
गर्भातःशल्यनिष्कामकारित्वं
परमसारित्वंच इति राजनिर्घण्टः
कलिंगं क्ली इन्द्रयवे इत्यमरः ॥
कलिंगः पुं पूतिकरंज वृक्षः
धूम्याटपक्षी देशविशेषः इति
हेमचंद्रः मेदिनिमते प्लक्षे
पुंभूम्नि कुटजवृक्षः शिरीषवृक्षः
लक्षवृक्षः इति राजनिर्घण्टः
कलिंगकः पुं इन्द्रयवे इति
रत्नमाला ॥
कलिंगा स्त्री नितंबिनी महिला
इति मेदिनी हेमचंद्रौ ॥
त्रिवृत् तेउडि इति भाषा इति
शब्दचंद्रिका ॥
कलिंजः पुं कटः चावदरमा
इत्यादिभाषा इति हेमचंद्रः
कलितं त्रि विदितं आप्तं इति
मेदिनी भेदितं गणितं ॥
इति शब्दरत्नावली कृते यथा
करकलितकपालः कुंडली दं-
डपाणि रिति भैरवध्याने ॥
कलिद्रुमः पुं विभीतकवृक्षः
बयडा इति भाषा इत्यमरः ॥

कलिंदः पुं विभीतकवृक्षः इति
राजनिर्घण्टः सूर्यः पर्वतविशेषः
यस्मात् यमुनानिर्गता इति
कालिंदी शब्दवत् पर्यो भरतः
कलिंदकन्या स्त्री यमुनानदी
इति राजनिर्घण्टः ॥
कलिंदनंदिनी स्त्री यमुनानदी
इति शब्दरत्नावली
कलिप्रियः पुं नारदमुनिः
यथा कलिप्रियस्य प्रियशिष्यवगः
इति रघुः वानरः इति
शब्दरत्नावली ॥
कलिमारकः पुं कलिकारकः
इत्यमरटीकायां रमानाथः
कलिमालकः पुं कलिकारकः
इति स्वामी इत्यमर टीकायां
भरतः
कलिमाल्यः पुं पूतिकरंजः
इति राजनिर्घण्टः ॥
कलिलः त्रि गहनः इत्यमरः
मिश्रः इत्युणादिकोषः ॥
कलिवृक्षः पुं कलिद्रुमः वहेडुक
वृक्षः इति हेमचंद्रः ॥
कली स्त्री कलिका इत्यमर
टीकायां भरतः ॥
कलुषं क्ली पापे इत्यमरः ॥
कलुषः पुं स्त्री महिषः इति


राजनिर्घण्टः ॥
कलुषः त्रि अनच्छः आविलः
इत्यमरः ॥
कलेवरं क्ली शरीरे इत्यमरः ॥
कल्कः पुं क्ली घृततैलादिशे-
षः दंभः विभीतकवृक्षः विष्ठा
किट्टं पापं इति मेदिनी
कर्णमलः इति शब्दरत्नावली
तुरुष्क नाम गंधद्रव्यं इति
राजनिर्घण्टः घृत तैलादि ॥
पाके देयमौषधद्रव्यं तत्तु
पंचकषायांतर्गतं शादिपेषिते
अस्य पूर्णवीर्यं याममेकं तिष्ठति
यथा द्रव्यमार्द्रं शिलापिष्टं शुष्कं
वाजलमिश्रितं तदेव सूरिभिः
पूर्वैः कल्क इत्यभिधीयते तत्
पर्यायः पिष्टः २ विनीयः ३ इति
रत्नमाला आवापः ४ प्रक्षेपः ५
इति वैदिक परिभाषा शास्त्रे
इति मोक्षधर्मटीकायां नीलकंठः
कल्कः त्रि पापाशयः पापात्मा
इति मेदिनी ॥
कल्कफलः पुं दाडिमवृक्षः इति
राजनिर्घण्टः ॥
कल्किः पुं विष्णोर्दशमावतारः सत
कलिशेष पापात्मनो विनाशाय
संभलग्रामे भविष्यति यथा

संभल ग्राम मुख्यस्य ब्राह्मणस्य
महात्मानः भवने विष्णुयशसः
कल्किः प्रादुर्भविष्यति तस्य कर्म
यथा अश्वमाशुगमारुह्य देवदत्तं
जगत्पतिः असिनाऽसाधुदमन
मष्टैश्वर्य गुणान्वितः विचरन्नाशुना
क्षोणीं हयेनाप्रतिमद्युतिः
नृपलिंगच्छदो दस्यून् कोटिशो
निहनिष्यति इति श्रीभागवते
कल्की पुं कल्किः यथा मत्स्यः
कूर्मो वराहश्च नरसिंहोऽथ वामनः
रामो रामश्च रामश्च बुद्धः कल्कीच
ते दश ॥ इति पुराणे ॥
कल्पः पुं विधिः प्रलयः
ब्राह्मदिने तत्तु देवद्विसहस्रयुगे
इत्यमरः त्रिंशत् कल्पैर्ब्रह्मण
एको मासो भवति तेषां नामानि
यथा श्वेतवाराहः १ नीललोहितः
२ वामदेवः ३ गाथांतरः ४ रौरवः
५ प्राणः ६ बृहत्कल्पः ७ कंदर्पः ८
सत्यः ९ ईशानः १० ध्यानः ११
सारस्वतः १२ उदानः १३ गरुडः १४
कौर्मः १५ ब्रह्मणः पौर्णमासी
नारसिंहः १६ समाधिः १७ आग्नेयः
१८ विष्णुजः १९ सौरः २० सोमकल्पः
२१ भावनः २२ सुप्तमाली २३
वैकुंठः २४ आर्चिषः २५ वल्मीकल्पः



२६ वैराजः २७ गौरीकल्पः २८ माहेश्वरः २९ पितृकल्पः ३० अंग्रे ब्रह्मणाममावास्य इति क्रमसंदर्भे॥ प्रभासखंडे एतादृशो ह्रीदश मासैर्ब्रह्मणः संवत्सरो भवति एवंवर्षशतं ब्रह्मण आयुः तत्र पंचाशद्वर्षा व्यतीताः एकपंचाश हारंभे अधुना श्वेतवाराहकल्पः इति महाभारते विकल्पः कल्प वृत्तः त्यायः शास्त्रविशेषः स तु वेदषडंगांतर्गतो योगक्रियाणा मुपदेशकः इति हेमचंद्रः॥ व्याकरणस्य प्रत्ययविशेषः स च स्यार्थेत त्यार्थेत पदाभ्या ॥ मीषदूनार्थे भवति तत्रवाव्यलिंगः यथा ईष दूनो विद्वान् विद्वत्त ईषदूने पचति पचतिकल्पं इति मुग्धबोध व्याकरणे ॥ कल्पकः पुं नापितः इति शब्दमाला कर्चूरः इति॥ भावप्रकाशः ॥ कल्पने स्त्री कर्त्तिः छेदने इति त्रिकांडशेषः ॥ कल्पना स्त्री हस्ति सज्जना नायकस्यारोहणार्थं गजसज्जीकरणं इत्यमरः अन्विमितिः इति न्यायशास्त्रे रचना यथा प्रबंध॥ कल्पनाकथा इत्यमरः ॥ कल्पनी स्त्री कर्त्तनी कांच इति भाषा इति हेमचंद्रः ॥ कल्पपादपः पुं कल्पवृक्षः यथा तृषानचक्रेऽल्पितकल्पपादपः इति नैषधे कल्पवृक्षः पुं देवतरुः इत्यमरः कल्पस्य संकल्पस्य दाता वृक्षः कल्पस्थायी वृक्ष इति वा व्युत्पत्तिः इति सारसुंदरी ॥ कल्पांतः पुं ब्रह्मणो दिनांतः प्रलयः इत्यमरः ॥ कल्पितः पुं सज्जितहस्ती इति हेमचंद्रः रचिते त्रि ॥ कल्मषं क्ली पापं इत्यमरः हृत्पुक्कं इति त्रिकांडशेषः कल्मषः पुं नरकविशेषः इति मेदिनी मलिनी त्रि इति जटाधरः ॥ इति त्रि कल्माषः पुं चित्रवर्णः तद्व इत्यमरः कृष्णपीतवर्णः कृष्णवर्णः राक्षसः इति मेदिनी गंधशालिः इति राजनिर्घंटः कल्माषकंदः पुं शिवः इति हारावली ॥ कल्माषपादः पुं सौदासराजः इति श्री भागवते ॥

कल्यं क्ली प्रत्यूषः इत्यमरः मधु इति हेमचंद्रः ॥ कल्यः त्रि सज्जः निरामयः इत्यमरः वाक्श्रुति वर्जितः दक्षः कल्याणवचने उपाय॥ वचने इति मेदिनी ॥ कल्यजग्धिः स्त्री प्रातराशः प्रातर्भोजने इति जटाधरः कल्यत्वं क्ली आरोग्यं इति जटाधरः ॥ कल्यपालः पुं शौंडिकः इति हेमचंद्रः ॥ कल्यपालकः पुं शौंडिकः इति शब्दमाला ॥ कल्यवर्त्तः पुं प्रातर्भोजने इति त्रिकांडशेषः ॥ कल्या स्त्री मद्यं इति मेदिनी शुभात्मिका हारीणी कल्याणवचने इत्यमरः हरीतकी इति ॥ शब्दरत्नावली ॥ कल्याणं क्ली मंगलं तत्पर्यायः श्वः २ श्रेयस ४ शिवं ५ भद्रं ६ शुभं ७ भावुकं ८ भविकं ९ भव्यं १० कुशलं ११ क्षेमं १२ शस्तं १३ तद्युक्ते त्रि इत्यमरः स्वर्णं इति मेदिनीकरहेमचंद्रौ कल्याणबीजः पुं मसूरः इति राजनिर्घंटः ॥ इति कल्याणिका स्त्री मनःशिला राजनिर्घंटः ॥ कल्याणिनी स्त्री बला इति राजनिर्घंटः कल्याणविशिष्टे त्रि कल्याणी स्त्री माषपर्णी गौः इति राजनिर्घंटः ॥ कल्यापालः पुं शौंडिकः इति त्रिकांडशेषः ॥ कल्ल उः कूजने शब्दे ऽशब्दे इति कविकल्पद्रुमः ॥ कल्लः त्रि बधिरः काला इति भाषा इति त्रिकांडशेषः॥ कल्लत्वं क्ली स्वरभेदः इति हेमचंद्रः बधिरत्वाच ॥ कल्लोलः पुं महातरंगः ॥ वडेंट उ इति भाषा तत्पर्यायः उल्लोलः २ इत्यमरः हर्षः शत्रौ त्रि इति मेदिनी ॥ कवऊ उ स्तुतौ वर्णे इति कविकल्पद्रुमः ॥ कवकः पुं कवलः ग्रासः इति हेमचंद्रः ॥ कवचः क्ली सन्नाहः सांजोपा इति भाषा तत्पर्यायः तनुत्रं २ वर्म्म ३ दंशनं ४ उरश्छदः ५ कंकटकः ६ जगरः ७ इत्यमरः




देसवे ८ नागाः ९ अजगरः ९
इति तट्टीका लोहादिवर्मवत्
अंगादि १ हलार्थे देवता ॥
मंत्रविग्रहे तत्पूजयो पाठे
भूर्जे विलिख्य कंठादौ धार्य्यं च
इति तंत्रे गडुभांड हस्तः ॥
पटहवाद्ये इति मेदिनी ॥
कवचपत्रे क्ली भूर्जपत्रे इति
शब्दचंद्रिका ॥
कवटी स्त्री कवाटः इति भरतो
द्विरूपकोषश्च ॥ (मोच
कवयी स्त्री मत्स्याविशेषः कयी
इति भाषा तत्पर्य्यायः ॥
कं कचपट्टी २ इति त्रिकांडशेषः
अस्या गुणाः मधुरत्वं स्निग्धत्वं
बलकारित्वं वायुकफनाशित्वं च
इति राजवल्लभः किंचित् ॥
पित्तकरीति केचित् ॥
कवरं त्रि केशपाशः इत्यमर
टीका संसृष्टे खचिते इति
हलायुधः ॥
कवरः पुं क्ली लवणः अम्लः इति
मेदिनी हेमचंद्रः ॥ (ही
कवरकी स्त्री कारागारबद्धः कैथ
इति भाषा इति हारावली
कवरा स्त्री खरपुष्पा बाबुइ इति
भाषा इति शब्दचंद्रिका ॥

कवरी स्त्री केशविन्यासः
चूलेरखोपाटिकी इति भाषा
तत्पर्य्यायः केशवेशः २ वेस
बावृइ इति भाषा कारवी ॥
हिंगरपाता इति भाषा ॥
इत्यमरो मेदिनी च
कवलः पुं ग्रासः इत्यमरः
मत्स्यविशेषः वेलमाछ इति
भाषा इति शब्दचंद्रिका ॥
कवलितः त्रि भुक्तः इति
जटाधरः ॥
कवसः पुं कवचः इत्युणादि
कोषः ॥
कवाटः त्रि कपाटः इत्यमरः
टीकायां वाचस्पतिः ॥
कवाटकं क्ली हस्तविशेषः
कवाटवेडु इति भाषा कवाड
वेडुया इति केचित् तत्
पर्य्यायः वक्रांघ्र २ कपोतवक्र
३ अश्वजित् ४ इति रत्नमाला
कवाटी स्त्री कपाटं इत्यमरः
टीकायां भरतः ॥
कवारं क्ली पद्मं इति ॥
त्रिकांडशेषः ॥
कविः पुं ब्रह्मा इति हेमचंद्रः
वाल्मीकिमुनिः शुक्राचार्य्यः
सूर्य्यः काव्यकारः खलीने स्त्री

इति मेदिनी ॥
कविः त्रि पंडितः इत्यमरः
कविः स्त्री खलीनः लागं इति
भाषा इति मेदिनी ॥
कविकं क्ली खलीनः इति
हलायुधः ॥ (इति
कविका स्त्री खलीनः लागाम
भाषा इत्यमरः केविका पुष्पं
इति राजनिर्घंटः कवयीमत्स्यः
इति भावप्रकाशः ॥
कविज्येष्ठः पुं वाल्मीकिमुनिः
इति त्रिकांडशेषः ॥
कविता स्त्री कवित्वं काव्यपद्या
कविता वनिता वापि याता
सुखदायिनी इत्युद्भटः ॥
कविवेदीन त्रि कविः इति
जटाधरः ॥
कविये क्ली पुं खलीने इति
त्रिकांडशेषः ॥ (निः
कविरामायणः पुं वाल्मीकिमु
इति शब्दरत्नावली ॥
कविलासिका स्त्री वीणाविशेषः
इति शब्दरत्नावली ॥
कविवाल्मीकिः पुं वाल्मीकिमुनिः
इति शब्द रत्ना वली
कवी स्त्री खलीनः इति मेदिनी
भव नष्टा ॥


श्री

कवीयं क्ली खलीनं इति जटाधरः
कवेलं क्ली कुवलयं उत्पलं
इति शब्द चंद्रिका ॥
कवोष्णं क्ली इष दुष्णं तद्वति त्रि
इत्यमरः ॥ (कात्रे
कव्यं क्ली पित्रर्थे पितृसंप्रदान
इत्यमरः ॥
कव्यवालः पुं पितृगणविशेषः
इति त्रिकांडशेषः ॥ (द्रुमः
कश ० शब्दे इति कविकल्प
कशा स्त्री अश्वादेस्ताडनी
कोडा चाबुक इति च भाषा
इत्यमरः मांसरोहिणी इति
भावप्रकाशः ॥
कशार्हः त्रि कशाघातयोग्यः
कोडामारिवार उपयुक्त इति
भाषा तत्पर्य्यायः कश्यः २
इत्यमरः ॥
कशिपुः पुं भक्तं आच्छादने
एकोक्त्यान्नवस्त्रे कशिपू इति
द्विवचनांत इति मेदिनी ॥
कशेरु क्ली पुं पृष्ठास्थि पिठदांडा
इति भाषा इति हलायुधः ॥
कशेरु क्ली कशेरुका केशुर
इति भाषा इति रत्नमाला
राजनिर्घंटः दंत्य सकारवान् पुं
लिंगोप्ययं शब्दः ॥



कशेरुः पुं जंबुद्वीपस्य खंड विशेषः इति शब्दमाला ॥
कशेरुकं तृणकंदः केसुर ॥ इतिभाषा अस्यगुणाः गुरुत्वं विष्टंभकारित्वं शीतलत्वंच इति राजवल्लभः ॥
कशेरुका स्त्री पृष्टास्थि पिठेर दांडा इति भाषा इत्यमरः ॥
कशेरु केसुर इतिभाषा इति रत्न माला ॥
कशेरुः स्त्री तृणकंदः केसुर इतिभाषा इति सिद्धांत ॥
कैासुधा मुणादिहस्तिः ॥
कश्चन वा कश्चित् कोनकेहु इतिवभाषा इतिव्याकरणं ॥
कश्चित् वा कश्चन इतिव्याकरणं
कश्मलं क्ली मूर्छा इत्यमरः पापं इति शब्दमाला मलिने त्रि इति हेमचंद्रः ॥
कश्मीरः पुं काश्मीरदेशः इति त्रिकांडशेषः ॥
कश्मीरजन्मा पुं काश्मीरजन्मा कुंकुमे इत्यमर टीकायां ॥ रायमुकुटं ॥
कश्यं क्ली अश्वमध्यभागः मद्यं कशार्हे त्रि इत्यमरः ॥ (जो
कश्यपः पुं मुनिभेदः कल्लागभ मरीचिमुने रौरसः पुत्रः तस्य भार्य्या दक्षस्य सप्तदश कन्याः तासां तत्पुत्राणां च नामानि यथा अदितेर्देवाः १ दितेर्दैत्याः २ दनोर्दानवाः ३ काष्टायामश्वाद्याः ४ अरिष्टाया गंधर्वाः ५ सुरसाया राक्षसाः ६ इलाया वृक्षाः ७ मुनेरप्सरोगणाः ८ क्रोधवशायाः सर्पाः ९ ताम्रायाः श्येनगृध्रादयः १० सुरभेर्गोमहिषाः ११ सरमायाः श्वापदाः १२ तिमेर्यादोगणाः १३ विनताया गरुडारुणो १४ कद्रोर्नागाः १५ पतंग्याः पतंगाः १६ यामिन्याः शलभाः १७ इति श्रीभागवतं मृगविशेषः इतिमेदिनी मत्स्यभेदः इति विश्वः ॥
कश्यपनंदनः पुं गरुडः इति हलायुधः ॥ (मः
कष ० वधो इतिकविकल्पद्रु
कषः पुं कषपट्टिका ॥ कष्टिपाथर इतिभाषा तत्पर्य्यायः शानः २ निकषः ३ इत्यमरः ॥
कषणः त्रि अपक्वः इतिशब्द चंद्रिका कषा स्त्री कशा चाबुक इति भाषा इत्यमरटीकायांरमानाथः
कषाकुः पुं सूर्य्यः अग्निः

इत्युणादिकोषः ॥ (षा
कषायः पुं क्ली रसविशेषः क इतिभाषा पृथिव्यनिलगुण बाहुल्यात्तस्योत्पत्तिः इति शिवदासः तत्पर्य्यायः तुवरः २ तद्युक्ते त्रि इत्यमरः कुवरः ३ भूवरः ४ इति जटीका अस्यगुणाः व्रणादि रोपणत्वं ग्राहित्वं ॥ शोषणत्वं वायुकोपकारित्वं च अतिशुक्रस्य तस्यगुणाः मलमूत्र शुद्धाध्मान हृत्पीडा स्तंभनादि रोगकारित्वं अन्यच्च कषायः शोषणः स्तंभी व्रणपाकार्त्ति नाशनः कफ शोणितवातघ्नो रूक्षः शीतो गुरु लघ्वा इति राजवल्लभः अपिच कषाय नामानि रुणद्धि शोफ वल्गितो दीपन पाचनश्च सन्तापहो सौ शिथिलत्वकारी निषिक्तः पोड करोतिमात्रे इतिराजनिर्घंटः पाचनादिः तस्य पञ्चविधयं याममेकं तिष्ठति तत्पर्य्यायः क्वथः २ निर्यूहः ३ सत्तु ॥ पंचविधो यथा स्वरसः १ कल्कः २ क्वथितः ३ शीतः ४ फांटः ५ इतिवैद्यक परिभाषा ॥ निर्यासः विलेपने अंगरागः ।
इतिमेदिनी लयविक्षेपाभावेपि चित्तस्य रागादि वासनया स्तब्धी भावादखंड वस्त्वनवलंबने इति वेदांतसारः ॥
कषायः पुं श्योनाकवृक्षः इति धरणी रागः इत्यमर टीकायां स्वामी कलियुगे इत्यमरटीका सारसुंदरी ॥
कषायः त्रि सुरभिः लोहितः इतिमेदिनी रक्तपीत मिश्रितवर्णः इत्यमर टीकायां स्वामी एव वृत्तः इति ॥ राजनिर्घंटः ॥
कषायकृत् पुं रक्तलोध्रः इति जटाधरः ॥ (नाल
कषाययावनालः पुंतुवरयाव धान्ये इतिराजनिर्घंटः ॥
कषाया स्त्री क्षुद्रदुरालभा इति राजनिर्घंटः ॥
कषायितः त्रि कृतलोहितः कषायो जातोस्यत्यर्थे इत प्रत्ययः ॥
कषायी न पुं शालवृक्षः इति जटाधरः लकुच वृक्षः खर्जूरीवृक्षः इति राजनिर्घंटः ॥
कषिः त्रि हिंसकः इत्युणादि कोषः ॥ ॥



हृषिका स्त्री पक्षिजातिः इत्युणा(दि)कोषः ॥

कषेरुका स्त्री कशेरुका पृष्ठास्थि इत्यमरटीकायां रायमुकुटः ॥

कष्टं क्ली पीडामात्रे तत्पर्यायः पीडा २ बाधा ३ व्यथा ४ दुःखं ५ अमानस्यं ६ प्रसूतिजं ७ कृच्छ्रं ८ आभीलं ९ इत्यमरः आबाधा १० वेदना ११ दुःखं १२ आमानस्यं १३ इति तट्टीकायां भरतः ॥ कल्लाकल्लं १४ इति वाचस्पतिः

कष्टः त्रि पीडायुक्तः गहनः इत्यमरमेदिनीकरौ ॥

कष्टकारके पुं संसारः इति ॥ त्रिकाण्डशेषः पीडाकरे त्रि ॥

कष्टस्थाने क्ली दुःखमनकस्थाने इति हारावली ॥

कस ज गतौ इति कविकल्पद्रुमः

कस इ उल ध्वंसे गतौ इति कविकल्पद्रुमः ॥

कसः पुं कषः कष्टिपाषाण इति भाषा इत्यमरटीकायां भरतः

पूर्वोक्तधात्वर्थे पात्र ॥ (त्रः

कसनोत्पाटनः पुं वासकहे इति प्राह वेद्रिका ॥

कसिपुः पुं कशिपुः अन्न इति जटाधरः ॥

कसेरुः पुं कशेरुः केसुर इति भाषा तत्पर्यायः गुण्डकन्दः २ तृणमुस्ता ३ कसेरुका ४ सूकरेष्टः ५ सुगन्धिः ६ सुकन्दः ७ कसेरुकः ८ अस्य गुणाः कषायत्वं अत्यमधुरत्वं अतिकटुत्वं रक्तपित्तप्रशमनत्वं शीतत्वं दाहश्रमापहत्वं च इति राजनिर्घण्टः

कसेरुका स्त्री कसेरुः पृष्ठास्थि इति राजनिर्घण्टः ॥

कस्तरं क्ली रंग इति हेमचन्द्रः

कस्तरिका स्त्री कस्तूरी इति भूरिप्रयोगः ॥

कस्तूरिका स्त्री कस्तूरी इति रत्नमाला

कस्तूरी स्त्री मृगस्य नाभौ जात मृगनाभिः २ मृगमदः ३ इत्यमरः मृगः ४ मृगी ५ नाभिः ६ मदः ७ इति भरतः वातमोदः ८ योजनगन्धिका ९ इति रभसः मोदनी १० गन्धकेलिका ११ वेधमुख्या १२ मार्जारी १३ सुभगा १४ बहुगन्धदा ॥ (धा १५ सहस्रवेधी १६ श्यामा १७ कामा १८ मृगाण्डजा १९ कुरङ्गनाभिः २०

ललिता २२ श्यामला २३ मोदिनी २३ अस्या गुणाः सुरभित्वं तिक्तत्वं चक्षुर्हितत्वं मुखरोगकिलासकफदौर्गन्ध्यवातालक्ष्मीमलापहत्वं च इति राजनिर्घण्टः रक्तपित्तकृच्छ्रनाशित्वं इति राजवल्लभः तद्भेदाः खारिका १ तिलका २ कुलत्था ३ पिण्डा ४ नायिका ५ अपि च कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात् नेपाले पि च काश्मीरे कामरूपे पि जायते कामरूपोद्भवा श्रेष्ठा ॥ नैपाली मध्यमा भवेत् काश्मीरदेशसंभूता कस्तूरी त्वधमा स्मृता इति राजनिर्घण्टः ॥

कस्तूरीमल्लिका स्त्री मृगमदगन्धा (सा इति राजनिर्घण्टः ॥

कस्मलं क्ली कश्मलं मोहः ॥ इत्यमरटीकायां रायमुकुटः ॥

कह्लारं क्ली श्वेतोत्पलं सौदि इति भाषा तत्पर्यायः ॥ सौगन्धिकं २ इत्यमरः तत्पुष्पगुणाः कषायत्वं मधुरत्वं शीतत्वं पित्तकफरक्तनाशित्वं च इति राजवल्लभः ॥

कह्वः पुं बकपक्षी इत्यमरः ॥

कक्षः पुं बाहुमूले कांकवगल इति च भाषा तृणं वीरुत् ॥ इत्यमरः शुष्कतृणे इति धरणिः कक्षः शुष्कवने पापे इति ॥ हेमचन्द्रः अरण्ये इति रुद्रः ॥ भित्तिः गार्म्यः इति भरत ॥ इति धनञ्जयः ॥


कक्षरुहा स्त्री नागरमुस्ता इति राजनिर्घण्टः ॥

कक्षा स्त्री हस्तिरज्जुः काञ्ची (ञ्चि गेहप्रकोष्ठकः भित्तिः साम्यं रथभागः अस्तरीयपश्चिमाञ्चले परिधानवस्त्रस्य पृष्ठतो निहिता वले उद्ग्राहिणी इति हेमचन्द्रः स्पर्द्धापदे इति मेदिनी तद्भ्र (सा कक्ष्या हस्ति मध्यदेश बन्धन रज्जुः इत्यमरटीकायां भरतः त्वग्रोगविशेषः तस्य लक्षणं यथा बाहुपार्श्वांसकक्षासु कृष्णस्फोटां सवेदनां पित्तप्रकोपसंभूतां कक्षामित्यभिनिर्दिशेत् इति माधवकरः ॥

कक्षापटः पुं कौपीने इति हलायुधः ॥

कक्षावान् पुं मुनिविशेषः इति हेमचन्द्रः ॥

कक्षावेक्षकः पुं शुद्धान्तपालः



उद्यानपालः रंगाजीवः कविः
खिंगः हास्यः इति मेदिनी ॥
कलोत्या स्त्री भद्रमुस्ता इति
राजनिर्घण्टः ॥
कल्यं क्ली पर्षाणकास्यकठोरा ॥
निकिरचाटी इति भाषा इति ॥
मिताक्षरा ॥
कक्षा स्त्री कक्षरज्जुः काकदड़ी
इति ख्याता॥ वर्मरज्जुः इत्यन्ये॥
इति भरतः गजमध्यबन्धन।
वर्मरज्जुः इति सारसुन्दरी ॥
तत्पर्यायः चूषा २ वरत्रा ३
इत्यमरः ॥ दूषा ४ दृष्या ५ दूष्या
६ कक्षा ७ इति तट्टीका ॥
हर्म्यादि प्रकोष्ठः राजगृहादि ॥
वेष्टनावकिञ्चारेपुः काञ्ची ॥
इत्यमरः अन्तर्गृहमितिस्मृतिः।
साहसं उद्योगः हस्तिका
उत्तरीयवस्त्रं इति हेमचन्द्रः ॥
गुल्फ इति शब्दरत्नावली ॥
कांसीयं क्ली कांस्यं इति ॥
राजनिर्घण्टः कांस्यं क्ली ताम्र
रंगमिश्रित धातुः ॥
कांसा इति भाषा तत्पर्यायः
कंसं २ कंसास्थि ३ ताम्रार्द्धं ४
इति त्रिकाण्डशेषः सौराष्ट्रकं ५
घोषं ६ कांसीयं ७ वह्निलोहकं
८ दीप्तिलोहं ९ घोरपुष्पं १०
दीप्तिकांस्यं ११ कांस्यं १२
अस्य गुणाः तिक्तत्वं उष्णत्वं
चक्षुर्हितकारित्वं वातकफपि
त्तनाशित्वं रूक्षत्वं कषायत्वं
रुचिकारित्वं लघुत्वं दीपनत्वं
पाचनत्वं पथ्यत्वञ्च इति ॥
राजनिर्घण्टः अम्लरसत्वं विशदत्वं
लेखनत्वं सारकत्वं पित्तनाशित्वं
इति राजवल्लभः दृष्टदेहापुष्टि
कारित्वं इति सुखबोधः तस्य
शोधनमारणमाह अनेनैव
विधानेन कांस्यं विशुगोथलेपितं
मारयद्बुद्धिमान् वैद्या भृते ॥
भवति चूर्णवत् अन्यञ्च हिङ्गुलं
पंचलवणं समथा लेन भावयेत्
कांस्यारकूटपत्राणि तेन कल्केन
लेपयेत् बद्धा गजपुटे पच्यात्कुट्टि
मायाति नान्यथा अन्यञ्च ताम्र
वद्भाद्यक्तत्वाताम्रवन्मारयेन्मार
यद्बुधः अन्यच्च कज्जलीतत्समंदत्वा
मर्दयेन्निम्बुकद्रवैः एवं पुट
त्रयेणैव निरुत्थं भस्म जायते
इति सुखबोधः ॥
कांस्यकारः पुं कंसकारः ॥
कांसारि इति भाषा इति
जटाधरः ॥

कांस्यनीलः पुं अञ्जनभेदः।
नीलतुत्थे तत्पर्यायः वृषाकास्यं
२ हेमतारं ३ वितुन्नकं ४ इति
हेमचन्द्रः ॥
काकं क्ली सरतवेधाः काकसमू(हः
इति मेदिनी ॥ (शेषः
काकः पुं स्वनामख्यातपक्षिवि
तत्पर्यायः करटः २ अरिष्टः ३
बलिपुष्टः ४ सकृत्प्रजः ५ ध्वांक्ष
ः ६ आत्मघोषः ७ परभृत् ८ बलि
भुक् ९ वायसः १० इत्यमरः वातजवः ११
वलः १२ दीर्घायुः १३ सुवकः १४
कसः १५ ग्रामीणः १६ पिशुनः १७
कटरवादकः १८ द्विकः १९ काणः २०
इति जटाधरः कालः २१ मूलिजेवः
२२ निमितकृत् २३ कौशिकारिः
२४ चिरायुः २५ मुखरः २६ खरः २७
महालोलः २८ चिरंजीवी २९
बलाचलः ३० तस्य मांसगुणाः
दोषत्रयापहत्वं चक्षुर्हितत्वं
बृंहणत्वं बलपुष्टिकारित्वं
लघुत्वं दीपनत्वञ्च इति
राजनिर्घण्टः पीटसर्पी खोंड़ा
इति भाषा द्वीपविशेषः ॥
परिमाणभेदः वृत्तविशेषः ॥
शिरोवस्त्राञ्चले इति हेमचन्द्रः
मेदिनीकरौ तिलकः ॥
अतिसृष्टः इति शब्दरत्नावली
काककंगुः स्त्री चीनकः इति
हेमचन्द्रः ॥
काककला स्त्री काकजंघाह्वः
इति जटाधरः ॥
काकघ्नी स्त्री महाकरंजः इति
राजनिर्घण्टः ॥
काकचिञ्चा स्त्री गुञ्जा कुंच इति
भाषा इति शब्दरत्नावली
काकचिञ्चिः स्त्री गुञ्जा इति
शब्दरत्नावली ॥
काकचिञ्ची स्त्री गुञ्जा इत्यमरः
काकच्छदः पुं खञ्जनपक्षी इति
शब्दरत्नावली ॥ (इति
काकच्छिदिः पुं खञ्जनपक्षी
त्रिकाण्डशेषः ॥
काकजंघा स्त्री स्वनामख्यातवृक्ष
विशेषः केउयाठेंगा इति भाषा
तत्पर्यायः काकांगी २॥
काकाञ्ची ३ काकनासिका ४ इति
शब्दरत्नावली कृषीवलः ५ इति
रत्नमाला ध्वांक्षजंघा ५ ककाङ्गी
६ सुलोमशा ७ पारावतपदी ८
दासी ९ नदीकान्ता १० अस्या गुणाः
तिक्तत्वं उष्णत्वं कृमिव्रणकफ
वाधिर्य्यजीर्णज्वरविषमज्वर
नाशित्वञ्च इति राजनिर्घण्टः



गुञ्जा इति रत्नमाला ॥
काकजम्बुः स्त्री भूमिजम्बुः तद्वृक्षे
वनजाम इति भाषा इति ॥
शब्दमाला काकजम्बू ॥
स्त्री जम्बूप्रभेदः
पर्य्यायः काकफला १ नादेयी २
काकवल्लभा ४ भृङ्गेष्टा ५ काक
नीला ६ ध्वाङ्क्षजम्बू ७ धनप्रिया ८
अस्या गुणाः कषायत्वं अम्लत्वं पके
मधुरत्वं गुरुत्वं दाहश्रमातिसार
नाशित्वं वीर्य्यवृद्धिबलप्रदत्वञ्च
इति राजनिर्घण्टः काकणी
काकणं क्ली कुष्ठविशेषः तस्य
लक्षणं यथा यत् काकणन्तिका
वर्णमपाके तीव्रवेदनं त्रिदोष
लिङ्गं तत् कुष्ठं काकणं नैव ॥
सिध्यति इति माधवकरः
काकनन्तिका स्त्री गुञ्जा कुच।
इति भाषा इति रत्नमाला ॥
काकतिक्ता स्त्री काकचिञ्चा कुंच
इति भाषा इति रत्नमाला ॥
काकतिन्दुकः पुं वृक्षविशेषः।
माकडाकेंदु माकडागाब् ॥
काकतेन्दु इति च भाषा तत्पर्य्यायः
काकेन्दुः २ कुलकः ३ काकपीलु
कः ४ इत्यमरः काकपील
काकेन्दुः ६ काकस्फूर्जः ७ काककः

(तुः ८ काकबीजकः ९ अस्य गुणाः
कषायत्वं अम्लत्वं गुरुत्वं ॥
वातविकारनाशित्वं च पक्वस्य तस्य
गुणाः मधुरत्वं किञ्चित् कफ
कारित्वं वातपित्तनाशित्वञ्च
इति निर्घण्टः ॥
काकतुण्डः पुं कालागुरु इति
हेमचन्द्रः ॥
काकतुण्डिका स्त्री काकचिञ्चा
गुञ्जा इति हलायुधः ॥
काकतुण्डी स्त्री राजरीतिः
राजपित्तल इति भाषा इति
राजनिर्घण्टः वृक्षविशेषः
कौआठोडी इति हिन्दी भाषा
तत्पर्य्यायः काकादनी २
काकपीलुः ३ काकशिम्बी ४ रक्तला
५ ध्वांक्षादनी ६ वक्रशल्या ७
दुर्मोहा ८ वायसादनी ध्वांक्षनखी ९
वायसी १० काकदन्तिका ११ ध्वांक्षदन्ती
१२ अस्या गुणाः कटुत्वं उष्णत्वं
तिक्तत्वं द्रवत्वं रसायनत्वं ॥
वातदोषहारित्वं रुचिकारित्वं
पलितस्तम्भित्वञ्च इति राजनिर्घण्टः
काकध्वजः वाडवाग्निः इति
त्रिकाण्डशेषः ॥
काकनामा नं पुं वकवृक्षः इति
रत्नमाला ॥

काकनासः पुं विकङ्कतवृक्षः
इति राजनिर्घण्टः ॥
काकनासा स्त्री काकजङ्घावृक्षः
इति जटाधरः ॥
काकनासिका स्त्री काकजङ्घावृक्षः
इत्यमरः रक्तत्रिवृत् इति
राजनिर्घण्टः ॥
काकपदः पुं रतिबन्धविशेषः
तस्य लक्षणं यथा पादौ स्कन्धय ॥
पुंसः स्त्री विश्लिङ्गं भगे लघु ॥
कामयेत् कामुकी कामी बन्धः
काकपदो मतः इति रतिमञ्जरी
काकपर्णी स्त्री मुद्गपर्णी इति
भावप्रकाशः ॥
काकपक्षः पुं मस्तकपार्श्वद्वये
केशरचनाविशेषः काणपाटा
जुलफी इति च भाषा तत्पर्य्यायः
शिखण्डकः २ इत्यमरः ॥
शिखाण्डकः ३ शिखण्डः ४ इति
तट्टीका ॥
काकपीलुः पुं काकतिन्दुकः
काकतुण्डी श्वेतगुञ्जा इति
राजनिर्घण्टः ॥
काकपीलुकः पुं काकतिन्दुक
वृक्षः माकडाकेंदु इति भाषा
इत्यमरः ॥
काकपुच्छः पुं कोकिलः इति

शब्दरत्नावली ॥
काकपुष्टः पुं कोकिलः इति
काकपुष्टः पुं कोकिलः इति
त्रिकाण्डशेषः
राजनिर्घण्टः ॥
काकफलः पुं निम्बवृक्षः इति
राजनिर्घण्टः ॥
काकभाण्डी स्त्री महाकरञ्जः
इति राजनिर्घण्टः ॥
काकभीरुः पुं पेचकः इति
त्रिकाण्डशेषः ॥
काकमद्गुः पुं दात्यूहपक्षी ॥
इति त्रिकाण्डशेषः ॥
काकमर्दः पुं महाकालवृक्षः
इति राजनिर्घण्टः ॥
काकमर्दकः पुं महाकाललता
माकाल इति भाषा इति ॥
रत्नमाला ॥ (वृक्ष
काकमाचिका स्त्री काकमाची
इति शब्दरत्नावली ॥
काकमाची स्त्री क्षुद्रवृक्षविशेषः
गुडकामाइ इति भाषा तत्
पर्य्यायः वायसी २ इत्यमरः
ध्वांक्षमाची ३ वायसाह्वा ४ सर्वतिक्ता
५ बहुफला ६ कटुफला ७ रसायनी
८ गुच्छफला ९ काकमाता १०
स्वादुपाका ११ सुन्दरी १२ तिक्तिका



११ वहुतिक्ता १४ अस्या गुणाः
कटुत्वं तिक्तत्वं उष्णत्वं कफ
मूलार्शः शोथ दोष वृष कंडू
नाशित्वंच इति राजनिर्घंटः॥
त्रिदोष शमताकारित्वं हृद्यत्वं
रसायनत्वं। नाडिशीनत्वं॥
नात्युष्णत्वं रुच्यत्वं भेदकत्वंच
इतिराजवल्लभः॥
काकमाता स्त्री काकमाची इति
राजनिर्घंटः॥
काकमुद्गा स्त्री मुद्गपर्णीवृक्षः
मुगाणी इति भाषा इत्यमरः॥
काकयवः पुं तंडुलशून्यधान्य
आगडा इति भाषा इति॥
महाभारते॥
काकरुहा स्त्री वंदावृक्षः इति
त्रिकांडशेषः॥
काकरूकः पुं स्त्रीजितः उलूकः
दंभः दिगंबरः भीरुकनिर्धनेषु
त्रि इतिहेमचंद्रः॥
काकलं स्त्री कंठमणिः इति
त्रिकांडशेषः॥
काकलकः पुं कंठमणिः
इति हेमचंद्रः॥काकलिः
स्त्री सूक्ष्ममधुरास्फुटध्वनिः
इत्यमरटीकायां भरतः॥(निः
काकली स्त्री सूक्ष्ममधुरास्फुटध्व

इत्यमरः॥
काकलीद्राक्षा स्त्री द्राक्षाभेदः
वेदाना किषमिष इति ख्याता
तत्पर्य्यायः जंतुका २फलोत्तमा
३लघुद्राक्षा ४ निर्वीजा ५सूक्ष्मा
६रसायिका ७ तस्यागुणाः॥
मधुरत्वं अम्लत्वं रसालत्वं रुचि
कारित्वं शिशिरत्वं श्वास रुक्कास
नाशित्वं जनवल्लभत्वंच इति
राजनिर्घंटः॥
काकलीरवः पुं कोकिलः इति
राजनिर्घंटः॥
काकवल्लरी स्त्री स्वर्णवल्ली इति
राजनिर्घंटः॥
काकशीर्षः पुं वकवृक्षः इति
जटाधरः॥(वृक्षः
काकस्फूर्जः पुं काकतिंडुक
इतिराजनिर्घंटः॥
काका स्त्री काकनासालता
काकोलीवृक्षः काकजंघावृक्षः
रक्तिकालता मलपूवृक्षः
काकमाचीवृक्षः इतिमेदिनी
काकेंगा स्त्री काकांगीवृक्षः॥
इत्यमरटीकायां रमानाथः
काकांगी स्त्री काकजंघावृक्षः
इत्यमरः॥
काकांची स्त्री काकजंघावृक्षः

इति शब्दरत्नावली
काकांडः पुं महानिंबः॥
काकतिंडः इतिराजनिर्घंटः
काकांडा स्त्री कोलशिंवी इति
राजनिर्घंटः॥(ना
काकेंडी स्त्री महाज्योतिष्मतील
इतिराजनिर्घंटः॥
काकांडोला स्त्री कोलशिंवी
इतिराजनिर्घंटः॥
काकादनी स्त्री गुंजा इति॥
शब्दरत्नावली श्वेतगुंजा इति
राजनिर्घंटः वृक्षविशेषः॥
कालियाकडा इति भाषा तत्
पर्य्यायः हिंस्रा २शूअनखी ३
तुंडी ४ काला ५अहिंस्रा ६कटुकं
७ याणि ८ कापालः ९कुलिकः
१० इतिरत्नमाला॥
काकाशुः पुं स्वर्णवल्ली इति॥
राजनिर्घंटः॥
काकारि पुं पेचकः। इति॥
हेमचंद्रः॥
काकालः पुं द्रोणकाकः।इति
शब्दरत्नावली॥
काकिणी स्त्री पणचतुर्थांशःपोव
गंडा कडि इतिभाषा मानदंडः॥
कौडी नल इत्याभाषा॥
हसला कौव इति भाषा॥

पकवराटी पककडा इति भाषा
उन्मानस्यां शकः इतिमेदिनी
काकिनी स्त्री काकिणी इत्यमर
टीकायांरायमुकुटः॥
काकिलः पुं काकलःकंठमणिः
इति शब्दमाला॥
काकुः स्त्री शोकभयादि॥
भिन्नध्वनिविकारः इत्यमरःजिह्वा
इतित्रिकांडशेषः
काकुत्स्थः पुं श्रीरामचंद्रः इति
रामायणे पुरंजयराजः इति
त्रिकांडशेषः॥
काकुदं क्लीं तालु इत्यमरः॥
काकेंडुः पुं कुल्लकवृक्षः॥
माकडाकेंड इति ख्यातः
इत्यमरः॥
काकेष्टः पुं निंववृक्षः इति॥
राजनिर्घंटः॥
काकेक्षुः पुं खगंडः खागडा
इति भाषा इति रत्नमाला
त्रिकांडशेषश्च काशः इति॥
राजनिर्घंटः॥
काकोचिकः पुं काकोचीमत्स्यः
काउची इति भाषा इति
हारावली॥
काकोची स्त्री काकोचिकमत्स्यः
इतिहारावली॥

काकोडुम्बरः पुं काकोडुम्बरिका । इति
काकडुमुर इति भाषा इति ॥
शब्दरत्नावली ॥
काकोडुम्बरिका स्त्री वृक्षविशेषः इति
कोठडुमुरि डुमुरि इति विख्याता।
तत्पर्य्यायः फल्गुः २ मलपूः ३
जघनेफला ४ इत्यमरः ॥
अस्या गुणाः काकोडुम्बरिकाशब्दे
द्रष्टव्याः ॥
काकोदरः पुं सर्पः इत्यमरः ॥
काकोडुम्बरिका स्त्री काकोडुम्बरिका
काकडुमुरि इति भाषा अस्याः
पर्य्यायः हृत्सोडुम्बरिका २ खरपत्री
३ राजिका ४ लघ्वोडुम्बरिका ५
कुष्ठघ्नी ६ फल्गुवाटिका ७ अजाजी
फल्गुनी ८ मलपूः ९ चित्रभेषजा १०
११ ध्वांक्षनाशी १२ अस्या गुणाः
शीतत्वं कषायत्वं व्रणनाशित्वं
गर्भरक्षाहितत्वं स्तनदुग्धप्रदत्वञ्च
इति राजनिर्घण्टः ॥
काकोलं क्ली नरकविशेषः इति
मेदिनी ॥ (वर
काकोलः पुं क्ली कृष्णवर्णास्या
विषविशेषः इत्यमरः काकोल
मुद्गतेजः स्यात् कृष्णकविमहा
विषे ॥ इति वैद्यके काकोलः
काकोलः पुं कुलालः द्रोणकाकः

इति मेदिनी सर्पः ॥
शूकरभेदः इति शब्दरत्नावली
काकोलीनामख्यातौषधिविशेषः
इति धरणी ॥ (षप्
काकोली स्त्री अष्टवर्गप्रसिद्धा
विशेषः तत्पर्य्यायः मधुरा ॥
२ काकी ३ कालिका ४ वायसोली
५ क्षीरा ६ ध्वांक्षिका ७ वीरा ८
शुक्ला ९ धीरा १० मेदुरा ११
ध्वांक्षोली १२ स्वादुमांसी १३
वयःस्था १४ जीवनी १५ शुक्लक्षीरा
१६ पयस्विनी १७ इति राजनिर्घण्टः
पयस्या १८ क्षीरपाकी १९
इति रत्नमाला अस्या गुणाः ॥
शीतत्वं मधुरत्वं क्षयपित्त ॥
अनिलास्रक दाहज्वर नाशित्वं
कफशुक्र वर्द्धकत्वञ्च इति ॥
राजनिर्घण्टः ॥ (यो
काकोलूकिका स्त्री काकोलूक
वैरता इति शब्दरत्नावली ॥
काचः पुं काकः इति जटाधरः
काचा स्त्री वचा इति शब्दचन्द्रिका
काचं क्ली सिक्थकं मोम इति
भाषा काचलवणं इति ॥
राजनिर्घण्टः ॥
काचः पुं मृत्तिकाविशेषः कांच
इति भाषा तत्पर्य्यायः क्षारः ॥

२ इत्यमरः अस्य गुणाः ॥
क्षाररसत्वं उष्णवीर्य्यत्वं गुंजनाद
दृष्टिकारित्वञ्च इति राजवल्लभः
शिके शिका इति भाषा मणिः
नेत्ररोगविशेषः इति ॥
मेदिनी तस्य लक्षणं अस्मिन्
पितमोभूतेनातिरुद्धे महागदे
वैद्यादित्यो सनत्वत्रावेतदीतेव
विद्युतः निर्मलानि च तेजांसि
भ्राजिस्नूनीव पश्यति । स एव
लिंगनाशः नीलिका काचसंज्ञितः
इति माधवकरः ॥
काचनं क्ली पत्रनिबंधने इति
त्रिकाण्डशेषः कचेल इत्यपि ।
पादोहृष्टः स्त्रीलिंगकिंशब्दो
वा इति व्याकरणं ॥
काचकं क्ली लेखानिवध्यते
येनतत्र पत्र निबंधने इति ॥
हारावली ॥
काचनकी पुं लिपिः तत् ॥
पर्य्यायः वर्णतूतः २ स्वस्तिमुखः
लेखः ४ वाचिकहारकः ५ ता
लिकः ६ इति जटाधरः ॥
काचभाजनं क्ली काचपात्रे।
काचरवासन इति भाषा तत्
पर्य्यायः पिंचाने २ इति ॥
त्रिकाण्डशेषः ॥

काचमलं क्ली काचलवणं इति
राजनिर्घण्टः ॥ (षः
काचलवणं क्ली लवणविशे
कालालोन इति भाषा तत्
पर्य्यायः नीलं २ काचोद्भवं ३
काचं ४ नीलकं ५ काचसंभवं ६
काचसौवर्च्चलं ७ कृष्णलवणं ८
पाकजं ९ काचोत्थं १० हृद्यगंधं
११ काललवणं १२ कुविंदं १३
काचमलं १४ कृत्रिमं १५ अस्य गुणाः
रुचिकारित्वं ईषत्क्षारत्वं
पित्तहृद्विकारित्वं दाहदातृत्वं
कफवात गुल्म शूलनाशित्वं
अग्निदीपनत्वञ्च इति राजनिर्घण्टः
काचसंभवं क्ली काचलवणं इति
राजनिर्घण्टः ॥ (णं
काचसौवर्च्चलं क्ली काचलव
इति राजनिर्घण्टः ॥ (नः
काचस्थाली स्त्री फलेरुहाह
पारुलगाछ इति भाषा इत्यमरः
काचपात्रेच ॥
काचिघः पुं कांचने क्षेमेरुः
क्षिमड्ड इति भाषा मूषिकः इति
मेदिनी ॥
काचित् ब्य काचन कापिती
इति व्याकरणं ॥
काचितं त्रि शिकितं शिक्या


२ इत्यमरः अस्य गुणाः ॥
क्षारसत्वं उष्णवीर्यत्वं अंजनात्
दृष्टिकारित्वं इति राजवल्लभः
शिकोशिका इति भाषा मणिः
नेत्ररोगविशेषः इति
मेदिनी तस्य लक्षणं अस्मिन्
पित्तमोभूतेनाति रूढमहागदे
बहुदित्योसनतन्वाबेतरीदेव
विद्युतः निर्मलानिव तेजांसि
आजिस्तूनीव पश्यति सएव ॥
लिंगनाशस्तु नीलिका काचसंज्ञितः
इति माधवकरः ॥
काचनं क्ली पत्रनिबंधने इति
त्रिकांडशेषः कचेल इत्यपि
पाठोदृष्टः स्त्रीलिंगकिंशब्दार्णव
इति व्याकरणं ॥
काचनकं क्ली लेखो निबध्यते
येनतन्त्र पत्रनिबंधने इति
हारावली ॥
काचनकी २ पुं लिपिः तत्र


काचमलं क्ली काचलवणं इति
राजनिर्घंटः ॥ (षः
काचलवणं क्ली लवणविशे
कालालोन इति भाषा तत
पर्य्यायः नीलं २ काचोद्भवं ३
काचं ४ नीलकं ५ काचसंभवं ६
काचसौवर्च्चलं ७ कृत्सलवणं ८
पाकजं ९ काचेत्थं १० हृद्यगंधं
११ काललवणं १२ कुरुविंदं १३
काचमलं १४ कृत्रिमं १५ अस्य गुणाः
रुचिकारित्वं इषत्क्षारत्वं
पित्तदाहकारित्वं दाहकरात्वं
कफवात गुल्म शूल नाशित्वं
अग्निदीपनत्वंच इति राजनिर्घंटः
काचसंभवं क्ली काचलवणं इति
राजनिर्घंटः ॥ (णं
काचसौवर्चलं क्ली काचलव
इतिराजनिर्घंटः ॥
काचस्थाली स्त्री फलेरुहावृक्षः
पारुलगाछ इति भाषा इत्यमरः


रोपितवस्त्रशिकायतोलादृव्य
इतिभाषा इत्यमरः ॥
काचिमः पुं देवकुलोद्भववृक्षः
तत्पर्य्यायः भंजरुः २ इति
त्रिकांडशेषः ॥
कांचनं क्ली स्वर्णं इत्यमरः
पद्मकेशरं इति मेदिनी ॥
धनं नागकेशरपुष्पं इति
राजनिर्घंटः ॥ (वृक्ष
कांचनः पुं स्वनामख्यातपुष्प
विशेषः रक्तश्वेतभेदेनसद्विधः
आद्यस्य पर्य्यायः रक्तपुष्पः २
कोविदारः ३ युग्मपत्रः ४ कुंडलः
५ द्वितीयस्य पर्य्यायः कांचनालः
२ कर्बुदारः ३ पाकारिः ४ इति
रत्नमाला अस्य राजनिर्घंटोक्त
गुणपर्य्यायौ कोविदारशब्दे द्रष्ट
व्यौ चंपकः नागकेशरः ॥
उडुंबरः धुस्तूरः इति मेदिनी ॥
कांचनकं क्ली हरितालं इति
राजनिर्घंटः ॥
कांचनकः पुं कोविदारवृक्षः
इतिवैद्यके (ली
कांचनकदली स्त्री स्वर्णकद
चांपाकला इति भाषा इति
राजनिर्घंटः ॥
कांचनकारिणी स्त्री शतमूली

इति शब्दचंद्रिका ॥
कांचनगिरिः पुं सुमेरुपर्वतः
इति हेमचंद्रः ॥ (वृक्षः
कांचनपुष्पकं क्ली आहुल्य
इतिराजनिर्घंटः ॥ (क्षः
कांचनपुष्पी स्त्री गणिकारीवृ
इति राजनिर्घंटः ॥
कांचनक्षीरी स्त्री क्षीरिनीलता
इतिराजनिर्घंटः ॥
कांचनारः पुं कोविदारवृक्षः
कचनार इति हिंदीभाषा इति
राजनिर्घंटः ॥
कांचनालः पुं कोविदारवृक्षः
इति शब्दरत्नावली ॥
कांचनाह्वयः पुं नागकेशरवृक्षः
इत्यमरः ॥
कांचनी स्त्री हरिद्रा इति
मेदिनी स्वर्णक्षीरी वृक्षः ॥
गोरोचन इति राजनिर्घंटः
कांचनीया स्त्री गोरोचना इति
राजनिर्घंटः ॥
कांचिः स्त्री कांची इत्युणादि
कोषः ॥
कांचिकं क्ली कांजिकं इति ॥
हेमचंद्रः ॥
कांची स्त्री स्त्रीकट्याभरणे
चंद्रहार गोट इत्यादिभाषा ॥








तत्पर्य्यायः मेखला २ सप्तकी ३
रसना ४ सारसन ५ इत्यमरः ॥
कांचिः ६ रशना ७ केचित्तु ॥
एकयष्टिर्भवेत्कांचीमेखलात्वष्ट
यष्टिका रसना षोडश ज्ञेया॥
कलापः पंचविंशकः इतिपठंति
इहत्वभेदात् पर्य्यायता इति॥
तद्दीकामोत्तद समग्रुर्य्यंतरीत
गुरीविशेषः इतिमेदिनी ॥
गुञ्जा इति विश्वः ॥
कांचीपदं स्त्री जघने इति
हलायुध हेमचंद्रौ ॥
कांञ्जिके स्त्री वारियर्युषितान्नाम्ल
जलंकांजी इति भाषा ॥
तत्पर्य्यायः आरनालकं २
सौवीरं ३ कुल्माषं ४ अभिषुतं
५ अवंतिसोमं ६ धान्याम्लं ७
कुञ्जलं ८ इत्यमरः कुल्मासं
९ कुल्माषाभिषुतं १० कांचिकं
११ कांञ्जीकं १२ कांञ्जिका १३
कांञ्जिकं १४ कांञ्जी १५ महावारि
१६ धान्यमूलं १७ धान्ययोनि १८
तुषाम्बु १९ इतितद्दीकापरहाम्लं
२० महारसं २१ इतिरत्न माला॥
तुषोदकं २२ शुक्तं २३ चक्रं २४
धातुघ्नं २५ उन्नाहं २६ रोचनं॥
२७ कुंडगोलकं २८ सरीराम्लं २९
इतिहेमचंद्रः ॥ वीरः ३०
अभिषवं ३१ अम्लसारकं ३२
अस्य गुणाः वात श्लेष्म पित्त
ज्वरदाह मूर्च्छा शूलाध्मान विबंध
नाशित्व कांञ्जिकं दधितैलत्व
वलीपलितनाशने दाहकं गात्र
शैथिल्य वल्ये संतर्पणं परं।
मर्दनात्तर्पणं भक्षणात् इति
राजनिर्घंटः अपिच भेदकत्वे
तीक्ष्णत्वे उष्णत्वे पित्तरुचि
वेति शुद्धाग्निवृद्धि कारित्वे स्पर्शे
शीतलत्वे श्रमक्लम नाशित्वेच
पुरातनस्यतस्य गुणाः रुक्पांडु
क्रिमिरोग नाशित्वं अग्निवृद्धि
कारित्वेच इतिराजवल्लभः ॥
कुल्माष धान्य मंडेन चाभूतं
कांञ्जिकं भवेत् यन्मस्यादि
युचौनाडेसगुडस्तीद्धकांजिकेः
धान्यराशौ त्रिरात्रस्थेशुक्तेवुक्ते
तडच्यते इतिवैद्यकपरिभाषा
कांञ्जिकवटकः पुं वटकविशेषः
कांजिवडा इतिभाषातस्यपाक
प्रकारोयथा मेथनीतृतनाधार्य्या
कटुतैलेन लेपितानिर्मलेनोदुना
पूर्य्यतस्याचूर्णं विनिक्षिपेत्॥
राजिकाजीरलवण हिंगुसुंठी
निशाकृते निक्षिपेद्घटकांस्तत्र



ण्डस्यासेव मुद्रयेत् ततोदिन॥
ग्याहुष्ठे मस्ताःस्युः वटकाश्रुव
अस्यगुणाः कांक्षिवटकोरुच्या
वातहरः श्लेष्मकारकः शीतःसह
शूलमजीर्णहरेतेनेत्रामयेत्वहितः
इति भाव प्रकाशः॥
कोक्किका स्त्री जीवंती ॥
पलाशीलता इतिराजनिर्घंटः
कोञ्की स्त्री महाद्रोणपुष्पः इति
राजनिर्घंटः कोञ्क्कि इत्यमर
टीका
कोठः पु पाषाणः इति॥
त्रिकांडशेषः॥
काठिन्य क्ली कठिनता यथा
सीते माकुरु सेश्मेव मृदुना।
काठिन्यमंगीकृते इत्युद्भटः॥
काठिन्यफलः पु कायित्यवृक्षः
इतिराजनिर्घंटः॥
काणः पु काकः इतिमेदिनी
काणः त्रि एकचक्षुः काणाइति
इतिभाषा इतिमेदिनी॥ (षः
काणुकः पु काकः इत्युणादिको
कांडः पु क्ली दंडः नाले॥
बाणः शरः अर्वी कुत्सितः॥
वर्गः परिच्छेदः अवसरः॥
प्रस्तारः वारिजले इत्यमरः॥
स्तंवः तृणादिगुच्छः तरुस्कंधः

गुडि इतिभाषा वृंदः समूहः
रहः निर्जनस्थाने इतिमेदिनी
स्माया इतिहेमचंद्रः॥
पापीयान् इति धरणिः॥
कांडवट्टकः पु कारेवल्लः इति
राजनिर्घंटः॥
कांडकांडकः पु काशतृणेइति
राजनिर्घंटः॥
कांडकारं क्ली गुवाकः इति
शब्दमाला॥ (काष्ठः
कांडकीलकः पु लोध्रः लोध
इतिभाषा इतिराजनिर्घंटः
कांडगुडुः पु गुडनामतृणेइति
राजनिर्घंटः॥
कांडगोचरः पु नाराचः॥
लोहमयबाणः इतित्रिकांडशेषः
कांडपर्णी स्त्री सूक्ष्मपर्णीलता।
रामहूती इति ख्याता इति॥
शब्दचंद्रिका॥
कांडतिक्तः पु भूनिंबः इति
राजनिर्घंटः॥
कांडतिक्तकः पु भूनिंबवृक्षः
चिराता इति भाषा इति॥
शब्दचंद्रिका॥
कांडनीलः पु लोध्रः इति
राजनिर्घंटः॥ (णी
कांडपटः पु यवनीतिरस्कारि

कानात् इतिभाषा इतिहेमचंद्रः
कांडपुंखा स्त्री शरपुंखा इति
राजनिर्घंटः॥ (ष्प
कांडपुष्पं क्ली त्रुद्रसगंधिपु
विशेषः दोना इति भाषा॥
इतिशब्दचंद्रिका॥
कांडपृष्ठं क्ली कर्णधनुः इति
महाभारते॥ (वः
कांडपृष्ठः त्रिकांडस्पृष्ठः शस्त्राजी
इत्यमरटीकायांस्वामीवैष्णवा॥
पतौ पु इति दानधर्मः॥
कांडरुहा स्त्री कटुकी इति॥
रत्नमाला॥
कांडर्षिः पु वेदकांडविशेषा
ऽध्यापक मुनिभेदः सतु॥
जैमिन्यादिः इतित्रिकांडशेषः
कांडवान् त्रिकांडीरः तीरंदाज
इतिभाषा इत्यमरः॥
कांडसंधिः पु ग्रंथिः पावुगांठि
इतिच भाषा इतिराजनिर्घंटः
कांडस्पृष्ठः त्रि कांडपृष्ठः॥
शस्त्राजीवी इत्यमरः॥
कांडहीनं क्ली भद्रमुस्तके॥
शब्दचंद्रिका॥
कांडिका स्त्री लंकानामकधान्य
विशेषः वालुकीनामककर्कटीभेदः
इतिराजनिर्घंटः॥

कांडीरः त्रि कांडास्त्रवान्॥
तीरंदाज इतिभाषा इत्यमरः
कांडीरः पु अपामार्गवृक्षः॥
लताप्रभेदः कांडवेल इति
ख्यातः तत्पर्य्यायः कांडकटुकः
२ नासासंवेदनः ३ पटुः ४॥
अयकांडः ५ लोमवल्ली ६
कारवल्ली ७ सुकांडिका ८ अस्य
गुणाः कटुत्वं तिक्तत्वं उष्णत्वं
सारकत्वं डुष्टव्रण लूता गुल्मोदर
प्लीह शूलमेदाग्निनाशित्वंच
इतिराजनिर्घंटः॥
कांडीरी स्त्री मंजिष्ठा इति
रत्नमाला कांडीरा इत्यपिपाठः
कांडीरी स्त्री नागदंतीवृक्षः
इतिरत्नमाला॥
कांडेरुहा स्त्री कटुकी इति॥
रत्नमाला॥
कांडेक्षुः पु कोकिलाक्षवृक्षः
कुलियाखाडा इति भाषा॥
इत्यमरः काशतृणे इति॥
राजनिर्घंटः॥
कातरः त्रि व्यसनाकुलचित्तः
व्याकुलः तत्पर्य्यायः अधीरः
२ इत्यमरः॥
कातरः पु कातलमत्स्यः इति
शब्दरत्नावली॥

कातलः पुं मत्स्यविशेषः। कातला इतिभाषा तस्यगुणाः उष्णत्वं मधुरत्वं गुरुपाकित्वं। त्रिदोषकारित्वंच इति राजवल्लभः॥
कात्यः पुं कात्यायनमुनिः इति त्रिकांडशेषः॥ (नि
कात्यायनः पुं धर्म्मशास्त्रकर्त्तृमुनि विशेषः वररुचिः इति॥ मेदिनी॥
कात्यायनी स्त्री दुर्गा अर्द्धवृद्धा काषायवसनाविधवा इत्यमरः
कात्तृणं क्ली रोहिषतृणे इति राजनिर्घंटः॥
कादंवः पुं कलहंसः वालिहांस इतिभाषा इत्यमरः अस्य॥ मांसस्यगुणाः वातरक्तपित्त नाशित्वं भेदकत्वं शुक्रकारित्वं प्रीतत्वंच इति राजवल्लभः॥ कदम्ब वृक्षः इत्यमरटीकायां भरतः वाणः इतिमेदिनी॥
कादंवकः पुं वाणः इति हारावली॥ (मद्यं॥
कादंवरं क्ली कदंवपुष्पाद्भव इतिमेदिनी दधिसारः इति हेमचंद्रः पीयूषः इतिविश्वः
कादंवरः पुं दध्यग्रे दधिसरः॥
इतिमेदिनी॥
कादंवरी स्त्री मदिराकोकिला सरस्वती शारिकायक्षिणी॥ (इति
इतिमेदिनी॥
कादंवरीवीजं क्ली सुरावीजे रत्नमाला॥
कादंवर्य्यः पुं कदंववृक्षः इति जटाधरः॥
कादंवा स्त्री कदंवपुष्पीवृक्षः मुंडिरी इति भाषा इति शब्दचंद्रिका॥
कादंविनी स्त्री मेघमाला॥ मेघश्रेणिः इत्यमरः॥
कादाचित्कं क्ली कदाचिद्भवे इतिव्याकरणं॥ (ज्ञः
काद्रवेयः पुं कद्रु संतानः ना इत्यमरः
कानकं क्ली जयपालवीजे अस्यगुणाः तीक्ष्णत्वं उष्णत्वं सारकत्वं उत्क्लेदकारित्वंच इति राजवल्लभः॥
काननं क्ली वने ब्रह्मणमुखे गृहे इति मेदिनी॥
काननारिः पुं शमीवृक्षः इति शब्दचंद्रिका॥ (त
कानीनः पुं स्त्री अनूढापुत्रः त पर्य्यायः कन्यकाजातः २ इत्यमरः

साकन्यायद्यनूढापितृगृह एव तिष्ठति तदातत्पुत्रोमातामह स्यैवयथाकानीनः कन्यका॥ मातामह सुतो मतः इति॥ याज्ञवल्क्यः यमूढातदोवाढेव यथापितृवेश्मनिकन्यातंयंपुत्रं जनयेद्रहः तेकानीनंवदेन्नाम्ना वोढुः कन्या समुद्भवं इति मनुः व्यासे कर्णेच पुं इति मेदिनी॥ (वेदः
कांतं क्ली कुंकुमे इतिराजनि लोह विशेषः तस्यलक्षणं यथास्वादु यंत्र भवेत्त्रिवकल्का रात्रिदिवोषितः कांतं तद्धनमे यच्च रूप्येणवर्ज्जिते मिलेत्॥ तस्यपरीक्षा यथापात्रे यस्मिन् विसरति जलेतैलविंदुर्निषिक्तो विहंगंधविसृजतिनिजंरूषिते निंवकल्कैः पाकेदुग्धंभजति शिखराकारतांनैतिभूमौकांते लोहे तदिद मुदितंलक्षणंकां नचान्यत् इति सुखबोधः॥ अपिवयतपात्रे नप्रसरतिजले तैलविंदु निषिक्तो हिंगुर्गंधं त्यजतिभजतेस्वादुतांनिंवकल्कः पाक्ये दुग्धे भवति सिकतापुंजः वन्नेति भूमौ कस्योगः स्यात्कजल
वनकः कांतलोहंवदंति इति वैद्यकं॥
कांतः त्रि मनोरमः शोभनः इत्यमर मेदिनीकरौ॥
कांतः पुं श्रीकृष्णः चंद्रः इति शब्दरत्नावलीपतिः चंद्रसूर्य्यौरूपः पर्य्यायांतः शिलायथा चंद्रकांत सूर्य्यकांताः यस्कांतादयः इति मेदिनी हिज्जलवृक्षः वसंत ऋतुः इतिराजनिर्घंटः॥
कांत पक्षी पुं मयूरः इति शब्दचंद्रिका॥ (क्षः
कांतपुष्पः पुं कोविदारवृ इतिराजनिर्घंटः॥
कांतलकः पुं नंदीवृक्षः तूंद इति भाषा इत्यमरः॥ (ति
कांतलोहं क्ली अयस्कांतः इ राजनिर्घंटः॥
कांता स्त्री नारी प्रियंगुवृक्षः इतिमेदिनी सर्वांगसुंदरी स्त्री इत्यमरः वृहदेला रेणुका॥ नागरमुस्ता इतिराजनिर्घंटः
कांतांघ्रिदोहदः पुं अशोकवृक्षः इतित्रिकांडशेषः॥ (वृक्षः
कांताचरणदोहदः पुं अशोक इतिभूरिप्रयोगः॥
कांतायसं क्ली अयस्कांतः इति



राजनिर्घंटः ॥
कांतारं स्त्री उपसर्गादिकानने अन्नविशेषः इतिहेमचंद्रः ॥
कांतारः पुं इक्षुविशेषः कतारे इतिहिंदीभाषा अस्य गुणाः गुरुत्वं शुक्रश्लेष्म हृद्दिकारित्वं हेहणत्वं सारकत्वंच इति भावप्रकाशः कांविदारहक्षः वेशः इतिराजनिर्घंटः ॥
कांतारः पुं स्त्री महावने दुर्गम पथः इत्यमरः विले छिद्रे इतिमेदिनी ॥
कांतारकः पुं इक्षुविशेषः ॥ काजिलि आक इति भाषा इत्यमरः ॥
कांतारी स्त्री इक्षुभेदः काजिलि आक इतिभाषा अस्यागुणाः मधुरत्वं लघुत्वं क्षाररसत्वं कफवात कारित्वंच इति राजवल्लभः ॥
कांतिः स्त्री दीप्तिः तत्पर्यायः। शोभा २ द्युतिः ३ छविः ४ इत्यमरः स्त्री शोभा इति ॥ हेमचंद्रः इच्छा स्पृहार्थकम धातोर्भावे क्ति प्रत्ययः ॥
कांतिदे स्त्री पित्तं इतिशब्दचंद्रि का शोभादायके त्रि ॥

कांतिदा स्त्री वाकुचीहक्षःसोम राजी इतिख्याता इतिराजनिर्घंटः
कांतिदायकं स्त्री कालीयकहक्षः इतिजटाधरः शोभादायके त्रि
कांदविकः त्रि आपूपिकः पूपविक्रयकर्ता इत्यमरः ॥
कांदिग्भूतः त्रि भयेनपलायितः इतिपुराणे ॥
कांदिशीकः त्रि भयद्रुतः भयेन पलायितः इत्यमरः ॥
कान्यकुब्जं स्त्री पुरविशेषः कनज इतिभाषा तत्पर्यायः महोदयं १ कन्याकुब्जं २ गाधिपुरं ३ कौशं ४ कुशस्थलं ५ इति हेमचंद्रः ॥ (द्वये)
कान्यजा स्त्री नलीनामगंध इतिशब्दचंद्रिका ॥ (जः)
कापटिकः पुं छात्रः अन्यमर्म ज्ञाठेत्रि इतिमेदिनी ॥
कापट्यं स्त्री कपटता शठता कपटशब्दात् भावार्थेष्यप्रत्ययः
कापथः पुं कुपथः तत्पर्यायः व्यध्वः २ दुरध्वः ३ विपथः ४ कदध्वा ५ इत्यमरः ॥ (गंत)
कापालं स्त्री अष्टादशकुष्ठांत र्गतिककुष्ठं इतिमाधवकरः अस्यनिदानेकपाल शब्देद्रष्टव्यं

कापालः पुं कर्कटाकालियाकडु इति भाषा इतिशब्दचंद्रिका ॥ रत्नमालाच ॥
कापालिकः पुं वर्णसंकरजाति विशेषः कपालि इति भाषा इतितंत्रसारः वामाचारिविशेषः यथाअघनीर्णिकराग्रणीःप्रतस्थे कापालिकजालकं विजेतुंइति शंकरविजयः ॥
कापाली स्त्री विडंगा इति राजनिर्घंटः ॥
कापिलः पुं सांख्यशास्त्रज्ञः इतिहेमचंद्रः पिंगलवर्णः तद्वति त्रि इत्यमर टीकायां ॥ भरतः ॥
कापिशं स्त्री मद्ये इति ॥ हेमचंद्रः ॥
कापिशायनं स्त्री मद्ये इति जटाधरः देवता इतिधरणी
कापिशेयः पुं पिशाचः इति त्रिकांडशेषः ॥
कापुरुषः पुं कुपुरुषः ॥ कुत्सितपुरुषः इतिव्याकरणं उद्योगिनंपुरुषसिंहमुपैतिल क्ष्मीर्दैवेनदेयमितिकापुरुषावदंति इतिहितोपदेशश्च ॥
कापेयः त्रि कपिसंबंधी इति

हलायुधः ॥
कापोतं स्त्री कपोतगणः ॥ पायरा कोंकइतिभाषा इत्यमरः सौवीरांजने इतिराजनिर्घंटः
कापोतः पुं सर्जिकाक्षारः इत्यमरः रुचकः इति मेदिनी कपोताभवर्णः तद्वति त्रि इतिहेमचंद्रः ॥
कापोतांजनं स्त्री सौवीरांजने स्रोतांजने इत्यमरः ॥
काप्यकरः पुं स्वयंकृतपापे चित्ते आघापयः कथयतिसः इति शब्दरत्नावली ॥ (य)
काप्यकारः पुं चित्तेपापंआध्या यतःशोसने सः इतित्रिकांडशेषः स्वपापवक्ता इतिशब्दरत्नावली
काफलः पुं कट्फलः इति शब्दरत्नावली ॥
काम व्य अभ्यनुज्ञा इतिविश्वः
कामं स्त्री रेतः निकामः ॥ काम्य इतिमेदिनी वाढं ॥ अनुमतिः इतिहेमचंद्रः ॥
कामः पुं काम्यः इच्छा इति हेमचंद्रः कामस्तुब्रह्मणोहृद याज्जातः यथाहृदिकामोभ्रुवोः क्रोधोलोभश्चाधरच्छदात् ॥ इतिश्रीभागवतेवलदेवःइति



शब्दरत्नावली महाराजसूनुः
इतिराजनिर्घण्टः कामदेवः॥
सतुश्रीकृष्णपुत्रः तत्पर्य्यायः
मदनः २ मन्मथः ३ मारः ४ प्रद्युम्नः
५ मीनकेतनः ६ कंदर्पः ७ दर्पकः
८ अनंगः ९ पंचशरः १० स्मरः ११
शंबरारिः १२ मनसिजः १३ कुसुमे
षुः १४ अनन्यजः १५ पुष्पधन्वा १६
रतिपतिः १७ मकरध्वजः १८
आत्मभूः १९ ब्रह्मसूः २० विश्वकेतुः
२१ इत्यमरः सतुपंचाशद्विधो
यथा काम १ कामद २ कांतश्च ३
कांतिमान् ४ कामगस्तथा ५
कामचारश्च ६ कामीच ७ कामुकः ८
कामवर्द्धनः ९ रामो १० रमश्च
११ रमणो १२ रतिनाथो १३॥
रतिप्रियः १४ रात्रिनाथो १५
रमाकांतो १६ रममाणो १७
निशाचरः १८ नंदको १९ नंदन
श्चैव २० नंदी २१ नंदयिता २२॥
पुनः पंचबाणो २३ रतिसखः २४
पुष्पधन्वा २५ महाधनुः २६ भ्रामणो
२७ भ्रमणश्चैव २८ भ्रममाणो २९
भ्रमोऽपरः ३० भ्रांतश्च ३१
भ्रामको ३२ भृंगो ३३ भ्रांतचारो॥
३४ भ्रमावहः ३५ मोहनो ३६
मोहको ३७ मोहः ३८ मोहवर्द्धन

एवच ३९ मदनो ४० मन्मथश्चैव
४१ मातंगो ४२ भृंगनायकः ४३
गायनो ४४ गीतिजश्चैव ४५
नर्तकः ४६ खेलकस्तथा ४७
उन्मत्तोन्मत्तकश्चैव ४८ विलासो
४९ लोभवर्द्धनः ५० दाडिनी॥
कुसुमाभाश्च वामांके शक्तिसंयुताः
सौम्यारक्तांबराः सर्वेपुष्पबाणास्तु
कार्मुके विभ्राणाः सर्वभूषाढ्याः
कामाः पंचाशदीरिताः इति
शारदातिलकटीकायां राघवभट्टः
तेषामेकपंचाशत् शक्तयो रति
प्रीत्याद्याः तस्य स्थानानि
यथापादे गुल्फतथा रोचभगे
नाभौकुचे हृदि कक्षे कंठेच
नष्टेच गंडे नेत्रे कर्णावपि॥
ललाटे शीर्षके शेषु कामस्थानेतिथि
क्रमात तद्वत् पुंसां स्त्रियावा मे
शुक्ले कृष्णे विपर्य्ययः पादांगुष्ठे
प्रतिपदि द्वितीयायां चगुल्फके
ऊरुदेशे तृतीयायां चतुर्थ्यां
भगदेशतः नाभिस्थाने चपंचम्यां
षष्ठ्यांतु कुचमंडले सप्तम्यां हृदये
चैव अष्टम्यां कक्षदेशतः नवम्यां
कंठदेशे च दशम्यां चोष्ठदेशतः
एकादश्यां गंडदेशे द्वादश्यां॥
नयने तथा श्रवणेच त्रयोदश्यां

चतुर्दश्यां ललाटके पौर्णमास्यां
शिखायां च ज्ञातव्यं इति क्रमात
यत्र स्थाने वसेत कामस्तत्रैव॥
नखचुंबने मंत्रेणानेन कर्त्तव्यं
ज्ञातव्यं रतिकोविदैः इति
स्मरदीपिका मंत्रस्तुप्रणवादि॥
सविंदु प्रत्येक षोडशस्वरयुक्त
नमोऽन्तप्रत्येक चंद्रषोडश ॥
कलारूपः॥ स्त्री
कामकला स्त्री रतिः कामदेवप
इति शब्दरत्नावली चंद्रस्याः
षोडशकलास्तास्वप्येव कामकलाः
कामकूटः पुं वेश्याप्रियः ॥
वेश्याविभ्रमः इतिमेदिनी ॥
कामकेलिः त्रि षिंगः इति
त्रिकांडशेषः सुरते पुं इति
हेमचंद्रः॥
कामखड्गदला स्त्री स्वर्णकेतकी
इतिराजनिर्घण्टः॥
कामगामी न त्रि कामगामी स्वेच्छ
गमनशीलः इत्यमरटीका॥
कामगुणः पुं रागः
विषयः
आभोगः इतिमेदिनी॥
कामेगामी त्रि स्वेच्छागमनशीलः
तत्पर्य्यायः अनुकामीनः २
इत्यमरः॥
कामचारी न त्रि कामुकः स्वच्छंदः

कलविंकः इतिमेदिनी ॥
कामचारी न पुं गरुडः इति॥
शब्दरत्नावली॥
कामजानः पुं कोकिलः इति
शब्दरत्नावली कामजानि इतिच
पाठः॥
कामतालः पुं कोकिलः इति
त्रिकांडशेषः॥
कामदः त्रि कामदाता॥
अभिलाषदः इतिमेदिनी॥
कामदा स्त्री कामधेनुः इति।
मेदिनी॥
कामदुघा स्त्री कामधेनुः इति
मुग्धबोधव्याकरणं॥
कामदूतिका स्त्री नागदंतीवृक्षः
इतिरत्नमाला॥
कामदूती स्त्री पाटलावृक्षः इति
शब्दरत्नावली॥
कामध्वंसी न पुं शिवः इति
हलायुधः
कामनः
त्रिकामुकः इत्यमरः॥ (अः
कामना स्त्री इच्छा इतिहलायु
कामंधमी न पुं कोशकारः इति
जटाधरः॥
कामपत्नी स्त्री रतिः इति॥
शब्दरत्नावली॥



कामपालः पुं बलदेवः इत्यमरः
कामप्रदः पुं रतिबंधविशेषः यथा
हैयादौ स्कंधसंलग्नौ तिस्याल्लिंग
भगे तथा कामयेत् कामुकः॥
प्रीत्यावेधः कामप्रदाह्वयः
इतिस्मरदीपिका ॥
कामफलः महाराजाम्रवृक्षः
इतिराजनिर्घंटः ॥
कामम् व्य अकामानुमतिः
इत्यमरः अनुमतिः प्रकामे ॥
असूया अनुरामने इति ॥
मेदिनीकर हेमचंद्रौ ॥
काममहः पुं चैत्रीपूर्णिमा इति
त्रिकांडशेषः ॥
कामयिता त्रि कामुकः इत्यमरः
कामरूपः पुं स्वनामख्यातदेशः
तत्पर्य्यायः प्राग्ज्योतिषः १
इतित्रिकांडशेषः ॥
कामरूपः त्रि मनोज्ञरूपः॥
स्वेच्छारूपः यथा जातवेशो
भूवन विदिते पुष्करावर्त्तकानां
जानामित्वां प्रकृतिपुरुषं कामरूपं
मघोनः इतिमेघदूतः ॥
कामरूपिणी स्त्री
अश्वगंधा वृक्षः ॥
इतिराजनिर्घंटः ॥
कामरूपी न पुं विद्याधरः इति
त्रिकांडशेषः जाहकजंतुः इति

राजनिर्घंटः मनोज्ञरूपिणि ॥
स्वेच्छारूपिणि त्रि यथा सर्वमास्तु
विचेतव्यं हरिभिः कामरूपिभिः
इतिरामायणे ॥
कामरेखा स्त्री वेश्या इति
शब्दमाला ॥
कामलः पुं स्त्री रोगविशेषः
कामल कामला इतिचप्रसिद्धः
इतिमेदिनी तस्यनिदानं सेशाभी
यथा पांडुरोगी च योऽत्यर्थं ॥
पित्तलानि निषेवते तस्यपित्त
मसृङ्मांसे दुग्ध्वा रोगाय कल्पते
तस्यलक्षणं हारिद्र नेत्रः सभृश
हारिद्र त्वङ्नखाननः रक्तपीत
शकृन्मूत्रो भेकवर्णो हतेंद्रियः
दाहाविपाक दौर्वल्य सदनारुचि
कर्षितः कामला बहु पित्तेवा
कोष्ठशाखाश्रया मता कालांतरात्
खरीभूता कृच्छ्रा स्यात् कुंभकामला
तस्यारिष्टलक्षणं कृष्ण पीत
शकृन्मूत्रो भृशं शूनश्च मानवः
सरक्ताक्षि मुखच्छर्दि विण्मूत्रो
यश्च ताम्यति दाहारुचितृडानाह
तंद्रामोह
समन्वितः नश्यति ॥ मल्ली
श्वासकासार्त्तो विभेदी कुंभका
इतिमाधवकरः ॥ (मिः
कामलः पुं वसंतकालः मरुभू

कामुकेत्रि इतिमेदिनी ॥
कामलता स्त्री शिश्नः इति
हेमचंद्रः ॥
कामवती स्त्री दारुहरिद्रा इति
राजनिर्घंटः
कामवल्लभः पुं आम्रः इति
राजनिर्घंटः ॥
कामवल्लभा स्त्री ज्योत्स्ना इति
राजनिर्घंटः
कामवृद्धिः पुं क्षुपविशेषः ॥
कामज इति कर्णाटके प्रसिद्धः
तत्पर्य्यायः स्मारवृद्धिसंज्ञः २
मनोजवृद्धिः ३ मदनायुधः ४
कंदर्पजीवः ५ जितेंद्रियाह्वः ६
कामैकजीवः ७ जीवसंज्ञः ८ अस्य
वीजगुणाः मधुरत्वे बलवर्द्धनत्वे
कामवृद्धि रुचिकारित्वे ॥
बहुलेंद्रिय वृद्धिदत्वेच इति।
राजनिर्घंटः ॥
कामवृंता स्त्री पाटलावृक्षः इति
शब्दमाला ॥
कामवृक्षः पुं वंदाकः इति
राजनिर्घंटः ॥
कामशरः पुं आम्रः इति ॥
राजनिर्घंटः ॥
कामसुतः पुं अनिरुद्धः इति
हेमचंद्रः ॥

कामसखः पुं वसंतकालः इति
राजनिर्घंटः ॥
कामांकुशः पुं नखः । इति
त्रिकांडशेषः शिश्नः इति
जटाधरः ॥
कामांगः पुं आम्रवृक्षः इति
जटाधरः ॥
कामातुरः त्रि कामार्त्तः यथा
अर्थी लाघवमुच्छ्रितो निपतने
कामातुरो लोकने इतिनवरत्न
मध्येधन्वंतरिः ॥
कामांधः पुं कोकिलः इति
राजनिर्घंटः ॥
कामांधा स्त्री कस्तूरी इति
राजनिर्घंटः ॥
कामायुः स पुं गरुडः इति
त्रिकांडशेषः ॥
कामायुधः पुं महाराजचूतः इति
राजनिर्घंटः कामदेवास्त्रे क्ली
कामारण्यं क्ली मनोज्ञवने ॥
इतिशब्दमाला ॥
कामारिः पुं विटमाक्षिकधातुः
इतिहेमचंद्रः महादेवः ॥
कंदर्पनाशकत्वात् ॥
कामार्त्तः त्रि कामपीडितः ॥
कामातुरः यथा कामार्त्ताहि ॥
प्रकृतिकृपणाश्चेतनाचेतनेषु



इतिमेचहूतः ॥
कामालुः पुं रक्तकांचनहृक्षः
इतिशब्दचंद्रिका ॥ (माघ
कामावसायिता स्त्री शिवस्याणि
ऽष्टधैश्वर्य्यांतर्गतैश्वर्य्यविशेषः
इत्यमरः शब्दरत्नावलीचसात
सत्यसंकल्पता कामान् स्वेच्छया
अवसाययितुंशीलमस्यकामाव
सायीतस्यभावः इति सारसुंदरी
कामावसायित्वे क्ली कामावसायि
ता इति हेमचंद्रः ॥
कामिः पुं कामुकेः रत्यां स्त्री ॥
इतिमेदिनी ॥
कामिकः पुं कारंडवपक्षीइति
शब्दरत्नावली ॥ (नारी
कामिनी स्त्री अतिशयकामयुक्ता
[illegible] इत्यमरः भीरुस्त्री वंदा ॥
इतिमेदिनी दारुहरिद्रा ॥
मदिरा स्त्री सामान्ये इति
राजनिर्घंटः ॥
कामिनीशः पुं शोभांजनहृक्षः
इति शब्दचंद्रिका ॥
कामीनं पुं चक्रवाकः
पारावतः कामुकः
इतिमेदिनीचटकः ॥
इतिशब्दरत्नावलीचंद्रः इति
त्रिकांडशेषः ऋषभौषधिः

सारसपक्षी इतिराजनिर्घंटः
कामीलः पुं रामगुवाकः इति
त्रिकांडशेषः ॥
कामुकः त्रि कामी तत्पर्य्यायः
कमिता २ अनुकः कम्रः ४
कामयिता ५ अभीकः ६ कमनः ७
कामनः ८ अभिकः ९ इत्यमरः
कामुकः पुं अशोकहृक्षः ॥
अतिमुक्तकलता इतिमेदिनी
चटकः इति राजनिर्घंटः ॥
कामुककांता स्त्री अतिमुक्त
कलता इतिराजनिर्घंटः ॥
कामुका स्त्री धनादीच्छाविशि
ष्टा तत्पर्य्यायः इच्छावती २
इत्यमरः ॥
कामुकी स्त्री मैथुनेच्छावतीतत्
पर्य्यायः वृषस्यंती २ इत्यमरः
कामोदकं क्ली मृतोद्देशे
स्वेच्छयादत्तोदके इतिमिताक्षरा
कामोदा स्त्री रागिणीविशेषः
इतिहलायुधः ॥
[illegible] पुं कांपिल्यदेशः
इतिशब्दरत्नावली ॥
कांपिल्यः पुं गुंडारोचनीनाम
सुगंधिद्रव्यं इत्यमरटीकायां
भरतः उत्तरदेशविशेषः ॥
इतिशब्दरत्नावली ॥

कांपिलः पुं गुंडारोचनी ॥
कमलागुंडी इतिभाषा इत्यमरः
तस्यरूपांतराणि कंपिल्लः ॥
कंपीलः कंपिलः कांपिल्यः
इतिभरतः ॥
कांपिल्लका स्त्री कांपिल्लः इति
हारावली ॥
कांपीलः पुं कांपिल्लः इति ॥
शब्दरत्नावली ॥
कांपीलकः पुं कंपिलः इति
रत्नमाला ॥
कांबलः पुं केवलाहत्नरथः ॥
इत्यमरः ॥
कांबविकः पुं शंखकारः ॥
शांखारी इति भाषा इत्यमरः ॥
कांबुका स्त्री अश्वगंधा इति
रत्नमाला ॥
कांबोजः पुं कंबोजदेशज ॥
घोटकः इत्यमरः सोमवल्कः ॥
पुन्नागहृक्षः इतिमेदिनी ॥
म्लेच्छजातिविशेषः सतुयवनतुल्यं
सगरराजेनास्यसर्वशिरोमुंडनं
कृतंयथा अर्द्धंशकानां ॥
शिरसो मुंडयित्वा व्यसर्जयेत्
यवनानां शिरः सर्वंकांबोजानां
तथैवच इतिहरिवंशः ॥
कांबोजी स्त्री माषपर्णीमाषाणी

इतिभाषा इत्यमरः वलक्ष ॥
खदिरः पापडिखयर इतिभाषा
इतिमेदिनी गुंजा कुंचइति
भाषा पाकुची हाकुच इति
भाषा इतिराजनिर्घंटः ॥
काम्य त्रि कमनीये सुंदरे ॥
इतिहेमचंद्रः कामनायुक्तव्यक्ति
कर्त्तव्यकर्म्म यथायत् किंचित्
फलमहि प्रेप्य यज्ञदानजपादिकं
क्रियतेकाम्यकं यत्तत्काम्यं ॥
परिकीर्त्तितं इतिमुग्धबोधटीका
रुद्रामतर्कवागीश धृतास्मृतिः
काम्यदानं क्ली कमनीयस्यवस्तुनो
वस्त्री रत्नादिनो दाने कामनया
वा दाने इति भरतः तत् ॥
पर्य्यायः प्रवारणं २ इत्यमरः ॥
कायं क्ली मनुष्यतीर्थं इति
मेदिनी प्राजापत्यतीर्थं ॥
तत्तु स्वल्पांगुल्योर्मूले कनिष्ठा
ऽनामिकयोरधोभाग इति
यावत् इत्यमरः भरतौ ॥
कायः पुं कंदेवते सनुष्यास्य
तीर्थमूर्त्तिः संघः लक्ष्यः ॥
स्वभावः इतिमेदिनी प्राजापत्य
विवाहः इति स्मृतिः अस्यलक्षणं
उद्वाहश्चाहेद्वह्यो मूलधनेयथा
कायाविरोधिनीशश्वत्पणहींद्या



तकायिका इतिनारदः
कायवलने स्त्री कवचं इति
हारावली ॥
कायमाने स्त्री तृणकुटी इति
त्रिकाण्डशेषः ॥
कायस्थः पुं परमात्मानरजाति
विशेषः इति मेदिनी ॥ तत्
पर्य्यायः कूटकृत् १ पंजीकारः २
इति त्रिकाण्डशेषः करणः ४
पंचिकारकः ५ इतिजटाधरः
गौडदेशे तेषामागमनकारणं
तत्रादौमंगलाचरणं यथा ॥
यस्याभूद्भूमि देवोवदनसरसिजे
यद्भुजे भूमिपालो यस्योर्वी ॥
वैश्य एव द्विज भजन रतिर्यस्य ॥
शूद्रः पदाब्जात्सृष्ट्यातिस्तीदं
जगदितिप्रकृतिर्यः स्वयंपूरुषस्ते
वेदेऽहं देवदेवं त्रिगुणं मय।
वरं सर्वलोकानुकंपे ॥
अथ आदिशूरराज प्रशंसा।
श्रीमद्राजादिशूरोभवदवनिपति
र्धर्मराजोवशस्तास्सल्लोकः सद्विवौ
रदिति सत्पतिः स्वर्यथासीत् ॥
तयासीत् भ्रातायादिति तस्मा।
खिल तिमिर रिपु स्तत्ववेत्ता।
महात्माजित्वाबुद्धांश्चकारस्वयमपि
नृपति गौडराज्यान्निरस्तान् ॥

अथादिशूरस्य पात्रे प्रति ॥
कृतस्त्रब्राह्मणकुलीशूद्रयाः श्र
स्तस्योक्तुंच पात्रेपप्रच्छ भूते ॥
परमसुरपदद्वंद्वपद्मार्च्चकोसौ
कासंते काश्यपीशाः कृतकृति
कुशलाः क्वापि शूद्राः कुलीनाः
पात्रेतेषामवोचत्पुरोवयमखिले
भूपवाक्यात् द्विजास्तेकोलांचस्याः
कुरंगा इव किल तपसा नैव
केषां मथीनाः कोलांचस्य
महीपतिः क्षितिभुजामेकप्रधानः
प्रथी स्वेष्टे निष्टमति र्महाशयवरः
श्रीवीरसिंहः स्वभूत् तद्देशवासिनः
समाधिकृतिनः यायालिसंहारिणः
सेतिव्याससमाः सभासद इतो
गौडेंद्र भूमीश्वर ॥
अथवीरसिंहे प्रतिलिपिप्रेरणे
भूपोभूद्भवने स्वचेष्टित परः
सहृत्य भार्यान्वियान् भूदेवान्
हर्षवान् विचित्रलिखनैरानेमकामः
स्वयं पात्रेणप्रणयप्रमोदरचितो।
श्रीवीरसिंहेलिपिंगौडक्ष्मापति ॥
रेवपुणपसुमतिर्हूतेन शास्यायथत
अथलिपिप्रकारः सुकृत ॥
सुकृत संहाः सर्वशास्त्रार्थदत्ता
स्तपितहृत विपक्षाः स्वस्तिवाक्याः
कृतिस्ताः सुजितसुगतहृदे गौड

राज्येमदीयेद्विजकुलवर जाताः
स्तानुकंपाः प्रयातु नृपति सुकृति
साः स्वीयवेशावताः प्रबलबल
विचारोवीरसिंहोतिवीरः मयिवर
सयितास्ते भूमिदेवान् सम्भूद्रान्
पुनरपिममगौडेप्रापयत्वेतितेते
अथब्राह्मणशूद्राणां गौड ॥
देशगमनेच्छा मुदा गंतु कामाः
पुरावानगौडाः समाहूयकोलांच
देशे क्षितीशे नृपाज्ञांच लब्ध्वा
सदारादिभृत्या महायोगिनस्ते।
बभूवुः सम्भूद्राः अथादि
शूरसमीप ब्राह्मण प्रेरणे ॥
महाराज राजादिशूरो महात्मा
तयावीरसिंहस्य मेस्त्वादिसर्वे ॥
तवाज्ञानुसाराद्धि प्रस्थापयामि
द्विजान् पंचगोत्रान् सदारादि
भृत्यान् अथ ब्राह्मणानां ॥
गमने चलद्वैचलाश्चालि यानाः
प्रधाना हहत प्रमक्ष गुफातिशोभा
ऽनल्पाभाः कृतस्नाः कृतिस्नाः
प्रतिस्नान साध्याः सवर्म्मास्वशाला
प्रयाताः प्रयागे ततः स्नान ॥
दानादिकृत्वाच विप्राः प्रपुस्तेपि
वाराणसी पंचगोत्राः ततो
विश्वनाथंसमालोक्य दानैर्यथाः
प्राप्यतस्माद्दया भूमिमापुः ॥

अथब्राह्मणानां गौडराज्यप्रवेशो
राजसमीपे आशिर्वर्थं गमनेच
पितृनवोथवोस्तारयित्वागयाया
गताः शासिते गौडराज्येशराज्ये
ततस्तेजसा तेदिशा भाषयेतः
श्रुतिंव्याहृति भारतीपाठयेतः
ततोहस्तहर्वीस्तताः पंचगोत्रा
नृपंवाशिषे कर्त्तु मेव प्रतस्थुः
अमीपेचमध्याह्न मार्तंडतुल्या
द्विजाः स्थापिताभ्याः परश्रियसेच
अथैषां वेशे दृष्ट्वाराज्ञो ॥
ऽवज्ञा तेषां शुष्कहस्ते आशिषो
निक्षिपश्च दृष्ट्वैव वेशा ॥
मेषामवनियति रसौ भ्रांतचित्तो
द्विजानां ते गलपे न कृत्वा ॥
स्वगृहामपियेयो गंतुकामाः पुनस्ते
वृद्धाभूपाल वृद्धिं क्षणमपिवद्धथाः
शुष्कहस्ताशिषस्ते तदस्त शष्प
हूर्वीक्षत मपि सवभो शुष्कहृतः
सहेक्षः अथराजकर्तृक ॥
ब्राह्मणानां प्रशंसने गोत्रनाम
प्रश्नश्च सविस्मया वै गलवद्ध
वस्त्राभूपादय स्ते चरणारविंद
पवित्र कीर्त्ति भुविभूसुराणां कृताच
पेतः सकल्पाः प्रणत्याः त्वमथनस्माक
मुचितवादं भूतात्मनोवापरायं
द्दिविप्राः वोब्रुत यूयं किमुनाम

गोत्रंततस्थ सर्वे गदितं प्रख्याः
अथपंचब्राह्मणानोपरि वयः
अभूत्तेय वंशोद्भवो भट्ट॥
नारायणोऽयंच शांडिल्य गोत्रे।
गरीयानतपस्वानयशस्वानदयावान्
सविद्वान्विवस्वानिवास्यांसभायां
विभाति क्षमितत्वतदंश विचार
करोवनिपालककाश्यपगोत्रवरः
कृतदत्तसमः किलदत्तमहाशय
नामइति भुविभातियतिः समस्त
शास्त्रपंडित लब्धागतप्रखंडितः
प्रचंडसर्ववैरि दर्पखर्वकारकः
सावर्णि गोत्र संभवोत्र भाति ॥
वेदगर्भकः क्रोदंडः प्रभाति भूप।
वात्स्यगोत्र संभवः यशाः
सथाकरोनृपतसपत्निसंगयोयिता
ननोवुजे महातप स्तपोवशी ॥
कृतेंद्रियः अयं श्रीलहर्षो ॥
ऽनिशोदानहर्षोमहर्षियथास्यां
तपोभिः प्रभाति क्षितींद्र ॥
क्षितौयो भरद्वाज गोत्रे स्थवरो॥
विप्रवर्य्यः प्रतापारि शौर्य्यः॥
अथशूद्रपरिचय प्रश्नः॥
केशूर्ये नामकिंवा कथयतक्षतिमः
स्वायताः क्वापि देशातकोलांचात
पंचशूद्रा वयमपि नृपतेकिंकरा
भूसुराणां धन्याशूये ह्यायिवा॥

परिचय मखिलं व्रतभोविश्रमकाः
कृत्वातु विप्रवर्य्याः सकलपरिचयं
भूपतेरेतिवेषां अथ पंच
शूद्राना परिचयः सकृताल्लि
कृतावरपष कृती चिति देव॥
पदांबुज वाहरतिः मकरंद इति
प्रथिभातियतिर्हि वंकलोद्भव॥
भट्टगतिः सवचोष कुलांबुजभानु
रयंप्रथिमेंडुयशाः सुरलोकवशाः
सतते ससुखी समतिस्थ सधीः
प्रादिंडु यथोम्बुयि कुंद यशाः
वसुधाधिप वकवर्तिनावसुतुल्या
वसुवंश संभवाः वसुधा विदिता
गुणशालीवैनियतं तेजविनोभवेतुनः
दशरथोविदितो जगती तले
दशरथप्रथितः प्रथमः कुलेदश
दिशांजयिनोयशसाजयीविजयते
विभवैः कुलसागरे यशस्विनो
यशोधरः सदाहिसर्वसादरःप्रमतः
सत्व मनहः प्रारतसुधांशुवयशः
प्रताप तापनोतपद्विशालि ॥
योपिदालिको विभातिमित्रवंशे
सिंधुकालिदास वेद्दकः द्विजाति
पालनार्थिकोऽप्यसौच हर्षसेवकः
कुलांबुज प्रकाशको यथांधकार
दीपकः अयं गुह कुलाद्भवो
दशरथाभिधानो महान् कुलांबुज

मधुव्रतो विविध गुण पुंजकालितो
निशम्यगुह भाविते सकल॥
सख्य हास्य बभूव स वेग॥
गमनोयतो विविध मान भेगो।
यतः अहेव पुरुषोत्तमः कुल
भूदग्रगण्यः कृतीसदनकुलसंभ
वोनिखिल शास्त्र विधानमः॥
विलोकितु मिहागतो द्विजवैश्य
राज्यप्रभो चकार नृपतिः सत
विनय हीनतो निष्कुले ॥
कीर्तिमेतस्थिर वसतिकृतामौलिका
येहि सिद्धा स्तिदत्ताः सेनदासाः॥
करगुह सहिताः पालिताः सिंह
देवाः येवापायाभिमुख्याः स्थिति
विनयजुषः सम्प्रतिस्तेहिपूर्वोह्यऽथा
वीत्यराज्ञा चरण गुणयुतामौलिक
त्वेन साध्याः अथाहिसम्प्रतिः ॥
साध्यमौलिकाः होडः स्वर ॥
धर धरणी वाण आइच सोमः॥
पइसुर सामः भंजो विंदोगुह ॥
वललोयः शर्म्मा ॥
वर्म्मा ह्वदइ भुइ ॥
चेद्दः रुद्रो रक्षित राजादित्यो
विस्तुर्नागाः खिलपिल गूतः इंद्रो
गुप्तः पालोभद्र तमश्चो कुर॥
वेधुरनाथः शंगइ हैशाश्च मनो
गंडो राहा राणा राउत सामा॥

दाहादाना गण उपमाना स्वामः॥
सोमोचरवैगुषो वीदस्तिजआर्णव
आशः शक्ति भूतो ब्रह्मः प्राणः
तेमो हेमो वर्द्धन रंगः गुहः
कीर्तियशाः कुंडो नंदी शीलाधनु
गुणः इति दक्षिण राढीय+॥
घटककारिका ॥
अथवंगज कुलाचार्य्यकारिका॥
लिख्यते अथ शूद्रान् पतिः तथा
आदौ प्रजापतेर्जाता मुखाद्विप्राः
सदारकाः बाहोश्च क्षत्रियाजाता
ऊर्वोर्वैश्या विजज्ञिरे पादाच्छूद्रश्च
संभूतस्त्रिवर्णस्यच सेवकः हीम
नामा सुतस्तस्य प्रदीपस्तस्य पुत्रकः
कायस्थ स्तस्य पुत्रो भूत बभूव
लिपिकारकः कायस्थस्यत्रयः पुत्राः
विख्याता जगतीतले चित्रगुप्त
गुप्तश्चित्रसेनो विचित्रश्च तथैवच
चित्रगुप्तो गतः स्वर्गे विचित्रोनाग
सन्निधौ चित्रसेनः पृथिव्यां वै
इतिशूद्रः ॥
प्रवक्ष्यते अथ ॥
चित्रसेनादि सुताः वसुघोषोगुहो
मित्रोदत्तः करणएवचसप्तंजयश्च
संभैते चित्रसेनसुताभुवि करण
स्यसुताजातानागोनाथश्चदासकः
सप्तंजय तनूजाता देवः सेनश्च॥

\+ घटककारिका ७



पालितः सिंहश्चैव तथा ख्यातः ॥
श्चैते पद्धतिकारकाः एते पद्धति
काराश्च मुनिभिः कथिताः पुरा
अथ द्वादश शूद्र वंशजाः वसु
घोषो गुहो मित्रो दत्तो नागश्च ॥
नाथकः दासो देवस्तथा सेनः
पालितः सिंह एवच एते द्वादश
नामानः प्रसिद्धाः शूद्रवंशजाः ॥
अथ सप्ताशीतिः पद्धतिकाराः ॥
शुभ्रेञ्जय वंशभूतो नित्यानंदो ।
नृपेश्वरः तस्यापि वंशसंजाताः
सप्ताशीतिः प्रकीर्तिताः तेपि
पद्धतिकाराश्च मुनिभिः कथिताः
पुरा तेषां नामानि करो ।
भद्रोथरो नंदी पालश्चांकुर ॥
दामकः स्वाशियशा होडोच ॥
वानश्चाइवसोमको पेश्वरः ॥
श्रोनकश्चैव भंजो विड गेह
स्तथावलश्च लोदकश्चैव शर्मा
वर्माचभूमिकः कुइश्च रुद्रकश्चैव
वेद्रोरक्षित राजको आदित्य ॥
विष्णुगुप्ताश्च रिखिलश्चपीलकस्तथा ·
चमिर्हेशाश्च वेधुश्च शाजिश्चसमतु
स्तथा गेडको राहकश्चैव राणा ॥
राहुत दाहकाः दानागणाश्चमानाश्च
खामाऽपहेश्चमचारकाः वेतोष ॥
वेदकाश्चैव दश्चाणि वश्चावशक्तिकः

भूतो वल्लः सेनः डोमो वर्द्धनो ॥
हेमंगको मुनिः कीर्तिर्यशः ॥
कुडः शीलश्चैव धनुर्गुणः दोडिमोना
रितिश्चैवचाकिश्च नंदनस्तथा
शणामश्चाछश्च शुजिश्चेतजकानाद
एवचारिइङ्गीमश्चहाथिश्चठोलश्च
हूतकस्तथा एते पद्धतिकाराश्च
सप्तशीतिः प्रकीर्तिताः एताः
सप्ताशीति पद्धतयः द्वादश शूद्र
पद्धतयश्च मिलित्वा नवाधिकन
वति पद्धतयो भवंति ॥ एतषा
पुरोहित गोत्रप्रवरेण गोत्र ॥
प्रवरत्वे मुनिभिरुक्तं ॥ (णं
अथ कान्यकुब्जात् पंचागो विप्रा
शूद्राणं वागमनमाह देवीवरः अवष्ठ
कुलसंभूत आदिशूरोन्नृपेश्वरः राढः
गौडवरेन्द्राश्च वंगदेशस्तथैवच
एतेषान्नृपतिश्चैव सर्वभूमीश्वरः
यथाश्रमात्यैर्वीथवैश्चैव मंत्रिभि
द्विजहेदकैः एतैः सह महीपाल
एकदासनिजालये उपविष्टो द्विजान
प्रष्टं धर्मशास्त्र परायणाः केनयज्ञेन
भगवत्प्रीतिर्भवतिनिश्चितं तत
सर्वश्रोतु मिच्छामि कथयध्वं ॥
द्विजोत्तमाः इतिश्रुत्वाद्विजाः सर्वे
खर्वीकृत कलेवराः कथयेति
नृपोयेन सर्वे विकृत मानसाः ॥

केन केन विधानेन यज्ञो वा ॥
क्रियते बुधैः वयं सर्वे न जानीमो
विधानं कीदृशं कृतौः इति तेषां
वचः श्रुत्वा चिंतायुक्तो महीपतिः
किं करोमि क गच्छामि विलल्लापपु
नः पुनः कान्यकुब्जात् समानीता
नृहेतन द्विजपंचकान् वेदशास्त्रपार
गतान् सर्वांश्चैव विशारदान् गो
यानारोहितान् विप्रान् खड्ग ॥
वर्मादिभिर्युतान् एतान् विप्रान्
समालोक्य विषादो जायते हृदि ।
अश्रद्धा जायते राज्ञ इति ज्ञात्वा ॥
द्विजोत्तमाः आशीर्वादार्थं ॥
निर्माल्य मल्लकाष्ठापरिस्थिते ॥
तदा काष्ठं सजीवं स्यात् फल ॥
पल्लवसंयुते इति दृष्ट्वा नृपस्त्वाशि
केपान्वित कलेवरः स्तोत्रेच ।
बहुधा तेषा मकरोत् स नृपोत्तमः
आसने पाद्य मानीय ददौ विनय
पूर्वकं उपविष्टा द्विजाः पंच तथा च
शूद्र पंचकाः राजेस्ते कुशलं सर्वं
प्रोचु श्चैन्यवदत् सतान् अद्यमे ।
सफलं जन्म जीवितंच सुजीविते
पूतंच भवनं जातं युष्माकं गमने
यतः एवंच क्रियते स्तोत्रं एष्टान्य
तस्शूद्रपंचको युष्माकं गोत्रमारख्या
व किमर्थे वा द्विजैः सह तत्सर्वं ॥

श्रोतु मिच्छामि व्रत भोः शूद्रपुंगवाः
इति राज्ञो वचः श्रुत्वा कथयत्राम
गोत्रके काश्यपेचैव गोत्रेच
दत्तनामा महामतिः तस्यदासो
गौतमस्य गोत्रे दशरथो वसुः
शांडिल्य गोत्रे संभूतो भट्ट
नारायणः कृतीसोकालिनश्चदासो
ऽयं घोषः श्रीमकरंदकः भरद्वाजेषु
विख्यातः श्रीहर्षो मुनिसत्तमः
दासेतस्य विराट्छाख्यो गुहकः
काश्यपः स्मृतः सावर्णगोत्रनिर्दिष्टो
वेदगर्भमुनिस्त्वयं तस्यदासो ॥
मित्रवंशो विश्वामित्रश्च गोत्रकः
कालिदास इति ख्यातः शूद्रवंश
समुद्भवः वात्स्यगोत्रेषु संभूत ॥
श्छांदडश्चेति संज्ञितः सोड्ढल्य ॥
गोत्रजो दत्तः पुरुषोत्तम संज्ञकः
एतेषां रक्षणार्थाय आगतोस्मि
तवालये इति श्रुत्वा नृपस्त्वप्रमनसा
हर्षमागतः विधानेनैव निर्वर्त्य
कृतेच यज्ञसेजिते ग्रामे सवर्ण
गोचैव वस्त्राणि विविधानिच ॥
दक्षिणार्थे द्विजातिभ्यः प्रददौच
नृपोत्तमः अत्र देशे कृता ॥
वासाः सर्वेच द्विज शूद्रकाः
बहु वंश प्रजा जाता नाना ॥
देश निवासिनः अथ वल्लाल ॥

कृतश्रेणि विभागः अथवल्लाल।
भूपश्चभ्रष्टकुलनन्दनः कृतेऽपि
प्रयत्नेन कुलशास्त्र निरूपणे।
आदिशूरानीत विप्रान् शूद्रांश्चैव
तथापरान् एतेषां संतती सर्वी।
आनयत् संनिजालयेयत्रयत्रास्य
ताविप्रास्तत्रग्रामे निरापिताः श्रेणि
द्वयंतु निर्णीतं राढीवारेन्द्रसंज्ञितं
तथैवद्विविधंप्रोक्तंकुलेच स।
द्विजोत्तमे शूद्रस्याथ वतस्तश्च।
नृपेण श्रेणयः कृताः उदग्वृत्तिणे
राढीव वंगवारेन्द्रकौ तथा॥
इतिचतस्रः संज्ञाः स्युस्तद्देश
निवाससनात् कुले चतुर्विधे॥
तेषां श्रेणिश्रेणि विशेषतः॥
अथवंगज कयस्थ श्रेणि निर्णयः
तत्रवंगेषुयैः शूद्रै निवासः क्रियते
ऽधुनातेषांनिर्णयमावेत्तकुलेचे
वविशेषतः वसुवंशश्चमुख्याहैना
आलक्ष्मणपूर्वगोष्ठेषुवसमार्व्य
तस्वतुर्भुजमहाकृती गुहदशरथ
श्चैव मित्रेतारापति स्तथा दत्ते॥
नारायणश्चैव एतेच वंगजाः स्मृताः
अपरेतुनागेदशरथश्चैवमहानंद
स्तुनायकः चेद्रशेखरदासस्तसेने
गंगाधरस्तथादामोदरकरः ख्यातो
दामस्तूषापतिस्तथापालितजन

संज्ञः स्यात् चंद्रोनारायणाख्यकः
पालिश्चावः समाख्यातो राहावंशोद्ध
कृसकः भद्रे दिगंवरश्चैवधोरत
व्याससंज्ञकः प्रभाकरस्तुनंदी॥
स्यात् केशवो देववंशजः अवी
पतिरितिख्यातः कुंडवंशे॥ ।
प्रकीर्तितः सोमेवंशाधरश्चैव॥
सिंहेरत्नाकरस्तथा नारायणः
समाख्यातारक्षितेच तथापरे
वेदगर्भोकुरश्चैवदेत्यादिविस्तु
संज्ञकः आद्यत्रिलोचनः ख्यातो
नंदनेच उषापतिः एतेवंगज
निर्दिष्टा वल्लालेन महात्मना
अन्येपि शूद्रा विख्यातास्तत्रदेश
निवासिनः तेवंगजाः समाख्याताः
करणेषु प्रतिष्ठिताः अथ॥
वंगजकुलीनादि निरूपणेकुलीन
इतिसंज्ञास्यात् मध्यन्यश्चतथापरः
महापात्रोऽवलश्चैव इतिसंज्ञा
चतुष्टये तथया वसुघोषागुहो
मित्रोदत्तोनागश्चनायकः दासः
सेनः करोदामः पालितश्चंद्र॥
पालको राहाभद्रोधरोनंदी॥
देवः कुंडश्च सोमकः रक्षिताकुर
सिंहाश्चविस्तुराध्यश्चनंदनः चतो
ऽप्यास्त्रयोमध्यामहापात्राः परे॥
तथासप्तविंशतिः शूद्राणांवल्लालेन

प्रशंसिताः इतिकुलीनम ध्यम
महापात्राः अवलानवत्यामिहोद
अस्मारकश्चैव धरणी वान एवच
आउचः पैस्तरश्चैवशानश्चभेज्ज॥
विंडकोगहश्च वल्लोथोच॥
शर्मकर्माच भूमिकः हुइश्च॥
रुद्रकश्चैव रानादित्योच पीलकः
खिलश्चगुप्तवाजीवचेभुश्चशाजि
संज्ञकः हेशश्च समन्तु गेंडो॥
राणा राहुत दाहकाः दाना॥
गणयमानाख्याः खामः हेमश्च
तोषकः वेश्चापि वरवेदोच॥
भूनाणवकवल्लकाः पैंद्रशाकि।
संगोच हेमाशोप वर्द्धनस्तथा॥
हेमश्चवेधकश्चैव भूसिः कीर्तिश्च
शीलकः एनु गुणो यशश्चैव॥
मनोरीतिश्च राडिकः चाकिश्च
श्यामपुत्रोच गेडको नारकल्ल
या रोरश्चहोमकश्चैव चाशकश्च
तथैवच ठोलश्च हूलक श्चेति॥
द्विसप्तत्यवलाः स्मृताः एतेषां
प्रतिपुरुष क्रमेण कुलाभ्रंशनात्॥
महापात्रभावो जायते॥
इतिवंगजघटकरामानंदशर्म्म
कृतकुलदीपिका॥
कायस्था स्त्री हरीतकी इति॥
मेदिनी धात्रीहस्तः इति

जटाधरः काकोली इत्यमर॥
टीकायां भरतः॥ एलाद्वये॥
तुलसी इतिराजनिर्घंटः॥
कायस्थस्त्रीजातिः कायस्थपत्नी
कायस्थी॥ क्षात्रः
कायिकः त्रि शारीरिकः कायनि
यथा अदत्तानामुपादाने॥
हिंसाचैवाविधानतः परदारोप॥
सेवाचकायिकं त्रिविधं स्मृतं॥
इतितिथ्यादितत्वे॥
कायिकावृद्धिः स्त्री गवादि
वलीवर्द्दादि कर्मयुतावृद्धिःयथा
दोह्य वाह्य कर्म्म युताकायिका
समुदाहृता इतिव्यासः मूलधना
ऽविरोधिनीप्रत्यहंदयपणार्द्धादि
रूपावृद्धिः यथाकायाविरोधिनी
शश्वत् पणार्द्धायातुकायिका इति
नारदः हलापुथस्तु पणार्द्धपा
इत्यत्र पणपादस्तिपाठिन्नापणस्य
मूलधनस्य यावदवस्थानं तावत्
शश्वत् वर्षसहस्रमपि उत्तमर्णेनया
वाह्यते प्राप्यते सा कायिकेति॥
व्याख्यातवान् तज्जाया भोग॥
लाभोतरगोता अपराच तद्विधा
इतिमिश्राः इतिविवादार्णवसेतुः
कारः पुं वधः निश्चयः बलिः॥
यत्नः यतिः एतिः इति।

शब्दरत्नावली तथा रेपोलः इति
मेदिनीकर हेमचंद्रौ कर्म्मणि॥
पदे कर्तृवाचकः यथा कर्मकारः
स्वर्णकार इत्यादि इति व्याकरणं।
क्रिया यथा करणे कारः क्रिया॥
इति रामतर्कवागीशः॥ तः
कारके क्ली क्रियानिमित्ते लोक
सिद्धे इति दुर्गसिंहः फणिभाष्य
मते पु यथा भवितुः सम्प्रयोजकः
कारकः तत्षड्विधं कर्म यथा
रामेन मति करणे २ यथा नेत्रैः।
शिवो दृष्टः कर्त्ता ३ यथा जनैः
शिवो दृष्टः संप्रदाने ४ यथा हरिः
सज्जाः सखे ददात अपादाने ५।
यथा विभीषणः पदाच्युतः॥
अधिकरणं ६ यथा रेमे श्रीरदि
गोविंदः इति वोपदेवः॥
वर्षोपलोद्भवे जले इति
राजनिर्घंटः॥
कारकः त्रि कर्त्ता इति मेदिनी
कारकुक्षीयः पु शाल्वदेशः॥
तद्देशीयजने बहुवचनांतः इति
हेमचंद्रः॥ (तत्
कारणं क्ली येन विना यन्न भवति
तत्पर्य्यायः हेतुः २ बीजं ३॥
इत्यमरः निमित्तं ४ प्रत्ययः ५
इति जटाधरः कारणत्वमाह॥

अन्यथासिद्धिशून्यत्वे सति नियत
पूर्ववर्त्तित्वं तत् त्रिविधं समवायि
कारणत्वं १ असमवायिकारणत्वं २
निमित्तकारणत्वं ३ परमाणु॥
परिमाणभिन्नानां कारणत्वं इति
भाषापरिच्छेदः अणुपरिमाणं तु
न कस्यापि कारणं इति सिद्धांत॥
मुक्तावलीकरणं वधः इति॥
मेदिनी इंद्रिये देहः साधने॥
कर्मकायस्थः वाद्यप्रभेदः॥
गीतप्रभेदः इति भरत रत्न।
रत्नकोषः॥ (गुण
कारणगुणोद्भवगुणः पु कारण
पूर्वकगुणः तद्यथा रूपं १
रसः गंधः ३ अपाकजस्पर्शः ४
द्रवत्वं ५ स्नेहः ६ वेगः ७ गुरुत्वं
८ एकत्वं ९ पृथक्त्वं १० परिमाणं
११ स्थितिस्थापक संस्कारः १२।
इति भाषापरिच्छेदः॥ (ज्ञाने
कारणशरीरं क्ली सत्वप्रधानम्।
तत्पर्य्यायः आनंदमयकोषः॥
२ सुषुप्तिः ३ इति वेदांतसारः।
कारणा स्त्री यातना गाढवेदना
इत्यमरः नरकरुजा यमयातना
इति केचित् इति भरतः॥ (रः
कारणिकः त्रि परीक्षकः इत्यम
कारणोत्तरं क्ली प्रत्यवस्कंदने॥

सत्यत्वेनोगीकृत्य तत्प्रति कूल
रूपकारणं ब्रुयात तदा तदुत्तरं
तत् त्रिविधं बलवत् १ तुल्यबलं।
२ दुर्बलं ३ आद्यं यथा मया त्वत्तः
शतं गृहीतमिति सत्योक्ति तत।
परिशोधितं द्वितीयं यथा
मदीयेयं भूमिः क्रमागतत्वादिति
वाद्युक्ते प्रतिवादिनो ऽपि।
तथोत्तरं तृतीयं यथा ममेयं
भूमिः क्रमागतत्वात् इति
वाद्युक्ते ममेयं भूमिः दशवर्षीय।
भुज्यमानत्वात् इति प्रत्युत्तरं॥
इति व्यवहारतत्वं॥
कारंडवः पु स्त्री हंसविशेषः॥
खडहांस इति भाषा इत्यमरः॥
कारंडव्यूहः पु बुद्धभेदः इति
त्रिकांडशेषः॥
कारंधमी न् पु कोशपकारः॥
धातुवादरतः इति मेदिनी॥
कारंभा स्त्री प्रियंगुवृक्षः।
इत्यमरः॥
कारवः पु काकः इति
त्रिकांडशेषः॥
कारवल्ली स्त्री कारवेल्लः कोडीरः
इति राजनिर्घंटः॥
कारवी स्त्री मधुरा मौरी इति भाषा
दीप्यः मयूरशिखा रुद्रजटा॥

इति भाषा ह्वेत्रयमानिका इति
केचित् सपवी केले जीरा॥
इति भाषा हिंगुपत्री हिंगेर॥
पाता इति भाषा इत्यमरभरतौ॥
स्तुद्रकारवेल्ली क्षोटकेरला॥
इति भाषा इति राजनिर्घंटः॥
कारवेल्लः पु लताविशेषः॥
करेला इति भाषा तत्पर्य्यायः॥
कठिकः २ सुषवी ३ इत्यमरः॥
सुषवी ४ सुषवी ५ इति तट्टीका
केंडुर ६ कांडकटुकः ७ सुकांडः
८ उग्रकांडः ९ कठिल्लः १० नासा
संवेदनः ११ पटुः १२ इति॥
राजनिर्घंटः तत् पुष्पगुणः॥
धारकत्वं रक्तपित्तरोगसपथ्यत्वं च
तत्फलगुणः सुक्त कफपित्त
नाशित्वं रुचिकरत्वं च इति॥
राजवल्लभः॥
कारवेल्लकः पु कारवेल्लः इति।
रत्नमाला॥
कारमिहिका स्त्री कर्पूरं इति
राजनिर्घंटः॥
कारस्करः पु वृक्षविशेषः तत्
पर्य्यायः किंपाकः २ विषतिंदुः
३ करद्रुमः ४ रम्यफलः ५ (णाः
कुपीलुः ६ कालकूटः ७ अस्यगु
कटुत्वं उष्णत्वं तिक्तत्वं कुष्ठ॥

वातामयास्रकेइति कफार्शोव्रण नाशित्वंच इतिराजनिर्घण्टः। कारस्कराढिका स्त्री कर्णजलौका कर्णिकेन्नइ इतिच भाषा ॥ इतित्रिकाण्डशेषः ॥

कारास्त्री कारागारं तत् पर्यायः वेधनालयः २ इत्यमरः। दूतीप्रसेवकः स्वर्णकारिका ॥ बेधने इतिमेदिनी पीडा॥ इतित्रिकाण्डशेषः ॥

कारागारं क्ली बेधनगृहं यथा। रिपुः कारागारे कलयतिचतं ॥ केलिकलयति तत्रसारे शणामा। स्तोत्रं।

कारागुप्तः त्रि कारागारस्थः ॥ कयेदी इति भाषा इति हेमचन्द्रः ॥

काराविका स्त्री बलाका इति जटाधरः ॥

कारावेश्म नं कारागारं तत् पर्यायः वर्धागारं २ इति त्रिकाण्डशेषः

कारिः स्त्री क्रिया शिल्पिनित्रि इतिमेदिनी ॥

कारिका स्त्री नटस्त्री कृतिः ॥ विवरणश्लोकः शिल्पं यातना॥ इतिमेदिनी वृद्धिः सुद इति भाषा इत्यमर टीकायां ॥ ॥ रमानाथः ॥

कारितः त्रि कुर्वन्प्रेरितः ॥ कराण इति भाषा यथा विष्णुः शरीरग्रहणं सहमीशानयवच॥ कारितास्तियतोऽस्त लोकः स्तोत्र शक्तिमान् भवेत इतिदेवी ॥ माहात्म्यं ॥

कारिता स्त्री ऋणिकेनया स्वकार्य्य साधकतया अशीतितमभागाधिक शतादितोऽधिका वृद्धिर्वध । स्थापितासा। अधिकसुद इतिभाषा यथा ऋणिकेन तुयावृद्धिरधिका संप्रकीर्त्तिता आपत्कालकृता नित्यंदातव्यासात्तु कारिता इति विवादार्णवसेतौ कात्यायनः तत्पर्य्यायः कारिका २ ॥ कारितावृद्धिः ३ इति मिताक्षरा

कारी स्त्री वृक्षविशेषः केडकारी आकर्षकारीत्येषा द्विधा तत् पर्य्यायः कारिका २ कार्य्या ३ पिरिज्ञा ४ कटुयत्रिका ५ ॥ अस्यागुणा कषायत्वं मधुरत्वं पित्तनाशित्वं दीपनत्वं ग्राहित्वं रुचिकत्वं शोष कारित्वं गुरुत्वंच इतिराजनिर्घण्टः ॥

कारीषं क्ली करीषसमूहः ॥

कुटेरराशि इतिभाषा इत्यमरः ॥

कारुः पुं विश्वकर्म्मा इति मेदिनी शिल्पे इतिहेमचन्द्रः

कारुः त्रि कारकः शिल्पी इति मेदिनी ॥

कारुकः त्रि शिल्पी इतिमनुः ॥

कारुजः पुं करभः फेनः वल्मीकः नागकेशरः गैरिकं शिल्पीनां चित्रं स्वयंजाततिलः इतिहेमचन्द्रः ॥

कारुणिकः त्रि दयालुः इत्यमरः

कारुण्डी स्त्री जलौकाः इति शब्दचन्द्रिका कारुण्डिका इतिच पाठः ॥

कारुण्यं क्ली करुणा इत्यमरः

कारुषाः पुं करुदेशवासिनः तत्पर्य्यायः बृहद्गृहाः २ । इति हेमचन्द्रः बहुवचनोऽतोये शब्दः

कारोत्तमः पुं कारोत्तरः ॥ इत्यमरटीकायां स्वामी ॥

कारोत्तरः पुं सराग्र भागः तत्। पर्य्यायः सुरामण्डः २ इत्यमरः॥ कूपः इतिहारावली ॥

कार्कश्यं क्ली कर्कशता ॥ शब्दात् भावे ष्यं प्रत्ययः ॥

कार्त्तवीर्य्यः पुं चन्द्रवंशीय ॥ कृतवीर्य्यराजपुत्रः तत्पर्य्यायः हैहयः २ दोःसहस्रभृत् ३ अर्ज्जुनः ४ जैन राजचक्रवर्त्ति विशेषः ॥ तत्पर्य्यायः सभूमः २ इति हेमचन्द्रः ॥

कार्त्तस्वरं क्ली स्वर्णं धुस्तूरः॥ इत्यमरः ॥

कार्त्तान्तिकः पुं ज्योतिर्वित् । देवज्ञः इत्यमरः ॥

कार्त्तिकः पुं वैशाखादिद्वादश मासांतर्गत सप्तममासः कृत्तिका नक्षत्रयुक्ता पौर्णमासी यत्रमासे सः अयं तुलास्थ रविशारव्धः ॥ शुक्लप्रतिपदादि दर्शांतरूपमुख्य चन्द्रः सौरस्तु तुलाराशिस्थ ॥ रविक कालः इति स्मृतिः तत्पर्य्यायः बाहुलः २ ऊर्ज्जः ३ कार्त्तिकिकः ४ इत्यमरः ॥ तत्र जातस्यफलं दक्षः क्रये विक्रयणे धनाढ्यः स्याद्बहुको ऽथिलकोपालज्ञः यः कार्त्तिके कार्त्तिक रूप धारी जातो ॥ भवेद्युद्ध विशारदश्च इतिकोष्ठी प्रदीपः वर्षविशेषः सच कृत्तिका रोहिण्या रेकतरस्मिन् वृहस्पते रस्तोदयैकतर सेवेये भवति इति मलमासतत्वे ॥

कार्त्तिकेयः यथा दृष्ट्वा तान् ॥

कृत्तिकासर्वाभय विह्वलमानसाः
कार्त्तिकं कथयामास ज्वलंतं ॥
ब्रह्मतेजसा इतिब्रह्मवैवर्त्ते ॥
गणेशखंडे ॥
कार्त्तिकिकः पुं कार्त्तिकमासः
इत्यमरः ॥
कार्त्तिकेयः पुं शिवपुत्रः ॥
यथायावभूव रहः क्रीडा पार्वती
शिवयोः पुरा दृष्टस्यच स्मरेः
शुभोवीर्य्यं भूमौ पपातह
भूमिस्तद्दत्तिपत वह्नौ वह्निस्त्र।
शरकानने तत्र लब्धः कृत्तिकाभि
रथुनागच्छसाम्प्रतं तवाभिषेकं।
विस्तुस्त्र करिष्यति स्मरेः मह
हनिष्यसि तारकाख्यं सर्वशास्त्र।
लभिष्यसि ॥ पुत्रस्त्वं विश्व
संहर्त्तुं स्त्वोगोम महता इमाः
नाम्नि गोमं यथाशक्तः शुष्कहस्तः
स्वकोष्ठे इति ब्रह्मवैवर्त्ते ॥
गणेशखंडे सपवकल्पभेदे ॥
अग्निपुत्रः यथाकुमारस्त्वभवत् ॥
तत्रतरुणार्क समद्युतिः वह्नि ॥
तेजोभवः श्रीमान् गंगाकुक्षि ॥
परिच्युतः तंकुमारं ततोजातं ॥
दृष्ट्वासेंद्रा मरुद्गणाः तदा तीरं ॥
प्रदानार्थं कृत्तिकाः सम्पयोजयन्
ताः स्तीरं तस्यदेवस्य समयेन ॥

दृष्ट्वस्तदा स्यादस्माक मयं पुत्रः
ख्यातो नाम्नेति राघव
अन्याऽन्यं पिवत स्तासां ॥
तनयस्य मुखानि षट् समभूवन्
महावाहोः षन्मुखस्तेन विश्रुतः
ततस्तादेवता ऊचुः कार्त्तिकेय ॥
इतिप्रभुः पुत्रोऽयंजगतिख्यातो ॥
भविष्यति नसंशयः इति
वाल्मीकीय रामायणे तत्
पर्य्यायः महासेनः — शरजन्मा ३
षडाननः ४ पार्वतीनंदनः ५ स्कंदः
६ सेनानीः ७ अग्निभूः ८ गुहः ९
बाहुलेयः १० तारकजित् ११ ॥
विशाखः १२ शिखिवाहनः १३
षाण्मातुरः १४ शक्तिधरः १५
कुमारः १६ क्रौंचदारणः १७
इत्यमरः ॥ आग्नेयः १८ दीप्तकीर्त्तिः
१९ अनमेयः २० मयूरकेतुः २१ ॥
धर्मात्मा २२ भूतेशः २३ ॥
महिषार्द्दनः २४ कामजित् २५
कामदः २६ कांतः २७ सत्यवाक
२८ भुवनेश्वरः २९ शिशुः ३०
शीघ्रः ३१ शुचिः ३२ चंडः ३३ ॥
दीप्तवर्णः ३४ शुभाननः ३५ अमोघः
३६ अनघः ३७ रौद्रः ३८ प्रियः ३९
चंद्राननः ४० दीप्तशक्तिः ४१
प्रशांतात्मा ४२ भद्रकृत् ४३ ॥

कूटमोहनः ४४ षष्ठीप्रियः ४५
पवित्रः ४६ मातृवत्सलः ४७
कन्याहर्त्ता ४८ विभक्तः ४९ स्वाहेयः
५० रेवतीसुतः ५१ प्रभुः ५२ ॥
नेता ५३ नैगमेयः ५४ सुडम्बरः ॥
५५ सुव्रतः ५६ ललितः ५७ ॥
बालक्रीडनप्रियः ५८ खचारी ॥
५९ ब्रह्मचारी ६० शूरः ६१
शरवणोद्भवः ६२ विश्वामित्रप्रियः
६३ देवसेनाप्रियः ६४ वासुदेव ॥
प्रियः ६५ प्रियकृत् ६६ इति
वनपर्व अस्याध्याने यथा
कार्त्तिकेयं महाभागं मयूरोपरि ॥
संस्थितं तप्तकांचन संनिभं ॥
शक्तिहस्तंवरप्रदं द्विभुजंशत्रु
हंतारं नानालंकार भूषितं ॥
प्रसन्न वदनं देवं सर्वसेना
समावृतं इति कार्त्तिकेय ॥
पूजापद्धतिः ॥
कार्त्तिकेयप्रसूः स्त्री उमा इति
शब्दरत्नावली ॥
कार्त्तिकोत्

सवः पुं कौमुदी ॥
कार्त्तिकीपूर्णिमा इति
त्रिकांडशेषः ॥
कार्पट्ठः पुं जतु जौ इतिभाषा
कार्य्यी दरवारी उमेदवार ॥
इत्यादिपारस्य भाषा इति

हेमचंद्रः ॥
कार्पटिकः पुं मर्मवेत्ता इति
त्रिकांडशेषः तीर्थसेवी ॥
इतिकाशीखंडे ॥
कार्पण्य स्त्री कृपणता तत्पर्य्यायः
दैन्य २ इतिहेमचंद्रः ॥
कार्पासं त्रि कार्पासजातवस्त्रादि
तत्पर्य्यायः फालं २ वादरं ३
इत्यमरः हेमचंद्र मते ॥
क्लीवलिंगोऽयं शब्दः ॥
कार्पासनासिका स्त्री तर्कुः ॥
ढेको इति भाषा इति ॥
शब्दरत्नावली ॥
कार्पासिकाः स्त्रीकार्पासी इति
शब्दरत्नावली ॥
कार्पासी स्त्री कार्पासवृक्षः
कापास इतिभाषा तत्पर्य्यायः
वदरा २ तुंडिकेरी ३ समुद्रांता ४
इत्यमरः पवदः ५ इतिरत्नमाला
सारिणी ६ चव्या ७ तूला ८ गुडः
९ तुंडकेरिका १० मरुद्भवा ११
पिचुः १२ वादरः १३

अस्यागुणाः ॥
मधुरत्वं शीतत्वं स्तन दुग्ध ॥
कारित्वं पित्त कफ तृष्णादाह
श्रमभ्रांति मूर्च्छा नाशित्वं ॥
वल्कारित्वंच इतिराजनिर्घण्टः
तत्पत्रगुणाः वायु नाशित्वं ॥

रक्तकारित्वे मूत्रवर्द्धकत्वे कफ
पिडिकानाद पूयास्रावनाशित्वेच
तद्वीजगुणाः स्तन्यदत्वे हृद्यत्वे।
स्निग्धत्वे कफकरत्वे गुरुत्वेच॥
इतिभावप्रकाशः॥
कार्म्मः त्रि कर्म्मशीलः इत्यमरः
कार्म्मणं क्ली मूलकर्म इत्यमरः
तृषध्यादिमूलेनयत् आसनाद्यादे
लेभनवशीकरणादिकर्म तत् इति
भरतः मेत्र तेत्रादि योजने॥
कर्म्मठेत्रि इतिमेदिनी॥
कार्म्मिकः त्रि विचित्रवस्त्रादि इति
मिताक्षरा॥
कार्मुकं क्ली धनुः धनुक इतिभाष
इत्यमरः॥
कार्म्मुकः [illegible]
कार्मुकः पुं वेशः वांश इति
भाषा कर्म्मक्षमे त्रि इति।
मेदिनी श्वेतखदिरः हिज्जलः
महानिंबः इतिराजनिर्घंटः।
कार्य्यं क्ली हेतुः प्रयोजनं॥
इतिमेदिनी क्रियतेयत् काज
इति भाषा इतिव्याकरणे तत्
प्रतिकारणं त्रिविधं समवायि॥
कारणं २ यथा घटकार्य्यं प्रति
कपालं असमवायिकारणं यथा
घटकार्य्यं प्रतिकपालसंयोगादि
निमित्तकारणं ३ यथा घटं प्रति

दंडचक्रादि इति तर्कशास्त्रं॥
विवादः यथा यस्मात्कार्य्यसमारंभ
श्चिरयेन विनिश्चितः तस्मात्।
लभतेकालमभियुक्तश्चकालभाक्
इतिव्यवहारतत्वे कात्यायनः॥
अपूर्वं यथा विधिप्रत्ययस्य॥
कार्य्यशाकिरिति मीमांसकाः॥
व्याकरणमते आदेश॥
प्रत्ययागमाः इतिदुर्गादासः॥
कार्य्यकुशलः त्रि कर्म्मठः इति
भूरिप्रयोगः॥
कार्य्यपुटः पुं क्षपणः उन्मत्तः
अनर्थकरः इतिविश्वमेदिन्यौ॥
कार्य्यप्रद्वेषः पुं आलस्यं इति॥
राजनिर्घंटः॥
[illegible]
कार्य्या स्त्री कारीहृत्तः इति॥
राजनिर्घंटः॥
न
कार्य्यी पुं यस्यनिर्दिश्यतेकार्य्य
सः इति दुर्गादासः कर्म्मार्थी
इतिकार्पट शब्दार्थे हेमचंद्रः
कार्श्यः पुं कार्श्यः सालवृक्षः
इत्यमरटीकायांभरतः कचूरः॥
लकुचः इति राजनिर्घंटः॥
कृशतायां स्त्री॥ (स्तः
कार्ष्मरी स्त्री काश्मरी गंभारीवृ
इत्यमरटीकायां भरतः॥

कार्षिकः पुं कर्षकः इत्यमर॥
टीकायां रायमुकुटः॥
कार्षापणः पुं क्ली कार्षिकः॥
षोडशपणः इतिमेदिनी॥
रूप्य कर्ष कृत व्यवहार द्रव्ये
लोकेतु तन्मूल्ये षोडश पण
समुदाये कार्षापणस्योपचारणं॥
प्रवृत्तिः तथाहि शास्त्रीयोरजत
माषो द्विकृष्णलः द्वे कृष्णलेसम
इति विज्ञेयो रूप्यमाषकः॥
इति मनुः आद्येकृतयुगेरजत।
कृष्णलयो द्विगोडा मूल्यमिति
द्वात्रिंशता कृष्णलाभी रजतकर्षस्य
षोडशपणाएव मूल्यं कर्षस्यार्थे।
कार्षः स्यः कार्ष आयणाव्यवहारो
ऽत्रेति कार्षापणः पुराणशब्दश्चात्र
कार्षिकं पुराणंच कार्षापणइति
वोपालितः इत्यमर टीकायां॥
भरतः॥
कार्षिकः पुं कार्षापणः इत्यमरः
कृषकः इतिहेमचंद्रः॥
कार्ष्णिः पुं कामदेवः इति॥
त्रिकांडशेषः कृष्णस्यापत्यं॥
इतिमुग्धबोधे॥
कार्ष्णी स्त्री शतावरी इति
राजनिर्घंटः॥
कार्ष्यः पुं सालवृक्षः इत्यमरः।

कालं त क कालोपदेशे इति
कविकल्पद्रुमः यथाअचकालत्कालं
मियत्तया गणकः एतावतीवेलेति
कथितवानित्यर्थः इति तट्टीका
कालं क्ली लौहं इतिवाचस्पति
रित्यमरटीकायां भरतः॥
कक्कोलकं इतिराजनिर्घंटः॥
कालीयकं इति शब्दचंद्रिका॥
कालः पुं क्षणदंड मुहूर्तप्रहरदिन
रात्रि पक्ष मासायन वत्सरादिः
इति दुर्गादासः तत्पर्य्यायः॥
दिष्टः २ अनेहा ३ समयः ४
इत्यमरः जन्यानां जनकः॥
कालो जगतां माश्रयो मतः
परापरत्व धीहेतुः क्षणादिः
स्यादुपाधितः अस्य गुणाः संख्या १
परिमितिः २ पृथक्त्वं ३ संयोगः ४
विभागः ५ इतिभाषापरिच्छेदः
अनादिनिधनः कालो रुद्रः॥
संकर्षणः स्मृतः कलनात्॥
सर्वभूतानां सकालः परिकीर्तितः
इति तिथ्यादितत्वे॥ त्रि
यमः कृष्णवर्णः कृष्णगुणवति
इत्यमरः मृत्युः महाकालः
इतिमेदिनी शनिः इति॥
दीपिका कासमर्दः रक्तचित्रकः
रालः कोकिलः इति॥

राजनिर्घंटः ॥
कालकं क्ली कालशाकं इति
भावप्रकाशः यकृत इति
हेमचंद्रः ॥
कालकः पुं जतुकः जडुर इति
भाषा इत्यमरः ग्रलगर्द्दसर्पः ॥
इतिशब्दरत्नावली ॥
कालकटंकटः पुं शिवः॥
शालकटंकटोपि पाठः इति
दानधर्मेशिवसहस्रनामसुपठितः
कालकंटः पुं शिवः पीतसारः।
मयूरः खंजनः कलविंकः।
दात्यूहपक्षी इतिमेदिनी ॥
कालकंठकः पुं दात्यूहपक्षी।
इत्यमरः ॥
कालकेदकः पुं जलसर्पः इति
शब्दरत्नावली ॥
कालकणिका स्त्री ग्रलक्ष्मीः इति
हेमचंद्रः ॥
कालकर्णी स्त्री ग्रलक्ष्मीः इति
शब्दरत्नावली ॥ (गण
कालका स्त्री कालकेयनामासुर
माता इतिजटाधरः
कालकीलः पुं कोलाहलः इति
शब्दरत्नावली ॥
कालकुंठः पुं यमः इति॥
शब्दमाला ॥

कालकुष्टं क्ली कंकुष्टं पर्वतीय
मृत्तिका विशेषः इति ॥
राजनिर्घंटः ॥
कालकूटं क्ली वोलं ॥ विषं ॥
इतिराजनिर्घंटः ॥
कालकूटः पुं क्ली स्थावरविषभेदः
इत्यमरः ॥
कालकूटः पुं कारस्करवृक्षः इति
राजनिर्घंटः ॥
कालकृत पुं सूर्य्यः इति
त्रिकांडशेषः ॥
कालकृतः पुं सूर्य्यः इति ॥
शब्दरत्नावली कालजाते त्रि
यथासर्वं कालकृतं मन्ये
कालोहि बलवत्तरः इतिपुराणं
कालखंजनं क्ली यकृत इति
हेमचंद्रः ॥
कालखंडं क्ली यकृत दक्षिण
कुक्षिस्थ मांसखंडं इत्यमरः ॥
कालग्रंथिः पुं वत्सरः इति॥
त्रिकांडशेषः ॥
कालंकतः पुं वृक्षविशेषः ॥
कालकासंदे इति भाषा तत
पर्य्यायः ग्ररिमर्द्दः २ कासमर्द्दः ३
कर्कशः ४ इतिरत्नमाला ॥
कालचक्रं क्ली कालरूपचक्रं
यथाकालोहिविधोऽवसर्पिण्युत

सर्पिणीप्रभेदतः सागर कोटि
कोटीनांविंशत्यासमाप्यते ॥
ग्रवसर्पिण्यां षडरा उत्सर्पिण्यां॥
तएव विपरीताः एवं द्वादशभि
रैर्विवर्त्तते कालचक्रमिदं ॥
इतिहेमचंद्रः॥
कालज्ञः पुं कुक्कुटः इति
कालंजरः पुं योगिचक्रमेलके
भैरवः पर्वत विशेषः इति
मेदिनी देशविशेषः इति
धरणी ॥
कालंजरी स्त्री चंडी इतिधरणी
कालंजरा इतिरूपांतरं ॥
कालतालः पुं तमालवृक्षः इति
राजनिर्घंटः ॥
कालधर्म्मः पुं मृत्युः इत्यमरः॥
समयस्य स्वभावः ॥
कालनिर्यासः पुं गुग्गुलुः इति
रत्नमाला ॥
कालनेमिः पुं स्वनामख्यातरासः
यथाकालनेमि
दुराधर्षं रक्षः ॥
परमदुर्जयं चतरास्यं चतुर्हस्तं॥
महानेत्रं भयावहं इति
रामायणं दैत्यविशेषः ॥
यथा ग्रात्मानमिहसंजातं जानन्
प्राग्विस्नुनाहतंमहासुरकालनेमिं

यड्भिः स व्यरुध्यत इति
श्रीभागवते सतु हिरण्यकशिपुपू
त्रः इतिहरिवंशः ॥
कालनेमिरिपुः पुं विस्नुः इति
शब्दरत्नावली ॥
कालनेमिहा न् पुं विस्नुः इति
त्रिकांडशेषः ॥
कालनेमी न् पुं कालनेमिः इति
द्विरूपकोषः ॥
कालनेमिरिः पुं विस्नुः इति
त्रिकांडशेषः ॥
कालपर्णः पुं तगरवृक्षः इति
कालपालकं क्ली कंकुष्ठमृत्तिका
इतिराजनिर्घंटः ॥
कालपीलुकः पुं कुपीलुः इति
भावप्रकाशः ॥
काल पुरुषः यमसहायः इति ॥
जटाधरः ज्योतिः शास्त्रं यथा॥
किंत्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेतकदाचिदन्तमपि
मनसापिपारं ॥
कालपुरुषः सत्वाख्या नाम ॥
यस्यासौ तस्य ज्योतिःशास्त्रविलीनो
समुद्रस्य इति भट्टोत पलः ॥
नराणां शुभाशुभज्ञानार्थं ॥
जन्मलग्नादि द्वादशराशिकल्पित



पुरुषाकारः यथा शीर्षं मुख॥
बाहुहृदयोदराणि कटिवस्ति
गुह्यसंज्ञकानि ऊरु जानुक जंघे
चरणाविति च राश्ययोऽजाद्याः॥
इति दीपिका नवांशे शुभा॥
शुभज्ञानार्थं जन्म लग्नादिराशि
द्रेक्काणचटित पुरुषाकारः यथा
कंटक श्रोत्र नसाकपोल हनवो
वक्त्रं च होरादयस्ते कंठांसकबाहु
पार्श्वहृदय क्रोडानिनाभिस्ततः
वस्तिः शिश्न गुदे ततश्च वृषणावूरू
ततोजानुनी जंघोघ्री सुभयत्र॥
वामसुदितै द्रेक्काणभोगस्त्रिधा।
इति कालनरस्योगे सदसद्गृह॥
योगतः पुंसामपि तद्देशेषु॥
शुभाशुभ फलं वदेत॥ इति
बृहज्जातके॥
कालपृष्ठं क्ली कर्णधनुः धनुर्मात्रे
इति हेमचंद्रः॥
कालपृष्ठः केकपक्षी मृग॥
विशेषः इति हेमचंद्रः॥
कालपेषी स्त्री श्यामलता इति
रत्नमाला॥
कालप्रभाते क्ली शरदृतुः शरत
कालः इति त्रिकांडशेषः॥
कालवल्लने क्ली वर्म्म इति॥
त्रिकांडशेषः कायवल्लन मिति
मधुपाठः॥
कालभांडिका स्त्री मंजिष्ठा इति
राजनिर्घंटः॥
कालमानः पुं कृष्णार्जकः॥
कालतुलसी इति भाषा इति॥
रत्नमाला राजनिर्घंटा। लोत
शाह्वोऽये॥
कालमुष्ककः पुं घंटापारलिवृक्षः
इति रत्नमाला॥
कालमूलः पुं रक्तचित्रकवृक्षः
इति राजनिर्घंटः॥
कालमेषिका स्त्री कालमेषिका
इत्यमरटीकायां रायमुकुटः॥
कालमेषी स्त्री कालमेषिका।
इत्यमरटीकायां भरतः॥
कालमेषिका स्त्री मंजिष्ठाकृष्ण
त्रिवृता इत्यमरः
कालमेषी स्त्री सोमराजी॥
इत्यमरः मंजिष्ठा इति॥
शब्दरत्नावली त्रिवृत इति॥
राजनिर्घंटः॥
कालरात्रिः स्त्री भीमरथी॥ इति
हारावली रात्रिविशेषः सातु॥
कालः संहारः मरणांतदयलक्षिता
रात्रिः कल्पांत रात्रि रित्यर्थः॥
इति देवीमाहात्म्य टीकायां॥
विद्याविनोदः दुर्गायाः शक्ति॥

विशेषः यथा साङ्गांशक्तिभिः
साईंकाशी रक्षतिसर्वतः॥
ताः प्रयत्ने सेपूज्याः कालरात्रि।
मुखानैरः इति काशीखंडे॥
काललवणं क्ली विड्लवणं इति
रत्नमाला
काललोहं क्ली कालायसेतिथा
इति भाषा तत्पर्यायः॥
कृष्णायसं २ रुक्मं ३ तीक्ष्णं ४
इति रत्नमाला॥
कालवृंतः पुं कुलत्थवृक्षः इति
रत्नमाला॥
कालवृंती स्त्री पाटलावृक्षः इति
राजनिर्घंटः॥
कालवेला स्त्री क्रियानर्हकाल
विशेषः सातु रव्यादि वारे॥
कालस्य पुनेस्तत्र यामार्द्धरूप
वेलायथा रवौ दिवापंचम॥
यामार्द्ध नक्ते षष्ठ यामार्द्धे सोमे
दिवाद्वितीय यामार्द्धे नक्ते चतुर्थ
यामार्द्धे कुजे दिवा षष्ठयामार्द्धे
नक्ते द्वितीय यामार्द्धे बुधे दिवा
तृतीय यामार्द्धे नक्ते सप्तम॥
यामार्द्धे गुरौ दिवा सप्तम यामार्द्धे
नक्ते पंचम यामार्द्धे शुक्रे दिवा॥
चतुर्थयामार्द्धे नक्ते तृतीययामार्द्धे
शनौ दिवा प्रथमाष्टम यामार्द्धे॥
नक्ते तदेव इति दीपिका॥
कालशाकं क्ली स्वनामख्यातशाके
नरचा इति हिंदी भाषा तत
पर्यायः नाडिकं २ श्राद्धशाकं ३
कालकं ४ अस्य गुणाः सारकत्वे
रुचिवायु बल कारित्वे कफ
शोषहरके पित्तनाशित्वे मेध्यत्वे
हिमत्वे च इति भावप्रकाशः
तिक्तपूतिका कुलत्थशाके इति
केचित अस्य गुणाः कटुत्वे
अग्निदीपनत्वे गुरुत्वे शोथ
नाशित्वे च इति राजवल्लभः॥
कालशालिः पुं कृष्णशालिः
इति राजनिर्घंटः॥
कालशेयं क्ली कालसेयं त्रोले
इत्यमरटीकायां भरतः॥ स्थाने
कालसंवोधः पुं चिरकालाव
इति मिताक्षरा यथानवाये॥
कालसंरोधात्रिसर्गास्तिनविक्रयः
इति याज्ञवल्क्यः॥
कालसर्पः पुं कृष्णसर्पः तत
पर्यायः अलगर्द्दः २ महाविषः ३
इति त्रिकांडशेषः॥
कालसारं क्ली पीतचंदने इति
भावप्रकाशः॥ तिलः
कालसारः पुं स्वनामख्यातमृग
तत्पर्यायः कृष्णसारः २ इति।



शब्दरत्नावली ॥
कालसूत्रं क्ली नरकविशेषः
इत्यमरः तत्र कुलालचक्रसूत्र
छेदनरूपे इतिमनुः ॥
कालसेयं क्ली घोलं इत्यमरः
कालस्कंधः पुं तमालवृक्षः॥
तिंदुकवृक्षः जीवकद्रुमःइति
मेदिनीडः खदिरः उडुंबरः ॥
इतिराजनिर्घंटः ॥ (ता
काला स्त्री नीलिनी कृष्णत्रिवृ
कृष्णजीरकः इत्यमरः मंजिष्ठा
इतिमेदिनी कुलिक वृक्षः।
कालियाकडा इति भाषा इति
रत्नमाला अश्वगंधावृक्षःइति
राजनिर्घंटः पाढलावृक्षःइति
भावप्रकाशः ॥ (मरः
कालागुरु क्ली कृष्णगुरुअ
कालांजनी स्त्री क्षुपविशेषः
कालिकर्पासिकिनी इतिख्याता
तत्पर्य्यायः अंजनी रेचनी ३
शिलांजनी ४ नालांजनी ५ कृष्ण
भा ६ काली ७ कृष्णांजनी ८ अस्यागु
णाः कटुत्वं उष्णत्वं अमलत्वं।
कृमिशोधनत्वं अपानावर्त्तशमनत्वं
जठरामय नाशित्वंच इति॥
राजनिर्घंटः ॥
कालानुनादी पुं चल्लवःभ्रमरः।

कलविंकः चटा इति भाषा
कपिंजलः चातकपक्षी इति
मेदिनी ॥ (के
कालानुसारिवा स्त्रीतगरपादि
तगरमूल इति भाषा शीतली
जटाशी उलीच्छोय इति भाषा
इतिरत्नमाला ॥
कालानुसारकं क्ली तगरं इति
राजनिर्घंटः पीतचंदनं इति
भावप्रकाशः ॥
कालानुसारिः पुं शैलेयं ॥
शैलजनाम गंधद्रव्यं इति ॥
शब्दरत्नावली ॥
कालानुसार्य्यं क्ली शैलेयं ॥
शैलज इतिभाषा कालीयके।
कालीयानाम पीतवर्णसुगंधिकाष्ठे
इत्यमरः शिंशपावृक्षः शिमु।
इतिभाषा इतिमेदिनी तगरं॥
इतिभावप्रकाशः ॥
कालानुसार्य्यकं क्ली शैलेयं।
इति राजनिर्घंटः ॥
कालांतरविषः पुं मूषिकादिः
इतिहेमचंद्रः ॥
कालापः पुं सर्पभोगः राक्षसः
इति धरणी कलापव्याकरणं॥
वेत्तरित्रि ॥
कालायसं क्ली लोहं इत्यमरः

कालिकं क्ली कृष्णचंदने तत्
पर्य्यायः कालीयं २ कालीयकं ३
हरिप्रियं ४ इतिशब्दचंद्रिका ॥
सामयिके त्रि ॥
कालिकः पुं क्रौंचः इति॥
शब्दरत्नावली ॥
कालिका स्त्री चंडिकाभेदः ॥
कार्ष्ण्ये वृश्चिपत्रवृक्षः क्रमदेय॥
वस्त्रमूल्ये धूसरी नवमेघः ॥
पटोलपुष्पावा रोमाली मांसी।
काकी शिवा मेघावलिः ॥
इतिमेदिनी स्वर्णदोषः इति
जटाधरः क्षीरकीटः इति
हारावली मसी इतिशब्दरत्नावली
काकोली पणमापस्ती इति॥
राजनिर्घंटः प्रतिमासीयावृद्धिः
यथाप्रतिमासं स्रवति या ॥
वृद्धिः साकालिका मता इति
विवादार्णवसेतौ नारदः स्मृ ॥
इतिहेमचंद्रः कुज्झटिका ॥
इत्यमरः टीकायां भरतः ॥
हिमाचलभवा त्रिसिरा हरीतकी
सांगंधयोगकरणे प्रशस्ता इति
राजवल्लभः ॥
कालिंगं क्ली फलविशेषः ॥
तरमूज इतिख्याते तत्पर्य्यायः॥
कालिंदकं २ कृष्णवीजं ३

फलवर्त्तुलं ४ अस्यगुणाः ॥
शीतलत्वं ग्राहित्वं स्वादुयाकारसत्वं
गुरुत्वं विष्टंभित्वं स्यंदित्वं॥
दृक् शुक्र पित्त नाशित्वं कफ
वातकारित्वंच पक्वस्यतस्यगुणाः
पित्तवृद्धि कारित्वं उष्णत्वं ॥
क्षारत्वं कफ वातनाशित्वंच तत्
पत्रगुणो रुधिर स्यायनत्वं ॥
तिक्तत्वंच इतिपथ्यापथ्यविवेकः
कालिंगः पुं भूमिककोरुः हस्ती
सर्पः इति मेदिनी लोहं ॥
भेदः अस्पलक्षणं कालिंगो॥
लिंगवान् यः स्याद्धनःस्फुलिंगको
मतः इति मुग्धबोधः ॥
कालिंगिका स्त्री त्रिवृत इति
राजनिर्घंटः ॥
कालिंगी स्त्री राजकर्कटी इति
मेदिनी ॥
कालिदासः पुं स्वनामख्यातकविः
तत्पर्य्यायः रघुकारः २ मेधारुद्रः
३ कोटिजित ४ इति ॥
त्रिकांडशेषः सच रघुकुमार॥
संभवकृत्त बोधमेघदूताभिज्ञान
शाकुंतला नलोदय श्रृंगार ॥
तिलकादिग्रंथकर्त्ता विक्रमादित्य
राजसभास्य नवरत्न मध्य सप्तम
रत्नंच ॥



कालिदासकः पुं कालिदासः॥
इतिशब्दरत्नावली॥
कालिनी स्त्री आर्द्रानक्षत्रे इति
हेमचंद्रः॥
कालिदकं क्ली कालिंग इति
राजनिर्घंटः॥
कालिंदी स्त्री यमुनानदीइत्यमरः
रक्तत्रिवृत् इतिराजनिर्घंटः॥
कालिंदीकर्षणः पुं बलदेवः
इतिहलायुधः॥
कालिंदीभेदनः पुं बलदेवः॥
इत्यमरः॥
कालिंदीसूः स्त्री सूर्य्यपत्नी॥
यमुनामाता इतित्रिकांडशेषः
कालिंदीसोदरः पुं यमः इति।
हेमचंद्रः॥
काली स्त्री प्रांतनृराजपत्नीइति
त्रिकांडशेषः कालिका॥
क्षीरकीटः मात्रभेदः उमा॥
नवमेघसमूहः परीवादः इति
हेमचंद्रःकालांजनी नवरी॥
त्रिवृत् रात्रिः इतिराजनिर्घंटः॥
अग्निशिखाभेदः इतिजटाधरः
वृश्चिकालीहत्तः विछाटी इति
भाषा इतिरत्नमाला॥
मातृकाध्याने चामुंडा शाहे॥
द्रष्टव्ये उमाध्याने लिख्यते॥

यथाकरालवदनां घोरां॥
मुक्तकेशीं चतुर्भुजां कालिकां॥
दक्षिणां दिव्यां मुंडमाला॥
विभूषितां सद्यश्छिन्न शिरः॥
खड्गवामाधोर्द्धकराम्बुजां अभयं
वरदंचैव दक्षिणाधोर्द्ध पाणिकां
महामेघप्रभां श्यामां तथाचैव
दिगंबरीं कंठावसक्त मुंडाली
गलद्रुधिरचर्च्चितांकर्णावतंसतां
नीतशवयुग्म भयानकांघोरदंष्ट्रां
करालास्यां पीनोन्नत पयोधरां॥
शवानां करसंघातैः कृत॥
कांचीं हसन्मुखीं सृक्कां द्वय॥
गलद्रक्त धारा विस्फुरिताननां
घोररावांमहारौद्रीश्मशानालय
वासिनीं बालार्क मंडलाकार॥
लोचन त्रितयान्वितां दंतुरां॥
दक्षिणव्यापिमुक्तालंबिकचोच्चयां
शवरूप महादेव हृदयोपरि
संस्थितां शिवाभि र्घोर॥
रावाभिश्चतुर्दिक्षु समन्वितां॥
महाकालेनच समं विपरीत॥
रतातुरां सुख प्रसन्नवदनां॥
स्मेराननसरोरुहां एवं॥
संचिंतयेत कालीं सर्वकामार्थ
सिद्धिदां इति तंत्रसार धृत॥
काली तंत्रे॥

कालीकः पुं क्रौंचः इति।
शब्दरत्नावली॥
कालीची स्त्री यमविचारभूमिः
इतित्रिकांडशेषः॥
कालीतनयः पुं महिषः इति
हेमचंद्रः॥
कालीये क्ली कृष्णचंदने इति
शब्दचंद्रिका॥
कालीयकं क्लीकालियाइतिख्या(ते)
पीतवर्ण सुगंधिकाष्ठे इत्यमर
टीकासारसुंदरी तत्पर्य्यायः॥
जायकं २ कालानुसार्य्यंइत्यमरं
जायकं ४ इतिटीकासर्वस्व॥
कालेयं ५ वर्णकं ६ कांतिदायकं
७ इति भरत धृत व्याडिः॥
राजनिर्घंटोक्त गुण पर्य्यायौ
पीतचंदन शब्दे द्रष्टव्यौ॥
कृष्णचंदने तत्पर्य्यायःकालीयं
२कालिकं ३ हरिप्रियं ४ इति
शब्दचंद्रिका दारुहरिद्रा इति
राजनिर्घंटः॥
कालीयकः पुं दारुहरिद्राइति
शब्दरत्नावली॥ (वर्ण
कालेयं क्ली कालियानामपीत
सुगंधिकाष्ठे इति व्याडिः॥
रमानाथस्य कालखंडे यकृत॥
इतियावत इतिमेदिनी॥

कालेयः पुं दैत्यभेदः॥
मेदिनी॥
कालेयकं क्ली कालीयकं॥
कालियानाम पीतवर्णसुगंधि
काष्ठे। इत्यमरटीका॥
कालेयकः पुं दारुहरिद्रा॥
इत्यमरः कुक्कुरः इति॥
राजनिर्घंटः॥
काल्यः पुं हरिद्राविशेषः॥
कोवाहल्दु इति भाषा तत
पर्य्यायःकर्बुरः२द्राविडकः३
द्राविडभूतिकः ४ इतिशब्दरत्नावली
काल्यकः पुं कर्बुरकः कोवा
हल्दु इति भाषा इत्यमरः॥
काल्पनिकः त्रिकल्पनाभवःक
ल्पितः यथा रसः स्वाद्यते इति
काल्पनिके भेद मुरीकृत्यकर्म्म
कर्त्तरि वा प्रयोगः इति॥
साहित्यदर्पणे॥
काल्य क्ली प्रत्यूषः इतिहेमचंद्रः
काल्यकः पुं कल्यकः इति॥
शब्दरत्नावली॥ (ला
काल्या स्त्री गर्भ ग्रहण प्राप्तका
लतुमती गौः तत्पर्य्यायः॥
उपसर्य्या २ इत्यमरः॥
कावचिकं क्ली वर्म्मभृतां गणः
कवचधारियोद्धसमूहः इत्यमरः

कावारं क्ली शैवलं इति॥
त्रिकाण्डशेषः ॥
कावारी स्त्री तृणादिछत्रे तत्॥
पर्य्यायः जंगमकुटी १ भ्रमत्कुटी
२ इति त्रिकाण्डशेषः ॥
काहकः पुं कुक्कुटः चक्रवाकः
पीतमस्तकपक्षी इति विश्व॥
मेदिन्यौ॥
कावेरं क्ली कुंकुमे इतिजटाधरः
कावेरी स्त्री नदीविशेषः ॥
इत्यमरः वेश्या हरिद्रा ॥
इतिमेदिनी ॥
काव्यं क्ली ग्रन्थः इति मेदिनी
रसयुक्तवाक्यं यथा वाक्यं ॥
रसात्मकं काव्यं दोषास्तस्या॥
ऽपकर्षकाः उत्कर्षहेतवःप्रोक्ता
गुणालंकार रीतयः यद्योप्येतेके
लक्षणानिलिख्यन्ते तत्रादौवाक्य
लक्षणं यथा वाक्यंस्याद्योग्यता
कांक्षासत्तियुक्तः पदोच्चयः रस॥
लक्षणं यथाविभावेनानुभावेन
व्यक्तः संचारिणा तथा रसता॥
मेतिरत्यादिः स्थायी भावः
सचेतसां दोषलक्षणं यथा॥
रसापकर्षकादोषास्ते पुनःपञ्चधा
मताःपदे तदंशे वाक्यार्थे (संभ)
संभवन्ति रसेपियत् गुणलक्षण

यथा रसस्यांगित्व माप्तस्य धर्म्माः
शौर्य्यादयो यथा गुणा माधुर्य्य
मोजोऽथप्रसाद इति तेत्रिधा॥
अलंकार लक्षणं यथा शब्दार्थयो
रस्थिराये धर्म्माःशोभातिशायिनः
रसादीनुपकुर्वन्तोऽलंकारास्ते
ऽङ्गदादिवत् रीति लक्षणं यथा
पद संघटना रीति रंगसंस्था॥
विशेषवत् उपकर्त्री रसादीनां
सापुनः स्याच्चतुर्विधावैदर्भीचाथ
गौडीच पंचाली लाटिका तथा
इति साहित्यदर्पणे तत्॥
काव्यं त्रिविधं ध्वनि गुणीभूतव्यंग्य
चित्रभेदेन तत्राद्यस्य लक्षणं॥
इद मुत्तम मति शायिनि व्यंग्य
वाच्यात् ध्वनि र्बुधैः कथितः
द्वितीयस्य लक्षणं अतादृशि
गुणीभूतव्यंग्यं व्यंग्येत्वमध्यमे
तृतीयस्यलक्षणं शब्दचित्रंवाच्य
चित्र मव्यंगं त्ववरं स्मृतं इति॥
काव्यप्रकाशः एतेषांविवरणानि
तत्तच्छब्दे द्रष्टव्यानि ॥
काव्यः पुं शुक्राचार्यः इतिमेदिनी
काव्यखोरः पुं चंद्रेरणुः इति॥
त्रिकाण्डशेषः ॥
काव्या स्त्री पूतनाबुद्धिः इति॥
मेदिनी ॥

काशृ ङ द्युतौ इति॥
कविकल्पद्रुमः ॥
काश ऋ उ य उ द्युतौ इति।
कवि कल्पद्रुमः ॥
काशः पुं क्ली तृणभेदः केशया
इतिभाषा । इति मेदिनी
तत्पर्य्यायः इक्षुगंधा १ पोटगलः
२। इत्यमरः कासः ४ इति ॥
भरतः काशी ५ इति ॥
मुकुटादयः काशा ६ इति ॥
नयनानंदः वायसेक्षुः ७ कोडक्षः
८ अमरपुष्पकः ९ इतिरत्नमाले
काशकः १० वनहासकः ११ इति
शब्दरत्नावली इक्षुवाटिः १२ काकेक्षुः
१३ इक्षुरः १४ इक्षुकांडः १५॥ (शु)
शारदः १६ सितपुष्पकः १७ नादे(य)
१८ दर्भपत्रः १९ लेखनः २०
कोडकोडकः २१ कक्कलकारकः
२२ अस्य गुणाः शिशिरत्वं ॥
गौल्यत्वं रुचिकारित्वं पित्तदाह
नाशित्वं वृष्यबल शुक्रकारित्वं
श्रम शोष कफापहत्वंच इति
राजनिर्घण्टः केटकेइयने इति
शब्दरत्नावली॥
काशः पुं क्षुते इतिरत्नावली
रोगविशेषः काशा इतिभाषा
इत्यमरटीकायां भरतः ॥

काशकः पुं काशः केशया इति
भाषा इति शब्दरत्नावली ॥
काशमर्द्दः पुं कासमर्द्दवृक्षः
इत्यमरटीकायां रायमुकुटः॥
काश्मा स्त्री काशतृणं इत्यमर
टीकायां भरतः ॥ (ल्म)लिः
काशाल्मलिः स्त्री कूटशाल्म
इतिजटाधरः ॥
काशिः स्त्री काशी इत्युणादि
कोषः सूर्य्ये पुं इति ॥
जुमरव्याकरणे ॥
काशिका काशी इति ॥
शब्दरत्नावली ॥
काशिकाप्रियः पुं दिवोदासः
इतिशब्दरत्नावली ॥ (तत)
काशिराजः पुं वाराणसीराजः
पर्य्यायः धन्वंतरिः १ दिवोदासः २
सद्योद्भवः ४ इतित्रिकाण्डशेषः
काशी स्त्री शिवपुरी तत्पर्य्यायः
वाराणसी २ तीर्थराजी ३॥
तपः स्थली ४ इतिजटाधरः
काशिका ५ इतिशब्दरत्नावली
काशिः ६ इत्युणादि कोषः
अविमुक्ते ७ आनंदवने ८
आनंदकानने ९ अपुनर्भवभूमिः
१० रुद्रावासः ११ महाश्मशाने १२
तस्या उत्पत्ति र्यथा । तत्र॥

स्तदेकल्लतापि स्वैरं विहरता मया
स्वविग्रहात् स्वयं सृष्टा स्वशरीरा
नपायिनी प्रधानं प्रकृतिर्यत्
मायो गुणवती परा बुद्धितत्त्वस्य
जननी माहृ विकृति वर्जिता
युगपच्च त्वया शक्त्या शक्तेकाल
स्वरूपिणा मयायपुरुषेणैतत्।
क्षेत्रं चापि विनिर्मितं स्कन्द उवाच।
सा शक्तिः प्रकृतिः शाक्तास ॥
पुमानीश्वरः परः तावुभोच ॥
रममाणाभ्यां तस्मिन् क्षेत्रे घटोद्भव
परमानन्द रूपाभ्यां परमानन्द
रूपिणि पञ्चक्रोश परीमाणे
स्वपादतल निर्मिते मुनेप्रलय
कालेपि न तत्क्षेत्रं कदाचन ॥
विमुक्तं न शिवाभ्यां यद विमुक्तं
ततो विदुः नयदा भूमि वलयं
नयदापो समुद्भवः तदा विहर्त्तु
मीशेन क्षेत्रमेतत विनिर्मितं
इति काशीखण्डे काश्यमाहात्म्ये ॥
इत्यमरटीकायां भरतः ॥
काशी न त्रि काशरोगयुक्तः इति
राजवल्लभः ॥
काशीनाथः पुं शिवः इति
शब्दरत्नावली ॥
काशीराजः पुं दिवोदासः इति
शब्दरत्नावली ॥

काशीशं क्ली उपधातुविशेषः ॥
हिराकसी इति भाषा तत
द्विविधं धातुकाशीशं २ तत
हरिद्वर्णं लोहितंच पुष्यकाशीशं
२ तत शुक्लवर्णं हंसंच इति
रत्नमाला द्विदंत्यसकारोपिपाठः
काश्मरी स्त्री गंभारीवृक्षः ॥
इत्यमरः ॥
काश्मर्यः पुं गंभारी इत्यमरः ॥
क्लीबलिंगोप्ययं इति भरतः ॥
काश्मीरं क्ली पुष्करमूल इत्यमरः
टंकः कुंकुमं इति मेदिनी ॥
काश्मीरः पुं स्वनामख्यातदेशः
इति जटाधरः ॥
काश्मीरजं क्ली कुष्टं कुंकुमं।
इति मेदिनी पुष्करमूलं इति॥
विश्वः ॥ न
काश्मीरजन्म क्ली कुंकुम इत्यमरः
काश्मीरा स्त्री अतिविषा इति
मेदिनी कपिलद्राक्षा इति
राजनिर्घंटः ॥
काश्मीरी स्त्री गंभारी इति ॥
भावप्रकाशः ॥
काश्यं क्ली मद्यं इति ॥
राजनिर्घंटः ॥
काश्यपं क्ली मांसं इति ॥
हेमचंद्रः ॥

काश्यपः पुं कणाद मुनिः इति
त्रिकांडशेषः मृगभेदः इति
मेदिनी गोत्रविशेषः तत ॥
प्रवरान्तर्गत मुनिविशेषः इति
स्मृतिः कश्यपस्यापत्यमात्रेच
काश्यपिः पुं अरुणः इत्यमरः
गरुडः इति हेमचंद्रः ॥
काश्यपी स्त्री पृथिवी इत्यमरः ॥
काश्यपेयः पुं सूर्य्यः इति
शब्दरत्नावली ॥
काश्वरी स्त्री काश्मरी इति
भरतो द्विरूपकोषश्च ॥
काष्टं क्ली दारुकाठ इति भाषा
इत्यमरः ॥
काष्टकं क्ली अगुरु इति ॥
राजनिर्घंटः ॥
काष्टकदली स्त्री कदली भेदः
काष्टकला इति भाषा तत
पर्य्यायः सुकाष्टा २ वनकदली ३
काष्टिका ४ शिलारंभा ५ दारुकदली
६ फलाढ्या ७ वनमोचा ८ अश्म
कदली ९ अस्या गुणाः रुचिकारित्वं
रक्तपित्त नाशित्वं हिमत्वं ॥
गुरुत्वं मंदाग्निजनकत्वं दुर्जरत्वं
मधुरत्वं हिमत्वंच इति
राजनिर्घंटः ॥
काष्टकीटः पुं घुणः । इति

हेमचंद्रः ॥
काष्टकुट्टः पुं पक्षिविशेषः
काठठोकरा इतिभाषा तत ॥
पर्य्यायः शतच्छदः २ इति ॥
त्रिकांडशेषः ॥
काष्टकुद्दालः पुं नौकादे ॥
मैलापनयनार्थं काष्टघटित
कुद्दालः तत्पर्य्यायः अभ्रिः २ इत्य
मरः काष्टजंबूः स्त्री भूमिजंबूः इति
इति राजनिर्घंटः ॥
काष्टतक्ष न् पुं वर्णसंकरजाति
विशेषः छुतार इति भाषा ॥
तत्पर्य्यायः तक्षा २ वर्द्धकिः ३
त्वष्टा ४ रथकारः ५ इत्यमरः
काष्टतंतुः पुं काष्टकृमिः तत
पर्य्यायः कोषकारः २ इति
हारावली ॥
काष्टतक्षकः पुं काष्टतक्ष इति
शब्दरत्नावली ॥
काष्टदारुः पुं देवकाष्ठे इति
राजनिर्घंटः ॥
काष्टद्रुः पुं पलाशवृक्षः इति
राजनिर्घंटः ॥ (इति
काष्टधात्रीफलं क्ली आमलकं
राजनिर्घंटः ॥ (का
काष्टपाटला स्त्री सितपाटलि
इति राजनिर्घंटः ॥



काष्ठमटी स्त्री चिता इति त्रिकाण्डशेषः ॥
काष्ठमल्लः पुं शवयाने इति हारावली ॥
काष्ठलेखकः पुं घुणः इति हारावली ॥
काष्ठलोहिन् पुं लोहयुक्तमुद्गरः तत्पर्य्यायः वार्हिः २ इति त्रिकाण्डशेषः ॥
काष्ठवल्लिका स्त्री कटुका इति वैद्यके ॥
काष्ठशारिवा स्त्री शारिवाग्रन्थमूल इतिभाषा इति राजनिर्घण्टः ॥
काष्ठा स्त्री दिक् स्थितिः सीमा उत्कर्षः अष्टादशनिमेषात्मककालः इत्यमरः दारुहरिद्रा ॥ इति मेदिनी ॥
काष्ठाम्बुवाहिनी स्त्री काष्ठादिच्छिन्नायनौकाकृतिजलसेचनी सेंउत इति भाषा तत्पर्य्यायः द्रोणी २ इत्यमरः ॥
काष्ठीलः पुं राजार्कः इति ॥ राजनिर्घण्टः ॥
काष्ठीला स्त्री कदलीवृक्षः ॥ इत्यमरः ॥
कास ऋ ङ कुत्सिते शब्दे रोगहेतुककुत्सितशब्दे इत्यर्थः इति कविकल्पद्रुमः ॥
कासः पुं रोगविशेषः कासी इति भाषा तत्पर्य्यायः क्षवथुः २ इत्यमरः तस्य निदानं ॥ यथा धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च विमार्गगत्वाद्धि भोजनस्य वेगावरोधात् क्षवथोस्तथैव संप्राप्तिर्यथा ॥ प्राणो ह्युदानानुगतः प्रदुष्टः ॥ लक्षणं यथा संभिन्नकांस्य ॥ स्वनतुल्यघोषः निरेति वक्त्रात् सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः स च पञ्चविधो यथा पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः क्षयायोपेक्षिताः ॥ सर्वे बलिन स्युरुत्तरोत्तरं ॥ तेषां पूर्वरूपं यथा पूर्वरूपे ॥ भवेत्तेषां शूकपूर्णगलास्यता कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते वातिको यथा हृच्छंखमूर्द्धोदरपार्श्वशूली क्षामाननः क्षीणबलस्वरौजाः प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव पैत्तिको यथा उरो ॥ विदाहज्वरवक्त्रशोषैरभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः पित्तेन पीतानि वमेत् कटूनि कासेत्स पाण्डुः ॥

परिदह्यमानः श्लैष्मिको यथा ॥ प्रलिप्यमानेन मुखेन सीदन् ॥ शिरो रुजार्त्तः कफपूर्णदेहः ॥ अभक्तरुग्गौरवसादयुक्तः कासेद्भृशं सान्द्रकफः कफेन ॥ क्षतजो यथा अतिव्यवाय ॥ भाराध्वयुद्धाश्वगजविग्रहैः रूक्षस्योरः क्षते वायुर्गृहीत्वा कासमावहेत् स पूर्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितं कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ॥ दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥ पर्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः पारावत इवाकूजन् ॥ कासवेगात् क्षतोद्भवात् क्षयजो यथा विषमासात्म्यभोज्यादि ॥ व्यवायाद्वेगनिग्रहात् घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदं सगात्रशूलज्वरदाहमोहान् प्राणक्षयं चोपलभेत ॥ कासी शुष्यन् विनिष्ठीवति ॥ दुर्बलस्तु प्रक्षीणमांसो रुधिरं ॥ सपूयं तं सर्वलिङ्गं भृशं । दुश्चिकित्स्यं चिकित्सितज्ञाः ॥ क्षयजं वदन्ति इत्येषयः क्षयजः कासः क्षीणानां देहनाशनः ॥ साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः नवौ कदाचित् ॥ सिध्येतामपि पादगुणान्वितौ ॥ स्थविराणां जराकासः सर्वो याप्यः प्रकीर्त्तितः त्रीन् पूर्वान् साधयेत् । साध्यान् पथ्यैर्याप्यांस्तु यापयेत् इति माधवकरः काशतृणं ॥ इत्यमरटीकायां भरतः ॥ शोभाञ्जनः इति शब्दचन्द्रिका ॥
कासकन्दः पुं कासालुः इति राजनिर्घण्टः ॥
कासघ्नी स्त्री कण्टकारी इति शब्दचन्द्रिका ॥
कासजित् स्त्री भार्गी इति राजनिर्घण्टः ॥
कासनाशिनी स्त्री कर्कटशृङ्गी इति रत्नमाला ॥
कासेदीवटिका स्त्री विषधारविशेषः गोडाकासुन इति भाषा ॥ अस्या गुणाः रूक्षत्वं वातश्लेष्मरोगनाशित्वं रुच्याधिकारित्वं ॥ वायुमलानुलोमकारित्वं च इति राजवल्लभः ॥
कासमर्दः पुं वेशवारविशेषः कासेदी इति ख्यातः गुल्मभेदः



कालकासुंदा इति भाषा ॥
इत्यमरभरतौ शोषस्य पर्य्यायः ॥
अरिमर्द्दः २ कासारिः ३ ॥
कासमर्द्दकः ४ कालः ५ कनकः ६
जरणः ७ दीपनः ८ अस्य गुणाः
तिक्तत्वं उष्णत्वं मधुरत्वं । कफ
वाताजीर्णकासपित्तनाशित्वं ।
पाचकत्वं कंठशोधनत्वंच इति
राजनिर्घंटः ॥ अग्निदीपनत्वं ॥
स्वादुत्वंच इति राजवल्लभः ॥
अस्य पत्रगुणाः रुचिकारित्वं ।
शुक्रवर्द्धकत्वं कासविषरक्तकफ
वातपित्तनाशित्वं मधुरत्वं ॥
पाचनत्वं कंठशोधनत्वं लघुत्वं
विशेषः कासहरत्वं ग्राहकत्वंच
इतिराजनिर्घंटः ॥
कासमर्द्दनः पुं पटोलः । इति
राजनिर्घंटः ॥
कासरः पुं महिषः इत्यमरः ॥
कासारः पुं सपद्मोनिपद्मोवा ॥
महाजलाशयः सरोवरः ॥
इत्यमरः ॥
कासारिः पुं कासमर्द्दः इति ।
राजनिर्घंटः ॥
कासालुः पुं कोकणदेशप्रसिद्ध
आलुविशेषः तत्पर्य्यायः ॥
कासकंदः २ केदालुः ३ आलुकः
४ आलुः ५ विशालपत्रः पत्रालुः
७ अस्य गुणाः उष्णत्वं कटुत्वं ॥
वातश्लेष्मामयारोचकनाशित्वं
स्वादुत्वं पथ्यत्वं अग्निदीपनत्वंच
इतिराजनिर्घंटः ॥
कासीसं क्ली उपधातुविशेषः ॥
हिराकसी इतिभाषा तत्पर्य्यायः
धातुकासीसं २ खेचरं ३
धातुशेखरं ४ इति हेमचंद्रः ॥
केसरं ५ हंसलोमशं ६ शोधनं
७ पांशुकासीसं ८ शुभ्रं ९ ॥
अस्य गुणाः कषायत्वं शिशिरत्वं
विषकुष्ठक्रिमिखर्ज्जूनाशित्वं ॥
चक्षुर्हितत्वं कांतिवर्द्धनत्वंचइति
राजनिर्घंटः ॥
कास्तुः स्त्री धिकलवाकशक्तौ
इतिमेदिनी दीप्तिः भाषा ॥
इति शब्दरत्नावली रोगः वृद्धिः
इति हेमचंद्रः ॥
काहका स्त्री काहलावाद्यं इति
द्विरूपकोषः ॥
काहलं क्ली अव्यक्तवाक्यं इति
हेमचंद्रः ॥
काहलः पुं कुक्कुटः शब्दमात्रे
इतिमेदिनी विडालः इति ॥
शब्दमाला हुडुक्का तत
पर्य्यायः महानादः २ इति

हारावली ॥
काहलः त्रि शुष्कः भृशखलः
इति मेदिनी ॥
काहला स्त्री वाद्यभांड भेदः
अप्सरोविशेषः इति मेदिनी ॥
काहलापुष्पः पुं धुस्तूरः इति
शब्दमाला ॥
काहली स्त्री तरुणी युवती ।
इति मेदिनी ॥
काही स्त्री कुटजवृक्षः इति
राजनिर्घंटः ॥
कात्त इकोत्तेण आकोत्ताया ।
मितियावत इतिकविकल्पद्रुमः
कात्तः पुं कटाहः इति
हेमचंद्रः ॥
कात्ती स्त्री नवीकाश्रु इति
भाषा ॥ सौराष्ट्रमृत्तिका इति
मेदिनी ॥
कात्तीवः पुं शोभांजनवृक्षः ॥
इत्यमरः ॥
कात्तीवकः पुं शोभांजनः ॥
इतिशब्दरत्नावली ॥
किरति ज्ञाने इति
कविकल्पद्रुमः ॥
किं अ किं इति मेदिनी ॥
किं त्रि जिज्ञासार्थे किंइति ॥
भाषा सर्वनामकिंशब्दस्य क्लीव
लिंगेरूपमिदं इतिव्याकरणं ॥
अस्यार्थांतराणि किंशब्दे ॥
द्रष्टव्यानि ॥
किंसारुः पुं शस्यशूके शुंया ॥
इतिभाषा इत्यमरः वाणः ॥
कंकपत्री इतिमेदिनी ॥
किंशुकः पुं पलाशवृक्षः ॥
इत्यमरः नेदीवृक्षः इति ॥
राजनिर्घंटः ॥ षः
किंशुलुकः पुं पलाशवृक्षविशे
इति शब्दरत्नावली ॥
किकि पुं किकीदिविः इति ॥
शब्दमाला नारिकेलः इति
राजनिर्घंटः ॥
किकिदिविः पुं चाषपक्षी इति
शब्दमाला ॥
किकीदिवः पुं चाषपक्षी इति
शब्दमाला ॥
किकीदिविः पुं स्वर्णचातकः
सोनचडा इतिभाषा नीलकंठ ॥
इतिकश्चित ख्यातः इतिभरतः
तत्पर्य्यायः चाषः २ इत्यमरः ॥
चासः ३ किकीदिविः ४ इति ॥
भरतः किकी ५ दिविः ६ इति
स्वामी किकिः ७ किकिदिवः ८
किकिदेविः ९ इतिशब्दमाला ॥
किकीदिविः पुं चाषपक्षी इति



शब्दमाला ॥
किष्किः स्त्री लगुम्भृगालः ॥
खांकुशेयालि इति भाषा इति
हेमचन्द्रः ॥
किखिः पुं कपिः इति
भूरिप्रयोगः ॥
किंकरः त्रि दासः इत्यमरः ॥
किंकिणी स्त्री कण्ठाभरणविशे
घाघर इति भाषा तत्पर्य्यायः ॥
क्षुद्रघण्टिका २ इत्यमरः ॥
केकणी ३ इति भरतः ॥
किंकिणिका ४ किंकिणिः ५ इति
केचित् विकंकतवृक्षः इति
राजनिर्घण्टः ॥
किंकिरं क्ली गजकुम्भः इति
सारस्वतः ॥
किंकिरः पुं कोकिलः भ्रमरः ।
घोटकः कामदेवः इति
सारस्वतः ॥
किंकिरा स्त्री रक्तं इतिसारस्वतः
किंकिरातः पुं अशोकवृक्षः
कामदेवः शुकपक्षीकोकिलः
इतिसारस्वतः रक्ताम्लानः ॥
रोगा फांटी इति भाषा इति
जटाधरः पुष्पवृक्षविशेषः ।
पर्य्यायः हेमगौरः २ पीतकः ३
पीतभद्रकः ४ विप्रलोभी ५

पीताम्लानः ६ षट्पदानन्दः
अस्य गुणाः कषायत्वं उष्णत्वं
तिक्तत्वं अग्निदीपनत्वं कफ ॥
वायु कण्डु शोथ रक्त त्वग्दोष
नाशित्वंच इतिराजनिर्घण्टः ॥
किंकिरालः पुं वर्व्वूरवृक्षः इति
वैद्यके ॥
किंकिरी न पुं विकंकतवृक्षः
बुंइचि इतिभाषा इतिजटाधरः
केचव्य आरम्भः साकल्य ॥
इति मेदिनी अवान्तरे इति
जटाधरः ॥
किंचनव्य असाकल्यअकार्त्स्न्ये
इत्यमरः ॥
किंचनः पुं हस्तिकर्णपलाशः
इतिशब्दरत्नावली ॥
किंचित् व्य अल्पे तत्पर्य्यायः
ईषत् २ मनाक् ३ असाकल्य
यथा असाकल्येतु चिच्चन ॥
इत्यमरः ॥
किंकिलिकः पुं किंचुलकः
इत्यमरटीका ॥
किंचुलकः पुं कीटविशेषः
केंचो इति भाषा तत्पर्य्यायः
महीलता २ गण्डूपदः ३
इत्यमरः ॥
किंजल्कं क्ली किंजल्कं इति

राजनिर्घण्टः ॥
किंजलः पुं किंजल्कः इति
शब्दरत्नावली ॥
किंजल्कं क्ली नागकेशरपुष्पे
पद्माभ्यन्तरस्थ कोषाकारे ॥
करहाटक वेष्टने केसर इति
ख्याते तत्पर्य्यायः मकरन्दे ॥
२ केशरे ३ पद्मकेशरे ४ ॥
किंजल्के ५ पीतपरागे ६ तेगं ॥
७ चांपेयके ८ अस्य गुणाः ॥
मधुरत्वे रूक्षत्वे कटुत्वे ॥
आस्य व्रणापहत्वे शिशिरत्वे ॥
कफ्यत्वे पित्त तृष्णा दाह ॥ ॥
विनाशित्वंच इतिराजनिर्घण्टः ॥
किंजल्कः पुं केशरः इत्यमरः ॥
किटं गतौ भये भीषणे ॥
इति कविकल्पद्रुमः ॥
किटिः पुं शूकरः इत्यमरः ॥
किटिभिः पुं केशकीटः उकुण
इति भाषा इति हेमचन्द्रः ॥
किट्टं क्ली मलः इत्यमरः ॥
किट्टवर्ज्जितं क्ली रूप्यके इति
हेमचन्द्रः
किट्टालः पुं ताम्रकलसः ॥
लोहगूथके इति मेदिनी ॥
किणः पुं मांसग्रन्थिः ॥
निर्घर्षण जव्रणचिह्नं कडा इति

भाषा इति लिङ्गादि संग्रहे अमर ॥
भरतो घुणः इतिहारावली ॥
किणिः स्त्री अपामार्गः इति
शब्दरत्नावली ॥
किणिही स्त्री अपामार्गवृक्षः ॥
इत्यमरः ॥
किण्वं क्ली सुराबीजे ॥ पापः ॥
इतिमेदिनी ॥
किण्वः पुं क्ली सुराबीजं इति
वाचस्पति रित्यमर टीकायां ॥
भरतः ॥
कितं सशये इच्छायां वासे ॥
आरोग्ये इतिकविकल्पद्रुमः ॥
कित रलि मतौ इति
कविकल्पद्रुमः ॥
कितवः पुं अत्तदेवी धुस्तूरः
इत्यमरः मत्तः वेचकः इति
मेदिनी खलः इतिशब्दरत्नावली
रोचन गंध द्रव्यं इति ॥
जटाधरः राजनिर्घण्टश्च ॥
कितनुः पुं अष्टपादः माकडसा
इति भाषा इति त्रिकाण्डशेषः
किंतमाम् व्य एष्वेकतमे इति
शब्दरत्नावली इदमेषा मतिशयेन
किं इतिव्याकरणे ॥
किंतरां व्य एष्वेकतरे इति ॥
शब्दरत्नावली इदमनयोरतिशयेन

कि किम् शब्दोऽत्र कुत्सार्थः
अतिकुत्सितं रूपमित्यर्थ इति
मुग्धबोधटीकायां दुर्गादासः ॥
किंतु व किंपुनः प्रागुक्ति ॥
विरुद्धार्थे यथा भृत्या भावे ॥
भवति मरणे किंतु संभाविताना
इति प्राचीनाः ॥
भवति मरणे किंतु संभाविताना
इति प्राचीनाः ॥
किंतुघ्नः पुं ववाद्येकादश ॥
करणान्तर्गत शेष करणे इति
दीपिका तत्र ज्ञात फले ॥
मित्रामित्रे नैव किंचित् विशेषो
धर्मीधर्मे तुल्यता मानवस्य ॥
स्तोत्रे वादे सर्वदा प्रीतियुक्तः ॥
किंतुघ्नाख्ये यस्य नूनं जनिःस्यात्
इतिकोष्ठी प्रदीपः ॥
किंद्वी पुं अश्वः इतित्रिकाण्डशेषः
किन्नरः पुं स्त्री स्तनाख्यात ॥
देवयोनिः सतु अश्वमुखत्वात्
कुत्सितनरः स्वर्गगायकः तुंबुरु
प्रभृतिः तत्पर्य्यायः किंपुरुषः २ तु
रंगवदनः ३ मयुः ४ इत्यमरः अंरे
उपासकविशेषः इतिहेमचंद्रः किं
न्नरेशः पुं कुबेरः इत्यमरः ॥ किन्न
रेश्वरः पुं कुबेरः इतिहलायुधः
किन्नु व प्रश्नः वितर्कः स्याने
सादृश्ये करणे इति जटाधरः ॥
किं व कुत्सा वितर्कः ॥
निषेधः प्रश्नः इतिमेदिनी ॥
किं त्रि क्षेपः वितर्कः निंदा ॥
परिप्रश्नः इतिमेदिनी ॥
किमु व संभावना विमर्षः ॥
इति मेदिनी ॥
किमु व संभावना विमर्षः ॥
इति मेदिनी ॥
किमुत व प्रश्नः वितर्कः ॥
विकल्पः अतिशयः इति ॥
मेदिनी ॥
किंपचः त्रि किंपचानः इत्यमर
टीकायां रायमुकुटः ॥
किंपचानः त्रि कृपणः इत्यमर
कियाकः त्रि मातृशासितः ॥
इतिजटाधरः ॥
किंपाकः पुं महाकाललता
माकाल इति भाषा इति
रत्नमाला ॥
किंपुरुषः पुं किन्नरः इत्यमरः
लोकभेदः इति मेदिनी जंबुद्वीप
स्थवर्षप्रान्तर्गते हिमाचलहेमकू
टयोर्मध्यवर्तिवर्ष इति श्रीभागवते
कुत्सितपुरुषः इतिव्याप्तिलघोऽर्थः
किंपुरुषेश्वरः पुं कुबेरः इतिहेमचंद्रः
किंपुरुषे स्त्री किंपुरुषवर्षे ॥

इति त्रिकाण्डशेषः ॥
किंभरा स्त्री नलीनामगंधद्रव्ये
इतिशब्दचंद्रिका ॥
किंवदंतिः स्त्री किंवदंती इत्यमर
टीकायां भरतः ॥
किंवदन्ती स्त्री जनश्रुतिः ॥
सत्य मसत्यम्वा लोकवादः ॥
इत्यमरः ॥
किम्वा व विकल्पः अथवा तत्
पर्य्यायः उताहो २ यदिवा ३
यद्वा ४ नेति ५ इति
त्रिकाण्डशेषः ॥
कियत् त्रि कियत्परिमाणमस्य केता
इति भाषा इतिव्याकरणे ॥
कियदेतिका स्त्री उत्साहः ॥
उद्योगः इतिहेमचंद्रः ॥
कियाहः पुं रक्तवर्णघोटकः
इतिहेमचंद्रः ॥
किरः पुं शूकरः इत्यमरः ॥
किरकः पुं लेखकः इति ॥
त्रिकाण्डशेषः ॥
किरणः पुं सूर्य्यः इतिहेमचंद्रः
सूर्य्यरश्मि रितिभगीरथमाथवो
चंद्रसूर्य्ययो रश्मिरितिरायमुकुटः
रत्नरश्मे गभस्तिशब्दप्रयोगात्
सामान्यरश्मिः तथाच भट्टिः।
ऊर्द्धस्फुरद्रत्नगभस्तिभिर्य्येतिमंजरी
इत्यमर टीका सारसुंदरी ॥
तत्पर्य्यायः अस्रः २ मयूखः ३
अंशुः ४ गभस्तिः ५ घृणिः ६ घृष्णिः
७ भानुः ८ करः ९ मरीचिः १०
दीधितिः ११ इत्यमरः ॥
किरणमाली न् पुं सूर्य्यः इति
हारावली ॥
किरातः पुं म्लेच्छभेदः भूनिंबः
अल्पतनुः इति मेदिनी ॥
घोटकरक्षकः इतिसारस्वतः
किरातकः पुं भूनिंबः इति
राजनिर्घण्टः ॥
किराततिक्तः पुं वृक्षविशेषः
चिराता इति भाषा तत्पर्य्यायः
भूनिंबः २ अनार्य्यतिक्तः ३
इत्यमरः कैरातः ४ कांडतिक्तकः
५ इतिरत्नमाला अस्यगुणाः ॥
वायुवृद्धिकारित्वं । रूक्षत्वं ॥
कफ पित्त ज्वर नाशित्वंच ॥
इतिराजवल्लभः राजनिर्घण्टोक्त
गुणपर्य्यायौ भूनिंबशब्दे द्रष्टव्यौ
किराताशी न् पुं गरुडः इति ॥
शब्दरत्नावली ॥
किरातिः स्त्री गंगा इति ॥
जटाधरः ॥
किरातिनी स्त्री जटामांसी इति
शब्दरत्नावली ॥



किराती स्त्री दुर्गा गंगा ॥ कुट्टिनी इतिमेदिनी स्वर्गगंगा इतिशब्दमाला ॥
किरिः पुं शूकर इत्यमर ॥ टीकायां भरतः ॥
किरीटि क्ली हिंतालफले इति त्रिकांडशेषः ॥
किरीटः पुं क्ली मुकुटः इत्यमरः
किरीटी पुं अर्ज्जुनः इति त्रिकांडशेषः किरीटयुक्ते त्रि॥
किर्म्मी स्त्री पुं पलालः गृहं । स्वर्णपुत्तलिका इतिमेदिनी ॥ लोहपुत्तलिका इतिविश्वः ॥
किर्म्मीरः पुं नागरंगवृक्षः ॥ राक्षसविशेषः कर्बुरवर्णः इति मेदिनी तद्वर्णयुक्ते त्रि। इत्यमरः ॥
किर्म्मीरजित् पुं भीमसेनः ॥ इति त्रिकांडशेषः ॥
किर्म्मीरत्वक स्त्री नागरंगवृक्षः इति त्रिकांडशेषः ॥
किर्म्मीरभित् पुं भीमसेनः ॥ इतिभूरिप्रयोगः ॥
किर्म्मीरसूदनः पुं भीमसेनः ॥ इति हेमचंद्रः ॥
किल षा क्षेपेच्छ ॥ क्रीडे इति॥ कविकल्पद्रुमः ॥

किल क तुदौ प्रेरणे इत्यर्थः इतिकविकल्पद्रुमः ॥
किल व्य वार्त्ता संभाव्ये इत्यमरः निश्चयः इति तट्टीका सारसुंदरी अनुनयार्थे इति मेदिनी ॥
किलकिंचितं क्ली हावः शृंगार भावजा क्रिया इतिजटाधरः ॥ तस्य लक्षणं गर्व्वाभिलाषरुदित स्मितासूयाभयक्रुधांसंकरीकरणं यस्मादुच्यते किलकिंचितं ॥ इत्यलंकारकौस्तुभे ॥
किलकिला स्त्री हर्षध्वनिः ॥ किलकिलशब्द इतियावत् तत्पर्य्यायः हर्षस्वनः २ इति त्रिकांडशेषः ॥
किलाटः पुं क्षीरविकृतिः इति जटाधरः दधिकूर्च्चिका ॥ तक्रकूर्च्चिकयोः पिंडः अस्यगुणाः पीनत्वं स्निग्धत्वं गुरुत्वं गौल्यत्वं वृष्यत्वं पित्तापहत्वंच इति ॥ राजनिर्घंटः ॥
किलाटी स्त्री क्षीरविकृतिः तत्पर्य्यायः कूर्च्चिका २ इति॥ हेमचंद्रः ॥
किलाटी[२] पुं वंशः बांश इति भाषा इतिहारावली ॥

किलासं क्ली रोगविशेषः कुली इति भाषा तत्पर्य्यायः सिध्मा २ इत्यमरः सिध्मं ३ इति ॥ भरतः त्वक्पुष्पं ४ त्वक्पुष्पी। ५ इतिहेमचंद्रः ॥
किलासघ्नः पुं वृक्षविशेषः ॥ कांकरोल इति भाषा तत्। पर्य्यायः कर्कोटकः २ तिक्तपत्र ३ सुगंधकः ४ इतिहेमचंद्रः ॥
किलासी त्रि किलासरोगयुक्तः तत्पर्य्यायः सिध्मलः २ ॥ इत्यमरः ॥
किलिंचं क्ली सूक्ष्मदारु इति जटाधरः किलिंजमितिचपाठः
किलिंजः पुं सूक्ष्मदारु इति त्रिकांडशेषः ॥
किलिंजकः पुं काष्ठादिवज्रः येनकुसूले वेष्ट्यते कुसूलंच ॥ मराथि रिलिटीकोतंर तृणरचित ठाठी इति ख्यात इत्यन्ये ॥ इत्यमरटीकायां भरतः तत ॥ पर्य्यायः कटः इत्यमरः ॥
किलिसं क्ली देवदारु इति॥ शब्दरत्नावली राजनिर्घंटः ॥
किल्बिषं क्ली पापं अपराधः॥ इत्यमरः रोगः इतिमेदिनी ॥
किल्वी[२] पुं घोटकः इति॥ त्रिकांडशेषः ॥

किशलं क्ली पुं पल्लवः इति शब्दरत्नावली ॥
किशलयं क्ली पुं पल्लवः इति। शब्दरत्नावली ॥
कशोरः पुं अश्वशिशुः ॥ तैलपर्ण्योषधिः सूर्यः ॥(वयः) तरुणावस्थः सतु एकादशवर्षी पंचदशवर्षपर्य्यंत वयस्कः इति मेदिनी ॥ कैशोरावस्था युक्ते ॥ वाच्यलिंगोपि ॥
किष्क क ड॰ वधे इतिकविकल्प(द्रुमः)
किष्कंधः पुं तद्देशस्थपर्वत विशेषः तत्पर्वत गुहाच इति शब्दरत्नावली ॥
किष्किंधी स्त्री किष्किंधपर्वतगुहा इतिशब्दरत्नावली ॥
किष्किंध्यः पुं स्वनामख्यात ॥ पर्वतः इति शब्दरत्नावली ॥
किष्किंध्या स्त्री किष्किंध्यपर्वतगुहा इतिशब्दरत्नावली मातृपुरा ॥ वालिनामवानर राजधान्यासीत् श्रीरामचंद्र स्तं हत्वा सुग्रीवाय॥ तद्राजधानी दत्तवान् इति ॥ रामायणं ॥
किष्किंध्याधिपः पुं वालिनाम॥ वानरराजः इति जटाधरः ॥



किष्कुः पुं स्त्री वितस्तिः॥ हारावली॥
द्वादशाङ्गुलिपरिमाणे प्रकोष्ठः कीकिः पुं किकिः चाषपक्षी॥
कफोणिरथ मणिबंधपर्य्यंतःहस्तः इत्यमरटीका॥
इति मेदिनी॥ कुत्सिते त्रि॥ कीचकः पुं अनिलयोगात्॥
इति विश्वो हेमचंद्रश्च॥ शब्दायमानवंशः इत्यमरः॥
किष्कुपर्वा पुं इक्षुः वेणुः॥ संधकवंशः राक्षसविशेषः॥
पोटगलः नल इति भाषा इति इतिशब्दरत्नावली दैत्यभेदः॥
मेदिनी॥ हक्षविशेषः इति विश्वः नलः
किसले क्ली पुं किसलयं इति इतिराजनिर्घंटः केकयराजपुत्रः
शब्दरत्नावली भरतश्च॥ सचविराटराज शपालः इति॥
किसलयं क्ली पुं पल्लवः॥ महाभारते॥
इत्यमरः सत्नुनवपत्रादियुक्त॥ कीचकजित् पुं भीमसेनः इति
शाखाग्रपर्वणि नवपत्रस्तवक इति त्रिकांडशेषः॥
मधुः इतिभरतः॥ कीचकनिसूदनः पुं भीमसेनः
कीकटः पुं घोटकः देशभेदः॥ इतिहेमचंद्रः॥
इति विश्वः॥ कीचकभित् पुं भीमसेनः॥
कीकटः त्रि निर्धनः कृपणः इतिभूरिप्रयोगः॥
इति मेदिनी॥ कीटक वंधे वर्णे इति॥
कीकटाः पुं देशविशेषः॥ कविकल्पद्रुमः॥
बहुवचनांत शब्दोऽयं इति कीटः पुं कृमिजातिः इति
मेदिनी वेहार इतिख्यातः॥ शब्दरत्नावली॥
इतिकेचित्॥ कीटकः पुं मागधजातिः इति
कीकसं क्ली अस्थि इत्यमरः॥ धरणी कृमिजातिः निष्ठुरे त्रि॥
कीकसः पुं कृमिजातिः इति इतिमेदिनी॥
मेदिनी कर्कशे त्रि इति॥ कीटघ्नः पुं गंधकः इति॥
शब्दरत्नावली॥ राजनिर्घंटः॥
कीकसास्यः पुं पक्षी इति॥ कीटजा स्त्री लाक्षा इतिरत्नमाला

कीटपादिका स्त्री हंसपदीवृक्षः कीरेष्टः पुं आम्रवृक्षः अखोट॥
इति राजनिर्घंटः॥ वृक्षः जलमधूकवृक्षः इति
कीटमाता स्त्री हंसपदीवृक्षः॥ [illegible] राजनिर्घंटः॥
इतिभावप्रकाशः॥ कीर्णः त्रि आच्छन्नः विक्षिप्तः॥
कीटमारी स्त्री हंसपदीवृक्षः॥ हिंसितः इतिमेदिनी॥
इतिराज निर्घंटः॥ कीर्त्तनं क्ली कथने वचने इति
कीडरः पुं तंडुलीयशाकः इति जटाधरः॥
भावप्रकाशः॥ कीर्त्तना स्त्री यशः इति॥
कीदृक् श् त्रि किंप्रकारः। इति शब्दरत्नावली॥
व्याकरणे॥ कीर्त्तिः स्त्री सुख्यातिः तत्पर्यायः
कीदृशः त्रि किंप्रकारः इति॥ यशः २ समज्ञा ३ इत्यमरः॥
व्याकरणे॥ समाज्ञा ४ समाख्या ५ समज्या ६
कीनाशः पुं यमः इत्यमरः॥ इति तट्टीकायां भरतः॥
वानरविशेषः इतितट्टीकायां अभिख्या ७ श्लोकः ८ वर्णः ९
स्वामी॥ इति जटाधरः कीर्त्तना १० इति॥
कीनाशः त्रि कर्षकः क्षुद्रः॥ शब्दरत्नावली दानादिप्रभवा कीर्त्तिः
पशुघाती। इति मेदिनीकरः॥ शौर्यादिप्रभवं यशः इतिमाधवी
हेमचंद्रो॥ अतएवयशः कीर्त्योर्भेदस्यापि
कीरं क्ली मांसं इतिराजनिर्घंटः दर्शनात् यथा कीर्त्तिः प्रविभ्रष्टो
कीरः पुं शुकपक्षी इत्यमरः॥ जीवन्नपि न जीवति कस्यचित्।
कीरकः पुं वृक्षभेदः क्षपणकः प्रयोगः जीवतः ख्यातिर्यशः॥
शापणे इतिधरणी॥ मृतस्य ख्यातिः कीर्त्तिरितिकेचित्तन्न
कीरवर्णके क्ली स्थौणेयकनाम साधु कीर्त्ति ते नृपहन्तिकेति॥
सुगंधिद्रव्ये इतिराजनिर्घंटः॥ प्रयोगदर्शनात् इतिभरतः॥
कीराः पुं काश्मीरदेशः॥ प्रसादः इतिमेदिनी शब्दः॥
तद्देशस्यजनः बहुवचनांतोऽयं दीप्तिः मातृकाविशेषः इति
शब्दः इतिमेदिनीत्रिकांडशेषौ शब्दरत्नावली विस्तारः कर्दमः



इति विश्वः ॥
कीर्त्तितः त्रि कथितः ख्यातः॥
यथा कुष्मांडीन भूष्ण लक्षी ॥
कर्कारु रपि कीर्त्तिता इति।
भावप्रकाशः ॥
कीर्त्तिभाक पुं द्रोणाचार्य्यः इति
शब्दरत्नावली कीर्त्तियुक्ते त्रि॥
त
कीर्त्तिमान पुं वसुदेवज्येष्ठ पुत्रः
इति श्रीभागवतं कीर्त्ति ॥
विशिष्टे त्रि ॥
कीर्त्तिशेषः पुं मरणं इति॥
जटाधरः ॥
कील बंधे इतिकविकल्पद्रुमः
कीलः पुं स्त्री अग्निशिखा शंकुः
इत्यमरः स्तंभः लेशः ॥
कफोणिः इतिमेदिनी ॥
कफोणिनिर्घातः इतिविश्वः॥
कीलकः पुं कीलः खोंटा गोंज
खिल इत्यादि भाषा गवां गात्र॥
कंडूयनार्थः गोष्टेनिखात स्तंभः
इति सुभूतिः कंडूयनार्थ काष्टे॥
इतिकेचित बंधन खिदः इति॥
केचित यत्र बद्धा गोडुर्ह्यतेसः
इतिकेचित इतिभरतः ॥
तत्पर्य्यायः शिवकः २
इत्यमरः ॥

कीलसंस्पर्शः वृक्षविशेषः
गावइति भाषा इति ॥
शब्दचंद्रिका ॥
कीला स्त्री पुं कीलः इत्यमर
मेदिनी करौ ॥
कीलाले क्ली जले रक्ते ॥
इत्यमरः अमृते मधु इति॥
शब्दरत्नावली ॥
कीलालधिः पुं समुद्रः इति
शब्दरत्नावली ॥
कीलालपः पुं राक्षसः इति॥
शब्दरत्नावली ॥
कीलितः त्रि बद्धः इत्यमरः ॥
कीशः पुं वानरः इत्यमरः ॥
सूर्य्यः पक्षी शब्दरत्नावली ॥
नग्नेत्रि इतिमेदिनी ॥
कीशपर्णः पुं अपामार्गः इति
शब्दरत्नावली ॥
कीशपर्णी स्त्री अपामार्गः ॥
इत्यमरः ॥
कु ऊं शब्दे इतिकविकल्पद्रुमः
कुशि ऊं आर्त्तस्वरे इति॥
कविकल्पद्रुमः ॥
कुल शब्दे इतिकविकल्पद्रुमः
कुत्स पापे कुत्सा ईषदर्थः ॥
निवारणं इतिमेदिनी ॥
कुः स्त्री पृथिवी इत्यमरः ॥

कुक ऊं आदाने इति
कविकल्प द्रुमः ॥
कुकभे क्ली मद्ये इतिशब्दचंद्रिका
कुकरः त्रि कुत्सित हस्तयुक्तः ॥
रोगादिना कुंचित करः तत
पर्य्यायः कुणिः २ इत्यमरः ॥
कूणिः ३ कोणिः ४ इतितट्टीका
कुकीलः पुं पर्वतः इति
त्रिकांडशेषः ॥
(क
कुकुटः पुं सितावरः सुषाणिशृण
इति भाषा इति इतिराजनिर्घंटः
कुकुदः पुं कुकुदः सत्कार॥
पूर्वकालेकृत कन्या दानकर्त्ता
इत्यमरटीकायां रायमुकुटः ॥
कुकुंदरे क्ली नितंबस्थकूपकद्वये
पृष्ठवंशाद्योर्गर्त्तद्वयं इत्यमरः
कुकुंदरे इति द्विवचनांतोऽपि ॥
प्रयोगः ॥
कुकुंदरः पुं कुक्कुरद्रुः इति
भावप्रकाशः ॥
कुकुभा स्त्री रागिणीविशेषः इति
हलायुधः ॥
कुकुरः पुं कुक्कुरः क्षत्रियविशेषः
इत्युणादि कोषः सतु यदु
वंशीयांधक राजपुत्रः इति
श्रीभागवतं शेषियर्णी वृक्षः
इति त्रिकांड शेषः

कुकुराः पुं देशविशेषः ॥
तद्देशस्यालोकश्च तत्पर्य्यायः
यदवः २ दशार्हाः सात्वताः ४
बहुवचनांतोऽयं शब्दः इति
त्रिकांडशेषः ॥
कुकूटी पुं शाल्मलिवृक्षः इति
राजनिर्घंटः ॥
कुकूले क्ली शंकुभिःसंकीर्णे
श्वभ्रे इत्यमरः तन्त्रे इति॥
हारावली ॥
कुकूलः पुं तुषानलः इत्यमरः
कुकोले क्ली कोलिवृक्षः इति
शब्दचंद्रिका ॥
कुक्कुटः पुं स्त्री पक्षिविशेषः
कुकुडा इति भाषा तत्पर्य्यायः
कृकवाकुः २ ताम्रचूडः ३ चरण
युधः ४ इत्यमरः कालज्ञः ५
नियोद्धा ६ विष्किरः ७ नखरायुधः
८ अरण्य कुक्कुट मांस गुणाः
स्निग्धत्वं श्लेष्महरत्वं लघुत्वंच
इतिराजनिर्घंटः रूक्षत्वं ॥
कषायत्वं स्वादुत्वं शीतलत्वंच
इति राजवल्लभः ग्राम्यकुक्कुट
मांसगुणाः स्निग्धत्वं वातहरत्वं
दीपनत्वं गुरुत्वंच इति
राजनिर्घंटः बलकारित्वं उष्णत्वं
मधुरत्वंच इतिराजवल्लभः॥ ॥



निषादपुत्रः शूद्रपुत्रः तस्यात्मजा
कुक्कुभपत्नी इति मेदिनी ॥
वर्त्तिकणः इति हेम चन्द्रः
कुक्कुटकः पुं कुक्कुभपत्नी इति
शब्दरत्नावली स्वार्थकप्रत्यये ॥
कुक्कुटशब्दपर्य्यायत्र ॥
कुक्कुटव्रतं क्ली संतानार्थं ॥
स्त्रीकर्त्तव्य व्रते इतिशब्दमाला ॥
कुक्कुटीव्रतमपि पादः ललिता सप्तमी
व्रतमिदं यथा भाद्रे मासि ॥
सिते पक्षे सप्तम्यां नियमेनया ॥
स्नात्वा शिवं लेखयित्वा मण्डलेच
सहाम्बिकं पूजयेच्च तदा तस्या ॥
दुष्प्राप्यं नैव विद्यते इति
तिथ्यादितत्त्वे भविष्यपुराणे
कुक्कुटमण्डपः पुं मुक्तिमण्डपः ।
यथा ततो लोका स्तदारभ्य ॥
कथयिष्यन्ति सर्वतः मुक्तिमण्डप
नामैतदेष कुक्कुटमण्डपः । इति
काशीखण्डे ॥
कुक्कुटमस्तके क्ली चव्ये चोइ
इति भाषा इतिराजनिर्घण्टः
कुक्कुटशिखः पुं कुसुम्भवृक्षः इति
शब्दचन्द्रिका ॥ (इति
कुक्कुटाभः पुं कुक्कुटतुल्यवर्णव
सर्पविशेषः तत्पर्य्यायः ॥
कुक्कुटाहिः २ इतिहेमचन्द्रः

कुक्कुटाहिः पुं कुक्कुटाभसर्पः ॥
हेमचन्द्रः ॥
कुक्कुटिः स्त्री दम्भचर्य्या इति॥
हेमचन्द्रः ॥
कुक्कुटी स्त्री अनृतचर्य्या इति
मेदिनी ज्येष्ठी छिकछिकि॥
इतिभाषा इतिशब्दरत्नावली ॥
शाल्मलीवृक्षः इतिजटाधरः ॥
कुक्कुभः पुं पक्षिविशेषः ॥
पान कुका इतिभाषा इत्यमरः ॥
कुक्कुरं क्ली ग्रन्थिपर्णं गाठिवाला
इतिभाषा इत्यमरः ॥
कुक्कुरः पुं जन्तुविशेषः कुकुर
इति भाषा तत्पर्य्यायः ॥
कौलेयकः २ सारमेयः ३ ॥
मृगदंशकः ४ शुनकः ५ भषकः
श्वा ७ इत्यमरः कुर्कुरः ८ शुनः ९
शुनिः १० श्वानः ११ इति तट्टीका
भषणः १२ भल्लूकः १३ वक्रलाङ्गूल
१४ रुतकारिः १५ रात्रिजागरः १६
कालेयकः १७ ग्राम्यमृगः १८ मृगारिः
१९ शूरः २० शयालुः २१ इति
राजनिर्घण्टः तस्यगुणाः वह्वाशी
स्वल्पसंतुष्टः सुनिद्रः शीघ्रचेतनः
प्रभुभक्तश्च शूरश्च षडेते च शुनो
गुणाः इतिचाणक्ये ॥
कुक्कुरद्रुः पुं वृक्षविशेषः ॥

कुकुरशोंका इति भाषा तत्
पर्य्यायः ताम्रचूडः २ सूक्ष्मपत्रः
३ मृदुच्छदः ४ अस्यगुणाः कटुत्वं
तिक्तत्वं ज्वर रक्त कफनाशित्वञ्च
इतिमदनविनोदः तन्मूलं ॥
माङ्गे निक्षिप्ते वदने मुखशोषहृत्
इति भावप्रकाशः ॥
कुक्कुरी स्त्री कुक्कुरस्त्री कुत्ती ॥
इति भाषा तत्पर्य्यायः सरमा
२ श्वानी ३ सारमेयी ४ शुनी ५
भषी ६ इति शब्दरत्नावली ॥
कुक्कुवाक पुं सारङ्गमृगः इति
राजनिर्घण्टः ॥
कुङ्कुमं क्ली स्वनामख्यातगन्धद्रव्ये
कुंकुं इति केशर इतिच भाषा
तत्पर्य्यायः काश्मीरजन्म २
अग्निशिखं ३ वरं ४ वाह्लीकं ५ पीतनं
६ रक्तं ७ संकोचं ८ पिशुनं ९ ॥
धीरं १० लोहितचन्दनं ११ ॥
इत्यमरः चारु १२ वाह्लिकं १३
वरवाह्लीकं १४ रक्तचन्दनं १५
इतितट्टीका अग्निशेखरं १६
असृक् १७ काश्मीरजं १८ पीतकं
१९ काश्मीरं २० रुचिरं २१ शठं ॥
२२ शोणितं २३ घुसृणं २४ ॥
वरेण्यं २५ अरुणं २६ कालेयकं
२७ जागुडं २८ कान्तं २९ ॥

वह्निशिखं ३० केशरवरं ३१
गौरं ३२ केसरं ३३ अस्यगुणाः
सुरभित्वं तिक्तत्वं कटुत्वं ॥
उष्णत्वं कास वात कफ कण्ठ रोग
मूर्द्धशूल विषदोष नाशित्वं ॥
रोचनत्वं तनुकान्तिकरत्वञ्च इति
राजनिर्घण्टः रेचकत्वं विवर्णता
कण्डू नाशित्वञ्च इतिवल्लभः ॥
स्निग्धत्वं शिरोरुग्व्रण जन्तु वमि
व्यङ्ग दोषत्रयापहत्वं वल्यत्वञ्च
इतिभावप्रकाशः त्वग्दोषनाशित्वं
इतिरत्नावली तत्वचन्द्रिका च ॥
देशभेदे तत्त्रि विधं यथा ॥
काश्मीरदेशजे क्षेत्रे कुङ्कुमं ॥
यद्भवेद्धि तत् सूक्ष्म केशर ॥
मारक्तं पद्मगन्धि तदुत्तमं १ ॥
वाह्लीक देशसञ्जातं कुङ्कुमं ॥
पाण्डुरं भवेत् केतकी ॥
गन्धयुक्तं तन्मध्यमं सूक्ष्म केशरं
२ कुङ्कुमं पारसीकेयं मधु॥
गन्धि तदीरितं ईषत् पाण्डुरवर्णं
तदधमं स्थूल केशरं ३ इति ॥
भावप्रकाशः ॥
कुङ्गनी स्त्री महाज्योतिष्मती ॥
इतिराजनिर्घण्टः ॥
कुचज रोधे संपर्के ॥
कौटिल्ये लेखने इति ॥



कविकल्पद्रुमः ॥
कुच शि संकोचे इति।
कविकल्पद्रुमः ॥
कुच ॰ तारशब्दे उच्चैःशब्द इति
यावत् इतिकविकल्पद्रुमः॥
कुचः पुं स्तनः इत्यमरः ॥
कुचंडिका मूर्वालता इति
शब्दचंद्रिका ॥
कुचंदने क्ली रक्तचंदने इत्यमरः
पत्रांगे वकंकाठ इति भाषा॥
वृक्षभेदः इति मेदिनी ॥
कुंकुमे इति शब्दचंद्रिका ॥
कुचफलः पु दाडिमवृक्षः इति
राजनिर्घंटः ॥
कुचरः त्रि कुवादः परदोष ॥
कथनशीलः इत्यमरः ॥
कुचाग्रे क्ली स्तनाग्रभागः॥
मोडवोढा इति भाषा तत्
पर्यायः चूचुके २ इत्यमरः॥
चुचुकं ३ इति तट्टीका ॥
कुचांगेरी स्त्री चुक्रिका चुकापाले
इतिभाषा इतिरत्नमाला ॥
कुचिकः पुं स्त्री मत्स्यविशेषः
कुंचिया इति भाषा इति
त्रिकांडशेषः ॥
कुचेलः त्रि कुवासाः परिहित
कुत्सितवस्त्रोजनः इति मेदिनी।

कुचैला स्त्री विद्धकर्णी इति
मेदिनी ॥
कुचेली स्त्री अम्बष्ठ आकनादि
इतिभाषा इतिरत्नमाला ॥
कुक्कं क्ली कुमुदे इतिशब्दचंद्रिका
कुज उत्लेयो इतिकविकल्पद्रुमः
कुजः पुं मंगलग्रहः नरकासुरः
वृक्षः इतिहेमचंद्रः ॥
कुजंभलः त्रि चौरविशेषः॥
सिंदेलचोर इति भाषा इति
हारावली ॥
कुजंभिलः त्रि कुजंभलः इति
शब्दरत्नावली ॥
कुज्जा स्त्री कात्यायनीदेवी इति
मेदिनी ॥
कुज्जिशः पुं मत्स्यभेदः ॥
अस्यगुणाः मधुरत्वं रूक्षत्वं॥
कषायत्वं दीपनत्वं बलकारित्वं
स्निग्धत्वं गुरुत्वं ग्राहित्वं ॥
वाते हितत्वं रोचनत्वंच इति॥
राजनिर्घंटः ॥
कुञ्कुठिः स्त्री कुञ्कुठिकाकुश्रा
कुश्रासा इतिच भाषातत्पर्यायः
धूममहिषी २ रतोध्री ३ कुहेलिका
४ धूमिका ५ नभोरेणुः ६ इति
त्रिकांडशेषः॥ अस्यगुणाः ॥
रूक्षत्वं तमोगुणप्रायत्वं कफ।

पित्तकारित्वंच इतिराजवल्लभः॥
कुञ्कुठि स्त्री कुञ्कुठिः इति
शब्दरत्नावली ॥
कुञ्कुठी स्त्री कुञ्कुठिः इति
शब्दरत्नावली ॥
कुंचने क्ली नेत्ररोगविशेषः॥
तस्यलक्षणंयथा वातोपावर्त्म
संकोचं जनयेति यदा मलाः
तदाद्रष्टुं नशक्नोति कुंचनंनाम
तद्विदुः इतिमाधवकरः ॥
कुंचफला स्त्री कूष्मांडी इति।
राजनिर्घंटः ॥
कुंचिः पुं अष्टमुष्टिपरिमाणंयथा
अष्टमुष्टिर्भवेत् कुंचिःकुंचयो ॥
ऽष्टौच पुष्कलं इति स्मृतिः॥
कुंचिका स्त्री गुंजा कुंच इति
भाषा वंशशाखा कंचि इति।
भाषा इति शब्दचंद्रिका ॥
कृष्णजीरकः इति जटाधरः ॥
कूंचिका कुंजिकाचि इतिचभाषा
इतिहेमचंद्रः ॥
राजनिर्घंटः ॥ मत्स्यभेदः ॥
कुंचे इति भाषा यथा ॥
कुंचिकयैनं विस्माययतिभाययति
इति मुग्धबोधे ॥
कुंचितं त्रि वक्रं इत्यमरः ॥
तगरपुष्पे क्ली इतिराजनिर्घंटः

कुञ्कः पुं क्ली पर्वतादेर्लता ॥
पल्लवादिभिः समंतादाच्छादित
गर्भो गह्वरादि देशः इति ॥
मधुप्रभृतयः उपरि चतुर्दिक्षुच
लतादिभि राच्छादितस्यस्थानस्य
मध्ये शून्यदेशः इत्यन्ये इति।
भरतः तत्पर्य्यायः निकुञ्कः २
इत्यमरः हनुः हस्तिदंतः इति
मेदिनी ॥
कुञ्करः पुं हस्ती उत्तरपदे॥
श्रेष्ठवाचकः यथा पुरुषकुञ्कर
इत्यादि इत्यमरः केशः ॥
इतिमेदिनी देशभेदः इति॥
शब्दरत्नावली ॥
कुञ्करपिप्पली स्त्री गजपिप्पली
इतिशब्दमाला ॥
कुञ्करक्षारमूले क्ली मूलके इति
राजनिर्घंटः ॥
कुञ्करा स्त्री धातकी धाइफलइति
भाषापाटलावृक्षः इतिमेदिनी
हस्तिनी इतिशब्दचंद्रिका ॥
कुञ्करारातिः पुं शरभः इति॥
हेमचंद्रः ॥
कुञ्करालुके क्ली आलुकविशेषः
हस्त्यालु इति शब्दचंद्रिका ॥
कुञ्कराशनः पुं अश्वत्थवृक्षः।
इत्यमरः ॥



कुञ्जरी स्त्री हस्तिनी । इति शब्दचंद्रिका ॥
कुञ्जलं क्ली कांञ्जिके इत्यमरः
कुञ्जवल्लरी स्त्री निकुंजिकाम्लावृक्षः इतिराजनिर्घंटः ॥
कुञ्जिका स्त्री कृष्णजीरकः ॥ कुंचिका इति क्वचित् पाठः इति जटाधरः निकुञ्जिकाम्लावृक्षः इतिराजनिर्घंटः ॥
कुठ श्रि कौटिल्ये इति ॥ कविकल्पद्रुमः ॥
कुठ ३ क प्रतापने इति कविकल्पद्रुमः ॥
कुठ ईं वैकल्ये इति कविकल्पद्रुमः ॥
कुठः पुं क्ली कलशः इत्यमरः
कुठः पुं कोठः गाड इत्यादिभाषा इति मेदिनी शिलाकुट्टे ॥ पातरश्रोगाहातुडी इति भाषा वृक्षः इति हेमचंद्रः पर्वतः। इतिहारावली ॥
कुठकः पुं गृहाच्छादने वाल॥ इतिख्यातः इति शब्दमाला ॥
कुठंगकः पुं वृक्षलतागहने ॥ छदिःचाल इति भाषा ॥ गृहभेदः कुंडे इति भाषा इत्यमरटीकायां मुकुटादयः।
कुठचः पुं कुठजवृक्षः इति शब्दचंद्रिका ॥
कुठजः पुं वृक्षविशेषः ॥ यस्यफलं इंद्रयवः कुडची इति भाषातत्पर्य्यायः शक्रः २ ॥ वत्सकः ३ गिरिमल्लिका ४ ॥ इत्यमरः कौठजः ५ इति ॥ तट्टीकावृत्तकः ६ शक्रपर्य्यायः ७ इतिरत्नमाला कूठजः ८ काही ९ कालिंगः १० मल्लिका पुष्पः ११ शक्रप्यः १२ शक्रपादपः १३ वरतिक्तः १४ यवफलः १५ सेशाहो १६ पांडुरद्रुमः १७ शक्रेषणः १८ महागंधः १९ अस्यगुणाः कटुत्वे तिक्तत्वे उष्णत्वे कषायत्वे ॥ अतिसार नाशित्वेच अस्तितस्य तस्य गुणाः रक्तपित्त त्वग्दोषार्शो नाशित्वं इतिराजनिर्घंटः ॥ कफनाशकत्वे इतिराजवल्लभः अगस्त्य मुनिः द्रोणाचार्यः इति मेदिनी ॥
कुठञ्जटं क्ली कैवर्त्तीमुस्तके इत्यमरः केउटियामुता इति ख्यातंकेषुत इतिनीचोक्तिः ॥ इति तट्टीका ॥
कुठञ्जटः पुं श्योनाकवृक्षः। इत्यमरः ॥

कुठपः पुं मुनिः निष्कुठः ॥ गृहसमीपोपवने मानभेदः ॥ तत कुडव परिमाणे इति ॥ हेमचंद्रः कमले क्ली इति। राजनिर्घंटः ॥
कुठरं क्ली कुठरःमेथानदंड ॥ वेथनस्तंभः इत्यमरटीकायां ॥ नीलकंठः ॥
कुठरुः पुं वस्त्रगृहे कानात इतिभाषा इत्युणादि कोषः॥
कुठरुणा स्त्री त्रिवृता तेउडी॥ इतिभाषा इति रत्नमाला ॥
कुठले क्ली पटले चाल इति भाषा इतिहारावली ॥
कुटहारिका स्त्री दासी इति हेमचंद्रः ॥
कुठिः स्त्री गृहे इत्यमरटीकायां भरतः ॥
कुठिः पुं वृक्षः इतिशब्दरत्नावली शरीरे इति सिद्धांतकौमुद्या ॥ मुणादिवृत्तिः ॥
कुटिचरः पुं जलमृकरः शुशुक इतिभाषा इतिशब्दरत्नावली
कुटिते त्रि कुटिले इत्युणादि कोषः ॥
कुटिरं क्ली कुटीरं लघुकुटी॥ इत्यमरटीकायां भरतः ॥
कुठिले त्रि अनृजु बांका इति भाषा तत्पर्य्यायः अराले २ वृजिने ३ जिह्मे ४ ऊर्मिमत् ५ कुंचिते ६ नते ७ आविद्धे ८ भुग्ने ९ वेल्लिते १० वक्रे ११ ॥ इत्यमरः भंगुरे १२ इति ॥ हेमचंद्रः तगरपुष्पे क्ली इति॥ राजनिर्घंटः ॥
कुठिला स्त्री नदीविशेषः इति मेदिनी सरस्वतीनदी स्पृक्कानाम गंधद्रव्ये इतिराजनिर्घंटः ॥
कुटी स्त्री पुं कुटः गृहे इत्यमरः
कुटी स्त्री कुंभदासी कुटिनी इति भाषा मुरा नाम गंध द्रव्ये ॥ चित्र गुच्छः इतिमेदिनी ॥
कुटीचकः पुं पुत्रान्नजीवीतत् पर्य्यायः पुत्रान्नादः २ इति ॥ त्रिकांडशेषः ॥
कुटीचरकः पुं यतिविशेषः॥ इति यति धर्म्मसंगृहः ॥
कुटीरः पुं क्षुद्रगृहे कुंडे इति भाषातत्पर्य्यायः स्वल्पवेश्म ॥ २ इतिजटाधरः ॥
कुठेगकः पुं वृक्षलतागहने पिटः झोल इति भाषा छदिः चाल इतिभाषा इत्यमरटीकायां भरतः वृक्षलता गृहभेदः ॥



कुडे इति भाषा इत्यमरटीका॥ सारसुन्दरी॥
कुटुम्ब क ङ॰ धृत्यां इति॥ कविकल्पद्रुमः॥
कुटुम्बः पुं क्ली नाम ज्ञातिः॥ बान्धवः सन्ततिः इति शब्दरत्नावली गोत्रवर्गः इत्यमरमाला॥
कुटुम्बव्यापृतः त्रि कुटुम्बपोषणासक्तः तत्पर्य्यायः अभ्यागारिकः २ उपाधिः ३ इत्यमरः॥
कुटुम्बिनी स्त्री कुटुम्बविशिष्टा पतिपुत्रदुहित्रादिमती प्रतिष्ठिता स्त्री तत्पर्य्यायः पुरन्ध्री २॥ इत्यमरः पुरन्ध्रिः ३ इति भरतः क्षुद्रक्षुपविशेषः॥ तत्पर्य्यायः पयस्या २ क्षीरिणी॥ ३ जलकामुका ४ वक्रशल्या ५ दुरापर्षी ६ क्रूरकर्म्मा ७ सिंहिका ८ प्रीता ९ प्रहरकुटुम्बी १० प्रीतला ११ जलरुहा १२ अस्या गुणाः॥ मधुरत्वं ग्राहित्वं कफपित्तव्रणरक्तदोषकण्डूनाशित्वं रसायनत्वञ्च इति राजनिर्घण्टः॥
कुटुम्बी पुं गार्हस्थ्याश्रमविशिष्टः॥ तत्पर्य्यायः गृही २ गृहमेधी ३ गृहस्थः ४ इति जटाधरः॥
कुटुम्बी त्रि कृषकः इति शब्दचन्द्रिका कुटुम्बविशिष्टश्च॥

कुटुम्बौकः क्ली कुटुम्बवासस्थाने इति जटाधरः॥
कुट्ट क कुत्सायां छिदि॥ इति कविकल्पद्रुमः॥
कुट्ट ङ॰ क प्रतापने इति॥ कविकल्पद्रुमः॥
कुट्टकः पुं अङ्कविशेषः तस्य लक्षणम् यथा भाज्यो हारः क्षेपकश्चापवर्त्यः केनाप्यादौ संभवेत् कुट्टकार्थे येन छिन्नौ भाज्यहारौ न तेन क्षेपश्चेत् तद्दुष्टमुद्दिष्टमेव उदाहरणं यथा एकविंशति युतं शतद्वयं यद्गुणं गणक पञ्चषष्टियुक् पञ्चवर्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तं इति लीलावती॥
कुट्टनं क्ली छेदनं कोटा॥ इति भाषा कुत्सनं प्रतापनं॥ इति कुट्टधातोर्भावे ल्युट् प्रत्ययः॥
कुट्टनी स्त्री पुरुषेण सह परस्त्री॥ योगकर्त्री कुटनी इति भाषा॥ तत्पर्य्यायः शम्भली २ इत्यमरः कुट्टनी ३ सम्भली ४ इति तट्टीका मायवी ५ रङ्गमाता ६ अर्जुनी ७ इति जटाधरः कुम्भदासी ८॥

गणेरुका ९ इति शब्दरत्नावली
कुट्टमितं क्ली स्त्रीणां दशाया॥ शृङ्गारचेष्टान्तर्गत चेष्टाविशेषः स्त्रीणां स्वाभाविकदशालङ्कारान्तर्गतमिदं इति हेमचन्द्रः॥ तस्य लक्षणं यथा केशस्तनाधरादीनां ग्रहे हर्षेऽपि संभ्रमात् प्राहुः कुट्टमितं नाम शिरःकरविधूननं इति साहित्यदर्पणे
कुट्टारं क्ली केवले रतिः॥ इति मेदिनी केवले इति॥ विश्वः॥
कुट्टारः पुं पर्वतः इति त्रिकाण्डशेषः॥
कुट्टिमः पुं क्ली मणिभूः इत्यमरटीकायां भरतः सुबाचदित॥ भूतले इति सुभूतिः कुटीरः॥ इति मथुरानाथः दाडिमवृक्षः। इति राजनिर्घण्टः॥
कुट्टिहारिका स्त्री दासी इति। हलायुधः॥
कुट्टीरः पुं पर्वतः इति। हारावली॥
कुड्मलं क्ली नरकभेदः इति मेदिनी यत्र रज्जुभिः पीडनं। इति मनुः॥
कुड्मलः पुं क्ली विकासोन्मुख प्रौढकलिका ईषद्विकसितकलिका तत्पर्य्यायः मुकुलः २ इत्यमरः कोषः ३ इति जटाधरः॥
कुठ छिदि सौत्रधात्वर्थे॥ इति कविकल्पद्रुमः॥
कुठ इ खोडने वैकल्ये॥ आलस्ये इति कविकल्पद्रुमः
कुठः पुं वृक्षः इत्यमरः॥
कुठरः पुं मन्थानदण्डबन्धनार्थस्तम्भः तत्पर्य्यायः दण्डविष्कम्भः २। इत्यमरः॥
कुठाकुः पुं पक्षिविशेषः॥ काठठोकरा इति भाषा॥ इत्युणादिकोषः॥
कुठाठकः पुं स्त्री कुठारः इति जटाधरः॥
कुठारः पुं स्त्री अस्त्रविशेषः कुडाल॥ इति भाषा तत्पर्य्यायः स्वधितिः २ परशुः ३ परश्वधः ४ इत्यमरः कुठारी ५ पर्शुः ६ परस्वधः ७ पर्य्यायः ८ इति तट्टीका॥
कुठारुः पुं वृक्षः इति॥ शब्दरत्नावली॥
कुठारुः पुं वृक्षः वानरः इति मेदिनी शस्त्रकारः इति॥ शब्दरत्नावली॥
कुठिः पुं पर्वतः वृक्षः॥



इत्युणादि कोषः ॥
कुठिकः कुष्ट कुड इति॥
भाषा इतिहारावली ॥
कुठेरः पुं अग्निः इतिशब्दमाला
तुलसी इत्युणादि कोषः ॥
अर्जकः वर्वरी इतिख्यातःइति
राजनिर्घंटः ॥
कुठेरकः पुं पर्णासः तुलसी
इतिख्यातः इत्यमरः श्वेतच्छदः
श्वेततुलसी वावुइतुलसी ॥
इतिचख्यातः इतिशब्दचंद्रिका
नदीहत्तः इतिराजनिर्घंटः
इतिशब्दरत्नावली ॥
कुठेरुः पुं वामरवातः ॥
वामरेरवातास इतिभाषा तत्
पर्य्यायः मेघरुः २। इति॥
त्रिकांडशेषः ॥
कुडइ वैकल्ये इतिकविकल्पद्रुमः
कुडइ इ. उ. दाहे इति
कविकल्प द्रुमः ॥
कुडइ क रेत्ते इति।
कविकल्पद्रुमः ॥
कुड शि बाल्ये अदने इति॥
कविकल्पद्रुमः ॥
कुडपः पुं कुडवपरिमाणे ॥
इत्यमरटीकाया स्वामी ॥

कुडवः पुं परिमाणविशेषः।
सतप्रस्थचतुर्थांशः इतिलीलावती
वैद्यकमते द्विप्रसृत परिमाणे
द्वात्रिंशत् तोलक मितियावत्
तत्पर्य्यायः अंजलिः २ अष्टमानं
३ शरावाई इतिपरि भाषा ॥
कुडिः पुं शरीरे इति सिद्धांत॥
कौमुद्यामुणादिवृत्तिः ॥
कुडिशः पुं मत्स्यविशेषः ॥
कुडचिमाच इतिभाषा अस्यगुणाः
मधुरत्वं रुच्यत्वं कषायत्वं ॥
अग्निदीपनत्वं लघुत्वं स्निग्धत्वं
बलकोष्टवेद्य कारित्वंच इति
राजवल्लभः ॥
कुडुंची स्त्री क्षुद्रकारवल्लीइति
राजनिर्घंटः ॥
कुड्मल पुं कुड्मलः इत्यरः ॥
टीकासिद्धांतकौमुदीच ॥
कुड्य क्ली भित्तिः भितदेयाल
इत्यादि भाषा इत्यमरः ॥
विलेपने इति मेदिनी ॥
कौतूहले इतिशब्दरत्नावली
कुड्यकं क्ली कुड्य भित्तिः॥
इति शब्दरत्नावली ॥
कुड्यछेदीन पुं चौरविशेषः॥
सिंधालचोर इति भाषा इति

शब्दरत्नावली ॥
कुड्यछेद्यं क्ली खानिकंदेयालेर
गर्त इति भाषा इति
त्रिकांडशेषः ॥
कुड्यमत्सी स्त्री गृहगोधिका॥
इति शब्दरत्नावली ॥
कुड्यमत्स्यः पुं गृहगोधिका।
इतिहेमचंद्रः ॥
कुण तक आभाःष मंत्रे ॥
इतिकविकल्पद्रुमः ॥
कुणश उपकरणे शब्दे इति
कविकल्पद्रुमः ॥
कुणंजरः पुं हस्तविशेषः ॥
वनवेतुआ इतिभाषातत्पर्य्यायः
कुणंजरा २ कुणंजः ३ अरण्यवा
स्तूकः ४ अस्यगुणाः मधुरत्वंरुचि
कारित्वं दीपनत्वं पाचनत्वं॥
हितत्वंच एतच्छाक गुणाः
त्रिदोषनाशित्वं मधुरत्वं रुचि
कारित्वं दीपनत्वं ईषत्कषायत्वं
सेयाहितं पित्तश्लेष्महरत्वं।
लघुत्वंच इतिराजनिर्घंटः॥
कुणपः पुं शवे मृतशरीरे॥
इत्यमरः इत्यर्थेनपुंसकलिंगो
पीतिनयनानंदः पूति गंधिः
इतिमेदिनी अस्त्रविशेषः॥
वडश इति भाषा इत्यमर ॥

टीकायां रायमुकुटः पूतिगंधौ
त्रिलिंगोऽपियथा कुणपं ॥
मल्लंगाभे सगंधे कथितेवद्रू
इतिमाधवकरः ॥
कुणपी स्त्री विहंगशारिका ॥
गुयेशालिक इति भाषा इति
मेदिनी ॥
कुणालः पुं देशभेदः इति
सिद्धांतकौमुद्या मुणादिवृत्तिः
कुणिः पुं तुन्नवृक्षः तुंदइति
भाषा इत्यमरमेदिनी कोषौ ॥
कुणिः त्रि कुकरःकाया इति
भाषा इति मेदिनी ॥
कुणिंदः पुं शब्दः इतिसिद्धांत
कौमुद्या मुणादिवृत्तिः ॥
कुंटकः त्रि स्थूलः मोटा इति
भाषा इति शब्दमाला ॥ एंठः
कुंठः त्रि क्रियासुमंदः अकर्मा
इत्यमरः मूर्खः इतिमेदिनी॥
कुंठकः त्रि मूर्खः इतिशब्दमाला
कुंचितः त्रि संकुचितः यथा
दशवदन भुजानां कुंठिता षट्
शक्तिरिति महानाटके ॥ गः
कुंडं क्ली मानभेदः देवजलाशय
इतिमेदिनी जलाधारविशेषः
चौवाचा इति भाषा तज्जलगुणाः
अग्निकफकारित्वं रूक्षत्वं ॥



मधुरत्वे लघुत्वे च इति राजनिर्घण्टः
कफाजनकत्वे इति राजवल्लभः
होमीयाग्न्यालयः तस्य विधिः
तत्र मत्स्यपुराणं। प्रागुदक्प्लवने
भूमिकारयेद्यत्नतो नरः। प्रागुदक्
प्लवना पूर्वतो वा उत्तरतोऽथवा
तत्र वशिष्ठपंचरात्रे विज्ञान ॥
ललितायां च सर्वाधिकारिके।
कुंडे चतुरस्रे तु सर्वदे चतुरस्रे।
चतुष्कोणे भविष्योत्तरे सहस्रे।
लघुहोतव्ये कुर्यात् कुंडे करात्मके
द्विहस्तमयुते तत्तुल्लक्षहोमे ॥
चतुष्करं द्विहस्तादिके यामलः
पूर्वपूर्वस्य कुंडस्य कोणसूत्रेण।
निर्मितं उत्तरोत्तर कुंडानां ॥
माने तत्परि कीर्तितं पूर्व
पूर्वस्य कुंडस्य हस्तद्विहस्तादिमितस्य
कोणसूत्रेण ईशानान्निरृतिकोण
दत्तसूत्रेण परिमितं यन्माने॥
उत्तरोत्तर कुंडानां तदेव।
पारिभाषिके द्विहस्तादिमानेन तु
प्रकृतहस्त द्वैगुण्यादि मितं।
तथात्वे द्विहस्तादिमितस्य चतुर्हस्त
परिमाणयन्तेः कृषकस्य भूमेः
परिमाणवत् वशिष्ठपंचरात्रे।
यावान् कुंडस्य विस्तारः खनने॥
तावदिष्यंते हस्तैके मेखला

स्तिस्रो वेदाग्नि नयनांगुलाः ॥
कुंडे द्विहस्ते ता ज्ञेयास्तु ॥
वेदगुणांगुलाः चतुर्हस्ते तु कुंडे
तावस्तु तर्क युगांगुलाः
मेखला ब्रह्मचारि मेखलावत्
कुंडवेष्टिता मड्डविताः तास्त्वात
देशाद्वाह्ये एकांगुलरूपं कंठं
परित्यज्य उच्छ्रायेण विस्तारेण
चेत्यादि क्रमेण वेदाग्न्यंगुलाः।
एतद्विपरीतास्त्रोतेल रोका ॥
व्यवहार विरुद्धाः वेदाश्चनाः
अग्नयस्त्रयः नयने द्वे रसाः षट्गुण
त्रयः चत्वतर्क युगानि अष्ट षट् चत्वारि
पिंगलामते खातादेकांगुलं ॥
त्यक्त्वा मेखलानां विधिर्भवेत्
एककुंडस्य पश्चिमदिक कर्त्तव्यता
माह महादाननिर्णये वशिष्ठ
पंचरात्रे भुक्तौ मुक्तौ तथा ॥
पुष्टौ जीर्णोद्धारे तथैव च ॥
सदा होमे सदा प्रोक्तो वै के ॥
वारुण दिग्गतं प्रारब्धातिल्लके
होत्रग्रे योनिराभा ॥
मुपर्ध्यश्वत्थपत्रवत् मुष्टारत्निक
हस्तानां कुंडानां योनिरीरिता ॥
षट्चतुर्द्व्यंगुलायामविस्तारान्विता
प्रागालिनी एकांगुलं तु योन्यग्रे।
कुर्यादीषदधो मुखं ॥

एकैकांगुलतो योनिं कुंडेष्वन्येषु
वर्द्धयेत् यव द्वय क्रमेणैव ॥
योन्यग्र मपि वर्द्धयेत् ॥
हस्तादारभ्य नाले स्याद्योन्या ॥
मध्ये सरंध्रके आस्ते ॥
मेखलानां अश्वत्थपत्रवदित्यनेन
चतुरंगुल विस्तृत मूलात् यथोक्त
क्रमेण एकांगुलोत्तरः संकुचित
विस्तारा यामले नालमेखलयो
र्मध्ये परिधेः स्थापनाय च रंध्रे
कुर्यात्तथाविधानं द्वितीयमेख
लोपरि परिधी स्तिन्यामानाह
छेदाग्र परिशिष्टे वाहु मात्राः
परिधय ऋजवः सत्वचाऽव्रणाः
त्रयो भवेत्य शीर्णाग्रा एकषोत्तु
चतुर्द्दिक्षु प्रागग्रा वभितः
पश्चादुदगग्र मथापरं न्यसेत्।
परिधि मन्यश्चेडुदगग्रः सपूर्वतः
अव्रणाः छिद्ररहिताः अभितोऽग्नेः
पार्श्वद्वये दक्षिणतः उत्तरतः पश्चात्
पश्चिमे उदगग्रे उत्तराग्रे ॥
त्रैलोक्य सारेपि कुंभद्वय ॥
समायुक्ता अश्वत्थ दलवत्ताग्रेगु
मेखलायुक्ता मध्योन्नत्यजप्याग्नितिर्यषा
कुंभद्वय समायुक्ता गजकुंभाकार
मूलदेशा युक्ता नतानता ग्रेगुष्ट
मित मड्डविते मेखलावेष्टनयुक्ता

तथात्वे हस्तगालितान्यस्थित्या कुंडे
तत्यातोभवतीत्यर्थः पंचरात्रे ॥
कल्पयेदंतरे नाभिं कुंडस्याम्बुज
सन्निभां मुष्टिरत्निक हस्तानां ॥
नाभि रुत सेय विस्तृता ॥
नेत्रवेदांगुलोच्चता कुंडेष्वन्येषु ॥
वर्द्धयेत् यवद्वय क्रमेणैव नाभि
पृथगुदारथीः नाभिक्षेत्रे ॥
त्रिधाकृत्वा मध्ये कुर्वीत कर्णिकां
वहिरंशद्वयेनाष्टौ पत्राणि ॥
परिकल्पयेत् तत्र कुंडस्य ॥
दोषानाह विश्वकर्मा खातादधिके
भवेद्रोगी हीने धेनुधनक्षयः
वक्रकुंडे च संतापो मरणं छिन्न
मेखले मेखला रहिते शोको।
स्थयिके वित्तसंक्षयः भार्या।
विना प्राक्ते कुंडे प्रोक्ते योन्या ॥
विनाकृते अपत्यध्वंसने प्रोक्तं ॥
कुंडे यत् कंठवर्जिते अतएव
वशिष्ठ संहितायां तस्मात् ॥
सम्यक परीक्ष्यैव कर्त्तव्य ॥
शुभवेदिके हस्तमात्रे स्थंडिले वा
संक्षिप्ते होम कर्मणि इति ॥
तिथ्यादितत्त्वे ॥
कुंडे स्त्री स्त्री स्थाली इत्यमर ॥
भरतौ ॥
कुंडः पुं अमृते भर्त्तरि जारजः ॥

जीवति भर्त्तरि उपपति जातः ॥
स्वामीवाचिया थाकिते हय ये॥
विजन्मसंतान इति भाषा
इत्यमरः ॥
कुंडकीटः पुं चार्वाकवचनाभिज्ञ
पुरुषः पतितब्राह्मणी पुत्रः
दासीकामुकः इति मेदिनी ॥
कुंडगोलके क्ली कांजिके इति
हेमचंद्रः ॥ (ते
कुंडगः पुं कुंजे हस्ताच्छादितस्य।
इति हेमचंद्रः ॥
कुंडपाय्यः पुं क्रतुः कुंडैःपीयते
ऽत्रसोम इति मुग्धबोधे ॥
तत्पर्य्यायः कर्णवेष्टने २ ॥
इत्यमरः पाशः वलयः इति
मेदिनी ॥ (लिः
कुंडलिनी स्त्री कुलकुंडलिनीश
यथा ध्यायेत् कुंडलिनी सूक्ष्मां
मूलाधार निवासिनीं तामिष्ट।
देवतारूपां सार्द्धत्रिवलयान्वितां
कोटिसौदामिनीभासां स्वयंभू।
लिंगवेष्टनीं
तामुत्थाप्य महादेवी ॥
प्राणमंत्रेण साधकः उपहित
करोयोतो यावक्काशेहट्यामनः
क्षेपोषाष्टुभ षांत्यर्थे समाहित
मनाप्पिरं तत्रभापटलव्यासे।
शरीरमपि चिंतयेत । इति॥
तंत्रसारः गुडूची इति
राजनिर्घंटः मिष्टान्नविशेषः
जिलेवी इति भाषा तस्य पाक
प्रकारो यथा नूतने घटमानेष
तस्यांतः कुशला जनःप्रस्थार्द्ध
परिमाणेन दध्यम्लेन प्रलेपयेत
द्विप्रस्थां समितां तत्र दध्यम्ले॥
प्रस्थ सम्मिते हुते मर्द्ध शरावेच
चोलयित्वा घटहियेत आतपे
स्थापयेत्तावद्यावद्याति तदम्लता
ततस्तपक्कां हृता नीत्वा सितापाके
स्नपयित्वोद्धरेत्ततः अस्यागुणाः
यथा कुंडलिनीनाम्ना पुष्टिकांति
वलप्रदा धातुवृद्धिकरीहृष्याहच्या
चेंद्रिय तर्पणी इति भावप्रकाशः
कुंडली स्त्री गुडूची कांचनहस्तः
इतिमेदिनी कपिकच्छुः ॥
सर्पिणी हस्तः इति राजनिर्घंटः
कुंडली पुं सर्पः इत्यमरः ॥
वरुणः मयूरः इतिमेदिनी।
चित्रलमृगः ॥
इत्यजयपालः ॥
कुंडलयुक्ते त्रि इतिमेदिनी॥
कुंडाशी त्रि भगाभक्तकःकोटना
इतिभाषा इति महाभारते ॥
दानधर्म्मः ॥

कुंडिका स्त्री कमंडलुः इति
हेमचंद्रः पिठरः कुंडि इति
भाषा इति शब्दचंद्रिका ॥
कुंडिने क्ली विदर्भे नगरे इति
हेमचंद्रः ॥
कुंडिनः पुं मुनिविशेषः ॥
इत्युणादि कोषः ॥
कुंडी स्त्री कमंडलुः इत्यमरः।
स्थाली इत्यमरटीकायां भरतः
कुंडीरः पुं मनुष्यःवलवतित्रि
इतिधरणी ॥
कुतःस्व प्रश्नः पंचम्यर्थः ॥
निह्नवः इति विश्वः॥
कुतनुः पुं कुवेरः इति
त्रिकांडशेषः ॥
कुतपः पुं क्लीम अह्नोऽष्टमोऽंशः
दिवसस्याष्टमो मुहूर्त्तः सच
त्रिधाहेउ दिनमाने द्वितीयप्रहर
शेषदंडावधि तृतीयप्रहरप्रथम
दंडपर्य्यंत कालः इत्यमरः सतु
यकोद्दिष्ट श्राद्धारंभ कालः ॥
यथा आरभ्य कुतपे श्राद्धे ॥
कुर्य्यादारौहिणं वुधः विधिज्ञो।
विधिमास्थाय रौहिणंतुनलंघयेत
इतिश्राद्धतत्वे दिवसस्याष्टमे॥
भागेमंदी भवति भास्करः ॥
सकालः कुतपोज्ञेयःपितृणां।
मनमत्तये इति शुक्ला तपः।
दौहित्रः वाद्ये ॥
छागलोमज केवले कुशलेण
इतिमेदिनी ॥
कुतपः पुं सूर्य्यः वैश्वानरः ॥
द्विजन्मा अतिथिः गौः ॥
भागिनेयः इतिहेमचंद्रः ॥
कुतु ० आल्हेनो सेोत्र धान्ये
इतिकविकल्पद्रुमः ॥
कुतुके क्ली कौतुके इत्यमरः
कुतपे क्ली पुं कुतपःदिनस्याष्टम
मुहूर्त्तः इतिशब्दरत्नावली॥
कुतुपः पुं चर्म्मनिर्म्मितात्पस्ने
हपात्रे छोट कुपो इति भाषा
इत्यमरः ॥
कुतूः स्त्री चर्म्मनिर्म्मितस्नेहपात्रे
मसक इति कुपा इतिच भाषा
इत्यमरः ॥
कुतूणकः पुं वालरोगविशेषः
सतुनेत्ररोगः कतुया इतिभाषा
तस्यलक्षणं कुतूणकः क्षीर
दोषाक्षिमूलामेववर्त्मनिजायते
तेननेत्रे कंडूंच स्रवेन्मुहुः
शिशुः कुर्य्याल्ललाटाक्षिकूट
नासावघर्षणे शक्तोनार्कप्रभो
द्रष्टुं न वर्त्मोन्मीलन क्षमः॥
इतिमाधवकरः कुकूणकः ॥



इत्यपि पाठः ॥
कुतूहलं क्ली अपूर्ववस्तु॥ दिदृक्षाद्यतिशयः तत्पर्य्यायः कौतूहलं २ कौतुकं ३ कुतुकं ४ इत्यमरः ॥
कुतूहलः त्रि प्रशस्तः अद्भुतः इतिहेमचंद्रः ॥
कुतृणं क्ली कुंभी पाना इति। भाषा इति हारा वली ॥
कुत्र व्य कस्मिन् कोनाय इति भाषा इतिव्याकरणं ॥
कुत्रचित् व्य कुत्र कोनखाने इतिभाषा इति व्याकरणं ॥
कुत्स क ङ निंदे इति कविकल्प द्रुमः ॥
कुत्सने क्ली निंदने इति शब्दरत्नावली ॥
कुत्सला स्त्री नीलीवृक्षः इति शब्दचंद्रिका ॥
कुत्सा स्त्री कुत्सनं तत्पर्य्यायः॥ अवर्णः २ आक्षेपः ३ निर्वादः ४ परीवादः ५ अपवादः ६ ॥ उपक्रोशः ७ जुगुप्सा ८ निंदा ९ गर्हणं १० इत्यमरः ॥
कुत्सितं क्ली कुष्ठनामौषधं॥ राजनिर्घंटः ॥
कुत्सितः त्रि निंदितः तत् पर्य्यायः निकृष्टः २ प्रतिकृष्टः ३ अर्वा ४ रेफः ५ याप्यः ६ अवमः ७ अधमः ८ कुपूयः ९ अवद्यः १० खेटः ११ गर्ह्यः १२ अणकः १३ इत्यमरः वेपः १४ अरमः १५ आणकः १६ अनकः १७ इति तट्टीका ॥
कुथ ३ क्लेशे वधे इति कवि कल्पद्रुमः ॥
कुथ य पूति गंधे इति कविकल्प द्रुमः ॥
कुथः पुं स्त्री गजपृष्ठस्थितवि(चित्र)कंबल हाति(य)पिठेर कुल इति भाषा तत्पर्य्यायः प्रवेणी २ आस्तरणं ३ वर्णः ४ परिस्तोमः ५ इत्यमरः प्रवेणिः ६ परिष्टोमः ७ कुथा ८ कुथं ९ इति तट्टीका ॥
कुथः पुं कुशतृणं इत्यमरः॥
कुदालः पुं कुद्दालः इत्यमर टीकायां रमानाथः ॥
कुद्दारः पुं कुद्दालः इति॥ जटाधरः ॥
कुद्दालः पुं कोविदारवृक्षः॥ इत्यमर भूमिदारणास्त्रं ॥ कोदाल इति भाषा इति॥ मेदिनी ॥
कुध्रं क्ली कुध्रे भित्तिः ॥

इत्यमरटीका ॥
कुद्र इक मिथ्योक्तौ इति॥ कविकल्पद्रुमः ॥
कुद्दकः पुं गृहविशेषः मचोपरि मंडपः तत्पर्य्यायः उद्घाटः २ पिटरः ३ इति त्रिकांडशेषः ॥
कुद्रंगः पुं मंचमंडपः इति। हारावली ॥
कुद्रवः पुं कोद्रवः इत्यमर ॥ टीकायांभरतः ॥
कुध्रः पुं पर्वतः इतिहलायुधः
कुनखः पुं क्षुद्ररोगविशेषः तस्य लक्षणं यथा नखमांस॥ मधिष्ठायवातः पित्तंच देहिनां कुर्वीतदाह पाकौच तंव्याधिं॥ चिप्प मादिशेत् तदेवाल्पतरे। दोषैः परुषं कुनखं वदेत्। इति माधवकरः कुत्सित ॥ नखयुक्ते त्रि ॥
कुनखी न् त्रि कुनखरोगयुक्तः संकुचितनखः यथा सुवर्णहारी कुनखी कुनखी पणवंदंतमद्य ह्रस्वशरीरंव्रतं चरित्वा तदेतं नखा ढुढेष्यातो इतिशुद्धि तत्वे ॥
कुनठः पुं पणानाकप्रभेदः इति राजनिर्घंटः ॥
कुनटी स्त्री मनःशिला इत्यमरः धन्याके इतिराजनिर्घंटः ॥ नेपाल देशज मनःशिला इति केचित् इति भरतः ॥
कुनली न् पुं वकवृक्षः इति त्रिकांडशेषः ॥
कुनाभिः पुं वातमंडलीचूर्णवा(तास)॥ इति भाषा इतित्रिकांडशेषः॥ निधिः इतिहेमचंद्रः ॥
कुनाशकः पुं यवासः इत्यमरः केच वक्रेण नोक्तौ इति ॥ कविकल्पद्रुमः ॥
कुंतः पुं गवेधुका प्रासास्त्रे ॥ इति मेदिनी चंडभावः ॥ क्षुद्रजंतुः इति विश्वः ॥
कुंतलः पुं केशः ह्रीवेरं ॥ इत्यमरः चषकः यवः इति मेदिनी लांगलः इतिविश्वः
कुंतलवर्द्धनः पुं भृंगराजवृक्षः इति राजनिर्घंटः ॥
कुंतलाः पुं देशविशेषः ॥ वहुवचनांत शब्दोऽयं इति मेदिनी ॥
कुंतलिका स्त्री दध्यादिछेदनी। दइकाटाकुरि इति भाषा तत् पर्य्यायः पालिका २ इति ॥ हारावली ॥
कुंतलोशीर क्ली वालकेवाला



इतिभाषा इतिराजनिर्घंटः ॥
कुंती स्त्री पांडुराज भार्य्या ॥
साशूरसेन राजकन्या पृथानाम्ना
ख्याता तत् पिता तांकुंतिभोज
राज्ञे दत्तवान् अतः कुंतीति ॥
विश्रुता साच मृगीभूतस्य मुनेः
शापान्मैथुन रहितस्यस्वामिना
आज्ञाया धर्म्मात् युधिष्ठिरं ॥
पवनाद्भीमं इंद्रादर्ज्जुनंजनयामास
इतिमहाभारते पुराणुसंहत्तः ॥
शल्लकी इतिविश्वमेदिन्यौ ॥
ब्राह्मणी इति जटाधरः ॥
कुंथय स्लेषे स्लेषा इति ॥
कविकल्पद्रुमः ॥
कुंथुः पुं बौद्ध विशेषः ॥
जिनचक्रवर्त्ति विशेषः इति
हेमचंद्रः ॥
कुंदः पुं क्ली पुष्पवृक्षविशेषः
कुंदफलेरगाछ इति भाषातत्
पर्य्यायः माध्य २ इत्यमरः ॥
अल्लपुष्पः ३ इति रत्नमाला।
मकरंदः ४ महामोदः ५ मनोहरः
६ मुक्तापुष्पः ७ सदापुष्पः तारपुष्पः
९ अट्टहासकः १० दमनः ११
वनहासः १२ मनोज्ञः १३ ॥
अस्यगुणाः अतिमधुरत्वं शीतत्वं
कषायत्वं केशप्रभावनत्वं कफ
पित्तहरत्वं सारकत्वं दीपनत्वं ॥
पाचनत्वंच इतिराजनिर्घंटः ॥
तत्पुष्पगुणो स्लेष्मकारित्वं ॥
ग्राहित्वंच इतिराजवल्लभः ॥
कुंदः पुं कुंडरुनामगंधद्रव्यं ॥
भ्रमियंत्रे कंद इति भाषा ॥
कुवेरस्य निधि विशेषः इति
मेदिनी करवीरवृक्षः इति
राजनिर्घंटः ॥
कुंदकः पुं कुंडरुकः इति
राजनिर्घंटः ॥
कुंदमः पुं विडालः इति ॥
त्रिकांडशेषः ॥
कुंदरः पुं तृण भेदः कुंदरा ॥
इतिकलिंगेख्यातः तत्पर्य्यायः
कुंदुरः २ किंटी ३ दीर्घ पत्रः ४
खरकंदः ५ रसालः ६ तेजसंभूतः
७ सतृणः ८ मृगवल्लभः ॥
अस्यमूलगुणाः शैत्यत्वं शीतत्वं
पित्तातिसार नाशित्वं गायनात्वं
प्रशस्तत्वं बल पुष्टिविवर्द्धनत्वंच
इति राज निर्घंटः ॥
कुंदिनी स्त्री पद्मिनी पद्मसमूहः
इति त्रि कांडशेषः ॥
कुंदः स्त्री कुंदरुनाम गंधद्रव्यं
इतिशब्दमाला अमरटीकाच
कूषिके पुं इतिशब्दरत्नावली

कुंडरः पुं कुंडरु नाम गंधद्रव्ये
इत्यमरटीकायां भरतः ॥
कुंदरुः पुं स्त्री स्वनामख्यात ॥
सुगंधिद्रव्ये यस्यनिर्यासे कुंडरु
खोटि इति ख्यातिः तत्पर्य्यायः
पालंक्या २ मुकुंदः ३ कुंदः ४
इत्यमरः पालंकी ५ मुकुंडः ॥
६ कुंडः ७ कुंडरः ८ इति
तट्टीकायांभरतः कुंडरुकः ॥
९ सौराष्ट्रः १० शिखरी ११ कुंदकः
१२ तीक्ष्णः १३ गोपुरकः १४
वकुंगंधः १५ पालिंदः १६ ॥
भीषणः १७ अस्यगुणाः मधुरत्वं
तिक्तत्वं कफ पित्तार्त्ति दाह।
नाशित्वंच अस्य पान लेपनयो
र्गुणः शिशिरत्वं प्रदरामयघ्नंति
कारित्वंच इतिराजनिर्घंटः ॥
अलक्ष्मी रक्षो ज्वरनाशित्वं इति
राजवल्लभः ॥
कुंडरुकः पुं स्त्री कुंडरुनाम ॥
सुगंधिद्रव्ये इतिराजनिर्घंटः
कुंडरुकी स्त्री शल्लकीवृक्षः ॥
इत्यमरः ॥
कुपइ किल्हैतो आक्रादन ॥
इतियावत् इतिकविकल्पद्रुमः
कुपक द्युतौ इतिकविकल्पद्रुमः
कुप य ३३ कोपे इति ॥
कविकल्पद्रुमः ॥
कुपथ्यः पुं कुत्सितः पंथाः इति
शब्दरत्नावली ॥
कुपाणिः त्रि वक्रहस्तः कोपा
इति भाषा इति जटाधरः ॥
कुपिनी न पुं कैवर्त्तः जालिया ॥
इतिभाषा इतित्रिकांडशेषः ॥
कुपिनी स्त्री स्वल्पमत्स्यधानी ॥
खोलइ इति भाषा इति
शब्दरत्नावली ॥
कुपिंदः पुं तंत्रवायः इत्युणादि
कोषः ॥
कुपीलुः पुं कारस्करवृक्षः ॥
तिंडकविशेषः। मधुरतिंड ॥
माकडाकेंड इतिच भाषा ॥
तत्पर्य्यायः जलजः २ दीर्घपत्रकः
३ कुलकः ४ कालतिंडकः ५
कालपीलुकः ६ काकेंड ७
विषतिंडः ८ मर्कटतिंडकः ९
अस्यगुणाः शीतलत्वं तिक्तत्वं
वात मद कारित्वं लघुत्वं ॥
व्यथाहरत्वं ग्राहित्वं कफ ॥
पित्तास्र नाशित्वंच इति।
भावप्रकाशः ॥
कुपूयः त्रि कुत्सितः जात्याचारादि
निंदितः इत्यमर भरतौ ॥
कुप्यं क्ली स्वर्णरूप्यभिन्नधातुः



इत्यमरः दस्ता इति ख्यात धातुः॥
इत्यष्टधातुमध्ये वैद्यकं ॥
कुप्यशाला स्त्री स्वर्णरूप्याभ्यां धातु
पात्रादिनिर्माणादिगृहे कांसारिर
टोकान इति भाषा तत् ॥
पर्य्यायः सेधानी २ इति
हेमचंद्रः
कुप्रियः त्रि जघन्यः इति
हलायुधः ॥
कुब ई किल्हनौ इति।
कविकल्पद्रुमः ॥
कुबेरः पुं यक्षराजः इति
सिद्धांतकौमुद्यां मुणादि वृत्तिः
कुब्जः त्रि वायुनोन्नत हृदयः
उन्नतपृष्ठश्च कुज इति भाषा
तत्पर्य्यायः गडुः २ इत्यमरः ॥
तस्य लक्षणं यथा हृदयं यदिवा।
पृष्ठमुन्नतं क्रमशः सरुक्।
क्रुद्धो वायुर्यदा कुर्यात्तदा तं कु
ब्जमादिशेत् इति माधवकरः ॥
कुब्जः पुं अपामार्गः इति ॥
राजनिर्घंटः खड्गः इति ॥
शब्दमाला ॥
कुब्जकः पुं पुष्पवृक्षविशेषः॥
कूजा इति ख्यातः तत्पर्य्यायः।
भद्रतरुणी २ वृत्तपुष्पः ३ अतिकेश
रः ४ महासहः ५ कंटकाढ्यः ६ स्वर्वुः

अलिकुलसंकुलः ८ अस्य गुणाः
सुरभित्वं शीतत्वं रक्तपित्त ॥
कफनाशित्वं च तत्पुष्पगुणाः
शीतलत्वं वर्णकारित्वं दाह ॥
वातपित्त नाशित्वं च इति
राजनिर्घंटः ॥
कुब्जकंटकः पुं श्वेतखदिरः ॥
इति राजनिर्घंटः ॥
कुभ्रे क्लीवने इत्युणादि कोषः
कुडिकुंउल्ले नेतुः धारणे ॥
शाकटे इति संक्षिप्तसारे ॥
उणादि वृत्तिः ॥
कुमार तक केलौ इति
कवि कल्पद्रुमः ॥
कुमारं क्ली जात्यकांचने ॥
खाटिसोना इति भाषा इति ॥
मेदिनी ॥
कुमारः पुं कार्त्तिकेयः ॥
नाम्नोक्तौ युवराजः इत्यमरः॥
शुकः अश्ववारकः पंचवर्षीय
बालकः वरुणवृक्षः इति
मेदिनी अर्हदुपासकविशेषः
इति हेमचंद्रः सिंधुनदः ॥
इति शब्दरत्नावली ॥
कुमारकः पुं वरुणवृक्षः इत्यमरः
बालकः इति हेमचंद्रः ॥
कुमारजीवः पुं पुत्रंजीवकवृक्षः

जीयापुता इति भाषा इति ॥
रत्नमाला ॥ (जः
कुमारपालः पुं शालिवाहनरा
इति हेमचंद्रः ॥ (र्षी
कुमारभृत्या स्त्री गर्भिण्याः परिच
इति हारावली ॥ तत्पर्य्यायः ॥
बालतंत्रं २ गर्भिणीवेक्षणं ३
इति त्रिकांडशेषः ॥
कुमारसुः पुं युवराजः इत्युणादि
कोषः ॥
कुमारवाही ने पुं मयूरः इति
शब्दरत्नावली ॥
कुमारसूः स्त्री गंगा इति ॥
हेमचंद्रः दुर्गा इति व्युत्पत्ति ॥
लभ्योऽर्थः ॥
कुमारिका स्त्री कुमारी इति।
शब्दरत्नावली नवमल्लिका इति
रत्नमाला ॥ भारतवर्षस्य खंड
विशेषः यथा वर्णव्यवस्थिति
रिहैव कुमारिकाख्ये शेषेषु ॥
वांत्यजजनानि वसंति सर्वे इति
सिद्धांतशिरोमणौ गोलाध्यायः
स्थूलैला इति राजनिर्घंटः ॥
कुमारी स्त्री द्वादशवर्षीया कन्या
यथा अष्टवर्षा भवेद्गौरी दशवर्षा च
कन्यका संप्राप्ते द्वादशे वर्षे ॥
कुमारीत्यभिधीयते इति

स्मृतौ भेदः इह अभेदोपचारात्
कन्याकुमारीत्यमरः इति भरतः
आगमे तु कुमारी पूजने ॥
अजात पुष्पा चेत् तदा षोडशवर्ष
पर्य्यंतवयस्का तस्या वयोभेदेन
नामभेदाः यथा एकवर्षा भवेत्
संध्या द्विवर्षा च सरस्वती त्रिवर्षात्
त्रिधामूर्तिश्चतुर्वर्षा तु कालिका
सुभगा पंचवर्षा च षड्वर्षा च उमा
भवेत्सप्तभिर्मालिनी साक्षादष्ट
वर्षा च कुब्जिका नवभिः कालसंकर्षा
दशभिश्चापराजिता एकादशे तु
रुद्राणी द्वादशाब्दे तु भैरवी ॥
त्रयोदशे महालक्ष्मी द्विसप्तपीठ
नायिका क्षेत्रज्ञा पंचदशभिः
षोडशे चान्नदा मता एवं क्रमेण
संपूज्या यावत् पुष्पं न जायते
पुष्पितापि च संपूज्या तत् पुष्पादान
कर्मणि तत्पूजाविधिर्यथा ॥
अथान्यत् साधने वक्ष्ये महावीर
क्रमोद्भवे येनानुष्ठितमात्रेण
शीघ्रं देवी प्रसीदति अष्टम्यां च
चतुर्दश्यां कुह्वां वा रविसंक्रमे
कुमारीपूजनं कुर्याद्यथाविभव
मात्मनः वस्त्रालंकरणैर्भक्ष्य
भक्ष्यैर्भोज्यैः सविस्तरैः ॥
इति पंचतत्वादिभिः सदेवी बुद्ध्या

तत्सायकः इत्यन्नदा कल्पः ॥
पावती नवमल्लिका नदीविशेषः
तहा हृत्तकुमारी इतिख्याता
अपराजिता जेवुडीयः इति ॥
मेदिनी सीताइति हेमचंद्रः ॥
वंध्याककोटकी स्थूलैला ॥
मेदिनीपुष्पे तरुणीपुष्पं ॥
श्यामापत्नी इतिराजनिर्घंटः
कुमाल तक कलौ इति।
कविकल्पद्रुमः ॥
कुमालकः पुं सौवीरदेशः इति
हेमचंद्रः ॥ वा
कुमुत् स्त्री कुमुदं हेत्लाइतिभा
इति मेदिनी रक्तोत्पलं ॥
इति त्रिकांडशेषः ॥
कुमुत त्रिकृपणः इतिमेदिनी
अप्रीतः इतिशब्दरत्नावली
कुमुदं क्ली श्वेतोत्पलं हेत्ला
सुंदि इत्यादिभाषा तत्पर्य्यायः
कैरवं २ इत्यमरः चंद्रकांतं
३ गर्दभं ४ कुमुतं ५ इति ॥
रत्नमाला धवलोत्पलं ६
कल्हारं ७ शीतलकं ८ शशिकांतं
९ इंदुकमलं १० चंद्रिकांबुजं ११
अस्यगुणाः शीतलत्वस्वादुत्व
पाकेतिक्तत्वकफरक्तदोषदाह
श्रमपित्त नाशित्वंच इति॥

राजनिर्घंटः रक्तपद्मे इति॥
मेदिनी रूप्ये इतिहेमचंद्रः॥
कुमुदः पुं नैरृतकोणस्थदिग्
हस्ती इत्यमरः वानरविशेषः॥
नागविशेषः दैत्यभेदः ॥
सितोत्पलं इतिहेमचंद्रः ॥
कर्पूरः इतिराजनिर्घंटः ॥
कुमुदबांधवः पुं चंद्रः कर्पूरः
इत्यमरः ॥ समूहः
कुमुदवती स्त्री कुमुद्वती कुमुद
इत्यमरटीकायांभरतः ॥
कुमुदा स्त्री कुंभिका पाना इति
भाषा गंभारीवृक्षः इति॥
मेदिनीकरहेमचंद्रौ शालपर्णी
इतिराजनिर्घंटः॥
कुमुदावासः पुं कुमुदप्रायदेशः
इतिहेमचंद्रः॥
कुमुदिका स्त्री कट्फलः इत्यमरः
कुमुदिनी स्त्री कुमुदपुष्पकरिण्यादिः
कुमुदसमूहः ॥
कुमुदलता इति
भरतः तत्पर्य्यायः कुमुद्वती २
इत्यमरः उत्पलिनी छोदसेदि
इतिभाषा इतिराजनिर्घंटः
कुमुदिनीपतिः पुं चंद्रः इति॥
हेमचंद्रः॥
कुमुदी स्त्री कट्फलः इति।

शब्दरत्नावली ॥
कुमुदेशः पुं चंद्रः इति ॥
शब्दरत्नावली ॥
कुमुद्वती स्त्री कुमुदिनी इत्यमरः
कुमुद्वान् त्रि कुमुदबहुलदेशः
इत्यमरः ॥
कुमोदकः पुं विष्णुः इति॥
हेमचंद्रः ॥
कुंपः त्रि वाकु कुंठः कोपा॥
इतिभाषा इति जटाधरः॥
कुंबा स्त्री स गहनावृतिः अस्पृश्यादि
दर्शनवारणाय वेष्टने इत्यमरः॥
कुंभः क्ली गुग्गुलुः इत्यमरः ॥
त्रिवृत् इतिहेमचंद्रः ॥
कुंभः पुं घटः अस्यपरिमाणे
कलसशब्दे द्रष्टव्यं गजकुंभः
हस्तिशिरसः पिंडद्वये इत्यमरः
कुंभकर्णपुत्रः वेश्यापतिः इति
विश्वमेदिन्यौ समाधिविशेषः
प्राणायामांग कुंभकइतियावत्
इतिधरणी द्रोणद्वयपरिमाणे
६४ शेर इतिभाषा तत्पर्य्यायः
सूर्पः २ इतिवैद्यकपरिभाषा।
मेषादिद्वादशराश्यंतर्गतैकादश
राशिः तस्यपर्य्यायः स्त्रिद्रोगः २
इतिदीपिका सचधनिष्ठाशेषार्द्ध
संपूर्णशतभिषापूर्वभाद्रपदा

प्रथमपादत्रयेण भवति ॥
अस्याधिष्ठात्री देवता कलसधारी
पुरुषः सत्त्व शीर्षोदयः चरण।
रहितः मध्यसंतानः मध्यम ॥
स्त्रीसंगः कर्बुरवर्णः वनचारी
वायुराशिः स्निग्धः उष्णः ॥
अर्द्धस्वरः वातपित्तकफप्रकृतिः
भ्रूवर्णः पश्चिमदिक्स्वामी
रूपयोगः तत्रजातफलं मेधावी
हस्तिघोटक धनेश्वरो दंतपीडा
युक्तः स्नेहशून्यः इतिज्योतिषे
जन्मकालीनचंद्राश्रितेनद्राशिफलं
अलसताससहितोऽन्यसुतप्रियः
कुशलताकलितोऽतिविचक्षणः
कलसगामिनिशीतकरे नरः सदसि
सज्जन मान सरोचनः इति
कोष्ठीप्रदीपः तस्योदयेतन्नामक
लग्नंभवति तस्य गणिप्रास।
परिमाणे यथादशव्यंगुलाधिक
पंचांगुलप्रभेदेशे वर्त्तमानेन ॥
विंशाधनीशे अष्ट पंचाशत।
पलाधिक त्रिदंडाः इतिज्योतिषे
तत्रजातफलं कुंभलग्नसमुद्भूत
श्चलचित्तोऽतिसौहृदः परदार
रतो नित्यं सत्त्वकायो महासुखी
इतिकोष्ठी प्रदीपः ॥
कुंभकः पुं दक्षिणहस्तेन ॥



नासापुटद्वयं धृत्वा शालयामोगे
वायुस्तम्भने इति तंत्रे ॥
कुंभकारः पुं जातिविशेषः ॥
कुमोर इतिभाषा स तु शूद्रा गर्भे ॥
विश्वकर्मोरस जातः इति।
ब्रह्मवैवर्त्तपुराणं तत्पर्य्यायः ॥
कुलालः २ इत्यमरः चक्री ३
इतिजटाधरः कुकुंभपत्नी ॥
इतिहेमचंद्रः ॥
कुंभकारिका स्त्री कुलत्था इति
राजनिर्घंटः ॥
कुंभकारी स्त्री कुलत्थांजने ॥
कुलेखिका इतिराजनिर्घंटः॥
मनःशिला इतिजटाधरः ॥
कुंभकार भार्य्याच ॥
कुंभतुंबी स्त्री अलाबूप्रभेदः
गोलल्लाउ इति भाषा तत्
पर्य्यायः कुंभालाबुः २ गोरतुंबी
३ गोरत्नी ४ नागालाबुः ५ वृहदाभिधा
६ वृहदालाबुः ७ अस्यागुणाः मधुरत्वे
शीतत्वे पित्तश्वासकफासज्वरः।
कासनाशित्वं रम्यत्वंच इति॥
राजनिर्घंटः ॥
कुंभदासी स्त्री कुट्टनी इति॥
शब्दरत्नावली ॥
कुंभयोनिः पुं अगस्त्यमुनिः ॥
वशिष्ठमुनिः द्रोणाचार्य्यः इति

मेदिनी द्रोणपुष्पीवृक्षः इति
राजनिर्घंटः ॥
कुंभला स्त्री मुंडितिका मुंडिरी
इतिभाषाइति रत्नमाला ॥
कुंभवीजकः पुं रीठाकरंजः ॥
इतिराजनिर्घंटः ॥ (गृहे
कुंभशाला स्त्री कुंभनिर्माणादि
तत्पर्य्यायः पाकपुटी २ इति
हेमचंद्रः ॥ (स्थाने॥
कुंभसंधिः पुं हस्तिकुंभद्वयमध्य
तत्पर्य्यायः आरत्नः २ इति
त्रिकांडशेषः [illegible]
कुंभसंभवः पुं अगस्त्यमुनिः
इत्यमरः ॥
कुंभा स्त्री वेश्या इति शब्दमाला
कुंभांडः पुं बाणासुरस्यामात्य
विशेषः इति श्रीभागवते ॥
कूष्मांडे कूष्मांडी पर्य्याये ॥
कुंभांडी दर्शनात् ॥
कुंभांडी स्त्री कूष्मांडी इति
राजनिर्घंटः ॥
कुंभिका स्त्री जलतृणविशेषः
पाना इति भाषा तत्पर्य्यायः
वारिपर्णी २ इत्यमरः श्वेतपर्णी
३ अपाकुंभी ४ पानीयपृष्ठजः ५
इतिरत्नमाला आकाशमूली ६
कुलतृणं ७ जलवल्कलं ८ इति॥

हारावली पाटलावृक्षः द्रोणपुष्पी
इतिराजनिर्घंटः नेत्ररोग ॥
विशेषः तस्यलक्षणं यथा
वर्त्मान्ते पिडकाध्माता भिद्यन्तेच
स्रवन्तिच कुंभीक वीजसदृशाः
कुंभिकाः सन्निपातजाः इति
माधवकरः ॥
कुंभिनीवीजं क्ली जयपालः इति
राजनिर्घंटः ॥
कुंभिपाकी स्त्री कटुफलः इति
भावप्रकाशः ॥
कुंभिमदः पुं हस्तिमदः इति
राजनिर्घंटः ॥
कुंभिलः पुं चोरः शालमत्स्यः॥
श्लोकार्थचोरः श्यालः। इति
हेमचंद्रः ॥
कुंभी पुं हस्ती कुंभीरः इति
हेमचंद्रः गुग्गुलु इतिजटाधरः।
कुंभी स्त्री उखा पाटला वृक्षः
वारिपर्णी कटुफलः इति॥
हेमचंद्रः वृक्षविशेषः ॥
कुंभी पुष्प इति कोंकणे प्रसिद्धा
तत्पर्य्यायः रोमालुविटपी २
रोमशः ३ पर्पटद्रुमः अस्यगुणाः
कटुत्वे कषायत्वं उष्णत्वं ग्राहित्वे
वातकफापहत्वंच दंतीवृक्षः
इतिराजनिर्घंटः ॥

कुंभीकः पुं पुन्नागवृक्षः इति
रत्नमाला कुंभिका यथा दूर्वा
कशेरु पूतीक कुंभीक प्लव ॥
शैवले इतिचक्रपाणिदत्तः।
कुंभीनसः पुं क्रूरसर्पः इति
मेदिनी ॥
कुंभीनसी स्त्री लवणदानवमाता
इतिमेदिनी ॥
कुंभीपाकः पुं नरकविशेषः
इतिजटाधरः तत्पर्य्यायः ॥
संप्रतापनः २ इतिमनुः य
इह यभूत् पक्षिणो वाशणेता
रंधयति पुं ते परत्र यमदूता ॥
स्तप्ततैले रंधयंति यत्र यति
श्रीभागवते ॥
कुंभीरः पुं जलजंतुविशेषः
कुमीर इतिभाषा तत्पर्य्यायः ॥
नक्रः २ इत्यमरः कुंभीलः ३
इति तट्टीका गिलग्राहः ४
महावलः ५ इतिराजनिर्घंटः॥
कुंभीरमक्षिका स्त्री मक्षिकाविशेषः
कुमीरा पोका इति भाषा तत्
पर्य्यायः कलणा २ इति ॥
हारावली ॥
कुंभीलः पुं कुंभीरः इत्यमरटीका
कुंभीवीजं क्ली जयपालः इति
राजनिर्घंटः ॥



कुरशाह्वो इति कविकल्पद्रुमः
कुरका स्त्री सल्लकी वृक्षः इति
राजनिर्घण्टः ॥
कुरंकरः पुं सारसपक्षी। इति
हेमचन्द्रः ॥
कुरंकुरः पुं सारसपक्षी इति।
हारावली ॥
कुरंगः पुं हरिणः इत्यमरः ॥
कुरंगकोपि ॥
कुरंगनयना स्त्री मृगनयना।
नारी इति राजनिर्घण्टः ॥
कुरंगनाभिः पुं कस्तूरी इति।
राजनिर्घण्टः ॥
कुरंगमः पुं हरिणविशेषः तत्
पर्य्यायः पृणः १ ऋष्यः २ रिश्यः ३
वारुलोचनः ४ इति त्रिकाण्डशेषः
कुरंगिका स्त्री मुद्गपर्णी इति ॥
राजनिर्घण्टः ॥
कुरचिल्लः पुं कर्कटः इति ॥
हेमचन्द्रः ॥
कुरटः पुं चर्म्मकारः इति ॥
त्रिकाण्डशेषः ॥
कुरण्टकः पुं पीताम्लानः ॥
पीतझिण्टी इति राजनिर्घण्टः
कुरंडः पुं मुष्कवृद्धि रोगः तत्
पर्य्यायः वृद्धिः १ अण्डवृद्धिः २ इति
हेमचन्द्रः तस्य संप्राप्ति पूर्वकं ॥

लक्षणं यथा कुपितोऽनिलगति
वायुः शोथ शूलकरश्चरन्मुष्कौ
वंक्षणतः प्राप्य फलकोषाभिवाहिनीः
प्रपीड्य धमनी वृद्धिं करोति ॥
फलकोषयोः दोषास्र मेदो ॥
मूत्रान्त्रैः सहवृद्धिः सप्तधा गदः
मूत्रान्त्रजा वप्यनिलाद्धेतुभेदस्तु
केवलं वातपूर्णं दृतिस्पर्शो
रूक्षो वाताद्धेतु रुक् पक्वो
डुम्बर संकाशः पित्ताद्दाहोष्म
पाकवान् कफाच्छीतो गुरुः
स्निग्धः कंडूमान् कठिनोऽल्परुक्
कृष्णस्फोटावृतः पित्तवृद्धिलिं
गश्च रक्तजः कफवन्मेदसा वृद्धि
मृदुस्तालफलोपमः मूत्रधारण
शीलस्य मूत्रजः सतु गच्छतः।
अम्भोभिः पूर्णदृतिवत् क्षोभं
याति सरुङ्मृदुः मूत्रकृच्छ्रमधः
स्यात् चालयन् फलकोषयोः
वातकोपिभि राहारैः शीत।
तोयावगाहनैः धारणेरणभाराध्व
विषमांग प्रवर्त्तनैः क्षोभणैः ॥
क्षुभितरन्यैः क्षुद्रान्त्रावयवं परं
पवनो विगुणी कृत्य स्वनिवेशाद
धो नयेत् कुर्य्याद्वंक्षणसंधिस्थो
ग्रन्थ्याभं श्वयथुं तदा उपेक्ष्य ॥
मानस्य च मुष्कवृद्धिमाध्मानरुक्

स्तम्भवतीं स वायुः प्रपीडितो ॥
अन्तः स्वनवान् प्रयाति प्रध्मापयन्
तिपुनरभ्युपकः अन्त्रवृद्धिरसाध्याः
यं वातवृद्धि समाकृति। इति
माधवकरः साकरेडु वृक्षः ॥
इतिराजनिर्घण्टः ॥
कुरेडकः पुं कुरेटकवृक्षः इत्य
मरः टीकायां रायमुकुटः ॥
कुररः पुं कुरल पक्षी तत्पर्य्यायः
उत्क्रोशः १ इत्यमरः खरशब्दः।
२ क्रौंचः ४ पेक्किचरः ५ खरः ६
इतिराजनिर्घण्टः ॥
कुरराङ्घ्रिः पुं देवसर्षपः इति।
राजनिर्घण्टः ॥
कुररी स्त्री मेषी इतिहेमचन्द्रः
कुररपक्षि स्त्री इत्यमरः ॥
कुरलः पुं कुररपक्षी चूर्णकुन्तले
इतिधरणी ॥
कुरवः पुं सितमन्दारः इति ॥
राजनिर्घण्टः कुरवकः रक्तझिण्टी
इतिशब्दरत्नावलीपीतझिण्टी
इतिहेमचन्द्रः कुत्सित शब्दः ॥
कुत्सित शब्दयुक्ते त्रि ॥
कुरवकः पुं रक्ताम्लानः रक्तझिण्टी
इतिराजनिर्घण्टः कुत्सितरवे।
त्रि ॥
कुरसः पुं मद्यभेदः ॥ इति

हारावली कुत्सितरसः ॥
कुत्सितरसयुक्ते त्रि ॥
कुरसा स्त्री गोजिह्वालता ॥ इति
शब्दचन्द्रिका ॥ (कुरस
कुराहः पुं कुलाहः ईषत्पाण्डुः
जंघोचोटकः इतिहेमचन्द्रः ॥
कुरी स्त्री तृणधान्यभेदः इति
राजनिर्घण्टः ॥
कुरीरं क्ली मैथुने इतिसिद्धांत
कौमुद्या मुणादिवृत्तिः ॥
कुरुः पुं आग्नीध्र राजपुत्रः सतु
प्रियव्रत राजपुत्रः चन्द्रवंशीय
राजविशेषः सतु संवरण राज
भार्य्यायां सूर्य्यकन्यायां तपत्यां
जातः इतिश्रीभागवते भक्ते
देशविशेषः तत्र बहुवचनान्तः
इतिमेदिनी सतु जंबुद्वीपस्य
नववर्षान्तर्गत वर्षविशेषः इति
ज्योतिषे कंटकारिका इति ॥
शब्दचन्द्रिका ॥
कुरुकंटकं क्ली मूलकं इति ॥
शब्दमाला ॥
कुरुंटः पुं सितावरणकः इति
राजनिर्घण्टः ॥
कुरुंटः पुं पीतझिण्टी पीताम्लानः
इतिमेदिनी ॥ (झिण्टी
कुरुंटकः पुं पीताम्लानः पीत।



तत्पर्य्यायः सहचरी सहचरः। २ इत्यमरः सहाचरः ४ ॥
कुरंटकः इति भरतः ॥
कुरंटी स्त्री दारुपुत्तलिका ॥ इतिमेदिनी ब्राह्मणी इति जटाधरः ॥
कुरंबे क्ली कुलपालकंकमला नेबु इतिभाषा इतिशब्दचंद्रिका
कुरुंबा स्त्री द्रोणपुष्पी इति राजनिर्घंटः ॥
कुरुंबिका स्त्री द्रोणपुष्पी इति राजनिर्घंटः ॥
कुरुंबी स्त्री सेंहलीहस्तः इति राजनिर्घंटः ॥
कुरुराट् पुं दुर्योधनः इति त्रिकांडशेषः ॥
कुरुलः पुं भालस्थचूर्णकुंतलः तत्पर्य्याः भ्रमरकः २ भ्रमरालकः ३ इतिहेमचंद्रः
कुरुबकः पुं रक्तझिंटी रक्ताम्लानः इत्यमरः पीतझिंटी इति हेमचंद्रः ॥ (को।
कुरुविंदे क्ली काचलवणेमणि इतिराजनिर्घंटः कुरुविल्वरत्ने कुल्माषधान्ये इतिमेदिनी।
कुरुविंदः पुं मुस्तके इत्यमरः। माषः इतिराजनिर्घंटः ॥

कुरुविल्वः पुं पद्मरागमणिः इति त्रिकांडशेषः ॥
कुरुविल्वकः पुं कुल्माषः ॥ वनकुलत्थिका इतिरत्नमाला
कुरुविस्तः पुं स्वर्णपले वाहितोलासोणा इतिभा इत्यमरः ॥
कुरुक्षेत्रे क्ली देशविशेषः तत्तुधर्मक्षेत्रं यत्रकुरुपांडवानां युद्धमासीत् इतिमहाभारते
कुरुक्षेत्रीयोगः पुं एकस्मिन्नसावन दिनेतिथित्रयनक्षत्रत्रय योगत्रयाणांचस्पर्शः इतिस्मृतिः
कुरुव्यं क्ली हिंगुइतिराजनिर्घंटः
कुर्कुरः पुं स्त्री कुक्कुर इत्यमरटीकायांरायमुकुटः ॥
कुर्णजः पुं कुलंजनवृक्षः इति राजनिर्घंटः ॥
कुर्द उ पीडायां इति ॥ कविकल्प द्रुमः ॥
कुर्दने क्ली क्रीडा खेला ॥ इत्यमरटीकायां स्वामी ॥
कुर्परः पुं कफोणिः जानु ॥ इतिमेदिनीकर हेमचंद्रौ ॥
कुर्पासः पुं अर्द्धचोलकः इति हारावली ॥
कुर्पासकः पुं कंचुलिका। कोचुलि इति भाषा इत्यमरः ॥

कुर्वत् त्रि कर्म्मकारः भृत्यः। इतिविश्वः ॥
कुलज वेथौ संहतौ इति। कविकल्पद्रुमः केचित्तु संहति स्थानेसंख्यान मितिपठंति इति तट्टीका ॥
कुले क्ली वंशः स्वजातीगणः इत्यमरः जनपदः गृहे ॥ शरीरे इतिमेदिनी श्रेष्ठे ॥ इतिमहाभारते ॥ प्रधानः इत्यमरटीकायांभरतः
कुलकं क्ली पटोललतासंबद्धश्लोकसमूहः इतिमेदिनी ॥
कुलकः पुं कर्केंदुः इत्यमरः। वल्मीकः कुलश्रेष्ठः इति मेदिनी मरुवकवृक्षः इति रत्नमाला हरितसर्पः। इति राजनिर्घंटः कुपीलुः इति भावप्रकाशः शिल्पिकुलप्रधानः इत्यमरटीका भरतः (ति
कुलकर्कटी स्त्री वीनाकर्कटी इ राजनिर्घंटः ॥ ॥
कुलकः पुं करताली ॥ तत्पर्य्यायः ॥ तालमर्द्दलः २ इतिहारावली।
कुलजः पुं कुलीनः सत्कुलोद्भवः इतिशब्दरत्नावली ॥

कुलेजः पुं कुलेजनवृक्षः इति राजनिर्घंटः ॥ (क्षः
कुलंजनः पुं स्वनामख्यातवृ तत्पर्य्यायः कुर्णजः २ गंधमूलः ३ कुलेजः ४ अस्यगुणाः कटुत्वे तिक्तत्वे उष्णत्वे दीपनत्वे मुख दोषनाशित्वंच इतिराजनिर्घंटः
कुलटा स्त्री व्यभिचारिणी भ्रष्टा तत्पर्य्यायः पुंश्चली २ धर्षिणी ३ बंधकी ४ असती ५ इत्वरी ६ स्वैरिणी ७ पांसुला ८ इतितट्टीका परकीयांतर्गतनायिकाभेदः इति रसमंजरी ॥
कुलटी स्त्री मनःशिला इति रत्नमाला अमरटीकाच ॥
कुलतिथिः स्त्री पुं चतुर्थ्यष्टमी द्वादशी चतुर्द्दशः यथाद्वितीया दशमी षष्ठी कुलाकुलमुदाहृते विषमाश्चाकुलाः सर्वेशेषाश्च तिथयः कुलाः इतितंत्रसारः
कुलेरवः पुं शस्यभेदः कुलेरव कडाइ इति भाषा तत्पर्य्यायः कालहेतः २ ताम्रहेतः ३ कुलेखिका ४ इतिरत्नमाला ताम्रहेतः ५ इति ॥ त्रिकांडशेषः ताम्रबीजः ६ सितेतरः ७ इतिराजनिर्घंटः ॥



भौम शुक्रौ कुलरवौहि ॥
बुधवारः कुला कुलः इति
तंत्रसारः ॥
कुलाटः पुं क्षुद्रमत्स्यभेदः।
इतिशब्दमाला ॥
कुलाद्रिः पुं कुलाचलः इति
सिद्धांतशिरोमणिः ॥
कुलाधारकः पुं पुत्रः इति।
शब्दरत्नावली ॥
कुलाये स्त्री शरीरं इतिपुराणे
कुलायः पुं नीडः स्थानमात्रे।
इतिमेदिनी ॥
कुलायस्थः पुं पक्षी इति
शब्दचंद्रिका ॥
कुलायिका स्त्री पक्षिशाला इति
त्रिकांडशेषः ॥
कुलालः पुं कुंभकारः इत्यमरः
तस्योत्पत्तिर्यथा मालाकारात
कर्मिकार्य्यां कुंभकारो व्यजायत
इतिपराशरसंहितापद्धिकाराद्ध
तैलिकां कुंभकारो बभूव ह इति
पराशरपद्धतिः अस्यैवर्त्तोक्ताव
कुंभकार शब्दे द्रष्टव्या कुक्कुभ
पक्षी इतिमेदिनी ॥ (पुस्तर
कुलाली स्त्री कुलस्याकारोंजन
विशेषः कुलस्योंजनमितिख्याते
इत्यमरः अरण्य कुलत्थिका।

वनकुलत्थकडाथि इतिभाषा इति
राजनिर्घंटः कुलालभार्य्याच ॥
कुलाहः पुं ईषत्पीतवर्णः ॥
कृष्णजानुर्घोटकः इतिहेमचंद्रः
कुलाहकः पुं कृकलासः इति
शब्दमाला हस्तविशेषः रोगा
कुलेखाडा इतिभाषा अस्यगुणः
आमवातवातरक्तरोगनाशित्वं
इतिराजवल्लभः ॥ (षः
कुलाहलः पुं क्षुद्रहस्तविशे
कोकसीमा इति भाषा तत ॥
पर्य्यायः अलिबुषः २ गोक्षालः ३
भूकदंवः ४ इति रत्नमाला ॥
कुलिः पुं हस्तः इतित्रिकांडशेषः
कुलिः स्त्री कंटकारी इति ॥
शब्दरत्नावली ॥ (नः
कुलिकः त्रि शिल्पिकुलश्रेष्ठ
इत्यमरः कुलसत्तमः इति ॥
मेदिनी ॥ (नर्गत
कुलिकः पुं अष्टमहानागा
नागविशेषः हस्तविशेषः।
काल्याकडा इति भाषा इति
मेदिनी ॥
कुलिकवेला स्त्री रव्यादिवरेषु
शुभकर्मसु निषिद्धकालविशेषः
यथा रवौ सप्तमयामार्द्धे सोमे॥
षष्ठयामार्द्धे मंगले पंचमयामार्द्धे

बुधे चतुर्थयामार्द्धे गुरौ तृतीय।
यामार्द्धे शुक्रे द्वितीय यामार्द्धे
शनौ प्रथमयामार्द्धे राघवभट्ट
मतेतु पूर्वोक्तयामार्द्धानां दिवा
शेषभागः रात्रौ प्रथमभागः इति
ज्योतिषतत्वे ॥
कुलिंगः पुं पक्षिविशेषः फिङ्गा
इतिभाषा तत्पर्य्यायः कलिंगः
२ धुम्याटः ३ किंगकः ४ इति।
शब्दमाला भृंगः ५ इत्यमरः ॥
अस्यमांसगुणः मधुरत्वंस्निग्ध
त्वं कफपित्तकारित्वंच इति
राजनिर्घंटः ॥
कुलिंगकः ॥ पुं चटकपक्षी इति
हेमचंद्रः ॥
कुलिंगाक्षी स्त्री पेटिकावृक्षः।
पेठारी इति भाषा इति।
रत्नमाला ॥
कुलिंगी स्त्री कर्कटशृंगीवृक्षः
इतिरत्नमाला ॥
कुलिरः पुं कर्कटः इति
शब्दरत्नावली ॥
कुलिशं क्ली पुं वज्रं इत्यमरः।
भरंतो मत्स्य विशेषः तत ॥
पर्य्यायः कंटकाष्टीलः २ इति
त्रिकांडशेषः अस्थिसंहारवृक्षः
इतिरत्नमाला ॥

कुलिशनायकः पुं शृंगारबंध
विशेषः तस्यलक्षणं स्त्रीपाद
द्वयमाकृष्य विमुमुदितलिंगकः
योनिंच पीडयेत कामी बंधः।
कुलिशनायकः इतिरतिमंजरी
कुलिशांकुशा स्त्री बौद्धानांवि
द्यादेवीविशेषः इति हेमचंद्रः
कुलिशासनः पुं शाक्यमुनिः
इतित्रिकांडशेषः ॥
कुली स्त्री कंटकारी इत्यमरः
पत्नी ज्येष्ठ भगिनी इति ॥
हेमचंद्रः ॥
राजनिर्घंटः ॥
कुलीनः पुं श्रेष्ठघोटकः तत
पर्य्यायः आजानेयः २ इत्यमरः
अजानेयः ३ ~~आजानेयः ३ इत्य~~
इतितट्टीका उत्तम कुलोद्भवत्रि
तत पर्य्यायः महाकुलः २ आर्यः ३
सभ्यः ४ सज्जनः ५ साधुः ६ ॥
इत्यमरः अथधुनिककुलीन
लक्षणं कुले उत्कर्षं विशेषः
वेशः इति शंकेत अथवा ॥
रूढार्थे तस्यापत्य मित्यर्थे
कुल शब्दादीन प्रत्ययेन कुली
न इतिपद सिद्धि रिति अर्थात
कुलीन शब्देन उत्कर्षविशेष
वेशजातक व्यक्ति रिति ॥



तथाच लक्षणे उत्कर्ष
विशेष धर्मावच्छिन्न वंश
जातकत्वे सति तत्‌धर्मवत्वे
कुलीनत्वमिति उत्कर्षविशेषश्च
नवधागुणाः तद्यथा आचारो
विनयो विद्याप्रतिष्ठातीर्थदर्शनं
निष्ठावृत्तिस्तपो दानं नवधा।
कुललक्षणमत एव उत्कर्ष॥
विशेषात्मक नवधागुणविशिष्ट
त्वेकुलीनत्वे एतेनइदानींसाधारण
सामान्यजनानां यदिनवधागुण
वर्त्तंते तदातेपि कुलीनाः स्युः
स्तत्र अत्रावच्छिन्नपर्य्यायत्वेकुली
नत्वेप्रमाणं यथा पर्य्यायेसमासाध
दानगृहणे सुतमे कन्यभीवे ॥
कुशत्यागः प्रतिज्ञावा परस्परे।
तथाच कुलीनस्य सर्त्तालक्षा॥
कुलीनायसत्तां ददौ पर्य्यायक्रम
तस्यैव सएव कुलदीपकः तथाच
आदानेच प्रदानेच कुशत्याग
स्तथैवच प्रतिज्ञा घटकाग्रेच
कुलकर्म्म चतुर्विधं ॥ इति
कुलदीपिका अथ वल्लाल।
भूपालकृताः पंचगोत्रजराढीय
ब्राह्मणस्य ग्रामविशिष्टस्य मुख्य
गोत्रभेदेन द्वाविंशति कुलीनाः य
शाण्डिल्य गोत्रे भट्टनारायण॥

वंशलज्जादिवराहुवंशः समुख्यः
ग्रामगडगडः निपकेशरकोणी
गुंधीकुलभी कटुदिग्गी ठिः वैकेर
पारियालः एते पंच गौणाः॥
काश्यप गोत्रे दक्षवंशजः॥
सुलोचनचट्टः समुख्यः जगाइडः
धीरगुडः काकपीतमेडी एते।
त्रयो गौणाः भरद्वाज गोत्रे ॥
श्रीहर्ष वंशजः धुरंधरमुखपटी
सच मुख्यः विनायकदिंडीसोयी
गंधर्वरायी एतौ द्वौ गौणौ ॥
सावर्णगोत्रे वेदगर्भवंशजः।
वीरब्रनगंगाली सधीर कुंदः।
एतौ द्वौ मुख्यौ वीरसूदन ॥
चंटेश्वरः एष गौणः वात्स्य।
गोत्रेछांदडवंशजः स्वरभि ॥
घोषवालः कविकांजिलालः रवि
पूतितंडः एते मुख्याः भानु॥
घोठखंडी पनिकाल महिंत्य।
वनमालि पिप्पली एते गौणाः
अधुना एषां मध्ये मुख्याष्टौ ॥
कुलीनाः गौणाश्चतुर्दश श्रोत्रियाः
अन्येपि पंचगोत्रजाता सप्त
विंशच्छ्रोत्रियाः संति ततो।
लक्ष्मण सेनेन मुख्याष्टकुलीनान
विंशति पुत्राणां समीकरणे।
कृतेनत एतेषां नानादोष ॥

दर्शनात्‌ देवीवरेण फुलिया।
खडदह वल्लवी सर्वानंदी ॥
इत्याद्याषट्त्रिंशन्मेलाः कृताः
ततो भाग सूप थाक ॥
इतितिस्रः संज्ञाः जाताः॥
कुलाचार्य्य ग्रंथा ज्ञेयाः ॥
अथवारेंद्र ब्राह्मण कुलीनाः॥
आदौ मैत्र स्ततो भीमो रुद्रः।
संज्ञामिनस्तथा लाहिडिर्भादुडिः
साधुभीदडाः पङ्क्ति पूरकाः
त्रयो नाना दोष दर्शनात्‌ ॥
कुलाचार्य्येण अष्टौ पटी इति
संज्ञा कृता तद्यथा निरावि[ला]
रोहिला २ भूसा ३ आलखानी
४ कुतलखानी ५ वेणी ६ जोना
ली ७ भवानीपु ८ एते पा॥
कुलाच्चातात्‌ काप इति संज्ञा
जाता अथ वैद्य स्यादि ॥
कुलीनाः धन्वंतरि गोत्रे ॥
विनायक सेनः मौद्गल्यगोत्रे।
वासुदासः काश्यपे काशुगुप्तः
वल्लालेनैषां कुले महामध्यम
कनिष्टकुल भेदेन त्रिधाकृते
तत्र महाकुलीनाः पंच यथा
कृष्णसेन खानः २ हरिहरसेनखा
नः २ चंडीवरदासः ३ गणपतिदा
सः ४ दुर्जयदासः ५ अधुनैषां कुले

ह्रास वृद्धि भेदानसंति ना:
अथ दक्षिण राढीय कायस्थ कुली
तत्रादिसूर राजेन कान्यकुब्ज॥
देशादानीते ब्राह्मण पंचकैः
सह घोष वसु मित्र दत्त गुहाः
पंचागता आदि कुलीनाः यथा
सौकालीन गोत्रे मकरंद घोषः
गौतमे दशरथ वसुः २ ॥
विश्वामित्र कालिदास मित्रः ३
काश्यप गोत्रे दशरथ गुहः।
स्वाहंकारादवमानितो वंगगतः ४
भरद्वाज गोत्रे पुरुषोत्तम ॥
दत्तः विनयहीनत्वा निष्कुलः ५
वंगज कुलाचार्य्य ग्रंथे सएव
मौद्गल्य गोत्रः ॥ अथ ॥।
वल्लाल सेन कृत समाजादयः
तत्राद्यस्य षष्ट पुरुषयोर्निश्चापति
प्रभाकर घोषयो र्वीसस्थाने ॥
क्रमेण वाली आकनाख्यौ ग्रामौ
द्वितीयस्य पंचम पुरुषयोः शक्ति
मुक्तिवस्वो र्वीसस्थाने क्रमेण
वागांडि माहिनगराख्यौ ग्रामौ
तृतीयस्याष्टम पुरुषयोः धुइगुइ
मित्रयो र्वीसस्थाने क्रमेण।
वडिशा टेका नामग्रामौ ॥
अपरेऽष्टादश समाजास्तत्स्थाने
कुलाभावात्‌ न लिखिताः ॥



तेषांकुलंत्र त्रिविधं मुख्य १
कनिष्ठ २ छभाया ३ मध्यांश ॥
४ तेत्रज ५ एतानि प्राधानानि
कनिष्ठ द्वितीय पुत्र ६ छभाया।
द्वितीयपुत्र ७ मध्यांश द्वितीयपुत्र
८ तेत्रज द्वितीय पुत्र इतिच ९
नवंशमानुरोधात् छभाय ज्येष्ठ
पुत्रस्य मध्यश्रेष्ठ इति संज्ञा ॥
जता अथ कुलानां विवरणं
विवरणं मुख्य कुलीनस्य प्रथम
पुत्रः पितृतुल्यः द्वितीयःकनि
ष्ठ नाम कुलविशिष्टः तृतीयो
मध्यांश नाम कुल युक्तः चतुर्थः
तेत्रजनाम कुलान्वितः पंचमा
दियावत्पुत्राः मध्यांश द्वितीय
पुत्रनामकुलयुक्ता भवंति ॥
कनिष्ठ कुलीनस्य ज्येष्ठपुत्रः छ
भायानामकुलयुक्तः तस्य ज्येष्ठ
मध्यश्रेष्ठ नामकुल युक्तः तस्य
ज्येष्ठ पुत्रः मध्यांश नामकुल
विशिष्टः सएव अपर मध्यांश
वा छभाया मध्यांश इति संज्ञा।
द्वयुक्तः यशोकर्मणा वृद्धि।
यथा मुख्य कुलीनस्य द्वितीय
तृतीय पुत्रयोः कुलस्य वाडिमु
ख्य इति संज्ञा चतुर्थ पंचमषष्ठ
पुत्राणां कुलस्य वाडि कनिष्ठ

इति संज्ञा सप्तमाष्टम नवम ॥
पुत्राणां कुलस्य वाडि मध्यांश
इति संज्ञा दशमैकादश द्वादश
पुत्राणां कुलस्य वाडि तेत्रज
इति संज्ञा भवति कनिष्ठनाम
कुलीनस्य द्वितीय पुत्रस्य कुलस्य
तेत्रज इति संज्ञा भवति ॥
मुख्य कुलीनस्य तृतीय पुत्रस्य
द्वितीय पुत्रस्य कुलस्य तेत्रज इति
संज्ञा मध्यांश द्वितीय पुत्र इति
संज्ञे कुले मुख्य कनिष्ठ छभाया
मध्यश्रेष्ठ मध्यांश इति कुल
पंचकात् भवति मुख्य कुलंत्र
त्रिविधं यथा प्रकृत १ सहज २
कोमल ३ आदौ षट्समाजे
षट् प्रकृत मुख्या अभूवन् ॥
ततस्तेषां द्वितीय तृतीय पुत्रयोः
कुलस्य हृद्धा क्रमेण सहज कोमल
इति संज्ञा जाता प्रकृत मुख्य कुले
दानग्रहणाभ्यां सहज इति संज्ञा
कोमल मुख्य कुले दानग्रहणाभ्यां
कोमल इति संज्ञा भवति सहजः
सहजेन कोमलः कोमलेनापि
कुलं कृत्वा तत्तद्भावापन्नो भवतः
पितृकुलानुसारेण ज्येष्ठ ॥
पुत्राणां कुलस्य जन्ममुख्य जन्म
कनिष्ठादि संज्ञा प्रकृतमुख्य

कुलस्य ह्रास वृद्धी न भवतः सहज
मुख्य कुलस्य ह्रास वृद्धी भवतः।
कोमल मुख्य कुलस्यापि ह्रास वृद्धी
न भवतः कनिष्ठ कुलस्य मुख्यत्वे
छभाया कुलस्य कनिष्ठत्वे भवति
मध्यांश कुलस्य स्थिरतरत्वे कनिष्ठ
द्वितीय पुत्रः वाडि तेत्रज इति
संज्ञां प्राप्नोति मुख्यतृतीय ॥
पुत्रस्य द्वितीय पुत्रः तेत्रज इति
संज्ञामपि प्राप्तमर्हति छभाया
द्वितीय पुत्र मध्यांश द्वितीय।
पुत्रयोः कुले ह्रास वृद्धी नस्तः
सर्वे कुलीनाः कुलनाशात् वंश
ज भावा पन्ना भवन्ति ॥
आदौ यदि पितृपर्यायाय अथ
वा मौलिकाय कन्यां दद्यात्तदा तेन।
प्रामाणिक संज्ञे भवति पश्चात्
कुलकर्म कर्तव्यं तद्यथा मुख्य
स्य कन्यायाः प्रदानेन स्याः छेय इति
संज्ञा षष्ट कन्यावधि गरछे इ
इति संज्ञा भवति अन्य कुलानां
ज्येष्ठ कन्यायाः प्रदाने तस्या ॥
आकृतिरिति संज्ञा तदनंतरं
यावत् कन्यानां प्रदाने तासां।
क्रमेण प्रतिसारणी जघन्या इति
संज्ञाद्वये भवति आत्मसम ॥
कुलीनाय आकृति नाम कन्यादाने

कुलस्य श्रेष्ठत्वे अनुज कन्या
ग्रहणात्तु कुलह्रासो भवति मुख्यस्य
गरछे इति नाम्नी कन्या अन्या।
कुलीनस्य प्रतिसारणीच कन्या
मौलिको वंशजश्च गृहीत ॥
मर्हति उत्तम मध्यमाधमकर्मभिः
शौर्यसमावेशनिंदा इतित्रये
कुलस्यांश कर्म पूर्वं ॥
विपर्याये विवाहो जातः ॥
पुरन्दर वसैनेषो त्रयोदश ॥
पर्यायावधि श्रेणी पर्यायवंश
भ्रमकृत कुलोद्धरणे कृते यथा
विपर्याये कुले नास्तिनकुले
रेउ पिंडेयाः ॥ अथ
मुख्येतर कुलीनानां याणि।
देनवाः देवीगंगा तथा गौरी ॥
भैरवी भास्करी तथा वलायी ॥
वेडिदासी च सम्भेते कुलकेंदकाः
अपिच श्रीनाथी श्रीकरी विस्तु
दासी हृदयएव च केदंबीच स
दानंदी षडेते कुलकेंदकाः ॥
इति कुलाचार्य्य कारिका ॥
अथ मुख्य कुलीनस्य कार्य्यस
च आगछे इ अर्थादग्रिमा कन्या
आत्मतुल्याय द्वितीया कनिष्ठ
कुलीनाय तृतीया छभाया नाम
कुलयुक्ताय चतुर्थी मध्यश्रेष्ठ नाम



कुलविशिष्टाय अथवा मुख्यस्तृतीय
पुत्रमध्यांशा कुलीनाय पंचमी
तेनज नामकुलश्रुकाय दद्यात
तदनेतर जानानो गच्छेद् इति
सेन्नाना: मौलिक मध्यांशा ॥
द्वितीयपुत्र मुख्य कुलीनेभ्यो।
दातुमर्हति सर्ववादो मुख्य॥
कुलीनस्याग्रिमो कन्यां ततः क
निष्ट कुलीनस्य कन्यां ततो मध्यां
शा इति नामकुलश्रुकस्य कन्यां
ततो जन्मतेनज इति नामकुलवि
शिष्टस्य कन्यां गृह्णीयात अथ कनि
ष्ट कुलीनस्य कार्य्यस प्रथमां कन्यां
श्चात्मतुल्य कुलीनाय द्वितीयां
तेनज इति नाम कुलश्रुकाय।
दद्यात मुख्य तृतीय पुत्राय॥
मध्यांशा नाम कुल श्रुकाय अथवं
मुख्य द्वितीय पुत्राय कन्यां दत्तु
मर्हति मुख्य कुलीनस्य द्वितीयां
कन्यां अथवा कनिष्ट कुलीनस्य
प्रथमां गृह्णीयात ततो।
मुख्य कुलीनस्य तृतीय पुत्रस्य
मध्यांशा नाम कुलश्रुकस्य कन्यां
गृह्णीयात अथ कुभाया ॥
कुलीनस्य कार्य्य समध्यांशा
नामकुल विशिष्टाय प्रथमां।
कन्यां मध्यांशा इति कुल॥

श्रुकानुजाय अर्थात वा इतेनज
नामकुल विशिष्टाय द्वितीयां
दद्यात मुख्य कुलीनस्य तृतीय
कन्यां अथवा कनिष्ट कुलीनस्य
प्रथमां कन्यां गृह्णीयात ततः
तेनज नामगल विशिष्टस्य कन्यां
गृह्णीयात अथ मुख्य ॥
तृतीय पुत्रस्य मध्यांशा नाम।
कुलीनस्य कार्य्य सप्रथम कन्यां
जन्मतेनज नाम कुल विशिष्टाय
द्वितीयां मध्यांशा कुल विशिष्टस्य
द्वितीय पुत्राय दद्यात कनिष्टस्य
प्रथम कन्यां ततस्तेनज कुलश्रुकस्य
प्रथमां कन्यां ततस्तेनजानुज
कुलीनस्य प्रथमां कन्यां।
गृह्णीयात मुख्यस्य तृतीय कन्यां
ग्रहणे तस्य महत कर्म ॥ (स्प
अथ जन्मतेनज नाम कुलीन
कार्य्य स प्रथमां कन्यां मुख्य।
कुलीनस्य चतुर्थ पुत्राय अथवा
मध्यांशा नाम कुल विशिष्टस्य
द्वितीय पुत्राय द्वितीयां तेनज
नामकुल विशिष्टस्य द्वितीय पुत्राय
दद्यात मुख्य कुलीनस्य पंचम
कन्यां अथवा मध्यांशा नाम
कुलीनस्य प्रथम कन्यां गृह्णीयात
अथ कनिष्ट कुलीनस्य द्वितीय

पुत्रस्य कार्य्य सम्रात्म तुल्याय।
अथवा तेनज नामकुलविशिष्ट
द्वितीय पुत्राय प्रथमां कन्यां द
द्यात मुख्य चतुर्थ पुत्र जन्मतेनज
नाम कुलश्रुकस्य प्रथमां अथवा
कनिष्ट नाम कुलीनस्य द्वितीयां कन्यां
गृह्णीयात अथ कुभाया नाम
कुलीनस्य द्वितीय पुत्रस्य कार्य्य
सम्रात्मतुल्याय अथवा तेनज
नामकुल विशिष्ट द्वितीय पुत्राय
प्रथमां कन्यां दद्यात तेनज
नामकुल विशिष्टस्य प्रथमां कन्यां
अथवा कुभाया नामकुलश्रुक
द्वितीयां गृह्णीयात अथ ॥
मध्यांशा नाम कुलीनस्य द्वितीय
पुत्रस्य कार्य्य सम्रात्मतुल्याय।
अथवा तेनज नाम कुल ॥
विशिष्टस्य द्वितीय पुत्राय प्रथमां
कन्यां दद्यात तेनज नामकुल
विशिष्टस्य प्रथमां अथवा अन्य
कुलीनानां मध्यांशा नामकुल
विशिष्टस्य वा द्वितीयां कन्यां॥
गृह्णीयात अथ तेनज ॥
नामकुलीनस्य द्वितीय पुत्रस्य
कार्य्य सम्रात्मतुल्याय अथवा
वेशजाय प्रथमां कन्यां दद्यात
मध्यांशा नामकुल विशिष्टस्य।

द्वितीय पुत्रस्य प्रथमां कन्यां
अथवा तेनज नामकुलविशिष्टस्य
द्वितीयां गृह्णीयात अथ।
मध्यश्रेष्ट नामकुलीनस्य कार्य्यस
मध्यश्रेष्ट पुत्र वा कुभाया मध्यांशा
नामकुलीनाय प्रथमां मध्यांशा कुल
विशिष्टस्य द्वितीय पुत्राय तेनज
नामकुलीनाय द्वितीयां कन्यां
दद्यात मुख्य कुलीनस्य चतुर्थी
कन्यां अथवा कनिष्ट कुलीनस्य
प्रथमां कन्यां गृह्णीयात ततः (मो
तेनज नामकुल विशिष्टस्य प्रथ
कन्यां गृह्णीयात ततः तेनजानुजः
कुलीनस्य अग्रिमां कन्यां ॥
गृह्णीयात ॥ अथ मध्यश्रेष्ट
पुत्र वा कुभाया मध्यांशा नाम।
कुलीनस्य कार्य्य सतेनज ॥
नामकुल श्रुकाय प्रथमां कन्यां
दद्यात कनिष्ट कुल विशिष्टस्य
अथवा कुभाया नामकुलश्रुकस्य
किंवा मध्यश्रेष्ट कुलीनस्य प्रथमां
कन्यां गृह्णीयात ॥ (शान
अथ चतुर्हिंशाद् यिकसमदश
शकाद्देमत पित्रा तावत कुलीन
कुलाचार्य्य मतेन मुख्य कुलीनस्य
द्वितीय तृतीययोः कन्ययोः क्रमेण
ग्रहणेन तदलाभे शौर्य्य कुले



दानेनसमान कुले ग्रहणेनच
कनिष्ठ कुभार्या कुलया:।
पुरुषानुक्रमेणस्थिरतरत्वेनिर्णी
ते तद्यथाकनिष्ठ कुलवैषम्यनि
क्वचन केपि केपीकृया येपि
पुरुषत्रयादर्वाग् मनेवदोकृयिको
निषेधमिह नेच्छंते कमपितत्र
षड्भ्रातृजः सतःपितृपदेकथं
जननतोहिन शाम्यतिशाके
यद्यपदत्रि समवसथागणेपि
वेरणे तथा पर्याये परि।
पूरितेहि विषमे यत्न त्रयो॥
विंशके गोपीमोहनदेववंश
तिलकेना पूर्वकं षीमतानिर्णी
ते यदपीह तत्र घटकैः सर्वैः
कुलीने मर्मतं कनिष्ठषड्भ्रातृ
कुलस्यतद्दत स्वकेयिकाया॥
मिदमेवमूलं स्वादानतःपित्र्य
पदस्यलाभो ज्येष्ठत्वभावःपुरु
षक्रमेण कृयिकाया मशक्तस्य
दानेचेत प्रवलं भवेत ॥
पर्यायस्य समानस्य ग्रहणाद।
पि तिष्ठति शौर्य्यं निंदासमावेश
त्रिविधो ऽपकुलस्यवै ॥
तस्यध्वंसो नहि भवेयत्नतो।
रक्षितस्यहि अत्र यद्यन्यथा॥
भावोभवेदपि यथा विधि

क्रमागतेषु वंशेषु तदाहानि
र्भविष्यति सर्वैः कुलज्ञैश्च
कुलीनवर्गे गोष्ठी पतितो॥
पुरतः सहर्षैः इदेहि पत्रे।
लिखितं प्रयत्नात निर्णीत एव
प्रचलिष्यतीति अथवंगज॥
कुलीनाः वसुवंशाच गुणोद्दे
नाम्नालक्ष्मण भूषणोघोषश्च
समाख्यातश्चत्तभुज महाकृती
दशरथोगुहकश्चैव मित्र ॥
स्वासपति स्तथा एतेषामादि
कुरुषनिर्णयो यथागोतमगोत्रे
सर्वादोदशरथवसुस्ततोकृष्णवसु
परमवसुको कृष्णवसुदक्षिणराढ
ख्यातस्तस्यसुतः भववसुतत्सुतः
हंसवसुः तत्सुताः शुक्तिमुक्ति
अलंकारवसुकाः अलंकारवसुः
राढात वंगेगतः तस्य वंगेकुल
हानिर्जाता तस्यसुतः मधुवसुः
तत्सुतः गुणाकरवसुः तत्सुता
अनंतादयः दशरथसुतःपरमवसु
स्तत्सुतो लक्ष्मणवसु भूषणवसुकौ
वंगख्यातौ सोकालीन ॥
गोत्रेमकरंद घोषसुतो ॥
भवनाथघोष सभाषित घोषौ
भवनाथघोषोदक्षिणराढख्यातः
सुभाषितघोषो वंगख्यातःतस्य

सुतश्चत्तभुजघोषः विश्वामित्र
गोत्रेसर्वादो कालीदासमित्र
सुतो अश्वपति मित्रश्रीधरमित्रौ
श्रीधरमित्रो दक्षिणराढख्यातः
अश्वपतिमित्रो वंगख्यातस्तस्य
सुतस्त्वाकरपतिमित्रः इतिवंगज
कुलाचार्य्यग्रंथः कुलदीपिका
कुलीनकः पुं वनमुद्गः इति
हेमचंद्रः ॥
कुलीनसं क्लीं जलं इतिहेमचंद्रः
कुलीरः पुं कर्कटः कांकड़ा॥
इतिभाषा इत्यमरः कर्कटराशिः
इतिज्योतिषं ॥ तः
कुलीरशृंगी स्त्री कर्कटशृंगीव
इतिरत्नमाला ॥
कुलीरादः पुं कर्कटशिशुःतत
पर्य्यायः स्पराविः२ इति
त्रिकांडशेषः ॥
टीकासारसुंदरी ॥
कुलकं क्लीं जिह्वमलं इति
हेमचंद्रः ॥
कुलकगुंजा स्त्री उल्काग्निःइति
हारावली ॥
कुलेश्वरः ॥
इति शब्दमाला॥
कुलोत्कटः पुं ॥
कुलीनाश्वः इति ॥

शब्दचंद्रिका उत्कटकुलोद्भवेत्रि
कुल्फः पुं क्लीं रोगः गुल्फपुं
इत्युणादिकोषः ॥
कुल्मलं क्लीं पापंइतिसिद्धांत
कौमुद्या मुणादिवृत्तिः ॥
कुल्माषं क्लीं कांजिकेइत्यमरः
कुल्माषः पुं यावकःइत्यमरः
वोरवधान्यं कुलत्थ इत्यन्ये
माषाकृति पत्रःकाश्मीरेषु तुलसी
इतिख्यातः इति सुभूतिःइति
भरतराजमाष इत्यन्य इति
नयनानंदः माषादिमिश्रमर्द्दस्वर
भक्तः खिचडी इतिख्यातश्चइति
लिंगादिसंग्रह टीकायांभरतः
पाचित माषादि रिति भीमः
इतिसारसुंदरी अर्द्धस्विन्न ॥
गोधूमचनकादयः अस्यगुणाः
गुरुत्वं वातकारित्वं॥
रोगविशेषः इति शब्दरत्नावली
वनकुलत्थः इतिरत्नमाला
कुल्माभिषुतं क्लीं कांजिके
इत्यमरटीकायांस्वामी ॥
कुल्मासं क्लीं कुल्माषं इत्यमर
टीकायांभरतः ॥
कुल्यं क्लीं अस्थि इत्यमरः॥
अष्ट द्रोण ॥
परिमाणं ॥ संपूर्ण ॥



आमिषे इति मेदिनी ॥
कुल्यः त्रि कुलोद्भवः कुलहितः
मान्ये पुं इति मेदिनी ॥
कुल्या स्त्री क्षुद्रा कृत्रिमा नदी
इत्यमरः पयःप्रणाली पयनाला
इति भाषा जीवंतिकौषधिः।
नदीमात्रं इति मेदिनी कुलसी
इति हलायुधः स्थूलवार्ताकुः
इति रत्नमाला ॥
कुरे क्ली उत्पले जलजपुष्पमा
त्रे। इति हेमचंद्रः ॥
कुवकालुका स्त्री चोलीशाके
इति राजनिर्घंटः ॥
कुरंग क्ली सीसकं ॥ इति
राजनिर्घंटः ॥
कुवचः त्रि कुवादः परदोष।
कथनशीलः। इत्यमरः ॥
कुवज्रकं क्ली वैक्रांतमणिः इति
राजनिर्घंटः ॥
कुवरः पुं तुरवः इत्यमरः ॥
टीकायां राय मुकुटः ॥
कुवलं क्ली उत्पलं मुक्ताफले।
वदरीफले इति मेदिनी ॥
कुवलयं क्ली उत्पलं इत्यमरः।
नीलोत्पलं इति राजनिर्घंटः।
कुवलयापीडः पुं कंसस्य हस्तिरूपो
दैत्यविशेषः इति श्रीभागवते ॥

कुवलयिनी स्त्री उत्पलिनी इति
राजनिर्घंटः ॥
कुवलाश्वः पुं धुंधुमारराजः इ
हेमचंद्रः ॥
कुवली स्त्री कोलिवृक्षः इति
रत्नमाला ॥
कुवादः त्रि कुवचः परदोष॥
कथनशीलः इत्यमरः ॥
कुवाहुलः पुं उष्ट्रः इति॥
शब्दचंद्रिका ॥
कुविंदः पुं तंत्रवायः स तु शूद्रा
गर्भे विश्वकर्मणो जातः इति
ब्रह्मवैवर्तपुराणे ॥
कुहेलिकृत पुं पूतिकः कारक
इति भाषा इति शब्दचंद्रिका।
कुवेणी स्त्री मत्स्यधानी खालइ
इति भाषा इत्यमरः कुत्सिता
वेणी निंदित वेणी नारी च॥
कुवेरः पुं देवताविशेषः स तु
विश्रवो मुने रिडविडा भार्यायो
जातः धनपतिर्नरदिग्पतिश्च
इति श्रीभागवते त्रिचरणे ॥
ऽष्टदंष्ट्रोऽयं जातः कुत्सिते ॥
वीरशरीरे मस्यसः तथाववाउ
मार्कंडेय पुराणे कुत्सायां ॥
क्विति शब्दोऽयं शरीरे वेरे
मुच्यते कुवीरः कुशरीरत्वात्॥

नाम्नातोनवसोत्रेकितः इत्यमर
टीकायां भरतः तत्पर्य्यायः ॥
श्रावकसखः २ यक्षराट् ३ रक्षकेश्वरः
४ मनुष्यधर्म्मा ५ धनदः ६ राजराजः
७ धनाधिपः ८ किन्नरेशः ९ वैश्र
वणः १० पौलस्त्यः ११ नरवाहनः १२
यक्षः १३ एकपिंगः १४ ऐलविलः
१५ श्रीदः १६ पुण्यजनेश्वरः १७
इत्यमरः हर्य्यक्षः १८ अलकाधिपः
१९ इति जटाधरः नंदीवृक्षः ॥
इति मेदिनी अर्हदुपासक ॥
विशेषः इति हेम चंद्रः ॥
कुवेरः त्रि मंदः इति धरणी ॥
कुशरीरः इति त्रिकांड शेषः ॥
कुवेराचलः पुं कैलासपर्वतः
इति त्रिकांड शेषः ॥
कुवेराद्रिः पुं कैलासपर्वतः।
इति जटाधरः ॥
कुवेराक्षी स्त्री पाटलावृक्षः॥
इत्यमरः लताकरंजः सित॥
पाटलिकावृक्षः इति राजनिर्घंटः
कुवेलं क्ली कुवलयं इति॥
हेमचंद्रः ॥
कुश इ कि हुतौ। इति
कविकल्पद्रुमः ॥
कश इ रय श्लिषि श्लेषालिंग इति

यावत् इति कविकल्पद्रुमः ॥
कुशं क्ली पुं स्वनामख्यात तृणं
तत्पर्य्यायः कुथः २ दर्भः ३॥
पवित्रं ४ इत्यमरः याज्ञिकः ५
हस्वगर्भः ६ वर्हिः ७ तस्योत्पत्ति
र्यथा वर्हिष्मती नाम पुरी सर्व्व
संपत्समन्विता न्यपतन् यत्र
रोमाणि यज्ञस्यांगं विधुन्वतः
कुशकाशास्त एवासन् शश्वद्धरित
वर्च्चसः ऋषयो यैः पराभाव्य
यज्ञघ्नान् यज्ञमीजिरे इति
श्रीभागवते ॥
कुशं क्ली जले इति मेदिनी।
इति मेदिनी द्वीपभेदः ॥
सतुघृत समुद्रेणावृतः तत्र देव
निर्मितोऽग्निस्तंभः कुशस्तंबोऽस्ति
तदधिपः प्रियव्रत राजपुत्रो
हिरण्यरेताः तत् द्वीपं विभज्य
सप्तपुत्रेभ्यो दत्तवान् तेषां ॥
नामानि यथा वसुः १ वसुदानः २
दृढरुचिः ३ नाभिगुप्तः स्तुत्यव्रतः
५ विप्रनामा ६ देवनामा ७ यथा
वर्षेषु सप्त सीमा गिरयः यथा
वभ्रुः १ चतुःशृंगः २ कपिलः ३
चित्रकूटः ४ देवानीकः ५ ऊर्द्धरोमा
६ द्रविणः ७ सप्तनद्यश्च यथा

२सकुल्या २ मिश्रविंदा ३ कृतवेदा
३ देवगर्भा ४ घृतच्युता ५ मधु ॥
माला ? तत्र स्थिताः कुशल
कोविदाभियुक्त कुलक संज्ञाः
क्रमेणब्राह्मणक्षत्रियवैश्यशूद्राः
भगवंतमग्निरूपिणं आसांनदीनां
पयोभिर्यजंते इति श्रीभागवतं।
कुशः त्रि पापिष्ठः मत्तः इति
मेदिनी ॥
कुशपः पुं पानपात्रं इत्युणादि
कोषः ॥ (ला
कुशपुष्पं क्ली ग्रंथिपर्णगंठिया
इति भाषा इतिरत्नमाला ॥
कुशले क्ली कल्याणपर्य्याप्तिः
पुण्ये शिक्षितेत्रि इत्यमरः ॥
कुशलवौ पुं एकयोस्त्वारामपुत्रौ
इतिहेमचंद्रः तयोर्नामकारणं॥
यथा यस्तयोः प्रथमे जातः स
कुशैर्मंत्र संस्कृतैः निर्मार्जनेयो
नाम्ना हि भविता कुश इत्यसौ ॥
यश्चावरजयस्तासीलवेणानसमाहि
तः निर्मार्जनीयो वृद्धाभिर्नाम्ना स
भविता लवः एवं कुशलवौ ॥
नाम्ना यमौ तौ संबभूवतुः भगव
त् कृतनामानौमुखिनावदयोव
इतिरामायणं ॥
कुशलप्रश्नः पुं कुशलजिज्ञासा

तत्पर्य्यायः कौशली २ इति
त्रिकांडशेषः ॥
कुशली स्त्री अश्मंतक वृक्षः
लडामलिका इतिवैद्यके ॥
कुशस्थलं क्ली कान्यकुब्जदेशः इति
हेमचंद्रः ॥
कुशस्थली स्त्री द्वारिका इति
जटाधरः ॥
कुशास्त्री रज्जुः इति मेदिनी ॥
मधुकर्कटिका इतिशब्दचंद्रिका
वल्या इति हेमचंद्रः ॥
कुशाकरः पुं अग्निः इति
शब्दमाला ॥
कुशाग्रीय मतिः त्रि तीक्ष्णबुद्धिः
तत्पर्य्यायः सूक्ष्मदर्शी २
तत्कालधीः ३ प्रत्युत्पन्नमतिः
४ इतिहेमचंद्रः सूक्ष्मायो ॥
बुद्धे स्त्री ॥
कुशारणिः पुं दुर्वासाः इति॥
त्रिकांडशेषः ॥
कुशाल्मलिः पुं रोहितकवृक्षः
इतिराजनिर्घंटः ॥
कुशाक्षः पुं वानरः इति ॥
शब्दमाला ॥
कुशिंशपा स्त्री कपिलशिंशपा
इति राजनिर्घंटः ॥
कुशिकः पुं मुनि भेदः। सत

जमदग्निपिता फालः सर्जवृक्षः
विभीतकवृक्षः इतिहेमचंद्रः
अश्वकर्णवृक्षः इतिराजनिर्घंटः
तैलशेषः इतिविश्वः केकरे ॥
त्रि इति शब्दमाला ॥
कुशिते त्रि जलमिश्रिते ।
इत्युणादिकोषः ॥
कुशी स्त्री फालः इतिमेदिनी।
कुशी पुं वाल्मीकिमुनिः इति
हेमचंद्रः ॥ (मर
कुशीदं क्ली वृद्धिजीविका इत्य
टीकायांभरतः ॥रक्तचंदने ॥
इति मुंडमालातंत्रे ॥
कुशीलवः पुं चारणः इत्यमरः
नटविशेषः कथकादिः ॥
इत्यन्ये देशांतरे कीर्तिं
प्रचारयतियः इत्यन्ये इति
भरतः ॥ (पुत्रौ
कुशीलवौ पुं एकयोस्त्वाराम
इति हेमचंद्रः ॥
कुशीसुशः पुं वाल्मीकिमुनिः
इति त्रिकांडशेषः ॥
कुशूलः पुं तुषानलः इति
जटाधरः धान्यागारं तत्पर्य्यायः
अन्नकोष्ठकः २ इतिहेमचंद्रः
ब्रीह्यगारं ३ इतित्रिकांडशेषः
कुशेशयं क्ली पद्मसारसयत्नी

इत्यमरः ॥
कुशेशयः पुं कर्णिकारवृक्षः
इतिशब्दचंद्रिका॥
कुशाग्र निष्कर्षे इयत्तापरिच्छेद
इतियावत् इतिकविकल्पद्रुमः
कुवलः त्रि कुशलः इत्यमर
टीकायां भरतः ॥
कुषाकुः पुं कपिः अग्निः अर्कः
परोत्तापिनि त्रि इतिमेदिनी
कुषितः त्रि जलमिश्रितः
इत्युणादिकोषः ॥
कुषीदं क्ली कुसीदं इत्यमर
टीकायां भरतः ॥
कुष्ठं क्ली विषभेदः इति
हेमचंद्रः औषधविशेषः कुड
इतिभाषा तत्पर्य्यायः व्याधिः
२ पारिभाव्यं ३ व्याप्यं ४ पाकलं
५ उत्पलं ६ इत्यमरः वाप्यं
७ आप्यं ८। इतितट्टीका ॥
जरणं ९ इतिरत्नमाला रुजं
१० गदः ११ आमयः १२ पारिभद्रकं
१३ रामं १४ वाणीरजं १५ पावनं
१६ कुत्सितं १७ पाकलं १८
पामकं १९ अस्यगुणाः कटुत्वं
उष्णत्वं तिक्तत्व कफवायुकुष्ठ
रोग विसर्प विषकंडू खर्जूदद्रु
नाशित्व कांतिकारित्वंच इति



राजनिर्घण्टः श्वासकासज्वरहिक्का
नाशित्वं इति राज वल्लभः
स्वनामख्यात रोगः कुठ इति
भाषा तत्पर्य्यायः श्वित्रं २।
इत्यमरः श्वेते ३ श्वेत्रं ४ इति।
तट्टीका तस्य निदान पूर्व्विका
संप्राप्ति र्यथा विरोधी न्यन्न ॥
पानानि द्रव स्निग्ध गुरूणि च भज
ता मागतो छर्द्दि वेगा न्यान्यान्
प्रतिघ्नतो व्यायाममति सेतायमति
भुक्ता निषेविणां। शीतोस्ललंघ
ना हारान् क्रमेमुक्ता निषेविणां
वर्म्म श्रम भयार्त्तानां द्रुतं शीतांबु
सेविनां अजीर्णाध्यशिनां चैव।
पंचकर्म्मापचारिणां नवान्न दधि
मत्स्याति लवणाम्ल निषेविणां
मांस मूलक पिष्टान्न तिल क्षीर।
गुडाशिनां व्यायामे चाप्यजीर्णेन्न
निद्रां च भजतां दिवा विप्रान्
गुरून् धर्षयतां पापकर्म च कुर्वतां
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांस
मंबुच दूषयंति सकुष्टानां सप्तको
द्रव्य संग्रहः अतः कुष्टानि जायंते
सप्तचैकादशैव तत् कुष्टानि सप्तधा
दोषैः पृथग्द्वंद्वः समागतैः ॥
सर्व्वेष्वपि त्रिदोषेषु व्यपदेशो।
ऽधिकत्वतः तस्य पूर्व्व रूपं यथा।
अति श्लक्ष्णः खरः स्पर्शः स्वेदास्वेदौ
विवर्णता दाहः कंडूस्त्वचि स्वापस्तोदः
कोठोन्नति श्रमः व्रणानामधिकं
शूलं शीघ्रोत्पत्तिश्चिरस्थितिः
रूढानामपि रूक्षत्वं निमित्तेऽल्पेपि
कोपनं रोमहर्षो ऽसृजः ॥
कार्ष्ण्यं कुष्ट लक्षणमग्रज तच्च
वातादिभेदेन अष्टादश प्रकारं ॥
तत्र सप्त महा कुष्टानि यथा।
कृष्णारुण कपालाभं यद्रुक्षं परुषं
तनुकापालं तोदवद्दुले तत्
कुष्टं विषमेस्मृतं १ रुग्दाह राग
कंडूभिः परीतं रोमपिंजरं ॥
उडुंवर फलाभासं कुष्टमौडुंबरं
वदेत् २ श्वेतं रक्तं स्थिरं ॥
स्त्यानं स्निग्ध मुत्सन्न मंडलं कृच्छ्र
मन्योन्य संसक्तं कुष्टं मंडल मुच्यते
३ कर्कशं रक्तपर्य्यंतं मंतः
श्यावं सवेदनं यदृष्य जिह्वा॥
संस्थान मृष्यजिह्वं तदुच्यते ४
सश्वेतं रक्तं पर्य्यंतं पुंडरीक ॥
दलोपमं सोत्सेधं च सरागं च
पुंडरीकं प्रचक्ष्यते ५ श्वेतं ॥
ताम्रं तनु च यद्रजो घृष्टं विमुंचति
प्रायश्चोरसि तत्सिध्ममलावू॥
कुसमोपमं ६ यत्काकणंतिका
वर्णमपाकं तीव्रवेदनं त्रिदोष॥

लिंगं तत्कुष्ट काकणं नैव
सिध्यति ७ एका दश
क्षुद्र कुष्टानि यथा अस्वेदनं।
महावास्तु यन्मत्स्यसकलोपमं
तदेव कुष्टं चर्म्माख्यं बहुलं ॥
हस्तिचर्मवत् श्यावं ॥
किणखर स्पर्श परुषं किटिभं
स्मृतं २ वैपादिकं पाणि पाद
स्फुटितं तीव्रवेदनं ३ कंडूमद्भिः
सरागैश्च गंडैरलसकं चितं ४।
सकंडूरागपिडकं दद्रुमंडलमुद्गतं
५ रक्तं सशूलं कंडूमत् स्फोटं ॥
यद्दलत्यपि तच्चर्मदलमाख्याते
संस्पर्शासहमुच्यते ६ सूक्ष्मा
वह्वाः पिडकाः स्राववत्यः ॥
पामेत्युक्ताः कंडूमत्यः सदाहाः
७ सैव स्फोटैस्तीव्रदाहैरुपेता ॥
ज्ञेया पाण्योः कच्छुरुग्रास्फिचोश्च
८ स्फोटाः श्यावारुणाभासा
विस्फोटाः स्युस्तनुत्वचः ९
रक्तं श्यावं सदाहार्त्ति शतारुः
स्याद्बहुव्रणं १० सकंडू पिडका॥
श्यावा बहुस्रावा विचर्च्चिका ११
इतिमाधवकरः ॥
कुष्टकेतु पुं भूम्याहुल्यः इति
राजनिर्घण्टः ॥
कुष्टगंधि क्ली एलवालुकं इति
राजनिर्घण्टः ॥
कुष्टघ्नः पुं हिलावली इति ॥
राजनिर्घण्टः ॥
कुष्टघ्नी स्त्री काकोडुंबरिका इति
राजनिर्घण्टः ॥
कुष्टनाशनः पुं वाराहीकंदः
गौरसर्षपः इतिराजनिर्घण्टः ॥
क्षीरीशवृक्षः इतिरत्नमाला ॥
कुष्टनाशिनी स्त्री सोमराजिः
इतिरत्नमाला ॥
कुष्ठलं क्ली कुत्सितस्थलं इति
संक्षिप्तसारव्याकरणं ॥
कुष्टसूदनः पुं आरग्वधः इति
राजनिर्घण्टः ॥
कुष्टहंता पुं हस्तिकंदः इति
राजनिर्घण्टः ॥
कुष्टहृन्त्री स्त्री वाकुची हाकुच
इति भाषा इति राजनिर्घण्टः॥
कुष्टसूदन पुं खदिरवृक्षः इति
त्रिकांडशेषः ॥
कुष्टारिः पुं विट्खदिरः इति
शब्दचंद्रिका पटोलः ॥
आदित्यपत्रः खदिरः ॥
गंधकः इति राजनिर्घण्टः ॥
न
कुष्टी त्रि कुष्टरोगयुक्तः यथा
कुष्टातिपातकी इति स्मृतितत्त्वे

कुष्मलं क्ली छेदने इत्युणादि।
कोषः॥
कुम्माण्डः पुं शिवस्यगणदेवताभेदः
तृणविशेषः इति मेदिनी।
फललताविशेषः कुमडा इति
भाषा तत्पर्य्यायः तृणावासः १
तिमिषः ३ ग्राम्यकर्कटी ४ इति
त्रिकाण्डशेषः कुष्माण्डकः ५॥
कर्कारुः ६ इत्यमरः कूष्माण्डकः
७ इति तट्टीका पुष्पफलः ८।
इति रत्नमाला कुष्माण्डी ९।
कर्कोटिका १० कुम्भाण्डी ११ ॥
बृहत्फला १२ सुफला १३ कुंचफ
ला १४ नागपुष्पफला १५ सुनी १६
अस्य फलगुणाः मूत्राघात प्रमेह
कृच्छ्राश्मरीनाशित्वं विण्मूत्रस्तम्भनत्वं
तृष्णार्त्तिशमनत्वं जीर्णगात्रपुष्टिप्रद
त्वं शुक्रवृद्धिकारित्वं स्वादुतरत्वं
अरोचकहरत्वं बलकारित्वं ॥
पित्तापहत्वं वल्लीफलानां ॥
मध्येप्रवरत्वञ्च इतिराजनिर्घण्टः
तस्यबालफलगुणाः पित्तहरत्वं
मध्यमफलगुणाः कफकारित्वं
अतिगुरुपाकित्वं पक्वफलगुणाः
लघुपाकित्वं उष्णत्वं क्षाररसत्वं
अग्निदीपनत्वं वस्तिशोधनत्वं ॥
सर्वदोषनाशित्वं हृद्यत्वं ॥

चित्तविकारिणः पथ्यत्वञ्च अस्य।
नाडिकागुणाः क्षार रसत्वं ॥
मधुरत्वं गुरुत्वं रूक्षत्वं रुचि।
कारित्वं वातकफाश्मरी शर्करा
रोगनाशित्वञ्च अस्य मज्जगुणाः
शुक्रकारित्वं पित्तनाशित्वं ॥
वस्तिशोधनत्वञ्च इतिराजवल्लभः
कूष्माण्डकः पुं कुष्माण्डः ॥
इत्यमरः ॥
कुष्माण्डी स्त्री उमा तपथी इति
हेमचन्द्रः कर्कारुः इति
राजनिर्घण्टः योगक्रियाविशेषः
इतिशब्दरत्नावली ॥
कुस ३१ य श्लेष ॥ इति ॥
कविकल्पद्रुमः ॥
कुसलं क्ली कुशलं इत्यमरटीका
कुसितः पुं जनपदः इति ॥
सिद्धान्तकौमुद्यां गुणादिवृत्तिः
कुसिदायी स्त्री कुसीदपत्नी ॥
इतिजटाधरः ॥
कुसिम्बी स्त्री शिंबी इति
राजनिर्घण्टः ॥
कुसीदं क्ली ऋणदानजीविका
वृद्ध्याजीवनं सद खातया ॥
वाडि देतया इत्यादि भाषा।
तत्पर्य्यायः अर्थप्रयोगः २ ॥
वृद्धिजीविका ३ इत्यमरः ॥

कुसीदके त्रि इतिमेदिनी ॥
कुसीदायी स्त्री कुसीद पत्नी इति
जटाधरः
कुसीदिकः त्रि वृद्धिजीवी तत
पर्य्यायः वार्द्धुषिकः २ वृद्ध्याजी
वः ३ वार्द्धुषिः ४ इत्यमरः ॥
कुसुमं क्ली पुष्पं ॥ फलं।
स्त्रीरजः नेत्ररोगविशेषः इति
मेदिनी ॥
कुसुमपुरं क्ली पुरविशेषः ॥
पटना इतिख्याते तत्पर्य्यायः।
पाटलिपुत्रं २ इतिहेमचन्द्रः ॥
कुसुममध्यं क्ली वृक्षविशेषः।
चालिता गाछ् इति भाषा इति
शब्दचन्द्रिका ॥ (ति
कुसुमाञ्जनं क्ली कुसुमाकारीरी
मलसंभवमञ्जनं तत्पर्य्यायः।
पौष्पकं २ रीतिपुष्पं ३ पुष्पकेतु ४
इत्यमरः राजनिर्घण्टोक्त गुण
पर्य्यायौ पुष्पाञ्जनशब्दे दृष्टव्यौ
कुसुमात्मके क्ली कुङ्कुमे इति
हारावली ॥
कुसुमाधिपः पुं चंपकवृक्षः ॥
इतिशब्दरत्नावली ॥
कुसुमाधिराट् पुं चंपकवृक्षः।
इतित्रिकाण्डशेषः ॥
कुसुमायुधः पुं कामदेवः इति

शब्दरत्नावली ॥
कुसुमालः पुं चोरः इति ॥
हारावली ॥
कुसुमासवं क्ली मधु इति ॥
राजनिर्घण्टः ॥
कुसुमेषुः पुं कामदेवः इत्यमरः
कुसुंभं क्ली स्वर्णं इतिमेदिनी।
पुष्पविशेषः कुसुमफुल इति
भाषा तत्पर्य्यायः कमलोत्तमं
२ वह्निशिखं ३ महारजनं ४
इत्यमरः यावकं ५ पीतं ६
पमोत्तरं ७ रक्तं ८ लोहितं ९
वस्त्ररंजनं १० अग्निशिखं ११
अस्य शाकगुणाः मधुरत्वं कटुत्वं
उष्णत्वं विण्मूत्रदोषमदनाशित्वं
दृष्टिप्रसादनत्वं रुचिप्रदत्वं
अग्निदीप्तिकारित्वञ्च इति।
राजनिर्घण्टः रूक्षत्वं कफवायु
नाशित्वं पित्तकारित्वञ्च ॥
तैलगुणाः कटुत्वं उष्णत्वं ॥
त्रिदोषकारित्वं गुरुत्वञ्च इति त्वं
राजवल्लभः कृमियक्ष्ममलनाशि
तेजोबलकारित्वञ्च बीजस्यास्य
गुणाः त्रिदोषकारित्वं शोषबलक्षय
कंडूकारित्वञ्च इतिराजनिर्घण्टः
कुसुंभः पुं कमण्डलुः इत्यमरः
महारजनवृक्षः इतिराजनिर्घण्टः



कुसृः पुं किंचुलकः इति हेमचंद्रः ॥
कुसूलः पुं कुस्मूलः इति कट प्राहार्थे भरतः ॥
कुसृतिः स्त्री शाठ्ये इत्यमरः ॥ इंद्रजाले इति हेमचंद्रः।
कुस्तुभः पुं विस्नुः इत्यमर ॥ टीकायां भरतादयः ॥
कुस्तुंवरी स्त्री धन्याके इत्यमर ॥ टीकायांभरतः ॥
कुस्तुंवुरु क्ली धन्याके इत्यमरः
कुस्म क ङ· बुद्धिकरणकदर्शने इषद्धास्ये इति कविकल्पद्रुमः
कुहू त क ङ· विस्मायने इति कविकल्पद्रुमः ॥
कुहू व कुत्र वैदिकप्रयोगोयं इति मुग्धबोध व्याकरणं ॥
कुहूः पुं कुवेरः इतिहेमचंद्रः
कुहकं क्ली माया तत्पर्य्यायः इंद्रजाले २ जाल ३ कुसृतिः ४ तद्युक्तेत्रि तत्पर्य्यायः धूर्त्तः। २ वंचकः ३ व्यंसकः ४ दांडाजिनिकः ५ मायी ६ जालिकः ७ इति हेमचंद्रः ॥
कुहकजीवीन् त्रि मायाजीवी वाजिकर इति भाषा इति महाभारते ॥


कुहकस्वनः पुं कुक्कुटपक्षीइति हेमचंद्रः ॥
कुहकस्वरः पुं कुक्कुटः इति॥ हारावली ॥
कुहनं क्ली मृद्भांड विशेषः। काचभाजने इषालो त्रि इति। मेदिनी ॥
कुहनः पुं मूषिकः सर्पः इति। हेमचंद्रः ॥
कुहना स्त्री दम्भचर्य्या इति मेदिनी लोभान्मिथ्येर्य्यापथ कल्पना इत्यमरः अर्थ लिप्सया मिथ्याचार भेदस्य संपादना ॥ दंभमात्र कृत ध्यान मौनादिः अर्थलिप्सया धर्मा श्रवणं इत्यन्ये इति भरतः ॥
कुहनिका स्त्री कुहना इति। शब्दरत्नावली ॥
कुहरं क्ली गह्वरे छिद्रे इति ॥ मेदिनी कर्णः कंठग्राहः गलः श्रोतिके इत्यजयपालः ॥
कुहरः पुं नागविशेषः इति॥ मेदिनी ॥
कुहरिते क्ली पिकालापः ॥ रतिध्वनिः इति मेदिनी रटिते इति विश्वः ॥
कुहलिः पुं पूगपुष्पिका पान

इति भाषा इति त्रिकांडशेषः ॥
कुहा स्त्री कटुकी ॥ इति शब्दचंद्रिका (कुटकिका) इति।
कुहूः स्त्री कुहूः इतिहेमचंद्रः
कुहूः स्त्री नष्टेंदुकलामावास्या इत्यमरः कोकिलालापः इति मेदिनी ॥
कुहूकंठः पुं कोकिलः इति शब्दरत्नावली ॥
कुहूमुखः पुं कोकिलः इति। त्रिकांडशेषः ॥
कुहूरवः पुं कोकिलः इति। राजनिर्घंटः ॥ [illegible] ॥
कुहूले क्ली सशल्यभूरंध्रः इति जटाधरः ॥
कुहेडिका स्त्री कुज्झटिका इति भूरिप्रयोगः ॥
कुहेडी स्त्री कुहेडिका इति। शब्दमाला ॥
कुहेलिका स्त्री कुज्झटिः इति त्रिकांडशेषः ॥
कुक्षः पुं कुक्षिः इतिसिद्धांतकौमुद्यामुणादिः ॥
कुक्षिः पुं उदरे इत्यमरः ॥
कुक्षिंभरिः त्रि आत्मंभरिः ॥ स्वोदरपारकः इत्यमरः ॥
कुक्षिरंध्रः पुं नलः इति राजनिर्घंटः ॥
कूण उ आर्त्तस्वरे इति॥ कविकल्पद्रुमः ॥
कून ग शब्दे इतिकविकल्पद्रुमः
कूः स्त्री पिशाची इतिशब्दमाला
कूकुदः त्रि सत्कृतालंकृतां ॥ कन्यां योददाति सः इत्यमरः ॥
कूचः पुं स्तनः इत्युणादिकोषः
कूचिका स्त्री तूलिका इति हेमचंद्रः ॥
कूजे हिक्कने इतिकविकल्पद्रुमः
कूजिते क्ली पक्षीध्वनिः इति हेमचंद्रः ॥
कूटक ङ· अप्रसादे अप्रदि॥ दानाभावे इति यावत् इति कविकल्पद्रुमः ॥
कूटत क दाहे मंत्रे इति॥ कविकल्पद्रुमः ॥
कूटः पुं अगस्त्यमुनिः इति शब्दरत्नावली ॥
कूटः पुं स्त्री गृहे इति ॥ शब्दरत्नावली ॥
कूटः पुं क्ली निश्चलः राशिः लोहमुद्गरः दंभः माया ॥ पर्वतशृंगे तुच्छः सीरावयवः यंत्रे अनृते इति मेदिनी ॥ भग्नशृंगवृषः इतिहेमचंद्रः



कैतवे इत्यमरः ॥
कूटकं क्ली फाले इत्यमरः ॥
कूटकः पुं कवरी इति
त्रिकाण्डशेषः मुरानामगन्धद्रव्य
इति शब्दमाला ॥
कूटकृत् पुं शिवः कायस्थः ॥
इति त्रिकाण्डशेषः कितवे त्रि ॥
कूटजः पुं कुटजवृक्षः इति
राजनिर्घण्टः ॥
कूटपूर्वः पुं हस्तिनो त्रिदोषज
ज्वरः इति त्रिकाण्डशेषः ॥
कूटपर्वा ऽपि क्वचित् पाठः ॥
कूटपालकः पुं पित्तज्वरः ॥
कुलालस्यपवनोकुमारेरपोयान् ॥
इति भाषा इति हारावली ॥ (हि
कूटयन्त्रं क्ली आमिषंदत्वामृगय
बन्धनार्थयन्त्रं स्थानयन्त्रेनिक्षिपेत
तत् फांद इति भाषा तत्
पर्यायः उन्माथः २ इत्यमरः ॥
कूटशाल्मलिः पुं शाल्मलिविशे
षः काशिमाला इति ख्यातः कुत्सित
शाल्मलिः अनृतशाल्मलिर्वा ।
इत्यन्ये इति भरतः ॥ तत्
पर्यायः रोचनः २ इत्यमरः ॥
राजनिर्घण्टोक्त गुण पर्यायौ ॥
रोहितक शब्दे द्रष्टव्यौ ॥ (ल
कूटस्थः त्रि एकरूपतया यः का
व्यापी सः इत्यमरः एकेनैव ॥
स्वभावेन निरवधि कालस्य ॥
व्यापकोयं आकाशादिः इति
भरतः आलनखः इति ।
राजनिर्घण्टः ॥ (हे
कूटस्थं क्ली व्याघ्रनखाख्यगन्ध
इति जटाधरः ॥
कूटसाक्षी त्रि मिथ्यासाक्षी इति
व्यवहारतत्त्वं ॥
कूटागारं क्ली वडभी तत्पर्यायः
चन्द्रशालिका २ इति त्रिकाण्डशेषः
स्त्रीणां क्रीडागारे इत्यादि कोड
टीका ॥
कुटार्थभाषिता स्त्री प्रबन्धकल्पना
कथारूपकथा इति भाषा इति
शब्दरत्नावली ॥
कूड शि चान्ने घनीभावे इति
यावत भेदे इति कविकल्पद्रुमः
कूडं क्ली भित्तिः देयाल इति
भाषा इति शब्दरत्नावली ॥
कूण त क संकोचे । इति ॥
कविकल्पद्रुमः ॥ (कल्पद्रुमः
कूण कड संकुचि इति कवि
कूणितः त्रि कूणितः रोगादिनाकुं
चितकरः इत्यमरटीकायां भरतः
कूणिका स्त्री शृङ्गं वीणामूलस्थ
वंशशलाका तत्पर्यायः ॥

कलिका २ इति हेमचन्द्रः ।
कूदरः पुं जातिविशेषः ॥ यथा
ब्राह्मण्यां ऋषिवीर्येण ऋतोः
प्रथम वासरे कुत्सिते चोदरे ॥
जातः कूदरस्तेन कीर्त्तितः ॥
तदशौचं विप्रतुल्यं पतितो ।
ऋतु दोषतः सद्यः कोटक ॥
संसर्गादधमो जगतीतले ॥
इति ब्रह्मवैवर्त्ते पुराणे ॥
कुद्दालः पुं कुद्दालवृक्षः
इत्यमरटीकायां रमानाथः ॥
कूपतक दौर्बल्ये अये षष्ठस्वरी
इति त्रिलोचनः सप्तमस्वरी इति
कविकल्पद्रुमटीकायां दुर्गादासः
कूपः पुं स्वनामख्यातो जलाधा
रः पातकुया इति भाषा तत्पर्यायः
अन्धुः २ प्रहिः ३ उदपाने ४ ।
इत्यमरः तस्य लक्षणं यथा
भूमौ खातोऽल्पविस्तारो गम्भीरो
मण्डलाकृतिः बद्धोऽबद्धः स कूपः
स्यात् तदम्भः कौपमुच्यते इति
भावप्रकाशः तज्जलगुणाः वात
कफनाशित्वं अग्निदीपनत्वं ।
लघुत्वं पित्तवर्द्धनत्वं क्षारत्वं ।
शीतकाले उष्णत्वं उष्णकाले ॥
शीतत्वं वसन्तकाले प्रशस्तत्वञ्च
इति राजवल्लभः गर्त्तः गुणवृक्षः
नदीमध्यस्थितो वृक्षः पर्वतो वा
इत्युणादिकोषः कूपकः ॥
कूपा इति भाषा मृत्माने इति
मेदिनी ॥
कूपकः पुं नौकागुणबन्धनस्तम्भः
मास्तुल इति भाषा इत्यमरः
तैलपात्रे कुपा इति भाषा
कुकुन्दरे उदपाने चिता ॥
इति मेदिनी ॥
कूपाङ्गः पुं रोमाञ्चः इति
शब्दरत्नावली कूपाकोऽपि पाठः
कूपारः पुं अकूपारः इत्यमर
टीका कूवारोऽपि पाठः ॥
कूपिका स्त्री अम्भोगतोपल
जलमध्यस्थित पर्वतादिः इति
मेदिनी ॥
कूमं क्ली सरोवरः इति जटाधरः
कूरः पुं भक्ते इति हलायुधः
कूर्च्चः पुं क्ली भ्रुवोर्मध्ये कूर्दयमध्य
स्थाने इत्यमरः मयूरपुच्छमुष्टिः
कुशमुष्टिः इति हरिवंशे पुण्यक
व्रतटीकायां नीलकण्ठः कठिने
श्मश्रु कैतवे इति मेदिनी ॥
विकत्थने दम्भः शिरोपरिभागः
सतुअङ्गुष्ठाङ्गुलि मध्यस्य उपरि
भागः इति हेमचन्द्रः कूर्चबीजे
इति तन्त्रे ॥



कूर्कः पुं शीर्षं इति धरणी।
कूर्कशिरः स्त्री अस्थिस्कंधः गुरु
मुड़ा इति भाषा इतिहेमचंद्रः ॥
कूर्च्चशीर्षः पुं जीवकवृक्षः सतु
अष्टवर्ग मध्य पठितौषधिः ॥
इत्यमरः ॥
कूर्कशीर्षकः पुं जीवकः इति
राजनिर्घंटः ॥
कूर्कशी पुं नारकेल वृक्षः ॥
इति राजनिर्घंटः ॥ (सा
कूर्च्चिका स्त्री स्त्रीविकृतिक्षीर
इति भाषा इत्यमरः साहिया
यथा दध्नासहच यतपक्वक्षीरं
सा दधिकूर्च्चिका तक्रेण पक्वेय
तक्षीरं सा भवेतकूर्च्चिका इति
भरतः सूचिका सेच इति भाषा
तूलिका तुली इति भाषा ॥
कूनैलः कैड़ि इति भाषा ॥
कूंचिका कूंजि इति भाष इति
हेमचंद्रो मेदिनीच ॥
कूर्द न क्रीडायां इति ॥
कविकल्पद्रुमः ॥
कूर्दनं स्त्री क्रीडा खेला ॥
इत्यमरः ॥
कूर्दनी स्त्री चैत्रीपूर्णिमा सातु
कामदेवोत सव तिथिः इति
त्रिकांड शेषः ॥

कूर्यं स्त्री भ्रूद्वय मध्यस्थं इति ॥
हेमचंद्रः ॥
कूर्पासः पुं कञ्चुकः वारवाणः
इति हेमचंद्रः ॥
कूर्म्मः पुं जलजंतु विशेषः ॥
काछिम इति भाषा तत्पर्य्यायः
कच्छपः २ पेचनरवः ३ गुप्तः ४
पेचगुप्तः ५ पीवरः ६ कमठः ७
जलगुल्मः ८ इति जटाधरः ॥
अस्य मांसादि गुण पर्य्यायांतरौ
कच्छपशब्दे द्रष्टव्यौ वातवायु
विशेषः यथा उन्मीलने स्मृतः
कूर्म्मो भिन्नांजन समप्रभः इति
शारदातिलक टीका ॥
मुद्राविशेषः यथा वामहस्तस्य
तर्जन्या दक्षिणस्य कनिष्ठया ॥
तथा दक्षिण तर्जन्या वामांगुष्ठेन
योजयेत उन्नतं दक्षिणं गुष्ठं ॥
वामस्य मध्यमादिकाः अंगुली
योजयेत पृष्ठे दक्षिणस्य ॥
करस्यच वामस्य पितृ तीर्थेन
मध्यमानामिकेतथा अधोमुखेच
तेकुर्य्याद्दक्षिणस्य करस्यच ॥
कूर्म्मपृष्ठ समं कुर्य्याद्दत्तपाणिंच
सर्वतः कूर्म्म मुद्रेयमाख्याता।
देवता ध्यान कर्म्मणि इति
तंत्रसारः सत्यशो ॥

समुद्रमेथन कालेमंदर पर्वत
धारणार्थं कच्छभरूपभगवदवतार
विशेषः यथा क्षीराद मध्ये
भगवान् कूर्म्मरूपी स्वयं हरिः
इतिपद्मपुराणं अपिच ॥
विलोक्य विघ्नेशविधिं तदेश्वरो
दुरंत वीर्य्योऽवितथाभिसंधिः
कृत्वा वपुः काच्छप मद्भुतमहत्
प्रविश्य तोये गिरि मुज्जहार।
इति श्रीभागवते ॥
कूर्म्मचक्रं स्त्री कृषिकर्म्मोक्त
कच्छपाकारचक्रं तस्याकारो।
यथा प्राङ्मुखो भगवान् देवः
कूर्म्मरूपी व्यवस्थितः आक्रम्य
भारतंवर्षं नवभेदं यथाक्रमे
तत्रनक्षत्र न्यास क्रमः मध्य
प्रागग्नि याम्यादि कृत्तिकादित्रय
त्रयैः क्रूरवेधयुते सोस्त्रपीड़िते
तन्निवासिनः तत्र वेधो यथा
पूर्वापरे भवेद्वेधो वेधश्चोत्तरे।
दक्षिणे ईशाने राक्षसे वेधो वेध
आग्नेय मारुते तारात्रयान्विते
तत्र सौरिं यत्नेन चिंतयेत ॥
तत्र वेधादिजन्य दोषाः अतिवृ
ष्टिरनावृष्टिः शलभामूषिकाः खग
गाः स्वचक्रं परचक्रंच संभेते
संभवेतिच एवं देश गृह ग्राम

क्षेत्र नामतैत्तो वेदेत् तथाच।
यत्रनक्षत्रे द्विजपार्थिव नामभाः
दृष्टेन समहोत् पाताः स्वादिश
तत्रपीड़येत् सौरिर्विलाधिपो ॥
दुष्टः स्वल्पवीर्य्यः शुभावहः
एकदा पीड़येद्यत्र भानुजः कूर्म्म
येचकेतत्र स्थाने महाविघ्नो ॥
जायते नात्रसंशये दुष्टस्थाने
गतेचेद्र कर्तव्यं शांति पौष्टिके
तच्चक्रमध्यस्था देशाः मध्ये
सारस्वता मत्स्याः शूरसेनाः ॥
समाख्याः पेचाल शाल्वमाण्डव्य
कुरुक्षेत्र गजाह्वयाः मरुनैमिष
विंध्याद्रि पांचालाषाः सयामुनाः
काश्यपऽयोध्या प्रयागश्च गया
वैदेहकादयः तत्र पूर्वस्य ॥
देशाः प्राच्यो मागध शोणश्च
वारेंद्री गौड़राढकाः वर्द्धमान
तमोलिप्त प्राग्ज्योतिषोदयाद्रयः
तत्राग्निकोणस्थदेशाः ॥
आग्नेय्या मेरा वेणापवंगत्रिपुर
देशालाः कलिंगौड्रांध्रकिष्किंध्या
विदर्भ शवरादयः तत्र ॥
दक्षिणस्थदेशाः दक्षिणोऽवेति
महेंद्र मलया ऋष्यमूककाः
चित्रकूट महारण्यकांचीसिंहल
कोंकणाः कावेरी ताम्रपर्णीच

लंका त्रिकूटकादयः ॥ तत्र
नैर्ऋत कोणाह्व देशाः नैर्ऋते ॥
द्रविडानर्त्त महाराष्ट्राश्च रैवतः
यवनः पह्नवः सिंधु पारसीका
दयो मताः तत्र पश्चिमस्य ॥
देशाः पश्चिमे हैहयाल्लाद्रि ॥
म्लेच्छवास शकादयः तत्र वायु
कोणस्थ देशाः वायव्यगुर्जरादय
नाटजालंधरादयः तत्र
उत्तरस्य देशाः उत्तरे चीननेपाल
हूनकेकय मेदराः गांधारा(ः)
हिमवत् क्रौंच गंधमादनमाल
कैलाशमद्र काश्मीर म्लेच्छदेशाः
खसादयः तत्रैशानकोणस्य
देशाः ऐशाने स्वर्ण भौमश्च ॥
गंगाद्वारस्तु टंकणाः वाह्लीक।
ब्रह्मपुरक किराता दरदादयः।
इति ज्योतिस्तत्वे जप यज्ञ।
कर्माक्त कमठाकार चक्रं तस्य
लिखन् क्रमः चतुरस्त्रां भुवं भित्वा
कोष्ठानां नवकं लिखेत् पूर्व
कोष्ठादि विलिखेत् सप्तवाहन
तुक्रमात् लक्ष्मीशो मध्यकोष्ठे।
स्वरान् युग्मक्रमाल्लिखेत् दिश
पूर्वादितो यत्रक्षेत्रादि हार्ं ॥
संस्थितिः मुखं तस्य ॥ ॥
ज्ञानीयात् हस्तावुभयतः स्थितौ
कोष्ठेकक्षी उभेपादौ हृष्टिपृष्ठे ॥
पुच्छ मीरितं क्रमेण तेन ॥
विभजेन्मध्यस्य मपिभागतः।
तस्यांग विशेषस्थितस्य जपादौ
गुणदोषाः यथामुखस्थालभते
सिद्धिं करस्थः स्वल्पजीवनः
उदासीनः कुक्षि संस्थः पादस्था
दुःखमाप्नुयात् पुच्छस्थः पीड्यते
मंत्रीबंधनोच्चाटनादिभिः कूर्म्मचक्र
मिदं प्रोक्तं मंत्रिणां सिद्धि ॥
दायकं तदज्ञाने दोषः ॥
पिंगलायां कूर्म्मचक्रमविज्ञाय यः
कुर्यात् जप यज्ञकं तस्य यज्ञ
फलं नास्ति सर्वानर्थाय कल्पते
इति तंत्रसारः ॥
कूर्म्मपृष्ठः पुं अम्लानवृक्षः इति
शब्दचंद्रिकाकच्छपस्य पृष्ठदेशश्च
कूर्म्मपृष्ठकं क्ली शरावे शरा
इति भाषा इति शब्दचंद्रिका
कूर्म्मराजः पुं कच्छपराजः तत्
पर्य्यायः अकूपारः २ परीवर्त्तः ३
इति जटाधरः तथाहि दृष्टि ॥
स्थिरा भव भुजंगम धारयेनां त्वं
कूर्म्मराज तदिदं द्वितयं दधीथाः
दिक्कुंजराः कुरुत तत्रितये
दधीर्षा मार्य्यः करोतु हरकार्म्मुक
मातत्तज्य इति महानाटके ॥

सत्यवादि कच्छपः यथाविलोक्य
विक्रिष्ठा विधिं तदेश्वरो हरन् ॥
वीर्य्योऽवितथो ऽभिसंधिः ॥
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार ॥
तमासुरेंद्र भुज वीर्य्य वेपिते ॥
परिभ्रमन्तं गिरिमंग पृष्ठतः ॥
बिभ्रत्तदावर्त्तन मादिकच्छपो।
मेनेऽङ्ग कंडूयनमप्रमेयः इति
श्रीभागवते ॥
कूलं श्राहमी ॥ इति
कविकल्पद्रुमः ॥ (ते
कूलं क्ली नद्या जलसमीपस्था
तत्पर्य्यायः रोधः २ तीरं ३।
प्रतीरं ४ तटं ५ तटः ६ तटी ७
इत्यमरः स्तूपः सैन्य पृष्ठं।
तडागः इति विश्वः ॥
कूलकं क्ली पुं स्तूपः इति
मेदिनी तीरं इति विश्वः ॥
कूलकः पुं कृमिपर्वतः उपर
ढिपि इति भाषा इति मेदिनी।
कूलंकषः पुं समुद्रः इति ॥
त्रिकांडशेषः ॥ (यः
कूलंकषा स्त्री नदी इति हलायु
कूलभूः स्त्री तीरभूमिः इति
हेमचंद्रः ॥
कूलवती स्त्री नदी इति
राजनिर्घंटः ॥
कूलहुंडकः पुं जलावर्त्तः इति
त्रिकांडशेषः ॥
कूवरः पुं क्ली युगंधरः यत्र ॥
रथस्य युगकाष्ठ मासज्यते तत्र
इत्यमरमेदिनीकरौ ॥
कूवरः पुं कुब्जकः कुंजा इति
भाषा मनोज्ञे त्रि इति ॥
मेदिनी ॥ (थः
कूवरी स्त्री कंबलाच्छादितर
इति हलायुधः ॥
कूष्मांडः पुं गणदेवता विशेषः
कर्कारुः इति हेमचंद्रः ॥
कूष्मांडकः पुं कष्मांडः ॥
इत्यमरटीकायां स्वामी ॥
कूष्मांडी स्त्री अंबिका तदोषधिः
इति हेमचंद्रः ॥
कूहना स्त्री कुहना इति ॥
शब्दरत्नावली ॥
कूहा स्त्री कुज्झटिका कुयाइति
भाषा इति शब्दरत्नावली ॥

कृ उ॰ कृतौ इति कविकल्पद्रुमः
कृ ञ न वधो इति कविकल्पद्रुमः
कृतौ इति ॥
कविकल्पद्रुमः ॥
कृकः पुं गलः इति हेमचंद्रः



कृकणः पुं ककर पक्षी कयाय
इति भाषा इत्यमरः कृमिः ॥
इतिहारावली ॥
कृकरः पुं शिवः इति।
त्रिकांडशेषः शरीरवाय्वेच
वाय्वंतर्गत वायु विशेषः यथा
कृकरस्तु क्षुते चैव जवाकुसुम
सन्निभः इतिशारदा तिलक
टीका कृकणपक्षी इति
शब्दरत्नावली चयके करवीर
वृक्षः इति राजनिर्घंटः ॥
कृकला स्त्री पिप्पली इति।
राजनिर्घंटः ॥
कृकलाशः पुं कृकलासः इति
त्रिकांडशेषः ॥
कृकलासः पुं जंतुविशेषः।
काकलास इतिभाषा तत्
पर्य्यायः सरटः २ इत्यमरः॥।
वेदारः ३ कृकचपात् ४ तृणाज
नः ५ प्रतिसूर्य्यः ६ इतित्रिकांडशेषः
प्रतिसूर्य्यकपानकः ७ हलिस्यः ८
केटकागारः ९ दुरारोहः १०
द्रुमाश्रयः ११ इतिराजनिर्घंटः।
कृकवाकुः पुं कुक्कुटः इत्यमरः
मयूरः सरटः इति मेदिनी ॥
कृकवाकुध्वजः पुं कार्त्तिकेयः
इति त्रिकांडशेषः ॥

कृकाटिका स्त्री घटा घाड इति
भाषा इत्यमरः ॥
कृकूलासः पुं कृकलासः ॥
इत्यमरटीका ॥
कृच्छ्रं क्ली कष्टं तद्वति त्रि
सांतपनादि व्रते इत्यमरः ॥
पापे इति मेदिनी मूत्र ॥
कृच्छ्ररोगः इति राजनिर्घंटः॥
स्त्रीतो व्रते पुं लिंगोप्ययं ॥
कृच्छ्रातिकृच्छ्रः पुं व्रतविशेषः
यथा वशिष्ठः अभक्तस्तृतीयः
कृच्छ्रातिकृच्छ्रो यावत् सकृदाद
दीत यावदेक वार मुदकं हस्तेन
गृहीतं शक्नोति तावन्नवसु॥
दिवसेषु भक्तयित्वाऽग्रहमुपवासः
कृच्छ्राति कृच्छ्रः समेतुर्यथाहा
दश रात्रे निराहारः सकृच्छ्रातिकृ
च्छ्रः पतन् कृच्छ्रातिकृच्छ्रद्वयं द्वा
दशाहमाथ्यमशक्तविषयं वृद्धसुसातं
द्रेत् कृच्छ्रातिकृच्छ्रं च पिवेत्तोयंच
प्रतितले एकविंशति रात्रेतु
कालेष्वेतेषु सेयतः कालेष्विति
प्रातः साये मध्याक्त्राष्वित्यर्थः
इति प्रायश्चित्तविवेकः ॥
कृच्छ्रारिः पुं विल्वांतर वृक्षः
इति राजनिर्घंटः ॥
कृच्छ्राद्धिः पुं दिन षटकसाध्य।

व्रतविशेषः यथापस्तंबः सायं
प्रातस्त्वेकैकं दिनद्वयमयाचितं
दिनद्वयंच नाश्नीयात् कृच्छ्राद्धिः
सोऽभिधीयते इतिप्रायश्चित्त।
विवेकः ॥
कृणुः पुं चित्रकरजातिः इति
त्रिकांडशेषः ॥
कृत् ई श प छेदे इति ॥
कविकल्पद्रुमः ॥
कृत् ई य वेष्टे इति॥
कविकल्पद्रुमः ॥
कृतं क्ली सत्ययुगे पर्य्याप्ते।
इत्यमरः फले इति ॥
हेमचंद्रः फले इति
मेदिनी ॥
कृतं त्रि विहिते हिंसिते ॥
इतिमेदिनी निष्पादिते ॥
इत्यमरटीकायां मथुरानाथः॥
कृतकं क्ली विड्लवणे ॥
इत्यमरः ॥
कृतकः त्रि कृत्रिमः इत्युणादि
कोषः ॥
कृतकर्म्मा त्रि कार्यक्षमः तत्
पर्य्यायः प्रवीणः २ शिक्षितः ३
निष्णातः ४ निपुणः ५ दक्षः ६
कृतहस्तः ७ कृतमुखः ८ कुशलः
९ चतुरः १० अभिज्ञः ११ विज्ञः ॥

१२ वैज्ञानिकः १३ पटुः १४ छेकः
१५ विदग्धः १६ इतिहेमचंद्रः॥
कृतकृत्यः त्रि निष्पन्नकर्म्मा
समाप्तकार्य्यः यथा कृतकृत्यो
विधिर्मन्ये न वर्द्धयति तस्य तां॥
इतिमाघः ॥
कृतकोटिः पुं काश्यप मुनिः॥
उपवर्षमुनिः इतित्रिकांडशेषः
कृतक्रियः त्रि कृतकार्य्यः यथा
विप्रः मुख्यत्वऽयः स्पष्टात्तत्रिया
वाहनायुधं वेशपः प्रतोदं ॥
रश्मीनृवा यष्टिंमृद्रः कृतक्रियः
इति मनुः
कृतघ्नः त्रि कृतहन्ता अर्थात्येन
केनचित् कृतस्य उपकारादे ॥
बीतकः अस्वीकर्त्ता नेमक ॥
हराम इति पारस्यभाषा तस्य।
प्रायश्चित्ताभावो यथा ब्रह्मघ्नेच
सुरापेच चौरेच गुरुतल्पगे तथा
निष्कृतिर्विहिता सद्भिः कृतघ्ने ना
निष्कृतिः सत्तु वकु सिथो यथा
भर्त्तृपिंडापहर्त्ताच पितृपिंडाप
हारकः यस्माद्गृहीत्वा विद्याच
दक्षिणांनप्रयच्छति पुत्रान् स्त्रिय
श्चापो हेष्टि यश्च तान् त्यानयत्यरः
कृतस्य दोषं वदति सकामान्
नकरोतियः नस्मरेद्ध कृतं यस्तु



आश्रमात् यस्तु दूषयेत् सर्व्वैस्तान् ऋषिभिः सार्द्धं कृतघ्नान् अब्रवीन्मनुः इति प्रायश्चित्ततत्त्वे स्कन्दपुराण वचनं ॥

कृतच्छिद्रा स्त्री कोषातकीलता इति राजनिर्घण्टः ॥

कृतज्ञः त्रि मघादौ कुक्कुरे पुं । इति मेदिनी ॥

कृतत्रा स्त्री त्रायमाणालता इति राजनिर्घण्टः ॥

कृतदासः पुं नारदोक्त पञ्चदश दासान्तर्गत दासविशेषः स तु केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः इति क्रमसंग्रहः ॥

कृतपुङ्खः त्रि बाणशिक्षाविचक्षणः भालतिरन्दाज इति भाषा तत्पर्य्यायः कृतहस्तः २ सुप्रयोगविशिखः ३ इत्यमरः ॥

कृतपूर्व्वी न् त्रि पूर्व्वनिष्पन्नकर्म्मा कृतं पूर्व्वमनेन इत्यर्थे इन् ॥ यथा कृतपूर्व्वी कटं इति संक्षिप्तसार व्याकरणं ॥

कृतफलं क्ली कक्कोले इति । राजनिर्घण्टः ॥

कृतफला स्त्री कोलशिम्बी इति राजनिर्घण्टः ॥

कृतमालः पुं आरग्वध वृक्षः । सोंदालि इति भाषा इत्यमरः कर्णिकारवृक्षः सबलच्चारग्वधः क्षोटशोनाल इति भाषा इति राजनिर्घण्टः ॥

कृतमुखः त्रि कृतकर्म्मा कृती इत्यमरः ॥

कृतलक्षणः त्रि गुणैः प्रतीतः शौर्य्यादि गुणैः ख्यातः इत्यमरः

कृतवेतनः त्रि वेतनेन ॥ नियुक्तदासादिः इति स्मृतिः

कृतवेधकः पुं घोषातकी ॥ श्वेतघोषा इति भाषा इति ॥ रत्नमाला ॥

कृतवेधना स्त्री कोषातकीलता इति राजनिर्घण्टः ॥

कृतश्रमः त्रि महोत् साहः येन श्रमः कृतः सः इति शब्दमाला

कृतसापत्निका स्त्री कृतसपत्नीभाषा प्रथमविवाहिता स्त्री तत्र ॥ पर्य्यायः अध्यूढा २ अधिविन्ना ३ इत्यमरः कृतसापत्नका ४ कृतसापत्नी ५ कृतसापत्नीका ६ इति तट्टीकायां रमानाथः ॥

कृतहस्तः त्रि कृतपुङ्खः ॥ सुशिक्षित शरमोक्ष योधादिः । इत्यमरः ॥

कृताञ्जलिः त्रि येनाञ्जलिः कृतः सः लुषपिभेदे पुं इति धरणी ॥

कृतान्तः पुं यमः सिद्धान्तः ॥ दैवं पूर्व्वदेहकृतं फलोन्मुखी ॥ भूतं शुभाशुभकर्म्म अकुशलकर्म इत्यमरः शनिवारः इति शब्दचन्द्रिका ॥

कृतान्तजनकः पुं सूर्य्यः इति हेमचन्द्रः ॥

कृतान्ता स्त्री रेणुका नामगन्धद्रव्य । इति शब्दचन्द्रिका ॥

कृतार्थः त्रि कृतप्रयोजनः ॥

कृतकार्य्यः यथा विलोकनेनैव तवामुना मुने कृतः कृतार्थोस्मि निवर्हितांहसा इति माघः ॥

कृतालयः पुं नेकः इति ॥ त्रिकाण्डशेषः ॥

कृतावश्यकः त्रि वस्त्रादिनो [?] जानु जंघादिबंधः इति कात्यायनः ॥

कृतिः स्त्री करणे हिंसा इति मेदिनी ॥

कृतिकरः पुं रावणः इति शब्दमाला ॥

कृती त्रि निपुणः पण्डितः इत्यमरः साधुः पुण्यवान् इति शब्दरत्नावली ॥

कृत्तं त्रि छिन्ने वेष्टिते इति । हेमचन्द्रः ॥

कृत्तिः स्त्री कृष्णसारादिचर्म्म इत्यमरः त्वक् भूर्जः कृत्तिका नक्षत्रे इति मेदिनी ॥

कृत्तिका स्त्री अश्विन्यादि सप्तविंशत्यन्तर्गत तृतीय नक्षत्रं तत्पर्य्यायः बहुला २ अग्निदेवा ३ इति हेमचन्द्रः तस्याः रूपं ॥ अग्निशिखाकृति षट्तारकामयं इति कालिदासः क्षुरनिभषट्तारामयं इति केचित् तस्याः ॥ अधिष्ठात्री देवता अग्निः सा तु मिश्रगणान्तर्गता इति दीपिका तत्र जातस्य फलं तथाथिकःसत्य धनैर्विहीनोह्यटनोत् पन्नमतिः कृतघ्नः कठोरवाक् चाहितकर्म्म कृतस्यात् चेत् कृत्तिकायां मनुजः प्रसूतः इति कोष्ठीप्रदीपः

कृत्तिकाभवः पुं चन्द्रः इति शब्दचन्द्रिका ॥

कृत्तिकासुतः पुं कार्त्तिकेयः इति हेमचन्द्रः ॥

कृत्तिवासः पुं शिवः इति ॥ द्विरूपकोषः ॥

कृत्तिवासाः पुं शिवः इत्यमरः ॥



कृत्नुः त्रि शिल्पी इत्युणादिकोषः
कृत्यं क्ली कार्य्ये प्रयोजने इति
हेम चंद्रः ॥
कृत्यः त्रि विद्विष्टः कार्य्ये
इतिमेदिनी धनादिभिर्भेद्यः
इतिजटाधरः प्रत्ययविशेषः
यथा कृत्याः षट्तेसमाख्याताः
क्यप् एण्यतो भावकर्म्मणोःतथा
ऽनीयावनंतातृ यत्केलिमःकर्म
कर्तरि इति सुपद्म सम्मता।
कारिकाकाकर्तरिकर्म्मणिचा।
र्थेविहिताः कृत्यावाच्यलिंगास्तु
कृत्यास्तव्यादयःवोपदेव मते
तेत्याः कृद्धोःकभाव इत्युक्तेः
क्वचित् कृत्या कर्त्तर्य्यपि स्मृः
कर्त्तरि यथा भव्यस्त्वकः भव्या
लता भव्यं वने कर्म्मणि यथा
ग्रामोगंतव्यः नगरीगंतव्या पुरे
गंतव्यं कर्त्तरि कर्म्मणि किं।
स्यातव्यं स्थेयं ब्रह्मभूयं ब्रह्म
त्वा इह भावेकृत्याःअसेत्राया
मित्येव सूर्योऽर्कःभियोद्धो ॥
नंदो इत्यमरटीकायां भरतः॥
कृत्यास्त्री क्रिया यथाकौ॥
कृत्या मकाधीः देवता यस्त
देवताविशेषः यथाप्रह्लादवीर
ते कृत्या मृत्यादयामास ज्वाला

मालोजलाकृतिं इत्यमरभरतौ
तस्याध्याने यथाक्रोधाज्ज्वलंती ॥
ज्वलने वमन्ती सृष्टिं दहन्ती ॥
दितिजं ग्रसन्ती भीमंनदन्ती ॥
प्रणमामि कृत्यां रोरुयमाणां ॥
त्वथयोयकाली प्रतिचारिकी
क्रिया यथा रोगकृत्या ॥
ग्रहादीनां निरासः शांतिरीरिता
वश्यंप्रजनानां सर्वेषां विधेयत्व ॥
मृदीरितं इतिषट्कर्म्मदीपिका
कृत्रिमं क्ली विड्लवणं इति
मेदिनी काचलवणं जवादि ॥
नामगंधद्रव्यं रसांजने इति ॥
राजनिर्घंटः ॥
कृत्रिमः पुं सिल्हकः इति ॥
मेदिनी द्वादशविध पुत्रांतर्गत
पुत्रविशेषः इति जटाधरः ॥
कृत्रिमः त्रि करणाज्जातः रचितः
इति मेदिनी ॥
कृत्रिम कः पुं तुरुष्कानामगंधद्र
इतिराजनिर्घंटः ॥
कृत्रिमधूपकः पुं नानासुगंधि।
द्रव्य कृत दशांगादि धूपःतत्॥
पर्य्यायः वृकधूपः २ इत्यमरः॥
कृत्रिम पुत्रः पुं द्वादशविध ॥
पुत्रमध्ये पुत्र विशेषः तथाच
मनुः सदृशंतुप्रकुर्य्याद्यंगुणदोष

विचक्षणं पुत्रं पुत्रगुणे र्युक्तं ॥
सविज्ञेयश्च कृत्रिमः अस्यार्थः।
यः पुनः समानजातीयं पित्रोः।
पारलौकिक श्राद्धादि करणं ॥
करणाभ्यां गुणदोषौ भवत ॥
इत्यवमादित पुत्र गुणै श्च ॥
मातापित्रो राराधनादिभिर्युक्तं।
पुत्रंकुर्य्यात् सकृत्रिमाख्यःपुत्रो
बोध्यः इति कुल्लूक भट्टः ॥
पुत्तलिका यथा साकेडकेः ॥
कृत्रिम पुत्रकैश्च रेमे इति
कुमारसंभवः ॥
कृत्रिममित्रः पुं रचितबंधुः इति
स्मृतिः ॥
कृत्सं क्ली जले इति सिद्धांत।
कौमुद्यामुणादि वृत्तिःसमुदायः
इत्युणादिकोषः ॥
कृत्स्नं क्ली जले सर्वं कुक्षिः ॥
इतिमेदिनी ॥
कृत्स्नः त्रि अशेषः समस्तः ॥
इत्यमरः ॥
कृदरः पुं धान्यादिगृहे गोला।
इतिभाषा इति सिद्धांत ॥
कौमुद्यामुणादिवृत्तिः ॥
कृंतत्रं क्ली लांगलं इति
सिद्धांतकौमुद्यामुणादिवृत्तिः॥
कृंतनं क्ली छेदनं यथा

कृंतनं नख केशानां छेदनंच ॥
वनस्पतेः पणवाशौचि नकर्त्तव्यं
पाठनं पठनं तथा इति ॥
कर्मलोचने नारद वचनं ॥
कृपऊ उ. व ऐ कल्पने सामर्थ्ये।
इतिकविकल्प द्रुमः ॥
कृपतक दौर्बल्य इति
कविकल्पद्रुमः ॥
कृपकि युतौ चित्रे कल्पने ॥
इतिकवि कल्प द्रुमः ॥
कृपः पुं कृपाचार्य्यः सत ॥
द्रोणाचार्य्य श्यालकः इतिमेदिनी
तथाचोक्तं गौतमान्मिथुने ॥
जज्ञे शारद्वताद्धरहतः ॥
अश्वत्थाम्नश्च जननी कृपश्चैव
महाबलः इतिमहा भारते
व्यासः इति धरणी ॥
कृपणः त्रि अदाता तत्पर्य्यायः
कदर्य्यः २ किंपचानः ३ मितंपचः
४ क्षुद्रः ५ इत्यमरः किंपचः ६
अनमितंपचः ७ इतितट्टीका ॥
मेदः ८ कीकटः ९ कृमुत्न १०
कीनाशः ११ इतिजटाधरः ॥
कुत्सितः इति मेदिनी ॥
महाव्यसन प्राप्तः दीनः यथा
महद्धा व्यसनं प्राप्तो दीनःकृपण
उच्यते इति रामायणं ॥




कृपणः पुं कृमिः इति मेदिनी।
कृपा स्त्री करुणा इत्यमरः ॥
कृपाणः पुं खड्गः इत्यमरः ॥
कृपाणकः पुं खड्गः इति ॥
हारावली ॥
कृपाणिका स्त्री छुरिका इति
हेमचंद्रः ॥
कृपाणी स्त्री कर्त्तरी इत्यमरः ॥
छुरिका इति मेदिनी
कृपाद्वैतः पुं बुद्धभेदः इति
त्रिकांडशेषः ॥
कृपालुः त्रि दयालुः इत्यमरः
कृपी स्त्री द्रोणाचार्य्यपत्नी इति
मेदिनी ॥
कृपीटं क्ली उदरं जलं इति
मेदिनी ॥ विपिनं इंधनं ॥
इति शब्दरत्नावली ॥
कृपीटपालः पुं केनिपातः।
समुद्रः इति मेदिनी पवनः ॥
इतिशब्दरत्नावली ॥
कृपीटयोनिः पुं अग्निः इत्यमरः
कृपीपतिः पुं द्रोणाचार्य्यः ॥
इतिशब्दमाला ॥
कृपीपुत्रः पुं अश्वत्थामा इति
भूरिप्रयोगः ॥
कृपीसुतः पुं अश्वत्थामा इति
त्रिकांडशेषः ॥

कृमिः पुं कीटः पोका इति ॥
भाषातत्पर्य्यायः नीलांगः २
इत्यमरः नीलांगुः ३ क्रिमिः ४
इतितट्टीका पुंद्रः ५ इति
जटाधरः लाक्षा कृमिलः खरः
इति विश्वमेदिन्यौ ॥
कृमिकंटकं क्ली विडंगे ॥
चित्रांगः उडुंबरः इति ॥
मेदिनी ॥
कृमिकोशोत्थं त्रि कौषेये ॥
रेशमि कापड इति भाषा ॥
इत्यमरः ॥
कृमिघ्नः पुं विडंगः इत्यमरः ॥
पलांडुः कोलमदः पारिभद्रः
भल्लातकः इतिराजनिर्घंटः ॥
कृमिघ्ना स्त्री हरिद्रा इति।
भावप्रकाशः ॥
कृमिघ्नी स्त्री धूम्रपत्रा विडंगः।
इति राज निर्घंटः ॥
कृमिजं क्ली अगुरु इत्यमरः ॥
कृमिजग्धं क्ली अगुरु इति
राजनिर्घंटः ॥
कृमिजा स्त्री लाक्षा इति ॥
राजनिर्घंटः ॥
कृमिरिपुः पुं विडंगः इति
शब्दरत्नावली ॥
कृमिला स्त्री बहुप्रसवत्ससंतान

प्रसवा इति हेमचंद्रः।
कृमिशुक्ते त्रि ॥
कृमिहत्तः पुं कोषाम्रः इति
भावप्रकाशः ॥
कृमिशंखः पुं जीवशंखः ॥
तत्पर्य्यायः। कृमिजलजः २
कृमिवारिरुहः ३ जंतुकंबुः ४
अस्यगुणः रसवीर्य्यादौ शंखवत्।
सदृशत्वं इतिराजनिर्घंटः ॥
कृमिशुक्तिः स्त्री जलशुक्तिः इति
राजनिर्घंटः ॥
कृमिशैलकः पुं वल्मीकः इति
शब्दरत्नावली ॥
कृमीलकः पुं वनमुद्गः इति।
राजनिर्घंटः ॥
कृव इ न कृतौ हिंसे इति ॥
कविकल्पद्रुमः ॥
कृविः पुं वायपेत्रे तांत इति।
भाषा इति सिद्धांत कौमुद्या ॥
गुणादिवृत्तिः ॥
कृश इ र य कार्श्ये इति।
कविकल्पद्रुमः ॥
कृशः त्रि अल्पः सूक्ष्मः इत्यमरः
कृशरः पुं तुल्यतिलान्ने ॥
तत्पर्य्यायः त्रिसरः २ इति।
हेमचंद्रः ॥
कृशरा स्त्री तिलौदने इति

हारावली द्विदल मिश्रितान्ने ॥
खिचडी इति भाषा यथा ॥
तंडूला दालि संमिश्रालवणार्द्रक
हिंगुभिः संयुक्ताः सलिलैः ॥
सिद्धाः कृशरा कथिता बुधैः ॥
अस्यागुणः शुक्रवलकारित्वं ॥
गुरुत्वं पित्तकफप्रदत्वं दुर्जरत्वं।
विष्टंभमलमूत्रकारित्वंच इति
भावप्रकाशः ॥
कृशाला स्त्री केशः इति ॥
शब्दचंद्रिका ॥
कृशशाखः पुं पर्पटः इति ॥
राजनिर्घंटः ॥
कृशांगी स्त्री प्रियंगुवृक्षः इति
शब्दचंद्रिका सूक्ष्मांगविशिष्टे
कृशानुः पुं अग्निः इत्यमरः ॥
चित्रकवृक्षः इतिराजनिर्घंटः
स
कृशानुरेताः पुं शिवः ॥
इत्यमरः ॥
कृशाश्वी पुं नटः इत्यमरः ॥
कृशिका स्त्री आखुकर्णीलता
इतिराजनिर्घंटः ॥
कृष औ आकर्षणे विलेखने ॥
इति कविकल्पद्रुमः ॥
कृष औ ड॰ श आकर्षणेविलेखने
इतिकविकल्प द्रुमः ॥



कृषकः त्रि कर्षकः इति। मेदिनी ॥
कृषकः पुं फालः इतिमेदिनी
वृषः इति शब्दचन्द्रिका ॥ (का
कृषाणुः पुं कृषानुः इत्यमरटी
कृषिः स्त्री वेश्मप्रहृति विशेषः।
कर्षणं चास इति भाषा
तत्पर्य्यायः अनृतं २ इत्यमरः॥
प्रनृतं ३ इति जटाधरः ॥
कृषिकः पुं फालः इत्यमरः।
कर्षकः इति केचित ॥
कृषीवलः त्रि कर्षकः कृषिजीवी
इत्यमरः काकजंघा हृक्षः इति
रत्नमाला ॥
कृष्करः पुं शिवः इति
त्रिकांडशेषः ॥
कृष्टं त्रि कृष्टक्षेत्रं वसाचेत ॥
इतिभाषा तत्पर्य्यायः सीत्यं ॥
२ हल्यं ३ इत्यमरः ॥
कृष्टपच्यः त्रि ब्रीहिः धान्यं ॥
इतिमुग्धबोधव्याकरणं ॥
कृष्टपाक्यं त्रि कृष्टपच्यं इति
व्याकरणं ॥
कृष्टिः पुं पंडितः इत्यमरः ॥
कर्षणं स्त्री इति मेदिनी ॥
कृष्णं क्ली मरिचं इत्यमरः ॥
लोहं इति जटाधरः ॥

नीलांजनं इति राजनिर्घण्टः ॥
कालागुरु इतिरत्न माला ॥
कृष्णः पुं भगवदवतार विशेषः
सचभूभार हरणार्थं द्वापरयुग
शेषेभाद्रकृष्णाष्टम्यां रोहिणी
नक्षत्रे निशीथे देवकी गर्भे ॥
आविर्भूतः तन्नामव्युत्पत्तिर्यथा
कृषिर्भूवाचकः शब्दोणश्चनिर्वृति
वाचकः तयो रैक्यं परं ब्रह्म।
कृष्ण इत्यभिधीयते इति
श्रीधरस्वामी तस्यध्यानंयथा।
स्मेरेहं दावने रम्ये मोहयंत ॥
मनारतं गोविंदं पुंडरीकाक्षं ॥
गोपकन्याः सहस्रशः आत्मनो
वदनांभोज प्रेषिताक्षि ॥
मधुव्रताः पीडिताः कामबाणेन
चिरमाश्लेषणोत्सुकाः मुक्ताहार
लसत्पीन तुंगस्तन भरानताः
स्रस्त धम्मिल्ल वसनामदस्खलत
भाषणाः दंतपंक्तिप्रभोद्भासि
स्पंदमाना धरांचिताः ॥
विलोभयंती विविधै विभ्रमै ॥
भाव गर्वितैः फुल्लेंदीवरकांति
मिंदुवदनं बर्हावतंस प्रियं।
श्रीवत्सांक मुदारकौस्तुभधरं
पीतांबरं सुंदरं गोपीनां ॥
नयनोत्पलार्चित तनुंगोगोप

संघावृतं गोविंदं कलवेणु ॥
वादन परं दिव्यांग भूषं भुंजे ॥
इति तंत्रसारः अस्य पाद ॥
विक्रान्ति यथा चेड्डांई कलसं ॥
त्रिकोणं धनुषी खं गोष्पदं।
प्रोष्ठिकां शंख सव्यपदे ऽथ॥
दक्षिणपदे कोणाष्टकं स्वस्तिकं
चक्रं छत्र यवांकुशध्वजपवीजंबूर्द्ध
रेखांबुजं बिभ्राणंहरिमूनविंशति
महालक्ष्मार्चितांघ्रिंभजे इति
रूपचिंतामणिः अस्यावताराः॥
तासंख्या तत्र युगावतारा ॥
अवतारः यथा कृतेशुक्लश्चतुर्बाहु
जटिलोवल्कलांबरः कृष्णाजिनो
पवीताक्षान् बिभ्रद्दंडकमंडलू ॥
त्रेतायां रक्तवर्णोऽसौ चतुर्बाहु॥
स्त्रिमेखलः हिरण्यकेशस्त्रय्यात्मा
स्रुक्स्रुवाद्युपलक्षणः द्वापरे॥
भगवान् श्यामः पीत वासा।
निजायुधः ॥ श्रीवत्सादिभि ॥
रंकैश्च लक्षणै रूपलक्षितः।
नानातंत्रविधानेन कलावपि यथा
शृणु कृष्णवर्णं त्विषाकृष्णं सांगो
पांगास्त्र पार्षदं यज्ञैः संकीर्तन।
प्रायैर्यजंतीह सुमेधसः अस्य।
कल्पावतारा दशयथा मत्स्यः १
कूर्मः २ वराहः ३ नृसिंहः ४

वामनः ५ परशुरामः ६ रामः ७
कृष्णः ८ बुद्धः ९ कल्की १० इति
श्रीभागवतं तस्य
गुणाश्चतुःषष्टिर्यथा अयं नेता
सुरम्यांगः १ सर्व सल्लक्षणान्वितः २
रुचिर ३ स्तेजसा युक्तो ४ ॥
बलीयान् ५ वयसान्वितः ६
विविधाद्भुत भाषावित् ७ सत्य
वाक्यः ८ प्रियंवदः ९ वावदूकः
१० सुपांडित्यो ११ बुद्धिमान् ॥
१२ प्रतिभान्वितः १३ विदग्ध १४
श्चतुरो १५ दक्षः १६ कृतज्ञः १७
सुदृढव्रतः १८ देश काल ॥
सुपात्रज्ञः १९ शास्त्रचक्षुः २०
शुचि २१ र्वशी २२ स्थिरो २३
दांतः २४ क्षमाशीलो २५
गंभीरो २६ धृतिमान् २७ समः
२८ वदान्यो २९ धार्मिकः ३०
शूरः ३१ करुणो ३२ मान्यमान
कृत् ३३ दक्षिणो ३४ विनयी ३५
ह्रीमान् ३६ शरणागतपालकः ३७
सुखी ३८ भक्तसुहृत् ३९ प्रेमवश्यः
४० सर्वशुभंकरः ४१ प्रतापी ४२
कीर्तिमान् ४३ रक्तलोकः ४४
साधुसमाश्रयः ४५ नारीगण
मनोहारी ४६ सर्वाराध्यः ४७
समृद्धिमान् ४८ वरीयान् ४९ ईश्वर

५० क्षेतिगुणास्तस्याव कीर्तिताः
सदास्वरूप संप्राप्तः ५१ सर्वज्ञो ॥
५२ नित्यनूतनः ५३ सच्चिदानंद
सांद्रांगः ५४ सर्वसिद्धिनिषेवितः
५५ अविचिंत्य महाशक्तिः ५६
कोटिब्रह्मांड विग्रहः ५७ ॥
अवतारावलीबीजं ५८ हतारि
गतिदायकः ५९ आत्मारामः ॥
गणाकर्षी ६० त्यमी कृष्णे।
किलाद्भुताः सर्वाद्भुत चमत्कार
लीलाकल्लोलवारिधिः ६१ अतुल्य
मधुरप्रेम मंडित प्रिय मंडलः।
६२ त्रिजगन्मानसाकर्षी मुरली
कलकूजितः ६३ असमानोर्द्धरू
पश्री विस्मापित चराचरः ६४
लीला प्रेम्णा प्रियाधिक्यं माधुर्ये
वेणुरूपयोः इत्यसाधारणं।
प्रोक्तं गोविंदस्य चतुष्टयं ॥
एवं गुणाश्चतुर्भेदाश्चतुःषष्टि।
रुदाहृताः अस्य गदा।
कौमोदकी खड्गः नंदकः धनुः
शार्ङ्गं शंखः पांचजन्यः चक्रं
सुदर्शनः मणिः कौस्तुभः वाहनः
गरुडः रथो गरुडध्वजः ॥
रथस्याश्वाः शैव्य सुग्री व
मेघवाहनपुष्कराः इति
श्रीभागवते अस्यपत्न्यः।

गोलोके वृंदावनेच श्रीराधा ॥
वैकुंठे लक्ष्मीः इतिब्रह्मवैवर्ते।
द्वारकायां रुक्मिणी १ जांबवती २
सत्यभामा ३ कालिंदी ४
मित्रविंदा ५ नाग्नजिती ६ भद्रा ७
लक्ष्मणा ८ एताः प्रधानाः अन्या
अपि शताधिक षोडशसहस्राणि
स्त्रिताः इतिश्रीभागवते ॥
व्रजस्थितस्यास्य सखायश्चतुर्विधाः
तत्र किंचिद्वयसाधिकाः सुहृदो
यथा सुभद्रः १ मंडलीभद्रः २ भद्र
वर्द्धनः ३ गोभटः ४ यक्षेंद्रभटः ५
भद्रांगः ६ वीरभद्रः ७ महागुणः ८
विजयः ९ बलभद्रः १० इत्याद्याः
वयसा न्यूनाः सखायो यथा
विशालः १ वृषभः २ तेजस्वी ॥ ३
देवप्रस्थः ४ वरूथपः ५ मणिबंधः ६
करंधमः ७ इत्याद्याः वयसा तुल्याः
प्रियसखा यथा श्रीदामा १
सुदामा २ वसुदामकः ३ किंकिणी ४
स्तोककृष्णः ५ अंशुः ६ भद्रसेनः ७
विलासी ८ पुंडरीकविटंकाक्षः ९
कलविंकः १० इत्याद्याः पूर्वतः
श्रेष्ठा आत्यंतिक रहस्येषु युक्ताः
भावविशेष विशिष्टाः प्रियनर्म
सखाः यथा सुबलः १ अर्जुनः २
गंधर्वः वसंतः ४ उज्वलः ५

इत्याद्याः इतिभक्तिरसामृत ॥
सिंधुः वृंदावन स्थित स्य।
अस्य सख्यः शतकोटयः तत्रैवेद
मुनिदेवस्त्रियोऽपि कृष्णाराधनार्थं
गोपांगना रूपेण जाताः व्रजे।
अस्य नित्य प्रिया यथा राधा १ ॥
चंद्रावली २ विशाखा ३ ललिता ४
श्यामा ५ पद्मा ६ शैव्या ७ ॥
भद्रिका ८ तारा ९ विचित्रा १०
गोपाली ११ धनिष्ठा १२ पालिका
१३ खंजनाक्षी १४ मनोरमा १५
मंगला १६ विमला १७ लीला १८
कृष्णा १९ शारी २० विशारदा २१
तारावली २२ चकोराक्षी २३
शंकरी २४ कुंकुमादयः २५।
एतासांमध्ये विशाखा ललिता।
पद्माशैव्या एताश्चतस्रः सख्यः।
अन्या यूथाधिपाः तासांमध्ये।
राधादयोष्टौ सुभगाः आसां ॥
राधाचंद्रावल्यौ श्रेष्ठा अनयो ॥
रपि राधाऽधिका इत्युज्वल ॥
नीलमणिः अपिच
चंद्रावली १ सुशीला २ तस्याः।
सहचर्य्यः षोडश सहस्राणि।
शशिकला ३ अस्याः सहचर्य्यः
चतुर्द्दश सहस्राणि चंद्रमुखी ४
अस्याः सहचर्य्यः त्रयोदश ॥

सहस्राणि माधवी ५ अस्याः सहचर्य्यः
एकादश सहस्राणि कदंबमाला ६
अस्याः सहचर्य्यः त्रयोदश ॥
सहस्राणि कुंती ७ अस्याः सहचर्य्यः
दश सहस्राणि यमुना ८ अस्याः
सहचर्य्यः चतुर्द्दश सहस्राणि
जाह्नवी ९ अस्याः सहचर्य्यः नव
सहस्राणि पद्ममुखी १० अस्याः
सहचर्य्यः नवसहस्राणि सावित्री
११ अस्याः सहचर्य्यः पंचदश
सहस्राणि सुधामुखी १२ अस्याः
सहचर्य्यः चतुर्द्दश सहस्राणि शुभा
१३ अस्याः सहचर्य्यः चतुर्द्दश
सहस्राणि पद्मा १४ अस्याः सहचर्यः
चतुर्द्दश सहस्राणि गौरी १५
अस्याः सहचर्य्यः चतुर्दश सहस्राणि
सर्वमंगला १६ अस्याः सहचर्य्यः
षोडश सहस्राणि सरस्वती १७
अस्याः सहचर्य्यः त्रयोदश सहस्राणि
भारती १८ अस्याः सहचर्य्यः ॥
दश सहस्राणि अपर्णा १९ अस्याः
सहचर्य्यः चतुर्द्दश सहस्राणि रतिः
२० अस्याः सहचर्य्यः दश सहस्राणि
गंगा २१ अस्याः सहचर्य्यः चतुर्द्दश
सहस्राणि अंबिका २२ अस्याः ॥
सहचर्य्यः षोडश सहस्राणि सती
२३ अस्याः सहचर्य्यः त्रयोदश



सहस्राणि नन्दिनी २४ अस्याः॥ सहचर्य्यः दशसहस्राणि सुन्दरी २५ अस्याः सहचर्य्यः त्रयोदश। सहस्राणि कृष्णप्रिया २६ अस्याः सहचर्य्यः षोडश सहस्राणि। मधुमती २७ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि चेषा २८ अस्याः सहचर्य्यः त्रयोदश॥ सहस्राणि चन्दना २९ अस्याः। सहचर्य्यः चतुर्द्दश सहस्राणि इति ब्रह्मवैवर्त्तपुराणे॥ व्यासः अर्ज्जुनः कोकिलः इति विश्वः काकः इति मेदिनी॥ करमर्द्दकः इति शब्दरत्नावली वर्णविशेषः तत्पर्य्यायः नीलः २ असितः ३ श्यामः ४ कालः ५ श्यामलः ६ मेचकः ७ तद्वति त्रि इत्यमरः॥

कृष्णकन्दं क्ली रक्तोत्पलं॥ इति त्रिकाण्डशेषः॥

कृष्णकर्म्मा त्रि पापाचारयुक्तः। इत्यमरः॥

कृष्णकाष्ठं क्ली कालागुरु इति राजनिर्घण्टः॥

कृष्णकोहलः पुं द्यूतकृत् इति त्रिकाण्डशेषः॥

कृष्णगं क्ली शोभाञ्जन इति। राजनिर्घण्टः॥

कृष्णगर्भः पुं कट्फलः इति। राजनिर्घण्टः॥

कृष्णचञ्चुकः पुं चणकः इति राजनिर्घण्टः॥

कृष्णचतुर्द्दशी स्त्री कृष्णपक्षीय चतुर्द्दशी तत्पर्य्यायः भूतः २ इति त्रिकाण्डशेषः॥

कृष्णचरः त्रि कृष्णसम्भूत॥ पूर्व्वोगवादिः इति मुग्धबोधे॥

कृष्णचूडिका स्त्री गुञ्जा इति राजनिर्घण्टः॥

कृष्णचूर्णं क्ली लोहमलं इति राजनिर्घण्टः॥

कृष्णजटा स्त्री जटामांसी इति रत्नमाला॥

कृष्णजीरकः पुं कृष्णवर्णजीरकः केलेजीरा इति भाषा तत्॥ पर्य्यायः सुषवी २ कारवी ३ पृथ्वी ४ पृथुः ५ काला ६ उपकुञ्चिका इत्यमरः सुषवी ८ कुञ्चिका ९ इति तट्टीयां नयनानन्दः॥ उपकुञ्चिः १० इति रत्नमाला॥ कृष्णा ११ जरणा १२ पृथ्वी १३ बहुगन्धा १४ अस्यगुणाः कटुत्वं उष्णत्वं कफ शोथ जीर्णज्वर नाशित्वं रुचिचक्षुर्हितकारित्वं

ग्राहित्वञ्च इति राजनिर्घण्टः॥ तत्स्थूलसूक्ष्म भेदेन द्विधा

कृष्णतण्डुला स्त्री कर्णस्फोटलता इति राजनिर्घण्टः॥

कृष्णताम्रं क्ली गोशीर्षचन्दनं। इति शब्दमाला॥

कृष्णतारः पुं हरिणः इति राजनिर्घण्टः॥

कृष्णत्रिवृता स्त्री कृष्णवर्णत्रिवृत् कालतेउडी इति भाषा तत्। पर्य्यायः श्यामा २ पालिन्दी ३ कालमेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुषेणिका ८ इति जटाधरः॥

कृष्णदन्ता स्त्री काश्मरी वृक्षः। इति राजनिर्घण्टः॥

कृष्णदेहः पुं भ्रमरः इति। सारस्वतः कृष्णवर्णशरीरे त्रि।

कृष्णद्वैपायनः पुं वेदव्यासः॥ इति त्रिकाण्डशेषः॥

कृष्णधत्तूरकः पुं कृष्णवर्णधुस्तूरः कालधतूरा इति भाषा तत् पर्य्यायः सिद्धः २ कनकः ३ सविरः ४ शिवः ५ कृष्णपुष्पः ६ विषारातिः ७ क्रूरधूर्त्तः ८। अस्यगुणाः कटुत्वं उष्णत्वं॥ कान्तिकारित्वं व्रणार्त्तित्वग्दोष। खर्ज्जुके इति ज्वरभ्रमनाशित्वञ्च। सितनी कृष्ण लोहित पीत॥ प्रसवाश्च सन्ति धत्तूराः सामान्य गुणोपेताः तेषु गुणाढ्यस्तु कृष्ण कुसुमः स्यात् इति राजनिर्घण्टः।

कृष्णपर्णी स्त्री कालतुलसी इति रत्नमाला॥

कृष्णपक्षः पुं असितपक्षः॥ सतु प्रतिपदाद्यमावास्यान्तानि पञ्चदशदिनानि यथा तत्र। पक्षावुभौ मासे शुक्लः कृष्णो क्रमेणहि चन्द्र वृद्धि करः शुक्लः कृष्णश्चन्द्रक्षयात्मकः पक्षस्याद्या स्तिथयः क्रमात् पञ्चदशस्मृताः दर्शान्ताः कृष्णपक्षेताः पूर्णिमान्ताश्च शुक्लके इति तिथ्यादितत्वं

कृष्णपाकः पुं करमर्द्दः इति शब्दरत्नावली॥

कृष्णपाकफलः पुं करमर्द्दकः इत्यमरः॥

कृष्णपिङ्गला स्त्री दुर्गा इति॥ त्रिकाण्डशेषः॥

कृष्णपिण्डीतकः पुं वृक्षविशेषः तत्पर्य्यायः वराहः २॥ कृष्णपिण्डीरः ३ इति रत्नमाला

कृष्णपिण्डीरः पुं कृष्णपिण्डीतक वृक्षः इति रत्नमाला॥



कृष्णपिपीली स्त्री कृष्णवर्णा ॥
पिपिलिका कालपिपीडा इति
भाषा तत्पर्य्यायः स्थूला २ ॥
हस्तरुहा ३ इतिराजनिर्घंटः।
कृष्णपुष्पः पुं कृष्णधत्तूरकः इ
ति राजनिर्घंटः ॥
कृष्णपुष्पी स्त्री प्रियंगुवृक्षः इति
शब्दचंद्रिका ॥
कृष्णफलः पुं करमर्द्दकः ॥
इत्यमरटीकायां भरतः ॥
कृष्णफलपाकः पुं करमर्द्दकः
इतिद्विरूपकोषः ॥
कृष्णफला स्त्री सोमराजी।
इत्यमरः ॥
कृष्णभूमः पुं कृष्णवर्णमृत्तिका
युक्तोदेशः इति हेमचंद्रः ॥
कृष्णभूमिजा स्त्री गोमूत्रिकातृणं
इतिराजनिर्घंटः ॥
कृष्णभेदा स्त्री कटुका इति।
राजनिर्घंटः ॥
कृष्णभेदी स्त्री कटुकी इत्यमरः
कृष्णमुद्गः पुं मुद्गविशेषः का
लमुग इति भाषा तत्पर्य्यायः ॥
वासितः २ माषवः ३ खराहुञ्जः ४
अस्य गुणाः त्रिदोष दाह ॥
नाशित्वं मधुरत्वं लघुत्वं ॥
दीपनत्वं पथ्यत्वं बलवीर्य्यदा।

पुष्टिदात्वंच इतिराजनिर्घंटः
कृष्णमूली स्त्री शारिवाविशेषः
इतिराजनिर्घंटः ॥
कृष्णमृत स्त्री कालमृत्तिका ॥
तत्पर्य्यायः सत्ता भूमिः २
अस्या गुणाः तृड्दाहास्रप्रदर
श्लेष्मपित्त हरत्वं इति
राजनिर्घंटः ॥
कृष्णमृत्तिकः पुं कृष्णभूमः इति
हेमचंद्रः ॥
कृष्णरुहा स्त्री जतुकालता इति
राजनिर्घंटः ॥ (स्य
कृष्णरूप्यः त्रि कृष्णचरः कृष्ण
भूतपूर्वो गवादिः इतिमुग्धबोध
व्याकरणं ॥ (णे
कृष्णलवणं क्ली सौवर्च्चललव
काचलवणं इतिराजनिर्घंटः
कृष्णलकः पुं गुंजा यथा
पंचकृष्णलको माषस्ते सवर्ण
स्तु षोडश इति मनुः ॥
कृष्णला स्त्री गुंजा इत्यमरः
कृष्णलोहं क्ली अयस्कांतः ॥
इतिराजनिर्घंटः ॥
कृष्णलोहितः पुं कृष्ण रक्त
मिश्रवर्णः धूम्रवर्णः तद्वति त्रि
इत्यमरः ॥
कृष्णवक्त्रः पुं वानरः इति।

हलायुधः ॥
कृष्णवर्त्मा न् पुं अग्निः चित्रकवृक्षः
इत्यमरः दुराचारः राहुः
इतिमेदिनी ॥
कृष्णवल्ली स्त्री कृष्णार्जकः इति
शब्दचंद्रिका सारिवा विशेषः ॥
इतिराजनिर्घंटः ॥
कृष्णवल्लिका स्त्री जतुकालता
इतिराजनिर्घंटः ॥
कृष्णवर्व्वरकः पुं वर्व्वरवृक्षः इति
राजनिर्घंटः ॥
कृष्णवानरः पुं कालवानरः।
तत्पर्य्यायः गोलांगूलः २ ॥
गोरास्यः ३ कपिः ४ कृष्णमुखः ५
इतिराजनिर्घंटः ॥
कृष्णवीजं क्ली कालिंगं इति
राजनिर्घंटः ॥
कृष्णवीजः पुं रक्तशिग्रुवृक्षः
इतिजटाधरः ॥
कृष्णवृन्ता स्त्री पाटलावृक्षः ॥
इत्यमरः माषपर्णी इति ॥
मेदिनी ॥
कृष्णवृंतिका स्त्री गंभारीवृक्षः
पेठिकावृक्षः इतिरत्नमाला।
कृष्णशारः पुं कृष्णसारमृगः।
इत्यमरटीकायां रमानाथः ॥
कृष्णशालिः पुं धान्यविशेषः

कालथान इति भाषा तत्पर्य्यायः
कालशालिः २ श्यामशालिः ३
सितेतरः ४ अस्य गुणाः त्रिदोष
दाहनाशित्वं मधुरत्वं पुष्टि ॥
वीर्य्यवर्द्धनत्वं वर्णकांतिबल
कारित्वंच इतिराजनिर्घंटः ॥
कृष्णशिंबिका स्त्री कृष्णवर्णशिंबी
कालशिम इति भाषा तत्
पर्य्यायः काकांडी २ इति
रत्नमाला ॥
कृष्णशिग्रुः पुं शोभञ्जनवृक्षः
इतिराजनिर्घंटः ॥
कृष्णशृंगः पुं महिषः इति
हेमचंद्रः ॥
कृष्णसखः पुं कृष्णस्यसखा ॥
अर्जुनः इति मुग्धबोधव्याकरणे
कृष्णसखी स्त्री जीरकः इति
शब्दचंद्रिका ॥
कृष्णसर्षपः पुं राजसर्षपः इति
राजनिर्घंटः ॥
कृष्णसारः पुं हरिणभेदः ॥
कालसार इति भाषा इत्यमरः
अस्य मांस गुणाः संग्राहित्वं
रुचिबलकारित्वं ज्वरनाशित्वंच
इतिराजवल्लभः स्नुहीवृक्षः
शिंशपा वृक्षः इति मेदिनी ॥
खदिरवृक्षः इतिशब्दरत्नावली



कृष्णसारंगः पुं कृष्णसारः ॥
कृष्णवर्णः सारंगो मृगः इति
कर्म्मधारय समासान्निष्पन्नः ॥
कृष्णसारथिः पुं अर्ज्जुनवृक्षः
इतिराजनिर्घंटः ॥ बहुव्रीहौ।
पार्थश्च ॥
कृष्णसारा स्त्री शिंशपावृक्षः।
इतिरत्नमाला ॥
कृष्णस्कंधः कालस्कंधः तमाल
वृक्षः इत्यमरटीकायां भरतः ॥
कृष्णा स्त्री द्रौपदी नीलीवृक्षः
पिप्पली द्राक्षा इति मेदिनी।
नीलपुनर्णवा कृष्णजीरकः।
गंभारी कटुका सारिवा ॥
विशेषः राजसर्षपः इति ॥
राजनिर्घंटः पर्पटी इतिभाव
प्रकाशः काकोली सोमराजी
इतिजटाधरः ॥
कृष्णागुरु क्ली अगुरुविशेषः
तत्पर्य्यायः अगुरु २ शृंगारं ३
विश्वरूपकं ४ शीर्षं ५ कालागुरु
६ केशं ७ वसुकं ८ कृष्णकाष्ठं ९
शुपार्हं १० वल्लरं ११ मिश्रवर्णं १२
गंधे १३ अस्यगुणाः कटुत्वं ॥
उष्णत्वं तिक्तत्वं लेपे शीतलत्वं
पानेपित्त हरत्वं केषांमते ॥
त्रिदोषघ्नत्वं इतिराजनिर्घंटः॥

कृष्णाचलः पुं रैवत पर्वतः ॥
इतिजटाधरः ॥
कृष्णांजनी स्त्री कालांजनीवृक्षः
इतिराजनिर्घंटः ॥
कृष्णानदी स्त्री नदी भेदः ॥
तत्पर्य्यायः कृष्णसमुद्भवा २
कृष्णवेण्णा ३ कृष्णगंगा ४ अस्या
जलगुणाः स्वच्छत्वं रुच्यत्वं
दीपनत्वं पावनत्वंच इति॥
राजनिर्घंटः ॥
कृष्णाभा स्त्री कालांजनी इति
राजनिर्घंटः ॥
कृष्णामिवं क्ली कृष्णायसं इति
कृष्णामिषं क्ली कृष्णायसं इति
हेमचंद्रः ॥
कृष्णायसं क्ली कृष्णवर्णलोहे इति
रत्नमाला ॥
कृष्णार्च्चिः स पुं अग्निः इति
भूरिप्रयोगः ॥
कृष्णार्ज्जकः पुं कालतुलसी
तत्पर्य्यायः कालमालः २ मालूकः
कृष्णमालकः ४ कृष्ण मल्लिका ५
गरघ्नः ६ वनवर्व्वरः ७ वर्व्वरी ८
जातिः ९ अस्यगुणाः कटुत्वं
उष्णत्वं कफ वातामय नेत्ररोग
नाशित्वं रुचि मुखप्रसव ॥
कारित्वंच इति राजनिर्घंटः॥

कृष्णालुः पुं नीलालुः इति
राजनिर्घंटः ॥
कृष्णावासः पुं अश्वत्थवृक्षः
हेमचंद्रः ॥ (स)
कृष्णाश्रितः त्रि कृष्णमाश्रितः य
आश्रयः कृष्णस्य इतिमुग्धबोधं।
कृष्णिका स्त्री राजिका राइ सवी
इतिभाषा इत्यमरः ॥
कृष्णेक्षुः पुं इक्षुभेदः ॥
काजलीआक इति भाषा॥
तत्पर्य्यायः घृणमेक्षुः २ ॥
कोकिलेक्षकः ३ कोकिलाक्षः ४
अस्यगुणाः क्लिन्नत्वं पाके ॥
मधुरत्वं स्वादुत्वं सत्त्ययत्वं ॥
कटुत्वं रसाधिकत्वं त्रिदोषहारित्वं
समवीर्य्यबहुवीर्य्यसवर्णदातृत्वं
च इतिराजनिर्घंटः ॥
कृष्णोडुंबरिका स्त्री काकोडुंबरिका
इतिराजनिर्घंटः ॥
कृसरः पुं कृशरः इति ॥
जटाधरः ॥
कृष विलेपे इति
कविकल्पद्रुमः ॥
कृ ञ णि हिंसे इति
कविकल्पद्रुमः ॥
कृ ङ क विज्ञाने इति ॥
कविकल्पद्रुमः ॥

कृत क संशब्दे इति ॥
कविकल्पद्रुमः ॥
क्लृप्तः त्रि कृतकल्पनः कल्पने
सामर्थ्ये तद्विशिष्टः कल्पनार्थे
कृपधातोः कर्म्मणिक्तेक्लृपादेशः
नियतः यथा अवघ्रप क्लृप्ताभिः
पर्ह्वितत्व चतुरत्वादि तन्नद्धर्मा
ऽवच्छिन्नाधिकरणता व्यक्तिभि
रेवोपपन्नौ इति जगदीशः॥
क्लृप्तकीला स्त्री व्यवस्थापत्रे
तत्पर्य्यायः पटोलिका २॥
इति त्रिकांडशेषः
क्लृप्तधूपः पुं सिह्लकः इति
जटाधरः ॥
क्लृप्तकः त्रि क्रीतः इति॥
कोकयः पुं सूर्य्यवंशीयराज
विशेषः इतिश्रीभागवतं ॥
केकयी स्त्री दशरथराजपत्नी
सातुकेकय राजपुत्री भरत ॥
माताच इति शब्दरत्नावली॥
केकरः त्रि वलिरः टेरा ॥
इतिभाषा इत्यमरः ॥
केकास्त्री मयूरवाणी इत्यमरः
केकावलः पुं मयूरः इति॥
शब्दचंद्रिका ॥
न
केकीपुं मयूरः इत्यमरः ॥



केकेयी स्त्री केकयी इति ॥
शब्दरत्नावली ॥
केचन ष्व केचित् इति
व्याकरणं ॥
केचित् ष्व केचन कोनव्यक्तिरा
इतिभाषा इतिव्याकरणं ॥
केचुकं स्त्री कचुः । इति ।
त्रिकांडशेषः ॥
केणिका स्त्री पटकुटी कानात्
इतिभाषा इति हेमचंद्रः ॥
केतत् क मंत्रणे निःश्रावणे ।
समयोद्भावणे इतिकविकल्पद्रु
मः केतकः पुं केतकीवृक्षः इति
त्रिकांडशेषः ॥
केतकी स्त्री पुष्पवृक्षविशेषः
केया इति भाषा तत्पर्यायः।
सूचीपुष्पः २ हलीनः ३ जंबुलः ४
इतिरत्नमाला केतकः ५ ।
सूचिकापुष्पः ६ जंबुकः ७ क्रकच
च्छदः ८ इतिभावप्रकाशः तीक्ष्णपुष्पा
९ विफला १० धूलिपुष्पिका ११
मेध्या १२ कंटदला १३ शिवद्विष्टा
१४ नृपप्रिया १५ क्रचचा १६ ॥
दीर्घपत्रा १७ स्थिरगंधा १८ ॥
गंधपुष्पा १९ इंदुकलिका २०
दलपुष्पा २१ पांशुला २२ अस्या
गुणाः मधुरत्वं तिक्तत्वं ॥
कफनाशित्वं कटुत्वं लघुत्वंच
तत्पुष्पगुणाः वर्णत्वं केश्य ॥
दौर्गंध्य नाशित्वंच हेमाभाया
स्तस्या गुणाः मदनोन्मादकत्वं
हृद्यत्वं सौख्य कारित्वंच ॥ त्वे
तस्याः स्तन गुणाः अतिशिशिर
कटुत्वं पित्तकफापहत्वंरसायन
त्वंवर्ण देहदार्ढ्य कारित्वंच ॥
इतिराजनिर्घंटः ॥
केतनं स्त्री ध्वजः कार्य्य ॥
निमंत्रणं इत्यमरः चिह्नं ॥
गृहं इतिहेमचंद्रः स्थानं ॥
इतिशब्दरत्नावली ॥
केतुः पुं ग्रहविशेषः सतराहोः
शरीरंतत्पर्य्यायः शिखी २ इति
दीपिका केतुगणाः कुशद्वीपजाताः
जैमिनि मुनेः संतानः षंडगुलः
धूम्र वर्णः गृध्रवाहनः शूद्रवर्णः
विकृताननः सूर्य्याभिमुखः हृदः
धूम्रवसनः वरदः गदाधरश्च
तस्याधिदेवता चित्रगुप्तः प्रत्याधि
देवताब्रह्मा इतिग्रहयागतत्वं
अस्यस्वरूपं शान्ति राहुवत् ॥
सचशिखावान् अनेकरूपः इति
ताजके रोगः पताका ॥
उत्पातः चिह्नं इति मेदिनी ॥
दीप्तिः इति हेमचंद्रः ॥

केतुभः पुं मेघः इति
शब्दमाला ॥
केतुमालं स्त्री जंबुद्वीपस्यनव
खंडांतर्गत खंडविशेषः इति
त्रिकांडशेषः ॥
केतुरत्नं स्त्री वैडूर्य्यमणि इति
राजनिर्घंटः ॥
केदरः पुं वृक्षविशेषः इति
लिंगादि संग्रहे अमरः टीके
त्रि इति शब्द रत्नावली ॥
केदारः पुं क्षेत्र क्षेत् ॥
इति भाषा इत्यमरः केदार ॥
जलगुणाः मधुरत्वं विपाके।
गुरुत्वं दोषलत्वं तदेव वद्धं ॥
मत्केतुविशेषाद्दोषदं भवत्
शिवः भूमिभेदः आलवाले
इतिमेदिनी ॥ (की
केदारकटुका स्त्रीकटुकाकट्
इतिभाषा इतिराजनिर्घंटः।
केदारजं स्त्री पद्मकाष्ठं इति
राजनिर्घंटः ॥
केनारः पुं कुंभिनरकः इति
हेमचंद्रः शिरः कपोलः ॥
संधिः इतिमेदिनी ॥
केनिपातः पुं अरित्रं हालि।
इतिभाषा इतिशब्दरत्नावली
केनिपातकः पुं केनिपातः
इत्यमरः ॥
केंडुः पुं तिंडुकवृक्षः इति
शब्दरत्नावली ॥
केंडकः पुं गालव वृक्षः गाव
इति भाषा इतिशब्दचंद्रिका ॥
केंद्रं स्त्री लग्ने लग्नात् चतुर्थ
सप्तदशमस्थानानि तत्पर्य्यायः
कंटकं २ यथा लग्नोद्भूतकर्माणि
केंद्रमुक्तंच कंटकं चतुष्टयंचात्र
विंदो वली लग्ने विशेषतः इति
नीलकंठकृत वर्षतंत्राख्य ताजके
स्पष्टग्रहानयनार्थं शीघ्रमंद
संज्ञकोक वृत्ते यथा मन्दोच्चेन
हीनोग्रहो मंदकेंद्रं इति ॥
भास्करीय सिद्धांत शिरोमणे
स्पष्टाधिकारः ग्रहसंशोध्य।
मंदोच्चात् तथाशीघ्रात्विशोध्यच
शीघ्रकेंद्रं इतिसूर्य्य सिद्धांतः
गोलस्यमध्यस्थाने यथा ॥
वृत्तस्य मध्ये किलकेंद्रमुक्तंकेंद्रं
ग्रहोच्चांतरं मुच्यते ऽतः यतो
ऽन्तरे तावति तेनादेशनीचोच्च
वृत्तस्य सैदेव केंद्रं ॥ इति ॥
सिद्धांतशिरोमणौ गोलाध्यायः
केप ऋ ऊ गत्यां चाले इति

कविकल्पद्रुमः ॥
केमुकः पुं वृक्षविशेषः केंउ
इति भाषा तत्पर्य्यायः पेचुकः
२ पेचुनी ३ पेचुः ४ पेचिका ५
दलसारिणी ६ केमुकः ७ इति
रत्नमाला तस्य मूलगुणाः कफ
पित्तनाशित्वं रोचनत्वं अग्नि
दीपनत्वंच इति राजवल्लभः ॥
कटुत्वं पाके तिक्तत्वं ग्राहित्वं ॥
हिमत्वं लघुत्वं पाचनत्वं ॥
रुच्यत्वं ज्वरकुष्ठकासप्रमेहास्र
नाशित्वं वातलत्वं पटुत्वंच ॥
इति भावप्रकाशः ॥
केयूरं क्ली अलंकारविशेषः ।
ताड इति भाषा तत्पर्य्यायः ।
अंगदं २ इत्यमरः ॥
केयूरः पुं रतिबंधविशेषः ।
यथा स्त्री जंघे चैव संधीय्य दोर्भ्या
मालिंग्य सुंदरी कारयेत् ॥
स्थापने कामी बंधः केयूरसंज्ञकः
इति स्मरदीपिका अपिच ॥
स्त्रीणां जंघोत्तरा विश्लेषादमालिं
ग्य सुंदरी कामयेद्विपुलं कामी ।
बंधः केयूर संज्ञकः इति रतिमंजरी
केरलः पुं देशभेदः मालेबार ॥
इति भाषा यथा ॥ उग्राः

केरलपर्य्यायः इति हेमचंद्रः
वेदयागानधिकारि म्लेच्छजाति
म्लेच्छविशेषः पुरैते क्षत्रिया
आसन् सगरेणैवं धर्म्मा नाशितः
वैष्णव्यत्वंच कृते यथा ॥
निःस्वाध्याय वषट्काराः कृता
महात्मना शकायनकोंबोजाः
पारदाः पल्हवास्तथा कोलिसर्पा
माहिषका दर्वाश्चोलाः सकेरलाः
सर्वे ते क्षत्रिया स्तात धर्म्म
स्तेषां निराकृतः इति
हरिवंशः ॥
केरली स्त्री ज्योतिर्ग्रंथविशेषः
होरा इति शब्दरत्नावली ॥
केल ऊ चाले गतौ इति
कवि कल्पद्रुमः ॥
केलकः पुं खड्गधारादिनर्त्तकः
तत्पर्य्यायः प्लवकः २ इति ।
त्रिकांडशेषः ॥
केलिः पुं स्त्री परीहासः ॥
तत्पर्य्यायः द्रवः ३ क्रीडा ४
लीला ५ नर्म्म ६ इत्यमरः ॥
केलिः स्त्री पृथिवी इति शब्दमाला
केलिकः पुं अशोकवृक्षः ॥
इति राज निर्घंटः ॥
केलिकला स्त्री सरस्वतीवीणा

इति शब्दरत्नावली ॥
केलि किलः पुं कूष्मांडकः स
शिवस्यानुचरः नाट्य नायक ।
वयस्यः तत्पर्य्यायः विदूषकः २
वासंतिकः ३ वैहासिकः ४ प्रहासी
प्रीतिदः ६ इति हेमचंद्रः ॥
केलिका स्त्री रतिः स्मात ॥
कामदेवपत्नी इति त्रिकांडशेषः
केलिकीर्णः पुं उष्ट्रः इति
हेमचंद्रः ॥
केलिकुंचिका स्त्री प्रणालिका
प्रणाली इति भाषा इति
त्रिकांडशेषः ॥
केलिकोषः पुं नटः इति
शब्दरत्नावली ॥
केलिनागरः पुं संभोगवान्
इति जटाधरः ॥
केलिमुखः पुं परीहासः इति
त्रिकांडशेषः ॥
केलिवृक्षः पुं कदंबविशेषः ॥
केलि कदंब इति ख्यातः इति ।
शब्दरत्नावली ॥
केलिसचिवः पुं नर्म्मदः क्रीडा
विषयकमंत्री इति शब्दमाला
केव ऊ ङ सेवने इति ॥
कविकल्पद्रुमः ॥
केवर्त्तः पुं कैवर्त्तजातिः इति ।

द्विरूपकोषः ॥
केवलं क्ली निर्णीते इत्यमर
मेदिनीकरौ ज्ञानभेदः ॥
इति विश्वः हेमचंद्रश्च शुद्धे ।
कृत्स्ने असहायः इति संविन
सारे उणादिवृत्तिः ॥
केवलः पुं कुहनः इति मेदिनी
केवलः त्रि एकः कृत्स्नः ॥
इत्यमर मेदिनीकरौ ॥
केवलज्ञानी पुं भूतार्हद्विशेषः
इति हेमचंद्रः ॥
केवलद्रव्यं क्ली मरिचे इति
शब्दचंद्रिका ॥
केवली स्त्री ज्ञानभेदः इति
मेदिनी ग्रंथविशेषः इति
हेमचंद्रः ॥
केवली पुं जैनविशेषः इति
हलायुधः ॥
केविका स्त्री पुष्पविशेषः ॥
केवर इति भाषा कोंकणे ॥
प्रसिद्धा तत्पर्य्यायः कविका २
केवी ३ भृंगारिः ४ नृपवल्लभा ५
भृंगमारी ६ महागंधा ७ राजकन्या
८ अलिवाहिनी ९ अस्यागुणाः
मधुरत्वं शीतत्वं दाह पित्त ॥
श्रमवात श्लेष्म रोग पित्त कुष्ठादि
विनाशित्वंच इति राजनिर्घंटः



केशः पुं मत्स्यजातीय थान ॥ विशेषः चुल इति भाषा सतु। गर्भस्थबालकस्य अष्टामि मासे जायते इतिमुग्धबोधः तत्। पर्य्यायः चिकुरः २ कुंतलः ३ वा लः ४ कचः ५ शिरोरुहः ६ इत्यमरः शिरसिजः ७ मूर्द्धजः ८ अस्रः ९ हि जिनः १० इतिजटाधरः तत्समूहार्थ वाचकाः शब्दाः यथा बालाः। स्तस्त्र पक्षः पाशरचना भार उच्चयः हस्तः पक्षः कलापश्च केश भूयस्त्व वाचकाः इतिहेमचंद्रः वरुणः ह्रीवेरं इतिमेदिनी ॥ दैत्यविशेषः इति हेमचंद्रः ॥ विष्णुः इति शब्दरत्नावली ॥

केशकलापः पुं केशपाशः केशसमूहः इतिहेमचंद्रः ॥

केशकारः पुं इक्षुभेदः ॥ करियाकुशियार इतिहिंदीभाषा अस्यगुणाः गुरुत्वं शीतत्वं ॥ रक्त पित्त नाशपहत्वंच इति भावप्रकाशः ॥

केशगर्भकः कबरी इति ॥ त्रिकांडशेषः ॥

केशघ्नं क्ली इंद्रलुप्तकं ॥ हेमचंद्रः ॥

केशछिद् पुं नापितः इति शब्दमाला ॥

केशटः पुं विष्णुः छागः ॥ तकुणः इति मेदिनी भ्राता। इति शब्दरत्नावली कामदेवस्य शोषण बाणः इति विश्वः ॥ शोणकवृक्षः इतित्रिकांडशेषः

केशधृत् पुं भूतकेशः इति ॥ शब्दचंद्रिका ॥

केशनामन् क्ली बाले बाला इति भाषा इत्यमरः ॥

केशपक्षः पुं केशपाशः ॥ इत्यमरः ॥

केशपर्णी स्त्री अपामार्गः इति शब्दरत्नावली ॥

केशपाशः पुं केशसमूहः यथा पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे इत्यमरः ॥

केशपाशी स्त्री शिरोमध्यस्थ शिखाचूडा इत्यमरः ॥

केशभूः पुं शिरः इति ॥ राजनिर्घंटः ॥

केशमथनी स्त्री शमीवृक्षः इति राजनिर्घंटः ॥ (चिरुणी

केशमार्जकं क्ली कंकतिका इति भाषा इति जटाधरः ॥

केशमार्जनं क्ली कंकतिका इति हेमचंद्रः केशमुष्टिश्च ॥

केशमुष्टिः पुं विषमुष्टिवृक्षः महानिंबः इतिराजनिर्घंटः।

केशरः पुं क्ली किंजल्कः। इत्यमरः ॥

केशरः पुं नागकेशर वृक्षः। बकुलवृक्षः पुन्नागवृक्षः ॥ सिंहजटा इति मेदिनी ॥ हिंगुवृक्षः इत्यमरटीकायां भरतः ॥

केशरंजनः पुं भृंगराजवृक्षः इतिराजनिर्घंटः ॥

केशराजः पुं शाकभेदः ॥ केसुरे इतिभाषा तत्पर्य्यायः। भृंगराजः २ भृंगः ३ पतंगः ४ मार्करः ५ इतिरत्नमाला ॥ मार्कवः ६ इत्यमरः नागमारः ७ पवरुः ८ भृंगसोदरः ९ इति त्रिकांडशेषः केशरंजनः १० केशपः ११ कुंतलवर्द्धनः १२ इति वैद्यके ॥ अस्य गुणाः ॥ अग्निकारित्वं केशचक्षुर्हितत्वं पांडुकफापहत्वं रसायनत्वंच इतिराजवल्लभः ॥

केशराम्लः पुं मातुलंगकवृक्षः इतिजटाधरः ॥

केशरी पुं सिंहः इत्यमरः ॥ चोटकः पुन्नागवृक्षः नागकेशर वृक्षः इतिमेदिनी बीजपूरक वृक्षः इति जटाधरः ॥

(ता:

केशरुहा स्त्री भद्रदंतिकावृ इतिराजनिर्घंटः ॥

केशरूपा स्त्री वंदाकवृक्षः ॥ इति राज निर्घंटः ॥

केशवः पुं विष्णुः इत्यमरः ॥ पुन्नागवृक्षः केशवति त्रि इतिमेदिनी ॥

(ता

केशवर्द्धिनी स्त्री सहदेवील इतिराजनिर्घंटः ॥

केशवायुधः पुं आम्रवृक्षः इति शब्दमाला विष्णोरस्त्री क्ली

केशवालयः पुं अश्वत्थवृक्षः इति त्रिकांडशेषः ॥

केशवावासः पुं अश्वत्थवृक्षः इतिजटाधरः ॥

केशवेशः पुं कबरी चुलेर खोपा इति भाषा इत्यमरः ॥

केशहंत्री स्त्री शमीवृक्षः इति राजनिर्घंटः ॥

केशहस्तः पुं केशसमूहः इत्यमरः

केशाकेशि क्ली केशेषुकेशेषु गृहीत्वा प्रवृत्ते युद्धे चुला चुलि इतिभाषा इति व्याकरणं ॥



केशहन्त्री स्त्री सहदेवी इति
राजनिर्घंटः ॥
केशाह्वी स्त्री महानीली इति
राजनिर्घंटः ॥
केशिकः त्रि प्रशस्तकेशयुक्तः
इत्यमरः ॥
केशिका स्त्री शतावरी इति
राजनिर्घंटः ॥
केशिनिसूदनः पुं श्रीकृष्णः इति
भगवद्गीता ॥
केशिनी स्त्री जटामांसी इति
राजनिर्घंटः चारुपुष्पी ॥
प्रशस्तकेशविशिष्टा इत्यमरः
केशसूदनः पुं श्रीकृष्णः इति
त्रिकांडशेषः ॥
केशिहा॰ पुं श्रीकृष्णः इति।
हेमचंद्रः ॥
केशी॰न त्रि प्रशस्तकेशयुक्तः
इत्यमरः ॥
न्
केशी पुं विष्णुः इति
त्रिकांडशेषः ॥
दैत्यभेदः ॥
इतिमेदिनी सिंहः इति ॥
शब्दरत्नावली ॥
केशी स्त्री नीली इति॥
राजनिर्घंटः भूतकेशीवृक्षः

अजलोमावृक्षः इतिरत्नमाला
केशोच्चयः पुं केशसमूहः॥
इतिहेमचंद्रः ॥
केशपं क्ली कृष्णागुरु ॥
भृंगराजे पुं इतिराजनिर्घंटः
केसरं क्ली हिंगु इति ॥
हेमचंद्रः नागकेसरपुष्पं
कासीसं स्वर्णं इति
राजनिर्घंटः ॥
केसरः पुं नागकेशरवृक्षः
तुरंगस्कंधकेशः सिंहस्कंधकेशः
वकुलवृक्षः पुन्नागवृक्षः
किंजल्कः इतिहेमचंद्रः ॥
केसरः पुं ~~क्ली किंजल्कः~~ हिंगुनि
पुंसी इति रभसः ॥
राजनिर्घंटः ॥
केसराम्लः पुं बीजपूरः इति
राजनिर्घंटः ॥
केसरिका स्त्री सहदेवीलता
इतिराजनिर्घंटः ॥
केसरिसुतः पुं हनूमान् इति
हेमचंद्रः ॥
केसरी॰न पुं सिंहः ॥
घोटकः ॥
पुन्नागः नागकेशरः इति
मेदिनी रक्तशिग्रु इति ॥
राजनिर्घंटः वानरविशेषः

सन् हनूमत् पिता इतिरामायणं
कै॰ शब्द इति कविकल्पद्रुमः
केकयी स्त्री कैकयी इति ॥
शब्दरत्नावली ॥
कैकेयी स्त्री केकयीसातकेकय
राजकन्या दशरथ राजपत्नीच
इतिशब्दरत्नावली॥
कैंकर्यं क्ली किंकरत्वे दासत्वे
किंकरशब्दात् भावार्थेष्यप्रत्ययः
कैटजः पुं कुटज वृक्षः इति
भावप्रकाशः ॥
कैटभः पुं दैत्य विशेषः ॥
यथायोगनिद्रां यदा विष्णु
र्जगत्येकार्णवी कृतास्तीर्य
शेष मभजत् कल्पांते भगवान्प्रभु
तदाद्वावसुरौ घोरौ विख्यातौ।
मधुकैटभौ विष्णुकर्णमलोद्भू
तौ हंतुं ब्रह्माणमुद्यतौ इति
मार्कंडेयपुराणं ॥
कैटभजित् पुं विष्णुः इत्यमरः
कैटभहा॰ पुं विष्णुः इति।
हेमचंद्रः ॥
कैभा स्त्री दुर्गा इति।
त्रिकांडशेषः ॥
कैटभारिः पुं विष्णुः इति ॥
हलायुधः ॥
कैटभी स्त्री दुर्गा इति

त्रिकांडशेषः ॥
कैटर्यः पुं कट्फल इत्यमरः ॥
निंवः महानिंवः इतिरत्नमाला
मदनवृक्षः इतिराजनिर्घंटः ॥
कैडर्यः पुं कट्फलः पूति
करंजः कटभी वृक्षः इति
राजनिर्घंटः ॥
कैतकं क्ली केतकीपुष्पे यथा
कैतकं तिक्त कटुक मिति
राजवल्लभः ॥
कैतवं क्ली कपटः द्यूतः
इत्यमरः वैडूर्यमणिः इति
राजनिर्घंटः ॥
कैदारं क्ली क्षेत्रसमूहः ॥
इत्यमरटीकायां भरतः ॥
कैदारः पुं शालिधान्य इति
राज निर्घंटः ॥
कैदारकं क्ली कैदारसमूहः
क्षेत्रगणः इत्यमरः ॥
कैदारिकं क्ली कैदारकं ॥
कैदार्यं इत्यमरः ॥
कैदार्यं क्ली तत्रैव क्षेत्रसमूहः
इत्यमरः ॥
कैरवं क्ली कुमुदं श्वेतोत्पलं
इत्यमरः ॥
कैरवः पुं शत्रुः कितवः॰
इतिमेदिनी ॥



कैरविनी स्त्री कुमुदिनी इति
शब्दरत्नावली ॥
कैरवी स्त्री चन्द्रिका इति
मेदिनी मेथिका इति ॥
राजनिर्घण्टः ॥
कैरवी पुं चन्द्रः इतिशब्दमाला
कैराटकः पुं स्थावरविषभेदः
इतिहेमचन्द्रः ॥
कैरातं क्ली भूनिम्बः इति
शब्दचन्द्रिका शम्बरचन्दनं इति
राजनिर्घण्टः ॥
कैरातः पुं भूनिम्बः इति।
राजनिर्घण्टः बलवान्पुरुषः तत्
पर्य्यायः दीर्घहः २ स्तामः ३
इतिहारावली ॥
कैरालं क्ली विडङ्गं इतिवैद्यकं
कैराली स्त्री विडङ्गा इति।
राजनिर्घण्टः ॥ (तः
कैलासः पुं स्वनामख्यातपर्व
इत्यमरः सच शिवकुवेरयोः
स्थानं तस्यपरिमाणं यथा।
जठरदेवकूटौ मेरोः पूर्वेणाष्टा
दशयोजन सहस्रमुदगायतौ
द्विसहस्रं पृथु तुङ्गौ भवतः
एवमपरेण पवनपारियात्रौ।
दक्षिणेन कैलास करवीरौ
प्रागायतौ इति श्रीभागवते

कैलासनिकेतनः पुं शिवः
इति कविकल्पलता ॥
कैलासौकाः पुं कुवेरः इति
हेमचन्द्रः ॥ (संकरः
कैवर्त्तः पुं स्वनामख्यातवर्ण
जातिः सतुवैश्या गर्भेक्षत्रिय
स्यौरसजातः इतिब्रह्मवैवर्त्त
पुराणं तत्पर्य्यायः दासः २
धीवरः ३ इत्यमरः दाशेरकः ४
जालिकः ५ इतिजटाधरः ॥
कैवर्त्तमुस्तं क्ली कैवर्त्तमुस्तके
इति शब्दरत्नावली ॥ (के
कैवर्त्तमुस्तकं क्ली कैवर्त्तीमुस्त
इत्यमरटीकायां भरतः ॥
कैवर्त्तिका स्त्री मालवेप्रसिद्धालता
विशेषः तत्पर्य्यायः सरंगा २
लता ३ वल्ली ४ दशगहा ५ रंगिणी
६ वस्त्ररंगा ७ सुभगा ८ अस्या
गुणाः लघुत्वं वृष्यत्वं कषायत्वं
कफकासश्वास मंदाग्निदोष
नाशित्वंच इतिराजनिर्घण्टः
कैवर्त्ति मुस्तकं क्ली कैवर्त्तीमुस्तकं
इत्यमरटीका
कैवर्त्ती स्त्री परिपेलं इति ॥
वैद्यकं कैवर्त्तपत्नीच ॥
कैवर्त्तीमुस्तकं क्ली मुस्ताप्रभेदः
केवटमुता इति भाषा केम्बर

इति नीचोक्तिः इति भरतः ॥
केम्बरिया मुथा इति सारसुन्दरी।
तत्पर्य्यायः कुटन्नटं दशपुरं ॥
३ वानेयं ४ परिपेलवं ५ प्लवं ६
गोपुरं ७ गोनर्दं ८ इत्यमरः ॥
दाशपुरं ९ दाशपूरं १० दशपुरं।
११ दशपूरं १२ परिपेलं १३ ॥
पारिपेलं १४ कैवर्त्तमुस्तकं १५
कैवर्त्तिमुस्तकं १६ इतितट्टीका।
वनसंभवं १७ इतिरत्नकोषः ॥
धान्यं १८ शीतपुष्पं १९ जीर्णबुध्न
कं २० अस्यगुणाः कटुत्वं उष्णत्वं
कफवातव्रणदाहाश्मशूलरक्तदोष
नाशित्वंच इति राजनिर्घण्टः ॥
हिमत्वं तिक्तत्वं कषायत्वं ॥
कान्तिदत्वं पित्तविसर्पकुष्ठकण्डू
विषनाशित्वंच उदंतवितन्नका।
नाम्ना हतस्य त्वकमुस्ताकृति
इतिभावप्रकाशः ॥
कैवलं क्ली विडङ्गं इति
रत्नमाला ॥
कैवल्यं क्ली मुक्तिः इत्यमरः ॥
कैशिकं क्ली केशसमूहः ॥
इत्यमरः ॥
कैशिकः पुं शृङ्गाररसः इति
शब्दरत्नावली जटाधरश्च ॥
कैशिकी स्त्री नाटकवृत्तिविशेषः

यथा भारती सात्वती कैशिक्यार
भटीच वृत्तयः इतिहेमचन्द्रः।
कैशोरं क्ली किशोरावस्था ॥
इतिशब्दरत्नावली सातुदशम
वर्षान्तरपञ्चदशवर्षावधिः इति
स्मृतिः ॥
कैश्यं क्ली केशसमूहः इत्यमरः
कोकः पुं चक्रवाकः वृकः।
ज्येष्ठीखर्जूरी ह्रस्वः भेकः ॥
इति मेदिनी विष्णुः इति ॥
त्रिकाण्डशेषः ॥
कोकडः पुं विलेशयमृगविशेषः
तत्पर्य्यायः जविनः २ कोकवावः
३ विलेशयः ४ चमरपुच्छः ॥ ५
लोमशः ६ धूम्रवर्णकः ७ तन्मांस
गुणाः श्वासानिलकासहरत्वंपित्त
दाहकरत्वंच इतिराजनिर्घण्टः
कोकदेवः पुं कपोतः इति।
राजनिर्घण्टः ॥
कोकनदं क्ली रक्तकुमुदं ॥
रक्तपद्मं इति मेदिनी ॥
कोकनदच्छविः पुं रक्तवर्णः
तद्वति त्रि इत्यमरः
कोकबन्धुः पुं सूर्य्यः इति
शब्दचन्द्रिका ॥ (इति
कोकाश्रः पुं समष्टिलहंसः
राजनिर्घण्टः ॥



कोकाहः पुं श्वेतघोटकः ॥
तत्पर्य्यायः ककः २ इति ॥
हेमचंद्रः क्वचित्पुस्तके कोकाह
इतिपाठः ॥ वर्ण
कोकिलः पुं स्वनामख्यातकृष्ण
मधुरस्वर पक्षी तत्पर्य्यायः ॥
वनप्रियः २ परभृतः ३ पिकः ४
इत्यमरः परपुष्टः ५ कालः ६
वसंतदूतः ७ ताम्राक्षः ८ गंधर्वः
मधुगायनः ९ वासंतः १० कल
कंठः ११ कामांधः १२ काकलीरवः
कुहूरवः १५ अन्यपुष्टः १६ मत्तः १७
मदनपाठकः १८ इति राजनिर्घ
टः भृंगारः इति त्रिकांडशेषः
कोकिलनयनः पुं कोकिलाक्ष
वृक्षः इत्यमरटीकायां रमानाथः
कोकिलावासः पुं आम्रवृक्षः
इति राजनिर्घण्टः ॥
कोकिलाक्षः पुं वृक्षविशेषः
कुलियाखारा इति भाषा
तालमखाना इति हिंदी भाषा
तत्पर्य्यायः इक्षुगंधा २ कांडेक्षुः
३ इक्षुरः ४ क्षुरः ५ इत्यमरः ॥
शृगाली ६ शृंखली ७ क्षुरकः ८
शृगालघंटी ९ वज्रास्थिः शृंख
ला ११ वज्रकंटकः १२ इक्षुः १३
इक्षुरकः १४ वज्रः १५ शृंखलीको

पिकेक्षणा १७ पिच्छिला १८ इति
राजनिर्घण्टः ॥ श्वेतस्य तस्य ॥
पर्य्यायः वीरतरुः २ त्रिक्षुरः ३
क्षुरकः ४ शुक्लपुष्पः ५ रक्तस्य
तस्य पर्य्यायः क्षुरकः २ अतिक्षुरः
३ इति रत्नमाला सामान्यस्य ॥
तस्य गुणाः आमवात वातरक्त
रोगनाशित्वं इति राजवल्लभः
मधुरत्वं शीतत्वं पित्तातिसार ॥
नाशित्वं शुक्रकफ बल रुचि।
कारित्वं संतर्पणत्वंच इति
राजनिर्घण्टः ॥
कोकिलाक्षकः पुं कोकिलाक्ष
वृक्षः इत्यमरटीकायां स्वामी
कोकिलेष्टा स्त्री महाजंबूः इति
राजनिर्घण्टः ॥
कोकिलेक्षुः पुं कृष्णेक्षुः इति
राजनिर्घण्टः ॥
कोकिलोत्सवः पुं आम्रवृक्षः
इति राजनिर्घण्टः ॥
कोंकणा स्त्री शस्त्रभेदः इति
हेमचंद्रः ॥
कोंकणः पुं देशविशेषः ॥
कोंकण इति भाषा इति विश्वः
कोंकणासुतः पुं परशुरामः ॥
इति शब्दमाला ॥
कोचः पुं जातिविशेषः सत ॥

मांसच्छेदि गर्भे तीवरस्यारस ॥
ज्जातः इति ब्रह्मवैवर्त्ते पुराणे
कोजागरः पुं आश्विनी पूर्णिमा
तत्पर्य्यायः शारदी २ पूत ॥
पूर्णिमा ३ शारत्पर्व ४ कौमुदी ५
इति त्रिकांडशेषः अथ कोजागर
कृत्यानि तत्र ब्रह्मपुराणे ॥
आश्वयुज्यां पौर्णमास्यां निकुंभो
वालुकार्णवत् आयाति सेनया
सार्द्धं कृत्वा युद्धं सदाहणं ॥
तस्मात्तत्र नरैर्मार्गाः स्वगेहस्य।
समीपतः शोधितव्याः प्रयत्नेन
भूषितव्याश्च मंडनैः पुष्पाद्यैः।
फलमूलैश्च सर्षपप्रकरैस्तथा
वेश्मानि भूषितव्यानि नानावर्णैः
विशेषतः स्वस्नाने रत्नलिप्तैश्च
नरैर्भाव्यं सर्वायुधैः दिवा तत्र।
न भोक्तव्यं मनुष्यैश्च विवेकिभिः
स्त्रीबालवृद्ध मूर्खैश्च भोक्तव्यं ॥
पूजितैः सुरैः पूज्याश्च सफलैः
पत्रैस्तथा द्वारोर्द्धे भित्तयः ॥
द्वारोपांते सदीपस्तु संपूज्यो।
हव्यवाहनः यवाक्षतहुतोयेते
तंडुलैश्च सुतर्पितः संपूजितव्याः
पूर्णेंदुः पयसा पायसेनच ॥
रुद्रः सभार्य्यः स्कंदश्च तथा
नंदीश्वरामुनिः गोमहिः ॥

सुरभिः पूज्या छाग वह्नि ॥
इंताशनः अश्ववह्नि वरुणा ॥
गजवह्नि विनायकः पूज्यः
साम्येश्च रेवन्ता यथा विभव ॥
विस्तरैः ततः पूज्यो निकुंभोपि
समाषैस्तिल तंडुलैः सगंधिभि
र्घृतोपेतैः कृपाराद्यैश्च भूरिभिः
ब्राह्मणान् भोजयित्वातु भोक्तव्यं
मांसवर्ज्जितं वह्नि पार्श्वे गते
नैया दृष्टा क्रीडाः स्पर्शविधाः
लिंगपुराणे आश्विने पौर्णमास्यांतु
चरेज्जागरणं निशि कौमुदी ॥
सासमाख्याता कार्य्या लोक ॥
विभूतये कौमुद्यां पूजयेल्लक्ष्मी
मिंद्रमैरावते स्थितं सुगंधि ॥
निशि सद्ब्राह्मणैर्जागरणं
चरेत् निशीथे वरदा लक्ष्मीः
कोजागर्त्तीति भाषिणी तस्मै
वित्तं प्रयच्छामि अक्षैः क्रीडां
करोतियः नारि केलैः ॥
चिपिटकैः पितृन् देवान्
समर्च्चयेत् बंधूंश्च प्रीणयेत्तेन।
स्वयंतदशनो भवेत् इति ॥
तिथ्यादितत्त्वं ॥
कोटः पुं दुर्गं गड केल्ला ॥
इति च भाषा इति कुटशब्दार्थे
मेदिनी ॥



कोटकः पुं गृहकारकः घरामि
इतिभाषा सतुकुंभकार्य्यागर्भे ॥
अट्टालिकाकारस्तोरस जातः
इतिब्रह्मवैवर्त्त पुराणे ॥
कोटरं क्ली पुं हत्तस्थितगह्वर ॥
गाछेर खोडल इति भाषा ॥
तत्पर्य्यायः निष्कुहः २ इत्यमरः
कोटरावणं क्ली सकोटरहत्त
पुष्करवनं इतिमुग्धबोधटीकायां।
दुर्गादासः ॥
कोटरी स्त्री नग्नास्त्री इत्यमरः ॥
चेडिका इत्यमरटीका ॥
कोटवी स्त्री विवस्त्रास्त्री इत्यमर
टीका दुर्गा इति धरणी ॥
कोटिः स्त्री अस्त्रादे कोणः ॥
उत्कर्षः शतलक्षसंख्या क्रोर
इति भाषा धनुरग्रे इत्यमर ॥
मेदिनीकरो एक्का पिडिंग ॥
शाक इतिभाषा इत्यमरः ॥
कोटिकः पुं इंद्रगोपनामककीटः
इतिजटाधरः ॥
कोटिजित् पुं कालिदासः इति
त्रिकांडशेषः ॥
कोटिपात्रः पुं केनिपातकः
केरोआल इति भाषा इति
इतिहेमचंद्रः ॥
कोटिरः पुं इंद्रः नकुलः ॥

शक्रगोपककीटः इतिमेदिनी
कोटिवर्षं क्ली बाणपुरं इति
शब्दरत्नावली ॥ (क
कोटिवर्षा स्त्री एक्कापिडिंगशा
इति भाषा इत्यमरः ॥
कोटिशः पुं लोष्ट भेगसाधन
मुद्गरः मइ इति ख्यात इति
केचित् इति भरतः तत्पर्य्यायः
लोष्टभेदनः २ इत्यमरः ॥
लोष्टघ्नः ३ कोटीशः ४ इति
रत्नकोषः ॥
कोटिशः स व कोटः कोटिः
इतिव्याकरणम् ॥
कोटी स्त्री खड्गादेरग्र भागः ॥
इत्यमरटीका एक्काशाकं ॥
इतिशब्दरत्नावली कोटिसंख्या
इतिलिंगादि संग्रह टीकायां ॥
भरतः ॥
कोटीरः पुं जटा इति त्रिकांड ॥
शेषः किरीटं इतिहेमचंद्रः ॥
कोटीवर्षं क्ली बाणपुरं इति
त्रिकांडशेषः ॥
कोटीवर्षा स्त्री कोटिवर्षा ॥
पिडिंगशाक इति भाषा इति
शब्दरत्नावली ॥
कोटीशः पुं कोटिशः ॥
इत्यमर टीकायां भरतः ॥

कोट्टं क्ली दुर्गं केला गड ॥
इत्यादि भाषा इतिहेमचंद्रः ॥
कोट्टः पुं दुर्गपुरं इति
लिंगादिसंग्रहे अमरः ॥
कोट्टवी स्त्री दुर्गा इति
त्रिकांडशेषः नग्नास्त्री इति
शब्दरत्नावली ॥
कोट्टवीपुरं क्ली बाणपुरं इति
शब्दरत्नावली ॥
कोट्टारः पुं नागरः कूपः ॥
पुष्करिण्याः पाटकः इतिमेदिनी
दुर्गपुरं इति लिंगादि संग्रह ॥
टीकायांभरतः ॥
कोठः पुं वक्राकारकुष्ट रोगः
तत्पर्य्यायः मंडलकं २ इत्यमरः ॥
दुश्चर्म्मी ३ त्वग्दोषः ४ चर्म्मदूषिका
इति राज निर्घंटः ॥
तस्य लक्षणं यथा असम्यग्वमनो
दीर्णपित्त श्लेष्मान्न निग्रहैः ॥
मंडलानि सकंडूनि रागवन्ति ॥
बहूनिच उत्कोठः सानुबंधश्च
कोठ इत्यभिधीयते इति
माधवकरः अन्यच्च वरटीदष्ट।
निकाशः कंडूमान्लोहितोऽस्त
कफपित्तात् क्षणिकोत् पाद ॥
विनाशः कोठ इति निगद्यते ॥
तज्ज्ञैः इति रक्षितः ॥

कोठरः पुं अंकोठ वृक्षः इति
राज निर्घंटः ॥
कोठरपुष्पी पुष्पी स्त्री वृद्धदारकः
इति राजनिर्घंटः ॥
कोणः पुं वीणादिवादने ॥
वीणादि यंत्र वाजाइवार काठी ॥
इति भाषा अस्त्रादेरग्रभागः ॥
तत्पर्य्यायः पालिः २ अश्रिः ३
कोटिः ४ इत्यमरः वाद्य ॥
प्रभेदः गृहादेरेकदेशः ॥
लगुडः इतिमेदिनी मंगलः ॥
ग्रहः इति हेमचंद्रः शनिः ॥
इतिविश्वः द्वयोर्दिशोर्मध्य ॥
भागः इति राजनिर्घंटः अस्य
विवरणं विदिक् शब्दे द्रष्टव्यं
कोणकुणः पुं उत्कुणः उकुण
इति भाषा इति हेमचंद्रः ॥
कोणिः त्रि कुणि कोया ॥
इतिभाषा इत्यमरटीका ॥
कोथः पुं नेत्ररोग भेदः ॥
कथो इति भाषा शठिते ॥
मथितेच त्रि इतिमेदिनीकर
हेमचंद्रौ ॥
कोदंडं क्ली धनुः इत्यमरः ॥
कोदंडः पुं भ्रूः जनपदः ॥
विशेषः इतिमेदिनी ॥
कोद्रवः पुं धान्यविशेषः ॥

कोदो इति भाषा तत्पर्य्यायः ॥
कोरदूषः २ इत्यमरः कुद्दवः ॥
इतितट्टीका कुद्दालः ४
मदनाग्रकः ५ अस्य गुणाः ।
मधुरत्वं तिक्तत्वं ग्राहितो ॥
पथ्यकारकत्वं कफपित्तहरत्वं
रूक्षत्वं मोहकारित्वं नूतनस्यत
गुरुत्वंच इति राजनिर्घंटः ॥
परमग्राहित्वं वातलत्वं इति ।
राजवल्लभः ॥
कोपः पुं क्रोधः इत्यमरः ॥
कोपक्रमे स्त्री ब्रह्मणःसृष्टि
इत्यमरटीकायां रायमुकुटः
कोपयुक्ते त्रि ॥
कोपनः त्रि कोपविशिष्टः इति
जटा धरः ॥
कोपनकः पुं चोरकनाम ॥
गंधद्रव्यं इतिराजनिर्घंटः ॥
कोपना स्त्री कोपवती तत्
पर्य्यायः भामिनी २ इत्यमरः
कोपलता स्त्री कर्णस्फोटालता
इतिराजनिर्घंटः ॥
कोपी त्रि क्रोधनः इत्यमरः ॥
जलपारावती पुं इति
राजनिर्घंटः ॥
कोमलं स्त्री जलं इति मेदिनी
कोमलः त्रि अकुठिनः नरम

इति भाषा तत्पर्य्यायः ॥
सुकुमारः २ मृदुलः ३ मृदुः ४
इत्यमरः पेलवः ५ इति
जटाधरः मनोज्ञः इति ॥
शब्दरत्नावली ॥
कोमलकं स्त्री मृणालं इति ।
शब्दचंद्रिका ॥
कोमला स्त्री खीरिका इति
शब्दचंद्रिका ॥
कोमसिका स्त्री जालिका फलेर
जालि इति भाषा इतिहारावली
कोयष्टिः पुं जलकुक्कुभपक्षी
इति त्रिकाण्डशेषः ॥
कोयष्टिकः पुं पक्षिभेदः ॥
कोंडापाखी इति भाषा ॥
इत्यमरः ॥
कोरकः पुं कलिका इत्यमरः
कोरकः पुं स्त्री मुकुलं ॥
कक्कोलकं मृणालं इति ॥
मेदिनी चोरनाम गंधद्रव्यं ॥
इति जटाधरः ॥
कोरंगी स्त्री सूक्ष्मेला इत्यमरः
पिप्पली इतिराजनिर्घंटः ॥
कोरदूषः पुं कोद्रवः इत्यमरः ॥
कोलं स्त्री वदरीफलं तत्पर्य्यायः
कुवलं २ फेनिलं ३ सौवीरं ४
वदरं ५ घोंटा ६ इत्यमरः ॥

वदरादि द्वये शृगालकोलौ ॥
वदरीसदृशा घोंटाशृगालकोलिः
पर्डुके वदरी सदृशाकारोहक्तः
सूक्ष्मफलो भवेत अटव्या ॥
मेवसा घोटा गोपघोंटेति ॥
चोच्यते इति सुभूतिः हस्ति
कोलिर्गोपघोंटा घोंटाच ॥
वदरीच्छदा शृगालकोलिःकर्कंधु
रितिरत्नकोषः केचित्तुकोलादि
त्रयं वदरी फले सौवीरादित्रयं
शृगाल कोला वित्याहुः स्वामी
तु कर्कंधु वदरी कोलिर्कोकुवल
फेनिलौ सौवीरं वदरं कोलं ।
मिति पठति तच्छाया स्वयो ॥
हृत्तार्थाः अन्ये फलार्थाः ॥
घोंटातेभय स्मृतितिव्याचष्टे ।
सौवीरं वदरं कोलं वदरीणां ।
फलं मत मिति कोषांतरेच ।
इतिभरतः अस्य गुणाः ॥
अम्लत्वं वायु कफनाशित्वंच ॥
पक्कस्यास्य गुणाः वायुपित्तनाशि
त्वं स्निग्धत्वं समधुरत्वं सारकत्वंच
शुष्कस्यास्य गुणाःकफवायुनाशि
त्वं पित्तविरोधित्वंच पुरातन ॥
स्यास्य गुणाः श्रमतृष्णानाशित्वं
स्निग्धत्वं लघुत्वं अस्य मज्ज ॥
गुणाःमधुरत्वं पित्तकहितस्मा

नाशित्वंच इति राजवल्लभः ॥
तोलक परिमाणं इतिवैद्यक
परिभाषा मरिचे इति
राजनिर्घंटः चव्यं इतिवैद्यके
कोलः पुं शूकरः प्लवः ॥
भेला माड इत्यादि भाषा ॥
इत्यमरः अंकपालिः शनिः
चित्रे चिता इति भाषा ॥
क्रोडं इति मेदिनी देशः ॥
विशेषः इति शब्दरत्नावली ।
अस्त्रभेदः इति धरणी वर्णः ॥
संकरजाति विशेषः सतुलेटात्
तीवर कन्यायां जातः इति
ब्रह्मवैवर्त्ते पुराणं प्रमक्रथारि
म्लेच्छजाति विशेषः सच पूर्वं
क्षत्रिय आसीत् सगर राजेनासौ
वेदयागादावनधिकारीकृतः इति
हरिवंशः ॥
कोलकं स्त्रीगंधद्रव्य विशेषः
कांकल इति भाषा मरिचे
इत्यमरः ॥
कोलकः पुं अंकोठवृक्षः इति
राजनिर्घंटः वहुवारवृक्षः इति
जटाधरः ॥
कोलकंदः पुं महाकंदविशेषः
तत्पर्य्यायः कृमिघ्नः २ पंचजलः ३
वस्त्रपंजलः ४ पुटालुः ५ सपुटः ६



पुटकंदः ७ अस्य गुणाः कटुत्वं
उष्णत्वं क्रमिदोष नाशित्वं ।
वांति विकर्द्दिप्रशमनत्वं विषदोष
निवारणत्वंच इतिराजनिर्घंटः
कोलककर्कटिका स्त्रीमधुखर्जूरिका
इति राजनिर्घंटः ॥
कोलदलं क्ली नखीनामगंधद्रव्यं
इत्यमरः ॥
कोलनासिका स्त्री वेंकिणीवृक्षः
इतिहारावली ॥
कोलपुच्छः पुं कंकपक्षी इति
हारावली ॥
कोल मूलं क्ली पिप्पलीमूलंइति
राजनिर्घंटः ॥
कोलंवकः पुं वीणायाःकायः
इत्यमरः तंत तंत्रीदंडादि ॥ (स्त्र
समुदायः शारीरं अलावूदंडककु
समुदायस्तंत्री हीन इत्यन्ये इति
भरतः ॥
कोलवल्ली स्त्री गजपिप्पली
इत्यमरः चव्यं इतिराजनिर्घंटः
कोलशिम्बी स्त्री लताविशेषः
आलकुशी इति भाषा तत् ।
पर्यायः कृतफला २ खड्गा ३
शूकरपादिका ४ काकांडोला ५
दृषिपुष्पी ६ काकांडा ७ पर्ण्यक
पादिका ८ अस्यागुणाः वायुः

नाशित्वं गुरुत्वं उष्णत्वं कफ ॥
पित्तकारित्वंच इतिराजनिर्घंटः
कोला स्त्री कोलिवृक्षः इति
शब्दरत्नावली पिप्पलीचव्यं
इतिमेदिनी ॥
कोलांचः पुं देशविशेषः ॥
इति शब्दरत्नावली तत्र पुरे
कान्यकुब्ज ॥ (यत्र
कोलाहलः पुं वहुविधहरग
ध्वनिः तत्पर्यायः कलकलः २
इत्यमरः ॥
कोलिः पुं स्त्री वृक्षविशेषः
कुलागाछ इति भाषा तत्पर्यायः
कर्कंधुः २ वदरी ३ इत्यमरः ॥
कर्कंधूः ४ वदरः ५ कोली ६
कोला ७ कुवली ८ इति
तट्टीकायां भरतः कोलः ९
इति तट्टीका सारसुंदरी ॥ (मर
कोली स्त्री कोलि वृक्षः इत्य
टीकायां भरतः ॥
कोल्या स्त्री पिप्पली इति ॥
रत्नमाला ॥
कोविदः त्रि पंडितः इत्यमरः
कोविदारः पुं रक्तकांचनवृक्षः
तत्पर्यायः चमरिकः २ कुद्दालः
३ युगपत्रकः ४ इत्यमरः ॥
कांचनारः ५ कणकारकः ६

कोनपुष्पः ७ करकः ८ कोनारः
यमलच्छदः १० अस्यगुणाः ॥
कषायत्वं संग्राहित्वं व्रण
रोपणत्वं दीपनत्वं कफवात
मूत्रकृच्छ्र नाशित्वंच इति
राजनिर्घंटः तत्पुष्पगुणाः
धारकत्वं रुचिकारित्वं रक्तपित्त
रोगेसुपथ्यत्वंच इतिराजवल्लभः
कोशः पुं अंडं इति ॥
शब्दरत्नावली कृताकृते हेम
रूप्येतत्पर्यायः हिरण्यं २
इत्यमरः कृताकृतं हेमरूप्यंच
मिलिते प्रत्येकंच कोशादि ॥
द्वयवाच्यं कृतमावर्जितं अकृत
माकरोत्थं चूर्णंघटितावटतमिति
स्वामीकृत माभरणीकृतं अकृतं
चूर्णादि रूपमाकरोत्थ मिति
केचित् कुष्यते आकृष्यते ॥
आयस्थानेभ्यः कोषः कुषग
निष्कर्षे घञ् न कोषो मूर्द्धन्यांतः
तालव्यांत इत्यन्ये इतिभरतः
कोशकारः पुं इक्षुः इति ॥
शब्दरत्नावली मूर्द्धन्यमध्योप्ययं
कोशफलं क्ली कक्कोलकं ।
इत्यमरः ॥
कोशफला स्त्री महाकोशातकी
त्रपुषी इति राजनिर्घंटः ॥

कोशलः पुं स्त्री अयोध्यानगरी
इति शब्दमाला उणादिकोषश्च
मूर्द्धन्यमध्योप्ययं ॥
कोशलात्मजा स्त्री कौशल्या ।
सातुश्रीराममाता दशरथराज
पत्नीच इतिशब्दरत्नावली
कोशलिकं क्ली उत्कोचः ॥
घुष इतिभाषा इतिहेमचंद्रः
मूर्द्धन्यमध्योप्ययं ॥
कोशांगं क्ली इत्कटः इति
हारावली मूर्द्धन्यमध्योप्ययं
कोशातकः पुं कचः इति
विश्वमेदिन्यौ ॥
कोशातकी स्त्री पटोली घोषकः
इतिमेदिनी फलशाकविशेषः
झिंगाइति भाषा तत्पर्यायः ४
कृतछिद्रा २ जालिनी ३ कृतवेधना
क्ष्वेडा ५ सुतिक्ता ६ घंटाली ७
मृदंगफलिनी ८ कर्कशछदा ९
अस्यागुणाः शिशिरत्वं कटुत्वं
कषायत्वं पित्तवातकफनाशित्वं
मलाध्मान विशोधनत्वंच इति
राजनिर्घंटः मूर्द्धन्यमध्योप्ययं
कोशातकी न पुं वाणिज्यं ॥
वणिक् वाडवाग्निः इतिविश्वः
कोशाम्रः पुं फलवृक्षविशेषः
कोशाम इतिभाषा तत्पर्यायः



कृमिहन्ता: २ सुकेशकः ३ इति
भावप्रकाशः चनस्कंधः ४ वनाम्ले
जंतुपादपः ६ रक्ताम्रः ७ कोषाम्रः
लाक्षावृक्षः ९ सुरक्तकः १० अस्य
गुणाः कुष्ठशोथास्रपित्तव्रण
कफापहत्वं तत्फल गुणाः।
ग्राहित्वं वातघ्नत्वं अम्लत्वं [illegible]
उष्णत्वं गुरुत्वं पित्तदत्वंच ॥
भावप्रकाशः कफार्त्तिप्रदत्वं
विदाहित्वं विशोफकारित्वंच
पक्कस्य तस्य गुणाः मधुरत्वं।
अम्लत्वंच यद्वादिशुक्लस्यतस्य
गुणाः दीपनत्वं रुचि पुष्टि वल
कारित्वंच तत्तैलस्य गुणाः।
सारकत्वं कृमिकुष्ठव्रणापहत्वं
अम्लमधुरत्वं पथ्यत्वं ॥
रोचनत्वं पाचनत्वंच इति ॥
राजनिर्घंटः ॥
कोषिलास्त्री मूद्गपर्णी इति
राजनिर्घंटः ॥
कोषी स्त्री उपानत् जुता ॥
मोजा इतिच भाषातत्पर्य्यायः
पत्रेश्री २ पाद्दविरजाः ३ पादरथी
इतिहारावली मुंगा ॥
धान्यादिरसुंया इतिभाषा इति
हेमचंद्रः ॥
कोषः पुं क्ली कुद्मलःकुंडि

इतिभाषा खड्गपिधाने खाप ॥
इतिभाषा अर्थसमूहः ॥
दिव्ये अंडे कृताकृते ॥
हेमरूप्ये इत्यमरः अस्य ॥
विवरणं तालव्यांते द्रष्टव्यं
पात्रे जातीकोषः जायफल
इति भाषा शद्वादिसंग्रहः ॥
इतिमेदिनी भांडागारे ॥
वषकः योनिः शिम्वा इति
हेमचंद्रः पनसादिफलस्यांतः
इतिधरणी शद्वांतरसंयोगे
गोलकवाचकः यथाह्यत्रकोषः
नेत्रकोष इत्यादि इत्यमर ॥
टीकायांस्वामी ॥
कोषकः पुं अंडे अंडकोषः ॥
इतिशद्वरत्नावली ॥
कोषकारः पुं इक्षुः इति ॥
शद्वरत्नावली इक्षुविशेषः
कुषारि इतिभाषा अस्यगुणाः
गुरुत्वं शीतत्वं रक्तपित्त ॥
क्षयापहत्वंच इतिराजवल्लभः
कीटविशेषः गुटिपोका इति
भाषातत्पर्यायः तेत्रकीटः २
इतिजटाधरः अभिधानकर्त्ताव
तालव्यमध्योप्ययं ॥
कोषचंचुः पुं सारसपक्षी
इतिशद्वमाला ॥

कोषफलं क्ली कक्कोलंतद्धकर्पूर
तुल्यगंधद्रव्य विशेषः इत्यमरः
टीकायांरमानाथः सारसुंदरीच।
कोषफलः पुं घोषकलता इति
जटाधरः ॥
कोषफला स्त्री पीतघोषा इति
रत्नमालातालव्यमध्या पीयं
कोषला स्त्री अयोध्या इति
शद्वरत्नावली ॥
कोषवृद्धिः स्त्री कुरंडः इति
शद्वरत्नावली ॥
कोषशायिका स्त्री छुरिका इति
जटाधरः ॥
कोषातकः पुं कोषः इति ॥
जटाधरः ॥
कोषातकी स्त्री घोषालता ॥
अस्याफल गुणाः कफार्शो
नाशित्वं पक्कफलगुणः आमाश
शुद्धिकारित्वं इतिराजवल्लभः
ज्योत्स्निका झिंगा इति भाषा
ज्योत्स्नावती रात्रिः इत्यमर ॥
भरतो तालव्यमध्या पीयं ॥
कोषाम्रं क्ली फलविशेषः।
केतडा इतिभाषा अस्यगुणाः।
कफवायु नाशित्वं अग्निदीपनत्वं
मलवद्धता कारित्वंच इति
राजवल्लभः तालमध्यमपीदं

कोषी स्त्री पादुका इति ॥
शद्वरत्नावली मुंगाशपेरमुंया
इति भाषा इति तालव्यांते ॥
हेम चंद्रः ॥
कोषी पुं आम्रवृक्षः इति ॥
शद्वमाला ॥
कोष्टः पुं कुसूलः गृहमध्ये।
कुक्षिमध्ये आत्मीये त्रि इति
मेदिनी स्थानान्यामाग्निपक्कानां
मूत्रस्यरुधिरस्यच हृदंडुकःफुप्फुसश्च
कोष्ट इत्यभिधीयते इति ॥
वैद्यके ॥
कोष्णं क्ली ईषदुष्णं ४ तत्पर्य्यायः
कवोष्णं २ मंदोष्णं ३ कदुष्णं ४ ॥
तद्वति त्रि इत्यमरः ॥
कोहलः पुं मद्यभेदः इति
हेमचंद्रः वाद्यभेदः नाट्य ॥
शास्त्र प्रवक्ता इति मेदिनी ॥
कौकृत्यं क्ली अनुतापः अयुक्त
करणं इति मेदिनी ॥
कौकुटिकः पुं दांभिकः अहं
रितेक्षणः कीटादिवध भीत्या
संयत वक्तः पाद निक्षेप देशा
दर्शीभिक्षुः इत्यमर भरतो
अदूरदर्शनशीलः इति सार ॥
सुंदरी ॥
कौकुटिकंदलः पुं सर्पविशेषः



वोडासाय इति भाषा तत्
पर्य्यायः भोडपुष्पः २ इति
त्रिकाण्डशेषः ॥
कौंकः पुं देशविशेषः कोकण
इतिख्यातः इतिशब्दरत्नावली
कौंकिणः पुं कौंकणदेशः ॥
इतिशब्दरत्नावली ॥
कौंचः पुं क्रौंचपर्वतः इति
त्रिकाण्डशेषः ॥
कौंजायनः पुं कुंजस्य पुमपत्यं
इतिव्याकरणं ॥
कौंजायनी स्त्री ब्राह्मणी इति
जटाधरः कुंजस्यापत्यं इति
मुग्धबोधं ॥
कौंजायन्यः पुं कुंजस्य पुमपत्यां
इति मुग्धबोधं ॥
कौटः पुं कुटजवृक्षः इति
भावप्रकाशः ॥
कौटकिकः त्रि मांसिकः मांस
विक्री इतिशब्दरत्ना वली।
कौटजः पुं कुटजवृक्षः इत्यमर
टीकायांराय मुकुटः ॥
कौतक्षः पुं स्वकर्मजीवी स्वगृह
स्थितोऽनधीनस्तक्षा स्वाधीनकुतः
इतिभाषा इत्यमरः ॥
कौटल्यः पुं वात्स्यायन मुनिः
इति हेमचंद्रः ॥

कौटसाक्षी[न्] पुं मिथ्यासाक्षी
इतिमिताक्षरा ॥
कौटिकः त्रि मांसविक्रेता ॥
कषाई इति भाषा तत्पर्य्यायः
वैतंसिकः २ मांसिकः ३
इत्यमरः ॥
कौटिलिकः पुं लौहकारः
व्याधः इति केचित् ॥ (इति
कौटिल्यं क्ली चाणक्यमूलकं
राजनिर्घंटः कुटिलता यथा
कौटिल्यं कचनिचयेकरचरणाधर
तलेषुरागस्ते काठिन्यं कुच।
युगले तरलत्वं नयनयोर्वसति
इतिकाव्यप्रकाशः ॥
कौटुंबिकः पुं कुटुंबी कुटुंब
विशिष्टः कुटुम्बाऽस्यास्तीत्यर्थे
ठिक प्रत्ययः ॥
कौडविकं त्रि कुडवपरिमित
वीज वपनयोग्य क्षेत्रे इत्यमर
टीकायांरायमुकुटः ॥
कौणपः पुं राक्षसः इत्यमरः
कौणपदंतः पुं भीष्मः इति।
त्रिकाण्डशेषः ॥
कौंडिन्यः पुं कुंडिन मुनिपुत्रः
तत्पर्य्यायः विष्णुगुप्तः २ इति
त्रिकाण्डशेषः ॥
कौतुकं क्ली कुतूहले इत्यमरः

अभिलाषः उत्सवः नर्म्म ॥
हर्षः परंपरायातमंगले ॥
विवाहसूत्रे गीतादि भोगः ॥
इतिमेदिनी गातादि ॥
भोगकालः इति हेमचंद्रः।
कौतूहलं क्ली कुतूहलं अपूर्व
वस्तु दिदृक्षायतिशयः इत्यमरः
कौदालीकः पुं वर्णसंकरजाति
विशेषः सतुरजकात्तीवराज्जा
तः इतिब्रह्मवैवर्त्त पुराणं।
कौद्रविकं क्ली सौवर्च्चललव
णं इतिराजनिर्घंटः ॥
कौद्रवीणं त्रि कोद्रवधान्योद्भव
योग्यक्षेत्रे कोदो खेत ॥
इति भाषा इत्यमरः ॥
कौंतिकः पुं प्रासिकः प्रासास्त्र
धारी योद्धा इत्यमरः ॥
कौंती स्त्री रेणुकानामगंधद्रव्यं
इत्यमरः ॥
कौंतेयः पुं कुंतीपुत्रः सतु ॥
युधिष्ठिरादिः इतिमहाभारते
अर्जुनवृक्षः इतिराजनिर्घंटः
कौपं क्ली कूपोदकं अस्यगुणाः
यथा कौपं पयो यदिस्वादु
त्रिदोषघ्नं हिमं लघु तत्क्षारं
कफवातघ्नं दीपनं पित्तकृत्परं
इति भावप्रकाशः ॥

कौपीनं क्ली चीरं इतिमेदिनी
तन्तुमेखला बद्ध परिधेय यत्र
खंड कपिनी इति भाषा तत्
पर्य्यायः कक्षा २ कक्षाटिका ३
कक्ष्या ४ यटी ५ इतित्रिकाण्डशेषः
अकार्यं गुह्यदेशः इत्यमरः
पापे इति पाणिनिः ॥
कौपोदकी स्त्री कौमोदकी ॥
इतिभरतो द्विरूपकोषश्च ॥
कौमारः क्ली कुमारावस्था सातु
जन्मावधि पंचमवर्षपर्य्यंता इति
स्मृतिः तंत्रमते षोडश वर्ष ॥
पर्य्यंता तद्वति पुं स्त्री इति ॥
शब्द माला ॥
कौमारी स्त्री मातृकाविशेषः
सातुकार्त्तिकेय शक्तिः इति
शब्दमाला यथाकौमारी शक्ति
हस्ता च मयूरवर वाहना योद्धु
मभ्याययौ क्रुद्धे रक्तबीजं ॥
महा सुरं इति मार्कंडेयपुराणे।
देवीमाहात्म्ये बाह्लीकेदः ॥
इतिराजनिर्घंटः
कौमुदः पुं कार्त्तिकमासः इति
त्रिकाण्डशेषः ॥
कौमुदिका स्त्री उपासखी विशेषः
इतिशब्दमाला ॥
कौमुदी स्त्री ज्योत्स्ना इत्यमरः ॥

उत्सवः इति धरणी ॥
कार्त्तिकोत्सवः सतु कार्त्तिकी। पूर्णिमायांकर्त्तव्यः इति
त्रिकांडशेषः आश्विनीपूर्णिमा इति शब्दरत्नावली ॥
पूर्णिमाकौमदःकार्त्तिकस्यैव मिति स्मृतिः ॥
कौमुदीचारः पुं स्त्री कोजागर पूर्णिमा इति त्रिकांडशेषः ॥
कौमुदीपतिः पुं चंद्रः इति हेमचंद्रः ॥
कौमुदी हस्तः दीपहस्तः ॥ दीपगाछा पिलसुज इत्यादि। भाषा इति हारावली ॥
कौमोदकी स्त्री विष्णु गदा ॥ इत्यमरः ॥
कौमोदी स्त्री विष्णुगदा इति। शब्दरत्नावली ॥
कौरवः पुं स्त्री कुरुराजसंततिः इति महा भारते ॥
कौरव्यः पुं कौरवः इति महाभारते ॥
कौर्प्यः पुं वृश्चिकराशिः इति दीपिका ॥
कौलः त्रि सत्कुलोद्भवः ॥ तत्पर्य्यायः आत्विकः २ इति। त्रिकांडशेषः दिव्यवीर पशु। भावत्रयांतर्गत दिव्यभावरतः सत्र ब्रह्मज्ञानी तद्यथा दिव्य भावरतःकौलःसर्वत्रसमदर्शनः इतिकुलार्णव तंत्रपशोर्वक्त्रा त्वक्रमंत्रः पशुरेव नैसंशयः वीराल्लभ्य मनुवीरःकौलाद्ब्रह्म विद्भवेत इतिमहानीलतंत्रे
कौलकेयः त्रि सत्कुलोद्भवः असती पुत्रे पुं इति ॥ शब्दरत्नावली ॥
कौलटिनेयः पुं स्त्री सतीया भिक्षार्थं कुलानि गृहाणि अटति नतुजारार्थं सापि कुलटातत पुत्रः तत्पर्य्यायःकौलटेयः २ इत्यमरः कौलटेरः ३ इति ॥ तट्टीकासारसुंदरी ॥
कौलटेयः पुं स्त्री कौलटिनेयः असती सुतः इत्यमरः ॥
कौलटेरः पुं स्त्री असतीसुतः इत्यमरः कौलटिनेयः इति सार सुंदरी ॥
कौलत्थीनं त्रि कुलत्थकलायो (द्भव क्षेत्रे इत्यमरटीकायां भरतः।
कौलवः पुं ववाद्येकादशांतर्गत तृतीयकरणं तत्रजातस्यफलं। यथा वाग्मी विनीतो निरतो॥ स्वतंत्रः प्रागल्भ्ययुक्तो मनुजो

महौजाः समन्ततः स्यादिहुधो कृतश्रमेन कौलवाख्ये करणे प्रसूतो इति कोष्ठाप्रदीपः ॥
कौलिकः पुं तंत्रवायः इति शब्दमालायांषंडः इतित्रिकांड शेषः कुलपरंपरायाते त्रि।
कौलीनं क्ली गुह्यं जन्य कुकर्म कुलीनत्व पश्वहि पक्षिणांयुद्धे इतिमेदिनी ॥
कौलेयकः इति विश्वः लोकवादः इत्यमरः ॥
कौलीरा स्त्री कर्कटशृंगी इति राजनिर्घंटः ॥
कौलेयः त्रि कुलीनः इति भरतोद्विरूपकोषश्च ॥
कौलेयकः पुं कुक्कुरः इत्यमरः कुलीने त्रि इतिमेदिनी ॥
कौल्माषीनं त्रि कुल्माषधान्यो द्भव क्षेत्रे इत्यमरटीकायां ॥ रायमुकुटः ॥
कौल्यः त्रि कुलीनः इतिभरतो द्विरूपकोषश्च ॥
कौवलं क्ली कुवलं कोलिफलं इति भरतो द्विरूपकोषश्च ॥
कौवेरं क्ली कुष्टकुडइतिभाषा इति शब्दरत्नावली कुवर। संबंधीयनि तत्कार्य्यौचत्रि यथा कौवेरं मघयास्यैच वक्त्रांते वरुणस्यच इतिदेवीमाहात्म्ये
कौवीरी स्त्री उत्तरादिक् यथा दिग्विभागेतु कौवेरी दिक्शिवा प्रीति दायिनी इति तिथ्यादि तत्वेकुवेर शक्तिश्च ॥ (इति
कौशं क्ली कान्य कुब्जदेशः हेमचंद्रः ॥
कौशलं क्ली कुशलता यथा कचातिकर्कशः कचातिललितः शुचिः एकत्र कोशव्यात्यातु स्तावहो कौशलेकरः इति ॥ अमरुशतकटीका
कौशलिका स्त्री प्राभृतकेनजर इति भाषा इतिहारावली ॥
कौशली स्त्री कुशलप्रश्नःप्राभृते इति त्रिकांडशेषः ॥
कौशलेयः पुं श्रीरामः इति शब्दरत्नावली ॥
कौशल्या स्त्री श्रीराममाता ॥ साचकोशल राजकन्यादशरथ पत्नीच इति शब्दरत्नावली कुशलत्वे क्ली ॥
कौशल्यानंदनः पुं श्रीरामः इति शब्दरत्नावली ॥
कौशल्यापतिः पुं श्रीरामः इ (ति त्रिकांडशेषः ॥



कौशांबी स्त्री देशविशेषः । तत्पर्य्यायः वत्सपत्तनं २ । इतिहेमचंद्रः ॥
कौशिकः पुं इंद्रः गुग्गुलुः उलूकः व्यालग्राही इत्यमरः नकुलः कोषज्ञः विश्वामित्र ॥ मुनिः इतिमेदिनी कोषकारः । इतिशब्दरत्नावली शृंगाररसः इति त्रिकांडशेषः मज्जा इति हेमचंद्रः अश्वकर्णवृक्षः इति राजनिर्घंटः ॥
कौशिकप्रियः पुं श्रीरामः इति शब्दरत्नावली ॥
कौशिकफलः पुं नारिकेलवृक्षः इतिशब्दरत्नावली ॥ न
कौशिका स्त्री चषकं पानभाजं इतिहेम चंद्रः ॥
कौशिकात्मजः पुं अर्जुनः इति शब्दमाला ॥
कौशिकायुधं क्ली इंद्रधनुः इति शब्दरत्नावली ॥
कौशिकारातिः पुं काकः इति राजनिर्घंटः ॥
कौशिकारिः पुं काकः इति राजनिर्घंटः ॥
कौशिकी स्त्री चंडिका नदी । विशेषः इति मेदिनी ॥
कौशिकोज्ञः पुं अश्मोटवृक्षः इतिराजनिर्घंटः ॥
कौशीतकी स्त्री अगस्त्यपत्नी इति त्रिकांडशेषः ॥ त्रि
कौशेयं त्रि कृमिकोशोत्थवस्त्रादि इत्यमरः मृदुत्वमर्थश्च ॥
कौषिकः पुं कौशिकः इति मेदिनी ॥
कौषिकी स्त्री कौशिकी इति मेदिनी ॥ त्रि
कौषेयं त्रि कृमिकोषोत्थवस्त्रं रेशमीकापड इतिभाषा ॥ इत्यमरटीकायां भरतः ॥
कौसीद्यं क्ली आलस्यं तंद्रा इतिहेमचंद्रः कुसीदस्य ॥ भावश्च ॥
कौसुमं क्ली कुसुमांजनं ॥ इतिराजनिर्घंटः ॥
कौसुंभः पुं अरण्यकुसुंभः इति राजनिर्घंटः कुसुंभपुष्परागयुक्ते त्रि इत्यमरटीकायां ॥ रायमुकुटः ॥
कौसृतिकः त्रिमायाकारः ॥ इति जटाधरः ॥ स्व
कौस्तुभः पुं स्वनामख्यातो विष्णु वक्षःस्थो मणिः इत्यमरः ॥
कौस्तुभ महातेजाः कोटिसूर्य

समप्रभः इंदं किमुत वक्षके ॥ प्रदीप्यादीप्ति मानिति इति भागवतामृते मुद्रा विशेषः ॥ यथा अन्नामांगुष्ठ संलग्ना ॥ दक्षिणस्य कनिष्ठिकां कनिष्ठया तया बद्धा तर्जन्या दक्षया तथा वामानामां च बध्नीयात् दक्षिणे गुष्ठ मूलके अंगुष्ठ मध्यमे भूयः संयोज्य सरलाः परः ॥ चतस्रोप्यग्रसंलग्ना मुद्राकौस्तुभ संज्ञिका इतितंत्र सारः ॥
कौस्तुभवक्षाः पुं विष्णुः इति हारावली ॥
कौक्षेयकः पुं खड्गः इत्यमरः ॥
क्रथ किमवधे इतिकविकल्पद्रुमः
क्रस उ म य कौटिल्ये भासने इतिकविकल्प द्रुमः ॥
क्रस उ कि भासे दीप्तौ इति कविकल्प द्रुमः ॥
क्रूय ई उ दुर्गंधे आर्द्रत्वे । प्राहे इति कविकल्प द्रुमः
क्मर कौटिल्ये इति । कविकल्पद्रुमः ॥
क्रकचः पुं क्ली करपत्रं करात इति भाषा इत्यमरः ग्रंथिल ॥ वृक्षः इति मेदिनी ॥
क्रकचच्छदः पुं केतकीवृक्षः इतित्रिकांडशेषः ॥
क्रकचपत्रः पुं शाकवृक्षः इति राजनिर्घंटः ॥
क्रकचपात् पुं कृकलासः इति त्रिकांडशेषः ॥
क्रकचपादः पुं कृकलासः हारावली ॥
क्रकचपृष्ठी स्त्री कवयीमत्स्यः इति शब्दरत्नावली ॥
क्रकचा स्त्री केतकी इतिरत्नमाला
क्रकणः पुं पक्षिविशेषः कयार इतिभाषा इत्यमरः ॥
क्रकरः पुं करीरवृक्षः उहकदार इति भाषा क्रकणपक्षी कयार इति करकरा इतिच भाषा इत्यमरः अस्य मांसस्य गुणाः लघुत्वं रुच्यत्वं । इति ॥ राजनिर्घंटः दीनः क्रकचः इतिमेदिनी ॥
क्रतुः पुं यज्ञः इत्यमरः ॥ सप्तर्ष्यन्तर्गतमुनिविशेषः इति मेदिनी सतु ब्रह्मणः करात् जातः अस्य भार्य्या कर्द्दम मुनिकन्या क्रिया पुत्राः षष्टिसहस्रवालिखिल्याख्यांगुष्ठमात्रा ऋषयः इति श्रीभागवते विश्वदेव दशांकांतर्गत विश्वदेव विशेषः इति



जठाधरः ॥
क्रतुद्रुक् असुरः इति ॥
जटाधरः अस्यरूपान्तराणि।
क्रतुद्रुह क्रतुद्रुह् क्रतुद्रुड् ॥
क्रतुद्विट् पुं असुरः इति।
त्रिकाण्डशेषः ॥

क्रतुध्वंसी पुं शिवः इत्यमरः।
क्रतुपशुः पुं अश्वः इति।
हारावली ॥
क्रतुपुरुषः पुं विष्णुः इति।
त्रिकाण्डशेषः ॥
क्रतुभुक् पुं देवता इत्यमरः ॥
क्रतुराजः पुं राजसूययज्ञः ॥
इति शब्दरत्नावली ॥
क्रतूत्तमः पुं राजसूययज्ञः इति
त्रिकाण्डशेषः ॥
क्रथ म वधे इतिकविकल्पद्रुमः
क्रथक प्रतिहर्षे पुनःपुनर्हृष्टी
करणे इतिकविकल्प द्रुमः ॥
क्रथकिम वधे इतिकविकल्पद्रुमः
क्रथकि वधे इतिकविकल्पद्रुमः
क्रथनं क्ली मारणे इत्यमरः ॥
क्रथनकं क्ली सितागुरु इति
शब्दचन्द्रिका ॥
क्रद इ रोदने आह्वाने ॥
वैक्लव्ये इति कविकल्पद्रुमः।

क्रद ष म ङ वैक्लव्ये इति ॥
कविकल्प द्रुमः ॥
क्रंदक शब्दसातत्ये निरंतर ॥
शब्दक्रियायां इतिकविकल्पद्रुमः
क्रंदनं क्ली शोकादिनासुयतने
क्रांदन इति भाषा तत्पर्य्यायः।
क्रंदितं २ रुदितं ३ क्रुष्टं ४
रोदनं ५ इति शब्दरत्नावली ॥
योधसरावः आह्वाने इत्यमरः
क्रंदनः पुं विडालः इति
शब्दमाला ॥
क्रंदितं क्ली रोदनं इत्यमरः।
आह्वाने इति मेदिनी ॥ वली
योधवित् करणे इतिशब्दरत्ना
क्रप ष म ङ कृपायां इति
कविकल्पद्रुमः ॥
क्रम उ गतौ इतिकविकल्पद्रुमः
क्रमय गतौ इतिकविकल्पद्रुमः
क्रमः पुं वैदिक विधाने तत्
पर्य्यायः कल्पः १ विधिः २ इत्यमरः
अनुक्रमः शक्तिः आक्रमणं।
इतिमेदिनी चरणः इति ॥
हेमचंद्रः ॥
क्रमकः पुं क्रमं वेत्त्यधीते वा
क्रमज्ञः इति मुग्धबोधं ॥
क्रमणः पुं चरणः इति ॥
हेमचंद्रः ॥

क्रमपूरकः पुं वकवृक्षः इति
राजनिर्घण्टः ॥
क्रमशः अ क्रमेणक्रमेणक्रमे
क्रमे इति भाषा यथा भवति
विस्ततमः क्रमशो जनः इति
प्राचीनाः ॥
क्रमागतं त्रि क्रमायातं पितृ
पितामहादिक्रमेणप्राप्तंयथा
अस्वतंत्राः स्त्रियः सर्वाः पुत्रदास
परिग्रहाः अस्वतंत्रस्तत्रगृहीयत्र
तस्यात् क्रमागतं इति
व्यवहारतत्त्वे नारदः ॥
क्रमायातः त्रि क्रमागतः इति
मिताक्षरा ॥
क्रमिः पुं कृमिः इति
भारतो द्विरूप कोषश्च ॥
क्रमिकंटकं क्ली विडंगः वि
डंगं उडुम्बरः इतिमेदिनी ॥
क्रमिघ्नं क्ली विडंगं इति
रत्नमाला ॥
क्रमिजं क्ली अगुरु इत्यमरः
क्रमिजा स्त्री लाक्षा इति।
रत्नमाला ॥
क्रमिशत्रुः पुं विडंगः इति
रत्नमाला ॥
क्रमुः पुं गुवाकः। इति ॥
भरतोद्विरूपकोषश्च ॥

क्रमुकः पुं पट्टिकालोध्रः ॥
गुवाकवृक्षः ब्रह्मदारुवृक्षः
इत्यमरः भद्रमुस्तके ॥
कर्पासिकाफलं इतिमेदिनी
क्रमुकफलं क्ली गुवाकं इति
राजनिर्घण्टः अस्य गुणपर्य्यायौ
गुवाकशब्दे द्रष्टव्यौ ॥
क्रमुकी स्त्री गुवाकः इति
शब्दरत्नावली ॥ षः
क्रमेलः पुं उष्ट्रः इत्युणादिको
क्रमेलकः पुं उष्ट्रः इत्यमरः
क्रमोद्वेगः पुं वृषः इति
भूरिप्रयोगः ॥
क्रयः पुं मूल्येन द्रव्यग्रहणं
केना इति भाषा यथा ॥
प्रकाशं वा क्रयं कुर्य्यात् मूल्येवापि
समर्पयेत् इति प्रायश्चित्ततत्त्वे
बृहस्पतिः ॥ पिः
क्रयलेख्यं क्ली भूम्यादिक्रयलि
कवाला इति पारस्य भाषा ॥
यथा गृहं क्षेत्रादिकं क्रीत्वा
तुल्य मूल्याक्षरान्वितं पत्रं
कारयेत यत्तु क्रयलेख्यंतदुच्यते
इति प्रायश्चित्त तत्त्वेबृहस्पतिः
क्रयविक्रयः पुं वाणिज्यंकेना
वेचा इति भाषा यथा ऋणदाने
तथादाने वस्तूनां क्रयविक्रये



नकुर्य्यात् गुरुणा सार्द्धं शिष्यो
भूत्वा कदाचन इति तन्त्रसारः ॥
क्रयविक्रयानुशयः पुं अष्टादश
विवादान्तर्गत विवादविशेषः यथा
वेतनस्यैव चादानं संविदश्च ॥
व्यतिक्रमः क्रयविक्रयानुशयो
विवादः स्वामिपालयोः अस्य
विवरणं क्रीत्वा विक्रीय वा
किञ्चित् यस्येहानुशयो भवेत्
सोन्तर्दशाहात् तद्द्रव्यं ॥
दद्याच्चैवाददीत वा इति मनुः ।
क्रयविक्रयिकः पुं वणिक् इत्यमरः ।
क्रयशीर्षं क्ली कपिशीर्षं इति
त्रिकाण्डशेषः ॥
क्रयारोहः पुं हट्टः इति
त्रिकाण्डशेषः ॥
क्रयिकः पुं क्रेता तत्पर्य्यायः
क्रायकः २ इत्यमरः क्रयी ३
इति हेमचन्द्रः क्रयजीवी वणिक्
इत्यमरटीकायां भरतः ॥ [illegible]
क्रयीत त्रि क्रयकर्त्ता इति हेमच
क्रय्य त्रि क्रये प्रसारितं क्रय
निमित्तं हट्टादौ न्यस्तं यत् द्रव्यं
इत्यमरः ॥
क्रव्य क्ली मांसं इत्यमरः ॥
क्रव्यघातनः पुं मृगः इति
शब्दचन्द्रिका ॥

क्रव्यात् पुं राक्षसः इत्यमरः ॥
मांसाशिनि त्रि इति मेदिनी ॥
क्रव्यादः पुं राक्षसः इत्यमरः
सिंहः श्येनः इति राजनिर्घण्टः
शवभक्षकाग्निः यथा क्रव्यादो
मृतभक्षणे इति निष्पादितत्व
मांसाशिनि त्रि इति धरणी ॥
क्रान्तः पुं घोटकः इति
त्रिकाण्डशेषः आक्रान्ते त्रि
क्रान्ता स्त्री वृहती इति राजनिर्घण्टः
क्रान्तिः स्त्री खगोलमध्यवर्त्तिसूर्य्य
गमनार्थ तिर्य्यग्गोलरेखा यथा
अयनादयनं यावत् कक्षातिर्य्यक्
तथापरा क्रान्तिसंज्ञा तया सूर्य्यः
सदा पर्य्येति भासयन् इति
सूर्य्यसिद्धान्ते गोलाध्यायः नाडी
मण्डलात् दक्षिणोत्तरं क्रान्ति
मण्डलावधि यदन्तरं तत् इति
तट्टीकायां नृसिंहविद्वावः
तत्पर्य्यायः अपमण्डलं २
अपवृत्तं ३ अपक्रमः ४ अपक्रान्तिः
५ इति सूर्य्यसिद्धान्तः अपमः ६
इति सिद्धान्तशिरोमणिः इष्ट
क्रान्त्यानयनक्रमो यथा परमाप
क्रमज्या च सप्तरन्ध्रगुणेन्दवः
तद्गुणाज्या त्रिजीवाप्ता तच्चापं क्रान्ति
रुच्यते इति सूर्य्यसिद्धान्तः ॥

आक्रमः इति हेमचन्द्रः गतिः
गत्यर्थात् क्रम धातो भावे ।
क्विप्रत्ययः ॥
क्रान्तिवलयः पुं क्रान्तिमण्डलं
विषुवद्वृत्तात् चतुर्विंशतिभागे
दक्षिणोत्तरे यद्वृत्तं तत् इति
सिद्धान्तशिरोमणिः ॥
क्रान्तुः पुं पक्षी इत्युणादिकोषः
क्रायकः पुं क्रेता इत्यमरः ॥
क्रयजीवी इत्यमरटीकायां ॥
भरतः ॥
क्रिमिः पुं कीटः कुमामयः ॥
इत्यमरटीकायां भरतः रोग
विशेषः तस्य प्रकारो यथा ।
क्रिमयस्तु द्विधा प्रोक्ता बाह्याभ्य
न्तरभेदतः बहिर्मलकफासृग्विड्
जन्मभेदाच्चतुर्विधाः नामतो
विंशतिविधा बाह्यास्तत्र ।
मलोद्भवाः तिलप्रमाणसंस्थान
वर्णाः केशाम्बराश्रयाः बहुपादाश्च
सूक्ष्माश्च यूकालिक्षाश्च नामतः
द्विधा ते कोठपिडकाकण्डूगण्डान्
प्रकुर्वते निदाने यथा ॥
अजीर्णभोजी मधुराम्ल नित्यो
द्रवप्रियः पिष्टगुडोपभोक्ता ॥
व्यायाम वर्जी च दिवाशयानो ।
विरुद्धभुक् संलभते क्रिमींश्च ।

पुरीषज निदाने यथा ॥
माषपिष्टान्न लवण गुडशाकैः
पुरीषजाः कफज निदाने यथा
मांसमाष गुडक्षीर दधि शुक्तैः
कफोद्भवाः रक्तज निदाने
यथा विरुद्धाजीर्ण शाकाद्यैः
शोणितोत्था भवन्ति हि ॥
अभ्यन्तर क्रिमि लक्षणं यथा
ज्वरो विवर्णता शूलं हृद्रोग
श्छर्दनं भ्रमः भक्तद्वेषोति ।
सारश्च संजात क्रिमि लक्षणं
कफज रूपं यथा ॥
कफादामाशये जाता वृद्धाः सर्पन्ति
सर्वतः पृथु ब्रध्ननिभाः केचित्
केचित् गण्डूपदोपमाः रूढधान्यां
कुराकाराः तनुदीर्घाः तथाणवः
श्वेतास्ताम्रावभासाश्च नामतः
सप्तधा तु ते अन्त्रादा उदरावेष्टा
हृदयादा महा गुदाः चुरवो दर्भ
कुसुमाः सुगन्धास्ते च कुर्वते हृल्लास
मास्यस्रवणं अविपाकमरोचकं
मूर्च्छाच्छर्दि ज्वरानाह कार्श्य ।
क्षवथु पीनसान् रक्तजरूपं ।
यथा रक्तवाहि शिरा स्थाना ।
रक्तजा जन्तवोऽणवः अपादा वृत्त
ताम्राश्च सौक्ष्म्यात् केचिददर्शनाः
केशादा रोमविध्वंसा रोमद्वीपा



उडुंवराः षट् ते कुष्ठैक कर्म्माणः
सहसौरस मातरः विड्ज।
रूपे यथायकाशये पुरीषोत्था
जायन्तेऽधोविसर्पिणः वृद्धास्ते
स्युर्भवेयुश्च तेयदामाशयोन्मुखाः
तदास्योद्गार निश्वास विड्॥
गंधानुविधायिनः पृथुवृत्ततनु
स्थूलाश्यावपीतसितासिताः
तेपंच नाम्ना क्रिमयः ककेरुक
मकेरुकाः सौसुरादाः सशूलाख्या
लेलिहा जनयंति हि॥
विमार्गग क्रिमिलक्षण यथा
विभेद शूलविष्टंभकार्श्यपारुष्य
पांडुताः रोमहर्षाग्नि सदन गुद
कंडुर्विमार्गगाः इति माधवकरः
क्रिमिकंटकं क्ली क्रमिकंटकं
इति मेदिनी॥
क्रमिघ्नः पुं क्रमिघ्नः विडंगः।
इत्यमरटीकायां रमानाथः॥
क्रिमिघ्नी स्त्री सोमराजी इति
शब्दचंद्रिका॥
क्रिमिजं अगुरु इत्यमरः॥
क्रिमिजा स्त्री लाक्षा इति॥
रत्नमाला॥
क्रिमिशत्रु पुं रक्तपुष्पकः
पालितामादार इति भाषा॥
इति शब्दचंद्रिका॥

क्रिमिशात्रवः पुं विट्खदिरः
इति शब्दचंद्रिका॥
क्रिमिशैलः पुं वल्मीकः इति
त्रिकांडशेषः॥
क्रियः पुं मेषराशिः इति।
दीपिका॥
क्रिया स्त्री आरंभः निष्कृतिः
शिक्षा पूजनं संप्रधारणं॥
उपायः कर्म्म चेष्टा
चिकित्सा इत्यमरः कारणं
इति हेमचंद्रः श्राद्धं॥
इत्यमरटीकायां स्वामी शौचं
इति शब्दरत्नावली॥ धात्वर्थः
करोत्यर्थो वा इतिवैयाकरणाः
क्रियाः साध्यरूपाः वस्तुधर्म्माः
पाकादयः एषुहि अपिअयणायव
अयणतादिः पूर्वापरीभूतो॥
व्यापार कलापः पाकादिशब्द
वाच्यः इति साहित्यदर्पणं॥
चतुः प्रकार व्यवहारपादांतर्गत
व्यवहारपादविशेषः साद्विधा
मानुषी दैविकी च तद्यथा॥
साक्ष्यलेख्यानुमानभेदेन त्रिधा
द्वितीयाधटाग्न्युदक विषकोष
तंडुल तप्तमाषक फालधर्मज
भेदेन नवधा दिव्यानि॥
द्विप्रकारा क्रिया प्रोक्ता मानुषी

दैविकी तथा साक्ष्य लेख्यानु।
मानेच मानुषी त्रिविधा स्मृता।
घटाद्या धर्मजांताश्च दैविकी
नवधा स्मृता इतिव्यवहारतत्त्वे
बृहस्पतिः॥
क्रियाकारः पुं नवकारः नूतन
पडुया इति भाषा इति
त्रिकांडशेषः कर्मकर्त्तरि त्रि।
क्रियाद्वेषी पुं साक्ष्य लिखित
भुक्तिमुक्ति शपथद्वेष्टा सच
व्यवहारविषये पंचधाहीनोतत्र
त हीनविशेषः यथा अन्यवादी
क्रियाद्वेषी नोपस्थायी निरुत्तरः
आहूत प्रपलायी च हीनः पंच
विधः स्मृतः इति व्यवहारतत्त्वे
नारदः कर्मद्वेष्टरि त्रि॥
क्रियापादः पुं चतुष्पादव्यव
हारेण गतस्तृतीयपादः यथापू
र्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः
स्मृतः क्रियापादस्तथा चान्यश्चतु
निर्णयः स्मृतः इति बृहस्पतिः इति मिताक्षरा॥
सच साक्ष्य लिखित भुक्तिमुक्ति क्रियेद्विये स्त्री कर्म्मद्विये इति
शपथरूपः इति व्यवहारतत्त्वे हेमचंद्रः॥
क्रियाभ्युपगमः पुं परंपर॥ क्री डुञ ग द्रव्यपर्य्यये द्रव्या॥
क्रियास्वीकारः द्वयोः पुरुषयोः परीवर्त्ते इतिकविकल्पद्रुमः
कस्मिंश्चि द्विषये परस्परांगीकारेण क्रीड ञ खेले इतिकविकल्पद्रुमः

अनुमतिः यथा क्रियाभ्युपगमात्
क्षेत्रे बीजार्थं यत्प्रदीयते॥
तस्येह भागिनौ दृष्टौ बीजी।
क्षेत्रिक एव वा इति मनुः अस्यार्थः
यदत्रापत्यं भविष्यति तदावयो
रुभयोरेवेति नियम्य तत्॥
क्षेत्रस्वामिना बीजवपनार्थं
यद्बीजिनो दीयते तस्यापत्यस्य
लोके बीजिक्षेत्रिणौ द्वावपि
भागिनौ दृष्टौ इति कुल्लूक
भट्टः उपलक्षणमेतत्॥ (म
क्रियावसन्नः त्रि साक्ष्यादिनाप्र
पराजयः यथा स्वयमभ्युपपन्नो हि
स्ववर्ण्यावसितोपि सन् क्रियावसन्नो
वादेतु परं सभ्यावधारणे॥
इति व्यवहारतत्त्वे॥
क्रियावान् त्रि कर्म्मसूद्यतः॥
क्रियासु निपुणः इत्यमरः॥
क्रियावादी पुं प्रमाणवादी॥
कार्य्यवादी फरियादी इति भाषा

क्रीडः पुं परीहासः इति।
शब्दरत्नावली॥
क्रीडनं क्ली खेला यथा बाल
क्रीडन मिन्दुशेखर धनुर्भंगावधि
शङ्कृता नतिकानन सेवनावधि
कृपा सखी सख्यावधि इति।
महानाटके॥
क्रीडा स्त्री परीहासः खेला।
इत्यमरः अवज्ञाने इति
मेदिनी॥
क्रीडारत्नं क्ली रतिः इति
त्रिकाण्डशेषः॥
क्रीडारथः पुं क्रीडार्थरथः इति
हलायुधः॥
क्रीतः पुं क्रीतकपुत्रः सतु
द्वादश विध पुत्रान्तर्गतपुत्रभेद
इति जटाधरः कृतक्रये त्रि
केना इति भाषा यथादीयमाने
न गृह्णाति क्रीतं पण्यं तु यः क्रयी
स एवास्य भवेद्दोषो विक्रेतुर्यो
ऽप्रयच्छतः इति प्रायश्चित्ततत्त्वे
नारदः क्रीतकः पुं क्रीतपुत्रः
यथा क्रीणीयाद्यस्त्वपत्यार्थं मातापि
त्रोर्यमन्तिकात् स क्रीतकः
सुतस्तस्य सदृशोऽपिवा इति
मनुः॥

क्रीतानुशयः पुं द्रव्यं क्रीत्वा।
पश्चादनुतापः यथा क्रीत्वा मू
ल्येन यः पण्यं क्रेता न बहु मन्यते
क्रीतानुशय इत्येतत् विवाद
पदमुच्यते इति याज्ञवल्क्यः॥
क्रुङ् पुं स्त्री क्रौंचः कोंचवक
इति भाषा इत्यमरः॥
क्रुंचः पुं क्रौंचपर्वतः इति
हेमचंद्रः॥
क्रुंचा स्त्री वीणाभेदः इति
शब्दरत्नावली॥
य
क्रुत् स्त्री क्रोधः इत्यमरो हेमचं (द्रौ
अस्या रूपाणि गीतानि क्रुध् क्रुत्
क्रुद् इति संक्षिप्तसारव्याकरणे
क्रुद्धः त्रि क्रोधयुक्तः यथा
योद्धुमभ्याययौ क्रुद्धो रक्तबीजो
महासुरः इति देवीमाहात्म्ये
क्रोधे क्ली॥
क्रुध ऐ य औ कोपे इति॥
कविकल्पद्रुमः॥
क्रुधा स्त्री क्रोधः इत्यमरटीका
यां भरतः क्रुंच गत्यां
वक्रणे नोक्ष्ये॥
इति कविकल्पद्रुमः क्रुंच
गस्त्रिषि क्लिषा इति कविकल्प (द्रुमः

क्रुशज औ रोदने आह्वाने॥
इति कविकल्पद्रुमः॥ (न
क्रुष्टा पुं स्त्री शृगालः इति सिद्धा
कौमुद्या मुणादि वृत्तिः॥
क्रुष्टं क्ली रोदने इत्यमरः॥
रावः इति मेदिनी॥
क्रूरः त्रि परद्रोहकारी निर्दयः
तत्पर्यायः नृशंसः घातुकः २
पापः ३ कठिनः इत्यमरः।
घोरः इति मेदिनी उष्णः।
इति हेमचंद्रः प्रथम तृतीय
पंचम सप्तम नवमैकादशराशयः
यथा तेजोऽथ युग्मे विषमः
स च मश्च क्रूरोऽथ सौम्यः पुरुषो
ऽङ्गना च चरस्थिर द्व्यात्मकता
मयेयामेषादयोऽमी क्रमशः
प्रदिष्टाः इति दीपिका॥
क्रूरः पुं भूताङ्कुश वृक्षः॥
रक्तकरवीरवृक्षः श्येनपक्षी।
कंकपक्षी इति राजनिर्घण्टः।
क्रूरकर्म्मा पुं कटुतुम्बिनीवृक्षः
इति राजनिर्घण्टः भयानक।
कर्म्म कर्त्तरि त्रि॥
क्रूरगंधः पुं गंधकः इति
राजनिर्घण्टः॥
क्रूरगंधा स्त्री कंथारीवृक्षः इति

राजनिर्घण्टः॥
क्रूरदृक् त्रि पिशुनः शनैश्चरे
पुं॥ इति मेदिनी॥
क्रूरधूर्त्तः पुं कृष्णधत्तूरकः इति
राजनिर्घण्टः॥
क्रूररावी पुं द्रोणकाकः इति
राजनिर्घण्टः॥
क्रूरलोचनः पुं शनिः इति
हारावली॥
क्रूरा स्त्री रक्तपुनर्णवा इति
राजनिर्घण्टः॥
क्रूराकृतिः पुं रावणः इति
शब्दमाला॥
क्रैणः पुं क्रयणे इत्युणादि
कोषः॥
क्रेतव्यं त्रि क्रेयवस्तु यथा।
क्रेये क्रेतव्य मात्रके इत्यमरः।
क्रेता त्रि क्रयकर्त्ता यथा विक्रेतु
र्दर्शनात् क्रुद्धिः स्वामी द्रव्य नृपोदमे
क्रेता मूल्यमवाप्नोति तस्माद्यस्तस्य
विक्रयी इति प्रायश्चित्त तत्त्वे
याज्ञवल्क्यः॥
क्रेयं त्रि क्रेतव्यमात्रके॥
किनिवार उपयुक्त द्रव्य इति भाषा
इत्यमरः॥
क्रौंचदारणः पुं कार्त्तिकेयः।

इत्यमरटीकायां रायमुकुटः। इतिभाषा इतिराजनिर्घंटः ॥
क्रोडे ङ्की स्त्री वाह्लोमध्ये कोल
इति भाषा तत्पर्य्यायः ॥
भुजांतरं २ उरः ३ वत्सं ४ वक्षः
५ इत्यमरः उत्संगः ६ भोगः ७
वपुषः प्रोकं ८ इतिनिर्घंटः ॥
क्रोडः पुं स्रूकरः इत्यमरः ॥
शनिः इति मेदिनीवाराहीकंदः
इति राजनिर्घंटः ॥
क्रोडकन्या स्त्री वाराहीकंदः ॥
इतिराजनिर्घंटः ॥ हत्तः
क्रोडचूडा स्त्री महाश्रावणिका
वडपुल कुडि इति भाषा इति
राजनिर्घंटः ॥ इति
क्रोडपर्णी स्त्री कंटकारिका
शाह्चंद्रिका ॥
क्रोडपादः पुं कच्छपः इति
हेमचंद्रः ॥
क्रोडाङ्घ्रिः पुं कच्छपः इति
त्रिकांडशेषः क्रोडी स्त्री वाराही
कंदः इति राजनिर्घंटः ॥
क्रोडीकरणं क्ली आलिंगने
इति हलायुध ॥
क्रोडीकृतिः स्त्री आलिंगने
इतिहेमचंद्रः ॥
क्रोडीमुख पुं गंडकः गंडार।

क्रोडेष्टा स्त्री मुस्ता इति ॥
राजनिर्घंटः ॥
क्रोथः पुं हनने इतिहेमचंद्रः
क्रोधः पुं प्रतिकूले सतितेक्ष्णस्य
प्रबोधः तत्पर्य्यायः कोपः २
अमर्षः ३ रोषः ४ प्रतिघः ५ रुट् ६
क्रुत् ७ क्रुद् ८ इत्यमरः। आमर्षः
९ इति तट्टीका सार सुंदरी ॥
भीमः १० कुधा ११ रुषा १२ इति
शाह्लार्णवः सत्व ब्रह्मणो क्रोधो
जातः शरीरस्य षड्रिपोरंतर्गतस्य
इति पुराणं ॥
क्रोधजः पुं मोहः यथा ॥
संगात संजायते कामः कामात्
क्रोधोऽभिजायते क्रोधात्
भवति संमोहः संमोहात स्मृति
विभ्रमः इति भगवद्गीता द्विधा
व्यसन गणांतर्गत व्यसनगणः
यथा पैशुन्यं साहसं द्रोह ईर्ष्या
क्रोधजोऽपि गणो ऽष्टकः ॥
इति मनुः ॥
क्रोधनः त्रि क्रोधविशिष्टः
तत्पर्य्यायः अमर्षणः २ कोपी ३
इत्यमरः क्रोधी ४ रोषणः ५
इति हेमचंद्रः ॥

[illegible]

क्रोधना स्त्री कोपवती ॥
तत्पर्य्यायः भामिनी २ चंडी ३
इति त्रिकांडशेषः ॥
क्रोधः पुं चारनामगंधद्रव्ये ॥
इति शाह्लरत्नावली ॥
त्रि ॥
क्रोधी त्रि क्रोधयुक्तः इति
हेमचंद्रः महिषः इति
राजनिर्घंटः ॥ (स्त्र
क्रोशः पुं सहस्रधनुःचतुःसह
हस्तपरिमाणं कोश इतिभाषा
तत्पर्य्यायः गव्यूते २ इति।
हेमचंद्रः द्विसहस्रदंडः अष्ट।
सहस्रहस्त परिमाणे इति।
लीलावती ॥
क्रोशतालः पुं टक्का इति ॥
हारावली ॥
क्रोशध्वनिः पुं टक्का इति
हारावली ॥
क्रोशयुगं क्ली क्रोशद्वये तत्
पर्य्यायः गव्यूतिः २ इत्यमरः।
गोरुतं ३ गव्या ४ गव्यूते ५ ॥
इति हेमचंद्रः ॥
क्रोष्टा पुं स्त्री सृगालः इत्यमरः
क्रोष्टुकपुच्छिका स्त्री पृश्निपर्णी
चाकुलिया इति भाषा रामवास
इति ख्याता इति केचित् ॥

इत्यमर टीकायां स्वामी ॥
गोलोमिका इति राजनिर्घंटः
क्रोष्टकमेखला स्त्री पृश्निपर्णी
इति रत्न माला ॥
क्रोष्ट पुच्छिका स्त्री पृश्निपर्णी
इति रत्नमाला ॥
क्रोष्ट पुच्छी स्त्री पृश्निपर्णीइति
शाह्लरत्नावली ॥
क्रोष्टुफलः पुं इंगुदीवृक्षः
इति राजनिर्घंटः ॥
क्रोष्टुविन्न स्त्री पृश्निपर्णी इत्यमरः
विगलक्का जि इतिख्याता इति
केचित् इति भरतः ॥
क्रोष्टृत्तः पुं श्वेतवृत्तः इति
राजनिर्घंटः ॥
क्रोष्ट्री स्त्री स्वल्पभूमिकुष्मांडः
इत्यमरः सृगालिका कृष्ण
विदारी लांगुली इति मेदिनी
क्रौंचः पुं पक्षि भेदः कोंचवक
इति भाषा तत्पर्य्यायः कुङ् २
कुंचः त्रि कुंचा ४ क्रौंचा ५ इत्यमर
भरतो पर्वत विशेषः इति
मेदिनी कुररपत्नी इति ॥
राजनिर्घंटः द्वीपभेदः सच
दधिमंडोद समुद्रेणावृतःषोडश
लक्ष योजन परिमितः ॥
तस्याधिपतिः प्रियव्रत राजपुत्रे



हृतहृष्टः इति श्रीभागवतं
ग्रहृतोऽध्वजः राक्षसविशेषः
इति हेम चंद्रः ॥
क्रौंचदारणः पुं कार्त्तिकेयः
इत्यमरः ॥ (बकी
क्रौंचा स्त्री क्रौंचभार्य्या क्रौंच
इति भाषा इति जटाधरः ॥
क्रौंचादनं क्ली मृणालेचेंवुली
वेंचु इति भाषा चिंचोटकः
वैंचको इति भाषा इति मेदिनी
शेषस्य गुणाः गुरुत्वं अजीर्ण
कारित्वं शीतत्वंच इति
राजवल्लभः पिप्पली इति
शब्दरत्नावली ॥
क्रौंचादनी स्त्री पद्मवीजे इति
राजनिर्घंटः ॥
क्रौंचारातिः पुं कार्त्तिकेयः
इति हलायुधः ॥
क्रौंचारिः पुं कार्त्तिकेयः इति
हेमचंद्रः ॥ परशुरामः इति
शब्दमाला ॥
क्रौंचप्रपाति पुं शतक्रोशे ॥
गमनकर्त्ता इति व्याकरणं ॥
क्लप्य किम वधो इतिकविकल्प
द्रुमः ६ क्लद रोदने अह्वाने ॥
वै क्लव्ये । इतिकविकल्पद्रुमः
क्लद ष च म ङ वैक्लव्ये विकलते

इति कविकल्प द्रुमः
क्रद इ न उ रोदने इति
कविकल्प द्रुमः ॥
क्लम उ य इर ग्लानौ इति
कविकल्प द्रुमः ॥ (ल्पद्रुमः
क्लम ञि य ग्लानौ इति कविक
क्लमः पुं आयासः इत्यमरः ॥
क्लमथः पुं आयासः इत्यमरः (मः
क्लव ष म ङ भये इति कविकल्पद्रु
क्लांतः त्रि क्लाम्यति स्म क्तः श्रांतः यथा
मदन कदन क्लांतः कांते प्रिय
स्मरवर्त्तते इति जयदेवः ॥ (द्रुमः
क्लिद इ न उ हृदि इति कविकल्प
क्लिद र इ य ऊ क्लेदे आर्द्रीभावे
इति कविकल्पद्रुमः ॥
क्लिन्नं त्रि आर्द्रं भिजा इति भाषा
इत्यमरः ॥ (त्रवत्मः
क्लिन्नाक्षः त्रि श्लेष्मादिना क्लि
कफादि जनित क्लेदयुक्तवर्त्मा
सः तत्पर्य्यायः चुल्लः २ चिल्लः
३ पिल्लः ४ क्लिन्नवत्तषिल्की
इत्यमरः ॥
क्लिश उ ङ य उपतापे इति
कविकल्पद्रुमः ॥
क्लिश ऊ ग विहतौ इति ॥
कविकल्पद्रुमः ॥
क्लिशितः त्रि क्लिष्टः इत्यमरः

क्लिष्टः त्रि क्लेशयुक्तः तत्पर्य्यायः
क्लिशितः २ पूर्वापरविरुद्धः ।
वाक्ये क्ली तत्पर्य्यायः संकुलं २
परस्परपराहतं ३ इत्यमरः ॥
क्लिष्टिः स्त्री क्लेशः सेवा
इति धरणी ॥ (मरः
क्लीतकं क्ली यष्टिमधुका इत्य
क्लीतकिका स्त्री नीलीवृक्षः
इत्यमरः ॥ (भावे
क्लीव क ङ अधार्ष्ट्ये अप्रगल्भे
इतिकविकल्पद्रुमः अयं ॥
वर्गपांत्यस्थाभय वकारवान्
क्लीवः पुं क्ली स्त्रीपुरुषभिन्नः
तत्पर्य्यायः षंडः २ नपुंसकं ३
तृतीयाप्रकृतिः ४ शंढः ५
इत्यमरः तृतीयप्रकृतिः ६ पंडः
७ संडः ८ शंठः ९ इति तट्टीका
पुरुषत्वहीनः तस्य लक्षणं यथा
फेनिलं यस्य विष्ठा वा प्लुतिमज्जति
मेढ्रं चोन्माद शुक्राभ्यां हीनः
क्लीवः स उच्यते इत्युद्वाहतत्त्वे
क्लीवः त्रि विक्रमहीनः इत्यमरः
क्लेदः पुं आर्द्रं यदार्द्रस्थितस्य
पद्मस्य वेथु व करणभाक्करोपर
शुतस्य तस्यैव क्लेद क्लेशः ।
करावुभौ इत्युज्झटः ॥
क्लेदनः पुं कफः । इति

शब्दचंद्रिका पंच प्रकार
श्लेष्मांतर्गत श्लेष्मविशेषः इति
सुखबोधः ॥
क्लेदा पुं चंद्रः इत्युणादिकोषः
क्लेदुः पुं चंद्रः इति ॥
त्रिकांडशेषः सन्निपातः इति
संक्षिप्तसारे उणादि वृत्तिः
क्लेश ङ वधे उपतापे इति
कविकल्पद्रुमः ॥
क्लेशः पुं ङः खं तत्पर्य्यायः
आदीनवः २ आस्रवः ३ इत्यमरः
स तु पंचविधः अविद्या १ विद्या
विरोधिनी अस्मिता २ अहमस्मीत्य
हंकारः रागः ३ इच्छाविशेषः
द्वेषः वैरता अभिनिवेशः ५
मरणभयं इति कुसुमांजलिः
कोपः व्यवसायः इति मेदिनी
क्लेशितः त्रि क्लेशयुक्तः यथा
निद्रां चैतो ममयति स क्लेशितः
कर्मंडुः स्त्री इति शृंगारतिलके
क्लैतकिके क्ली मद्ये इति
शब्दचंद्रिका ॥ (इति
क्लोम क्ली फुप्फुसं फोफडा
फुकसा इतिच ख्यातं इति ।
भरतः तत्पर्य्यायः तिलकं २
इत्यमरः क्लोमं ३ कोमं ४ ।
इति तट्टीका वाह्योहिंसोमध्ये



वत्तः तन्मध्ये सदयं तत्पाक्ष्ये
क्षोम पिपासा स्थाने इति
वैद्यके ॥
क्वथ कुत्रकोथ इतिभाषा इति
व्याकरणे अत्यंताक्षिभावनायां
पंडितैः क्वद्वयं प्रयुज्यते यथा
क्वसूर्य्य प्रभवो वंशः क्व चाल्प
विषयामतिः इति रघुः ॥
क्वंगुः पुं कंगुः इतिहेमचंद्रः
क्वचन अ क्वचित् इति व्याकरणे
क्वचित् अ कस्मिंश्चित् कुत्रचित्
कोनस्थाने इत्यादिभाषा इति
व्याकरणे ॥ (द्रुमः ।
क्वण० शब्दे इतिकविकल्प
क्वणः पुं क्वणकणितिशब्दविशेषः
इत्यमरः टीकायांसारसुंदरी ।
वीणायाः शब्दः अन्यस्यच शब्दः
इतिभरतः तत्पर्य्यायः ॥
निक्वाणः २ निक्वणः ३ क्वाणः ४
क्वणनं ५ इत्यमरः ॥
क्वणने स्त्री क्वणः इत्यमरः ।
क्वणनः पुं हुडिकास्तनः क्षोदहाओ
इति भाषा इतित्रिकांडशेषः ॥
क्वथ पच निष्पचने इति ।
कविकल्पद्रुमः ॥
क्वथितः त्रि अतिपक्वव्यंजनं
मूलादिः तत्पर्य्यायः निष्पक्वः

इत्यमरः कषायः ३ निर्यूहः ४
क्वाथः ५ मृतः इतिवैद्यक ।
परिभाषा ॥
क्वाणः पुं क्वणः इत्यमरः ॥
क्वाथः पुं दुःखे व्यसने ॥
द्रव्यनिष्पाकः इतिहेमचंद्रः
क्वाथ्यमाने तोये त्रिविधे ॥
पादावशेषे १ अर्द्धावशेषे २
त्रिपादावशेषे ३ अस्यनाम ।
पारिभाषिकोष्णोदकं तत्र
त्रिपादावशेषे वातनाशके
अर्द्धावशेषं पित्तनाशकं ॥
पादावशेषं कफनाशकं लघु
अग्निवर्द्धकं च तेषां मध्ये ॥
त्रिपादवशेषं जलं हेमंते ॥
शिशिरेच प्रशस्तं वसंते ॥
पादावशेषं जलं प्रशस्तं ॥
शरदि ग्रीष्मे च अर्द्धावशेषजले
प्रशस्तं वर्षायां अष्टभागावशेष
जलं प्रशस्तं तत्कालेवह्नि ॥
दोषत्वात् दिनपक्वजलं रात्रौ
गुरु रात्रिपक्वजलं दिवागुरु
इति राजवल्लभः ॥
क्वाथोद्भवे स्त्री तुत्थांजने ॥
(दशा इत्यमरः ॥
केल ऋ चाले गतौ इति ॥
कविकल्प द्रुमः ॥

ख खकारः सत्वव्यंजनद्वितीयवर्णः
अस्योच्चारणस्थानं कंठः इति
व्याकरणे खकारं परमाश्चर्य्यं
शंखकुंदसमप्रभं कोणत्रययुते
मूर्त्यविंदुत्रयसमन्वितं गुणत्रय
युतं देवि गंच देवमयं सदा ॥
त्रिशक्तिसंयुतं वर्णं खकारं ॥
प्रणमाम्यहं इतिकामधेनुतंत्रे
तस्योत्पत्तिर्यथा स सर्गः
स्वेषितः कंठेवायुना कादि
मीरयेत् वर्गस्पर्शेन मात्रेण
कं स्वर स्पर्शनात्तु ख इति
प्रपंचसारः तस्यलिखनं ।
क्रमः शिवरूपा वामरेखा वह्नि
रूपाच सा स्मृता अधोरेखा
विष्णुरूपा दक्षरेखा प्रजापतिः
मात्रा कुंडलिनी साक्षात् खकारः
पंचदशदेवतः इतिवर्णोद्धारतंत्रे
खं क्ली इंद्रियं पुरं क्षेत्रं
शून्य विंदुः आकाशे ॥
संवेदने देवलोकः कर्म्म ॥
इतिमेदिनी लग्नात् दशमराशिः
इतिदीपिका सुखे इतिहेमचंद्रः
अभ्रके इति राजनिर्घंटः ॥
खः पुं सूर्य्यः इतिहेमचंद्रः
खकुंतलः पुं शिवः इति
त्रिकांडशेषः ॥

खक्ख हसे इति कविकल्पद्रुमः
खक्खटः पुं कक्खटः कठिनः
इत्यमरटीकायां रायमुकुटः ।
खगः पुं सूर्य्यः ग्रहः देवः ॥
वाणः पक्षी इतिमेदिनी ॥
वायुः इतिशब्दचंद्रिका शलभः
इत्यमरटीकायां भरतः ॥
खगपतिः पुं गरुडः इति
शब्द रत्नावली ॥
खगवक्त्रः पुं लकुचवृक्षः इति
शब्दचंद्रिका ॥
खगवती स्त्री पृथ्वी इतिजटाधरः
खगशत्रुः पृश्निपर्णी चाकुलिया
इति भाषा इतिशब्दचंद्रिका।
खगस्थाने स्त्री वृक्षकोटरे इति
शब्दचंद्रिका ॥
खगांतकः पुं श्येनपक्षी इति
राजनिर्घंटः खगासनः पुं
उदयपर्वतः इति शब्दमाला
विष्णुः खगो गरुड आसने ॥
यस्येति बहुव्रीहि समासनिष्पन्नः
खगेंद्रः पुं गरुडः इति ॥
राजनिर्घंटः खगेध्वजः पुं
विष्णुः खगेंद्रो ॥ गरुडो
गरुडो ध्वजः केतुर्वाहनंवा ॥
यस्येति व्युत्पत्तिः ॥
खगेश्वरः पुं गरुडः इत्यमरः ॥



खगोलः । आकाशमंडलं तस्य विवरणं यथा एतद् ब्रह्मांडं सच्छिद्रैक
कटाहद्वयगोलाकारं संपुट तुल्यं यत्र भूर्भुवः स्वर्महर्जनः तपः सत्य
संज्ञकानि सप्त भुवनानि संति ब्रह्मांडमध्ये यः परिधिः स आकाश
कक्ष्या तन्मध्ये प्रावह उद्वह संवह सुवह परिवहाख्यानां पंचानां वायूनां
स्थानानि अधोऽधः क्रमेण संति तदुपरिस्थात् अधोधः स्थित।
पृथ्वी भि मुखशनि बृहस्पति राहुकेतु मंगल सूर्य शुक्र बुध चंद्र
स्थुकेरदक्षिणोत्तरस्थित ध्रुवाख्यताराद्वयेन बद्धं नक्षत्रचक्रं सदा
पश्चिमगतिना प्रवह वायुना भ्रमति ततः अधोऽधः क्रमेण सिद्ध
विद्याधर मेघ विद्युदादियुक्तः सदोनगति प्रवह वायुर्भ्रमति ए
एतद् ब्रह्मांडस्य मध्ये समेतात् ईश्वरस्य धारणात्मिका शक्तिविभा
गेन भूगोलः शून्ये तिष्ठति पृष्ठ अंतर्गता नागासुरसमाश्रया दि
व्यौषधि रसोपेता रम्याः पाताल रसातल महातल तलातल
सुतल वितल अतल संज्ञका ऊर्ध्वोर्ध्व क्रमेण सप्तपातालभू
मयश्च संति सुमेरु पर्वतोपरि शून्ये एका ध्रुवताराभ्रमति ए
वं वडवानलोपरि शून्ये अन्या ध्रुवतारा भ्रमति ॥

अथ कक्ष्यायोजनानि		व्यासयोजनानि	परिधियोजनानि
आकाशस्य ब्रह्मांडस्य वा			
१८७१२०८०८९४०००००००००५१५८४७९१२२७२१८६१२११५५१८७१९७			
नक्षत्रस्य	२५९८९००००	८२६९२२७३	४२७३४५२३६
शनेः	१२७६६८२५५	४०९२०२१७	१२२३१००५८
राहुकेत्वोः	८०५७२८६३२	२५६२६८२०१	१२८१८८३३
गुरोः	५१३७५७३६४	१६२४६८३४	८१७२६१७
चंद्रोच्चस्य	१६८२८४८४	११७४२८८	६३७०६१४
मंगलस्य	८२४६९०९	२५५११९८	११९५२९५
सूर्यस्य	४३३१५००	१३७८२०४	९८८३०२
शुक्रशीघ्रस्य	१९६४६३७	८४७८३९	४२३११९
बुधशीघ्रस्य	२०४३२०१	३३१९३०	१९५१९५
चंद्रस्य	३२४···	१०३०९२	९८५८८
आवहवायोः	५०१४	१६२४	५७४५
भूगोलस्य	४९१६७	२५८१	१२

अथ ग्रहाणां मध्यभुक्तयः।

	रवेः	चंद्रस्य	मंगलस्य
दिने कलाद्याः	५९।८।१०	७९०।३४।५२	३१।२६।२८
वर्षे राश्याद्याः	१२।०।०।०	४।१२।४६।४०।४८	६।११।१४।११।३६
युगे भगणाद्याः	४३२००००	५७७५३३३६	२२९६८३२
कल्पे भगणाद्याः	४३२०······	५७७५३३३६···	२२९६८३२···

	बुधशीघ्रस्य	बृहस्पतेः	शुक्रशीघ्रस्य।
दिने कलाद्याः	२४५।३२।१२	४।५९।९	९६।७।४३
वर्षे राश्याद्याः	१।२४।४५।२४।४८	१।०।२१।२।३६	७।१५।११।४५।१२
युगे भगणाद्याः	१७९३७०६०	३६४२२००००	७०२२३७६०००

	शनेः	राहोः	चंद्रोच्चस्य
दिने कलाद्याः	२।०।२३	३।१०।४४	६।४१।०
वर्षे कलाद्याः	०।१२।१२।२।५४	०।१९।२१।१२।३६	१।१०।४।५९।४२
युगे भगणाद्याः	१४६५६८	२३२२३८	४८८२०३
कल्पे भगणाद्याः	१४६५६८०००	२३२२३८···	४८८२०३···

अथ राशिषु नक्षत्राणां स्थितिः

अश्विनी	भरणी	कृत्तिका	रोहिणी	मृगशिरा	आर्द्रा	पुनर्वसुः	पुष्या	आश्लेषा	
राशिः अंशाः कला	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
अपक्रम भागाः	१० उत्तरः	१२ उत्तरः	५ नरः	५ दक्षिणः	१० दक्षिणः	२ दक्षिणः	६ उत्तरः	० उत्तरः	७ दक्षिणः

	मघा	पूर्वफल्गुनी	उत्तरफल्गुनी	हस्त	चित्रा	स्वाती	विशाखा	अनुराधा	ज्येष्ठा
राशिः अंशाः कला	० २ २०	४ २२ २०	५ ५ ५०	५ १० ०	५ २४ १०	६ १६ ४	६ २६ ५०	७ २४ ०	- २९ ०
अपक्रम भागाः	३	१२ ३	१३ ३	११ द	२ द	३७ उ	१४ द	३ द	४ द

	मूला	पूर्वषाढा	उत्तरषाढ	अभिजित्	श्रवण	धनिष्ठा	शतभिषा	पूर्वभाद्रपद्	उत्तरभाद्रपद्	रेवती
राशिः अंशाः कला	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]	[illegible]
अपक्रम भागाः	५ द	५ ७०द	५ द	३० ३	३० ३	३३ ३	३० द	२४ ३	२६ ३	३

	अगस्त्यः	मृगव्याधः। कालपुरुषः	हुतभुक्	ब्रह्महृदये	सप्तर्षितारा
राशिः भागाः कला	३	२ २० ०	१ २२	१ २२	१ १
अपक्रम भागाः	६० द	६४० द	३८ द	२३० द	५ ३
	पुनर्वसौ	आर्द्रायां	रोहिण्यां	रोहिण्यां	कृत्तिकायां

अथ खगोलरचना
सर्वोर्द्धकृते काष्ठनिर्मिते भूगोले
तन्मध्यगे सुमेरौ रूमयत्रनिर्गते
दंडेव कला यष्ट्यूर्द्ध पात अध
परिमिते समविभक्तआधारकक्षा
द्वयं विषुवत्कक्ष्यैकावकाव्या ॥
अथ मेषादि राशि स्थितिः ॥
स्वाहोरात्रार्द्धकर्णैर्लवप्रमाणानु
मानेन चक्रांतिस्थानात् दक्षिणे
विभक्ते विक्षेपभागैर्निजविजाय
क्रमेण मेषादीनां राशीनां तिस्रः
कल्प्याः कुर्यात् तावत्कल्प्याः
कर्कादीनां वैपरीत्येन कुर्यात्
ताहरूप लिख तुलादीनां तथा
विपर्ययात् मकरादीनां वकुर्यात्
अहोरात्रार्द्ध कर्णान्ते यथा
स्वक्रांतेरुत्क्रमक्रमज्येहेकुर्यात्
तत्र उत्क्रमज्या हीना त्रिज्या।
इति प्रोक्तं दिनव्यासदलं स्यात्
विक्षेप ज्ञाने यथा
वेदः स्वकक्षाक्षेपात् निज पातेन
राशिचक्र कलाप्तौ तिभौमः पप्ते
दक्षिणोत्तरं विक्षिप्यते तत्र नव
भागो द्विगुणितं बृहस्पतिः मंगल
स्त्रिगुणिते अन्ये चतुर्गुणैर्विक्षिप्यते
तत्र क्रमः वेदस्य मध्यविक्षेपकला
२३० मंगलस्य ९० बुधस्य १२०

बृहस्पतः ९० शुक्रस्य १२० शनेः १२०
रविविक्षेप कला नास्ति ॥
अथ लग्नादिक कल्प्याः स्थाने
आधारकक्षाद्वयोपरिपारपाल
संस्थितानां नक्षत्रादीनां कल्प्याः
कुर्यात् सर्वांसकल्पानां मध्यस्थाने
विषुवत् कल्प्या स्थिता तदाधार
कल्प्ययो द्वैते रहे द्वे अयने
विषुवद्द्वयं च कुर्यात् विषुवत्स्थानात्
भागे सवाशर्पर्यंते स्फुटभागे
मेषादीनां द्वेत्राणि च कुर्यात्
अर्थात् मेषादि राशीन् तिर्यक्
ज्याभिः रचयेत् तथा अयनस्थानात्
अन्यायन पर्यंते तिर्यक् अपरकल्प्या
क्रांतिसंज्ञा कार्या तया कल्प्या
सूर्यः प्रकाशायनं सदाभ्रमति
वेदाया ग्रहाः अथ मंडलमाश्रित्यैः
सस पातांशैः अथ क्रमात्
विक्षेपांते पुत्र अपक्रमाणा ग्रहाः संतो
लोके दृश्यंते क्षितिजे उदयन्
राशिः लग्नं स्यात् तद्पाताग्रस्ते
गच्छेत् अस्त लग्नं स्यात् तेनकाद्ये
पश्चात् सिद्धेदृग्वतर्ष स्थाने च कुर्यात्
मध्यक्षितिजयोर्मध्ये ज्या सा सा कल्प्या
कल्प्यते विषुवत् क्षितिजयोर्गत ज्या
वरदलज्या उपरिस्वकेस्थानेषु
क्षितिज मंडले कला वलयेच्छिते।

लोकालोक वेष्टितेव कृत्वा। जलपतन योगेन पारदस्याव योगेनवाकालभ्रमणं साधयेत् इतिसूर्य्यसिद्धांतस्य न्मते।

खगंडः पुं तृणविशेषः खागड़ा इति भाषा तत्पर्य्यायः। पोटगलः २ बृहत्काशः ३ कोकेक्षुः ४ इति रत्नमाला ॥

खंकरः पुं चूर्णकुंतलः इति हेमचंद्रः ॥

खचरा भूस्तुत यज्ञो संयन्ति। प्रादुर्भावे भूस्तुत यज्ञो। यविता प्रादुर्भावे इति कविकल्पद्रुमः ॥ (मः

खचत् बंधने इतिकविकल्पद्रु

खचमसः पुं चंद्रः इति त्रिकांडशेषः ॥ (का

खचरः पुं मेघः इतिशब्दचंद्रि वायुः राक्षसः सूर्य्यः एतेषां प्रमाणं यथा खचरस्य सुतस्य सुतः खचरः खचरस्यपितानपुत्रः खचरः खचरस्य सखेन हतः खचरः खचरी परिरोदिति हा खचर इति महाभारते ॥ द्रोणपर्व आकाशगामिनि यथायवनोदिकुपति भूमि राकाशं खचरागमः इतिस्मृतिः

खचिते त्रि संयुक्ते तत्पर्य्यायः। करंबिते २ रूषिते ३ गुरुगुंठिते ४ इतित्रिकांडशेषः करंबे ५ कर्बुरे ६ मिश्रे ७ संपृक्ते ८ ॥ इति हेमचंद्रः व्याप्तः ९ इति। शब्दरत्नावली गुंठिते १० रूषिते ११ इतिजटाधरः ॥

खजं मंथे इतिकविकल्पद्रुमः खज इ पोगल्यखोटन इत्यर्थः इतिकविकल्पद्रुमः ॥

खजः पुं दर्विः हाता इति भाषा इत्यमरटीकायां भरतः

खजकः पुं मंथानदंडः इति हेमचंद्रः ॥ षः

खजपं क्ली घृते इत्युणादिको

खजलं क्ली नीहारः इति ॥ त्रिकांडशेषः आकाशवारि। यथा वर्षास्व वातिचैनैः सहेरगा विपत्तिकीट लूताश्च तद्विषजुष्ट मपेयं खजलमंभत्यो दयात्पूर्वं इति राजवल्लभः ॥ (षा

खजा स्त्री मंथः मंथयाइतिभा प्रहस्तः इतिमेदिनी दर्वी। इति हेमचंद्रः मारणं इति। शब्दरत्नावली ॥

खजाकः पुं पक्षी इत्युणादिकोषः

खजाका स्त्री पुं दर्वी। हाता।

चमस इत्यादि भाषा इत्यमरः ॥

खजित पुं बुद्धविशेषः इति हेमचंद्रः ॥

खज्योतिः पुं खद्योतः इति। राजनिर्घंटः ॥

खंजः त्रि विकलगतिः खोंड़ा। इतिभाषा तत्पर्य्यायः खोडः ॥ २ इत्यमरः खोलः ३ इति ॥ शब्दरत्नावली खोरः ४ खंजकः ५ इतिहेमचंद्रः खोटः ६ इति खोड धात्वर्थ दर्शनात्तस्य लक्षणं यथा वायुःकट्याश्रितः। सक्थ्नः कंडरामाक्षिपेद्यदा ॥ खंजस्तदा भवेज्जंतुः पंगुः सक्थ्नो द्वयो र्वधात् इतिमाधवकरः

खंजकः त्रि खंजः इतिहेमचंद्रः

खंजकारिः पुं सस्या खेसारि इति भाषा इतिराजनिर्घंटः।

खंजखेटः पुं खंजनपक्षी इति शब्दमाला ॥

खंजखेलः पुं खंजनपक्षी इति त्रिकांडशेषः ॥

खंजनं क्ली गमने इतिमेदिनी

खंजनः पुं स्वनामख्यातपक्षी तत्पर्य्यायः खंजरीटः २ इत्यमरः कनाटीनः ३ काकच्छर्दिः ४ खंजखलः ५ तातनः ६ मुनिपुत्रकः ७ भद्रनामा ८ रत्ननिधिः ९ इति त्रिकांडशेषः खंजखेटः १० गूढनीडः ११ नंडकः १२ चरः १३ इति शब्दमाला ॥

खंजनरतं क्ली यमिनां गोप्यरते यतिनां गोपनीयमैथुने इति हारावली ॥

खंजना स्त्री सर्षपी क्षुद्रखंजन जातिः इति मेदिनी ॥

खंजनाकृतिः स्त्री खंजनविशेषः इतिशब्दचंद्रिका ॥ (ति

खंजनिका स्त्री खंजनाकारप विशेषः तत्पर्य्यायः हारपुत्रिका २ तुलिका ३ स्फोटिका ४ सर्षपी ५ इति त्रिकांडशेषः खंजनाकृतिः ६ इति शब्दचंद्रिका ॥

खंजरीटः पुं खंजन पक्षी इत्यमरः

खट २० कांक्षे इतिकविकल्पद्रुमः

खटः पुं अंधकूपः कफः ॥ प्रहारांतरं टंकः इति ॥ मेदिनी तृणं इति हेमचंद्रः लांगले कत्तृणे इत्यजयपालः

खटकः पुं चटकः तत्पर्य्यायः नागवीटः २ टोकरः ३ अक्षरः ४ इति त्रिकांडशेषः कुब्जितपाणिः इति शब्दमाला ॥



खटिकः पुं कुञ्जितपाणिः इति
हेमचंद्रः ॥
खटिका स्त्री लेखनद्रव्यं खडी
इति भाषा कर्णरंध्रः चीरणे ॥
इति विश्वः ॥ (टः
खटिनी स्त्री खटी इतिराजनिर्घं
खटी स्त्री लेखनद्रव्यं खडी इति
भाषा तत्पर्य्यायः खटिनी २
खटिका ३ धवलमृत्तिका ४
सितधातुः ५ पांडुमृत ६ पांडु
मृत्तिका ७ अस्या गुणाः मधुरत्वे
तिक्तत्वे शीतलत्वे पित्त दाह।
व्रणदोष कफास्त्र नेत्ररोग ॥
नाशित्वंच इति राजनिर्घंटः।
अस्याः पर्य्यायांतराणि कठिनी
शब्दद्रष्टव्यानि ॥ (मः
खट्टक हस्तौ इतिकविकल्पद्रु
खट्टनः त्रि खर्वः खाट इतिभाषा
इति हेमचंद्रः खट्टत इति
पाठोपिदृष्टः ॥
खट्टा स्त्री खद्वा इतिशब्दचंद्रिके
खट्टाशः पुं स्त्री वनजंतुविशेषः
खाटाश। इतिगंधगोकुलाइतिच
भाषातत्पर्यायः गंधोतुः २
वनवामनः ३ इतित्रिकांडशेषः
खट्टाशी ४ वनाखुः ५ इति।
शब्दरत्नावली खट्टासः ६

गंधमार्जारः ७ वनम्वाट ८ शालिः ९
इति जटाधरः पुष्पलकः १०
यथाच मणि द्वीपने हेतिदंतयो
र्हन्ति कुंजरं केशेषुच मरी हेति
सीम्नि पुष्पलको हतः इति
दुर्गादासधृतवचनं ॥
खट्टासः पुं खट्टाशः इति
जटाधरः ॥
खट्टिः पुं शवयाने तत्पर्य्यायः
अंतशय्या २ वाहटः ३ इति
त्रिकांडशेषः ॥ (मरा
खट्टिकः त्रि शाकुनिकःपाखि
इति भाषा इति शब्दमाला ॥ (यः
खट्टिका स्त्री क्षुद्रखट्वा तत्पर्य्या
निषद्या २ संदी ३ इति ॥
त्रिकांडशेषः आसंदी ४
इति जटाधरः शवयाने इति
शब्दमाला ॥ (ला
खट्टेरकः त्रि खर्वः इतिशब्दमा
खट्वा स्त्री काष्ठादिरचितशय्याधारः
खट्ट इति भाषा तत्पर्य्यायः। (कः
शयनं २ मंचः ३ पर्य्यंकः ४ पल्य
५ इत्यमरः अस्या गुणाः ॥
वातलत्वं इति राजवल्लभः ॥
शेवं इत्यमरटीका कोलशिवी
इतिराजनिर्घंटः ॥
खट्वांग क्ली शिवस्यास्त्रविशेषः

तत्पर्य्यायः सवं सनः २ इति ॥
हेमचंद्रः ॥ (शेषः
खट्वांगः पुं सूर्य्यवंशीय राजवि
शेषविश्वसह राज पुत्रः यथा।
ततोदशारथ्य स्तस्मात् पुत्र
येडिविडि स्ततः राजविश्वसहो
यस्य खट्वांगश्चक्रवर्त्यभूत् इति
श्रीभागवते ॥
खट्वांगभृत् पुं शिवः इति ॥
हेमचंद्रः ॥
खट्वांगी पुं शिवः इतिहारावली
खट्वारूढः त्रि अविनीतःप्रमाद
वान् इति त्रिकांडशेषः भूरिप्रयोगो
खट्वारूढो नरो जाल्मः इति।
कलाप व्याकरणे खट्वोपरि ॥
स्थितश्च ॥
खट्टिका स्त्री क्षुद्रखट्वा इति
जटाधरः
खड इ ड. भेदने भेजन इति ॥
यावत् इतिकविकल्पद्रुमः।
खडक भेदे इतिकविकल्पद्रुमः
खडे क्ली पुं लघुतृणे खड इति
भाषा इतिशब्द रत्नावली ॥
खडः पुं धान्यान्तरे भेदः
इतिमेदिनी खडयूषोयथा ॥
तक्रं कपित्थचांगेरीमरिचाजाजि
चित्रकैः सुपक्वं खडयूषोयमथो

कांबलिकोपरः इतिचक्र दत्तः
खडक्किका स्त्री पक्षद्वारे खड्किद्वार
इतिभाषा इतिहारावली ॥
खडतूः पुं बाहुजंघा भरणे
इति संक्षिप्तसारे उणादिवृत्तिः
खडिका स्त्री कठिनी इति
जटाधरः ॥
खडी स्त्री कठिनी स्वनामख्यात
श्वेतवर्ण मृत्तिका विशेषः इति
शब्दचंद्रिका अस्या गुणपर्य्यायो
कठिनीशब्दे खटी शब्देच द्रष्टव्यो
खडूः पुं मृतशय्या इति
संक्षिप्तसारे उणादिवृत्तिः ॥
खड्गं क्ली लोहं इति
राजनिर्घंटः ॥
खड्गः पुं गंडकः गेंडार इति
भाषा गंडकशृंगे खाग इति।
भाषा बुद्धभेदः इति मेदिनी
चोरकनाम गंधद्रव्यं इति ॥
राजनिर्घंटः अस्त्रविशेषः ॥
खांडा तरवाल इत्यादिभाषा
तत्पर्य्यायः निस्त्रिंशः २ ॥
चंद्रहासः ३ असिः ४ रिष्टिः ५
कौक्षेयकः ६ मंडलाग्रः ७
करवालः ८ कृपाणः ९ इत्यमरः
ऋष्टिः १० करपालः ११ इति
तद्धीका विषसनः १२ तीक्ष्णधारः



शकरकंद आलु इति भाषा ॥
तत्पर्य्यायः वज्रकंदः २ इति
रत्नमाला अस्यगुणाः कफ ॥
पित्तनाशित्वं कटुपाकित्वं इति
राजवल्लभः ॥
खंडकालु स्त्री आलुविशेषः इति
शब्दचंद्रिका ॥
खंडजः पुं गुडः यवासशर्करा
इतिराजनिर्घंटः ॥
खंडजोद्भवजः पुं तवराजोद्भव
खंडः इति राजनिर्घंटः ॥
खंडधारा स्त्री कर्त्तरी कांचि ॥
इति भाषा इति शब्दमाला ॥
खंडनं क्ली भंजनं भेदनं ॥
निराकरणं छेदनं यथा ॥
चटय भुजबंधनं जनय रदखंडनं
येहिपद पल्लव मुदारं इति
जयदेवः ॥
खंडपरशुः पुं शिवः इत्यमरः ॥
खंडपर्शुः पुं परशुरामः ॥
शिवः चूर्णलेपी खंडामलक ॥
भेषज्यं राहुः इतिमेदिनी ॥
भग्नदंत हस्ती इतिशब्दरत्नावली
खंडपालः पुं मोदकः मयरा ॥
इतिभाषातत्पर्य्यायः ॥
खांडिकः २ इतिहारावली ॥
खंडमोदकः पुं यवासशर्करा ॥

इतिराज निर्घंटः ॥
खंडलवणं क्ली विडलवणं इति
राजनिर्घंटः ॥
खंडशाखा स्त्री महिषवल्ली इति
राजनिर्घंटः ॥
खंडसरः पुं यवासशर्करा इति
राजनिर्घंटः ॥
खंडाभ्रं क्ली अभ्रलेशः छेंडामेघ
इति भाषा दंतक्षतविशेषः
इतिमेदिनी ॥
खंडिकः पुं कलायः कडाइ
इति भाषा इत्यमरः कक्षः ॥
बगल इति भाषा इति
हेमचंद्रः ॥
खंडितं त्रि खंडीकृतं तत्
पर्य्यायः छिन्नं २ लूनं ३ छितं ४
दितं ५ छेदितं ६ वृक्णं ७ छितं ८
इतिहेमचंद्रः ॥
खंडिता स्त्री स्त्रीयादिनायिकाया
भेदः अस्यालक्षणं अन्याय ॥
भोगचिह्नितः पतिः प्रातरागच्छति
यस्याः सा अस्याश्चेष्टा ॥ (स
अस्फुटालाप चिंतासंताप निःश्वा
तूष्णीभावाश्रुपातादयः इति
रसमंजरी ॥
खंडिनी स्त्री पृथ्वी इति ॥
शब्दरत्नावली ॥

खंडी पुं वनमुद्गः इति।
हेमचंद्रः ॥
खंडीरः पुं पीतमुद्गः इति ॥
हेमचंद्रः ॥
खतमालः पुं धूमः मेघः इति।
मेदिनी ॥
खद स्थैर्ये वधे इति
कविकल्पद्रुमः ॥
खदिका स्त्री लाजाः खइ इति
भाषा इति त्रिकांडशेषः ॥
खदिरः पुं वृक्षविशेषः खयेरगाछ
इतिभाषातत्पर्य्यायः गायत्री ॥
२ बालतनयः ३ दंतधावनः ४।
इत्यमर तिक्तसारः ५ कंटकीद्रुमः
६ इतिरत्नमाला बालपत्रः ७
खयपत्री ८ क्षितिक्षमः ९
सुशल्यः १० वक्रकंटः ११ यज्ञांगः
१२ जिह्माशल्यः १३ कंठी १४ ॥
सारद्रुमः १५ कुष्ठारिः १६ बहुसारः
१७ मेध्यः १८ अस्यगुणाः ॥
तिक्तरसत्वं शीतत्वं पित्त कफ।
कुष्ठकासारुचि शोफकंडू व्रण
नाशित्वं पाचनत्वंच इति ॥
राजनिर्घंटः विसर्प वेदना ॥
मेहमेद नाशित्वं इति ॥
राजवल्लभः इंद्रः इति ॥
त्रिकांडशेषः चंद्रः इति ॥

मेदिनी ॥
खदिरपत्रिका स्त्री अरिखदिरः
लज्जालुलता इतिराजनिर्घंटः
खदिरपत्री स्त्री लज्जालता
इतिवैद्यके ॥
खदिरा स्त्री लज्जालुलता इति
राजनिर्घंटः ॥
खदिरिका स्त्री लाजा इति ॥
राजनिर्घंटः ॥
खदिरी स्त्री खदिरीशाकेलाजा (ल
इतिख्याता इति केचित् किंतु
रभसेन वराहक्रांता लज्जालुः
समंगा जलकारिकेति खदिरे।
कायासंकोच पत्री लज्जालुरिति
लज्जालुकायां पठितं इति ॥
भरतः तत्पर्य्यायः नमस्कारी
२ गंडकाली ३ समंगा ४
इत्यमरः गंडकारी ५
इतिभरतः ॥
खदिरोपमे स्त्री कदरं कांटा
बाबल इतिभाषा इतिरत्नमाला
खद्योतवासिनी स्त्री बुद्धशक्ति
विशेषः इतित्रिकांडशेषः ॥
खद्योतः पुं सूर्य्यः इति ॥
जटाधरः कीटविशेषः जोनाक
पोका इतिभाषा तत्पर्य्यायः ॥
ज्योतिरिंगणः २ इत्यमरः ॥



खरपात्रं स्त्री लौहपात्रे इति
त्रिकाण्डशेषः ॥
खरपादाढ्यः पुं कपित्थवृक्षः
इति शब्दचन्द्रिका ॥
खरपुष्पः पुं मरुवकवृक्षः इति
रत्नमाला ॥ (स्त्री
खरपुष्पा स्त्री वर्वरा बाबइतुल
इति भाषा इत्यमरः
खरप्रियः पुं पारावतः इति
शब्दमाला ॥ (मरः
खरमञ्जरी स्त्री अपामार्गः इत्य
खररोमा न् पुं नागभेदः इति
जटाधरः ॥
खरवल्लिका स्त्री नागवला
गोरखचाउलिया इति भाषा
इति रत्नमाला ॥
खरशब्दः पुं कुररपक्षी इति
राजनिर्घण्टः ॥ (टी
खरशाकः पुं भार्गीवामणहाटी।
इतिभाषा इतिभावप्रकाशः
खरस्कन्धः पुं पियालवृक्षः इति
राजनिर्घण्टः ॥
खरस्कन्धा स्त्री खर्जूरी इति
राजनिर्घण्टः ॥
खरस्वरा स्त्री वनमल्लिका इति
रत्नमाला ॥
खरा स्त्री देवताडवृक्षः इत्यमरः

खरांशुः पुं सूर्य्यः इति
त्रिकाण्डशेषः ॥
खरागरी स्त्री देवताडवृक्षः ॥
इत्यमरटीकायां रायमुकुटः ॥
खराह्वाङ्कुरकः क्ली वैदूर्य्यमणि
इति राजनिर्घण्टः ॥ (टा
खराश्वा स्त्री मयूरशिखा हड्जन
इति ख्याता लेत्रयमानिका ॥
इति केचित् इत्यमर भरतौ ॥
खराह्वा स्त्री अजमोदा इति ॥
राजनिर्घण्टः ॥
खरिका स्त्री कस्तूरीभेदः सा तु
चूर्णाकृतिः इति राजनिर्घण्टः
खरुः पुं शिवः हयः दर्पः ॥
दन्तः इति मेदिनी कामदेवः ॥
इति सिद्धान्तकौमुद्यामुणादिवृत्तिः
शुक्लवर्णः इति हेमचन्द्रः ॥
खरुः त्रि श्वेतः इति मेदिनी।
निषिद्धैकरुचिः इति हेमचन्द्रः
निर्बोधः क्रूरः इति सिद्धान्त ॥
कौमुद्यामुणादिवृत्तिः तीक्ष्णः
इति संक्षिप्तसारे उणादिवृत्तिः।
खर्ज॰ व्यथायां अर्जि इति ॥
कविकल्पद्रुमः ॥
खर्जिका स्त्री अवदंशः इति ॥
शब्दचन्द्रिका ॥
खर्जुः पुं खर्जूरी कण्डुः ॥

कीटः इति हेमचन्द्रः ॥
खर्जूरं क्ली रौप्ये इत्यमर ॥
टीकायां रमानाथः ॥
खर्जूः स्त्री कण्डुः कीटः इत्युणादि
कोषः ॥
खर्जूघ्नः पुं वकमर्द्दः धत्तूरः।
अर्कवृक्षः इतिराजनिर्घण्टः ॥
खर्जूरं क्ली खर्जूरफले अस्य
गुणाः मधुरत्वं शीतलत्वंगुरुत्वं
तृषाभिघात दाहवात पित्त
रोगहितत्वं हृद्यत्वं शुक्र ॥
वृद्धिकारित्वञ्च इतिराजवल्लभः
रौप्ये हरिताले इति
हेमचन्द्रः खलः इतिमेदिनी ॥
खर्जूरः पुं स्त्री खर्जूरीवृक्षः
खेजुर गाछ इति भाषा अस्य
मस्तिकगुणाः स्वादुत्वं तिक्तत्वं
कषायत्वं मूत्राघातकरोगनाशित्वं
बलप्राण शुक्रवृद्धिकारित्वञ्च
इतिराजवल्लभः वृश्चिकः इति
मेदिनी ॥
खर्जूरी स्त्री वनखर्जूरः इत्यमरः
खर्जूरवृक्षः खाजुरगाछ इति
भाषा तत्पर्य्यायः खरस्कन्धा २
दुष्प्रधर्षा ३ दुरारुहा ४ निःश्रेणी ५
कषायी ६ यवनेष्टा ७ हरिप्रिया ८
अस्या गुणाः कषायत्वं पक्के

गौल्यत्वं कषायिकत्वं पित्तकोपि
नाशित्वं हृद्यत्वं कफश्रमकृद्वृद्धि
कारित्वञ्च इतिराजनिर्घण्टः ॥
खर्द्द दशने इतिकविकल्पद्रुमः
खर्परः पुं तस्करः धूर्त्तः ॥
भिक्षापात्रे कपाले इति
मेदिनीछत्रे इति त्रिकाण्ड ॥
शेषः ॥
खर्परी स्त्री क्ली कर्परीतुत्थे ॥
इत्यमरटीका ॥
खर्परीतुत्थे क्ली तुत्थविशेषः
तत्पर्य्यायः खर्परी रसके २
वत्सकं ३ अमृतोत्थ पत्रं ४ तुत्थ
५ खर्परिका ६ अस्य गुणाः ॥
कटुत्वं तिक्तत्वं चक्षुर्हितत्वं
रसायनत्वं त्वग्दोषशमनत्वं
दीपनत्वं बलपुष्टिप्रदत्वञ्च ॥
इति राजनिर्घण्टः ॥
खर्ब्ब गतौ इति कविकल्पद्रुमः
खर्ब्बं क्ली संख्याविशेषः इति
मेदिनी तत्तु दशार्ब्बुदसंख्या ॥
इतिलीलावती दशार्बुदसंख्या
१०.......... इतिस्मृतिः ॥
खर्ब्बः पुं कुबेरस्य निधिविशेषः
इतिशब्दरत्नावली दशार्बुद
संख्या इति स्मृतिः कुब्जक ॥
वृक्षः इतिराजनिर्घण्टः ॥



खर्व्वः त्रि क्षुद्रः खाटो क्काट ॥
इत्यादिभा तत्पर्य्यायः ॥
न्यक् २ नीचः ३ वामनः ४ ह्रस्वः ५
इत्यमरः निखर्व्वः ६ खहतः ७
खर्व्वशाखः ८ इति हेमचंद्रः ॥
खर्व्वशाखः त्रिवामनः खर्व्वः ।
इति हेमचंद्रः ॥
पर्मः पुं पौरुषे कोयज्ञो मुके ।
पट्टवस्त्रे इति मेदिनी ॥
खर्व्व गर्व्वे इति कविद्रुमः ॥
अन्त्यस्थ वकारांत ऽ यं ॥
खर्व्वः त्रि ह्रस्वः वर्गवकारांत ॥
खर्व्वशाहार्थ्यप्यत्र ॥
खर्व्वटः पुं क्ली वहुः शतग्राम
मध्यस्थले इति भूरिप्रयोगः ॥
पर्व्वतप्रांतग्रामः इति श्री भागवत
टीकायां श्रीधरस्वामी ॥
खर्व्वुरा स्त्री नदीहतः इति
राजनिर्घंटः
खर्व्वुंजं क्ली षड्भुजा खरखुजा
इति भाषा इति भावप्रकाशः
खल चाले स्खलन इतियावत
चये इति कविकल्पद्रुमः ॥
खलं क्ली भूः स्थानं कल्कः
इति मेदिनी ॥ (१२
खलाधाने धान्यमाड़िवारखामा
इति भाषा इति हेमचंद्रः ॥

खलः पुं सूर्य्यः भूरिप्रयोगः ॥
तमाल वृक्षः इति शब्दचंद्रिका
धत्तूरवृक्षः इति राजनिर्घंटः
खलः त्रि नीचः अधमः इति
मेदिनी क्रूरः तत्पर्य्यायः ॥
दुर्जनः २ पिशुनः ३ इत्यमरः ।
खलतिः पुं इंद्रलुप्त रोगयुक्तः
टाकपड़ामाता इति भाषा तत्
पर्य्यायः खल्वाटः २ ऐंद्रलुप्तिकः
३ शिपिविष्टः ४ वक्रश्यः ५
इति हेमचंद्रः खल्वीटः ६ ॥
इति त्रिकांडशेषः खल्लिटः ७ ॥
इति शब्दरत्नावली ॥ कय
खल पूः त्रि मार्जनकारीकाड़ु
फराश इत्यादि भाषा तत् ॥
पर्य्यायः वहुकरः २ इत्यमरः ॥
खलमूर्तिः पुं पारदः पारा ॥
इति भाषा इति शब्दचंद्रिका
खलाधारा स्त्री तैलपायिका ॥
आरसला इति भाषा इति ॥
जटाधरः ॥
खलिः पुं तैलकिट्टे इति ॥
राजनिर्घंटः ॥ (मरः
खलिनः पुं क्ली खलीनः इत्य
टीकायां रायमुकुटः ॥
खलिनी स्त्री खलसमूहः धानेर
अनेक खामार इतिभाषा

तत्पर्य्यायः खल्या २ इत्यमरः ॥
तालमूली इति रत्नमाला ॥
खलिशः पुं स्वनामख्यातमत्स्य
खलिशामाछ इति भाषा तत्
पर्य्यायः कंकशोटः २ खलेशयः
३ इति शब्दरत्नावली अस्य ।
गुणाः ग्राहित्वे कषायत्वे वात
कोपनत्वे रुक्षत्वे लघुत्वे शूल
हरत्वे किंचिद्राम विनाशित्वं च
इति राजवल्लभः खलिशोपि
पाठः ॥
खलीकारः पुं अपकारः इति
जटाधरः ॥ (लि
खलीनः पुं कविका कड़िया
इति भाषा इत्यमरः ॥
खलु व्य निषेधः वाक्यालंकारः
जिज्ञासा अनुनयः इत्यमरः ।
निश्चयइवाक्यादि पूरणे ॥
वीप्सा इति शब्दरत्नावली ।
खलुक पुं अंधकारः इति ।
त्रिकांडशेषः ॥
खलुरेषः पुं मृगभेदः इति ।
शब्दचंद्रिका ॥ (मिः
खलूरिका स्त्री शस्त्राभ्यासभू
इति हेमचंद्रः ॥
खलेधानी स्त्री मेथिः खलेपशु
वंधनदारु इति जटाधरः ॥

खलेवाली स्त्री खलेगोवंधनदा (रु
मेड़काठ इति भाषा इति ॥
हेमचंद्रः ॥
खलेशः पुं खलिशमत्स्यः
इति हारावली ॥
खलेशयः पुं खलिशमत्स्यः
इति शब्दरत्नावली ॥
खल्या स्त्री खलिनी धानमाड़ार
अनेक खामार इति भाषा
इत्यमरः ॥
खल्लः पुं वस्त्रभेदः गर्त्तः
चर्म्म चातकपक्षी इति मेदिनी
दृतिः मशक इति भाषा इति
हेमचंद्रः औषधमर्द्दनपात्रे
खल इति भाषा इति वैद्यके
खल्लिका स्त्री ऋजीषे पिष्टकादि
भर्जनपात्रे इति शब्दचंद्रिका ॥
खल्लिटः त्रि खलतिः इति
शब्दरत्नावली ॥
खल्ली स्त्री हस्तपादावमर्द्दनाख्य
रोगः इति मेदिनी तस्य ॥
लक्षणं खल्लीतु पादजंघोरुकर
मूलावमोटनी इति माधवकरः
खल्लीटः त्रि खलतिः इति
त्रिकांडशेषः ॥
खवग भूति पूत्योहत्यनौ ॥
इति कविकल्पद्रुमः ॥



संपत्तिः पूर्तिः पवित्रता तयो
रुत्पत्तिः प्रादुर्भावः ॥
खवल्ली स्त्री आकाशवल्ली इति
राजनिर्घण्टः ॥
खवारि क्ली दिव्योदके इति
राजनिर्घण्टः ॥
खवाष्पः पुं हिमे इति
हारावली ॥
खशः पुं देशविशेषः इति
त्रिकाण्डशेषः ॥
खशा स्त्री मुरानामगन्धद्रव्ये
इति शब्दचन्द्रिका ॥
खशाटः पुं खलिश मत्स्यः ॥
इति त्रिकाण्डशेषः ॥
खश्वासः पुं वायुः इति।
त्रिकाण्डशेषः ॥
खशाखे इति कविकल्पद्रुमः
खषं क्ली क्रोधः बलात्कारः
इत्युणादिकोषः ॥
खसः पुं पामा खोस इति ॥
भाषा तत्पर्य्यायः पाम २ ॥
कच्छुः ३ विचर्चिका ४ इति
हेमचन्द्रः ॥
खसकन्दः पुं स्त्री रक्तेक्षुकीहसः
इति रत्नमाला खसगन्धोपि।
क्वचित् पाठः ॥
खसतिलः पुं खसखसः इति
राजनिर्घण्टः ॥
खसमः पुं बुद्धः इति ॥
त्रिकाण्डशेषः ॥
खसंभवा स्त्री आकाशमांसी
इति राजनिर्घण्टः ॥
खसर्पणः पुं बुद्धविशेषः इति
त्रिकाण्डशेषः ॥
खसात्मजः पुं राक्षसः इति
त्रिकाण्डशेषः ॥
खसखसः पुं वृक्षविशेषः
पोस्ता इति भाषा तत्पर्य्यायः
सूक्ष्मबीजः २ सूक्ष्मतण्डुलः ३ सुबीज
४ अस्य गुणाः पाके मधुरत्वं
कान्तिवीर्य्य बलप्रदत्वञ्च इति
राजनिर्घण्टः ॥
खसखसरसः पुं अहिफेनः
आफि इति भाषा इति ॥
राजनिर्घण्टः ॥
खस्तनी स्त्री पृथ्वी इति ॥
त्रिकाण्डशेषः ॥ णिः
खस्फटिकः पुं सूर्य्यकान्तम
चन्द्रकान्तमणिः इति हेमचन्द्रः
खाजिकः पुं लाजाः खै इति
भाषा इति हारावली ॥ ह
खाटः पुं स्त्री शवरथः मरारथा
इति भाषा इति शब्दरत्नावली
खाटिः स्त्री असकृहः किणः।

शवरथः इति मेदिनी
खाटिका स्त्री खाटः शवरथः।
इति शब्दरत्नावली ॥
खाण्डिकः पुं खण्डपालः मोदकः
मयरा इति भाषा इति ॥
हारावली ॥
खातं क्ली पुष्करिणी इत्यमरः
तस्य परिमाणं यथा शतेन धनु
र्भिः पुष्करिणी त्रिभिः शतैर्दीर्घि
का चतुर्भिर्द्रोणः पञ्चभिस्तडागः
द्रोणदशगुणा वापी तिवस्तुविशा
गुलो हस्तो यत्तुल्यञ्चतरुवः
शतधन्वन्तरैश्चैव तावत्पुष्करि
णी शुभा एतत् पञ्चगुणः श्रेष्ठ
स्तडाग इति निर्णयः इति
तच्च वर्द्धमान प्रतोवशिष्टः
खातकं क्ली परिखा खानाय
गारं इत्यादि भाषा इति हेमचन्द्रः
खातकः पुं अधमर्णः धारी।
ऋणी यथा उत्तमर्णो धनस्वामी
अधमर्णस्तु खातकः इति संक्षिप्त
सारटीकायां गोयीचन्द्रः ॥
खातभूः स्त्री प्रतिकूपः परिखा
इति हारावली ॥
खात्रं क्ली खाते खनित्रे ॥
इत्युणादिकोषः दारुणे वने
सूत्रे इति संक्षिप्तसारे ॥
उणादि वृत्तिः ॥ द्रुमः
खाद कृ भक्षणे इति कविकल्प
खादकः त्रि ऋणग्रहीता खातक
इति ख्यातः इति मिताक्षरा।
भक्षकः यथा विक्रेतैर्गो विनि
मयैर्दत्वा गोमांस खादको व्रते
चान्द्रायणं कुर्य्याद्वयेसान्ताहधी
भवेत् इति प्रायश्चित्त तत्त्वे
गोभिलः ॥
खादनं क्ली भक्षणं आहारः
रदने पुं इति हेमचन्द्रः ॥
खादितं त्रि भक्षितं खान्नया।
इति भाषा इत्यमरः ॥
खादिरसारः पुं खदिरवृक्षनिर्यासः
खयेर इति भाषा तत्पर्य्यायः
खादिरः २ अङ्गतसारः ३ सत्सारः
४ रङ्गदः ५ रङ्गः ६ अस्य गुणाः
कटुत्वं तिक्तत्वं उष्णत्वं कफ
वातव्रणकण्ठामयनाशित्वं रुचि
कारित्वं दीपनत्वञ्च इति ॥
राजनिर्घण्टः खदिरसारोपि पाठः ॥
खाडकः त्रि हिंसालुकः इति
हारावली ॥
खाद्यं त्रि भक्षणीयं यथा
कस्त्वं भद्र खले श्वरोहमिह किं
घोरवने स्थीयते शार्दूलादि
भिरेव हिंस्रपशुभिः खाद्योहं



मित्याशया इत्युज्वदः ॥
खानि स्त्री खनिः इति हेमचंद्रः
खानिकं क्ली कुड्यछिद्रे देवालेर
गर्त्त इति भाषा इति त्रिकांड ॥
शेषः ॥
खानिलः त्रि भित्तिचौरः ॥
सिंदालचोर इति भाषा इति ॥
शब्दरत्नावली ॥ (ली
खानी स्त्री खनि इति शब्दरत्नाव
खानोदकः पुं नारिकेलः ॥
इति त्रिकांडशेषः ॥
खापगा स्त्री गंगा इति हेमचंद्रः
खारः पुं खारीपरिमाणे इति
हट्टचंद्रः ॥
खारिः स्त्री खारीपरिमाणे इति
भरत धृत हट्टचंद्रः ॥
खारिकं क्ली महापारेवते ॥
इति राजनिर्घंटः ॥ (दि
खारिंपचः त्रि खारिपरिमितान्न
पाककर्त्ता इति व्याकरणं ॥
खारी स्त्री परिमाणविशेषः ॥
इत्यमरः यदाहुः पलं प्रकुंचकं ।
मुष्टिः कुडव स्तच्चतुष्टयं चत्वारः
कुडवाः प्रस्थ श्चतुः प्रस्थमथाढके
अष्टाढको भवेद्द्रोणो द्विद्रोणाः
सूर्पी उच्यते सार्द्धसूर्पी भवेत् ॥
खारी हेलावी गोणपुदाहृता।

तामेव भारं जानीयात् वाहो
भारचतुष्टये इति तट्टीकायां
भरतः षोडशद्रोणपरिमाणं ॥
इत्यमरटीकायां स्वामीलीलावतीच
गोणीचतुष्टये तत्तु षणवत्यधिक
चतुः सहस्र पलानि पांचशमनगार
शेर इति भाषा इति वैद्यक ॥
परिभाषा द्रोण चतुष्टयं यथा
चतुराढको भवेद्द्रोणः खारी द्रोण
चतुष्टयं इति स्मृतिः ॥
खारीकं त्रि खारीक्षेत्रे खा
परिमितबीजवपनोपयुक्त क्षेत्रे
तत्पर्य्यायः खारीवापः २॥
इत्यमरः ॥
खारीवापः त्रि खारीकः इत्यमरः
खिखिः स्त्री किखिः खोंकशेयाली
इति भाषा इति क्वचित् ॥
त्रिकांडशेषः पाठः ॥
खिंखिरः पुं शिवाभेदः खोंक
शेयाली इति भाषा खट्वांगे
तत्र शिवस्यासे वारिवालके ॥
तत्र गंधद्रव्ये इति विश्वा ॥
हेमचंद्रश्च ॥
खिट भये भीषायां इति ॥
खिट भये भीषायां इति ॥
कविकल्पद्रुमः खिद शडौ परि
घाते इति कविकल्पद्रुमः ॥

खेटके वसनेदके इति
हारावली वसनेदको धनहरि
जीवक इति तत्तु चीवलदेवस्य
गदा इति कश्चित् ॥
खेटितालः पुं वैतालिकः।
इति शब्दमाला ॥
खेटी पुं नागरः कामी इति ॥
शब्दमाला ॥
खेडुः मैक भक्षणे इति ॥
कविकल्पद्रुमः ॥
खेदः पुं शोकः इति
हेमचंद्रः अवसन्नता इति
जटाधरः ॥
खेदिनी स्त्री अश्मनपर्णीहृतः
लता इति शब्दचंद्रिका ॥
खेयं क्ली परिखा गडखाइ इति
भाषा इत्यमरः खननीये इति
व्याकरणं ॥
खेल ऊ चाले गत्यां इति ॥
कविकल्प द्रुमः ॥
खेलनं क्ली क्रीडनं इति
हलायुधः ॥
खेलनी स्त्री शारिफले इति।
हेमचंद्रः ॥
खेला स्त्री खेलनं तत्पर्य्यायः
क्रीडा २ कूर्दनं ३ इत्यमरः ॥

खेलिः स्त्री गीते बाणः ॥
सूर्य्यः पशी जंतुः इत्यजयपालः
खेव ऊ ङ सेवे इति ॥
कविकल्पद्रुमः ॥
खेसरः पुं जंतुविशेषः खचर
इति भाषा तत्पर्य्यायः ॥
अश्वखरजः २ सक्तुर्भः ३ अश्वगः ४
हामी ५ वेसरः ६ मिश्रजः ७
मिश्रशब्दः ८ अतिभारगः ९
इति राजनिर्घंटः ॥
खैं स्थैर्य्ये खनने हिंसायां ॥
इति कविकल्पद्रुमः ॥
खोंकाहः पुं श्वेतपिंगलाश्वः
इति हेमचंद्रः ।खोंगाहोपि
पाठः ॥
खोट ऊ गत्यां घाते इति
कविकल्पद्रुमः
खोट तक क्षेपे इति ॥
कविकल्पद्रुमः ॥
खोटिः स्त्री चतुरास्त्री इति
शब्दमाला खोरिरित्यपिपाठः
खोटी स्त्री पालंकीहस्तः इति
शब्दचंद्रिका चतुराषि ॥
खोड ऊ खोटने इति ॥
कविकल्पद्रुमः ॥
खोड तक क्षेपे इति ॥
कविकल्पद्रुमः ॥



खोडः त्रि खंजः खोंडा. इति
भाषा इत्यमरः ॥
खोडकशीर्षकं क्ली कपिशीर्षं
कयशीर्षं इति त्रिकांडशेषः।
खोर ऋ खोटने गतिवैकल्ये
इति यावत् इतिकविकल्पद्रुमः
खोरः त्रि खंजः इतिहेमचंद्रः
खोल ऋ खोटने गतिवैकल्ये
इति कविकल्प द्रुमः ॥
खोलः त्रि खंजः इतिशब्दमाला
खोलकः पुं पाकः खोला ॥
इति भाषा शिरस्त्रः खोपडा।
इति भाषा वल्मीकः ।
उपेरदिपि इति भाषा ॥
पुगकोषः गुयारछोवडा इति
भाषा इति मेदिनी ॥
खोलि स्त्री तूणः इतिशब्दमाला
खोल्मुकः पुं मंगलग्रहः इति
त्रिकांडशेषः ॥
ख्या ल ख्याती कथने इति।
कविकल्पद्रुमः ॥
ख्यातः त्रि ख्यातियुक्तः तत्
पर्य्यायः प्रतीतः २ प्रथितः ३
वित्तः ४ विज्ञातः ५ विश्रुतः ६
इत्यमरः ॥
ख्यातगर्हणः त्रि प्रसिद्धकुत्सनः
तत्पर्य्यायः अवगीतः २।

इत्यमरः ॥
ख्यातगर्हितः त्रि ख्यातगर्हणः ॥
इति जटाधरः ॥
ख्यातिः स्त्री प्रसिद्धिः तत्
पर्य्यायः प्रथा २ इत्यमरः ॥
(र्णः
गकारः सतव्यंजनवर्णतीयव
अस्योच्चारणस्थानं कंठः इति
व्याकरणं गकारं परमेशानि
पंचदेवात्मकं सदा निर्गुणं ॥
त्रिगुणोपेतं निरीहं निर्मलं
सदा पंचप्राणमयं वर्णं सर्वं
शक्त्यात्मकं प्रिये अरुणादित्य
संकाशं कुंडली प्रणमाम्यहं
इतिकामधेनु तंत्रे ससर्गः ॥
स्रोषितः कंठे वायुना कादि ॥
मीरयेत् वर्गं स्पर्शनमात्रेण
कंस्वोस्पर्शनात् खे स्तोकगंभीर
तं स्पर्शाहृद्यो उस्त्र वहिर्गतेति
प्रपंचसारः अयाकुंचितरेखाया
गोणाशी साप्रकीर्त्तितानंतादत्त
गतायात्तकमलात्तत्रसंस्थिता
अधो गता गतायातु तस्यामीशः
सदावसेत् इतिवर्णोद्धार तंत्रे ॥
गे स्त्री गीते इत्येकाक्षरकोषः
गः पुं गणेशः गंधर्वः ॥

इत्येकाक्षरकोषः ॥
गगणं क्ली आकाशं इत्यमरः
आकाशं प्रथमं भूतं श्रोत्र ॥
मध्यात्ममुच्यते अधिभूतं तथा
शब्दो दिशस्तत्राधिदैवतं ॥
इत्याश्वमेधिकपर्व तस्यगुणाः
शब्दः १ व्याप्तत्वं २ छिद्रता ३ अनाश्रयं
४ अनालंबं ५ आश्रयांतरमूर्त्य
अव्यक्तं ६ रूपस्पर्शशून्यत्वात्
अधिकारित्वं ७ दुद्योतरनारंभकत्वं
अप्रतीघातिता ८ भूतत्वं ९
श्रोत्रेंद्रियोपादानत्वात् ।१०
विकृतानि ११ देहांतर्गतछिद्राणि
तद्यथा आकाशस्य गुणः शब्दो
व्याप्तत्वं छिद्रमेवच अनाश्रय।
मनालंब मव्यक्त मविकारिता
अप्रतीघातिताचैव भूतत्वं ॥
विकृतानिच गुणाः पंचाशतः
शोकाः पंचभूतात्म भूतता ॥
पंचानांभूतानांआत्मशास्त्रिः ॥
स्वके स्वरूपं तत्रलक्षिता इति
मोक्षधर्मः ॥
(स्त्री
गगनध्वजः पुं मेघः इतिहारावलि
सूर्य्यः इति हेमचंद्रः ॥
गगणाध्वगः पुं सूर्य्यः इति ॥
हेमचंद्रः ॥
गगणेचरः पुं ग्रहः नक्षत्रे

इति सिद्धांत शिरोमणिः ॥
गगणोल्मुकः पुं मंगलः ग्रहः
इति हारावली ॥
गद्ग हसने इतिकविकल्पद्रुमः
गंगका स्त्री गंगा इतिमुग्धबोधं
गंगा स्त्री स्वनामख्यात नदी
तदधिष्ठात्री देवता च तत्
पर्य्यायः विष्णुपदी २ जह्नुतनया ३
सुरनिम्नगा ४ भागीरथी ५ त्रिपथगा
६ त्रिस्रोताः ७ भीष्मसूः ८
इत्यमरः अर्च्यतीर्थं ९ तीर्थ
राजः १० इतिपद्मपुराणं ॥
त्रिदशदीर्घिका ११ कुमारसूः
१२ सरिद्वरा १३ सिद्धापगा १४
स्वरापगा १५ स्वर्गापगा १६ खापगा
१७ ऋषिकुल्या १८ हैमवती १९
सर्वापी २० हरशेखरा २१ धर्मद्रवी
हेमचंद्रः सुरापगा २२ धर्मद्रवी
२३ सुधा २४ जह्नुकन्या २५ गांदीनी
२६ रुद्रशेखरा २७ नंदिनी २८
अलकनंदा २९ सितसिंधु ३०
इतिजटाधरः ॥ अध्वगा ३१
उग्रशेखरा ३२ सिद्धसिंधुः ३३
इति त्रिकांडशेषः स्वर्गसरिद्वरा
३४ मंदाकिनी ३५ जाह्नवी ३६
पुण्या ३७ समुद्रसुभगा ३८ स्वर्नदी
३९ सुरदीर्घिका ४० सुरनदी ४१



सिद्धापगा ४२ स्वर्धुनी ४३ ज्येष्ठा
४४ जह्नुसुता ४५ भीष्मजननी ४६
शुभ्रा ४७ शैलेन्द्रजा ४८ अस्या
जलस्य गुणाः शीतत्वं स्वादुत्वं
स्वच्छत्वं अत्यन्तरुच्यत्वं पथ्यत्वं
पावनत्वं पापहारित्वं तृष्णा
मोहध्वंसनत्वं दीपनत्वं प्रज्ञा
धारित्वञ्च इति राजनिर्घण्टः ॥
अस्या उत्पत्तिस्तु हिमालयात्।
सुमेरु दुहितरि मनोरमायां ॥
हिमालयः प्रार्थितः सन् देवेभ्य
इमां दत्तवान् तां नीत्वा देवाः
स्वर्गं गतवन्तः पृथिव्यामस्या
अवतरण कारणं सगरराजस्य
सुतान् कपिल शापेन ॥
भस्मीभूतान् द्रष्टुं भगीरथ राजः
पृथिव्यां गङ्गानयनाय तपस्तेपे
ततो ब्रह्मतुष्ट स्तस्मै तं वरं दत्वा
गङ्गाधारणार्थं शिवाराधनं कर्त्तुं
मुक्तवान् स शिवं पर्य्यतोषयत्
शिवो पि हिमालय पर्व्वतं गत्वा जटा
विकीर्य्य पतेति गङ्गामब्रवीत् सा
तज्जटासु पतिता संवत्सरपर्य्यन्तं
बभ्राम ततः शिवो भगीरथ ॥
प्रार्थनया जटामेकां मुक्तवांस्तया
तामुत्ससर्ज्ज सापि वेगेन ॥
पृथिवीतलमागत्य भगीरथस्य।

पश्चात् जगाम स सगरपुत्र ॥
कृतखातेन तां रसातलमानीय
तज्जलेन तांस्तर्पयामास ते
पूताः स्वर्गं गतवन्तः इति वाल्मीकि
रामायणमतं प्रकारान्तरं ॥
वामनदेवस्य वलेः सकाशात् त्रि
लोकहरणकाले ब्रह्माण्डोपरिगत
वामपादाङ्गुष्ठनखजनितविवरेण
ब्रह्माण्डे स्थिता या जलधारा
तच्चरण स्पर्शेन पवित्रा ध्रुवलोके
पपात ततो देवमार्गेण सुमेरु ॥
पर्व्वतोपरि ब्रह्मसदने पतित्वा
सीतालकनन्दा चक्षुर्भद्रेति चतुर्द्धा
भूत्वा चतुर्दिक्षु लवणसमुद्रं प्रविष्टा
तत्र सीता ब्रह्मसदनात् ॥
केशराचल शृङ्गेभ्यो ऽधोऽधः ॥
स्रवन्ती गन्धमादन मूर्द्धसु पतित्वा
भद्राश्ववर्षमध्येन प्राच्यां दिश्येव
चक्षुर्माल्यवच्छिखरान्निपति केतु
मालवर्षमध्येन प्रतीच्यामपरं
भद्रा गिरिशृङ्गाण्यतिक्रम्य शृङ्ग
वतः शिखरान्निपत्य उत्तरकुरु
वर्षमध्येनादीच्यामलकनन्दा
बहुपर्व्वत शृङ्गाण्यतिक्रम्य हिमे
कूटान्निपत्य भारतवर्ष मध्येन
दक्षिणस्यां दिश्येव क्रमेण लवण
समुद्रं सर्व्वाः प्रविष्टाः इति भागवत

मतं अस्याः पृथिव्यामवतरण।
कालस्तु आदित्य पुराणे वैशाख
शुक्लपक्षे तु तृतीयायां युधिष्ठिर
यवानुत्पादयामास युगं चारब्धवान्
कृते ब्रह्मलोकात् त्रिपथगां।
पृथिव्या मवतारयत् तस्यां ॥
कार्य्यौ पर्व्वहोमौ पर्व्वविष्णु ॥
समर्च्चयेत् अस्या हिमालयो ॥
निर्गताया दशहरासंज्ञा तथाच
स्मृतिः ज्यैष्ठे मासि क्षितिसुतदिने
शुक्लपक्षे दशम्यां हस्ते शैलो।
निरगमदियं जाह्नवी मर्त्त्यलोके
पापान्यस्यां हरति च तिथौ सा
दशेत्याहुरार्य्याः पुण्यदद्यादपि
शतगुणं वाजिमेधायुतस्याथ
गङ्गाध्याने भविष्ये चतुर्भुजां
त्रिनेत्रां च सर्व्वावयव भूषितां
रत्नकुम्भां सिताम्भोजां वरदां।
अभयप्रदां श्वेतवस्त्रपरीधानां
मुक्तामणि विभूषितां तता ॥
ध्यायेत् सुरूपां च चन्द्रायुत ॥
समप्रभां चामरैर्वीज्यमानां च ॥
श्वेतच्छत्रोपशोभितां सुप्रसन्नां
सुवदनां करुणार्द्रनिजान्तरां
सुधाप्लावित भूपृष्ठा मार्द्रगन्धानु
लेपनां त्रैलोक्य नमितां ॥
गङ्गां देवादिभिरभिष्टु तां

दिव्यरत्न विभूषां च दिव्यमाल्यानु
लेपनां अपि च सित मकर ॥
निषण्णां शुभ्रवर्णां त्रिनेत्रां करधृत
कमलोद्यत् सुकलाभीत्य।
ऽभीष्टां विधि हरि हर रूपां ॥
सेन्दुकोटीर चूडां कलित सित
दुकूलां जाह्नवीं तां नमामि ॥
अथ गङ्गामाहात्म्य श्रवणपठन
फलं भविष्य माहात्म्येषु च ॥
गङ्गायाः शृण्वन्ति च पठन्ति च ते
ऽप्यशेषैर्महापापैर्मुच्यन्ते ॥
नात्र संशयः अस्याः ॥
स्मरणफलं गच्छन् तिष्ठन् स्वपन्
ध्यायन् जाग्रद् भुञ्जन् श्वसन् वदन्
यः स्मरेत् सततं गङ्गां स च मुच्येत
बन्धनात् भवनानि विचित्राणि
विचित्राभरणाः स्त्रियः आरोग्यं
वित्तसम्पत्तिर्गङ्गास्मरणजं फलं
अस्या दर्शनादि फलं ॥
ब्रह्माण्डाग्नेययोः दर्शनात् हरते
पापं स्पर्शनात् त्रिदिवं नयेत्
प्रसङ्गेनापि या गङ्गा मोक्षदा ॥
त्ववगाहिता भविष्ये यत्फलं
जायते पुंसां दर्शनात् ॥
परमात्मनः तद्भवेदेव गङ्गाया
दर्शनभक्ति भावतः अस्याः ॥
स्नानफलं ब्रह्माण्डपुराणे यैः

पुण्यवाहिनी गङ्गा सकृदप्यव-
गाहिता तेषां कुलानां ॥
लक्षं तु भवात्तारयते शिवा ॥
अनेकजन्मसम्भूतं पापं पुंसां ॥
प्रणश्यति स्नानमात्रेण गङ्गायां
सद्यः पुण्यस्य भाजनं दानधर्म्मे
अन्धाः क्लीवा जडा व्यङ्गाः पतिता
रोगिणोऽन्त्यजाः गङ्गां संसेव्य ॥
पुरुषा देवैर्गच्छन्ति तुल्यतां ॥
स्नानेन तु भक्त्या गङ्गायां कलौ कामस्य
गच्छतः पदे पदे ऽश्वमेधस्य ॥
फलं मर्त्यस्य जायते ब्रह्माण्डे ॥
ये गच्छन्ति स्वतो गङ्गां परोक्ष्य ॥
प्रेरयन्ति ये इह ते सर्वभोगानां ।
मेते स्नानस्य भाजनं ।
अस्याः पूजायाः फलं आग्नेये
गङ्गायां पूजितायां तु पूजिताः
सर्वदेवताः तस्मात्सर्व ॥
प्रयत्नेन पूजयेदमरापगां ॥
तस्यां यज्ञादि करणे फलं ।
स्कन्दे यज्ञो दानं तपो जप्यं ॥
श्राद्धं च सुरपूजनं गङ्गायां यत्कृतं
सर्वकोटिकोटि गुणं भवेत् ॥
भविष्ये सत्यं सकलं पुण्यप्न
दानादिजं फलं गङ्गातोये च ॥
सतिलं दुर्लभं पितृ तर्पणं ॥
गयाश्राद्धं कृतं तेन उद्धृतेतु ॥

दृष्टस्त्वया येन नदी चि तेसिके
तीरे प्राह मकारिच ॥
तज्जलपान फलं भविष्य ॥
गण्डूषमात्र पानेन अश्वमेधफलं
लभेत् स्वच्छन्दं यः पिबेदाप ॥
तस्य मुक्तिः करस्थिता त्रिभिः
सारस्वतं तोयं सप्तभि स्तथ ॥
यामुनं नार्म्मदं दशभि मासै ॥
गाङ्गं वर्षेण जीर्य्यन्ति नाभ्यन्तरीत
तोयानां मृतानां क्वापि देहिनां
तस्मात् तीर्थफलप्राप्ति नात्र
कार्य्या विचारणा यमोक्तो ॥
क्षेत्रस्य मध्यते वापि पतित मुखे
सद्यापि वा गङ्गायां हरते पाप ।
माजन्ममरणान्तिकं अस्या ॥
मरणफलं कूर्म्मपुराणे गङ्गायां
स्नानतो मृत्वा मुक्तिमाप्नोति ।
मानवः अस्नानात् ब्रह्मलोकं च
यान्ति नात्यत्र संशयः गङ्गायां च
जले मोक्षो वाराणस्यां जले
स्थले अन्तरीक्षे च गङ्गायां ॥
गङ्गासागर संगमे स्मृतो ॥
शुक्लपक्षे दिवा भूमौ गङ्गाया ॥
मुत्तरायणे धन्या देहं ॥
विमुञ्चन्ति हृदयस्थे जनार्दने ॥
अथास्थि निक्षेप फलं ॥
दशाहाभ्यन्तरे यस्य गङ्गातोये ॥

ऽस्थि मज्जति गङ्गायां मरणे
यावदब्दसहस्रक फलमाप्नुयात्
तत्र त्रयोदशक्रिया वर्जने ॥
ब्रह्माण्डे गङ्गां पुण्यजलां प्राप्य ।
त्रयोदश विवर्जयेत् शौच ।
माचमनं सेकं निर्म्माल्यमलघर्षणं
गात्रसंवाहनं क्रीडां प्रतिग्रहं ॥
सद्योरतिं अन्यतीर्थ रतिं चैव ।
अन्यतीर्थ प्रशंसनं वस्त्रत्याग
मथाघातं सन्तारं च विशेषतः
अथ नारायणक्षेत्र लक्षणं ब्रह्म
पुराणे प्रवाहमवधिं कृत्वा ।
यावद्धस्त चतुष्टयं अत्र नारायणः
स्वामी नान्यः स्वामी कदाचन
अथ गर्भतीरयोः लक्षणं भाद्र ।
कृष्ण चतुर्दश्यां यावदाक्रमते
जलं तावद्गर्भं विजानीयात् ।
तदूर्द्ध्वं तीरमुच्यते सार्द्धहस्त ॥
शतं यावद्गर्भतः तीरमुच्यते ॥
तीरे प्रतिग्रहादि निषेधः ॥
तीरे प्रतिग्रहस्त्याज्य स्त्याज्यो
धर्मस्य विक्रयः अथ गङ्गा ।
क्षेत्रफलं स्कन्दे तीराद्गव्यूति ॥
मात्रं तु परितः क्षेत्र मुच्यते अत्र
यद्यत् कृतं कर्म गङ्गायां नात्र ।
संशयः अत्रस्थास्तु दिवं यान्ति
ये मृतास्ते ऽपुनर्भवाः ॥

इति प्रायश्चित्त तत्त्वं ॥
गङ्गाका स्त्री गङ्गा इति मुग्धबोधे
गङ्गाचिल्ली स्त्री चिल्लविशेषः
गाङ्गचिल इति भाषा तत् ।
पर्य्यायः देवटी २ विम्बिका ३
जलकुक्कुटी ४ इति हारावली
गङ्गाजः पुं भीष्मः इति ।
शब्दरत्नावली कार्त्तिकेयः ।
इति भारते ॥
गङ्गाटेयः पुं मत्स्य भेदः ॥
चिंगिडि इति भाषा तत्पर्य्यायः
गलातिलः २ इति त्रिकाण्डशेषः
गङ्गाधरः पुं शिवः इत्यमरः
समुद्रः इति त्रिकाण्डशेषः ॥
गङ्गापत्री स्त्री हेलविशेषः ।
तत्पर्य्यायः पत्री २ सगोधा ३
गन्धपत्रिका ४ अस्या गुणाः कटुत्वं
उष्णत्वं वातनाशित्वं व्रण ।
रोपणत्वं च इति राजनिर्घण्टः
गङ्गा पुत्रः पुं भीष्मः इति
पुराणे वर्णसंकर जातिविशेषः
मुरदार फरोश इति पारस्य भाषा
सललेटात् तीवरकन्यायां जातः
इति ब्रह्मवैवर्त्त पुराणे ॥
गङ्गासुतः पुं कार्त्तिकेयः इति
हेमचन्द्रः भीष्मश्च ॥
गङ्गिका स्त्री गङ्गा इति मुग्धबोधे

गक्कः पुं हस्तः गाकु इति भाषा
इति हेमचन्द्रः निर्विसर्गे गमन
क्रियानुमतिः याव इति भाषा
इति व्याकरणं ॥
गज मदे स्वने इति
कविकल्पद्रुमः ॥
गज य स्वने इति कविकल्पद्रुमः
गजः पुं हस्ती इत्यमरः ॥
परिमाणविशेषः स तु हस्तद्वये
पादेन हस्तद्वयेन वा वास्तुनः
स्थानभेदः इति मेदिनी।
प्रस्तारे दैर्घ्यमाने तु सहस्तेन तथा
नरैः कृत्वा त्रिघ्नं गजैर्हृत्वा।
वास्तु स्थान निरूपणे ध्वजो
धूमश्च सिंहश्च श्वा हृषः खरएव च
गजः काकपदं चैव स्थानान्यष्टौ च
वास्तुनः ध्वजे विभूतिर्भवणेव धूमे
सिंहे जयः श्वाव कुरोत्पनर्थे
वृषेच भोगी त्वयणं खरेव पुष्टि
गजे काकपदे विनाशः इति
ज्योतिषे औषध पाकार्थी ॥
गर्तविशेषः यथा हस्तप्रमाण
गर्तेषु पुटः स तु गजाह्वयः
इत्युचारात्निके कुंडे पुटोवा गह
उच्यते इति वैद्यक प्रयोगा ॥
मृतं ॥
गजकंदः पुं हस्तिकंदः इति

राजनिर्घण्टः ॥
गजकूर्म्माशी पुं गरुडः इति
शब्दरत्नावली ॥
गजचिर्भटा स्त्री इन्द्रवारुणी
गोरक्षलाउ गघालषषा इतिच
भाषा इति रत्नमाला ॥
गजचिर्भिटः पुं गोड्वा इति।
त्रिकाण्डशेषः ॥
गजचिर्भिटा स्त्री महेन्द्रवारुणी
इति राजनिर्घण्टः ॥ ठक्का
गजटक्का स्त्री गजोपरिस्थटहः
तत्पर्य्यायः मदाक्रान्तः २ इति
हारावली ॥
गजता स्त्री गज समूहः तत ॥
पर्य्यायः हास्तिकं २ इत्यमरः
गजदघ्नः पुं गजपरिमाणं इति
मुग्धवोधे ॥
गजदन्तः पुं गणेशः इति ॥
शब्दरत्नावली गजस्येवाग्रदन्तः
हातिर दांत इति भाषा ॥
नागदन्तः स तु द्रव्य स्थापनार्थं।
भित्तिस्थ दंडद्वये दोडा इति ॥
भाषा ॥
गजदन्तफला स्त्री डेंगरीलता।
इति राजनिर्घण्टः ॥
गजदानं क्ली हस्तिमदः इति
राजनिर्घण्टः ॥

गजद्वयसः त्रि गजपरिमितः
इति मुग्ध वोधे ॥
गजपादपः पुं स्थाली वृक्षः।
इतिभावप्रकाशः ॥
गजपिप्पली स्त्री पिप्पलीभेदः
गजपिपुल इति भाषा तत्।
पर्य्यायः करिपिप्पली २ इभकणा
कपिवल्ली ४ कपिल्लिका ५ श्रेयसी
६ वशिरः ७ गजाह्वा ८ इति
रत्नमाला कोलवल्ली ९ ॥
इत्यमरः वशिरः १० इति
तद्दीका गजोषणा ११ वग्रफले
१२ वद्यजा १३ छिद्रवैदेही १४
दीर्घग्रन्थिः १५ तेजस्वी १६ वन्हेली
१७ स्थूलवैदेही १८ अस्या गुणाः
कटुत्वे उष्णत्वे रुजामल ॥
विशोषणत्वे वलासवातहरत्वे
स्तन कर्ण विवर्द्धनत्वंच इति
राजनिर्घण्टः मेदाग्निकारित्वे ॥
इति राजवल्लभः ॥
गजपुटः पुं औषधपाकार्थहस्त
परिमित गर्त्तः इति वैद्यके ॥
अस्य प्रमाणं गजपादे द्रष्टव्यं
गजप्रिया स्त्री शल्लकी वृक्षः इति
हेमचन्द्रः ॥
गजवन्धनी स्त्री गजवन्धस्थाने।
हातिशाला इति भाषा तत

पर्य्यायः वारी २ इत्यमरः ॥
वारि इति भरतः ॥
गज भक्षकः पुं अश्वत्थवृक्षः
इति राजनिर्घण्टः गजैर्भक्ष्यते
यः कर्म्मण्यल् स्वार्थे कः ॥
गजभक्षा स्त्री शल्लकीवृक्षः इति
शब्दरत्नावली ॥
गजभक्ष्या स्त्री शल्लकीवृक्षः
इत्यमरः ॥
गजमाचलः पुं स्त्री सिंहः इति
हारावली ॥
गजमात्रः त्रि गजपरिमितः इति
मुग्धवोधे ॥
गजमोटनः पुं स्त्री सिंहः इति
शब्दमाला ॥
गजवदनः पुं गणेशः इति
हलायुधः ॥
गज वल्लभा स्त्री गिरिकदली
शल्लकी इति राज निर्घण्टः ॥
गजसाह्वयं क्ली हस्तिनापुरं
इति शब्दरत्नावली ॥
गजाख्यः पुं चक्रमर्द्दवृक्षः इति
राजनिर्घण्टः ॥
गजाग्रणीः पुं ऐरावतहस्ती
इति शब्दरत्नावली ॥
गजाजीवः पुं हस्तिपालकः
तत्पर्य्यायः आधोरणः २ ॥



हस्तिपकः ३ इभपालकः ४ इति
हेमचन्द्रः ॥
गञ्जाडे क्ली पिण्डमूले इति
राजनिर्घण्टः ॥
गजाननः पुं गणेशः इत्यमरः
गजारिः पुं वृक्षविशेषः सिंहः
यथा गजारिस्तरु सिंहयोरिति
हडु चन्द्रः ॥
गजाशनः पुं अश्वत्थवृक्षः इति
रत्नमाला गजादनोपि ॥
गजाशना स्त्री भंगा इति
शब्दचन्द्रिका शल्लकीवृक्षः।
पद्ममूले इति रत्नमाला॥
गजास्यः पुं गणेशः इति
हेमचन्द्रः हस्तिमुखे क्ली।
गजाह्वं क्ली हस्तिनापुरे इति
मेदिनी ॥
गजाह्वये क्ली हस्तिनापुरे इति
शब्दरत्नावली ॥
गजाह्वा स्त्री गजपिप्पली इति
मेदिनी ॥
गजेष्टा स्त्री विदारी भूइकुमड़ा
इति भाषा इति राजनिर्घण्टः॥
गजोषणा स्त्री गजपिप्पली इति
राजनिर्घण्टः ॥
गञ्जः पुं अवज्ञा भाण्डागारे ॥
खनिः इति हेमचन्द्रः ॥

गोष्ठागारे गोयालिघर इति
भाषा इति हारावली ॥
गञ्जः पुं क्ली भाण्डागारे इति
मेदिनी ॥
गञ्जा स्त्री मदिरागृहे इत्यमरः।
खनिः इति मेदिनी पामरसद्म।
मद्यभाण्डे इति शब्दरत्नावली ॥
गञ्जिका स्त्री मदिरागृहे इति।
शब्दरत्नावली ॥ (स्मः
गड म सेको इति कविकल्पद्रु
गड ३ गडे इति कविकल्पद्रुमः
गडः पुं मत्स्यभेदः गड़ुई
इति भाषा अंतरायः इति
मेदिनी परिखा व्यवधाने ॥
इति शब्दरत्नावली देशविशेषः
राजनिर्घण्ट गडलवण पर्य्याये
गडदेशज मिति दर्शनात् ॥
गडकः पुं मत्स्यविशेषः गड़ुइ
माछ इति भाषा तत्पर्य्यायः
शकुलार्भकः २ इत्यमरः ॥
अस्यगुणाः मधुरत्वं रूक्षत्वं
कषायत्वं शीतलत्वं लघुत्वंच
इति राजवल्लभः ॥
गडयन्तः पुं मेघः इति सिद्धांत
कौमुद्यामुणादि वृत्तिः ॥ (लवणं
गडुलवणं क्ली सेंबरदेशोद्भव
साम्भरलोण इति भाषा तत्

पर्य्यायः कुम्भे २ रुपीजे ३
गडदेशजे ४ गडोत्थे ५ ॥
महारम्भे ६ सांबरे ७ संबरोद्भवे ॥
८ अस्यगुणाः उष्णत्वं लवणत्वं।
ईषदम्लत्वं मलापहत्वं दीपनत्वं
कफवाताशनाशित्वं कोष्ठ
शोधनत्वंच इति राजनिर्घण्टः
गडदेशजे क्ली सांबरलवणे
इति राजनिर्घण्टः ॥
गडिः पुं वत्सतरः इति राज।
निर्घण्टः अलसो गवादिः गड़िया
इति भाषा यथा गुणानमेव॥
दौरात्म्याद्गुरि धूर्य्या नियुज्यते।
असंजात किणस्कंधः सुखंस्वपिति
गौर्गडिः इति काव्यप्रकाशः
गडुः पुं गल गडः हृष्ट गुडः।
सत्यचाटा मल्लकयो र्मध्ये मांस
वृद्धिः इति लिंगादि संग्रहे अमरः
भरतो कुब्जः इति मेदिनी ॥
शल्यास्त्रं इति शब्दरत्नावली॥
किंचुलुकः इति त्रिकाण्डशेषः।
विषमग्रंथिः यथा काव्यप्रकाशे
तदेतत् काव्यांतर्गडुभूतमिति
नाम्पभेद लक्षणे कृतमित्यत्र॥
तट्टीकाकारः ॥
गडुरः त्रि कुब्जः इति शब्दरत्नाव (ली
गडुलः त्रि कुब्जः इत्यमरः ॥

गडेरः पुं मेघः इति त्रिकाण्ड ॥
शेषः ॥
गडोत्थं क्ली गडलवणं इति।
राजनिर्घण्टः ॥
गडोलः पुं गुडः इत्युणादि ॥
कोषः ग्रासः इति हेमचन्द्रः।
गड्डरिका स्त्री अज्ञातप्रवाहागम
मूलो धारावाही नदी विशेषः
इति केचित् मेष पुंक्ते
रनुगम्यमानामेषी इत्यन्ये ॥
इति काव्यप्रकाश टीकायां
महेश्वरः ॥ (गाडु
गडुकः पुं जलपात्र विशेषः
इति भाषा इति शब्दरत्नावली
गडुकः पुं गडुकः इति ॥
शब्दरत्नावली ॥
गण न क संख्याने इति ॥
कवि कल्पद्रुमः ॥
गणः पुं समूहः प्रमथः ॥
रुद्रानुचरः सेनासंख्याविशेषः
तद्यथा गजाः २७ रथाः २७ अश्वाः
८१ पदातिकाः १३५ समुदायेन
२७० इत्यमरः संख्याचार ॥
नामधेयद्वयं इति मेदिनी ॥
गणेशः यथा गणपस्तु ॥
महेशानि गणदीक्षा प्रवर्तकः
इति महानिर्वाण तंत्रे ॥



अश्विन्यादि जन्मनक्षत्रानुसारेण
देव मानुष राक्षस गण इति तु
पारिभाषिके यथादेम राम
देमादेदेरा राम मदरा दरा ॥
देरा राममदेरा राम मदेति ॥
गणत्रये इति ज्योतिषरत्नमाला
पूर्वोत्तरात्रये चैव भरण्यार्द्रा च
रोहिणी इमानि मानुषाण्याहु
र्नक्षत्राणि मनीषिणः ज्येष्ठा का:
शतभिषामूलधनिष्ठाश्लेषकृत्ति
चित्रामघाविशाखास्तारा
राक्षसदेवताः अश्विनीरेवती
पुष्यः स्वाती हस्तः पुनर्वसुः
अनुराधा मृगशिरः श्रवणं
देवतारकाः इति निर्णयः ॥
धातुसमूहः यथा भ्वादिह्लादि
जुहोत्यादि दिवादिस्वादिरेव च
तुदरुधा तनुक्र्यादिचुरादिश्च
गणादश इति मनोरमा ॥
गणकः पु ज्योतिर्वित् तत्
पर्यायः सांवत्सरः २ ज्योतिषकः
३ दैवज्ञः ४ मौहूर्तिकः ५ मौहूर्तः
६ ज्ञानी ७ कार्तान्तिकः ८
इत्यमरः ज्योतिषिकः ९ इति
तट्टीका सतवर्णसंकरजाति।
विशेषः देवलोहे यथा गर्भजातः
तस्य कर्मतिथि वारादि ज्ञापने।
इतिपराशरपद्धतिः ॥
गणकर्णिका स्त्री इन्द्रवारुणी इति
राजनिर्घण्टः ॥
गणकारः पु भीमसेनः इति
शब्दरत्नावली धातुसंग्रहकर्ता
यथा गणकारवचनप्रामाण्य
मिदमिति कातन्त्र वृत्तिः ॥
गणकी स्त्री गणक पत्नी इति
जटाधरः ॥ संभूय
गणचक्रकं क्ली धार्मिकाणां
भोजने इति त्रिकाण्डशेषः ॥ त्व
गणता स्त्री गणस्य भावः समूह
पत्नमाति त्वं इति लोकप्रसिद्धिः
गणदीक्षी पु बहुयाजकः इति
मिताक्षरा गणेष्वादीक्षिते त्रि।
गणस्य गणेशस्य दीक्षा गणदीक्षा
इति महानिर्वाण तन्त्रे सा विद्यते
यस्य इति वृत्तिः ॥ षः
गणदेवता स्त्री संहतदेवताविशे
यथा आदित्या विश्ववसवस्तुषिता
भास्वरानिलाः महाराजिक
साध्याश्च रुद्राश्च गणदेवताः
आदित्या द्वादश प्रोक्ता विश्वेदेवा
दश स्मृताः वसवश्चाष्टसंख्याताः
षट्त्रिंशत् तुषिता मताः ॥ आ
आभास्वराश्चतुःषष्टिर्वाताः पञ्चा
दूनकाः महाराजिकनामानो

खिद ध औ ङ य दैन्यके ॥
उपतप्तीभावे इति पावत् इति
कविकल्पद्रुमः ॥
खिदिरः पु चन्द्रः इत्युणादिकोषः
दीनः तापसः इति संक्षिप्त ॥
सारेउणादि वृत्तिः ॥
खिद्यमानः त्रि खेद युक्तः
दैन्यग्रस्तः उपतप्तः यथा
खिद्यमानेन ते दृष्ट्वा सूर्यः
कस्मात्त्वजं तदा इति शैवपुराणे
सूर्यस्तवः ॥
खिद्रः पु रोगः दरिद्रः इति।
सिद्धान्तकौमुद्या मुणादिवृत्तिः
खिन्नः त्रि दैन्य ग्रस्तः खेदयुक्तः
यथा गोर्भूत्वाश्रुमुखी खिन्नाक्रन्दे
ती करुणं विभोः इति श्रीभागवते
खिरहिट्टी स्त्री महासमङ्गा ॥
इति राजनिर्घण्टः ॥
खिलं त्रि हलादिना ऽकृष्टभूमिः।
पर्यायः अप्रहतं २ इत्यमरः ॥
सारं शेषेत्विति वेधसि च पु इति ॥
मेदिनी खिलो नारायणः प्रोक्त
इषवस्तु गुणाः स्मृताः इति खिलेषु
हरिवंशो इत्यत्र नीलकण्ठटीका
खु ङ ध्वनौ इति कविकल्पद्रुमः
खेगाहः पु कृष्णवर्णघोटकः इत्यमरः ॥
इति हेम चन्द्रः ॥
खुज उ स्तेये इति कविकल्पद्रुमः
खुञ्जाकः पु देवताड वृक्षः ॥
इति रत्नमाला खुञ्जाक इति
क्वचित् पाठः ॥ द्रुमः
खुड ङ ऊ खेजो इति कविकल्प
खुडक भेदे इति कविकल्पद्रुमः
खुड इक भेदे इति
कविकल्पद्रुमः ॥
खुर श विलेखने छेदने ॥
इति कविकल्प द्रुमः ॥
खुरः पु शफे गवादीनां ॥
पादाग्रे कोलदले नखीनाम
गन्धद्रव्ये इति मेदिनी ॥
छेदनवस्तु नापितस्य खुरः इति
शब्द रत्नावली खट्वादीनां
पादुके खुरा इति भाषा ॥
इति धरणी ॥
खुरकः पु तिल वृक्षः इति
शब्दचन्द्रिका ॥
खुरणसः त्रि चिपिटनासिकः
चेपटा नाक युक्त इति भाषा
इत्यमरः
खुरणाः त्रि खुरणसः छेपटा
नासिका युक्त इति भाषा ॥
इत्यमरः ॥

खुरप्रः पुं बाणविशेषः खुरपा
इति भाषा इत्यमरटीकायां ॥
स्वामी ॥
खुरली स्त्री शराभ्यासः इति
हेम चन्द्रः ॥ (षः
खुराकः पुं पशुः इत्युणादिको
खुरालकः पुं लौहमयबाणः
इति शब्दमाला ॥
खुरालिकः पुं ग्रामणी भेडिः
नापितेर भाँडि इति भाषा ॥
नाराचः उपधाने इति ॥
मेदिनी खरालिकोपि पाठः
खुर्द उं क्रीडायां इति
कवि कल्प द्रुमः ॥ (ति
खुल्लं स्त्री नखीनामगन्धद्रव्यं इ
शब्दचन्द्रिका खुद्रनीचेच त्रि।
खुल्लकः त्रि स्वल्पः नीचः ॥
कनिष्ठः दरिद्रः निष्ठुरः खलः
इत्यमरटीकायां ॥ (उ
खुल्लतातः पुं पितृकनिष्ठभ्राता
इति भाषा इति शब्दरत्नावली
खुल्लमः पुं पथ्याः इति ॥
त्रिकाण्डशेषः ॥
खूर्द उं क्रीडायां इति
कविकल्पद्रुमः ॥
खेखीरकः पुं शब्दवतीयष्टिः
इति हारावली ॥

खेगमनः पुं कालकेठपक्षी
इति शब्द माला ॥
खेचरः पुं शिवः इति ॥
शब्दरत्नावली विद्याधरः इति
जटा धरः पारदः ॥ इति ॥
राजनिर्घण्टः आकाशचारिणि त्रि
खेट त क भक्षणे इति ॥
कविकल्पद्रुमः ॥ (ली
खेटं क्ली तृणं इति शब्दरत्नाव
खेट्टमपि पाठः ॥
खेटः पुं ग्रहः यथा यस्मिन्
राशौ स्थितः खेटस्तेन ते
परिपूरयेत् इत्यादि भाव ॥
विवेकः ॥
खेटः त्रि अधमः इत्यमरः ॥
चोटकः इति शब्दरत्नावली
स्तनिदकः इति विश्वः स्तनेदक
इतिपाठे बलरामस्य गदा ॥
इति कश्चित् ॥
खेटः पुं क्ली मृगया इत्यमर ॥
हेम चन्द्रो कफः ग्रामभेदः ॥
सत्तु कर्षक ग्रामः चर्म इति ॥
मेदिनी शब्दरत्नावल्यौ ॥
खेटकः पुं ग्राम भेदः बासारगां
इति भाषा इति जटाधरः ॥
फलके इति हेमचन्द्रः ॥

द्वेषतेवापि विंशतिः साध्या
द्वादशाविख्याता रुद्राश्चैकादश
स्मृताः एतेच संहृता देवा ॥
लम्बादित्याः स्वनामतः इति
जटाधरः ॥
गणद्रव्यं क्ली साधारणद्रव्यं ॥
मिलितानेकासेवधिस्वामिकद्रव्य
गणानो द्रव्यमिति व्युत् पत्तिः
द्रव्यसमूहः द्रव्याणां गणः इति
व्युत् पत्तिः ॥
गणने क्ली संख्याने गणाठिक
देया इतिच भाषा यथा
यैनैव लिखने कुर्यान्नैव गणने
स्मृते इति विश्वसार तन्त्रे ॥
गणना स्त्री गणने संख्यायथा
यदि त्रिलोकी गणनापरास्यादिति
श्रीहर्षः ॥
गणनाथः पुं गणेशः इति
शब्दरत्नावली ॥
गणनायकः पुं गणेशः इति
शब्दरत्नावली ॥
गणनायिका स्त्री दुर्गा इति
त्रिकाण्डशेषः ॥
गणनीयं त्रि गणनार्हे संख्येये
तत्पर्य्यायः गणेयं २ इत्यमरः
गणितव्यं ३ गण्यं ४ इति
व्याकरणं ॥

गणपतिः पुं गणेशः इति ॥
हला युधः ॥
गणपर्वतः पुं कैलासपर्वतः ॥
इति त्रि कांडशेषः ॥
गण पीठकं क्ली वक्षः इति
शब्दचन्द्रिका ॥ (मरः
गणरात्रं क्ली रात्रिसमूहः इत्य
गणरूपः पुं अर्कवृक्षः इत्यमरः
गणरूपकः पुं राजार्कः
राजनिर्घण्टः ॥
गणरूपी पुं श्वेतार्कः इति
रत्नमाला ॥ (यथा
गणवती सुतः पुं दिवोदासः
धन्वन्तरि दिवोदासः काशिराजः
स्तथोद्भवः पालकाख्या गणवती
करेणु रुचिरास्तु इति
त्रिकाण्डशेषः ॥ (द्रव्य
गणहासः पुं चोरकनामगन्ध
इति राज निर्घण्टः ॥
गणहासकः पुं चोरकनामगन्ध
द्रव्य इत्यमरः ॥
गणश्रेष्ठः पुं गणेशः इति
त्रिकाण्डशेषः ॥
गणाचलः पुं कैलासपर्वतः
इति जटाधरः ॥
गणाधिपः पुं गणेशः इत्यमरः
शिवः इति हलायुधः ॥



गणिः स्त्री गणने इति व्याकरणं
गणिका स्त्री वेश्या यूथिका।
इत्यमरः गणिकारिका हस्तः।
इति शब्दरत्नावली हस्तिनीइति
जटाधरः ॥
गणिकारिका स्त्री वृक्षविशेषः
बड़गणियारी इति भाषा तत्
पर्यायः श्रीपर्णी २ अग्निमंथः ३
कणिका ४ जया ५ इत्यमरः ॥
तेजोमंथः ६ हविर्मंथः ज्योतिष्क
८ पावकः ९ अरणिः १० वह्निमंथः
११ मथनः १२ इतिरत्नमाला।
अग्निमंथनः १३ तर्कारी १४
वैजयंतिका १५ अरणीकेतुः १६
श्रीपर्णी १७ कर्णिका १८ नादेयी
१९ विजया २० अनंता २१ नदीजा
२२ अस्या गुणाः कटुत्वं उष्णत्वं।
तिक्तत्वं अनिल कफ शोफ।
श्लेष्माग्निमांद्य शोषि मलबंधभ्रम
नाशित्वंच इति राजनिर्घंटः॥
लघुगणिकारिका गुणपर्यायौ
लघ्वग्निमंथ शब्दे द्रष्टव्यौ ॥
गणिकारी स्त्री पुष्पवृक्षविशेषः
गणियारी इति भाषा तत्
पर्यायः कांचनिका २ कांचनपु
ष्पी ३ वसंतदूती ४ गंधकुसुमा ५
अतिमोदा ६ वासंती ७ ॥

मदनमादिनी ८ अस्या गुणाः
सुरभितत्वं त्रिदोषशमनत्वं
दाह शोष कामक्रीडाउन्मादसेवा
हरत्वं चापल भ्रमत्वंच इति
राजनिर्घंटः ॥
गणितं त्रि कृतगणने तत्
पर्यायः संख्यातं २ इत्यमरः
गणितं क्ली अंकशास्त्रं तत्तुद्विविधं
व्यक्तं पाटी गणितं अव्यक्तं बीज
गणितं इति लीलावती गणने
यथा यारे पराईं गणिते यदि
स्यादिति श्रीहर्षः ॥
गणिपिटका स्त्री द्वादशांगी
सात् जिनानां विद्याविभागः
इति हेमचंद्रः ॥
गणेयः त्रि संख्येयः गणनीयः
इत्यमरः ॥
गणेरुः पुं कर्णिकारवृक्षः इति
मेदिनी ॥
गणेरुः स्त्री वेश्या हस्तिनी
इति मेदिनी ॥
गणेरुका स्त्री कुट्टिनी इति
त्रिकांडशेषः ॥
गणेशः पुं शिवः इतिहारावली
शिवपुत्रः तत्पर्यायः विनायकः
२ विघ्नराजः ३ द्वैमातुरः ४
गणाधिपः ५ एकदंतः हेरंबः ७

लंबोदरः ८ गजाननः ९ इत्यमरः
विघ्नेशः १० पर्शुपाणिः ११
गजास्यः १२ आखुगः १३ इति
हेमचंद्रः शूर्पकर्णः १४ ॥
इतिब्रह्मवैवर्त्तपुराणं ॥
तस्योत्पत्तिः तत्र पार्वती प्रति
वृद्धब्राह्मण रूपश्री कृष्णवाक्यं
यथा न भवेद्धि सुभक्तिश्च विस्म
माषत्वया विनात्वद्रुते ॥
शिवार्चे त्वमय स्वरपूजने ॥
सर्वेज्या फलदात्रीत्वं नित्यरूपा
सनातनी गणेशरूपः श्रीकृष्णः
कल्पेकल्पेतवात्मजः त्वत्क्रोड
मागतः शिशुमित्युक्त्वांतरधीयत
कृत्वांतर्द्धानमीशश्च बालरूपे
विधायसः जगाम पार्वतीतल्प
मंदिराभ्यंतरे स्थिते तल्पस्थे ॥
शिववीर्येच मिश्रितः सबभूवह
ददर्श गेह शिखरं प्रसूतबालके
यथा शुद्धचंपक वर्णाभः कोटि
चंद्रसमप्रभः सुख दृश्यः॥
सर्वजनैश्चक्षूरश्मि विवर्द्धकः
अतीव सुंदरं तनु कामदेव॥
विमोहनः मुखं निरूपमं ॥
विभ्रत् शारदेंदु विनिंदकं ॥
सुंदरे लोचने विभ्रतचारुपद्म
विनिंदके ओष्ठाधर पुटे विभ्रत्

पक्वबिंब विनिंदकं कपालेच
कपोले नदतीव समनोहरे
नासाग्रं रुचिरं बिभ्रत् खगेंद्र
चंचु निंदकं त्रैलोक्येषु ॥
निरूपमं सर्वांगं विभ्रदुत्तमं
शयानः शयने रम्ये प्रेरयन्
हस्तपादकं तस्य पार्श्वे स्वर
दर्शनात् मस्तक विनाशः विस्
कर्तृक गजमस्तक संयोगश्च
यथासाच देववशीभूता शनि
श्चाव कौतुकात् पश्यमामत
शिशुमिति निषेकः केनवार्यते
पार्वतीवचनं श्रुत्वा सोनुमेने
हृदास्वयं पश्यामि किंनपश्यामि
पार्वती सुत मित्युक्त्वा बाले
दृष्टमनश्चक्रेनवालमानदशनिः
विषस मानसः पूर्वं शुष्ककंठोष्ठ
तालुकः सव्यलोचन कोणेन
ददर्शच शिशोर्मुखं शनिश्च
दृष्टिमात्रेण चिच्छेद मस्तकं मुने
विस्मिता स्ते सुराः सर्वे चित्र
पुत्तलिका यथा देवाश्च शैला
गंधर्वाः शिवः कैलास वासिनः
तान् सर्वान् मूर्छितान् दृष्ट्वारुरुह
गरुडे हरिः जगाम पुष्पभद्रां
सउत्तरस्यां दिशि स्थितो पुष्प
भद्रानदी तीरे ददर्श कानना स्थिते

गजेन्द्रं निहिते तत्र शयाने।
हस्तिनी सुते शीघ्रं तद्दर्शनेनैव
विच्छेद तच्छिरोमुदाययामास
गरुडे रुधिराक्ते मनोहरं ॥
आगत्यपार्वती स्थाने बाले ॥
कृत्वा स्ववक्षसि हविरंतत्।
शिरः कृत्वा योजयामास बालके
ब्रह्मस्वरूपो भगवान् ब्रह्मज्ञानेन
लीलया जीवने जीवयामास।
हुंकारोच्चारणेनच इति ॥
ब्रह्मवैवर्त्ते पुराणे ॥ ॥
अस्य ध्याने खर्वं स्थूल तनुं।
गजेन्द्रवदने लंबोदरं सुंदरं
प्रस्यंदन् मदगंध लुब्धमधुप
व्यालोल गंडस्थलं दंताघात
विदारितारिरुधिरैः सिंदूर ॥
शोभाकरं वंदे शैल सुता ॥
सुतं गणपतिं सिद्धिप्रदं।
कामदं इति पुराणे ॥
ध्यानांतरं यथा सिंदूराभं ॥
त्रिनेत्रं पृथुतरजठरं हस्तपद्मे
दधानं दन्तं पाशांकुशेष्टान्युरु
कर विलसद्बीजपुराभिरामे।
बालेंदु द्योत मौलिं करिपति
वदनं दानपूरार्द्र गंडं भोगींद्रा।
बद्धभूषं भजत गणपतिं रक्त
वस्त्रांगरागं इति तंत्रसारः। ७।

एकपंचाशद्गणेशाः यथाविघ्नेशो
विघ्नराजश्च विनायक शिवोत्तमो
विघ्नकृत विघ्नहर्त्ताच गणैकद्वि
दंतकाः गजवक्त्र निरंजनौ
कपर्द्दीदीर्घजिह्वकः शंकुकर्णश्च
वृषभध्वजश्च गणनायकः गजेन्द्रः
शूर्पकर्णश्चस्या त्रिलोचनसंज्ञकः
लंबोदरः महानंदो चतुर्मूर्तिः।
सदाशिवो आमोद दुर्मुखौ चैव
सुमुखश्च प्रमोदकः एकपादो
द्विजिह्वश्च शूरवीरः षण्मुखः
वरदो वामदेवश्च वक्रतुंडः।
द्विरंडकः सेनानी ग्रामणी मत्तो
विमत्तो मत्तवाहनः जटी मुंडी
तथा खड्गी वरेण्य वृषकेतनः
भक्तप्रियो गणेशश्च मेघनादक
संज्ञकः व्यापी गणेश्वराः शक्ताः
पंचाशद्गणपाइमे तरुणारुण
संकाशा गजवक्त्र त्रिलोचनाः
पाशांकुश वराभीति हस्ताः शक्ति
समन्विताः तेषामेकपंचाश
च्छक्तयश्च यथा ह्रीः श्रीश्च पुष्टिः
शांतिश्च स्वस्तिश्चैव सरस्वती
स्वाहा मेधा कांति कामिन्यो
मोहिन्यपि वैनटी पार्वती
ज्वालिनी नंदा सुयशाः कामरूपिणी
उमा तेजोवती सत्या विघ्नेशानी

सुरूपिणी कामदा मदजिह्वाच
भूतिः स्याद्भौतिका सितारमाच
महिषी शोक्ता भृंगिनी विकर्णा
भ्रुकुटिः स्यात्तथा लज्जा ॥
दीर्घघोणा धनुर्द्धरायामिनीरात्रि
सेत्राच कामांधाच शशिप्रभा।
लोलाक्षी चंचला दीप्तिः सुभगा
दुर्भगा शिवा भर्गीच भगिनीचैव
भोगिनी सुभगा मता काल।
रात्रिः कालिकाच पंचाशच्छक्तयः
स्मृताः सर्वालंकरणोद्दीप्ताः
प्रियांकेस्याः सचशोभनाः रक्तोत
पलकराध्येयारक्तमाल्याम्बरा
णाः इति शारदातिलकटीकायां
राघवभट्टः ॥
गणेशकुसुमः पुं रक्तकरवीरः
इति राजनिर्घंटः ॥
गणेशभूषणं क्ली सिंदूरं इति
राजनिर्घंटः ॥
गणोत्साहः पुं गंडकः गंडारः।
इति भाषा इति त्रिकांडशेषः॥
गंडः पुं हस्तिकपोलः तत्पर्य्याय
कटः २ इत्यमरः करटः ३ इति
तट्टीका कपोलः गाल इति
भाषा इत्यमरः खड्गी वीर्य्यं गो।
पिटकः चिह्न वीरः ॥
हयभूषणं बुद्बुदः इति मेदिनी

स्फोटकः ग्रंथिः इत्यमरटीकायां
रमानाथः विष्कंभादि सप्त
विंशतियोगांतर्गत दशमयोगः
तत्रजातफलं स्वकार्य्यकर्त्ता
परकार्य्यहर्त्ता गंडोद्भवः स्यादति
गंडवाक्यः अन्यत धूर्तः पुरुषः
कुरूपः सुख्यहणा मतिताप
दाता इति कोष्ठीप्रदीपः ॥
दोषजनको अश्विन्यादिनक्षत्राणां
भागविशेषः यथा अश्विनीमघ
मूलानांतिस्रो गंडाद्यनाडिकाः
अन्या पौष्णाद्गंडाणां पंचैव
जवना जगुः मूलेंद्रयो दिवा
गंडोनिशायो पितृसार्पयोः
संध्याद्वये तथा ज्ञेयो रेवती
तुरगाद्येयोः तत्र जातस्य ॥
दोषो यथा संध्या रात्रि ॥
दिवाभागगंडयोगोद्भवः शिशुः
आत्मानं मातरं तातं विनिहंति
यथाक्रमं तस्य शांति ॥
यथा सर्वेषां गंडजातानां ॥
परित्यागो विधीयते ताते
नादर्शनं वापि यावत्षाण्मासिको
भवेत् कुंकुमं चंदने कुष्टे ॥
गोरोचनं मधापिवा घृते ॥
रेवांवितं कृत्वा चतुर्भिः कलसैर्बुधः
सहस्राक्षेण मंत्रेण बालकं ॥

स्नापयेत्ततः पितृगण्डे दिवाजाते
मातृगण्डे च रात्रिजे स्नापयेत्
पितृमातृभ्यां सन्ध्ययोरुभयो
रपि कांस्यपात्रे घृतैः पूर्णे ।
गण्डदोषोपशान्तये दद्याद्धेनुं ।
हिरण्यं च ग्रहांश्चापि प्रपूजयेत्
मूलायाः प्रथमे पादे पितृ
र्वपुर्विनश्यति द्वितीये नियतां
पीडां मातुः कुर्यात् पितुस्तथा
तृतीये धननाशाय चतुर्थे ।
सर्वसम्पदः अन्त्ययेन फले ज्ञेय
मश्लेषास्वपि पूर्ववत् वल्मीक
मृत्तिकां नद्यास्तूभयतटमृत्तिकां
गोविषाणमृदं चापि दन्तिमृदं च
निःक्षिपेत् तीर्थाम्भःपञ्चगव्येन
स्नाने मातुः पितुः शिशोः दिवा
जाता तु या कन्या निशिजाता तु
यः पुमान् नोभयोर्गण्डदोषः ॥
स्यात् नाचलो हन्ति पर्वतं इति
ज्योतिषतत्त्वे ॥
गण्डकः पुं खड्गी गैंडा इति भाषा
इत्यमरः । संख्याप्रभेदः गण्डा ।
इति भाषा विद्याविशेषः ॥
अवच्छेदः अन्तरायः इति
मेदिनी ॥
गण्डकारी स्त्री खदिरीवृक्षः इति
शब्दचन्द्रिका वराहक्रान्ता इति
रत्नमाला ॥
गण्डकाली स्त्री खदिरी वृक्षः
इत्यमरः ॥
गण्डकी स्त्री स्वनामख्याता नदी
इति मेदिनी गण्डक्याश्चैक ॥
देशे च शालग्रामस्थले स्मृते
पाषाणे तद्भवे यत्तत् शालग्राम
मिति स्मृतं इति स्मृतिः ॥
गण्डकुसुमे क्ली हस्तिमदः तत्
पर्य्यायः उत्कटः २ इति ।
हारावली ॥
गण्डकूपः पुं पर्वतस्योर्द्ध्वस्थाने
इति हारावली ॥
गण्डगात्रे क्ली फलविशेषः ॥
आता इति भाषा इति
शब्दचन्द्रिका ॥
गण्डदूर्वा स्त्री दूर्वाविशेषः ॥
गाँटियादूर्वा इति भाषा तत्
पर्य्यायः गण्डाली २ अतितीव्रा ३
मत्स्याक्षी ४ वारुणी ५ मीननेत्रा
६ सूपामग्रन्थिः ७ ग्रन्थिला ८
ग्रन्थिपर्णी ९ सूचीपत्रा १०
सूपामकाण्डा ११ जलस्था १२
शकुलाक्षी १३ कलाया १४ खविद्रा
१५ अस्या गुणाः मधुरत्वं वात
पित्तज्वरभ्रमतृष्णाश्रमदाहदोष
नाशित्वं शिशिरत्वं च इति ।

राजनिर्घण्टः ॥
गण्डमाला स्त्री रोगविशेषः ॥
तस्य संप्राप्तिरूपे यथा कर्कन्धु
कोलामलकप्रमाणैः कक्षांस
मन्यागलवंक्षणेषु मेदःकफा
भ्यां चिरमन्दपाकैः स्याद्गण्डमाला
बहुभिश्च गण्डैः इति माधवकरः
तत्पर्य्यायः गलगण्डः २ इति
हेमचन्द्रः ॥
गण्डमालिका स्त्री लज्जालुवृक्षः
इति रत्नमाला ॥ पलः
गण्डशैलः पुं गिरेश्च्युतः स्थूलो
भूकम्पादिना पर्वतात् गलितो
महान् प्रस्तरः इत्यमरः ललाटे
इति हेमचन्द्रः ॥ का
गण्डाङ्गः पुं खड्गी इति शब्दचन्द्रि
गण्डारिः पुं कोविदारवृक्षः इति
भावप्रकाशः ॥
गण्डाली स्त्री श्वेतदूर्वा इत्यमरः
सर्पाक्षी इति भावप्रकाशः
गण्डदूर्वा इति राजनिर्घण्टः ॥
गण्डिः पुं वृक्षस्य मूलाच्छाखाव
धिभागः गुंडि इति भाषा इति
हेमचन्द्रः ॥
गण्डीरः पुं समष्ठिला शाका ॥
इति ख्यातः समर्थ इति ख्यातः
अनूपदेशजे शाके इति केचित्
गुंदिया इति ख्यात शाके इति
सर्वानन्दः इत्यमरः टीकायां
भरतः वीरः इति जटाधरः ॥
गण्डीरी स्त्री सेहुण्डवृक्षः सिज
इति भाषा इति राजनिर्घण्टः
गण्डुः पुं स्त्री उपधाने इति
जटाधरः ॥
गण्डूपदः पुं किञ्चुलकः इत्यमरः
गण्डूपदभवे क्ली सीसके इति
हेमचन्द्रः ॥
गण्डूपदी स्त्री किञ्चुलकपत्नी
तत्पर्य्यायः शिली २ इत्यमरः
सिली ३ क्षुद्रकिञ्चुलकजातिः
छोट जाति केंडुया इति भाषा
इत्यमरटीकायां भरतः ॥
गण्डूषः पुं मुखपूरणे हस्ति
शुण्डाग्रभागः प्रसृति परिमिते
इति मेदिनी ॥
गण्डूषा स्त्री गण्डूषः इति लिङ्गादि
संग्रहे अमरः मुखपूर्णं तोय
मिति भरती रायमुकुटस्तु गण्डूषा
शब्दो मुखपूरणे स्त्रीलिङ्गः पुं
लिङ्गस्तु गण्डूषशब्दः चुलुकपरिमाणं
इति यथा अपो द्वादश गण्डूषै
मुखशुद्धिर्विधीयते इति तट्टीका
सारसुन्दरी ॥
गण्डोलः पुं गुडः ग्रासः इति



हेम चंद्रः ॥
गणे त्रि गणनीये गणित तथ्ये
तत्पर्य्यायः गणेय २ संख्येये।
इति हेमचंद्रः ॥
गते त्रि विज्ञाते याते ॥ ॥
इति मेदिनी गमनी स्त्री ॥
गतनासिकः त्रि नासिकारहितः
तत्पर्य्यायः विग्रः २ इत्यमरः ॥
गतसत्वकः पुं निर्मद हस्ती इति
शब्दचंद्रिका ॥
गतागतं स्त्री पत्तिगतिविशेषः
इतिजटाधरः याता याते ॥
यथा गतागत कुतूहलं नयनयो
रपांगावधि इति रसमंजरी ॥
गतार्त्तवा स्त्री हद्धा वंध्या।
इतिराजनि र्घंटः ॥
गतिः स्त्री मार्गः दशा ज्ञाने।
यात्रा अभ्युपायः नाडीव्रणे।
सरणी इति मेदिनी ॥
गतिला स्त्री नदीविशेषः ॥
पंरपराभेदः इत्युणादिकोषः ॥
गत्वरः त्रिगमनशीलः इति
व्याकरणे ॥
गदतक अभ्यर्थमो इति
कविकल्पद्रुमः ॥
गदभाषि इतिकविकल्पद्रुमः
गदे स्त्री विषे इतिराजनिर्घंटः

गदः पुं रोगः श्रीकृष्णभ्राता।
इति हेमचंद्रः भाषणे ॥
गदयित्नुः पुं कंदर्पः इति
मेदिनी ॥
गदयित्नुः त्रि जल्पाकःकामुकः
इति मेदिनी ॥ (स्त्र
गदा स्त्री स्वनामख्यातलोहमया
इति मेदिनी पाटलाहस्तः ॥
इति शब्दचंद्रिका ॥
गदाख्ये स्त्री कुष्टे कुड इति।
भाषा इति रत्नमाला ॥
गदागदौ पुं अश्विनीकुमारौ
इति त्रिकांड शेषः। द्विवचनांतो
ऽयं शब्दः ॥
गदाग्रजः पुं श्रीकृष्णः इति
त्रिकांड शेषः ॥
गदा ग्रणीः पुं क्षयरोगः इति
राजनिर्घंटः ॥
गदाधरः पुं विष्णु इतिहलायुधः
गदाभृत् पुं विष्णुः इति ॥
हेमचंद्रः ॥
गदाम्बरः पुं मेघः इति ॥
त्रिकांडशेषः ॥
गदारातिः पुं औषधं इति ॥
राजनिर्घंटः ॥
गदाह्वं स्त्री कुष्टेकुड इतिभाषा
इति शब्दरत्ना वली ॥

गदी पुं विष्णुः इतिहारावली
गदाविशिष्टे रोगयुक्तेच त्रि
गद्गदः पुं लग्नपदव्यंजनाभिधा
यी अत्यपस्पष्टवक्ता तस्यसंशात्ति
पूर्वक लक्षणे यथा आहूत्य
बाष्पः सकफो घननीःशब्दवाहिनीः
नरान् करोत्य ऽक्रियकान् मूक
मिन्मिनगद्गदान् इतिमाधवकरः
गद्गदध्वनिः पुं हर्षशोकादिना
अस्पष्टध्वनिः तत्पर्य्यायः ॥
मन्मनः २ इति त्रिकांडशेषः।
गद्ये स्त्री पद्यभिन्नेकविकृते।
अपादः पदसंतानः इत्यमरः ॥
कविकृतभिन्ने त्रियथा गद्यो।
व्यवहारः गद्यावाक् गद्यंवचः
इति तट्टीकायां भरतः अपादः
पदसंतानो गद्य माख्यायिका ॥
कथा इति देशी आख्यायिकातु।
आचष्टे प्रति पादयति अत्यर्थं।
आख्यायिका अत्रनायकेनस्वपत्तु
पलब्धोऽर्थआख्यायते इत्येके ॥
ज्ञातायां सत्यार्थायां कथायां।
माख्यायिका साचमाधविका।
वासवदत्ता हर्षचरितादिः ॥
कथातु प्रबंधस्य कल्पना रचना
बहुन्नतालोक सत्पाकथाप्रबंध
कल्पनां लोक सत्या शास्त्राः ॥

कथांविडः परे पराश्रया ॥
यस्मात् सामनाख्यायिकाक्वचित्
इतिकोलाहलाचार्य्यः कथा
कादंवर्य्यादिः इत्यमरटीकायां
भरतः ॥ (रत्निका
गद्यानकं स्त्री अष्टचत्वारिंशत्
परिमाणे इति लीलावती ॥
चतुःषष्टि गुंजा परिमाणे इति
वैद्यकं गद्यालक मिति ॥
कुत्रचित्पाठः ॥
गंतात्रि गमनकर्त्ता इति ॥
व्याकरणे ॥
गंतुः पुं पथिकः इत्युणादिकोषः
गंत्री स्त्री हृषवहनीयशकटं गल्ल
गाडि इति भाषा इत्यमरः ॥
गंत्रीरथ्यः पुं शकटे तत्पर्य्यायः
मठः २ इति हारावली ॥
गंध क उ. दुहि हिंसायामिति
यावत् इति कविकल्पद्रुमःगत्यो
याचने इति रमानाथः ॥
गंधे स्त्री कृष्णा गुरु इति ॥
राजनिर्घंटः ॥
गंधः पुं आमोदः इति ॥(गुणः
विम्बः समुत्पन्न घ्राण ग्राह्यपृथिवी
यथा घ्राण ग्राह्यो भवेद्गंधो ॥
घ्राणस्यैवोपकारकः सौरभंचा
सौरभंच तद्द्वेधा परिकीर्तिते ॥



इति भाषापरिच्छेदः सतु ॥
दशविधः यथा इष्टः १
कस्तूरिकादौ अनिष्टः २ शवादौ।
मधुरः ३ मधुपुष्पादौ कटुः ४।
मरिचादौ निर्हारी ५ हिंग्वादौ॥
संहतः ६ चित्रगंधः अनेक॥
कल्कगतः स्निग्धः ७ सघृतसंहृ
तादौ रूक्षः ८ सार्षपतैलादौ विसदः ९
शाल्यन्नादौ इति भारते मोक्ष ॥
धर्मः अम्लः १० आम्रातकादौ
इत्याश्वमेधिकपर्व ॥
प्रतिवेशी लेशः संबंधः ॥
गंधकः इति मेदिनी गर्वः ॥
इति हेमचंद्रः शोभांजनः ॥
इति शब्दरत्नावली हृष्टचंदने
यथा हृष्टो मलयजो गंधः इति
स्मृतितत्त्वं ॥
गंधकः पुं शोभांजनवृक्षः इति
शब्दरत्नावली उपधातुविशेषः
तत्पर्यायः गंधाश्मा २ ॥
सौगंधिकः ३ इत्यमरः ॥
गंधिकः ४ सुगंधिकः ५ इति।
तट्टीका गंधपाषाणः ६ पामाघ्नः
७ इति रत्नमाला गंधमोदनः।
८ पूतिगंधः ९ दिव्यगंधः १० वरः ११
सुगंधः १२ दिव्यगंधः १३ गंधः १४।
रसगंधकः १५ कुष्ठारिः १६ ॥

क्रूरगंधः १७ कीटघ्नः १८ शरभूमिजः
१९ अस्य गुणाः कटुत्वं उष्णत्वं।
तीव्रगंधत्वं अतिवह्निकारित्वं।
विषकुष्ठ कंडूति खर्ज्जुत्वग्दोष
नाशित्वंच इति राजनिर्घंटः ॥
कृमि प्लीह नेत्ररोग नाशित्वं ॥
इति राजवल्लभः ॥ तस्य ॥
भेदाः श्वेतो रक्तश्च पीतश्च ॥
नीलश्चेति चतुर्विधः गंधको
वर्णतो ज्ञेयो भिन्न भिन्नगुणाश्रयः
श्वेतः कुष्ठापहारी स्याद्रक्तो लोह
प्रयोगकृत् पीतो रसप्रयोगार्हो
नीलो वर्णान्तरोचितः इति
राजनिर्घंटः अस्योत्पत्तिर्यथा।
श्वेतद्वीपे पुरादेव्याः क्रीडन्त्या
रजसा प्लुतं दुकूलं तेन वस्त्रेण
स्नातायाः क्षीरनीरधौ प्रसृतं
यद्रजस्तस्माद्गंधकः समजायत
अशोधितो गंधकः खेडकुष्ठे
करोति तापं विषमे शरीरे ॥
सौख्यंच रूपंच बलं तथौजः
शुक्रं निहंत्येव करोति चास्रं ॥
इति भावप्रकाशः ॥
शोधितो वल्लगंधः स्यात् जरा
मृत्युरुजापहः अग्निसंदीपनः
श्रेष्ठो वीर्य्यवृद्धिकरोऽस्थिकृत्।
इति प्रयोगामृतं ॥

गंधकंदकः पुं कशेरु इति॥
वैद्यके ॥
गंधकारिका स्त्री सैरिंध्री स्यात्
परवेश्मस्था स्ववशा शिल्पकारि
का इति हेमचंद्रः ॥
गंधकालिका स्त्री व्यासमाता।
इति हेमचंद्रः ॥
गंधकाली स्त्री व्यासमाता इति
शब्दरत्नावली ॥
गंधकाष्ठं क्ली अगुरुकाष्ठं इति
त्रिकांडशेषः शवरचंदने ॥
इति राजनिर्घंटः ॥
गंधकुटी स्त्री मुरानामगंधद्रव्यं
इत्यमरः ॥ (इति
गंधकुसुमा स्त्री गणिकारीवृक्षः
राजनिर्घंटः ॥
गंधकेलिका स्त्री कस्तूरी इति
राजनिर्घंटः ॥
गंधकोकिला स्त्री गंधद्रव्यविशेषः
अस्या गुणाः स्निग्धत्वं उष्णत्वं ॥
कफनाशित्वं तिक्तत्वं सुगंधित्वं
इति भावप्रकाशः ॥
गंधखंडं क्ली गंधवीरणगंधवे
इति भाषा तत्पर्यायः भूतृणं।
२ रोहिषं ३ गोमयप्रियं ४ इति
रत्नमाला ॥
गंधखेडकं क्ली गंधतृणं इति।

शब्दरत्नावली ॥
गंधचेलिका स्त्री कस्तूरी इति
त्रिकांडशेषः ॥
गंधजातं क्ली तेजपत्रं इति ॥
शब्दरत्नावली ॥
गंधज्ञा स्त्री नासिका इति ॥
हेमचंद्रः ॥
गंधतूर्य्यं क्ली वाद्यविशेषः तत्
पर्य्यायः रणतूर्य्यं २ महास्वनः ३
इति शब्दरत्नावली ॥
गंधतृणं क्ली सुगंधतृणं तत्
पर्य्यायः सुगंधभूतृणं २ सुरसः ३
सुरभिः ४ सुगंधिः ५ मुखवासः ६
अस्य गुणाः सुगंधित्वं ईषत्तिक्तत्वं
रसायनत्वं स्निग्धत्वं मधुरत्वं
शीतलत्वं कफपित्तश्रम।
नाशित्वंच इति राजनिर्घंटः ॥
गंधत्वक क्ली एलवालुके इति
राजनिर्घंटः ॥
गंधदला स्त्री अजमोदा इति
राजनिर्घंटः ॥
गंधधूमजः पुं स्वादुनामगंधद्रव्ये
इति राजनिर्घंटः ॥ चंद्रः
गंधधूलिः स्त्री कस्तूरी इति हेम
गंधनं क्ली उत्साहः प्रकाशनं
सूचनं हिंसा इति मेदिनी ॥
गंधनकुलः पुं छुछुंरी छुक्के



इति भाषा इति हारावली।
गन्धनाकुली स्त्री रास्ना इत्यमरः
कंदविशेषः तत्पर्य्यायः॥
महागन्धा १ सुवहा २ सर्पाक्षी ३
४ फणिहृत्री ५ नकुलाढ्या ६
अहिवल्क ७ विषमर्द्दनिका ८
अहिमर्द्दिनी ९ विषमर्द्दनी १०
महाहिगन्धा ११ अहिलता १२
अस्या गुणाः तिक्तत्वे कटुत्वे ॥
उष्णत्वे त्रिदोषानेकविषनाशि
त्वेनाकुल्याः किंचित् अल्पत्वं इति
राजनिर्घण्टः ॥
गन्धनामा पुं रक्ततुलसी इति
रत्नमाला ॥
गन्धनाली स्त्री नासिका इति
त्रिकाण्डशेषः ॥
गन्धनिलया स्त्री नवमल्लिका।
इति शब्दचन्द्रिका ॥
गन्धनिपुणा स्त्री गन्धपत्रा इति
राजनिर्घण्टः ॥
गन्धपत्रः पुं श्वेततुलसी इति
रत्नमाला मरुवः बर्बरः ॥
नारंगः बिल्वः इति राजनिर्घण्टः
गन्धपत्रा स्त्री शटी भेदः पलाश
इति माल्वदेशप्रसिद्धा तत्पर्य्यायः
स्थूला १ तिक्तकंदिका २ वनजा ३
४ शाटिका ५ वन्या ६ तवक्षीरी।
एकपत्रिका ८ गन्धपीता ९
पलाशिता १० गन्धाढ्या ११
गन्धपत्रिका १२ दीर्घपत्रा १३
गन्धनिपुणा १४ वेदसाख्या १५
सुपाकिनी १६ अस्या गुणाः कटुत्वे
स्वादुत्वे तीक्ष्णत्वे उष्णत्वे कफ
वातकासकर्द्दिज्वरनाशित्वे
पित्तकोपकारित्वे च इति ॥
राजनिर्घण्टः ॥
गन्धपत्रिका स्त्री गन्धपत्रा ॥
अजमोदा इति राजनिर्घण्टः ॥
गन्धपत्री स्त्री अश्वगन्धा अम्बगन्धा
अजमोदा इति राजनिर्घण्टः ॥
गन्धपलाशिका स्त्री हरिद्रा इति
हारावली ॥
गन्धपलाशी स्त्री शटी इति ॥
भावप्रकाशः ॥
गन्धपाषाणः पुं गन्धकः इति
जटाधरः ॥
गन्धपिशाचिका स्त्री धूपः इति
हेमचन्द्रः ॥
गन्धपीता स्त्री गन्धपत्रा इति ॥
राजनिर्घण्टः ॥
गन्धपुष्पः वेतसवृक्षः इति
शब्दरत्नावली अंकोटवृक्षः ॥
इति जटाधरः बहुवारवृक्षः ॥
इति राजनिर्घण्टः ॥

गन्धपुष्पा स्त्री नीली केतकी
गणिकारी इति राजनिर्घण्टः।
गन्धफणिज्जकः पुं रक्ततुलसी
इति रत्नमाला ॥
गन्धफलः पुं कपित्थः बिल्वः
तेजः फलवृक्षः इति राजनिर्घण्टः
गन्धफला स्त्री प्रियंगुवृक्षः इति
शब्दरत्नावली मेथिका विदारी
शल्लकी इति राजनिर्घण्टः
गन्धफली स्त्री चंपककलिका
प्रियंगुवृक्षः इत्यमरः ॥
गन्धवेणुः पुं आम्रवृक्षः इति
शब्दरत्नावली ॥
गन्धभद्रा स्त्री लता विशेषः ॥
गन्धभादालिया इति भाषा इति
शब्दचन्द्रिका ॥
गन्धभांडः पुं गर्द्दभांड वृक्षः ॥
इति शब्दरत्नावली ॥
गन्धमांसी स्त्री जटामांसी भेदः
तत्पर्य्यायः केशी १ भूतजटा ३
पिशाची ४ पूतना ५ भूतकेशी ६
लोमशा ७ जटाला ८ लघुमांसी
९ अस्या गुणाः तिक्तत्वे शीतत्वे
कफकंठामय रक्तपित्त विष
भूतज्वर नाशित्वे वर्ण्यत्वे च इति
राजनिर्घण्टः ॥
गन्धमाता स्त्री पृथिवी इति।
हेमचन्द्रः ॥
गन्धमादनं क्ली पुं पर्वतविशेषः
इत्यमरः अयं इलावृत भद्राश्व
वर्षयोः सीमा पर्वतः अस्य
विस्तारः नीलनिषधपर्वतपर्य्यन्तः
इति श्री भागवते ॥
गन्धमादनः पुं भ्रमरः वानर
विशेषः गन्धकः इति मेदिनी
गन्धमादनी स्त्री मदिरा इति
त्रिकाण्डशेषः वेदाकः चीडा
नामगन्धद्रव्ये इति राजनिर्घण्टः
गन्धमादिनी स्त्री लाक्षा मुरानाम
गन्धद्रव्ये इति राजनिर्घण्टः ॥
गन्धमार्जारः पुं खट्टासः इति
जटाधरः ॥
गन्धमालती स्त्री गन्धद्रव्यविशेषः
सा तु गुणैः गन्धकोकिला तुल्या
इति भाव प्रकाशः ॥
गन्धमालि स्त्री मुरानामगन्धद्रव्ये
इति जटाधरः ॥
गन्धमुण्डः पुं लताविशेषः ॥
गन्धभादालिया इति भाषा तत्
पर्य्यायः नेदी वृक्षः २ ताम्रपाकी
३ फलपाकी ४ पीतकः ५ गर्द्दभांडः
६ क्षिप्रपाकी ७ इति वैद्यके
गन्धमूलः पुं कुलंजनवृक्षः इति
राजनिर्घण्टः ॥

गंधमूलकः पुं शटी इति। शब्दरत्नावली॥
गंधमूला स्त्री शल्लकी शटी। इति राजनिर्घंटः॥
गंधमूलिका स्त्री माकेंदी शटी इति राजनिर्घंटः॥
गंधमूली स्त्री शटी इत्यमरः।
गंधमूषिकः पुं स्त्री कुकुंदरी इति त्रिकांडशेषः॥
गंधमूषी स्त्री कुकुंदरी इति। हेमचंद्रः॥
गंधमृगः पुं खट्टाशः इति शब्दमाला॥
गंधमैथुनः पुं वृषः इति। जटाधरः॥
गंधमोहनः पुं गंधकः इति। राजनिर्घंटः॥
गंधमोहिनी स्त्री चंपककली इतिजटाधरः॥
गंधरसः पुं उपधातुविशेषः
गंधरसः पुं उपधातुविशेषः फलसत्व इतिख्यातः तत्पर्यायः बोलः २ प्राणः ३ पिंडः ४ गोपः ५ रसः ६ इत्यमरः रसगंधः॥ गोरसः ८ पिंडगोरसः ९ प्राणः १० गोरसप्राणः ११ इतितट्टीका॥ गंधारं १२ मलिवर्द्धनं १३ इति। त्रिकांडशेषः॥
गंधरसांगकः पुं श्रीवेष्टनाम सुगंधिद्रव्यं इतिराजनिर्घंटः
गंधराजं क्ली चंदनं जवादिनाम गंधद्रव्यं इति राजनिर्घंटः॥ स्वनामख्यात शुक्लवर्ण पुष्पंच
गंधराजः पुं मुद्गर वृक्षः॥ कणगुग्गुलः इतिराजनिर्घंटः
गंधराजी स्त्री नखीनामगंधद्रव्यं इति शब्द चंद्रिका॥
गंधर्वः पुं स्वर्ग गायकः सवदेव योनिः तत्पर्यायः गातुः २ दिव्यगायनः ३ तद्भेदा यथाहाहा हूहू श्चित्ररथो हंसो विश्वावसु स्तथा गोमायु स्तंबुरु नंदि। रेव मायाश्च ते स्मृताः इति जटाधरः गुह्यकलोकोपरि विद्याधरलोकस्याधो गंधर्वलोकः यथा ततो विलोकयामास लोकं लोच शार्म्मदं शिव। लोकंलोचन शार्म्मदं शिव शार्म्मीततः प्राह तत्र लोविश्व पार्षदो के हमी जनलमोलोकः किन्नाम वदतोगणो गणवृन्दः गांधर्वस्त्वेषलोकाऽमीगंधर्वाश्च सुभव्रताः देवानां गायनाह्येते चारणाः स्तुति पाठकाः पीतज्ञा स्रति गीतेन तोषयंति॥ नराधिपान् स्तवंतिच धनाध्याश्च धनलोभन मोहिताः राज्ञो॥ प्रसादम लघ्वानि सुवासांधनानि व इव्याण्यपि सुगंधीनि कर्पूरादी न्यनेकशः ब्राह्मणेभ्यः प्रयच्छंति गीतं गायंन्य हर्निशं स्तुतावेव। मन स्तेषां नाध्यशास्त्र कृतश्रमाः तेन पुण्येन गांधर्वी लोकस्त्वेषां विधीयते ब्राह्मणास्तोषिताये हि गीतविद्यार्जिते धनैः गीत विद्याप्रभावेन देवर्षिर्नारदो। महान् मान्यो वैसर्वलोकेषे श्रीशंभोश्चाति वल्लभः तेंवुरु। नारदश्चोभौ देवाना मपि॥ दुर्लभौ नादरूपी शिवःसाक्षात् नाद तत्व विदोहितो वदिगीते कचिद्धीनं श्रीमद्धरि हरात्मके मोहंते तत्फलं प्राहुः सान्निध्य मथवातयोः गीतज्ञो यदि। गीतेन नाप्नोति परमं पदं। रुद्रस्यानुचरो भूत्वा ते नैव॥ सहमोदते श्चास्मिल्लोके सदा॥ काले स्तुतिरेषा प्रगीयते॥ तद्गीतमालया पूज्यो देवोहरि हरो सदा इति भृण्वन्त्वतणात श्राप पुनरन्ये मनोहरं शिव। शर्म्मीघ्य यथक्क किं मेतं नगरं विहं इति काशीखंडे॥

घोटकः पशुजाति विशेषः सत्तुकस्तूरीमृगः श्वेतराभवसत्वः इत्यमरः श्वेतराभवसत्वस्तु॥ जन्ममरणयो र्मध्ये भवःप्राणी यो मृतो नैवकायांतरं प्राप्तः॥ नापिजन्म समरण जन्मनोरंतरा भवत्वादंतरा भवसत्वः सचयातना शरीरः इत्येक इति मुकुटः॥ गुमप्राणीति केचित् यथागंधर्वाः पतयोमम इति विराटे इति॥ रमानाथः इत्यमरः टीकायां भरतः पुंस्कोकिलः॥ गायनमात्रे इतिमेदिनी॥
गंधर्ववेदः पुं संगीतविद्या॥ यथा ऋग्वेदस्यायुर्वेदोपवेदो यजुर्वेदस्य धनुर्वेदोपवेदः॥ सामवेदस्य गंधर्ववेदोपवेदो ऽथर्व वेदस्य शास्त्रशस्त्राणीति इति शौनकोक्त चरणव्यूहः
गंधर्वहस्तः पुं एरंडवृक्षः इति हारावली॥
गंधर्वहस्तकः पुं एरंडवृक्षः॥ इत्यमरः॥
गंधलोलुपा स्त्री मक्षिका इति शब्दरत्नावली॥
गंधवणिक् पुं गांधिकः॥ सचवर्ण संकरजातिविशेषः



गंधवेणया इति भाषा तत्र
श्रेवष्टात राजपुत्रोज्जातःतस्य
कर्मलिखने गंधदानेच इति
पराशर भाष्ये ॥ (री
गंधवती स्त्री पृथिवीवरुणपु
व्यासमाता सुरा इति ॥
मेदिनी वनमल्लिका ॥
रत्नमाला मुरानाम गंधद्रव्ये
इति जटाधरः ॥ (म
गंधवधूः स्त्री शटी चीडाना
गंधद्रव्ये इति राजनिर्घंटः।
गंधवल्कलं क्ली त्वचे दारचि
नी इतिभाषा इतिराजनिर्घंटः
गंधवल्लरी स्त्री सहदेवी इति
राज निर्घंटः ॥ (ल्लः
गंधवल्ली स्त्री पीतपुष्पदंडोत्प
डानियोला इति भाषा तत्
पर्यायः गोवंदनी २ सहदेवी
महा ४ इति रत्नमाला ॥
गंधवहः पुं वायुः इत्यमरः।
गंध युक्ते त्रि ॥
गंधवहुल पुं सितार्जकः इति
राजनिर्घंटः ॥
गंधवहा स्त्री नासिका इत्यमरः
गंधवहुला स्त्री गोरक्षीवृक्षः
इति राज निर्घंटः गंधवाहः
पुं वायुः इत्यमरः ॥

मृगविशेषः सतु कस्तूरीमृगः
इति हेमचंद्रः ॥
गंधवाहा स्त्री नासिका इति
हेमचंद्रः ॥
गंधविह्वलः पुं गोधूमः इति
शब्दचंद्रिका ॥
गंधवीजा स्त्री मेथिका इति
राजनिर्घंटः ॥ (ति
गंधवृक्षकः पुं सालवृक्षः इ
राजनिर्घंटः ॥ (इति
गंधव्याकुलं क्ली कक्कोलं
शब्दचंद्रिका ॥
गंधशटी स्त्री शटी इति ॥
शब्दरत्नावली ॥
गंधशाकं क्ली गौरसुवर्णशाके
इति राज निर्घंटः ॥
गंधशालिः पुं शालिधान्यविशेषः
तत्पर्यायः कल्माषः २ गंधालुः ३
कलः मानमः ४ सुगंधिः ५
गंधवहुलः ६ सुरभिः ७ गंधतंडुलः
८ सुगंधिशालिः ९ अस्यगुणाः
मधुरत्वं अतिहृद्यत्वं पित्तश्रम
स्वादुविदाह शांतिकारित्वंस्तस्य
गर्भस्थिरता ऽल्पवायुपुष्टा ऽल्पकफ
वलप्रदत्वंच इति राजनिर्घंटः
गंधशुंडिनी स्त्री छुछुंदरी इति
राजनिर्घंटः क्वचित्पुस्तके गंधा

शुंडिनी इति नाम दृश्यं।
गंधशेखरः पुं कस्तूरी इति
हारावली ॥
गंधसारः पुं चंदनवृक्षः इत्यमरः
मुद्गरवृक्षः इति राजनिर्घंटः
गंधसारणः पुं वृहत्त्वची इति
रत्नमाला ॥
गंधसोमं क्ली कुमुदं इति
त्रिकांडशेषः ॥
गंधहारिका स्त्री परगृहगता
कर्मकारिणी शिल्पिनी इति
शब्दमाला गंधहरणकर्त्रीच ॥
गंधा स्त्री चंपककलिका इति
शब्दरत्नावली शटी इति
राजनिर्घंटः शालपर्णी इत्यमर
टीकायां भरतः ॥
गंधाखुः पुं छुछुंदरी इति
हारावली ॥
गंधाजीवः पुं गंधवणिक् इति
जटाधरः ॥
गंधाढ्यं क्ली जवादिनामगंधद्रव्य
चंदने इति राजनिर्घंटः ॥
गंधयुक्ते त्रि ॥
गंधाढ्यः पुं नारंगवृक्षः इति
राजनिर्घंटः ॥
गंधाढ्या स्त्री गंधपत्रा स्वर्णयूथी
तरुणी आराम शीतला इति

राजनिर्घंटः गंधाली इति
शब्दचंद्रिका ॥
गंधाधिकं क्ली तृणकुंकुमे
राजनिर्घंटः ॥
गंधाम्ला स्त्री वनवीजपूरकः इति
राजनिर्घंटः ॥
गंधाला स्त्री वृक्षविशेषः जियती
तिष्पाता इति शब्दचंद्रिका
गंधाली स्त्री लताविशेषः
गंधाली गंधभादाली इतिव
भाषा तत्पर्यायः प्रसारणी २
भद्रपर्णी ३ कटंभरा ४ इति
रत्नमाला गंधाढ्या ५ इति
शब्दचंद्रिका सरणा ६ राजवला
७ भद्रवला ८ इत्यमरः ॥
राजनिर्घंटोक्त गुण पर्यायौ
प्रसारणी शब्दे द्रष्टव्यौ ॥
गंधालीगर्भः पुं सूक्ष्मैला इति
राजनिर्घंटः ॥
न
गंधाश्म पुं गंधकः इत्यमरः
गंधाष्टकं क्ली पंचदेवतादेष्ट॥
प्रकारगंध द्रव्यं यथाचंदनागुरु
कर्पूर चोर कुंकुम रोचनाः
जटामांसीकपियुताशक्तेर्गंधाष्टकं
विष्णोः चंदनागुरु ह्रीवेर ॥
कुष्ठ कुंकुम सेव्यकाः जटामांसी



सुरभिमिति विमोर्गंधाष्टकंविदुः
चंदनागुरु कर्पूरं तमाल
जल कुंकुमं कुशीदं कुष्टसंयुक्तं
शैवं गंधाष्टकं शुभे ॥
स्वरूपंचंदनं चोरं रोचना।
गुरुमेवच मदंमृगद्वयोद्भूतं
कस्तूरी चंद्रसंयुतं गंधाष्टकं
विनिर्दिष्टं गणेशस्य महेश्वितुः
इति शारदा तिलकं ॥
अपिच चंदनागुरुकर्पूरोशवना
कुंकुमं मदं रक्तचंदनं ह्रीवेरं
गाणपत्य मुदाहृतं जल
काश्मीर कुष्टं स्तुरक्तचंदनचंदनैः
उशीरागुरु कर्पूरैः सौरं ॥
गंधाष्टकंविदुः इति मेरुतंत्रे
गंधि स्त्री त्वणकुंकुमे इति
राजनिर्घंटः ॥ (द्रः
गंधिकः पुं गंधकः इति हेमचं
गंधिनी स्त्री सुरा इत्यमरः।
गंधिपूर्णः पुं सप्तच्छदवृक्षः
इति राजनिर्घंटः ॥
गंधोत्तुः पुं खट्वाशः इति
त्रिकांडशेषः ॥
गंधोत्कटा स्त्री दमनकवृक्षः
इति राजनिर्घंटः ॥
गंधोत्तमा स्त्री मदिरा इत्यमरः
गंधोलिः स्त्री पाटी इति

शब्दरत्नावली ॥
गंधाली स्त्री वरटा इत्यमरः ॥
भद्रा पाटी इति मेदिनी ॥
गभस्तिः पुं किरणः सूर्य्यः ॥
इति मेदिनी ॥
गभस्तिः स्त्री स्वाहा इति मेदिनी
गभस्तिमत् क्ली सप्तपातालांतर्गत
पाताल विशेषः तत् तल्लातले
इति शब्दरत्नावली ॥
गभस्तिमान् पुं सूर्य्यः इति
शब्दरत्नावली ॥
गभस्तिहस्तः पुं सूर्य्यः इति
त्रिकांडशेषः ॥
गभीरः त्रि नीचस्थाने तत्
पर्य्यायः निम्नं २ गंभीरं ३
इत्यमरः अगाधे गहने ॥
इत्युणादिकोषः
गभीरिका स्त्री हस्तढक्का इति
शब्दरत्नावली ॥
गभोलिकः पुं मसूरः इति ॥
हारावली ॥ द्रुमः
गम ॥ डौ गतौ इति कविकल्प
गमः पुं जिगीषोर्गमने इत्यमरः
अक्षविवर्त्तः तत्र द्यूतप्रभेदः
अपर्य्यालोचितं अध्वा इति ॥
मेदिनी सहकपादः इति ॥
हेमचंद्रः गमने च ॥

गमकारित्वं क्ली रभसः इति
त्रिकांड शेषः ॥
गमथः पुं पंथा पथिके त्रि
इत्युणादिकोषः ॥ (ख
गमनं क्ली जिगीषोः प्रयाणे
इति पारस्य भाषा तत्पर्य्यायः
यात्रा २ व्रज्या ३ अभिनिर्याणं ४
प्रस्थानं ५ गमः ६ इत्यमरः ॥
पादविहरणे तत्पंचविधं।
कर्मांतर्गत कर्मविशेषः तस्य
भेदाः यथा भ्रमणं १ रेचनं ॥
२ स्पंदनं ३ ऊर्द्धज्वलनं ४
तिर्य्यग् गमनं ५ इति भाषा ॥
परिच्छेदः ॥ (न.
गमीन त्रि गमनकर्त्ता इति सिद्धां
कौमुद्यां सुणादिवृत्तिः ॥
गंवगतौ इति कविकल्पद्रुमः।
गंभारिका स्त्री गंभारी वृक्षः ॥
इति राजवल्लभः ॥ (री
गंभारी स्त्री वृक्षविशेषः गामा
इति भाषा तत्पर्य्यायः ॥
सर्वताभद्रा २ काश्मीरी ३ ॥
मधुपर्णी ४ श्रीपर्णी ५ भद्रपर्णी
६ काश्मर्य्यः ७ इत्यमरः ॥
काश्मरी ८ इति तट्टीका भद्रा
९ गोपभद्रिका १० कुमुदा ११

सदाभद्रा १२ कटुफला १३
कृष्णवृंतिका १४ इति रत्नमाला
कृष्णवृंता १५ हीरा १६ सर्वतो
भद्रिका १७ स्निग्धपर्णी १८ सुभद्रा १९
१९ कंभारी २० गोपभद्रा २१
विदारिणी २२ क्षीरिणी २३
महाभद्रा २४ मधूपर्णी २५
स्वरूभद्रा २६ कृष्णा २७ अश्वेता
२८ रोहिणी २९ गृष्टिः ३०
स्थूलत्वचा ३१ मधुमती ३२ सफला
३३ मेदिनी ३४ महाकुमुदा ३५
दृढत्वचा ३६ अस्या गुणाः ॥
कटुत्वं तिक्तत्वं गुरुत्वं उष्णत्वं ।
श्रमशोष त्रिदोषविष दाहार्त्ति
ज्वरतृष्णास्त्रदोष नाशित्वंच इति
राजनिर्घंटः पतत्फलगुणाः
तिक्तत्वं गुरुत्वं ग्राहित्वं ॥
मधुरत्वं केशहितत्वं रसायनत्वं
मेध्यत्वं शीतलत्वं दाह पित्त ॥
नाशित्वंच पतन्मूल गुणाः ॥
अन्तुस्तत्वं मानस व्याधौ अहित
कारित्वंच इति राजवल्लभः ॥
गंभीर त्रि गभीरं इत्यमरः ॥
गंभीरः पुं जंबीरः पंकजे ॥
जह्नु मंत्रः इत्युणादिकोषः ॥
गंभीरवेदी न पुं उद्दंड हस्ती ॥



तत्पर्य्यायः श्रेकृष्ण उद्देरः २ ॥
चालकः ३ आलकः ४ इति
त्रिकाण्डशेषः श्रवमतो कृशः ५ ॥
इति हेम चन्द्रः ॥
गम्ये त्रि प्राप्ये इत्यमरः ॥
गमन योग्ये च ॥
गयः पुं वानरभेदः स तु ।
वैवस्वत पुत्रः इति रामायणे ॥
राजर्षिभेदः स च अमूर्त्तरयसः पुत्रः ॥
इति श्रीभागवते असुरभेदः ॥
इति वामन पुराणे ॥
गया स्त्री गयराजर्षि पुरी इति
हेमचन्द्रः सा तु तीर्थभेदः तस्या ।
नामकारणं यथा यज्ञे चक्रे ॥
गयो राजा बहूत्रे बहुदक्षिणं ॥
यत्र द्रव्यसमूहानां संख्या कर्तुं ।
न शक्यते गये विस्मादय लक्ष्मा ।
वरं ब्रूहीति चाब्रुवन् गयस्तान् ।
प्रार्थयामास अभिशस्तास्तु येपुरा
ब्रह्मणा ते द्विजाः पूता भवन्तु ॥
क्रतुपूजिताः गयापुरीति नाम्ना ।
ख्याता ब्रह्मपुरी तथा एवमस्तु वरं
दत्वा तत्रैवान्तर्दधुः सुराः ॥
तस्मात् यति कारणं यथा
गयासुरोऽसुराणां च महाबल ॥
पराक्रमः योजनानां तथादेवं ॥
प्रातेनस्योच्छ्रयः स्मृतः स्थूलः ॥

षष्टिर्योजनानां श्रेष्ठोऽसौ
वैष्णवः स्मृतः कोलाहले
गिरिवरे तपस्तेपे सुदारुणं
बहुवर्ष सहस्राणि निरुच्छ्वासः
स्थिरोऽभवत् तत्तपस्तापिता
देवाः संक्षोभं परमं गताः ॥
ब्रह्मलोकं गता देवाः प्रोचुस्ते
ऽथ पितामहं गयासुराद्रक्ष ॥
देवब्रह्मा देवांस्तथाब्रवीत्
व्रजामः शङ्करं देवा ब्रह्माद्याश्च
गताः शिवं कैलासे चाब्रुवन्नता
रक्षरक्ष महासुरात् ब्रह्माद्यो
श्चाब्रवीच्छम्भुर्व्रजामः शरणं हरिं
क्षीराब्धौ देव देवेशः स नः
श्रेयो विधास्यति ब्रह्मा
महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः
किमर्थमागता देवा विष्णुनोक्ता
स्तमब्रुवन् गयासुर भयाद्देव
रक्षास्मानब्रवीद्धरिः ब्रह्माद्या
यान्तु तं दैत्यं वायमिष्यामहे ।
ततः ऊचुस्तं वासुदेवाद्याः ।
किमर्थं तप्यते त्वया संतुष्टाश्च
गताः सर्वे वरं ब्रूहि गयासुर ॥
यदि तुष्टास्थ मे देवा ब्रह्मविष्णु
महेश्वराः सर्वदेव द्विजातिभ्यो
यज्ञतीर्थशिलोच्चयात् मंत्रेभ्यो
देवदेवीभ्यो योगिभ्यश्चापि ॥

सर्वशः ज्ञातिभ्यो ऽतिपवित्रो
ऽहं पवित्रः स्यां सदा सुराः
पवित्रो भवतु देवा दैत्य मुक्ता
ययुर्दिवं दृष्ट्वा दैत्यं ततः स्पृष्ट्वा ।
सर्वे हरिपुरं ययुः शून्ये लोकत्रये
जाते शून्या यमपुरी ह्यभूत् यम
इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततो
ऽगमत् ब्रह्माणमूचुर्देवा गयासुर
विलोपिताः त्वयादत्तो याऽधिकार
स्तं गृहाण पितामह ब्रह्माब्रवीत्ततो
देवा व्रजामो विष्णुमभ्याये ब्रह्मादयो
ऽब्रुवन् विष्णु त्वया दत्तवरोऽसुरे
तद्दर्शनाद्ययुः स्वर्गं शून्ये लोकत्रये
ह्यभूत् देव हक्तो वासुदेवो
ब्रह्माणं सवचो ऽब्रवीत् गत्वासुरं
प्रार्थयस्व यज्ञार्थं देहि देहकं ।
विष्णूक्तः ससुरो ब्रह्मा गत्वापश्यत्
महासुरं ब्रह्मोवाच पृथिव्यां यानि
तीर्थानि दृष्टानि श्रुता मया
यज्ञार्थं न तु तेतानि पवित्राणि
शरीरतः अतः पवित्रः देहं स्वं ।
यज्ञार्थं देहि मे ऽसुर गयासुर ॥
उवाच धन्योऽहं देवदेवेश यद्देहः
प्रार्थ्यते त्वया त्वयैवोत्पादितो
देहः पवित्रश्च त्वया कृतः सर्वेषा
मुपकाराय योगो
ऽवश्यं भवत्विति

इत्युक्तासोऽपतद्भूमौ श्वेत कल्पे
गयासुरः नैर्ऋते दिशमाश्रित्य
तदा कोलाहले गिरौ शिरः ॥
कृत्वोत्तरे दैत्यः पादौ कृत्वा तु ।
दक्षिणे ब्रह्मा संभृत संभारो ॥
मानसानृत्विजो ऽसृजत् चलित
श्चकितो ब्रह्मा धर्मराजमभाषत
यास्ते गृहे तव शिला तामानाय त्वं
धारय दैत्यस्य शीघ्रं शिरसि तां
धारय ममाज्ञया निश्चलार्थं यमः
श्रुत्वा धारयन्मस्तके शिलां शिलायां
धारितायां तु सशिलश्चासुरोऽचलत्
देवान्वेऽथ रुद्रादीन् शिलायां
निश्चलाः किल तिष्ठन्तु देवाः
सकलास्तथेत्युक्ता चैते स्थिताः
देवाः पादैर्लङ्घयित्वा तथापि
चलितोऽसुरः ब्रह्माथ व्याकुलो
विष्णुं गतः क्षीराब्धिशायिनं ब्रजमूचे
हरिः कस्मादागतोऽसि वद सत्वरं
ब्रह्मोवाच देव देव कृते यागे ।
प्रचचाल गयासुरः इदानीं निश्चलार्थं
हि प्रसादं कुरु माधव ब्रह्मणो वचनं
श्रुत्वा स्वां कृष्णः स्वशरीरतः मूर्त्तिं ददौ
निश्चलार्थं ब्रह्मणे भगवान्हरिः
आनीय मूर्तिं ब्रह्मापि शिलायां
समधारयत् तथापि
चलिते तीर्थ ॥

पुनर्देवमिहाहूयत् आगत्य विष्णुः
तीराख्येः शिलायां संस्थितो ॥
ऽभवत् आद्यया गदया वासौ ॥
यस्माद्दैत्यः स्थिरीकृतः स्थित॥
ऽन्येव हरिणा तस्मादादिगदाधरः
ऊचे गयासुरो देवान् किमर्थं ॥
वंचितो ह्यहं यज्ञार्थं ब्रह्मणोदत्तं
शरीरममलं मयापि अद्य यद्यहं
देवाः प्रसन्नाः संतु सर्वदा वरं
ब्रुहि प्रसन्नाः स्मो देवानूचे गया
सुरः यावत् पृथ्वी पर्वताश्च याव
च्चंद्रार्कतारकाः तावच्छिलायां तिष्ठंतु
ब्रह्मविष्णुमहेश्वराः गदाधरस्वरूपेण
कान्पुयात्सर्वाघनाशनः श्राद्धं स
पिंडकं येषां ब्रह्मलोकं प्रयांतु ते
किंबहूक्त्या सुरेशानाः श्वपाकमपि
देवताः चेत्र तिष्ठंतु चापि
समयः प्रतिपाल्यतो त्वयाथत्
प्रार्थिते वीर तद्विष्यत्यसंशयं।
अस्मत्पादांकितायां शिलायां स्थितिय
मागतिं देवैर्दत्त वरो दैत्यो ॥
हर्षितो निश्चलो ऽभवत् ॥

अथ गयाशिरआदिपरिमाणं।
नागाज्जनार्द्दनाङ्कलयूपाच्चोत्तर
मानसात् एतद्गयाशिरः प्रोक्तं।
फल्गुतीर्थं तदुच्यते पितामहं
समासाद्य यावदुत्तमानसं फल्गु

तीर्थं तु विज्ञेयं देवानामपि।
दुर्लभं क्रौंचपादात् फल्गुतीर्थं।
यावत् साक्षाद्गयाशिरः स्मृतं ॥
गयासुरस्य तस्मात् श्राद्धमयाक्षयं
मुंडपृष्ठाच्च पूर्वास्मिन् पश्चिमे।
दक्षिणोत्तरे श्राद्धं क्रोशार्द्धमाने
गयायां ब्रह्मणा दत्तं पंचक्रोशं
गयाक्षेत्रं क्रोशमेकं गयाशिरः
तन्मध्ये सर्वतीर्थानि त्रैलोक्ये यानि
संति वै ॥

अथ गयामाहात्म्यादि ॥
गयायां न हि तत् स्थानं यत्र तीर्थं
न विद्यते सान्निध्यं सर्वतीर्थानां
गयातीर्थं ततो वरं ब्रह्मज्ञानेन
किं साध्यं गोगृहे मरणेन किं ॥
वासेन किं कुरुक्षेत्रे यदि पुत्रो
गयां व्रजेत् श्राद्धकृद्यो गयाक्षेत्रे
पितॄणामनृणोपि सः शिरसिश्राद्ध
कृद्यस्तु कुलानां शत मुद्धरेत्
गयाशिरसि यः पिंडान् येषां नाम्ना
निर्वपेत् नरकस्था दिवं याति
स्वर्गस्था मोक्षमाप्नुयुः गत्वा वाणिग्
गयाशीर्षे प्रेतराजस्य पिंडकं
प्रददौ मनुजैः सार्द्धं स्वपितृभ्यस्ततो
ददौ प्रेताः प्रेतत्वनिर्मुक्ता वणिक्च
गृहमागतः प्रेतराजः सह प्रेतैः।
गया श्राद्धादिवं गतः गयायां।

सर्वकालेषु पिंडं दद्याद्विचक्षणः
अधिमासे जन्मदिने वास्तेपि गुरु
शुक्रयोः न त्यक्तव्यं गयाश्राद्धं
सिंहस्थेपि बृहस्पतौ तथा देव
प्रबोधेन प्रवहत् सर्वेष्ववधूतः
कर्माधिकारी च श्राद्धकृद्ब्रह्मलो
भाक् मीने मेषे स्थिते सूर्ये
कन्यायां कार्मुके घटेनारदविषु
लोकेषु गयाश्राद्धं सुदुर्लभं ॥
मुंडनं चोपवासश्च सर्वतीर्थेष्वयं
विधिर्वर्ज्जयित्वा कुरुक्षेत्रे विशाले
विरजां गयां दंडं प्रदर्शयद्विज्ञ
गयां गत्वा न पिंडदः दंडं न्यस्य ॥
विष्णुपदे पितृभिः सह मुच्यते
गयागजो गयादित्यो गायत्री च
गदाधरः गया गयासुरश्चैव षट्
या मुक्तिदायिकाः ॥

अथ पिंडदान द्रव्याणि किनेग
पायसेनाथ चरुणा सक्तुना पिष्ट
तंडुलैः फलमूलाद्यैः गयायां
पिंडपातनं तिलकल्केन खंडेन
गुडेन सहितेन वा केवलेनैव
दध्ना वा अन्नेन मधुना यवापि।
स्याकं सहितं खंडं पितृभ्यो वयमिस्तु
तं अथ गयास्थब्राह्मणपूजाविधिः
तत्रस्था ब्राह्मणाः पूज्याः त्वया।
यद्दत्तमखिलं तत्सर्वं प्राप्यते।

गते जीवनार्थं प्रसादेनो भगवन्
कर्तुमर्हसि ततः कन्या ब्राह्मणान् तदा
श्रीवाचेदं दयान्वितः तीर्थोप
जीविकायूयमा चंद्रार्कं भविष्यथ
लोकाः पुण्यगयायां ये श्राद्धिनो
ब्रह्मलोकगाः युष्मान् ये पूजयिष्यंति
तैरहं पूजितः सदा

अथ गयायां श्राद्धादिकरणीयं
तीर्थानि
प्रथमदिने गयाप्रवेशे फल्गुतीर्थे
स्नानतर्पणश्राद्धानि १ प्रेतशिलायां
ब्रह्मकुंडे स्नाने श्राद्धं षोडशा ॥
पिंडदाने प्रेतपर्वते तिलमिश्रिते
सक्तुनि देयश्च २ पंचतीर्थमध्ये
उत्तरमानसे स्नाने सपिंडकं श्राद्धं
सूर्यार्चनेन च ३ दक्षिणमानसे उदीच्यां
उदीचीतीर्थे स्नाने ४ तस्य मध्ये
कनखल तीर्थे स्नाने ५ तस्य दक्षिणे
दक्षिणमानसे तीर्थत्रये स्नाने श्राद्धे
सूर्यार्चने ६ फल्गुतीर्थे स्नाने तर्पणे
सपिंडकं श्राद्धं ततो गदाधरस्य
दर्शने पूजने च ७ द्वितीयदिने
धर्मारण्ये गमने धर्मेश्वरे नमने
बोधितरुनमने च ८ मतंगवाप्यां
स्नाने तर्पणे श्राद्धं मतंगेशानमने
कूपकूपयोर्मध्ये श्राद्धे च ९ ॥
तृतीयदिने ब्रह्मसरसि स्नाने



सपिंडके श्राद्धे यूपप्रदक्षिणंब्रह्म
नमनेच १० गोप्रचारसमीपेआम्र
वृक्षसेचने ११ ततोयम कुक्कुर
काकवलिदाने पुनः स्नानेच १२
चतुर्थदिने फल्गुतीर्थस्नानादि
के ततोगयाशिरसिविष्णुपदस्पर्श
नेस्पर्शने पूजने तत्रसपिंडके ॥
श्राद्धेच १३ रुद्रः १४ ब्रह्मा १५
दक्षिणाग्निः १६ गार्हपत्यः १७
आहवनीयः १८ सत्यः १९ आवस
थ्यः २० शक्रः २१ अगस्त्यः २२ क्रौंचः २३
मातंगः २४ कार्त्तिकेयः २५ गणेशः
२६ कश्यपः यथापदेषु श्राद्धे २७
गजकर्णिकायांतर्पणं २८ कनकेश
केदारनारसिंहवामनरथमार्गी
णांपूजने २९ पंचमदिनेगदालोल
स्नानेसपिंडकेश्राद्धेच ३३ अक्षय
वटे श्राद्धे ब्रह्मकल्पितविप्राणां
पूजने पुरोधसे षोडशदानेच ॥
३४ गायत्र्यग्रे प्रातःसंध्याचरणे
सपिंडकेश्राद्धेच ३५ समुधततीर्थे
स्नात्वासावित्र्यग्रेमध्याह्नसंध्याचरणे
पिंडदानेच ३६ प्राचीसरस्वत्यांस्नान
सायाह्नसंध्याचरणे ३७
विशाला ३८
लेलिहाने ३९ भरताश्रमनामक
रामतीर्थे ४० यदाकिंतु धेनुकस्य

गदाधरसमीपे ४२ आकाशगंगा ४३
गिरिकर्णमुखे पदस्नाने पिंडदानेच
४४ वैतरण्यां स्नाने पिंडदाने
श्राद्धे गोदानेच ४५ घृतकुल्या ४६
मधुकुल्या ४७ देविकानदी ४८
शिलासंगमे ४९ मधुस्रवास्नाने
सपिंडके श्राद्धे पिंडदानेच ५०
दशाश्वमेधिके ५१ हंसतीर्थे ५२
अमरकंटके ५३ कोटितीर्थे ५४
रुक्मिणीकुंडे पद पिंडदाने ५५
मार्कंडेयेश्वरे ५६ कोटीश्वरपोर्दर्शने
नमनेच ५७ दिवाकरसंपुष्करिण्यां
पितृभ्यो दाने ५८ पंकजवने
पांडुशिलायां श्राद्धे ५९ मुख्यतीर्थे
स्नाने तर्पणे पिंडदानेच ६० गयाकूपे
पिंडदाने ६१ भस्मकूटे भस्मना
स्नाने ६२ संगमतीर्थे स्नाने ६३
धेनुकारण्ये पिंडदाने ६४ कामधेनु
पदे स्नात्वा कामदशानमने ६५
कर्दमाले गयानाभौ मुंडपृष्ठे
समीपतः स्नात्वा श्राद्धादिकं कृत्वा
पितृणामनृणो भवेत् फल्गुचंडी
धूमपानाक्षी मंगलाद्याः सम
ईक्षेत गयायांच ॥
हषेत् सर्गस्थितिसम कुल ॥
मुद्धरेत् इति वायुपुराणे गया
माहात्म्यं ॥

गर क्लीं वत्रायकादशकरणांतर्गत
पंचमकरणे इति मेदिनी ॥
तत्रजातस्य फलं विचारदक्षो
विजितारिपक्षः शूरोऽतिधीरो
मृदुहास्ययुक्तः दातादयालुर्गुण
वान्नरः स्याद्गरे यदेषा नृपकार।
कर्त्ता इति कोष्ठीप्रदीपः ॥
विषे तत्त्वनाभाख्यविषे इति
राजनिर्घंटः ॥
गरः पुं विषं उपविषं ॥
रोगः इति हेमचंद्रः ॥
गरघ्नः पुं कृस्माजिकः ववरः इति
राजनिर्घंटः ॥
गरघ्नी स्त्री मत्स्यविशेषः गरइ
इति भाषा अस्यागुणाः मधुरत्वे
कषायत्वे वात पित्त कफ।
नाशित्वे रुचिबलवीर्यकारित्वे
दीपनत्वे लघुत्वेच इति
भावप्रकाशः ॥
गरणं क्लीं सेचने निगरणे (इः
गृशृ धातुभ्यो भावे अनट्प्रत्ये
प्रत्ययः ॥
गरदं क्लीं विषं इतिराजनिर्घंटः
गरदः त्रि विषदान कर्त्ता यथा
अग्निदो गरदश्चैव शस्त्रपाणिः।
धनापहः ॥ इति स्मृतिः ॥
गरव्रतः पुं मयूरः इति

शब्दरत्नावली ॥
गरभः पुं गर्भः इति हेमचंद्रः ॥
गरलं क्लीं विषं इत्यमरः ॥
पन्नगविषे परिमाणे तृणपूलके
घोषरगल्ली पुला आदि इत्यादि
भाषा इति हेमचंद्रः ॥
गरलारिः पुं मरकतमणिः इति
राजनिर्घंटः ॥
गरा स्त्री देवदालीलता इति
राजनिर्घंटः निगरणे इति
धरणी ॥
गरागरी स्त्री देवताडवृक्षः
इत्यमरटीकायां स्वामी ॥
गरान्नकं क्लीं शोभांजनवीजे
इति शब्दचंद्रिका ॥ (ला
गराधिका स्त्री लाक्षा इति रत्नमा
गराधिका गराधिकापिपादः
गरिमा त्रि गुरुता इतिव्याकरणं
गरिष्ठः त्रि अतिगुरुः इति
जटाधरः ॥
गरी स्त्री देवताडवृक्षः इत्यमरः
गरीयान् त्रि अतिगुरुः इति ॥
व्याकरणं ॥
गरुडः पुं स्वनामख्यातपक्षी
तत्पर्यायः गरुत्मान् २ तार्क्ष्यः
३ वैनतेयः ४ खगेश्वरः ५ ॥

नागान्तकः ६ विष्णुरथः ७ सुपर्णः ८ पन्नगाशनः ९ महावीरः १० पक्षिसिंहः ११ उरगाशनः १२ इति जटाधरः शाल्मली १३ हरिवाहनः १४ अमृताहरणः १५ नागाशनः १६ इति हारावली शाल्मलिस्थः १७ खगेन्द्रः १८ भुजगान्तकः १९ तरस्वी २० तार्क्ष्यो नायकः २१ इति राजनिर्घंटः

तस्योत्पत्ति कारणं यथा यजतः पुत्रकामस्य कश्यपस्य प्रजापतेः साहाय्यमृषयो देवा गंधर्वाश्च ददुः किल तत्रेध्मान येने शक्रो नियुक्तः कश्यपेन ह मुनयो बालिखिल्याश्च ये चान्ये देवतागणाः शक्रस्तु वीर्यसदृश मिध्मभारं गिरिप्रभं समुत्क्षिप्य नयामास नातिकृच्छ्रादिव प्रभुः अथापश्यदृषीन् ह्रस्वानंगुष्ठोदर वर्ष्मणः पलाशहेतिकामेकां सहितान् वहतः पथि तान् सर्वान् विस्मयाद्वीर्यमत्तः पुरंदरः अवहस्याभ्यगाच्छीघ्रं लंघयित्वाव मन्यव तेऽथ रोषसमाविष्टाः ॥ सुभृशं जातमन्यवः आरेभिरे । महत्कर्म तदा शक्रभयंकरं ॥ कामवीर्यः कामगमो देवराज । भयप्रदः इंद्रोऽन्यः सर्वदेवानां भवेदिति यतव्रताः तच्छ्रुत्वा भृश संतप्तो देवराजः शतक्रतुः जगाम शरणं तत्र कश्यपं संशितव्रतं तच्छ्रुत्वा देवराजस्य कश्यपोऽथ प्रजापतिः बालिखिल्यानुपागम्य कर्मसिद्धिमपृच्छत अथ ते ते महात्मानं प्रत्यूचुः सत्यवादिनः तान् कश्यप उवाचेदं शान्त्वपूर्वं प्रजापतिः तस्य पक्षींद्रत्व कारणं यथा अयमिंद्रस्त्रिभुवने नियोगात् ब्रह्मणः कृतः इंद्रार्थंच भवंतोपि यत्नवंतस्तपोधनाः न मिथ्या ब्रह्मणो वाक्यं कर्तुमर्हथ सत्तमाः भवतां हि न मिथ्यायं संकल्पो वै चिकीर्षितः भवत्वेष पतत्रीणामिंद्रोऽतिबलसत्ववान् प्रसादः क्रियतामस्य देवराजस्य याचतः बालिखिल्या ऊचुः अपत्यार्थं समारंभो भवतश्चाय मीप्सितः तथा चैवं विधं सात्र यथा श्रेयोऽनुपश्यसि एतस्मिन्नेव काले तु देवी दाक्षायणी शुभा विनता नाम कल्याणी पुत्रकामा यशस्विनी तपस्तप्त्वा व्रतपरा स्नाता पुंसवने शुचिः उपचक्राम ॥

भर्तारं तामुवाचाथ कश्यपः ॥ आरंभः सफलो देवि भविता यो तवेप्सितः जनयिष्यति पुत्रौ द्वौ वीरौ त्रिभुवनेश्वरौ तपसा ॥ बालिखिल्यानां मम संकल्पजौ यतो सर्वपतत्रीणामिंद्रत्वे ॥ कारयिष्यतः विनता चापि सिद्धार्था बभूव मुदिता तथा जनयामास पुत्रौ द्वावरुणं गरुडं तथा विकलांगो ऽरुणस्तत्र भास्करस्य पुरःसरः पतत्रीणां तु गरुड इंद्रत्वेनाभ्यषिच्यत ॥ तस्य जन्मकालीन रूपं यथा । एतस्मिन्नंतरे चापि गरुडः काल आगते विना मात्रा महातेजा विदार्यांडमजायत महासत्व बलोपेतः सर्वा विद्योतयन्दिशः कामरूपी कामगमः कामवीर्यो विहंगमः अग्निराशिरिवोद्भासन् समिद्धोऽतिभयंकरः विद्युद्विस्पष्ट पिंगाक्षो युगांताग्नि समप्रभः प्रवृद्धः सहसा पक्षी महाकायो । नभोगतः घोरो घोरस्वनो ॥ रौद्रो वह्निरौर्व इवापरः ॥ तस्य विष्णुवाहनत्वे कारणं यथा अपीत्वा चामृतं पक्षी परिगृह्याशु निःसृतः अपराक्रदयपरिश्रान्ता । आवार्यार्कप्रभो खगः विष्णुनात दा गरुडो वैनतेयः समेयिवान् तस्य नारायणस्तुष्टस्तेनालौल्येन कर्मणा तमुवाचाव्ययो देवो वरदोऽस्मीति खेचरं स वव्रे तव तिष्ठेयमुपरीत्यंतरीक्षगः उवाच चैवं भूयोपि नारायणमिदं वचः अजरश्चामरश्चास्याममृतेन विनाप्यहं एवमस्त्विति तं विष्णुरुवाच विनतासुतं प्रतिगृह्य वरौ तौ तु गरुडो विष्णुमब्रवीत् भवतेपि वरं दद्यां वृणोतु भगवानपि तं वव्रे वाहनं कृष्णो गरुत्मंतं महाबलं ध्वजं च चक्रे ॥ भगवानुपरि स्थास्यतीति ते इति महाभारते ॥

गरुडध्वजः पुं विष्णुः इत्यमरः

गरुडाग्रजः पुं अरुणः इत्यमरः

गरुडांकिते स्त्री मरकतमणिः इति शब्दरत्नावली

गरुडाश्मा पुं मरकतमणिः ॥ इति जटाधरः ॥

॥ गरुडोत्तीर्णं स्त्री मरकतमणिः इति राजनिर्घंटः ॥

गरुत् पुं पक्षः पाखा इति । भाषा इत्यमरः ॥



गरुत्मान् पुं गरुडः इत्यमरः
पत्तिमात्रे इति मेदिनी ॥
गरुघोषी पुं भारतीपक्षी भारद्व
इतिभाषा इतित्रिकांडशेषः ॥
गर्गः पुं मुनिविशेषः सत्
ब्रह्मणः पुत्रः इतिवायुपुराणे
गर्गरः पुं मत्स्यभेदः गागरा
इति भाषा इति जटाधरः ॥
अस्यगुणाः मधुरत्वं स्निग्धत्वं
वातपित्तनाशित्वंच इति।
राजवल्लभः अस्याकारगुणौ
यथा यः पीतवर्णो पिच्छपिच्छि
लांगः ... रेखाबहुलः सशल्कः
सगर्गरो वर्वरनादवर्षणोजडश्च
शीतः कफवातकारी इति।
राजनिर्घंटः ॥ (ते
गर्गरी स्त्री मेघनीदधिमंथनपा
इत्यमरः कलसी गागरी इति
भाषा यथा मेघोदो सत्कवो।
द्वैया वारिपूर्णेव गर्गरी इति
तिथ्यादितत्वं ॥
गर्गाटः पुं मत्स्यविशेषः ॥
तत्पर्यायः योगनाविकः २
इति हारावली ॥
गर्ज ऊर्जां शब्दे बलकरणशब्द
इति यावत् इतिकविकल्पद्रुमः

गर्जक स्वने इतिकविकल्पद्रुमः
गर्जं क्ली हस्तिशब्दः इति
हेमचंद्रः मेघादिशब्दश्च
गर्जकः पुं मत्स्यविशेषः।
गज्जाड इतिभाषा तत्पर्यायः
शालः २ शालजः ३ इति
शब्दरत्नावली ॥
गर्जनं क्ली शब्दः कोपः इति
मेदिनी ॥
गर्जरं क्ली मूलविशेषः गाजर
इतिभाषा तत्पर्यायः ॥
पिंडमूलं २ पीतकंदं ३ सुमूलकं
४ स्वादुमूलं ५ सुपीतं ६ नारंगं
७ पीतमूलकं ८ अस्यगुणाः
मधुरत्वं रुचिकारित्वं किंचित्
कटुत्वं कफाध्मानक्रिमिशूल
दाहपित्ततृष्णानाशित्वंच इति
राजनिर्घंटः ॥
गर्जाफलः पुं विकंटकवृक्षः
इति राजनिर्घंटः पुंडे इति।
हेमचंद्रः भर्त्सने उर्ज्जने।
इति शब्दरत्नावली ॥
गर्जिः पुं मेघशब्दः इति ॥
हेमचंद्रः ॥
गर्जितं क्ली मेघशब्दः इत्यमरः
हस्तिशब्दे त्रि ॥
गर्जितः पुं मत्तहस्ती इत्यमरः

गर्त्तः पुं भूरंध्रे गाडा इति
भाषा तत्पर्यायः अवटः २
इत्यमरः त्रिगर्त्तदेशः ॥
कुकुंदरः इति मेदिनी
रोगभेदः इतिशब्दरत्नावली
गर्त्तिका स्त्री तंतुशाला तांतघर
इतिभाषा इतिहेमचंद्रः ॥
गर्द्द किरवे इतिकविकल्पद्रुमः
गर्द्दभं क्ली श्वेतकुमुदं इति
हेमचंद्रः विडंगे इति
रत्नमाला ॥
गर्द्दभः पुं जंतुविशेषः गादा
इतिभाषा तत्पर्यायः चक्रीवान्
२ वालेयः ३ रासभः ४ खरः ५
इत्यमरः शंखुभः ६ इति
तद्भीका शंकुकर्णः ७ भारगः ८
भूरिगमः ९ धूसराह्वयः १० अस्य
मांसस्यगुणाः किंचित् गुरुत्वंबल
प्रदत्वंच तन्मूत्रस्यगुणाः कटुत्वं
उष्णत्वं तिक्तत्वं क्षारत्वं कफ ॥
महावातभूतकंपोन्मादहरत्वंच।
इतिराजनिर्घंटः गंधः इति।
हेमचंद्रः ॥ (रोगः
गर्द्दभगदः पुं ज्वालागर्द्दभक
इतिराजनिर्घंटः अस्यलक्षणं
ज्वालगर्द्दभशब्दे द्रष्टव्यं ॥
गर्द्दभशाकः पुं ब्रह्मयष्टिवृक्षः

इतिजटाधरः ॥
गर्द्दभशाका स्त्री ब्रह्मयष्टिः वामणे
हाटी इतिभाषा इतिरत्नमाला
गर्द्दभशाखी स्त्री भार्गी इति
राजनिर्घंटः ॥
गर्द्दभांडः पुं वृक्षविशेषः ॥
गोपिभाट इति ख्यातः अयं ॥
पत्रकांडफलादिभिरश्वत्थाकारः
गंधपिप्पलः इतिकेचित् इति
भरतः गर्द्दपिप्पली इति ॥
ख्यातः इतिसारसुंदरी तत्
पर्यायः कंदरालः २ कपीतनः
३ सुपार्श्वकः ४ प्लक्षः ५ इत्यमरः
प्लक्षवृक्षः पाकुड इति भाषा
इति राजनिर्घंटः ॥
गर्द्दभाह्वयः पुं कुमुदे इति ॥
हेमचंद्रः ॥
गर्द्दभिका स्त्री क्षुद्ररोगविशेषः
तस्यरूपं यथा मंडलं वृत्त।
मुन्नतं सरक्तं पिडकावृतं
रुज्जाकरी गर्द्दभिका तां
विद्याद्वातपित्तजां इति ॥
माधवकरः ॥
गर्द्दभी स्त्री गर्द्दभपत्नी तस्याः
क्षीरस्यगुणाः बलकारित्वं वात
श्वासहरत्वं मधुराम्लरसत्वं।
रूक्षत्वं दीपनत्वं पथ्यत्वंच



तद्दधिगुणाः रूक्षत्वं उष्णत्वं। लघुत्वं दीपनत्वं पाचनत्वं मधुराम्लरसत्वं रुच्यत्वं वातदोष नाशित्वञ्च तत्रनवनीत गुणाः कषायत्वं कफवात नाशित्वं॥ वल्यत्वं दीपनत्वं पाकेलघुत्वं उष्णत्वं मूत्रदोषकारित्वञ्च इति राजनिर्घण्टः तद्धजेतु विशेषः गर्द्दभिकारोगः इति मेदिनी। अपराजिता श्वेतकण्टकारी। कटभी इति राजनिर्घण्टः॥

गर्द्दक लिप्सो इति कविकल्प द्रुमः गर्द्दः पुंसः हा इति हेमचन्द्रः गर्द्दभाण्डवृक्षः इति शब्दचन्द्रिका

गर्द्धनः त्रि लुब्धः इत्यमरः॥

गर्व्वत क ड दर्पे इति। कवि कल्प द्रुमः॥

गर्व्व गतौ इति कविकल्पद्रुमः

गर्व्वः पुं अहङ्कारः दर्पो धार्ष्ट्यं गर्व्व धातोर्भावे ऽल प्रत्ययः

गर्भः पुं भ्रूणः तस्य लक्षणं यथा गर्भाशयगतं शुक्रमार्त्तवं जीवसंज्ञकं प्रकृतिः सविकारञ्च तत्सर्व्वं गर्भसंज्ञकं कालेन। वर्द्धिता गर्भो यद्येतो योगः॥ संयुतः भवेत्तदा स मुनिभिः। शरीरीति निगद्यते॥ तद्धस्य प्रकृतिर्यथा यदा नार्य्यौ उपेयातां वृष्यस्यन्दौ कथञ्चन मुञ्चेतां शुक्रमन्योऽन्यमनस्थि स्तत्र जायते ऋतुस्नाता तथा नारी स्वप्ने मैथुनमाचरेत् आर्त्तवं वायुरादाय कुक्षौ गर्भं करोति हि मासि मासि प्रवर्द्धेत स गर्भो (स्या) गर्भलक्षणः करणे जायते न वर्जितं पैतृकैः गुणैः इति॥ भावप्रकाशः अस्य ह्यादशधा गतिर्यथा भुग्नोऽनिलेन विगुणेन ततः स गर्भः संख्या मतीत्य वहुधा समुपैति योनिद्वार निरुध्य शिरसा जठरेण कश्चित् कश्चिच्छरीरं परिवर्त्तितकुब्जदेहः एकेन कश्चिदपरस्तु भुजद्वयेन तिर्य्यग्गतो भवति कश्चिद वाग्मुखोऽन्यः पार्श्वापवृत्त। गतिरेति तथैव कश्चिदित्यष्टधा गतिरियं त्वपरा च मूढो सङ्कीलकः प्रतिखुरः परिघाऽथ वीजकस्तेषू ई वाहुवक्त्रैः शिरसा च योनौ संगीच यो भवति कीलकवत् सकीलो हस्तपैः खुरैः प्रतिखुरः स हि कायसंगो गच्छद् द्वय शिरः स च वीजकाख्यो योनौ स्थितः स परिघः परिघेण तुल्यः

गर्भनाशात्लक्षणादि श्रपविद्ध॥ शिरायातं प्रतीताङ्गी निरपत्रपा। नीलोद्गतशिरा हृल्लिसामर्भस्तव तांतथा मानसा मतभि मीत॥ रूपलाद्यैः प्रपीडितः गर्भो। व्यापद्यते कुक्षौ व्याधिभिश्च॥ प्रपीडितः अन्तर्मृत गर्भ लक्षणं यथा गर्भास्पन्दनमाध्मानं प्रणाशः श्यावपाण्डुता भवेदुच्छास पूतित्वं शोथश्चान्तर्मृते शिशौ। इति माधवकरः शिशुः कुक्षिः सन्धिः पनसकण्टके॥ इति मेदिनी मध्ये अपवरकः इति हेमचन्द्रः॥ गङ्गादिसन्निहित देशः यथा भाद्रकृष्णचतुर्द्दश्यां यावदाक्रमते जलं तावद्गर्भं विजानीयात्तदूर्द्ध तीरमुच्यते इति प्रायश्चित्ततत्त्वं रेफस्य योयोगात् भकारस्य द्वित्वे वकारश्च कोऽप्यये॥

गर्भकं क्ली रजनी द्वेद्वे उभरात्रि इति भाषा इति हेमचन्द्रः॥

गर्भकः पुं केशमध्यस्थितमाल्ये खोपारमाला इति भाषा॥ इत्यमरः॥

गर्भकरः पुं पुत्रजीववृक्षः। इति भावप्रकाशः॥

गर्भघातिनी स्त्री लाङ्गलिकावृक्षः इति रत्नमाला॥

गर्भण्डः पुं नाभिगुडकः नाभिर॥ गोंड इति भाषा इति त्रिकाण्डे शेषः गर्भस्याण्ड इव गर्भण्डः॥ पृषोदरादित्वात् हकारलोपः॥

गर्भदः पुं पुत्रजीववृक्षः इति राजनिर्घण्टः॥

गर्भदात्री स्त्री क्षुपविशेषः गर्भदा इति ख्याता तत्पर्य्यायः पुत्रदा॥ २ प्रजादा ३ अपत्यदा ४ सन्ततिप्रदा ५ प्राणिमाता ६ तापसद्रुमसन्निभा ७ अस्या गुणाः मधुरत्वं शीतत्वं। नारी पुष्पादिदोष पित्तदाहश्रम नाशित्वं गर्भसम्भूति दातृत्वञ्च। इति राजनिर्घण्टः॥

गर्भनुत् पुं कलिकारीवृक्षः॥ विषलाङ्गलिया इति भाषा इति भाव प्रकाशः॥

गर्भपाकी पुं षष्टिकव्रीहिः षेठे धान इति भाषा इति हेमचन्द्रः

गर्भपातकः पुं रक्तशोभाञ्जन वृक्षः इति जटाधरः॥

गर्भपातनः पुं रीठाकरञ्जः॥ इति भावप्रकाशः॥

गर्भपातनी स्त्री कलिकारीवृक्षः इति राजनिर्घण्टः॥



गर्भपातिनी स्त्री विशल्यावृक्षः ॥
इति जटाधरः ॥
गर्भरूपः त्रि तरुणः इति भूरि।
प्रयोगः ॥
गर्भवती स्त्री अन्तरापत्त्या तत्।
पर्य्यायः अन्तर्वत्नी २ गुर्विणी ३
गर्भिणी ससत्त्वा ५ आपन्नसत्त्वा ६
दोहदवती ७ इति शब्दरत्नावली
उदरिणी ८ गुर्वी ९ इति।
हेमचन्द्रः अथ सद्योगृहीत ॥
गर्भाया लक्षणं शुक्रशोणितयो
र्योनौ रसावाप्य श्रमोद्भवः ॥
सावसादः पिपासा च ग्लानिस्फुरित
अङ्गे भवेत् तस्या उत्तरोत्तर ॥
कालीन लक्षणं यथा स्तनयोर्मुख
कार्ष्ण्यं स्यात् रोमराज्युद्गमस्तथा
अक्षिपक्ष्माणि चाप्यस्याः संमील्यन्ते
विशेषतः छर्दयेत् पथ्य।
भुक्तापि गन्धाद्युद्विजते ऽशुभात्।
प्रसेकः सदनं चैव गर्भिण्या लिङ्ग
मुच्यते पुत्रगर्भवत्याः ॥
लक्षणं यथा पुत्रगर्भयुतायास्तु
नार्य्या मासि द्वितीयके गर्भो ॥
गर्भाशये लक्षः पिण्डाकारो ॥
ऽपरे भ्रूण दक्षिणाक्षि महत्त्वं ॥
स्यात् प्राक्स्तीरं दक्षिणास्तने ।
दक्षिणोरुः सपुष्टः स्यात् प्रसन्न

मुखवर्णता पुन्नामधेयद्रव्येषु
स्वप्नेष्वपि मनोरथः आम्रादि
फल माप्नोति स्वप्नेषु कमलादिच
कन्या गर्भवती लक्षणं ॥
यथाकन्या गर्भवती गर्भे ये ऽपि
मासि द्वितीयके पुत्रगर्भस्य ॥
लिङ्गानि विपरीतमवेक्षते ॥
नपुंसकगर्भवती लक्षणं यथा
नपुंसकं यदा गर्भो भवेद्गर्भो ॥
ऽर्बुदाकृतिः उच्चैः भवतः ॥
पार्श्वे पुरस्तादुदरं महत् इति
भावप्रकाशः ॥
गर्भशय्या स्त्री गर्भोत्पत्तिस्थाने
तनु पित्ताशय पक्वाशययोर्मध्य
वर्त्ति तत्स्वरूपं यथा शङ्खनाभ्या
कृतिर्योनि स्त्र्यावर्त्ता सा च कीर्तिता
तस्यास्तृतीये त्वावर्त्ते गर्भशय्या
प्रकीर्तिता यथा रोहित ॥
मत्स्यस्य मुखं भवति रूपतः
तत्संस्थां च तथा रूपां ॥
गर्भशय्यां विदुर्बुधाः इति
भावप्रकाशः ॥
गर्भस्रावः पुं गर्भपातः पेटखसा
इति भाषा यथा रात्रिभिर्मास
तुल्याभि र्गर्भस्रावे विशुध्यति
इति मनु र्वाक् चतुर्णामासतः
स्त्रीणां यदि स्यात् गर्भसंस्रवः ॥

तदा मासैः समै स्तासां मशौचं
दिवसैः स्मृतः अत ऊर्द्ध्वं तु पतने
स्त्रीणां स्याद्दशरात्रकं सद्यः
शौचं सपिण्डानां गर्भस्रावाच्च
वा ततः इति कूर्म्मपुराणं ॥
अथ गर्भस्राव निदान लक्षणे
अथाभिघात तीक्ष्णोष्णपानाश
न निषेवणात् गर्भे पतति रक्तस्य
सशूले दर्शने भवेत् आचतुर्था
तु मासात् प्रस्रवेद्गर्भविद्रवः ॥
ततः स्थिर शरीरस्य पातः पञ्चम
षष्ठयोः गर्भोऽभिघात विषमाशन
पीडनाद्यैः पक्वं द्रुमादिव फलं।
पतति क्षणेन मूढः करोति।
पवनः खलु मूढगर्भं शूलेच
योनिजठरादिषु मूत्र संगः इति
माधवकरः ॥
गर्भस्रावी पुं हिन्ताल वृक्षः इति
राजनिर्घण्टः ॥
गर्भागारं क्ली गृहमध्यभागः।
शयन गृहं गृहान्तर्गृहं इत्येके।
इति भरतः तत्पर्य्यायः ॥
वासगृहं २ इत्यमरः गर्भाशयः
गर्भाधानं क्ली दशसंस्कारान्तर्गत
प्रथमसंस्कारः यथा गर्भाधानं।
शृतौ शेषः सवनं स्पन्दनात्पुरा

ऋतौ ऋतुकाले च सवकालो
याज्ञवल्क्येनोक्तः षोडशर्त्तु
निशाः स्त्रीणां तासु युग्मासु
संविशेत् इति मलमासतत्त्वं ॥
तत्र क्रमः ऋतुस्नानाहं निषेक
दिवसे सायं सन्ध्याया मतीतायां
पतिः शुचिः सगोत्रः सवेशः
मन्त्रेण सूर्यायार्घ्यं दत्वा पूर्वाभि
मुखोपविष्टायाश्च वध्वा दक्षिण
हस्तेनोपस्थं स्पृशन् मन्त्रं जपेत्
ततः पुनरपि उपस्थं स्पृशन्
मन्त्रं जपेत् ततो भार्य्यां ॥
संयायात् इति भवदेव भट्टः ॥
गर्भाशयः पुं जरायुः येन वेष्टितो
गर्भः कुक्षौ तिष्ठति सः इत्यमरः
गर्भशय्या इति भावप्रकाशः
गर्भाष्टमः पुं गर्भजननमासादष्टम
मासः तत्पर्य्यायः देवमासः २
इति त्रिकाण्डशेषः ॥
गर्भिणी स्त्री गर्भवती पोयाति
इति भाषा इत्यमरः क्षीरावी
वृक्षः क्षीराइ इति भाषा इति
गर्भिण्यवेक्षणं क्ली कुमारभृत्या
गर्भिणीपरिचर्या इति त्रिकाण्ड
शेषः ॥ (शेष
गर्भोपघातिनी स्त्री ऋतुनोह

गमनादिव शात् यस्या गर्भपातो
भवति सा गौः गावडाफेला ॥
गाइ इतिभाषा तत्पर्य्यायः ॥
वेहत् इत्यमरः ॥
गर्म्मुत् स्त्री तृणधान्यविशेषः
मयना इति ख्यातः गड़गड़ इति
केचित् इत्यमरो भरतश्च स्वर्णे
नडः इति मेदिनी ॥
गर्म्मूटिका स्त्री व्रीहिभेदः माड़या
इतिभाषा तत्पर्य्यायः गर्म्मूच्छदः
२ इति रत्नमाला ॥
गर्म्मोटिका स्त्री जरडीतृणम् इति
राज निर्घण्टः ॥
गर्व मदे अहङ्कारे इति यावत्
इति कविकल्पद्रुमः ॥
गर्वः पुं अहङ्कारः इत्यमरः ॥
अहङ्कारस्तथाध्यात्मे सर्व्वेसंसा
कारणे अभिमानोऽधिभूतञ्च
रुद्रस्तत्राधिदैवतं इति
महाभारते आश्वमेधिकपर्व्व
गर्व्वाटः पुं द्वाःस्थितः द्वारपालः
इति त्रिकाण्डशेषः ॥
गर्व्वितः त्रि गर्व्वयुक्तः अहङ्कृतः इति
जटाधरः गर्ह ङ कुत्सने निन्दायां इति
यावत् इति कविकल्पद्रुमः ॥
गर्ह ङ कि कुत्सायां इति

कविकल्पद्रुमः ॥
गर्हणं क्ली निन्दा इत्यमरः ॥
गर्हा स्त्री निन्दा इति
शब्दरत्नावली ॥
गर्हितं त्रि निन्दितं यथा ॥
अति दर्पे हता लङ्का अतिमाने च
कौरवाः अतिदाने बलिर्बद्धः
सर्व्वमत्यन्तगर्हितं इति चाणक्यः
गर्ह्यः त्रि अधमः निन्द्यः ॥
इत्यमरः ॥
गर्ह्यवादी त्रि कद्वदः इत्यमरः
गल भक्षे स्रावे इति ॥
कविकल्पद्रुमः ॥
गल कङ स्रावणे इति ॥
कविकल्पद्रुमः ॥
गलः पुं कण्ठः गला इतिभाषा
इत्यमरः सर्ज्जरसः धुना इति
भाषा इति मेदिनी वाद्य ॥
भेदः गडकमत्स्यः इति ॥
शब्दरत्नावली ॥
गलकः पुं गडकमत्स्यः इति
शब्दरत्नावली ॥
गलकम्बलः पुं गवां गलस्थित
कम्बला कृतिमांसं तत्पर्य्यायः सास्ना २
इत्यमरः गलगण्डः पुं स्वनामख्यातरोगः
गलगण्ड इतिभाषा तस्य लक्षणं

निवद्धः श्वयथुर्यस्य मुष्कवल्लम्ब वर्षं वापि विवर्ज्जयेत् इति ॥
ते गले महान् वा यदि वा ह्रस्वो माधवकरः ॥
गलगण्डं तमादिशेत् तस्य गलग्रहः पुं व्यञ्जनविशेषः
संप्राप्तिः वातः कफश्चापि गले तत्पर्य्यायः मत्स्यच्छेदः २ ॥
प्रदुष्टो मन्ये तु संश्रित्य तथैव इति शब्दचन्द्रिका तिथि ॥
मेदः कुर्व्वन्ति गण्डं क्रमशः स्वलि विशेषः यथा कृष्णपक्षे
ङ्गैः समन्वितं तं गलगण्डमाहुः चतुर्थी च सप्तम्यादि दिनत्रयं
तोदान्वितः कृष्णसिरावनद्धः त्रयोदशी चतुष्कञ्च अष्टावेते
धूमावारुणो वा पवनात्मकस्तु गलग्रहाः इति मदनरत्ने नारदः
पारुष्ययुक्तश्चिरवृद्ध्यपाको अपि च आरम्भानन्तरं यत्र ॥
यदृच्छया पाकमियात् कदाचित् प्रत्यारम्भो न विद्यते गर्गादि
वैरस्यमास्यस्य च तस्य जन्तोः ॥ मुनयः सर्व्वे तमेवाहुर्गलग्रहं
भवेत्तथा तालुगलप्रशोषः ॥ इति राजमार्त्तण्डः ॥
स्थिरः सवर्णो गुरुरुग्रकण्डूः शी गलन्तिका स्त्री कर्करी स्वल्पवारि
तो महांश्चापि कफात्मकस्तु चि धानिका इत्यमरः (झारा
राभिवृद्धिं भजते चिराद्वा प्र गलमेखला स्त्री गलसूत्रे कण्ठा
पच्यते मन्दरुजः कदाचित् माधुर्य्य विशेषः तत्पर्य्यायः सत्राली २
मास्यस्य च तस्य जन्तोर्भवेत्तथा इति हारावली ॥
तालुगलप्रलेपः स्निग्धो गुरुः गलव्रतः पुं मयूरः इति ॥
पाण्डुरनिष्ट गन्धो मेदो भवः त्रिकाण्डशेषः ॥ (जिह्वा
स्वल्परुजोऽति कण्डूः प्रलम्बतेऽलाबु गलशुण्डिका स्त्री तालुमूलस्थल
वदल्पमूलो देहानुरूपक्षयवृद्धि आलजिव इति भाषा तत् ॥
युक्तः स्निग्धास्यता तस्य भवेच्च पर्य्यायः सुधास्रवा २ घण्टिका
जन्तोर्गलेषु शब्दं करोति च नित्यं ३ लम्बिका ४ इति हेमचन्द्रः ॥
कृच्छ्रात् श्वसिति मृदुसर्व्वगात्रं रसना ५ प्रतिजिह्विका ६ माध्वी
संवत्सरातीतमरोचकार्त्तं ७ अलजिह्विका ८ इति ॥
क्षीणञ्च वैद्यो गलगण्डजुष्टं भिन्नं शब्दरत्नावली ॥



गलस्तनी स्त्री छागी इति
हेमचन्द्रः ॥
गला स्त्री अलेवुषा इति।
भावप्रकाशः ॥
गलाङ्कुरः पुं गलरोगविशेषः
तत्पर्य्यायः रोहिणी २ इति
हेमचन्द्रः तस्यसंप्राप्ति पूर्वक
लक्षणं यथा गलेऽनिलःपित्त
कफौच मूर्छितौ प्रदुष्यमांसंच
तथैव शोणितं गलोपसंरोध
करैस्तथांकुरैर्निहन्त्यसून्व्याधि
रयंच रोहिणी इतिमाधवकरः
गलानिलः पुं मत्स्यविशेषः
तत्पर्य्यायः गेगाटेयः २ इति
त्रिकाण्डशेषः गलानिकः।
गलाविल इतिच क्वचित्पाठः
गलिः पुं शक्तोप्यधूर्वहो वृषः
गडिया गरु इति भाषा तत्
पर्य्यायः कुटहषः २ इति
हेमचन्द्रः ॥
गलितः त्रि पतितः तत्पर्य्यायः
स्रस्तः २ ध्वस्तः ३ भ्रष्टः ४ स्कन्नः ५
पन्नः ६ च्युतः ७ इत्यमरः ॥
गलेगण्डः पुं पक्षिविशेषः ॥
तत्पर्य्यायः मर्कटः २ इति॥
त्रिकाण्डशेषः ॥
गलेस्तनी स्त्री छागी। इति
राज निर्घण्टः ॥
गल्लुः पुं मणिविशेषः इति।
महा भारते ॥ वत
गल्भ ङ धृष्टत्वे प्रगल्भइतिया
इति कविकल्पद्रुमः ॥
गल्या स्त्री गल समूहः केदारो
समूहः इत्यमरः ॥
गल्लः पुं गण्डः गाल इति॥
भाषा इति हेमचन्द्रः ॥
गल्लचातुरी स्त्री उपधानविशेषः
गालवालिशा इतिभाषा इति
जटा धरः ॥ द्रे
गल्वर्कः पुं चषकः मद्यपानपा
इति हेमचन्द्रः इन्द्रनीलमणिः
इति त्रिकाण्डशेषः ॥ द्रुमः
गल्भ ङ कुत्सने इतिकविकल्प
गवयः पुं गलकेवल शून्यगोसदृश
पशुः तत्पर्य्यायः गवालूकः २
इति त्रिकाण्डशेषः वनगौः ३
वल्लभद्रः ४ महागवयः ५ तन्मांस
गुणाः मधुरत्वं बृंहणत्वं च इति
राजनिर्घण्टः वानरविशेषः सच
वैवस्वत पुत्रः यथा पुत्रा ॥
वैवस्वतस्यात्र पंच कालांतको
पमाः गयोगवाक्षोगवयः शरभो
गंधमादनः इतिरामायणे ॥
इति गवयी स्त्री गवय स्त्री तत्पर्य्यायः

वनधेनुः २ भिल्लगवी ३ इति
राजनिर्घण्टः ॥
गवराजः पुं वृषः इति॥
शब्दचन्द्रिका ॥
गवलं क्ली महिषशृङ्गे इत्यमरः
गवलः पुं वनमहिषः इति।
हेम चन्द्रः ॥
गवाची स्त्री मत्स्यविशेषः ॥
पांकालमाच इति भाषा तस्या
गुणाः अजीर्णकारित्वं गुरुत्वं
प्रकोपनत्वंच इतिराजवल्लभः
गवादनं क्ली घासः इति॥
शब्दचन्द्रिका ॥
गवादनी स्त्री इन्द्रवारुणीगवां
घास भक्षणाधारः गरुरघास
खाइवार गडा इति भाषा इति
मेदिनी नीलापराजिता इति
राजनिर्घण्टः ॥
गवालूकः पुं गवयः इति
त्रिकाण्ड शेषः ॥
गवाशनः पुं गोभक्षकः मुचि
इति भाषा यथा मातायेका
पितायेको ममतस्यचपक्षिणः
अहं मुनिभि रानीतः सचानीतो
गवाशनैः इत्युद्भटः ॥
गवाषिका स्त्री लाक्षा इति
रत्नमाला गवाधिकापिपाठः
गवाक्षः पुं गवामक्षीवयत्रजानालार
जाली इति भाषा तत्पर्य्यायः
वातायनं २ इत्यमरः वधू ॥
दृगयनं ३ जालं ४ जालकं ५
इतिकोषान्तरं इति भरतः ॥
वानरविशेषः इतिमेदिनी सच
वैवस्वत पुत्रः यथापुत्रोवैवस्व
तस्यात्र पंचकालांतकोपमाः
गयो गवाक्षो गवयः शरभो
गन्धमादनः इति रामायणे
गवाक्षी स्त्री गोडुंवा गोमुक इति
भाषा इत्यमरः इन्द्रवारुणी।
राखालसमा इतिभाषा शारेवाटः
शोनडा इति भाषा इति ॥
राजनिर्घण्टः अपराजिता इति
रत्नमाला ॥
गवीश्वरः पुं गवोस्वामी तत
पर्य्यायः गोमान् २ गोमी ३
इत्यमरः गवेश्वरोपि ॥
गवेडुः स्त्री धान्यविशेषः गडुगाडु
इति भाषा इत्यमरः ॥
गवेधुः पुं गवेडुः इति ॥
भरतः ॥
गवेधुके क्ली गैरिके इति
राजनिर्घण्टः ॥
गवेधुका स्त्री तृणधान्यविशेषः
गडुगाडु देधान इतिच भाषानत

पर्य्यायः गवेडुः २ इत्यमरः ॥
गवेधुः ३ गवेडुका ४ इति
तट्टीका लुद्रा ५ गोजिह्वा ६
गुंद्रा ७ गुंत्यः ८ इतिरत्नमाला
नागवला इति राजनिर्घंटः
गवेरुकं क्ली गैरिकं इति।
त्रिकांडशेषः ॥
गवेशका स्त्री हत्तविशेषः
गोरत्नवा उलिया इति भाषा
इति शब्दचंद्रिका ॥
गवेष तक मार्गणे इति
कविकल्पद्रुमः ॥ (इत्यमरः
गवेषणा स्त्री क्ली अन्वेषणा
गवेषिते त्रि अन्वेषिते इत्यमरः
गवोद्यः पुं उत्तमगवः गोवृषः
प्रशस्तः इति स्मृत पत्तिः
गव्ये त्रि गवीसर्वं गोसंवेधि।
तत्तदुग्धगोमयादि इत्यमरः
गोहिते इति मेदिनी ॥
गव्यं क्ली ज्या शरगद्व्ये इति
मेदिनी ॥
गव्या स्त्री गोसमूहः तत्पर्य्यायः
गोत्रा २ इत्यमरः गव्यूतिः ॥
ज्या इति हेमचंद्रः गोरोचना
इति राजनिर्घंटः ॥
गव्यूतं क्ली क्रोशः गव्यूतिः
इतिहेम चंद्रः ॥

गव्यूतिः स्त्री पुं द्विसहस्रधनुः
इति शब्दार्णवः क्रोशद्वयं
तत्पर्य्यायः क्रोशयुगं २ ॥
इत्यमरः गव्यूतं ३ गोरुतं ४
गोतमं ५ इति भरत धृत ॥
वाचस्पतिः गव्या ६ गव्यूती ७
इति हेम चंद्रः ॥
गव्यूती स्त्री गव्यूतिः इति
हेमचंद्रः ॥
गह तक गहने इति ॥
कविकल्प द्रुमः ॥
गहनं क्ली वनं इत्यमरः
गह्वरे दुःखे इतिमेदिनी
गहनः त्रि दुर्गमः दुष्प्रवेशः
तत्पर्य्यायः कलिलः २ इत्यमरः
गह्वरं क्ली गुहादंभः इत्यमरः
वनं इति मेदिनी रोदने ॥
इति हेम चंद्रः ॥
गह्वरः पुं निकुंजः इतिमेदिनी
गह्वरी स्त्री गुहा इतिशब्दरत्ना
वली गा ङ गतौ इतिकविकल्पद्रुमः
गा रु लि स्तुतौ जन्मनि इति
कविकल्पद्रुमः ॥
गा स्त्री गाथा इतिपुरुषोत्तमः
गांगे त्रि गंगासंभूते इति ॥
मेदिनी ॥
गांगः पुं भीष्मः कार्त्तिकेयः

इतिमेदिनी ॥
गांगाटः पुं मत्स्य भेदः
चिंगडिमाछ इति भाषा इति
शब्दरत्ना वली।
गांगटकः पुं गांगटमत्स्यः
इतिशब्दरत्ना वली
गांगेयः पुं गांगटमत्स्यः ॥
इतिशब्द रत्नावली
गांगायनिः पुं भीष्मः इति
त्रिकांडशेषः कार्त्तिकेयश्च
गांगेयं क्ली स्वर्णं धुस्तूरः।
कशेरु इत्यमरः मुस्तं इति
हेमचंद्रः ॥
गांगेयः पुं भीष्मः कार्त्तिकेयः
इतिहेमचंद्रः इल्लीशमत्स्यः
इति त्रिकांडशेषः भद्रमुस्ता
इति राज निर्घंटः ॥
गांगेरुकी स्त्री गोरक्षतंडुला
इत्यमरः ॥
गांगेष्टी स्त्री कटशर्कराह्वलता
इतिभाषा इतिहारावली ॥
गांजिकायः पुं वर्त्तिकपक्षी
इति राजनिर्घंटः ॥
गाढं क्ली अतिशयः दृढं
तद्युक्ते त्रि इत्यमरः ॥
गाढमुष्टिः पुं खड्गः कृपणे त्रि
इति मेदिनी ॥

गाढावटी स्त्री चतुरंगक्रीडामध्ये
क्रीडाविशेषः यथानैकैका
वटिका यस्य विद्यते खलु न यदि
गाढावटीति विख्याता पदं तस्य
न दुष्यति इति तिथ्यादितत्वे
गाणपत्यः त्रि गणेशोपासकः
इत्यागमः गणपतिसेवेधी ॥
गाणपति भावे क्ली ॥
गाणिक्यं क्ली गणिकासमूहः
वहुवेश्या इत्यमरः ॥
गांडिवः पुं क्ली अर्जुनधनुः
धनुर्मात्रे इति मेदिनी ॥
गांडीवः पुं क्ली अर्जुनधनुः
इत्यमरः कार्मुके इति
मेदिनी ॥
गांडीवी न पुं अर्जुनः इति
त्रिकांडशेषः अर्जुन वृक्षः
इति राजनिर्घंटः ॥
गाता त्रि गायकः इतिसंगीत
दामोदरः ॥
गातुः पुं कोकिलः भ्रमरः
गंधर्वः इति मेदिनी ॥
गातुः त्रि रोषणः इतिमेदिनी
गायनः इति सिद्धांतकौमुदी
उणादि वृत्तिः ॥
गात्र तक ङ शैथिल्ये इति
कवि कल्प द्रुमः ॥



गात्रं क्ली अंगे इति मेदिनी ॥
हस्तिपूर्वजंघादिदेशः हस्त्यग्र।
पादादि सम्मुखभागः हस्तिपादा
ग्रवयवसमुदयः गा इति भाषा
तत्पर्य्यायः कलेवरं २ वपुः ३
संहननं ४ शरीरं ५ वर्ष्म ६ विग्रहः
७ कायः ८ देहः ९ मूर्त्तिः १०
तनुः ११ तनूः १२ इत्यमरः ॥
इंद्रियायतनं १३ अंगं १४ क्षेत्रं।
१५ भूघनः १६ करणं १७ वेरं
१८ संचरः १९ घनः २० वेधः २१
पुरं २२ पिंडः २३ पुद्गलं २४
इति हेमचंद्रः भूतात्मा २५
स्वर्गलोकेशः २६ स्कंधः २७ पंजरः
२८ कुलं २९ बलं ३० इति
जटाधरः ॥
गात्रभंगा स्त्री मूकशिंबी इति
शब्दचंद्रिका ॥
गात्रमार्जनी स्त्री शरीरमार्जनार्थ
वस्त्रं गामोछा इति भाषा
इति लोकप्रसिद्धिः ॥

न

गात्रसंकोची पुं जाहकजंतुः ॥
इति राजनिर्घंटः ॥
गात्रसंप्लवः पुं प्लवपक्षी इति
हेमचंद्रः ॥ (न
गात्रानुलेपनी स्त्री गात्रानुलेप

योग्ये द्रव्ये पिष्टे वा सुगंधद्रव्ये
तत्पर्य्यायः वर्त्तिः २ वर्णकं ३
विलेपनं ४ इत्यमरः
गाथकः त्रि गायकः इति
त्रिकांडशेषः ॥ (भाषा
गाथा स्त्री श्लोकः संस्कृतान्य
सातप्राकृत भाषा गेयं ॥
तद्वगीतं वृत्तं तत्र अन्तरः
संख्याते पद्ये इति मेदिनी ॥
गाध ऋ ङ प्रतिष्ठायां ग्रंथे
लिप्से इति कविकल्पद्रुमः
गाधः पुं स्थाने लिप्सा इति
हेमचंद्रः ॥ (क
गाधिः पुं चंद्रवंशीयकुशि
राज पुत्रः सतु कान्यकुब्जदेशस्य
राजा विश्वामित्रमुनि पिता च
इति महाभारते ॥
गाधिजः पुं विश्वामित्रमुनिः
इति त्रिकांडशेषः ॥
गाधिपुरं क्ली कान्यकुब्जदेशः
इति हेमचंद्रः ॥
गाधिभूः पुं विश्वामित्र मुनिः
इति शब्दरत्नावली ॥ (ति
गाधेयः पुं विश्वामित्रमुनिः इ
हेमचंद्रः ॥
गानं क्ली गीतं इत्यमरः ॥
तत्पर्य्यायः गेयं ३ गीतिः ४

गंधर्वं ५ इति हेमचंद्रः।
ध्वनिः इति धरणी
गानिनी स्त्री वचा इति शब्दचंद्रिका
गांतः त्रि गंता इत्युणादिकोषः
गाथकः इति संक्षिप्तसारे ॥
उणादिवृत्तिः ॥
गांत्री स्त्री गंत्री वृषवाह्यशकटः
गरुरगाडि इति भाषा इत्यमर
टीकायां राय मुकुटः ॥
गांदिनी स्त्री गंगा इति
त्रिकांडशेषः शब्दरत्नावली च
अक्रूरमाता इति श्रीभागवते
गांदिनीसुतः पुं भीष्मः इति
त्रिकांडशेषः अक्रूरः इति
श्रीभागवते ॥
गांधर्वं क्ली गानं इति हेमचंद्रः
गांधर्वः पुं गंधर्वः इति हेमचंद्रः
अष्टप्रकार विवाहांतर्गत ॥
विवाह विशेषः यत्र कन्यावरयो
रन्योन्यानुरागात् त्वं मे भार्य्या
त्वं मे पति रिति निश्चयः सः
यथा गांधर्वः समयान्मिथः इति
मनुः तत्संबंधिनि त्रि ॥
गांधारं क्ली गंधरसः इति
त्रिकांडशेषः ॥
गांधारः पुं सिंदूरं जंबुद्वीपस्थो
त्तरदेशः कंधार इति भाषा।

इति मेदिनी सप्तस्वरांतर्गत ॥
तृतीयस्वरः सतु छाग स्वरतुल्यः
तस्योत्पत्त्यादिः वायुः समुद्गतो
नाभेः कंठशीर्ष समाहतः नाना
गंधवहः पुण्यो गांधार स्तेन
हेतुना इति भरतः अपिच ॥
नाभेः समुद्गतो वायुर्गेय ॥
श्रोत्रे च वालयन् सशब्दस्तेन
निर्यातिगांधारस्तेन कथ्यते
वतस्सः पंचमे षड्जे मध्यम
कृतयो मताः ऋषभे धैवते तिस्रो
द्वे गांधारनिषादके इति संगीत
दामोदरः ॥
गांधारराजः पुं शकुनिः इति
महाभारते ॥
गांधारी स्त्री धृतराष्ट्रराजपत्नी
सातु दुर्योधन माता इति
महाभारते जिनानां शासन
देवता विशेषः इति हेमचंद्रः
यवासः इति राजनिर्घंटः
दुरालभा इति भावप्रकाशः
गांधारेयः पुं दुर्योधन राजः
इति त्रिकांडशेषः ॥
गांधिकः पुं लेखकः सुगंधि
व्यवहारी गंधवणिक् इति ख्यातः
इति मेदिनी सतु क्षेत्रबशात् राज
पत्नीजातः इति पराशरपद्धतिः



कीटविशेषः गांधियोका ॥ इति भाषा इति शब्दरत्नावली ॥ गायुकः त्रि गेता । व्याकरणे ॥ गाम्भीर्य्यं क्ली गम्भीरता यथा मेघनिर्घोष गाम्भीर्य्यप्रतिनाद विधायिता इति जिनवाग्गुणे । हेमचन्द्रः ॥

गायनः त्रि गानकर्ता इति । शब्दरत्नावली तत्पर्य्यायः ॥ गायनः २ गायकः ३ इति ॥ त्रिकाण्डशेषः गाता ४ तस्य दोषा यथा लज्जितं भीतमुद्भृष्टम् अव्यक्तमनुनासिकं काकस्वरः शिरः कपोलयस्थानविवर्जितं विस्वरं विरसं चैव विश्लिष्टं विषमाहतं व्याकुलं तालहीनं च । इति गातुर्दोषाश्चतुर्दश इति सङ्गीतदामोदरः ॥

गायत्री पुं खदिरवृक्षः इति भरतः ॥

गायत्री स्त्री खदिरवृक्षः इत्यमरः ॥ वेदच्छन्दोविशेषः तस्या वृत्तिस्त्रिविधा यथा तनुमध्या १ शशिवदना २ सोमराजी ३ आद्यायाः आद्यन्तयो गुरुद्वये मध्ये लघु द्वयं द्वितीयायाः आदि द्वयं तृतीयायाः आदिमध्ययो लघुगुरु गुरुलघू अन्ते गुरुद्वयं क्रमेणोदाहरणानि यथा आस्ता मम चित्ते नित्यं तनुमध्या १ शशिवदनानां व्रजतरुणीनां २ हरेः सोमराजी समा तेयशाः श्रीः ३ इति छन्दोमञ्जरी त्रिपदादेवी । इति मेदिनी सा तु त्रिपादष्टाक्षरछन्दोयुक्तमन्त्रात्मिका वेदमाता द्विजैरुपास्या तस्या नामव्युत्पत्तिर्यथा गायन्तं त्रायते यस्मात् गायत्री त्वं ततः स्मृता इति स्मृतिः ॥ सावित्रब्रह्मणः पत्नी यथा अध्वर्य्युणा समाहूता एहि देवि त्वरान्विता उत्थिताश्चाग्नयः सर्वे दीक्षाकालमुपागताः सावित्री वाच लक्ष्मीर्नाद्यापि चायाति सती नैवेह दृश्यते हरदाशायणी नैवेह दृश्यते मेकाकिनी यास्यया वत्वायांतितः स्त्रियः ब्रूहि गत्वा विरिञ्चिं तिष्ठ विह मुहूर्त्तकं वदमानो तथाध्वर्य्युस्त्वत्कादेवमुपागमत् सावित्री व्याकुलादेवीप्रसक्ता गृहकर्मणि सख्यो नाभ्यागता यावत्तावन्नागमने मम एवमुक्तोसि वैदेव ॥

भवेदत्र तत्कुरुष्व पितामह एवमुक्ते तदा वाक्यं किञ्चित् । कोपसमन्वितः पत्नी चान्या ॥ मदर्थेन शीघ्रमेव समानय प्रवर्त्तते यथा यज्ञः कालहीनो न जायते तथा शीघ्रं विधेहि त्वं नारीं कांचिदुपानय एवमुक्तस्तथा शक्रो गत्वा सर्वं धरातले स्त्रियो दृष्टास्त्वया तेन सर्वाः स्तु परिग्रहाः आभीरकन्या सुरूपा सुभाषा चारुलोचना ददर्श तां सुचार्वङ्गी कमलायतलोचना कासि कस्य कुतश्च त्वमागता सुभ्रु कथ्यतां एकाकिनी किमर्थं च वीथिमध्ये व तिष्ठसि रूपान्विता च सा कन्या शक्रं प्रोवाच वेपती । गोपकन्या अहं वीर विक्रेतुमिह गोरसं समागता हुतादीनां ॥ प्रगृह्णीष्व यदीप्सितं एवमुक्तस्तदा शक्रो गृहीत्वा तां करे दृढं आनीय तां विष्णलाङ्गी यत्र ब्रह्मा व्यवस्थितः कमलाक्षीं स्फुरद्गर्भं पुण्डरीकनिभेक्षणां गान्धर्वेण । तदा ब्रह्मा गृहीत्वा तु मनसा आदधे शनुत्वमात्मनो दाने गोपकन्यां यामन्यत यदेवमो सुरूपत्वा ॥ सीमंतिनी काचिन्मत्तो यत्पतरा यतः अनेनाहं समानीता ॥ यस्य दृश्याऽवं गता एवं चिन्ता । पराद्दीना यावत् सा गोपकन्यका भवत्येवा महाभागा गायत्री नामतः प्रभो तावदेव महाविष्णुः शक्रवानिदं वचनमे अनुग्रहेण देवेश अस्याः पाणिग्रहं कुरु गान्धर्वेण विवाहेन उपयेमे ॥ पितामहः अस्याध्याने यथा प्रेता त्वं चत रूपा सिंशोकेन सुमा मता विभ्रती विपुलावूरु कदलीगर्भकोमलौ यलाम्रमृगे कोरगूरूपंकजेच सुनिर्म्मले । वसाना वसने क्षौमे रक्ते चाद्भुते दर्शने शशिरश्मि प्रकाशेन । हारेण रतिराजसे दिव्यकुण्डल पूर्णाभ्यां श्रवणाभ्यां विभूषिता । चंद्रमा गगणस्थेन शिखण्डेन विराजसे मुकुटेन त्रिशेषेन ॥ केशवेषेन शोभिता भुजगा भोगसदृशे भुजे भ्राजयते दिशः स्तनौ ते कठिनौ देवि वर्त्तुलौ सम चूचुकौ जघने नातिशुभ्रेण त्रिवल्ली भिन्न से पुता विस्तीर्णा स्पष्ट जघना सुश्रोणीव ॥

श्रेष्ठत्वाभरणं तथा त्रैलोक्य ॥
तारिणी सा तु जगतामेव पावनी
अस्यां वैदिक तांत्रिक ध्यान
द्वयं गुह्यत्वादत्र न लिखितं ॥
तस्या जपफलं तत्र ब्राह्मणान् प्र
ति गायत्री वाक्यं विशेषात् पुष्करे
स्नात्वा मां जप्त्वा वेदमातरं ॥
प्रतिग्रहकृतान् दोषान् ब्राह्मण्य
द्विजोत्तमाः मदीयैः किल जाप्य
स्तु तारणाय त्रिभिः कृतैः ब्रह्म
हत्यासमेयाये तत्क्षणाद्देव ॥
न यूपति दशभिर्जन्मजनितं
शतेन तु पुराकृतं त्रियुगं तु ।
सहस्रेणनात्र कार्या विचार
णाऽष्टोत्तरशतस्थितावाहं जगद्धात्रे
मया विदं मातां हं सर्ववेदानां ॥
पदैः सर्वैरलंकृता जप्त्वा मां ॥
परमां सिद्धिं यास्यति द्विज
सत्तमाः प्राधान्यं मम जाप्येन
सर्वेषां वो भविष्यति ॥
तस्या माहात्म्यादि उपलभ्य च
सावित्री नोपतिष्ठेत यो द्विजः
काले त्रिकालं सम्माह्नान्स पते
त्यात्र संशयः गायत्री मेव
तो या संध्या दत्ते येनांजलित्रयं ।
काले सावित्रिकेणास्मै नेनदत्ते
जगत्त्रयं ब्रह्माद्यास्त्रिया स

मीमांसाति गरीयसी ततो ॥
ऽपि तर्कशास्त्राणि पुराणं तेभ्य
एव च ततोऽपि धर्मशास्त्राणि
तेभ्यो गुर्वी श्रुतिर्नृप ततो
ऽप्युपनिषत् श्रेष्ठा गायत्री च ततो
ऽधिका वाच्यवाचकसंबंधो
गायत्र्याः सवितुर्द्वयोः वाच्यो
ऽसौ सविता साक्षात् गायत्री
वाचिका परा तां देवी नृप ॥
तिष्ठंते ब्राह्मणा ये जितेंद्रियाः
सूर्यलोकं ते प्रयांति क्रमान्मु
क्तिं च पार्थिवा इति पद्मपुराणं
गायनः त्रि गायकः गानोपजीवी
इति त्रिकांडशेषः जल्पाकः ।
इति धरणी ॥
गारित्रं क्ली तदने इत्युणादिकोषः
गारुडं क्ली मरकतमणिः इति
राजनिर्घंटः गरुडपुराणं इति
पुराणं स्वर्णं इति हेमचंद्रः
विषमंत्रः इति जटाधरः ॥
गारुडिकः पुं विषवैद्यः इति ।
शब्द रत्ना वली (ता
गारुडी स्त्री पातालगरुडील
इति राजनिर्घंटः ॥
गारुत्मतं क्ली मरकतमणिः
इत्यमरः ॥
गारुत्मतपत्रिका स्त्री पावीलता

इति राजनिर्घंटः ॥
गार्गकं क्ली गर्गस्य पत्यं ॥
इत्यमरटीकायां रायमुकुटः
गार्गी स्त्री गर्गस्यापत्यं ॥
इति मुग्धबोधं ॥
गार्गीपुत्रकायनिः पुं गार्गीपुत्र
वेशाः अस्यापत्यं नरे गार्गीपुत्रा
यनिः गार्गी पुत्रिः इति पाणिनि
व्याकरणं ॥
गार्ग्यः पुं गर्गस्य पुमपत्यं इति
मुग्धबोधव्याकरणं ॥
गार्द्धपक्षः पुं गार्द्धपत्रवाणः इति
हेमचंद्रः गार्द्धपक्षोपि ॥
गार्द्धी स्त्री लिप्सा यथा
पीत्वा जलानां निधिनातिगार्द्धा
त् इति माघः ॥
गार्द्धपत्रः पुं गृध्रपक्षयुक्तवाणः
इति महाभारतं ॥
गार्भिणं क्ली गर्भिणीसमूहः
इत्यमरः ॥
गार्भिण्यं क्ली गर्भिणीसमूहः
इत्यमरटीकायां भरतः ॥
गार्हपत्यः पुं यज्ञीयाग्निविशेषः
गृहपतिर्गृहस्वामी तेन नित्य
सम्बद्धः इत्यमरभरतौ ॥
गालनं क्ली स्रावणं छानना इति
इत्यादि भाषा यथा तथा पचेत

यथादाहकादिन्यासशैथिल्य
मेऽगालनरहितोऽत्र तरुप्यपक्व
स्वरूर्भवति इति भवदेवभट्टः
गालवः पुं मुनिविशेषः ॥
लोध्रवृक्षः इति मेदिनी ॥
श्वेतलोध्रः इत्यमरटीकायां ॥
स्वामी केंडुकवृक्षः इति ॥
शब्दचंद्रिका ॥
गालिः पुं शापः इति ॥
त्रिकांडशेषः ॥
गालितः त्रि द्रवीकृतः गल्लान
इति भाषा यथा गालितस्य
सुवर्णस्य षोडशांशेन हीनक
मिति रत्नावलीकृत गालनः
यथा तथा पचेत यथाऽगालित
मेऽग्रुरुर्भवति इति कालेशिः
गालिनी स्त्री मुद्राविशेषः यथा
कनिष्ठांगुष्ठकौ सक्तौ करयो
रितरेतरं तर्जनीमध्यमानामा
संहता भुग्नवर्जिता मुद्रया ॥
गालिनी प्रोक्ता शंखस्योपरि
चालिता इति तंत्रसारः ॥
गालोड्यं क्ली पद्मबीजं इति
राजनिर्घंटः ॥
गाहृ ऊ ङ विलोडने इति
कविकल्पद्रुमः ॥
गिरा स्त्री वचनं इति त्रिकांडशेषः



गिरिः पुं पर्वतः इत्यमरः ॥ गेंडुकः इतिविश्वः वल रोग ॥ विशेषः इतिमेदिनी पारदस्य दोषविशेषः यथा नागो ॥ वंगोमलो वह्निश्चांचल्यञ्च विषं गिरिः असह्याग्निर्महादोषा ॥ निसर्गात पारदे स्थिताः इति रत्नावली सन्न्यासिनोपद्धति विशेषश्च ॥

गिरिः स्त्री निगरणं गेला इति भाषा इत्यमरः बालमूषिका इत्यमरटीकायां रमानाथः पूज्ये त्रि इतिमेदिनी ॥

गिरिकंटकः पुं वज्रः इति त्रिकांडशेषः ॥

गिरिकदंबः पुं नीपः धाराकदंबः इतिराजनिर्घण्टः ॥

गिरिकदली स्त्री पर्वतीयकदली तत्पर्यायः गिरिरंभा २ पर्वतमोचा ३ अरण्यकदली ४ बहुबीजा ५ वनरंभा ६ गिरिजा ७ राजवल्लभा ८ अस्या गुणाः । मधुरत्वं हिमत्वं वल वीर्य्यं । रुचिकारित्वं तृष्णात्वं तृष्णापित्त दाहशोषप्रशमनत्वं दुर्ज्जरत्वं गुरुत्वंच इतिराजनिर्घण्टः ॥

गिरिकर्णिका स्त्री पृथिवी इति त्रिकांडशेषः श्वेतकिण्हीवृक्षः अपराजिता इतिराजनिर्घण्टः

गिरिकर्णी स्त्री अपराजिता इत्यमरः यवानः इति ॥ शब्दचंद्रिका ॥

गिरिका स्त्री बालमूषिका इत्यमरः

गिरिकाणः पुं गिरिरोगेणैक वर्त्महीनः इतिसिद्धान्तकौमुद्यां मुणादिवृत्तिः ॥

गिरिगुडः पुं गेंडुकः इति ॥ हेमचंद्रः ॥

गिरिजं क्ली अभ्रकं शिलाजतु शैलजं लोहं इतिमेदिनी ॥ गैरिकं इतिराजनिर्घण्टः ॥

गिरिजः पुं मधुकवृक्षविशेषः तत्पर्यायः गौरशाकः २ मधूलः ३ स्वल्पपत्रकः ४ इतिरत्नमाला

गिरिजा स्त्री पार्वती मातुलंगी इतिमेदिनी श्वेतबुह्ना इति रत्नमाला क्षुद्रपाषाणभेदा त्रायमाणलता कारीवृक्षः । मल्लिका गिरिकदली इति राजनिर्घण्टः ॥

गिरिजामलं क्ली अभ्रकं इत्यमरटीकायां रायमुकुटः ॥

गिरिज्वरः पुं वज्रः इति शब्दरत्नावली ॥

गिरितः त्रि गिलितः भक्षितः इत्यमरटीकायां रायमुकुटः ।

गिरिधातुः पुं गैरिकं इति राजनिर्घण्टः ॥

गिरिनिंबः पुं महानिंबवृक्षः । इतिराजनिर्घण्टः ॥

गिरिपीलुः पुं परूषकवृक्षः इतिराजनिर्घण्टः ॥

गिरिपुष्पकं क्ली शैलेयं इति राजनिर्घण्टः ॥

गिरिप्रिया स्त्री चमरी गवी इति राजनिर्घण्टः ॥

गिरिभित् पुं पाषाणभेदकवृक्षः इति भावप्रकाशः ॥

गिरिभूः स्त्री क्षुद्रपाषाणभेदा इतिराजनिर्घण्टः पार्वतीच ॥

गिरिमल्लिका स्त्री कुटजवृक्षः इत्यमरः ॥

गिरिमाणः पुं हस्ती इति ॥ शब्दरत्नावली ॥

गिरिमृत् स्त्री गैरिकं इतित्रिकांडशेषः ॥

गिरिमृद्भवं क्ली गैरिकं इति राजनिर्घण्टः ॥

गिरिमेदः पुं विट्खदिरः इति रत्नमाला हरिमेद इतिवापाठः

गिरियकः पुं गेंडुकः इति ॥ हेमचंद्रः ॥

गिरियाकः पुं गेंडुकः इति शब्दरत्नावली ॥

गिरिवासी पुं हस्तिकंदः इति राजनिर्घण्टः (शिवः इत्यमरः)

गिरिशः पुं शिवः इत्यमरः

गिरिशालिनी स्त्री अपराजिता यथायारिभद्रे पाटलाचवकुलं गिरिशालिनी इति वामनपुराणे ॥

गिरिशृंगः पुं गणेशः इति शब्दरत्नावली ॥

गिरिसारः पुं लोहं वंगं मलयपर्वतः इतिमेदिनी

गिरिसुता स्त्री पार्वती यथा अवतु वो गिरिसुताशशिभृतः प्रियतमा विशतु वो हृदि सैव भगवतः पदयुगं इत्युद्भटः


गिरीशः पुं शिवः हिमालय पर्वतः बृहस्पतिः इति । मेदिनी

गिलः पुं जंबीरः इति शब्दचंद्रिका

गिलग्राहः पुं नक्रः इति । राजनिर्घण्टः ॥

गिलनं क्ली गिरणं भक्षणं इत्यमरटीका ॥

गिलिः स्त्री गिलनं इत्यमरटीका



गिलिते त्रि भक्षिते इत्यमरः
विसः पुं सामवेदवेत्ता गाय
क इत्युणादिकोषः
गीः स्त्री वाक्ये सरस्वती ॥
इत्यमरः ॥
गीत क्ली गाने इत्यमरः ॥
तस्य लक्षणं यथा मातृसमासुके
गीतमित्युच्यते बुधैः तत्रनादा
त्मको धातुर्मातुरक्षरसंचयः
तद्द्विविधं यथा गीतंचद्विविधं
प्रोक्तं यंत्रगात्रविभागतः यंत्रं
स्याद्वेणुवीणादि गात्रंतुमुखजं
मतं अपिचनिबद्धमनिबद्धंचगीतं
द्विविधमुच्यते अनिबद्धं ॥
भवेद्गीतं वर्णादिनियमैर्विना
यद्वागमकधातुज्ञै रनिबद्धं
विनाकृतं निबद्धंच भवेद्गीतं
तालमानरसाचितं छंदो ॥
गमक धातुज्ञै वर्णादिनियमैः
कृतं ऋग्भिः साम भूद्गीतं
सामभ्यः समपद्यत यजुर्भ्यो
ऽभिनयाज्ञातरसाश्चाथर्वणाः
स्मृताः अथ संगीतलक्षणं ॥
तालवाद्यानुगं गीतं नृत्याभिधंत्र
गीयते नृत्यस्यानुगतं रंगतत्
संगीतकमुच्यते अथ गीतं।
प्रशंसा संगीतकेन सभ्येषामुखे

यस्य न चेतसि मनुष्य हषभो
लोके विधिनैव सर्ववंचितः ॥
संसारदुःखदग्धानामुत्तमानामनु
ग्रहात् प्रभुणा शंकरेणात्र गीत
वाद्यप्रकाशिते गीते वाद्ये ॥
तथा नृत्यं तौर्य्यत्रिकमिदं मतं
तुर्य्यं शाह्रो मृदंगोस्यात् मुरजे
पि च दृश्यते गीतज्ञो यदि।
गीतेन नश्नोति परमे पदे ॥
रुद्रस्यानुचरो भूत्वा तेनैव सह
मोदते गीतेन हरिणा रंग ॥
प्रामुवंत्यपि पक्षिणः वनादयोति
फणिनः शिशवोन रुदंतिच
कृतिचमतः कृतये किमतः परं
फणिवरोऽश्वतरो वतयेचमः
अपिमतो यदवाप महालसा
मधुर गीत वशीकृत शंकरः ॥
परमानंद विवर्द्धन मभिमतफले
वशीकरणं सकलजनचित्तहरणे
विमुक्तिवीजे परंगीते गीतं ॥
पीनपयोधरा समदना नारी ॥
विचित्रा कथारम्य हर्म्यतलं ॥
सधांशु किरणं शोहीपिता ॥
यामिनी चित्तज्ञाः सुहृदः सुताः
समनसो भक्ताः पुनः सेवकाः
सुहृद्गीतफलं कवित्तमवलं
संसारसारा मताः सुहृत् ॥

शालग संकीर्णभेदाद्गीतं त्रिधा।
मतं शुद्धसूडं विंशति यथा एला
सोद्यभवासपाटकरणं तत्वेच
तालेश्वरः कैरात स्वरवक्रपाल
विजयागद्ये त्रिभंगि लघा ॥
ढेंकीवर्णस्वरः पुटोद्विपदिका
मुक्तावली माहकालेवादेऽक
वर्त्तनीति कथिताः शुद्धस्तु ते
विंशतिः एलादीनामेतेषां।
विंशतिसंख्याकानां प्रबंधगीता
नामंगानि षट्‌भवंति तथा चपदे
तेनो विरुदश्चतालः गाढः स्वर।
लघायतादीनां षडंगानि ॥
कथितानि विरिंचिनायेन कृत्यं
नदेशीये गीते दोषोऽभि ॥
ज्ञायतेशीब्रह्मारेण वर्णानां
तथावैवशसारणेलिगान्यले।
विसर्योच संयुक्ताक्षरमोक्षणं
परिवर्तैः स्वराणांच ह्रस्वदीर्घ
व्यतिक्रमे अथ शालगसूडं ॥
ध्रुवको मंठक श्चैव प्रतिमंठ
निसारुकः वासकः प्रतिलाभश्च
तथान्याचैकतालिका यतिश्च
कुमरिश्चेति शालगं सूड
मीरितं अथ संकीर्णसूडं ॥
वैशेमंगलक लघानगणिका
वर्द्धीतिनादोत्रवीदो हास्याद्धकृत

लघा गुरुवलो गीता च गोवि
लघाहे स्त्रोकोप्यघ कारिका
त्रिपदिकेत्येतानि कामद्विषा
संक्षेपेण चतुर्द्दश कथितान्य
प्रथमानि क्रमात् इति संगीत
दामोदरः शाह्विते त्रि ॥
इति मेदिनी ॥
गीतमादी पुंकिन्नरः इति
शब्दरत्नावली ॥ तेति
गीता स्त्री ग्रंथविशेषः भगवद्गी
ख्याता सात् अर्जुनस्यमोह
निहत्यर्थं महाभारतीयभीष्म
पर्व्वतर्गता कर्म्मोपासनाज्ञान
कांडत्रयात्मिकाष्टादशाध्यायी
श्रीकृष्णोक्ता यथा भारते
सर्ववेदार्थो भारतार्थश्च कृत्स्नशः
गीतायामस्ति तेनेयं सर्वशास्त्रमयी
मता इयमष्टादशाध्यायी क्रमात्
षट्कत्रयेण हि कर्म्मोपास्ति ज्ञान
कांडत्रितयात्मानिगद्यते इति
नीलकंठः गीतासुगीताकर्त्तव्या
किमन्यैः शास्त्रविस्तरैः यास्वयं
पद्मनाभस्य मुखपद्मात् विनिः
सृता इति स्वामी एतदन्याः
श्रीभागवतोक्त गोपीगीता।
अध्यात्मरामायणोक्त राम गीताश्व
मेधिकपर्वोक्त ब्राह्मणगीतानु

गीते देवीभागवतोक्त ॥
भगवतीगीता शिवगीता।
इत्याद्याः सन्ति ॥
गीतिः स्त्री गाने आर्य्याछन्दो
विशेषः इति मेदिनी ॥
गीरथः पुं बृहस्पतिः इति
त्रिकाण्डशेषः ॥
गीर्णः त्रि स्तुतः इत्यमरटीका
यां भरतः ॥
गीर्णिः स्त्री गिलने इत्यमरः।
स्तुतिश्च गीर्णिः प्राह दशनात्
गीर्देवी स्त्री सरस्वती इति
शब्दरत्नावली
गीर्लता स्त्री महाज्योतिष्मती।
इति राजनिर्घण्टः ॥
गीर्वाणः पुं देवता इत्यमरः
गीर्वाणकुसुमं क्ली लवङ्गः इति
राजनिर्घण्टः ॥
गीष्पतिः पुं बृहस्पतिः इत्यमरः
पण्डितः इति शब्दरत्नावली
अस्य रूपान्तरं गीर्पतिः गीःपतिः
इति मुग्धबोधं ॥
गु उ. ध्वनौ इति कविकल्पद्रुमः
गु शि विष्ठोत्सर्गे इति
कविकल्पद्रुमः ॥
गुग्गुलः पुं गुग्गुलुः इत्यमरः।
टीकायां भरतः ॥

गुग्गुलुः पुं रक्षोभोजनहृतः
इति शब्दचन्द्रिका स्वनामख्यात
वृक्षः अस्य निर्यासः सुगन्धिद्रव्य
तत्पर्य्यायः कुम्भं २ उलूखलकं
३ कौशिकः ४ पुरः ५ इत्यमरः
कुम्भोलूः ६ खलकं ७ कुम्भोलू
खलक ८ गुग्गुलः ९ इति
भरतः जटायुः १० कालनिर्या
सः ११ देवधूपः १२ सर्वसहः १३
महिषाक्षः १४ पलङ्कषा १५ इति
रत्नमाला पवनद्विष्टः १६ भवाभीष्टः
१७ निशाटकः १८ जटालः १९
पुटः २० भूतहरः २१ शिवः २२
शाम्भवः २३ दुर्गः २४ यातुघ्नः २५
महिषाक्षकः २६ देवेष्टः २७
महादिष्टः २८ रक्षोहा २९ रूक्ष
गन्धकः ३० दिव्यं ३१ अस्य गुणाः
कटुत्वं तिक्तत्वं उष्णत्वं कफ
मारुतकासक्रिमिवातोदरज्वर
शोफार्शोनाशित्वं रसायनत्वञ्च
इति राजनिर्घण्टः दीपनत्वं
तीक्ष्णत्वं कषायत्वं मेदःकुष्ठ
नाशित्वं पित्तदातृत्वं लघुत्वञ्च
इति राजवल्लभः विशदत्वं ॥
सारकत्वं रूक्षत्वं पाके कटुत्वं
भग्नसन्धानकारित्वं वृष्यत्वं
सूक्ष्मत्वं स्वर्य्यत्वं पिच्छिलत्वं

बल्यकारित्वं व्रणमेहाश्मवातान्त्र
वातपिडकाग्रन्थिगण्डमाला॥
नाशित्वञ्च माधुर्य्याच्छमयेद्वातं
कषायत्वाच्च पित्तहा तिक्तत्वात्
कफजित्तेन गुग्गुलुः सर्वदोषहा
स तु पञ्चविधा यथा महिषाक्षो ॥
महानीलः कुमुदः पद्म इत्यपि
हिरण्यः पञ्चमो ज्ञेयो गुग्गुलोः
पञ्च जातयः तेषां रूपाणि यथा
भृङ्गाञ्जनसवर्णस्तु महिषाक्ष इ
तीरितः महानीलस्तु विज्ञेयः स्व
नामसमलक्षणः कुमुदः कुमुदा
भः स्यात् पद्मो माणिक्यसन्निभः
हिरण्याक्षस्तु हेमाभः पञ्चानां
लिङ्गमीरितं यथा प्राणिविशेषे
प्रयोगो यथा महिषाक्ष ॥ भो
महानीलौ गजेन्द्राणां हितावु
हयानां कुमुदः पद्मः स्वस्त्यारोग्य
करौ परौ विशेषेण मनुष्याणां
कनकः परिकीर्तितः कदाचि
न्महिषाक्षस्तु मतः कैश्चिन्नृणा
मपि नूतनगुग्गुलो रूपं यथा स्नि
ग्धकाञ्चनसङ्काशः पक्वजम्बूफ
लोपमः नूतनो गुग्गुलुः प्रोक्तः सु
गन्धिर्यस्तु पिच्छिलः पुरातनस्य
रूपं यथा शुष्को दुर्गन्धिकश्चैव
त्यक्तप्रकृतवर्णकः पुराणः
स तु विज्ञेयो ॥

गुग्गुलुर्वीर्य्यवर्जितः इति
भावप्रकाशः अस्य स्थान ॥
विशेषजन्मादिकथनं यथा
जायन्ते पुरपादपा मरुभुवि
ग्रीष्मेऽर्कसन्तापिताः शीतार्त्ताः
शिशिरेऽपि गुग्गुलरसं मुञ्चन्ति ते
पञ्चधा हेमाभं महिषाक्षतुल्य
मपरं सनयपद्मरागोपमं ॥
भृङ्गाभं कुमुदद्युतिञ्च विधिना
ग्राह्यापरीक्ष्यातः वह्नौ ज्वलति
तपने विलयं प्रयाति क्लिद्यति
कोष्णसलिले पयसः समानाः
ग्राह्याः शुभाः परिहरेच्चिरकाल
जातानेतान् वर्णसमगूढविगन्ध
वर्णान् इति प्रयोगामृतं ॥
पक्कस्यास्य पूर्णवीर्य्यत्वं मासत्रय
पर्य्यन्तं तिष्ठति इति परिभाषा
गुच्छः पुं स्तवकः पुष्पादिर थोपा
इति भाषा स्तवः तृणादिर।
गोछ इति भाषा द्वात्रिंशद्यष्टिक
हारः बत्रिशानर हार इति ॥
भाषा कलापः मयूरेर पाखा
इति भाषा इति मेदिनी
मुक्ताहारः इति रतिदेवः ॥
गुच्छकं क्ली ग्रन्थिपर्णी इति
भावप्रकाशः ॥
गुच्छकः पुं स्तवकः ॥
इत्यमरः ॥



तत्पर्य्यायः गुलेवः २ स्लेवः ३ कुसमोच्चयः ४ गुच्छः ५ इति राजनिर्घण्टः गुत्सः ६ गुत्सकः ७ इत्यमरटीकायां भरतः ॥ रीठाकरञ्जः इति राजनिर्घण्टः स्वार्थिकप्रत्ययात् गुच्छशब्दार्थोऽप्यत्र ॥

गुच्छकणिशः पुं रागीधान्यं इति राजनिर्घण्टः ॥

गुच्छकरञ्जः पुं करञ्जविशेषः तत्पर्य्यायः स्निग्धदलः २ गुच्छपुष्पकः ३ नेत्री ४ गुच्छी ५ स्तावेदः ६ हेतयावनः ७ अस्य गुणाः कटुत्वं तिक्तत्वं उष्णत्वं विषवातार्त्तिकण्डूविचर्च्चिकाकुष्ठत्वग्दोषनाशित्वञ्च इति राजनिर्घण्टः ॥

गुच्छदन्तिका स्त्री कदली इति राजनिर्घण्टः ॥

गुच्छपत्रः पुं तालवृक्षः इति राजनिर्घण्टः ॥

गुच्छपुष्पः पुं सप्तच्छदवृक्षः राजनिर्घण्टः ॥

गुच्छपुष्पकः पुं रीठाकरञ्जः गुच्छकरञ्जः इति राजनिर्घण्टः

गुच्छपुष्पी स्त्री धातकी शिमूडी वृक्षः इति राजनिर्घण्टः

गुच्छफलः पुं रीठाकरञ्जः राजादनी कतकः इति राजनिर्घण्टः

गुच्छफला स्त्री अग्निदमनी काकमाची निष्पावी द्राक्षा कदली इति राजनिर्घण्टः ॥

गुच्छवध्रा स्त्री गुण्डालावृक्षः इति राजनिर्घण्टः ॥

गुच्छमूलिका स्त्री गुण्डासिनीतृणं इति राजनिर्घण्टः ॥ (को

गुच्छार्द्धः पुं चतुर्विंशतियष्टिहारः इत्यमरः ॥

गुच्छालः पुं भूतृणं इति राजनिर्घण्टः ॥

गुच्छाह्वकन्दः पुं गुलञ्चकन्दः इति राजनिर्घण्टः ॥

गुच्छी स्त्री गुच्छकरञ्जः इति राजनिर्घण्टः ॥

गुज शि ध्वनौ इति कविकल्पद्रुमः

गुजे कूजने इति कविकल्पद्रुमः

गुज ई कूजने इति कविकल्पद्रुमः

गुर्ज्जरी स्त्री रागिणीविशेषः ॥ अस्या रूपं यथा श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्लवतल्पयाता श्रुतेः स्वराणां दधती विभागं तन्त्रीमुखाद्दक्षिण ॥ गुर्ज्जरीयं अस्याः कालनियमो यथा नाटो गौडी वराडी च गुर्ज्जरी देशिरेव च ॥ पूर्व्वाह्णे ॥

गानमेतेषां निषिद्धमिति तद्विदः इति सङ्गीतदामोदरः मतभेदेन पूर्व्वाह्णेऽपि गीयते ॥

गुञ्जः पुं पुञ्जः पुष्पस्तवकः इति शब्दरत्नावली ॥

गुञ्जकृत् पुं भ्रमरः इति शब्दचन्द्रिका ॥ (हि।

गुञ्जनं क्ली गुनगुनध्वनिः भ्रमरशब्दः कूजनार्थगुञ्जधातोर्भावे अनट् प्रत्ययः ॥

गुञ्जा स्त्री लताविशेषः कुँच इति भाषा तत्पर्य्यायः काकचिञ्ची २ कृष्णला ३ इत्यमरः। रक्ता गुञ्जा ४ रक्तिका ५ काकणन्तिका ६ काकादनी ७ काकन्तिका ८ काकजङ्घा ९ शिखण्डिनी १० इति रत्नमाला चूडामणिः ११ सौम्या १२ शिखण्डी १३ अरुणा १४ ताम्रिका १५ शीतपाकी १६ उच्चटा १७ कृष्णचूडिका १८ रक्ता १९ काम्बोजी २० भिल्लभूषणा २१ वन्या २२ श्यामलचूडा २३ काकचिञ्चिका २४ अस्या बीजगुणाः तीक्ष्णत्वं उष्णत्वं इति ॥ राजनिर्घण्टः कुष्ठव्रणनाशित्वं इति राजवल्लभः अस्याः शिफागुणः वान्तिकारित्वं मूलविषनाशित्वञ्च वशकर्म्मणि श्वेता प्रशस्ता इति राजनिर्घण्टः ॥ त्रियवपरिमाणं रति इति भाषा इति वैद्यकं चतुर्थांशपरिमाणे इति शुभङ्करः ॥ गोधूमद्वयमाने इति राजनिर्घण्टः पटहः कलध्वनिः इति ॥ मेदिनी मदिरागृहे इति ॥ शब्दरत्नावली वर्त्ती इति ॥ त्रिकाण्डशेषः ॥

गुञ्जिका स्त्री गुञ्जा त्रियवपरिमाणं इति शब्दचन्द्रिका ॥

गुञ्जितं क्ली गुञ्जनं यथा ॥ न गुञ्जितं तन्न जहार यन्मनः ॥ इति भट्टिः ॥

गुटिका स्त्री वटिका गुलि इति वडि इति च भाषा यथा गुटिकापातदिनाद् व्यञ्जनमिति दायभागः

गुड इक वेष्टे इति कविकल्पद्रुमः

गुड इक वेष्टो रक्ते चूर्णीकरणे इति कविकल्पद्रुमः ॥

गुड शि रक्षे व्याघाते इति ॥ कविकल्पद्रुमः ॥

गुडः पुं गोलः हस्तिसन्नाहः इति मेदिनी ग्रासः इति हेमचन्द्रः कार्पासी इति राजनिर्घण्टः इक्षुपाकः ॥




इत्यमरः तस्य पर्य्यायः इत्यमरः ॥
२ मधुरः ३ रसपाकजः ४ खण्डजः ५
इक्षुजः ६ सिद्धः ७ मोदकः ८
अमृतसारजः ९ शिशुप्रियः १०
सिताद्दिः ११ अरुणः १२ रसजः १३
इति राजनिर्घण्टः इक्षुरसक्वाथः
१४ गेडोलः १५ मधुवीजकः १६
इति वैद्यके गेडोलः १७ ॥
गुलः १८ खाण्डखण्डः १९ इति
शब्दरत्नावली खाण्डः २० इति
त्रिकाण्डशेषः अस्य गुणाः ॥
हृद्यत्वं स्निग्धत्वं गुरुत्वं ॥
वातनाशित्वं मूत्रशोधनत्वं ॥
वातपित्तहरत्वं मेदःकफकृमि
बलप्रदत्वञ्च इति राजवल्लभः।
मधुरत्वं क्षारत्वं उष्णत्वं कफ
नाशित्वं पित्तरक्ते अहितत्वं
जीर्णस्यैव रसायनः पुरातनस्य
तस्य गुणाः पित्तपवनाग्नित्रिदोष
पाण्डुप्रमेह श्रम नाशित्वं ॥
द्रव्यान्तर संयोगेन विशेषतो।
ज्वरनाशित्वं रुचिकारित्वं ॥
हृद्यत्वं संताप शान्तिप्रदत्वं ॥
विण्मूत्रामय शोधनत्वं अग्नि
जननत्वं स्निग्धत्वं स्वादुतरत्वं
लघुत्वं पथ्यत्वञ्च इति राजनिर्घण्टः
अधिक गुणत्वं रक्तप्रसन्न ॥

बलकारित्वं मधुरत्वञ्च इति
राजवल्लभः यावनालरसपाक
भवगुड गुणाः क्षारत्वं कटुत्वं।
मधुरत्वं कफवात नाशित्वं ॥
पित्तप्रदत्वं सततनिषेवणेन
कण्डूति कुष्ठ जननत्वं इत्यत्र ॥
प्रामन इति क्वचित् पाठः अस्य
विदाहदायित्वञ्च इति राज ॥
निर्घण्टः इक्षो रसोयः ॥
संपक्को जायते लोष्टवद्दृढः
सगुडो गौडदेशोत्थमतस्यप्रव
गुडोमतः श्लेष्माणमाशु विनिहन्ति
सहार्द्रकेण पित्तं निहन्ति च तदेव
हरीतकीभिः शुण्ठीसमं हरति
वातमशेषमित्थं दोषत्रयक्षय
करायनमो गुडाय इति ॥
भावप्रकाशः ॥
गुडकः पुं गुड द्वारा पक्कौषध
विशेषः अस्य पूर्णतेजः षण्मास
पर्य्यन्तं तिष्ठति इति परिभाषा
गुडकरी स्त्री रागिणी विशेषः
इति हलायुधः ॥
गुडची स्त्री गुडूची इत्यमरः ॥
टीकायां भरतः ॥
गुडतृणः पुं इक्षुः इति ॥
राजनिर्घण्टः ॥
गुडत्रिणं क्ली गुडतृणं इक्षुः

इति शब्द रत्नावली ॥
गुडत्वक् क्ली स्वनामख्यातगन्धद्र
तत्पर्य्यायः उत्कटं २ भृङ्गं ३।
त्वक्पत्रं ४ वराङ्गकं ५ त्वचं ६
चोलं ७ त्वचापत्रं ८ हृद्यं ९
सुरभिवल्कलं १० इति शब्द।
रत्नावली उत्कटं ११ चोचं ॥
१२ इत्यमरः त्वक् १३ पत्रं ॥
१४ इति तट्टीका अस्य गुणाः
कफशुक्राम वातनाशित्वं
मधुरत्वं कटुत्वञ्च इति राजवल्ल
भः लघुत्वं उष्णत्वं स्वादुत्वं तिक्तत्वं
रूक्षत्वं पित्तहृद्हिकारित्वं अरुचि
कण्डूहृद् बस्तिवातार्शःकृमि
पीनस राग नाशित्वञ्च इति
भावप्रकाशः ॥
गुडत्वचं क्ली गुडत्वक् राजभो
जपित्री इति भाषा इति
शब्दचन्द्रिका ॥
गुडदारु क्ली इक्षुः इति
त्रिकाण्डशेषः
गुडधेनुः स्त्री गुडादिनिर्म्मिता धेनुः
यथा गुडधेनुविधानस्य स्वरूपमिह
यत्फलं तदिदानीं प्रवक्ष्यामि ॥
सर्व्वपापविनाशेन कृष्णाजिने
चतुर्हस्ते प्रागुग्रीवे विन्यसेद्बुध
गोमयेनानुलिप्तायां दर्भमास्तीर्य्य

सर्व्वतः लघ्वेणाजिने तद्वत्
वत्सस्य परिकल्पयेत् उदङ्मुखीं
कल्पयेद्धेनुमुदीच्याञ्च सवत्सकां
उत्तमा गुडधेनुः स्यात् सदाभार
चतुष्टयं वत्सं भारेण वा कार्य्या
भारभ्यां मध्यमा स्मृता अर्द्ध
भारेण वत्सः स्यात् कनिष्ठाभा
केण तु चतुर्थांशेन वत्सः स्यात्
गृहवित्तानुसारतः धेनुवत्सौ
तदा तौ तु सित सूक्ष्माम्बरावृतौ
शुक्तिकर्णाविक्षुपादौ शुचिमुक्ता
फलेक्षणौ सितसूत्रशिरालौ तु
सितकम्बलकम्बलौ ताम्रगुडक
पृष्ठौ तु सितचामररोमकौ विद्रुम
भ्रूयुगौ कृतौ नवनीतस्तनान्वितौ
क्षौमपुच्छौ कांस्यदोहाविन्द्र
नीलकतारकौ इत्येवं रचयित्वा
तु धूप दीपैः समर्च्चयेत् ॥
सर्व्वासां धेनूनामेवं विधाने
ज्ञेये इति याम्ये सृष्टिखण्डे ॥
गुडपुष्पः पुं मधूकवृक्षः इत्यमरः
गुडफलः पुं पीलुवृक्षः इत्यमरः
गुडभा स्त्री यावनालशर्करा इति
राजनिर्घण्टः ॥
गुडमूलः पुं अल्पमारिषशाके
इति शब्दचन्द्रिका ॥
गुडलं क्ली गौडीमदिरा इति



शब्दचंद्रिका ॥
गुडबीजः पुं मसूरः इति
राजनिर्घंटः ॥
गुडशर्करा स्त्री शर्करा तत्पर्य्यायः
पिप्पटा इति त्रिकांडशेषः ॥
गुडशिग्रुः पुं रक्तशोभांजनः।
इति शब्द चंद्रिका ॥
गुडा स्त्री स्नुहीवृक्षः गुडिका।
इतिमेदिनी उपरी इति ॥
राजनिर्घंटः ॥
गुडाका स्त्री निद्रा इति गुडाकेश
शब्दव्युत्पत्तौ श्रीधरस्वामी ॥
गुडाकेशः पुं शिवः अर्जुनः
इति जटाधरः ॥
गुडाशयः पुं अक्षोटवृक्षः ॥
इति राजनिर्घंटः ॥
गुडिका स्त्री गुटिका हस्तहुटिका
यथा वटिका गुडिका चेति ॥
तैलावीतर भेदतः इति वैद्यक
परिभाषा ॥
गुडूची स्त्री गुडूची इति द्विरूपकोषः
गुडूची स्त्री लताविशेषः गुलंच
इति भाषा तत्पर्य्यायः ॥
वत्सादनी २ छिन्नरुहा ३ तंत्रिका
४ अमृता ५ जीवंतिका ६ सोमवल्ली
७ विशल्या ८ मधुपर्णी ९ इत्यमरः
गुडूची १० इति भरतः ॥

कुंडली ११ चक्रलक्षणा १२ इति
रत्नमाला अमृतवल्ली १३ ज्वरारिः
१४ धामा १५ वरा १६ सरक्ता
१७ मधुपर्णिका १८ छिन्नोद्भवा १९
अमृतलता २० रसायनी २१ छिन्ना
२२ सोमलतिका २३ भिषक्प्रिया
२४ कुंडलिनी २५ वयःस्था २६
नागकुमारिका २७ छिन्निका २८
चंद्रहासा २९ इति राजनिर्घंटः
मधुपर्णी ३० अमृता ३१ अमृत
वल्लरी ३२ सुधा ३३ जीवंति ३४
सोमा ३५ सोमवल्ली ३६ कुंडली
३७ चक्रलक्षणिका ३८ वयस्था ३९
मंडली ४० देवनिर्मिता ४१ अस्या
गुणाः कटुत्वं तिक्तत्वं स्वादु
पाकित्वं रसायनत्वं मेधाहितत्वं
कषायत्वं उष्णत्वं लघुत्वं बल्यत्वं
अग्निदीपनत्वं दोषत्रयामतृड्
दाहमेह कासपांडुता कामला
(ष: कुष्ठ वातास्र ज्वर कृमि वमि
नाशित्वंच इति भावप्रकाशः
गुरुत्वं वीर्योष्णत्वं भ्रम ॥
नाशित्वंच इति राजनिर्घंटः रक्त
पित्तनाशित्वं इति राजवल्लभः
अस्याः पत्रस्य गुणाः अश्रेयत्वं
सर्वज्वरहरत्वं लघुत्वं कषायत्वं
॥ कटुत्वं तिक्तत्वं स्वादुपाकित्वं

रसायनत्वं बलकारित्वं उष्णत्वं ॥
मेध्याहितत्वं त्रिदोष तृष्णा दाह
प्रमेह वातास्रक कामला कुष्ठ
पांडुता नाशित्वंच इति
भावप्रकाशः घृत प्रक्षेपाद्वात
नाशित्वं गुड प्रक्षेपाद्विबंध।
नाशित्वं सिता प्रक्षेपात्पित्त।
नाशित्वं मधुप्रक्षेपात्कफनाशि
त्वं एरंडतैल प्रक्षेपादुग्रवातास्र
नाशित्वं शुंठी प्रक्षेपादामवात
नाशित्वं इति राजवल्लभः ॥
अस्या उत्पत्तिर्यथा अथ ॥
लंकेश्वरो नाम्ना रावणो राक्षसा
धिपः राम पत्नीं बलात्सीतां।
जहार मदनातुरः ततस्तं बल
वान् रामो रिपुं जायापहारिणं बले
वानरसैन्येन जघान रणमूर्द्धनि
हते तस्मिन् सुरारातौ रावणे
बल गर्विते देवराजः सहस्राक्षः
परितुष्टोपि राघवे तत्रये ॥
वानराः केचिद्रात्रौ तैर्निहता रणे
तानिंद्रो जीवयामास ससिं ॥
व्यामृत दृष्टिभिः ततो येषु च
देशेषु कपिगात्रात् परिच्युताः
पीयूष विंदवः पेतुस्तेभ्यो जाता
गुडूचिका इतिभावप्रकाशः ॥
गुडेरः पुं ग्रासः इत्युणादिकोषः

गुडकः इति सिद्धांतकौमुद्या ॥
उणादिवृत्तिः ॥
गुडेरकः पुं ग्रासः इति ॥
हेमचंद्रः ॥
गुडोद्भवा स्त्री शर्करा इति ॥
राजनिर्घंटः ॥ (द्रुमः
गुणतकमेत्रणे इति कविकल्प
गुणः पुं षड्प्रकार राजनीति
विशेषः तद्यथा संधिः १ विग्रहः
२ यानं ३ आसनं ४ द्वैधं ५ ॥
आश्रयः ६ धनुराकर्षणरज्जुः
छिला इति भाषा तत्पर्य्यायः
मौर्वी २ ज्या ३ शिंजिनी ४ ॥
रज्जुः सत्व रजस्तमांसि शुक्ल
कृष्ण रक्त पीतादि द्रव्याश्रितः
सत्व शौर्य्यादिः रसगंधादिश्च
इत्यमरः तस्य लक्षणं यथा हे
निविशेऽपैति पृथग्जाति प्र
दृश्यते आधेयश्चाक्रियाजश्च
सोऽसत्व प्रकृतिर्गुणः इति
मुग्धबोधे विशेषाधान हेतुः
सिद्धो वस्तुधर्मः शुक्लादयो हि
गवादिकं सजातीयेभ्यः कृष्ण
गवादिभ्यो व्यावर्तयतीति।
साहित्यदर्पणे अपि च द्रव्यत्व
व्यापकतावच्छेदक सत्तान्य
मत्वे तदर्थः तद्यथा रूपं



रसः गंधः ३ स्पर्शः ४ संख्या ५ ॥
परिमाणं ६ पृथक्त्वं ७ संयोगः ८
विभागः ९ परत्वं १० अपरत्वं ११
बुद्धिः १२ सुखं १३ दुःखं १४ इच्छा
१५ द्वेषः १६ यत्नः १७ गुरुत्वं १८
द्रवत्वं १९ स्नेहः २० संस्कारः २१
धर्मः २२ अधर्मः २३ शब्दः २४
इति भाषापरिच्छेदः अप्रधाने
सूदः इंद्रिये त्यागः वटी ।
इतिमेदिनी भीमसेनः ॥
तंतुः दोषान्यविशेषणे इति
हेमचंद्रः विद्यादि इति ॥
विश्वः व्याकरणोक्त संज्ञा ॥
विशेषः यथा इ उ ऋ ऌ एङ् एडः
अस्यार्थः इ उ ऋ ऌ एषां ।
स्थाने यत्र अर् अल् यत् गुण
संज्ञा भवति इतिमुग्धबोधे ॥
काव्य गुणस्य लक्षणं यथा ये
रसस्यांगिनो धर्माः शौर्यादय
इवात्मन उत्कर्षहेतवस्तेस्यु ॥
रचलस्थितयो गुणाः इति
काव्यप्रकाशः तस्य भेदाः ॥
श्लेषः प्रसादः समता माधुर्य्य
सुकुमारता अर्थव्यक्तिरुदारत्व
मोजः कांति समाधयः इति ।
वैदर्भमार्गस्य प्राणादशगुणाः
स्मृताः इति दंडी माधुर्य्यौजः

प्रसादाख्यास्त्रय स्तेन पुनर्दश
तस्पदशसंख्याभावे हेतुर्यथा
केचिदंतर्भवंत्येषु दोषत्यागात्
परेश्रिताः अन्येभजंति दोषत्वं
कुत्रचित्र ततोदश इति भरत
मुनिः स्मृतक्त गुणविशेषा
उपवास शब्दे द्रष्टव्याः ॥
गुणकः पुं पूरकांके यथा ॥
गुणोत्यमेकं गुणकेनहन्यात्
इतिलीलावती ॥
इति गुणकारे पुं भीमसेनः इति
त्रिकांडशेषः गुणकारके त्रि
गुणं करोतीत्यर्थे कृत्याताः ॥
कर्त्तरिघण् प्रत्ययेन निष्पन्नःति
गुणज्ञः त्रि गुणवेत्ता यथागुणि
गुणज्ञो रमते नागुणशीलस्य
गुणि निपरितोषः अलिरेति
वनात्कमलं नहि भेकस्त्वेक
वासोपि इत्युद्भटः ॥
गुणनिका स्त्री नृत्यमृत्यांके
पाठनिश्चयः इति मेदिनी ॥
माला इत्यानंदलहरीटीका
गुणनी स्त्री पाठनिश्चयः तत्
पर्य्यायः भविनी २ शीलने ३
इति त्रिकांडशेषः ॥
गुणनीयः पुं शास्त्राद्यभ्यासः
इति हारावली ॥

गुणप्रेशः पुं गुणनाशः तत्
पर्य्यायः पर्य्यंतिका २ इति
हारावली ॥ (गृहे
गुणलयनिका स्त्री वस्त्रनिर्मित
तत्पर्य्यायः केणिका २ पटकुटी
३ इति हेमचंद्रः ॥
गुणलनी स्त्री गुणलनिका इति
हलायुधः ॥
गुणवान् त्रि संबंधी इति
त्रिकांडशेषः गुणविशिष्टः यथा
दातादयालुगुणवान्नरःस्यात्गरे
येषामुपकारकर्ता इति ॥
कोष्टीप्रदीपः ॥ लेभः
गुणहृत्तकः पुं नौकगुणवंधन
मास्तूल इति भाषा तत्पर्य्यायः
कूपकः २ इत्यमरः ॥
गुणसागरः पुं ब्रह्मा इति
त्रिकांडशेषः सकलगुणाधारश्च
गुणा स्त्री दूर्वा मांसरोहिणी ।
इति राजनिर्घंटः ॥
गुणाकरः पुं बुद्धः इति ॥
शब्दरत्नावली गुणयुक्ते त्रि ॥
यथा तपस्यभिरतस्याद्य
पुत्रो गुणाकरः
सत्यवान् नामदेवर्षे
मनसा संहृतो ॥
मया इति ॥

वनपर्व्वणि सावित्रीव्रतकथा
गुणितः त्रि पूरितः तत्पर्य्यायः
आहतः २ इत्यमरः यथा ॥
पंचधा गुणिता द्वादशसंख्याषष्टि
भवतीत्यादि इति भरतः ॥
पिंडितः इति शब्दरत्नावली
गुणी पुं धनुः इति त्रिकांडशेषः
गुणविशिष्टे त्रि यथा गुणिगुण
गणनारंभे न पतति कठिनी
ससंभ्रमाद्यस्य तेनांबायदि ॥
इति हितोपदेशः ॥
गुणीभूतः त्रि अप्रधानीभूतः
यथा कृतपूर्वी कट मित्यत्र ॥
समासनिविष्टत्वाद्गुणीभूताद्विशेषः
बोधिका द्वितीया नोक्ता इति
ससे कविराजः ॥
यथा अताटपि गुणीभूतव्यंग्य
व्यंग्येतमध्यमे तस्याष्टौ ॥
भेदाः यथा अगूढ अपरस्यांगं
वाच्यसिद्ध्यंगमस्फुटं संदिग्धतुल्य
प्राधान्ये काक्वाक्षिप्त मसुंदरं
व्यंग्यमेवं गुणीभूतव्यंग्यस्याष्टौ
भिदा मताः अगूढं
यथा स्फुटतया
वाच्यायमान
मिति अपरांगं
यथा अपरस्य रसादे ॥



वाच्यस्य वाच्याधीभूतस्य व्यंग्यं ॥
रसादि अनुरणन रूपं वा
वाच्यसिद्ध्यंगं यथा आयातत:
प्रतीतस्य वाच्यार्थस्य प्रतिसंधी
यमानान्वयपति निरासकं व्यंग्य
अस्फुटे यथा विदग्धे ॥
रपि क्लेशगम्यं संदिग्धप्राधान्ये
यथा प्राधान्यमत्र रसादिव्यंजकत्वे
नत याच प्रतीतस्य रसादेर्व्यंजके
किंवाच्यं किंवा व्यंग्यमित्यो नत्र।
कालिकसंदेहविषयत्वे तत्वं
तुल्यप्राधान्ये यथा अत्रापि।
रसादि व्यंजकत्वेनैव प्राधान्ये
व्यंग्यस्य निश्चितत्वेन तेनतेन।
वाच्येन तुल्यार्थो बोध्यः ॥
काक्वाक्षिप्तं यथा आक्षिप्तमत्र
प्रागेवपदार्थविषयया उपस्थापने
असुंदरं यथा रसादि ॥
व्यंजने वाच्यमुखनिरीक्षकेव्यंग्ये
इति काव्यप्रकाशः ॥
गुणेश्वरः पुं चित्रकूटपर्वतः इति
शब्दरत्नावली गुणपत्नी त्रि।
गुणोत्कर्षः पुं गुणप्राधान्यं।
अतिशयः तत्पर्य्यायः परभागः
२ इति हेमचंद्रः ॥
गुणोत्कीर्तनं क्ली गुणकथनं
विरहकालीन कांता विषयक

प्रशंसा प्रति पादने इति ॥
रसमंजरी कांतापदमत्रोप ॥
लक्षणं ॥
गुंठितः त्रि गुंडितः इत्यमर ॥
टीकायां रमानाथः ॥
गुंडः पुं तृणभेदः यस्य कंदः
कशेरु तत्पर्य्यायः कांड गुंडः २
दीर्घकांडः ३ त्रिकोणकः ४
छत्रगुच्छः ५ असितपत्रः ६ नीलपत्रः
७ त्रिधारकः ८ अस्य गुणाः
मधुरत्वं शीतत्वं कफपित्ताति
सार दाह रक्तनाशित्वं अस्य
मध्ये स्थूलतरोऽधिक गुणः इति
राजनिर्घंटः ॥
गुंडकः पुं मलिनः धूली ॥
कलोक्तिः स्नेहपात्रे इति
मेदिनी ॥
गुंडकंदः पुं कशेरु इति
राजनिर्घंटः ॥
गुंडारोचनिका स्त्री वृक्षविशेषः
कमलागुंडि इति भाषा तत
पर्य्यायः कांपिल्लकः २ रक्तांगः
इति रत्नमाला ॥
गुंडाला स्त्री तृणक्षुपविशेषः
तत्पर्य्यायः जलोद्भूता २ (गुंडाः
गुच्छवधा ३ जलाशया ४ अस्या
कटुत्वं तिक्तत्वं उष्णत्वं शोष

व्रणनाशित्वंच इति राजनिर्घंटः
गुंडासिनी स्त्री तृणभेदः तत
पर्य्यायः गुंडाला २ गुंडला ३
गुच्छमूलिका ४ चिपिटा ५ तृणप
त्री ६ यवासा ७ श्रुपुला ८ विष्टरा ९
अस्या गुणाः कटुत्वं पित्त दाह
श्रम श्वयथु व्रणदोष नाशित्वं
तिक्तत्वं उष्णत्वंच इति ॥
राजनिर्घंटः ॥
गुंडिकः पुं स्त्री गुंडकः ॥
तंडुलादिचूर्णं गुंडा इति भाषा
यथा गुंडिकैः सित पीतैश्च ॥
मंडयेती गृहांगणं इत्यनेन त ॥
व्रत कथा ॥
गुंडिचा स्त्री श्रीपुरुषोत्तमदेवस्य
रथारोहणेन तत् वासार्थं मंडप
विशेषः यथा मंडपे वा सये ॥
देवान् गुंडिचाख्ये मनोहरे।
चारुचंद्राकैः चारुमाल्यचामरे
भूषिते रत्नस्तंभमये स्वर्ण
वेदिकोपरितोत्तरे प्राचीर ॥
वलयावीते सुधालेपसमुज्ज्व
ले साधुसोपानघटिते चतुर्द्वारे
पे शोभिते त्रैलोक्याडंबरपुते
महावेद्यां महाक्रतोः शाडे ॥
भीमो महेशस्य यात्राभूद्दारु
वर्ष्मणः तस्यां श्रीजगन्नाथ

देवस्य दर्शनफलं यथा विंदतीर्थ
तटे तस्मिन् समाह्यानि जनार्द्दनः
तिष्ठति पुरा स्वयं राजेंद्रवरमेतत्
समादिशत् तत्तीर्थतीरे राजेंद्र
स्याप्यामि प्रतिवासरं सर्वतीर्थानि
तस्मिंश्चस्या स्यंति मयि तिष्ठति
तत्र स्नात्वा विधानेन तीर्थे तीर्था
यथा वने समाह्ने ये प्रपश्यंति।
गुंडिचामंडपे स्थिते मांच रामे
सुभद्रांच ममसायुज्यमाप्नुयुः
तस्यानामकारणं यथा अतऊर्द्ध
प्रवक्ष्यामि महावेदी महोत्सवे
अज्ञान तिमिरांधोपि येन
भास्वत् पदं भजेत् सर्व पाप ॥
रजः शंसात्या पूज्यत्वात् सर्व
देवतैः गुंडिचाख्यापि सायात्रा
अस्मिंतेजोवगुंठनात् इत्युत्कल
खंडे ॥ ल्लितः
गुंडितः त्रि धूलिगुंडकेनैवम
तत्पर्य्यायः रूषितः २ इत्यमरः
चूर्णीकृतश्च ॥ (ला ॥
गुत्सः पुं गवेधुका इति रत्नमा
गुत्सकं क्ली ग्रंथि पर्णी इति
रत्नमाला ॥
गुत्सः पुं स्तवकः स्तंबः ॥
द्वात्रिंशयष्टिक हारः ग्रंथिपर्णा
हारः इति मेदिनी ॥



गुल्लकः पुं ल्लवकः इति
शब्दरत्नावली ग्रंथिपरिच्छेदः
इति त्रिकांडशेषः ॥
गुल्लकपुष्पः पुं समष्ठदवृक्षः
इति जटाधरः ॥ ति
गुल्लाङ्कः पुं गुच्छार्द्धः चतुर्विंश
यष्टिकहारः इत्यमरटीकायां
भरतः गुच्छेव अर्द्धोति वर्द्धते
इति व्युत्पत्तिः ॥ (मः
गुद उ खेले इतिकविकल्पद्रु
गुदं क्ली मलत्यागद्वारं तत्
पर्य्यायः अपानं २ पायुः ३
इत्यमरः गुह्यं ४ गुदवर्त्म ५
इतिजटाधरः ॥
गुदकीलः पुं अर्शोरोगः इति
राजनिर्घंटः ॥
गुदकीलकः पुं अर्शोरोगः इति
राजनिर्घंटः ॥
गुदकीलकः पुं गुदकीलः इति
हलायुधः ॥
गुदग्रहः पुं उदावर्त्तरोगः ॥
इति हेमचंद्रः ॥
गुदभ्रंशः पुं रोगविशेषः तस्य
लक्षणं प्रवाहणातिसाराभ्यां
निर्गच्छति गुदं बहिः रूक्षदुर्बल
देहस्य गुदभ्रंशं तमादिशेत इति
माधवकरः पुं अर्शोरोगः इतिहेमचंद्रः

गुद इ क मिथ्योक्तौ इति
कवि कल्प द्रुमः ॥
गुध गरुषि इतिकविकल्पद्रुमः
गुध उ क्रीडा इतिकविकल्पद्रुमः
गुधपवेष्टे इतिकविकल्पद्रुमः
गुधेरः त्रि रक्षकः इति ॥
सिद्धांतकौमुद्या मुणादिवृत्तिः
गुदलः पुं मर्द्दल शब्दः इति
हेम चंद्रः ॥
गुंद्रः पुं शरतृणे इत्यमरः ॥
तृणविशेषः गोंदपटेर इति
देशांतरीय भाषा तत्पर्य्यायः
पटेरकः २ अलुः ३ श्रृंगवेराह्व
मूलकः ४ अस्य गुणाः कषायत्वं
मधुरत्वं हिमत्वं पित्तरक्त मूत्र
कृच्छ्रनाशित्वं स्तन्य शुक्ररजोमूत्र
मधुरत्वं हिमत्वं पित्तरक्तमूत्र
कृच्छ्रनाशित्वं स्तन्य शुक्ररजोमूत्र
शोधनत्वंच इतिभावप्रकाशः
गुंद्रमूला स्त्री परकातृणे इति
भावप्रकाशः ॥
गुंद्रा स्त्री भद्रमुस्तकः प्रियंगुवृक्षः
इत्यमरः गवेधुका इतिरत्नमाला
परका इति भावप्रकाशः गुंद्रालः
पुं जीवंजीवपक्षी इतिहेमचंद्रः
गुंद्रालो पिपाटः गुफ शब्दे ग्रंथे इति
कविकल्पद्रुमः गुप ऊ गोपनेक

इति कविकल्पद्रुमः ॥

गुप ऊ रक्षे इतिकविकल्पद्रुमः
गुप यङ व्याकुलत्वे इति
कविकल्पद्रुमः गुपक भासि
इतिकविकल्प द्रुमः ॥ (मः
गुपिलः पुं राजा इत्युणादिको
गुप्तं त्रि कृत रक्षणे तत्
पर्य्यायः त्रातं २ त्राणं ३
रक्षितं ४ अवितं ५ गोपायितं
६ कृतगोपनं तत्पर्य्यायः ७
गूढं २ इत्यमरः संगतं इति
शब्दरत्नावली वैश्य शूद्राणां
पद्धति विशेषे पुं यथा गुप्त
दासात्मकं नाम प्रशस्तं वैश्यप
शूद्रयोः इत्युद्वाह तत्वं ॥
गुप्तगतिः पुं चरः इति
शब्द रत्ना वली ॥
गुप्तचरः पुं बलदेवः इति।
त्रिकांडशेषः ॥
गुप्तस्नेहः पुं अंकोटवृक्षः इति
राजनिर्घंटः ॥
गुप्ता स्त्री कपिकच्छुः इति
राजनिर्घंटः परकीयांतर्गत।
नायिकाभेदः तस्यालक्षणं।
मैथुन गोपने सा च त्रिधा।
वृत्तसुरत गोपना १ वर्त्तिष्यमाण
सुरतगोपना २ वृत्तवर्त्तिष्यमाण
सुरतगोपना ३ इतिरसमंजरी

गुप्तिः स्त्री अवकरस्थानं ॥
कारागारे रक्षणे इति
मेदिनीभूगर्त्ते यमः इति
हेमचंद्रः गर्त्तीर्थे स्तिते कृत
खनने नौकाछिद्रे इत्यमर
टीकायां भरतः गोपनं इति
तट्टीकासार सुंदरी ॥ (द्रुमः
गुफ शप ग्रंथे इति कविकल्प
गुफितः त्रि गुंफितः ग्रथितः
इत्यमरटीका
गुंफः पुं ग्रंथनं बाहोरलंकारः
इति मेदिनी श्मश्रु गोंप इति
भाषा इतिशब्दरत्ना वली ॥
गुंफितः त्रि ग्रंथितः इत्यमर
टीकायां राय मुकुटः ॥
गुर ई य ऊ वधे गत्यां इति
कविकल्प द्रुमः ॥
गुर ई ऊ शि उद्यमे इति ॥
कवि कल्प द्रुमः ॥
गुरणं क्ली उद्यमः इत्यमरः
अस्य रूपांतरे गूरणं गोरणं
इति भरतः ॥
गुरुः पुं बृहस्पतिः निषेकादि
कृत् इत्यमरः निषेको ॥
गर्भधानं आदिना सीमंतो ॥
नयनादे मंत्र विद्यादानादेश्च
ग्रहणं तत्कर्त्ता पित्रादि गुरुः



स्यात् इति भरतः कपिकच्छुः।
इति राजनिर्घण्टः द्विमात्रः ॥
दीर्घः इति शब्दरत्नावली ॥
मंत्रद गुरोर्लक्षणं यथा गकारः
सिद्धिदः प्रोक्तो रेफः पापस्य
हारकः उकारो विष्णुरव्यक्त ॥
स्त्रितयात्मा गुरुः परः गीतो ॥
दान्तः कुलीनश्च विनीतः शुद्धवेश
वान् शुद्धाचारः सुप्रतिष्ठः ॥
शुचिर्दक्षः सुबुद्धिमानाश्रमी
ध्याननिष्ठश्च मंत्रतंत्रविशारदः
निग्रहानुग्रहे शक्तो गुरुरित्यभि
धीयते उद्धर्त्तुं चैव संहर्त्तुं ॥
समर्थो ब्राह्मणोत्तमः तपस्वी
सत्यवादी च गृहस्थो गुरुरुच्यते
देशभेदेन तस्य विशेषो ॥
यथा मध्यदेश कुरुक्षेत्र लाट
कोंकण संभवाः अन्तर्वेदि ॥
प्रतिष्ठाना आवन्त्याश्च गुरूत्तमाः
गौडाः शाल्वोद्भवाः सौराष्ट्रमागधाः
केरला खसा कोशलाश्च ॥
दशार्णाश्च गुरवः समध्यमाः
कर्णाटनर्मदारेवाकच्छातीरोद्
भवास्तथा कालिंगाश्च कलंबाश्च
कांबोजाश्चाधमा मताः वैसवे
वैसवो ग्राह्यः शैवे शैवश्च।
शाक्तिके शैवः शाक्तोपि सर्वत्र ॥

दीक्षा स्वामी न संशयः इति
तंत्रसारः गुरुस्त्रि ॥
द्विजातीनां वर्णानां ब्राह्मणो गुरुः
पतिरेको गुरुः स्त्रीणां ॥
सर्वत्राभ्यागतो गुरुः ॥ इति
चाणक्यं ॥
गुरुः त्रि महान् दुर्जरः अलघुः
इति मेदिनी ॥
गुरुक्रमः पुं इतिह पारंप
र्य्योपदेशः इति हलायुधः
गुरुत्रः पुं गौरसर्षपः इति
राजनिर्घण्टः गुरुहन्ता त्रि
गुरुण्टकः पुं तिलमयूरः इति
त्रिकांडशेषः ॥ (षा
गुरुतल्पगः पुं विमातृगामाय
गुरुतल्पगः सुरापश्च रुक्मस्तेयश्च
विप्रहा महापातकिनस्त्वेते
संसर्गी चैव पंचमः इति
प्रायश्चित्तविवेकः ॥
गुरुत्वं क्ली महत्त्वं गुरुता।
अलघुता यथा अतीन्द्रिये
गुरुत्वं स्यात् पृथिव्यादिद्वये तत
तत्र अनित्ये तदनित्यं स्यात्
नित्ये नित्यं मुदाहृते ॥ (ले
तदेतत्समवायि स्यात् पतना
दकर्मणि इति भाषा परिच्छेदः
गुरुदैवतः पुं पुष्यनक्षत्रे ॥

इति हेमचंद्रः ॥
गुरुपत्रं क्ली वंगं इति हेमचंद्रः
गुरुपत्रा स्त्री तिंतिडीवृक्षः ॥
इति शब्दरत्नावली ॥
गुरुमर्द्दलः पुं डिंडिमवाद्ये ॥
इति शब्दरत्ना वली ॥
गुरुरत्नं क्ली पुष्परागमणिः इति
राजनिर्घण्टः ॥
गुरुवर्च्चोघ्नः पुं लिंपाकः ॥
पातिनेबु इति भाषा इति।
शब्दचंद्रिका ॥
गुरुहा पुं गुरुघ्नः तत्पर्य्यायः
नरकीलकः २ इति हेमचंद्रः।
गुर्ज्जरः पुं गुजराट देशः इति
शब्दरत्ना वली ॥
गुर्ज्जरी स्त्री रागिणीविशेषः इति
हलायुधः ॥
गुर्द्द उ कूर्द्दे निकेतने इति
कविकल्पद्रुमः ॥
गुर्द्दक निकेतने कूर्द्दे इति ॥
कवि कल्प द्रुमः (मः
गुर्व इ उद्यमे इति कविकल्पद्रु
गुर्विणी स्त्री गर्भिणी इत्यमरः
गुर्वी स्त्री गर्भवती इति
हेमचंद्रः गुरुपत्नी गुरुत्वयुक्ता
यथा अनन्य गुर्व्वा स्तवकेन।

केवल पुराण मूर्त्ते महिमा च
गम्यते इति माघः
गुलः पुं पेलवः गुडः इति
मेदिनी ॥
गुलंच कंदः पुं कंद विशेषः
कुली इति भाषा तत्पर्य्यायः
गुच्छाह्वकंदः २ वल्लाह्वकंदः ३
निच्चेटिका ४ अस्य गुणाः मधुरत्वं
सुशीतलत्वं हृष्यप्रदत्वं तर्पणत्वं
दाहनाशित्वंच इति राजनिर्घण्टः
गुला स्त्री स्नुहीवृक्षः इति
मेदिनी ॥
गुली स्त्री गुटिकारोगभेदः
वसंत इति ख्यातः इति मेदिनी
गुलुकः पुं गुच्छः स्तवकः इति
त्रिकांडशेषः ॥ चंद्रः
गुलुञ्छः पुं गुच्छः इति हेम
गुलुञ्छकः पुं गुच्छः इति
शब्द रत्ना वली
गुल्फः पुं पादग्रन्थिः तत्पर्य्यायः
घुटिका २ इत्यमरः चरणग्रन्थिः
३ घटिकः ४ घुटकः ५ गुंटः ६
इति हेम चंद्रः ॥
गुल्मः पुं रोगविशेषः तस्य
निदानादि दुष्टा वातादयोऽत्यर्थं
मिथ्याहारविहारतः कुर्वंति ॥



पंचधा गुल्मं कोष्ठान्तर्ग्रंथिरूपिणं
तस्य पंचविधं स्थानं पार्श्वे ॥
हृन्नाभि बस्तयः हृन्नाभ्योरंतरे
ग्रंथिः संचारी यदि वाचलः वृत्तश्च
चयापचयवान् स गुल्म इति कीर्तितः
स व्यस्तैर्जायते दोषैः समस्तैः ॥
रप्यथोच्छ्रितैः पुरुषाणां तथा
स्त्रीणां ज्ञेयो रक्तेन चापरः
तस्य पूर्वरूपं यथा उद्गार ॥
बाहुल्य पुरीष बंधतृप्त्यक्षमत्वो
त्रविकूजनानि आटोपमाध्मान
मपक्ति रासन्न गुल्मस्य वदंति
लिंगं तस्य सामान्य रूपं।
अरुचिः कृच्छ्र विण्मूत्रवातता न्त्र
विकूजनं आनाहश्चोर्द्ध्ववातश्च
सर्वगुल्मेषु लक्षयेत् ॥
वातिकस्य निदानं यथा रूक्षान्न
पानं विषमातिमात्रं विचेष्टनं
वेग विनिग्रहश्च शोको ॥
ऽभिघातोऽतिमलक्षयश्च निर
न्नता चानिल गुल्महेतुः ॥
वातिकस्य रूपं यथा यः स्थान
संस्थानरुजा विकल्पं विड्वातसंग
गलवक्त्र शोषं श्यावारुणत्वं
शिशिरज्वरं च हृत्कुक्षिपार्श्वां
स शिरो रुजं च करोति जीर्णे
ऽभ्यधिके प्रकोपं भुक्ते मृदुत्वं।

समुपैति पैति यश्चावातात्स गुल्मो
नच तत्र रूक्षं कषाय तिक्तं कटु
चोपशेते पैत्तिकस्य निदानं ॥
यथा कट्वम्ललवणोष्णविदाहिरूक्ष
क्रोधातिमद्यार्क हुताश सेवा
आमाभिघातो रुधिरं च दुष्टं
पैत्तस्य गुल्मस्य निमित्तमुक्तं।
पैत्तिकस्य रूपं यथा ज्वरः ॥
पिपासा वदनांगरागः शूले
महज्जीर्यति भोजनेच स्वेदो
विदाहो व्रणवच्च गुल्मः स्पर्शासहः
पैत्तिकगुल्मरूपं श्लैष्मिकस्य
निदानं शीतगुरुस्निग्धमचेष्टनंच
संपूर्णाशस्वपनं दिवाच गुल्मस्य
हेतुः कफसंभवस्य सर्वस्तु दृष्टो
निचयात्मकस्य श्लैष्मिकस्य
रूपं स्तैमित्य शीतज्वरगात्रसाद
हृल्लास कासारुचि गौरवाणि
शैत्यं रुगल्पा कठिनोन्नतत्वं
गुल्मस्य रूपाणि कफात्मकस्य
द्वंद्वजस्य रूपं यथा निमित्त
लिंगान्युपलभ्य गुल्मे द्विदोषजे
दोषबलाबलं च व्यामिश्रलिंगानि
परांश्च गुल्मांस्त्रीनादिशेदौषध
कल्पनार्थं त्रिदोषजस्य रूपं
यथा महारुजं दाहपरीतमश्म
वदुन्नतं शीघ्रविदाहि दारुणं

मनः शरीराग्नि बलापहारिणं
त्रिदोषजं गुल्ममसाध्यमादिशेत्
अथ स्त्रीणां रक्तज गुल्म ॥
निदानं यथा नवप्रसूताहित
भोजना या याचामगर्भं विसृजेत्
दृतौ वा वायुर्हि तस्याः परिगृह्य
रक्तं करोति गुल्मं सरुजं ॥
सदाहं स्त्रीणां रक्तज गुल्म ॥
लक्षणं यथा पैत्तस्य लिंगेन ॥
समानलिंगो विशेषणं चाप्यपरो
निर्वीषयः स्पंदते पिंडित एव
तांगैश्चिरात् सशूलः समगर्भ
लिंगः सशोणितः स्त्रीभव एव गुल्मो
मासे व्यतीते दशमे चिकित्स्यः
स्त्रीणामार्तरजो गुल्मो न पुंसा
मुपजायते अन्यस्त्वसृग्भवो गु
ल्मः स्त्रीणां पुंसां च जायते
अथासाध्य लक्षणं यथा संचितः
क्रमशो गुल्मो महावास्तुपरिग्रहः
कृत मूलः शिरानद्धो यदा कूर्म
इवोन्नतः दौर्बल्यारुचिहृल्लास
कासछर्द्यरति ज्वरैः तृष्णातंद्रा
प्रतिश्याये र्युज्यते न स सिध्यति
गृहीत्वा सज्वरं श्वासछर्द्यतीसार
पीडितं हृन्नाभि हस्तपादेषु।
शोथः कर्षति गुल्मिनं श्वासः
शूले पिपासान्न विद्वेषो ग्रंथि

मूढता जायते दुर्बलत्वं च गुल्मिनो
मरणाय वै इति माधवकरः ॥
सेना संख्या विशेषः अत्र गजा
नवरथा नवअश्वाः सप्तविंशतिः
पदातयः पंचचत्वारिंशत् समुदायेन
नवतिः स्त्रीहा अप्रकांडवृक्षः
तत्पर्य्यायः स्तंबः २ इत्यमरः
अविद्यमान प्रकांडस्तनुप्रकांडो
वा वहुपत्रवान् मल्ली झिंटी नल
कमल वेणु वीरणादिः मूला
दारभ्य पूर्वभागः प्रकांडः इति
भरतः चट भेदः सैन्यरक्षणे
इति मेदिनी ॥
गुल्मकेतुः पुं अम्लवेतसः इति
राज निर्घंटः ॥
गुल्म मूले क्ली आर्द्रके इति
राजनिर्घंटः ॥
गुल्मवल्ली स्त्री सोमलता इति
राज निर्घंटः ॥
गुल्मिनी स्त्री विस्तृतालता तत्
पर्य्यायः वीरुत् २ उलपः ३
इत्यमरः ॥
गुल्मी स्त्री आम्लकी एला
वनी वस्त्र वेश्म इति मेदिनी
शाह रत्नावल्यां हेमचंद्रश्च
गृध्रनखी हस्तः गुडकोमली इति
भाषा इति शब्दचंद्रिका ॥

गुल्मरोग युक्ते त्रि ॥
गुल्यः पुं मधुरः स्वादुः इति
हेमचन्द्रः ॥
गुवाकः पुं वृक्षविशेषः गुया
सुपारि इति च भाषा तत्पर्य्यायः ॥
घोंटा २ पूगः ३ क्रमुकः ४ खपुरः
५ इत्यमरः गूवाकः ६ इति ॥
तट्टीका पूगवृक्षः ७ दीर्घपादपः
८ वल्कतरुः ९ दृढवल्कः १०
चिक्कणः ११ इति राजनिर्घण्टः
पूगी १२ इति भावप्रकाशः ॥
सुरंजनः १३ गोपदलः १४
राजतालः १५ छटाफलः १६ इति
त्रिकाण्डशेषः अस्य फलस्य ॥
पर्य्यायः क्रमुकफलं १ पूगं २
चिक्कणी ३ चिक्का ४ चिक्कणं ५
स्नद्गाके ६ उद्वेगं ७ पूगफलं ८ इति
राजनिर्घण्टः पूगीफलं ९ इति
भावप्रकाशः अस्य मलिकस्य
गुणाः स्वादुत्वं तिक्तत्वं कषायत्वं
बल्यप्राण शुक्रवृद्धि भेद मद।
कारित्वं मूत्ररोगनाशित्वं च इति
राजवल्लभः अस्य निर्य्यासस्य ॥
गुणाः हिमत्वं मोहनत्वं ॥
गुरुत्वं विपाके उष्णत्वं लावत्वं ॥
साम्लत्वं वातघ्नत्वं पित्तलत्वं च।
अस्य फलगुणाः संमोहकारित्वं

कषायत्वं स्वादुत्वं रेचनत्वं ॥
त्रिदोषशमनत्वं रुच्यत्वं वक्त्र।
क्लेदमलापहत्वं च इति ॥
राजनिर्घण्टः गुरुत्वं रूक्षत्वं
कफपित्तकारित्वं दीपनत्वं च।
आर्द्रस्य तस्य गुणाः गुरुत्वं ॥
अभिष्यन्दित्वं अग्निदृष्टिहरत्वं च
स्विन्नस्य तस्य गुणाः दोषत्रय
छेदित्वं दृढमध्ये तदुत्तमे ॥
इति भावप्रकाशः ॥
आमपूगस्य गुणाः कषायत्वं ॥
मुखमलरक्तामश्लेष्मपित्तो
दराध्माननाशित्वं कंठशुद्धि
कारित्वं सारकत्वं च ॥(अन्ते
शुष्कस्य तस्य गुणाः कंठामय
रुचिकरत्वं पाचनत्वं रेचनत्वं च
तत् ताम्बूलेनान्मधुतं च ॥
चेत कठिति पांडुवात शोथ ॥
कारित्वं च इति राजनिर्घण्टः ॥
तत्प्रयोग गुणाः तस्यादियोगे
विषतुल्यं द्वितीययोगे भेदकं
दुर्जरं वा तृतीययोगे पानोपयुक्ते
तथा तुल्यं रसायनं च इति
॥ राजवल्लभः ॥
गुह ऊ उ संवृतौ इति ॥
कविकल्पद्रुमः ॥
गुहः पुं कार्त्तिकेयः इत्यमरः।

घोटकः इति शब्दरत्नावली।
श्रीरामसखः सन् शृंगवेर ॥
पुरवासी निषादाधिपतिः इति
रामायणे विष्णुः इति तस्य सहस्र
नाममध्ये पठितः कायस्थानां
पद्धतिविशेषश्च ॥
गुहा स्त्री सिंहपुच्छीलतागर्त्तः
पर्वतादेर्गह्वरे इति मेदिनी
शोषस्य पर्य्यायः बिलं २।
शिलासंधिः ३ देवखातं ४
गह्वरं ५ शालपर्णीवृक्षः इति
राजनिर्घण्टः ॥
गुहाशयः पुं व्याघ्रः इति।
राजनिर्घण्टः विष्णुः यथा।
तावन्स भगवान् साक्षात् ॥
योगाधीशो गुहाशयः अन्तर्दधे
ऋषेः सद्यो यथेहानी शान्तिमिता
इति श्रीभागवते ॥
गुहिनं क्ली वने इति ॥
शब्दरत्नावली ॥
गुहिलं क्ली धने इत्युणादिको(षः)
गुहेरः पुं लौह कारः ॥
इत्युणादिकोषः गोप्ता इति
संक्षिप्तसारे उणादिवृत्तिः ॥
गुह्यं क्ली उपस्थः सन्भगो लिंगं च
रहस्ये त्रि इत्यमरः गोप्ये ॥
तत्पर्य्यायः विविक्तः १ विजनः २

कूत्रः ४ निःशलाकः ५ रहः ६
उपांशु ७ गूढं ८ उपह्वरं ९
इति जटाधरः ॥
गुह्यः पुं कमठः दम्भः इति
मेदिनी विष्णुः इति तस्य ॥
सहस्रनाममध्ये पठितः ॥
गुह्यकः पुं देवयोनिविशेषः
सतु कुवेरानुचरः निधिरक्षको
मणिभद्रादि यक्षभेदः इत्यमरः
भरतो तस्य लोकः पिशाच।
लोकादूर्द्ध्वं गंधर्वलोकादधः यथा
ततो गच्छेद् दर्शनीये रूपशुभ्र
जनैर्वृते पिचिंडिलैः स्थूलवक्त्रै
मेघगंभीरनिस्वनैः लोके ॥
इध्युषिते लोके श्यामलैर्गौरैश्च
लोमशैः गणो कथ्यते के
ऽमीको लोकः पुण्यतः कृतः
गणा ब्रुवतः गुह्यकानामयं
लोक स्तेते वै गुह्यकाः स्मृताः
न्यायेनोपार्ज्य वित्तानि गूहयन्तिव
ये भुवि स्वमार्गगा धनाढ्याश्च
मूढप्रायाः कुटुंबिनः संविभज्य च
भोक्तारः क्रोधाहृष्याविवर्जिताः
नतिथिंनैवबारं च संक्रांत्यादिन
पर्वं च नाधर्मं च न धर्मं च विदन्ते
ते सदा सुखाः एकमेव हि ॥
जानेति कुलपूज्योहियो द्विजः

तस्मै गाः संप्रयच्छेति मन्यते। तद्वचः स्फुटं समृद्धि भाजो
ह्यत्रापि तेन पुण्येन गुह्यकाः
भुंजते स्वर्ग सौख्यानि देववत्
मकुतोभयाः इति काशीखंडे
शिवशर्म्मणो वैकुंठलोकगमने
विष्णुगणसंवादः ॥
गुह्यकेश्वरः पुं कुवेरः इत्यमरः
गुह्यगुरुः पुं शिवः इति ॥
त्रिकांडशेषः ॥
गुह्यदीपकः पुं खद्योतः इति
शब्दचंद्रिका ॥
गुह्यनिष्यंदः पुं मूत्रे इति
राजनिर्घंटः ॥
गुह्यपुष्पः पुं अश्वत्थवृक्षः इति
राजनिर्घंटः ॥
गुह्यभाषिते क्ली मंत्रः इति
जटाधरः गुप्त वाक्ये च ॥
गुह्यबीजः पुं भूतृणे इति
राजनिर्घंटः ॥
गू क्षि विड्डुत्सर्ज्जे इति।
कविकल्पद्रुमः ॥
गूः पुं गुः विष्ठा गू धातोः
कर्म्मणि क्विप् प्रत्ययेन
निष्पन्नः ॥
गूढं क्ली रहः गुह्यं इति
मेदिनी ॥

गूढः त्रि संवृतः गुप्तः इत्यमर
मेदिनी करौ ॥
गूढजः पुं गूढोत्पन्नपुत्रः इति
मिताक्षरा ॥
गूढनीडः पुं खंजनपक्षी इति
शब्दमाला ॥
गूढपत्रः पुं करीरवृक्षः अंकोट
वृक्षः इति राजनिर्घंटः
गूढपथः पुं अंतःकरणं इति
हेमचंद्रः गुप्तपथश्च ॥
गूढपात् पुं सर्पः इत्यमरः
गूढपादः पुं सर्पः इति
शब्दरत्नावली ॥ इति
गूढपुष्पकः पुं वकुलवृक्षः
गूढपुरुषः पुं चरः इत्यमरः ॥
राजनिर्घंटः ॥
गूढफलः पुं वदरः इति ॥
राजनिर्घंटः
गूढमार्गः पुं भुवोऽन्तरमार्गः
सुडंग इति भाषा तत्पर्य्यायः
सुरंगा २ संधिला ३ इति ॥
हेमचंद्रः ॥
गूढमैथुनः पुं काकः इति
त्रिकांडशेषः ॥
गूढवर्च्चाः पुं भेकः इति॥
त्रिकांड शेषः ॥

गूढवल्लिका स्त्री अंकोटवृक्षः
इति राजनिर्घंटः ॥
गूढसाक्षी त्रि योऽर्थिना गूढतया
प्रत्यर्थिवचने श्रावितः सः
फरियादी गोपने राखिया ॥
आसामीर कथायाहा के ॥
शुनाइयाछे सेइ साक्षी इति।
भाषा तथा च नारदः अर्थिना
स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटं
यः श्राव्यते स्थितो गूढो गूढसाक्षी
स उच्यते इति व्यवहारतत्त्वं॥
गूढांगः पुं कच्छपः इति
राजनिर्घंटः ॥
गूढांघ्रिः पुं सर्पः इति
राजनिर्घंटः ॥
गूढोत्पन्नः पुं द्वादशविधपुत्र।
मध्ये पुत्रविशेषः यथा उत्
पद्यते गृहे यस्य न च ज्ञायेत ॥
कस्य सः स गृहे गूढ उत्पन्न।
स्तस्य स्याद्यस्य तल्पजः इति मनुः
अस्यार्थः यस्य गृहेऽवस्थितायां
भार्य्यायां पुत्र उत्पद्यते ॥
सजातीयोऽयं भवतीति ॥
ज्ञानेऽपि ॥
कस्मात् पुरुषविशेषाज्जातो
ऽसाविति न ज्ञायते स गृहे॥
अंभकाशामुत्पन्न स्तस्य पुत्रः

स्यात् यदीयायां भार्य्यायां ज्ञातः
इति कुल्लूकभट्टः ॥
गूथं क्ली विष्ठा गु इति भाषा
इत्यमरः ॥
गूथलकः पुं पक्षिविशेषः।
गूवेसालिक इति भाषा तत्
पर्य्यायः शारमल्लः २ लद्दचूडः ३
सालिकः ४ इति शब्दचंद्रिका
गूनः त्रि कृतपुरीषोत्सर्गः
तत्पर्य्यायः हन्नः २ इत्यमरः।
गूर ङ क उद्यमे इति ॥
कविकल्प द्रुमः ॥
गूर ई ङ य वधे गत्यां इति
कविकल्प द्रुमः ॥
गूरणं क्ली उद्यमः इत्यमरटीकायां
रायमुकुटः ॥
गूर्द्द ङ निकेतने कूर्द्दे इति
कविकल्पद्रुमः ॥
गूर्द्द क निकेतने कूर्द्दे इति
कविकल्प द्रुमः ॥
गूवाकः पुं गुवाकः इति
शब्दरत्नावली ॥
गूषणा स्त्री मयूरचंद्रकः
मयूरपिच्छ ॥
चक्रं इति शब्दचंद्रिका ॥
गृ ० सेके इतिकविकल्पद्रुमः
गृज ० ध्वनौ इतिकविकल्पद्रुमः



गृज इ ध्वनौ इतिकविकल्पद्रुमः
गृञ्जनं क्ली विषदिग्धपशोर्मांसं
इतिमेदिनी मूलविशेषः ॥
सलगम इति ख्यातः तत्
पर्य्यायः शिखिमूलं २ यवनेष्टं
३ वर्त्तुलं ४ ग्रन्थिमूलं ५ शिखाकंदं
६ कंदं ७ डिंडीरमोदकं ८ ॥
अस्य गुणाः कटुत्वं उष्णत्वं कफ
वातरोग गुल्मनाशित्वं रुच्यत्वं
दीपनत्वं लघुत्वं दुर्गंधत्वं च।
इतिराजनिर्घंटः ॥
गृञ्जनः पुं रसोनकः रतन्।
इतिभाषा इतिमेदिनी ॥
शकलसुनः इतिराजनिर्घंटः
गृञ्जवः पुं दुष्टमृगालः वउ।
शियाल इतिभाषा तत्पर्य्यायः
लोपाकः २ इतिहेमचंद्रः ॥
गृत्सः पुं कंदर्पः इत्युणादिकोषः
गृध इ ऊ यउ लिप्स इति
कविकल्प द्रुमः ॥
गृधुः पुं काम देवः
इत्युणादिकोषः अभिलाषुकः
इतिसंक्षिप्तसारे उणादिवृत्तिः
गृध्नुः पुं बुद्धिः अपाने
कुत्सिते इति ॥
संक्षिप्तसारे ॥
उणादिवृत्तिः ॥

गृध्नुः त्रि लुब्धः इत्यमरः ॥
गृध्नुता स्त्री लुब्धता तत्पर्य्यायः
रागः २ संगः ३ [illegible] इति।
त्रिकांडशेषः ॥
गृध्रः पुं पक्षिविशेषः गृधिनी
शकुनी इतिच भाषा तत्पर्य्यायः
दाक्षाय्यः २ वज्रतुंडः ३ दूरदर्शनः
४ इति राजनिर्घंटः ॥
गृध्रनखी स्त्री कुलिकवृक्षः
कालियाकडा इतिभाषा इति
रत्नमाला कोलिवृक्षः इति
त्रिकांडशेषः ॥
गृध्रपत्रा स्त्री धूम्रपत्रा वृक्षः
इति राजनिर्घंटः ॥
गृध्रराजः पुं जटायुपक्षीपर्य्य
भूयः कनक पुंखाग्रै रेक्तावाणै
रजिह्मगैः निर्विभेद सतीक्ष्णाग्रै
गृध्रराजं शिलाधौतैः इति
रामायणं ॥
गृध्रसी स्त्री वातरोगविशेषः
तस्यलक्षणं यथा स्फिकपूर्वाकटि
पृष्ठोरु जानु जंघापदंक्रमात्
गृध्रसी स्तंभरुकतोदैर्गृह्णाति
स्पंदते मुहुः वाताद्वातकफा
तंद्रा गौरवा रोचकान्विता।
इति।
माधवकरः ॥

गृध्रानी स्त्री धूम्रपत्रा वृक्षः इति
राजनिर्घंटः ॥
गृष्टिः स्त्री एकवारप्रसूता गौः
तत्पर्य्यायः सकृत्प्रसूतिका।
२ इतिहेमचंद्रः वाराहक्रांता ॥
इत्यमरः बदरवृक्षः इति।
मेदिनी काश्मरी इति
राजनिर्घंटः ॥ (ल्पद्रुमः
गृहतक ऊ ग्रहणे इतिकविक
गृहं क्ली इष्टकादिरचितवासस्थ
ने घर इतिभाषा तत्पर्य्यायः ॥
गेहं २ उदवसितं ३ वेश्म ॥
४ सद्म ५ निकेतनं ६ निशांतं।
७ वस्त्यं ८ सदनं ९ भवनं ॥
१० अगारं ११ मंदिरं १२ ॥
गृहाः १३ निकाय्यः १४ निलयः
१५ आलयः १६ वासः १७ कुटः १८
शाला १९ सभा २० इत्यमरः ॥
पस्त्यं २१ सादनं २२ आगारं ॥
२३ कुटिः २४ कुटी २५ गेहः २६
निकेतः २७ साला २८ मंदिरा २९
ओकः ३० इतिभरतः निवासः ३१
वासः ३२ संवासः ३३ आवासः
३४ अधिवासः ३५ निवसति ३६
वसतिः ३७ केतनं ३८ इति
शब्दरत्नावली अथगृहारंभ।
कालः वैशाखश्रावणाषाढ ॥


मार्गफाल्गुनकार्त्तिकाः सुप्रशस्ता
गृहारंभे पत्नी पुत्र समृद्धिदाः
शुक्लपक्षे भवेत्सौख्यं कृष्णपक्षे
भवेद्भयं आदित्य भौमवर्ज्जं तु
सर्ववाराः शुभावहाः पूर्णिमा
द्यष्टमी यावत् पूर्वास्यं ॥
वर्जयेद्गृहं उत्तरास्यं नकुर्वीत
नवम्यादिचतुर्दशीं अमावस्या
ऽष्टमी यावत् पश्चिमास्यं ॥
विवर्जयेत् नवम्यादित थायाम्यं
यावच्छुक्लचतुर्दशी वज्रव्याघात
शूलेषु व्यतीपातातिगंडयोः
विष्कुंभगंडयोश्चैव गृहारंभे।
नकारयेत् आदित्यहृदयरोहिणी
मृगशिरोज्येष्ठा धनिष्ठानरा
रेवत्याश्च मघानुराधहस्तिभिः
शुद्धे स्वभावादिभिः सौम्यानो
दिवसेषु गेहरहिते योग ॥
विरिक्ते तिथौ विष्टौ त्यक्तदिने
वदंति मुनयो वेश्मादिकार्य्य
शुभतिथिभि तिथिभिर्वेश्मनि ॥
कृत्तिकाश्चेत्कर्कषपुत्राग्निधनानि
शोकाः शत्रोर्भये राजभयेच
मृत्युः संविप्रवासश्चनवप्रभेदाः
नाशोदिशंति मकरालिकुलीर
लग्नेमेषे धटेधनुषिकार्म्महेदीर्घ
सत्वेकन्या झसे मिथुनके धव

मर्घला भोज्योतिर्विदः कलस
सिंहद्वयेषु हर्षि इति युक्ति ॥
कल्पतरुः तत्रप्रवेशकालः
ज्येष्ठापुनर्वसू वर्ज्जं गृहारंभोदि
तेवयत् तत्सर्वं चिंतयेद्धे धुम ॥
प्रवेशे दैवचिंतकः हलायुध
पुनर्वसू शतभिषाज्येष्ठस्वयो
रोहिणी रेवत्युत्तर विसु वात
शशभृन्मूलाधनिष्ठासवकन्या
कुंभ हृषालि सिंहः मिथुनस्थे
द्वयेके मुले मुकेज्ये डुज ॥
प्रीतश्चिमदिवसे वेषमप्रवेशः
मुभः कृत्वायतोद्विजवरानथ
पूर्णकुंभं दध्यक्षताम्रदलपुष्प
फलोपशोभं दत्वा हिरण्य ॥
वसनेच तथाद्विजेभ्यो मांगल्य
शांति निलयं निलये विशेत्तु
इति समयप्रदीपः
कलत्रे इति शब्दरत्नावली।
तथाच स्मृतिः न गृहं गृह।
मित्याहु गृहिणी गृहमुच्यते
तयाहि सहितः सर्वान् पुरुषार्थो
न् समश्नुते ॥
गृहकक्षयः पुं पेषणशिला
तत्पर्य्यायः पेषणिः २ पेषणीपदः
३ गृहाश्मा ४ इति शब्दरत्नावली
गृहकन्या स्त्री घृतकुमारी इति

राजनिर्घण्टः ॥
गृहकपोतकः पुं पक्षिविशेषः
पायरा इति भाषा तत्पर्य्यायः ॥
प्रासादकुक्कुटः २ किलीकंटः ३
पारावतः ४ इति त्रिकांडशेषः
गृहकर्त्ता पुं धूसरोऽतिसूक्ष्मष्टकः
तत्पर्य्यायः धान्यभक्षणः २
क्षमः ३ भीरुः ४ कपिद्विष्टः ५
कणप्रियः ६ इति राजनिर्घण्टः
गृहकारकः पुं वर्णसंकरजाति
विशेषः घरामी इति भाषा यथा
प्रतिमाघटकोदेवकन्यायांना
पितस्य च सूत्रकारस्य संभूतिः
सोपान गृहकारकः इति
पराशरपद्धतिः ॥
गृहकारी न पुं कीटविशेषः ॥
कुमिरक्या इति भाषा इति ॥
(कि
नाम केचित् ॥
गृहगोधा स्त्री ज्येष्ठी जेठीटिकटि
इति च भाषा तत्पर्य्यायः पल्ली
२ मुषली ३ विशोवरा ४ ज्येष्ठा ५
कुड्यमत्स्यः ६ पल्लिका ७ ॥
गृहगोधिका ८ इति राजनिर्घण्टः
गृहगोलिका ९ माणिका १०
भित्तिका ११ गृहालिका १२ इति
हेमचंद्रः ॥
गृहगोधिका स्त्री ज्येष्ठी इत्यमरः

गृहगोलिका स्त्री ज्येष्ठी इति
हेमचंद्रः ॥
गृहतटी स्त्री वीथीपिंडशालया
इति च भाषा इति हारावली ॥
गृहद्रुमः पुं मेढशृंगी वृक्षः
इति रत्नमाला ॥
गृहणी स्त्री कांजिके इति
त्रिकांडशेषः ॥
गृहनाशनः पुं कपोतः इति
राजनिर्घण्टः ॥
गृहनीडः पुं गृहस्थः मेत्री
इति मेदिनी धर्मः इति ॥
शब्दरत्नावली ॥
गृहपातकः पुं वास्तुः वाटी।
इति शब्दरत्नावली ॥
गृहवलिप्रियः ॥
पुं वकपक्षी इति ॥
शब्दरत्नावली ॥
ज
गृहवलिभुक पुं चटकः इति
हेमचंद्रः ॥
वकः काकः इति ॥
केचित् ॥
गृहभूमिः स्त्री वास्तुः वेश्मभूः
इति हलायुधः ॥
गृहमणिः पुं प्रदीपः इति
हेमचंद्रः ॥

गृहमाचिका स्त्री चर्मचटी चाम
चिका इति भाषा इति त्रिकांडशेषः
गृहमृगः पुं कुक्कुरः इति।
हेमचंद्रः ॥
न
गृहमेधी पुं गृहस्थः इति
हेम चंद्रः ॥
गृहमेधिनी स्त्री सात्विकीबुद्धिः
इति महा भारते गृहस्थपत्नीव
गृहयाय्यः पुं गृहस्थः इत्युणादि
इत्यमरः ॥
गृहवाटिका स्त्री गृहसमीपवने
इति हारावली ॥
गृहस्थः पुं द्वितीयाश्रमी तत्
पर्य्यायः ज्येष्ठाश्रमी २ गृहमेधी
३ स्नातकः ४
गृही ५ इति
हेमचंद्रः गृहपतिः ६ सत्री ७
इत्यमरः गृहयाय्यः ८ इति
सिद्धांतकौमुद्या मुणादिवृत्तिः
गृहाधिपः ९ ॥
इति हलायुधः ॥
कुटुंबी १० इति जटाधरः ॥ ली
गृहायनिकः ११ इति शब्दरत्नाव
तस्यधर्मो यथा गृहस्थो
ब्रह्मचारी च वानप्रस्थो ऽथ
भिक्षुकः चत्वार आश्रमाः ॥



प्रोक्ताः सर्वे गार्हस्थ्य मूलकाः
यः कश्चिदिह लोके ऽस्मिन्नागमः
संप्रकीर्त्तितः तस्यात्र गमने ॥
श्रेयः कीर्त्तिरेषा सनातनी ।
संस्कारैः संस्कृतः पूर्वै ।
र्यथावच्चरितव्रतः जातो गुणा
विशिष्टायां समावर्त्तेत वेदवित
स्वदारनिरतो नित्यं शिष्टाचारो
जितेंद्रियः पंचभिश्च महायज्ञैः
श्रद्दधानो यजेदिह देवता ॥
ऽतिथि शिष्टाशी निरतो वेद ।
कर्मसु इज्या प्रदान युक्तश्च ।
यथाशक्ति यथाविधिनयाणि
पादचपलो न नेत्रचपलो मुनिः
न च वागंगचपल इति शिष्टस्य
गोचरः नित्य यज्ञोपवीती ॥
स्यात् शुक्लवासाः शुचिव्रतः नि
यतो दम दानाभ्यां सदा शिष्टश्च
हेविघोत जितशिश्नोदरो मैत्रः
शिष्टाचारः समन्वितः वैणवीं ।
धारयेद्यष्टिं सोदकं चकमंडलुं
अधीत्याध्यापने कुर्यात् तथा
यजनयाजने दाने प्रतिग्रहे चापि
षट्सु एणं हि त्रिमाचरेत् त्रीणि
कर्माणि यानीह ब्राह्मणानां तु
जीविकायाजनाध्यापने चोभे ।
शुद्धाच्चापि प्रतिग्रहः अथ शेषाणि

चान्यानि त्रीणि कर्माणि यानि तु
दानमध्ययनं यज्ञो धर्मयुक्तानि
तानि तु तेष्वप्रमादं कुर्वीत विप्र
कर्मस्वधर्म्मवित दांतो मैत्रः ॥
क्षमायुक्तः सर्वभूत समो मुनिः
सर्वमेतद्यथाशक्ति विप्रो ॥
निर्वर्त्तयन् शुचिः यवेशुक्काजेयत
स्वर्गं गृहस्थः संशितव्रतः इत्याश्व
मेधिक पर्व ॥
गृहस्थूणं क्ली गृहस्तंभः इति
लिंगादिसंग्रहे अमरः ॥
गृहाः पुं गृहे दाराः ॥
इत्यमरः बहुवचनांतोयंशब्दः
गृहागतः पुं अतिथिः इत्यमरः
गृहाधिपः पुं गृहस्थः इति
हलायुधः ॥
गृहाम्लं क्ली कांजिके इति
त्रिकांडशेषः ॥
गृहापणिकः पुं गृहस्थः इति
शब्दरत्नावली ॥ (वेने
गृहारामः पुं गृहसमीपकृत्रिम
तत्पर्यायः निष्कुटः २॥
इत्यमरः ॥
गृहालिका स्त्री ज्येष्ठी इति
हारावली (ना
गृहावग्रहिणी स्त्री देहलीहति
दासया इतिच भाषा इत्यमरः ॥

गृहाश्वाया स्त्री गोकूलीयानेर्गाक
इति भाषा इति शब्दचंद्रिका ॥
गृहाश्मा न पुं पेषणशिलाशिल
इति भाषा इति शब्दरत्नावली ।
गृहिणी स्त्री भार्य्या इति
हेमचंद्रः ॥
न
गृही पुं गृहस्थः इत्यमरः ॥
भर्ता इति राजनिर्घंटः ॥
गृहीते त्रि स्वीकृते प्राप्ते ज्ञाते
धृतेयथा गृहीत इव केशेषु ।
मृत्युना धर्ममाचरेत इति स्मृति
गृहीतदिक त्रि पलायितः ॥
तिरोहितः इति हेमचंद्रः ॥
गृहोलिका स्त्री ज्येष्ठी इति
हेमचंद्रः ॥
गृह्यं क्ली गृहदेशभेदः इति
मेदिनी तत्रतु गोभिलादिकृत
सामवेदाद्युक्तकर्मकांडनिर्णयः
गृह्यः पुं [illegible] गृहासक्तमृगादिः
इति मेदिनी ॥
गृह्यः त्रि अस्वैरी अस्वतंत्रः
पक्षः इति विश्वमेदिन्यौ ॥
गृह्यकः त्रि अस्वतंत्रः पराधीनः
इत्यमरः ॥ (दिः
गृह्यकः पुं गृहासक्तपक्षमृगा
तत्पर्यायः छेकः २ इत्यमरः ॥

गृह्या स्त्री शाखापुरे नगर ॥
निकटस्थ ग्रामः इत्यमरः ॥
गृ ङ क विज्ञापे विज्ञाने ॥
इति कविकल्पद्रुमः ॥
गृधि प्राहे इति कविकल्पद्रुमः
गृधानिगरणे इति कविकल्पद्रुमः
गेंडुः पुं गेंडुकः इति
भरतो द्विरूपकोषश्च ॥
गेंडुकः पुं कंडुकः गेंडु इति
गेंद इति च भाषा इत्यमरः ॥
गेंडूकः पुं गेंडुकः इति ॥
जटाधरः ॥
गेद ऋ ङ उगतौ चाले इति ।
कविकल्पद्रुमः ॥
गेयं क्ली गीतं इति मेदिनी
गेयः त्रि गातव्यः गायनः इति
मेदिनी ॥
गेय ङ ऋ सेवने इति ॥
कविकल्प द्रुमः ॥
गेव ऋ ङ अन्वेषणे इति
कवि कल्प द्रुमः ॥
गेष्णः पुं रंगोपजीवी
सामगानकर्त्ता इत्युणादिकोषः
गेष्णुः पुं गायनः नटः इति
मेदिनी सामगानकर्त्ता च ॥
गेहं क्ली गृहं इत्यमरः ॥
गेही न त्रि गृही गेहशब्दादस्त्यर्थे



यत् प्रत्ययः ॥
गेहेनर्दी पुं कापुरुषः तत् पर्य्यायः गेहेशूरः २ पिण्डीशूरः ३ इति हेमचन्द्रः ॥
गेहेशूरः पुं गेहेनर्दी इति ॥ हेमचन्द्रः ॥
गैगाने इतिकविकल्पद्रुमः ॥
गैरिकं क्ली स्वर्णरक्तवर्णधातु विशेषः गिरिमाटी इति भाषा तत्पर्य्यायः रक्तधातुः २ गिरिधातुः ३ गवेधुकं धातुः ४ सुरंगधातुः ६ गिरिमृद्भवं ७ इति राजनिर्घण्टः वनालक्तं ८ गवेरुकं ९ प्रत्यूषा १० गिरिमृत् ११ इति त्रिकाण्डशेषः ॥ लोहितमृत्तिका १२ गिरिजं १३ पीतगैरिकस्य पर्य्यायः स्वर्णगैरिकं १ स्वर्णं २ स्वर्णगैरिकं ३ इति रत्नमाला स्वर्णधातुः ४ सुरक्तकः ५ सन्ध्याभ्रं ६ बभ्रुधातुः ७ शिलाधातुः ८ अनयोर्गुणाः मधुरत्वं शीतत्वं कषायत्वं ॥ व्रणरूपणत्वं
विस्फोटाग्नि (अ) दाहनाशित्वं स्वर्णवर्णादिकेषु इति राजनिर्घण्टः निर्मलत्वं ॥ स्निग्धत्वं स्वर्णगैरिके उक्त विशेषतश्चक्षुस्तेजस्कारित्वं इति राजवल्लभः ॥
गैरिकाक्षः पुं जलमधूकवृक्षः इति राजनिर्घण्टः ॥
गैरी स्त्री लाङ्गलिका वृक्षः ॥ रत्नमाला ॥
गैरेयं क्ली शिलाजतु इत्यमरः गिरिजाते त्रि ॥
गोकण्टकः पुं गोक्षुरकवृक्षः। स्थपुटः गवां खुरे इति विश्वमेदिन्यौ गोखुरैः स्थपुटी कृतः इति हेमचन्द्रः विकङ्कत वृक्षः इति राजनिर्घण्टः ॥ (अ)
गोकर्णः पुं परिमाणविशेषः (अ) अनामिका युक्त विस्तृताङ्गुष्ठे मृगभेदः इत्यमरः अश्वतरः ॥ सर्पभेदः गणदेवताविशेषः इति मेदिनी तीर्थविशेषः ॥ यथा ततो ऽभिव्रज्य भगवान् केरलान् त्रिगर्त्तकान् गोकर्णाख्यं शिवक्षेत्रं सान्निध्यं यत्र धूर्जटेः इति श्रीभागवते ॥
गोकर्णी स्त्री मूर्वालता इत्यमरः ॥
गोकिराटिका स्त्री सारिकापक्षी इति हेमचन्द्रः ॥
गोकिराटी स्त्री सारिकापक्षी इति

राजनिर्घण्टः ॥
गोकिलः पुं मुषले हले ॥ इति हेमचन्द्रः ॥
गोकीलः पुं मुषले हले इतिहारावली ॥
गोकुलं क्ली गोसमूहः तत् पर्य्यायः गोधनं २ गवांव्रजः ३ इत्यमरः गोस्थाने यथा ॥ गोकुले कंदशालायां तैल ॥ यंत्रेक्षु यंत्रयोः अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च इति तिथ्यादितत्वे मधुरैकदेशो ॥ श्रीनंदस्य वासस्थानं येषु बाल्यकालेन व्रजलीला तत गोकुले रामकेशवौ जानुभ्यां सह पाणिभ्यां रिंग ॥ माणौ विजह्रतुः इति श्रीभागवते ॥
गोकुलिकः त्रि केकरः पंकस्य गव्युपतकः इतिमेदिनी ॥
गोकृतं क्ली गोमयं इति शब्दचन्द्रिका ॥
गोखुरः पुं गोक्षुरवृक्षः इति शब्दरत्नावली गवांशफे क्ली
गोखुरिः पुं गोक्षुरः इति शब्दचन्द्रिका ॥
गोगोयुगं क्ली गोद्वये इति। मुग्धबोधव्याकरणं ॥
गोगोष्ठं क्ली गोस्थाने इति ॥ मुग्धबोधे ॥
गोगृष्टिः स्त्री सकृत प्रसूतागौः इतिकेचित् ॥
गोग्रंथिः पुं करीषः गोष्ठे गोजिह्विकौषधिः इतिमेदिनी
गोघ्नः पुं अतिथिः इति ॥ पाणिनिः गोघ्नातकेत्रि यथा गोघ्न वह्निहितः कल्य श्वोद्वायण मथापिवा इतिप्रायश्चित्ततत्वे
गोघृतं क्ली हृष्टिः इति त्रिकाण्डशेषः गव्यघृते च ॥
गोचरः पुं इंद्रियार्थः तत् रूप शब्द गंध रस स्पर्श स्वरूपः इत्यमरः जन्मराशेर्ग्रहस्थितिसंज्ञा राशिजन्य संज्ञा यथा गोचरे वा विलग्ने वा ये ग्रहा रिष्ट सूचकाः पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः अपि वा अष्टवर्गशुभैः श्रीमान् कर्म कुर्य्यात्तु भस्मरैः गोचरस्थैस्तु दशाभिर्न्तदशाभिर्न्त वेधगैः गोचर शुद्धि र्यथा ॥ केतुश्च भौम मंदगतयः षष्ठ त्रिसंस्थाः शुभाश्च द्वादशीवर्पितेव तौ च दशमौ चेंद्रः पुनः सप्तमः जीवः सप्तनवद्विपंचमगतो युग्मेषु सोमात्मजः शुक्रः षड्दश सप्त



वर्ज्जमितरे सर्वेष्वप्युपयोगे शुभाः
इति दीपिका ॥
गोक्षालः पुं कुलाहलवृक्षः
कोकशिमा इति भाषा इति
रत्नमाला ॥
गोजलं क्ली गोमूत्रे इति
राजनिर्घण्टः
गोजा स्त्री गोलोमिका वृक्षः
इति राजनिर्घण्टः ॥
गोजागरिकं क्ली मङ्गले इति
मेदिनी ॥
गोजागरिकः पुं कण्टकारिका
इति मेदिनी ॥
गोजापर्णी स्त्री दुग्धफेनीवृ
इति राजनिर्घण्टः ॥
गोजिह्वा स्त्री क्षुपविशेषः ॥
गोजियालता इति दारियाशाक
इति च भाषा तत्पर्यायः ॥
दार्विका २ इत्यमरः दर्विका ३
इति भरतः दार्विपत्रिका ४ इति
रत्नमाला खरपत्री ५ वातानाः ६
अधोमुखा ७ अनडुज्जिह्वा ८ अधः
पुष्पी ९ अस्या गुणाः कटुत्वं
तीक्ष्णत्वं शीतलत्वं पित्तास्रदोष
विषार्त्तिनाशित्वं व्रणसंरोपणं
त्वञ्च इति राजनिर्घण्टः गवेधुका
गडगड इति भाषा इति

रत्नमाला ॥
गोजिह्विका स्त्री गोजिह्वालता
इति शब्दरत्नावली ॥
गोडः पुं गोडः सत्वनाभौ
प्रवृद्धमांसगुडकः इति लिङ्गादि
संग्रहटीकायां भरतः ॥
गोडुम्बः पुं शीर्णवृन्तः तरमूज
इति ख्यातः इति मेदिनी
गोडुम्बा स्त्री गवादनी इति ॥
मेदिनी गोमुक इति ख्याता
गोमा इति च राजगोमुक इति
ख्याता इत्यन्ये इति भरतः
तत्पर्यायः चित्रा २ गवाक्षी ३
इत्यमरः गोडुम्बिका ४ इति।
रत्नमाला ॥
गोडुम्बिका स्त्री गोडुम्बा इति
रत्नमाला ॥
गोणी स्त्री छिद्रवस्त्रं तत्पर्यायः
छालनी २ इति हेमचन्द्रः ॥
धान्यादिवहनार्थाधारविशेषः
गुण इति भाषा इति मुग्धबोध
टीका द्रोणी परिमाणे इति वैद्यक
परिभाषा ॥
गोंडः पुं नाभौ वृद्धमांसगुडकः
गोंड इति भाषा इति लिङ्गादि
संग्रहे अमरः पामरजातिः ॥
वृहन्नाभि त्रि इति मेदिनी

अस्य रूपान्तरे गोडः गौडः
इत्यमरटीका ॥
गोतमः पुं गौतममुनिः स्तनुत्र
पुत्रः इति गयामाहात्म्ये वायु
पुराणे ॥
गोतमान्वयः पुं शाक्यमुनिः
इति हेमचन्द्रः ॥
गोतल्लजः पुं उत्तमगौः ॥
गोषु मध्ये तल्लजः प्रशस्तः इ
त्युत्पत्तिः ॥
गोत्रं क्ली गवते शब्दयति पूर्व
पुरुषान् यत् इति भरतः ॥
तत्पर्यायः संततिः २ जननं ३
कुलं ४ अभिजनः ५ अन्वयः ६
वंशः ७ अन्ववायः ८ संतानः ९ इत्य
मरः अथास्य भावनीयबोधः
कानने क्षेत्रे वर्त्म इति ॥
मेदिनी छत्रे इति हेमचन्द्रः
संघः वृद्धिः इति शब्दचन्द्रिका
वित्ते इति विश्वः ॥
वंशपरंपरा प्रसिद्धे आदि।
पुरुषे ब्राह्मणरूपे क्षत्रिय
वैश्ययोरुपदिष्टातिदिष्टगोत्रे
शूद्रस्यातिदिष्टातिदिष्टगोत्रे
इत्युद्वाहतत्त्वे क्षत्रियवैश्य
शूद्राणामतिदिष्टातिदिष्ट
प्रवरं अतएव तेषां पुरोहित।

गोत्र प्रवर मित्यर्थः तथा चाग्नि
पुराणे वर्णसंकरोपाख्याने
क्षत्रियवैश्य शूद्राणां गोत्रं च
प्रवरादिकं तथान्यवर्णसंकराणां
येषां विप्राश्च याजकाः
गोत्राणि तु चतुर्विंशति तथा च
मनुः शाण्डिल्यः काश्यपश्चैव
वात्स्यः सावर्णकस्तथा भरद्वाजो
गौतमश्च सौकालीनस्तथापरः
कल्किषश्चाग्निवैश्यश्च कृष्णात्रेय
वशिष्ठकौ विश्वामित्रः कुशिकश्च
कौशिकश्च तथापरः हूतकौशि
कमौद्गल्यो आलम्यानः पराशरः
सौपायनस्तथात्रिश्च वासकी
रोहितस्तथा वैयाघ्रपद्यकश्चैव
जामदग्न्यस्तथापरः चतुर्विंशति
वैगोत्राः कथिताः पूर्वपण्डितैः
तथा च मनुः जमदग्निर्भरद्वाजो
विश्वामित्रात्रि गौतमः वशिष्ठ
काश्यपागस्त्या मुनयो गोत्र ॥
कारिणः एतेषां यान्यपत्यानि
तानि गोत्राणि मन्यते
एतदुपलक्षणमन्येषामपि
दर्शनात् तथा सौकालीनक
मौद्गल्य पराशर वृहस्पती
कावना विल्लु कौशिको
कात्यायनात्रेयकाण्वकाः कुत्सा

ड्येयः सांकृतिश्च कौंडिल्यो
गर्गसंज्ञकः अंगिरास इति
ख्यातः स्वनाहूकाख्यसंगितः
अथ जैमिनिहरिताख्याः शांडिल्यो
वात्स्यपवचसावर्णपालम्यान
वैयाघ्रपद्यश्च हृतकौशिकः
शक्तिः कात्यायनश्चैव वात्सकौ
गौतमस्तथा मुनकः सौपायन
श्चैव मुनयो गोत्रकारिणः
एतेषां यान्यपत्यानि तानि
गोत्राणि मन्यंते सर्वे द्विचत्वारि
शद्गोत्राः इति कुलदीपिकायां
त धनेज्ञ कृतधर्म्मप्रदीपः।
गोत्रः पुं पर्वतः इत्यमरः॥
गोत्रजः त्रि गोत्रोत्पन्नः सत
जन्मनामस्मृतिपर्य्यंतसमानोद
क भावात् पश्चाद्भवति इति
स्मृतितत्वं॥
दू
गोत्रभित् पुं इंद्रः इत्यमरः॥
गोत्रहन्तः पुं धन्वनहन्तः इति
भावप्रकाशः॥
गोत्रा स्त्री पृथिवी गोसमूहः
इति मेदिनी॥
गोदः पुं मस्तकस्थितः मस्तिष्के
इति हेमचंद्रः गोदानरित्रि ॥
इति मुग्धबोधं॥

॥ गोदंतं क्ली हरितालं इति
राजनिर्घंटः॥
गोदा स्त्री गोदावरी नदी इति
हेमचंद्रः॥
गोदारणं क्ली लांगलं इत्यमरः
कुद्दालः इति हेमचंद्रः॥
गोदावरी स्त्री नदीविशेषः
तत्पर्य्यायः गोदा २ इति॥
हेमचंद्रः गौतमसंभवा ३
ब्रह्माद्रिजाता ४ गौतमी ५
अस्या जलस्य गुणाः पित्तार्त्ति
रक्तार्त्ति वातपापकृच्छ्रादि
दुष्टामयदोषहरत्वं नाशित्वं
पाचनपथ्यत्वं दीपनत्वं च इति
राजनिर्घंटः॥
गोदुग्धदा स्त्री चणिकातृणं
इति राजनिर्घंटः
गोदोहनी स्त्री गोदोहनपात्रे
तत्पर्य्यायः पारी २ इति
जटाधरः॥
गोद्रवः पुं गोमूत्रे इति॥
राजनिर्घंटः॥
गोधनं क्ली गोसमूहः इत्यमरः
गोधनः पुं स्थूलाग्रवाणः वक्रा
इति भाषा इति हरिवंशः॥
गोधा स्त्री धनुर्गुणाघातवारणाय
प्रकोष्ठबद्धचर्म्मकृतपट्टिकातत्

पर्य्यायः तला २ ज्याघातवारण
इत्यमरः तलं ४ इति तट्टीका
जंतुविशेषः गोसाप इति।
भाषा सा तु स्थलज जलजभेदात्
द्विविधा तत्पर्य्यायः निहाका २
गोधिका ३ इत्यमरः दारु॥
मुख्याह्वा ४ अस्या मांसगुणाः
वातश्वासकासनाशित्वं इति
राजनिर्घंटः पाके मधुरत्वं
कषायत्वं कटुरसत्वं पित्त
नाशित्वं रक्तशुक्रबलकारित्वं
च इति राजवल्लभः॥
गोधापदिका स्त्री गोधापदील
ता इति शब्दरत्नावली॥
गोधापदी स्त्री लताविशेषः
गोयालिया इति भाषा तत्
पर्य्यायः सुवहा २ इत्यमरः
हंसपदी ३ गोधाख्यी ४ त्रिफला
५ इति भरतः त्रिपदी ६ मधुस्रवा
७ हंसपादी ८ इति रत्नमाला।
हंसपादिका ९ हंसांघ्रिः १० रक्ते
पादी ११ त्रिपदा १२ हुतमंडलिका
१३ विम्बग्रंथिः १४ त्रिपादिका
१५ त्रियादी १६ कीटमारी॥
१७ कर्णाटी १८ ताम्रपादी १९
विक्रांता २० ब्रह्मादनी २१
पदोगी २२ पीलोगी २३॥

हंसपादिका २४ सेवारिणी २५
पदिका २६ प्रह्लादी २७
कीटपादिका २८ पार्थराष्ट्रपदी २९
अस्या गुणाः कटुत्वं उष्णत्वं
विषभूत श्वित्रापस्मारदोष
नाशित्वं रसायनत्वं च मुषली
तालमूली इति ख्यात इति
राजनिर्घंटः॥
गोधास्कंधः पुं विट्खदिरः
इति राजनिर्घंटः॥
गोधिः पुं ललाटे इत्यमरः
गोधिका इति शब्दरत्नावली
गोधिका स्त्री गोधा गोसाप
इति भाषा इत्यमरः॥ (का
गोधिकात्मजः पुं स्थलगोधि
गोधाशिशुतुल्याकारकोटरस्य
जंतुविशेषस्य लोके इति
ख्यातस्य इति भगी इति॥
साहेदरी तत्पर्य्यायः॥
गोधेरः २ गोधारः ३ गोधेयः
४ इत्यमरः॥ (हंसी
गोधिनी स्त्री लविकालताह
भेदः इति राजनिर्घंटः॥
गोधुकं त्रि गोदोग्धा इति॥
व्याकरणे॥
गोधुमः पुं गोधूमः इति॥
शब्दचंद्रिका॥

गोधूमः पुं नागरंगः ओषधी।
विशेषः ब्रीहिभेदः गम गोम
इति च भाषा इति मेदिनी।
तस्य पर्य्यायः बहुदुग्धः २
अपूपः ३ म्लेच्छभोजनः ४ यवनः
५ निस्तुषः ६ रसालः ७ सुमनाः
८ अस्य गुणाः स्निग्धत्वं मधुरत्वं
वातपित्तदाहनाशित्वं गुरुत्वं
श्लेष्मप्रद बलरुचिवीर्य्यकारि
त्वं च इति राजनिर्घण्टः बृंहणत्वं
जीवन हितत्वं शीतत्वं ॥
भग्नसंधान स्थैर्य्य कारित्वं।
सारकत्वं च इति राजवल्लभः
गोधूमचूर्णं क्ली चूर्णीकृतगोधू
मः मयदा इति भाषा यथा
शुष्कगोधूमचूर्णेन किंचित्
त्वं च रोटिका इति भावप्रकाशः
गोधूमः सम्भवे क्ली सौवीरं।
कांजिकभेदः इति राजनिर्घण्टः
गोधूमी स्त्री गोलोमिका ॥
इति राजनिर्घण्टः ॥ (तु
गोधूलिः स्त्री कालविशेषः सा
त्रिविधा यथा ग्रीष्मेऽर्द्धास्त
इविकालः हेमन्त शिशिरयो
मृदुताशाम्रपिंडीकृत रविकालः
वर्षा शरदं सीते ध्वस्तगत रविकालः ५
यथा गोधूलिं त्रिविधां वदन्ति।

पुनयोनारी विवाहादिके हेमंते
शिशिरे प्रयाति मृदुतां पिंडीकृते
भास्करे ग्रीष्मेर्द्धास्तमिते वसंते
समये भानौ गते दृश्यतां ॥
सूर्य्ये वाम्बुधागते च नियतं वर्षा
शरत्कालयोः इति दीपिका॥
गोधेनुः स्त्री दुग्धवती गवी इति
संक्षिप्तसार व्याकरणं ॥
गोधेरः पुं गोधा इति ॥
संक्षिप्तसारे उणादिवृत्तिः॥
गोनर्दी स्त्री सारसपक्षिणी इति
हारावली ॥
गोनर्दं क्ली कैवर्त्तीमुस्तके इति
मेदिनी ॥
गोनर्दः पुं सारसपक्षी इति
मेदिनी ॥
गोनर्दीयः पुं पतंजलि मुनिः
इति हेमचंद्रः ॥
गोनसः पुं सर्पविशेषः वोडा
इति ख्यातः गोखुरा इति ख्यात
इत्येके मंडली वोडा इति ॥
ख्यात इत्यन्ये इति भरतः॥
तत्पर्य्यायः तिलित्सः २॥
इत्यमरः गोनासः ३ घोनसः ४
इति हेमचंद्रः मंडली वोडुः॥
इति विक्रमादित्यः ॥
वैक्रान्तमणिः इति राजनिर्घण्टः

गोनाथः पुं अनड्वान् इति।
राजनिर्घण्टः ॥
गोनासं क्ली वैक्रान्तमणिः इति
राजनिर्घण्टः ॥
गोनासः पुं गोनससर्पः इति
हेमचंद्रः ॥
गोनिष्यंदः पुं गोमूत्रे इति॥
राजनिर्घण्टः ॥
गोपः पुं वोलः जातिविशेषः
गोआला इति भाषा तत्पर्य्यायः
गोसंख्यः २ गोधुक् ३ आभीरः
४ वल्लवः ५ गोपालः ६ इत्यमरः
तस्योत्पत्तिर्यथा मणिवेश्यां।
तैत्रवायात् गोपजातेः संभवः
इति पराशर पद्धतिः
गोष्ठाध्यक्षः पृथिवीपति बहु
ग्रामस्याधिकृतः इति मेदिनी
गोपः त्रि रक्षकः उपकारकः
इति शब्दरत्नावली ॥
गोपकः पुं वोलः बहुग्रामाधि
पतिः इति शब्दरत्नावली ॥
गोपकन्या स्त्री शारिवौषधिः इति
राजनिर्घण्टः आभीरसुता च ॥
गोपघोंटा स्त्री हस्तिकोलिः इति
रत्नमाला वदरीसदृशसूक्ष्मफल
वृक्षः शेयाकुल इति भाषा ॥
इति शब्दरत्नावली विकंकतवृक्षः

इति राजनिर्घण्टः ॥
गोपतिः पुं शिवः सूर्य्यः ॥
राजा वृषः इति मेदिनी ऋषभ
नामौषधिः इति राजनिर्घण्टः
गोपदलः पुं गुवाकः इति
त्रिकाण्डशेषः ॥
गोपनं क्ली अपह्नवः कुत्सने
रक्षायाकुले दीप्तिः
इति कविकल्पद्रुमे गुपधात्वर्थ
दर्शनात् तमालपत्रे तेजपात
इति भाषा इति राजनिर्घण्टः
गोपनीयं त्रि गोप्यं गोपितव्यं
यथा स्वर्गेऽपि दुर्लभा विद्या ॥
गोपनीया प्रयत्नतः इति
नाडीप्रकाशः ॥
गोपभद्रं क्ली शालूके इति
शब्दचंद्रिका ॥
गोपभद्रा स्त्री काश्मरीवृक्षः
इति राजनिर्घण्टः ॥
गोपभद्रिका स्त्री गंभारीवृक्षः
इति रत्नमाला ॥
गोपरसः पुं वोलः इति
शब्दरत्नावली ॥
गोपवधूः स्त्री शारिवा इति
भावप्रकाशः गोपस्य पत्नी च
गोपवल्ली स्त्री मूर्वा शारिवा।
इति राजनिर्घण्टः प्रपामालता

इति शब्दरत्नावली ॥

गोपा स्त्री श्यामालता इत्यमरः टीका शब्दरत्नावली च ।

गोपानसी स्त्री वडभीशृङ्गाणामुपभोगेदत्तवक्रकाष्ठे मुदनी इति भाषा इत्यमरटीकासारसुन्दरी इति गृहचूडा वडभी तच्छादनार्थं ॥ वक्रीकृत्य यत् काष्ठं दीयते ॥ सा वडभीचतुष्किकादि चूडा तच्छादनाय वक्रीकृत्य यत्काष्ठं दीयते सा इति मधुः पटलाधो वंशपञ्जरं इति भट्टः ॥ कर्णिकाविष्कम्भिदारु इत्यन्ये । वक्रीभूतं परणकाष्ठं इत्येके ॥ इत्यमरटीकायां भरतः ॥

गोपायितं त्रि रक्षितं इत्यमरः

गोपालः पुं गवां पालकः ॥ वृन्दावनस्य गोपाला नीलरूपे यथा गोपाला मुनयः सर्वे । वैकुण्ठानन्दमूर्त्तयः इति पद्मपुराणे पातालखण्डे व्यासं प्रति श्रीकृष्णवाक्ये राजा ॥ नन्दनन्दनः इति मेदिनी ॥ श्रीगोपालस्य ध्यानं यथा । अव्याद्व्याकोषनीलाम्बुज रुचि रुरणाम्भोज नेत्राम्बुजस्थो बालो जङ्घा कटीरस्थल कलितरणत् किङ्किणीको मुकुन्दः दोर्भ्यां हैयङ्गवीनं दधदति विमलं पायसं विश्ववन्द्यो गोगोपी गोपवीतो रुरुनखविलसत्कण्ठ भूषश्चिरं वः इति तन्त्रसारः ॥ तस्य स्वरूपं यथा श्रीव्यास उवाच ततोऽहं मधुवने दृष्टः पुलकाञ्चितविग्रहः त्वामहं द्रष्टुमिच्छामि चक्षुर्भ्यां मधुसूदन यत्तत्सत्यं परं ब्रह्म जगद्योनिर्जगत्पतिः वदन्ति वेदशिरसि चाक्षुषं ॥ नाथ मेऽस्तु तत् ॥ श्रीभगवानुवाच ब्रह्मणैव पुरा दृष्टः प्रार्थितश्च यथा पुरा यदवोचमहं तस्मै ॥ तच्छृणुष्व मपि कथ्यते मामेके ॥ प्रकृतिं प्राहुः पुरुषं च तथेश्वरं धर्ममेके धनं चैके मोक्षमेके ऽकुतोभयं शून्यमेके भावमेके परमार्थं तथापरे देवमेके ग्रहमेके मनयो ॥ बुद्धिमेके कालमेके शिवमेके सदाशिवं अपरे वेदशिरसि । स्थितमेकं सनातनं सद्भावं विक्रियाहीनं सच्चिदानन्दविग्रहं मन्मायामोहितधियः सर्वकालेषु वेवित्ताः कोऽपि वेद पुमान्लोके मदनुग्रहभाजनः यत्प्राप्य ॥

दर्शयिष्यामि स्वरूपं वेद गोपितं ततोऽपश्यं महं भूपबालं बालाम्बुद प्रभं गोप कन्याकृते गोपे हसन्तं गोप बालकैः कदम्बमूल मासीनं पीतवाससमद्भुतं वने वृन्दावने नामनवपल्लवमण्डिते कोकिल भ्रमराराव मनोभव मनोहरे ॥ नदीमयपुण्यकालिन्दीमिन्दीवर दलप्रभो गोवर्द्धनेन तथा यपुण्ये कृष्णवामकरोद्धृते महेन्द्र दर्प नाशाय गो गोपालसुखावहे दृष्ट्वा विहसितोऽभवं सर्वभूषण भूषणं गोपालमबलासंगं मुदितं वेणुनादिनं ततो मां ॥ माह भगवान् वृन्दावन वचः स्वयं यदिदं मे त्वया दृष्टं रूपं दिव्यं सनातनं निष्कलं निष्क्रियं शान्तं सच्चिदानन्दविग्रहं पूर्णं पद्मपलाशाक्षं नातः परतरं मम इदमेव वदन्त्येते वेदाः कारण कारणं सत्यं व्यापि परानन्दं ॥ चिद्घनं शाश्वतं शिवं नित्यां मे मथुरां विद्धि वनं वृन्दावनं तथा यमुनां गोपकन्याश्च तथा गोपालबालकान् ममावतारो नित्योऽयमत्र मा संशयं कृथाः ममेष्टा हि सदा गोधा सर्वज्ञो हि परात्परः मयि सर्वमिदं विश्वं भाति मायाविजृम्भितं इति पद्मपुराणे पातालखण्डे ॥ द्वादश गोपाला अवतन्यशास्त्रे द्रष्टव्याः ॥

गोपालकः पुं शिवः इति त्रिकाण्डशेषः श्रीकृष्णः यथा दाताफलानामभिवाञ्छितानां प्रागेव गोपालक मन्त्र एषः इति क्रमदीपिका गोपालशब्दात् स्वार्थे के गोरक्षकश्च ॥

गोपालकर्कटी स्त्री कर्कटीभेदः गोपालकांकरी गुरुभा इति च हिन्दीभाषा तत्पर्यायः वन्यार गोपकर्कटिका ३ क्षुद्रेर्वारुः ४ क्षुद्रफला ५ गोपाली ६ क्षुद्रचिर्भिटा ७ अस्या गुणाः शीतत्वं मधुरत्वं पित्तमूत्रकृच्छ्राश्मरीमेहदाहशोषनाशित्वं च इति राजनिर्घण्टः

गोपालिका स्त्री गोपालपत्नी इति मुग्धबोधे कीटविशेषः तत्पर्यायः महाभीरुः २ इति हेमचन्द्रः ॥

गोपाली स्त्री गोपालकर्कटी गोरक्षी इति राजनिर्घण्टः ।

गोपाष्टमी स्त्री कार्त्तिकशुक्लाष्टमी

यथा शुक्लाष्टमी कार्त्तिके तु स्मृता
गोपाष्टमी बुधैः । तद्दिने ॥
वासुदेवोऽभूद्गोपः पूर्वं तु
वत्सपः । तत्र कुर्य्याद् गवां पूजां
गोग्रासं गोप्रदक्षिणम् । गवानु-
गमनं कार्य्यं सर्वान् कामान्
अभीप्सता ॥ इति कूर्म्मपुराणम् ॥
गोपिका स्त्री गोपी यथा न खलु
गोपिकानन्दनो भवानखिल
देहिनामन्तरात्मदृक् इति
श्रीभागवते [illegible] ॥
गोपिनी स्त्री श्यामलता इति
शब्दचन्द्रिका ॥
गोपिलः त्रि गोप्ता इति
सङ्क्षिप्तसारे उणादिवृत्तिः ॥
गोपी स्त्री गोपस्य पत्नी ॥
वृन्दावनस्थगोपीनां स्वरूपं यथा
गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा
गोपकन्यकाः । देवकन्याश्च
राजेन्द्र न मानुष्यः कथञ्चन
तत्र व्रजबाला यथा पूर्णरसा
रसमेघा रसालया रसोदरी
रसपीयूषधामा रससन्तानिनी रस-
कल्लोलिनी रसवापिका अनङ्ग-
मञ्जरी अनङ्गमानिनी मदयन्ती
रङ्गविह्वला ललिता ललित-
यौवना अनङ्गकुसुमा मदनमञ्जरी
कलावती रतिकला कलकण्ठी
अज्ञास्या रतोत्सुका रतिसर्वस्वा
रतिचिन्तामणिः इत्याद्याः ॥
श्रुतिगणा यथा उद्गीता रसगीता
कलगीता कलस्वरा कलकण्ठिका
विपञ्ची कलपदा बहुमता ॥
बहुकर्म्मा सुनिष्ठा बहुहरिः बहु-
शाखा विशाखा सुप्रयोगा तमा
विप्रयोगा बहुप्रयोगा बहुकला
कलावती क्रियावती इत्याद्याः
मुनिगणा यथा उग्रतपाः
सुतपाः प्रियव्रता सुरता सुरेखा
सुपर्वा बहुप्रदा रत्नरेखा मणिग्रीवा
अपर्णा सुपर्णा मत्ता सुलक्षणा
सुदती गुणवती सुकालिनी
सुलोचना सुमनाः सुभद्रा सुशीला
सुरभिः सुखदायिका इत्याद्याः
गोपबाला यथा चन्द्रावली
चन्द्रिका काञ्चनमाला रुक्ममाला
वती चन्द्रानना चन्द्ररेखा चन्द्र-
वापी चन्द्रमाला चन्द्रप्रभा चन्द्र-
कला सौवर्णमाला मणिमालिका
वर्णप्रभा शुद्धकाञ्चनसन्निभा
मालती यूथी वासन्ती नवमल्लिका
मल्ली नवमल्ली शेफालिका
सौगन्धिका कस्तूरी पद्मिनी
कुमुद्वती रसाला सुरसा मधुमञ्जरी

रम्भा उर्व्वशी सुरेखा स्वर्णरेखिका
वसन्ततिलका इत्याद्याः इति
पाद्मे पातालखण्डे अस्या
विवरणं कृष्णशब्दे द्रष्टव्यं
शारिवा रचिका इति विश्वः
प्रकृतिः यथा गोपायति सकल-
मिदं गोपायति परं पुमांसं ॥
गोपी प्रकृतिरिति क्रमदीपिका
गोपीथं क्ली तीर्थस्थाने इति
सिद्धान्तकौमुद्यामुणादिवृत्तिः
गोपीथः पुं रक्षणे इति ।
सङ्क्षिप्तसारे उणादिवृत्तिः
गोपुच्छः पुं हारभेदः इति ।
हेमचन्द्रः गोलाङ्गूलवानरः ॥
यथा शार्दूलमृगसङ्घुष्टे सिंहे ।
भीमबले हते ऋक्षवानरः ॥
गोपुच्छैर्मीजारैश्च निषेविते ।
इति रामायणे किष्किन्ध्याकाण्डे
गवां लाङ्गूले च ॥
गोपुटा स्त्री स्थूलैला इति
राजनिर्घण्टः ॥ (यः
गोपुटिकं क्ली शिववृषस्य मेरुः
इति त्रिकाण्डशेषः ॥
गोपुरं क्ली नगरद्वारं सद्वारं ।
फटक इति भाषा तत्पर्य्यायः
पुरद्वारं २ इत्यमरः ॥
उपपुरद्वारं इत्यन्ये द्वारमात्रं ।
इति भरतः कैवर्त्तीमुस्तके ॥
इति मेदिनी ॥
गोपुरकः पुं कुन्दुरुकः इति
राजनिर्घण्टः ॥
गोपुरीषं क्ली गोमयं इति
राजनिर्घण्टः ॥
गोपेन्द्रः पुं विष्णुः इति ॥
हेमचन्द्रः ॥
गोपीशः पुं शाक्यमुनिः इति
त्रिकाण्डशेषः नन्दघोषः यथा
रामकृष्णावुभयतो गोपेशौ
परितः पुरे इति मुग्धबोधे ॥
स्त्री कृष्णश्च ॥
गोप्ता त्रि रक्षकः यथा ॥
विप्राणामभयार्थमध्वरविधेर्गोप्ता
गुरोराज्ञया इति राघव ॥
पाण्डवीये कविराजः ॥
गोप्यः पुं दासः इत्यमरः ॥
टीकायां भरतः दासीपुत्रः
रक्षणीये त्रि इति मेदिनी ॥
गोपनीयः यथा आयुर्वित्तं
गृहच्छिद्रं मन्त्रमैथुनभेषजे
अपमानं तपो दानं नव गोप्यानि
यत्नतः इति पुराणं गोपी
समूहश्च ॥
गोप्यकः पुं दासः इत्यमरः
गोप्यायिः पुं बन्धकविशेषः



तथाच नारदः श्रयिक्रियत ॥
इत्यादिः सविज्ञेयो द्विलक्षणः ।
कृतकालोपनेयश्च यावद्देयोद्यतः ।
स्तथासप्तनर्हि विधः प्रोक्तो
गोष्ठोभागस्तथैवच गोष्ठो ।
रक्षणीयः इतिमिता क्षरा
गोप्रकाण्डः पुं श्रेष्ठगौः ॥
गोषुमध्ये प्रकाण्ड प्रशस्त इति
मुत पतिः ॥
गोभेडीरः पुं जलकुक्कुभपक्षी
इतित्रिकाण्डशेषः ॥
गोमत क लेपने इति
कविकल्पद्रुमः ॥
गोमतल्लिका स्त्री सुशीलागौः
इति हलायुधः ॥
गोमती स्त्री स्वनामख्यातानदी
तत्पर्य्यायः वाशिष्ठा २ इति
हेमचन्द्रः वैदिक मन्त्र भेदः ।
यथापञ्चगव्येन गो चाती
मासैकेन विशुध्यति गोमतीच
जपेद्विप्रो गवां गोष्ठेच ॥
संवसेत् इतिप्रायश्चित्ततत्त्वे ।
शाताततपः ॥
गोमन्तः पुं पर्वतविशेषः इति
जटाधरः गवांस्वामिसमृद्धश्च
गोमयं क्ली पुं गवां गूथं ॥
गोवर इतिभाषा तत्पर्य्यायः

गोविट् २ इत्यमरः जगले
३ गोहल्ले ४ गोशकृत् ५ इति
रत्नमाला गोपुरीषं ६ गोविष्ठा ७
गोमलं ८ इतिराजनिर्घण्टः तस्य
माहात्म्यं यथा शतंवर्षसहस्राणां
तपस्तप्तं सुदुष्करं गोभिः पूर्वं
विसृष्टाभिर्गार्हिक्रम श्रेष्ठतामिति
अस्माकं पुरीषस्नानेन जनः पूयेत
सर्वदा शकृताच पवित्रार्थं ।
कुर्वीरन् देवमानुषाः ताभ्यो ।
वरं ददौ ब्रह्मा तपसोन्ते
स्वयंप्रभुः एवं भवत्विति विभु
लोकांस्तारयतेतिच ॥ ॥
तत्र लक्ष्म्या वासोयथा लक्ष्मी
प्रतिगवां वाक्यञ्च पमानना
कार्य्यात त्रास्माभिर्यशस्विनी
शकृन्मूत्रे निवसत्वपुण्यमेतद्धि
नः शुभे श्रीरुवाच दिष्ट्या
प्रसादो युष्माभिः कृतो मे
ऽनुग्रहात्मकः एवंभवतु भद्रं
यः पूजितास्मि सुखप्रदाः इति
महाभारते दानधर्म्मः ॥
गवात्मके क्ली ॥
गोमयछत्रं क्ली करकेकोडक
छत्रा इतिभाषा इति ॥
त्रिकाण्डशेषः ॥
गोमयछत्रिका स्त्री गोमयछत्रं

तत्पर्य्यायः दिलीरं २ शिलीं ।
ध्रकं ३ इतिहारावली ॥
उच्छिलीन्ध्रं ४ यथा उच्छिलीन्ध्र ।
मिवार्भकाः इतिश्रीभागवते ।
गोमयप्रियं क्ली भूतृणं गोयखड
इतिभाषा इतिरत्नमाला ॥
गोमयोत्था स्त्री गोमयजातकीट
विशेषः तत्पर्य्यायः गहेभी २
इति हेमचन्द्रः ॥
गोमयोद्भवः पुं आरग्वधः ॥
शोनालु इतिभाषा इति
शब्दचन्द्रिका ॥
गोमल्लिका स्त्री देशः डोंश ॥
इतिभाषा इतिशब्दरत्नावली
गोमान् त्रि बहवो गावोस्वामी
तत्पर्य्यायः गवीश्वरः २ गोमी
३ इत्यमरः ॥
गोमायुः पुं शृगालः इत्यमरः
गन्धर्वविशेषः इतिजटाधरः ।
गोमितं सोत क्ली चोये ॥
न
गोमी त्रि गोमान् इत्यमरः ॥
उपासकः इतिमेदिनी ॥
गोमी पुं शृगालः इति ॥
मेदिनी बुद्धभिक्षुशिष्यः इति
त्रिकाण्डशेषः ॥
गोमीनः पुं मत्स्यविशेषः ॥

यथा शृणु देवि प्रवक्ष्यामि मांस
भेदान् निबोध मे नदेये
तिक्तकमठे पक्षमृगाणमेवच
गोमीने चक्रशकुले वडाले
राघवे तथा इतिमत्स्यसूक्ते
गोमुखं क्ली कुटिलागारे
वाद्यभाण्डे लेपने इति
मेदिनी चोरक्रियमाणसंगा
भेदः स्थिरविशेष इतिभाषा
इति त्रिकाण्डशेषः जपमाला
गोपनार्थं वस्त्रनिर्म्मितयन्त्रे
यथाचतुर्विंशांगुल मिते ॥
यद्वस्त्रादि संभवेनिर्मीयाष्टांगुलि
मुखग्रीवा ततषडुदशांगुले
ज्ञेयं गोमुखयन्त्रेव सर्वं
तन्त्रेषु गोपितं तन्मुखे ॥
स्थापयेन्मालां ग्रीवामध्यगतः
करः प्रजपेद्विधिना गुह्यं
वर्णमालाधिक प्रिये इति
मुण्डमालातन्त्रे अपिच ॥
गोमुखादौ ततो मालां ॥
गोपयेन्मातृ जारवत् इति
मायातन्त्रे ॥
॥ गोमुखः पुं नक्रः यन्त्रविशेषः
इति हेमचन्द्रः ॥
गोमुखी स्त्री हिमालयाद्गङ्गापतने
गोमुखाकार गुहा इति लोक

प्रसिद्धिः राढदेशस्य नदी
विशेषः गोमुड इतिख्याता ॥
गोमूत्रं क्ली गोप्रस्रावः चोना
इतिभाषा तत्पर्य्यायः ॥
गोजलं २ गोंभः ३ गोनिष्यंदः
४ गोद्रवः ५ अस्य गुणाः कटुत्वं
तिक्तत्वं उष्णत्वं लघुत्वं कफ
वातव्रणदोषनाशित्वं पित्तकारित्वं
दीपनत्वं मेध्यत्वं मतिप्रदत्वंच।
इतिराजनिर्घंटः तीक्ष्णत्वं
क्षारत्वं कषायत्वं मूत्र।
गुल्मोदरानाह कंडूतिमुखरोग
किलास वातामवस्तिरुकुष्टकास
श्वासशोथ व कामलापांडुतिसार
मूत्ररोधकृमि प्रीतप्लीहवर्चोग्रह
नाशित्वं पूरणात् कर्ण मूल।
नाशित्वं सर्वमूत्रेषुगुणाधिक्यंच
इति भावप्रकाशः ॥
गोमूत्रिका स्त्री तृणविशेषः ॥
ताम्वड इतिभाषा तत्पर्य्यायः ॥
१ रक्ततृणा २ क्षेत्रजा ३ कृष्णभूमिजा
४ अस्या गुणाः मधुरत्वं हृद्यत्वं
गोदुग्धदायित्वंच इति
राजनिर्घंटः चित्रकाव्यविशेषः
यथागतिरुचावचावचायप्रमोर्ग
मूत्रस्येगोरिव गोमूत्रिकेति ॥
तन्माहुर्दुष्करो चित्रवेदिनः ॥

तस्याभेदः पादगोमूत्रिका ॥
अर्द्धगोमूत्रिका श्लोकगोमूत्रिका
विपरीतगोमूत्रिका इति
सरस्वतीकंठाभरणं ॥
गोमेदः पुं गोमेदकमणिः
इति राजनिर्घंटः ॥
गोमेदकं क्ली पीतमणिः
कक्कोलं पत्रकं इति ॥
मेदिनी ॥
गोमेदकः पुं स्वनामख्यातमणिः
तत्पर्य्यायः गोमेदः २ ॥
राहुरत्नं ३ तमोमणिः ४ स्वर्भानवः
५ पिंगस्फटिकः ६ अस्य गुणाः
अम्लत्वं उष्णत्वं वातकोप
विकारनाशित्वं दीपनत्वं ॥
पाचनत्वं धारणापापनाशित्वंच
इतिराजनिर्घंटः तस्यपरीक्षा
यथा हिमालये वा सिंधौ वा
गोमेदमणिसंभवः स्वच्छकांति
गुरुः स्निग्धोवर्णाढ्यो दीप्तिमानपि
वलक्षः पिंजरो धन्यो गोमेद
इति कीर्तितः चतुर्द्धा जाति ॥
भेदस्तु गोमेदेऽपि प्रकाश्यते
ब्राह्मणः शुक्लवर्णः स्यात्क्षत्रियो
रक्त उच्यते आपीतो वैश्य ॥
जातिस्तु शूद्रास्तु नील उच्यते
छायाचतुर्विधा श्वेता रक्ता पीता

ऽसिता तथा गुरुप्रभाढ्यः सित
वर्णरूपः स्निग्धोमृदुर्वीतिमहा
गुणः स्वच्छस्तु गोमेद मणि
र्धृतोऽयं करोति लक्ष्मीधनधान्य
वृद्धिं लघुर्विरूपोऽतिथरोन्य
मणिः स्नेहापलिप्तो मलिनः
स्वरोपिकरोति गोमेद मणि
विनाशंसंयत्ति भोगावलवीर्य्य
राशेः ये दोषाहीरके ज्ञेया।
स्ते गोमेद मणावपि परीक्षा
वह्नितः कार्य्या शाणेनवारत्न
कोविदैः स्फटिकेनैवकुर्वंति
गोमेद प्रतिरूपिणं मुहुस्य।
गोमेदमणेस्तु मूल्यं सुवर्णतोहै
गुणमाहुरेके अन्येतथाविद्रुम
तुल्यमूल्यं तथापरेचामरतुल्य
माहुः चतुर्विधानामेषांतु ॥
धारणेपरिसम्मतं इति भोज
राज कृतयुक्तिकल्पतरुः
गोमेदसन्निभः पुं दुग्धपाषाणः
इति राज निर्घंटः ॥
गोमेधः पुं यज्ञविशेषः तत्र
स्त्रीगोपशुः मैत्रेषु स्त्रीलिंग।
पादातु तस्य लक्षणं समशाफत्व
नवशाफत्व भग्न शृंगत्वकाणत्व
छिन्नकर्णत्वादिदोवराहित्वं तस्य
प्रयोगः सर्वोपिछागपशुवत्

यजमानस्य स्वर्गः फलं गोश्च
गोलोकप्राप्तिः तस्यच कलौ
निषेधो यथा अश्वालंभं गवालंभं
संन्यासं पलपैतृकं देवराच्च
सुतोत्पत्तिः कलौ पंचविवर्जयेत्
इत्यपलेवादिकल्पसूत्रपुराणे
गोरंकुः पुं पक्षिभेदः लग्नकः
वेदी इति मेदिनी क्वचित्पुस्तके
लग्नकस्थाने नग्नकोपि पाठः
गोरदः पुं दुष्खदिरः इति
राजनिर्घंटः ॥
गोरणं क्ली गुरणं उद्यमः ॥
इत्यमरटीका ॥
गोरसः पुं दुग्धे दधि तक्रे
इति हेमचंद्रः ॥
गोरसजं क्ली तक्रे इति ॥
राजनिर्घंटः ॥
गोरक्षः पुं ऋषभनामौषधे
इति हेमचंद्रः नागरंगः ॥
गोरक्षके त्रि इति मेदिनी ॥
गोरक्षकर्कटी स्त्री चिर्भिटा
इति भावप्रकाशः ॥
गोरक्षजंबूः स्त्री गोधूमः ॥
गोरक्षतंडुला इति विश्वः ॥
चोटफलः इति जटाधरः
गोरक्षतंडुला स्त्री क्षुद्रलताविशेषः
गोरक्षचाउलिया इति भाषा

तत्पर्य्यायः गोंगेरुकी २ ॥
नागबला ३ झषा ४ ह्रस्वगवेधुका ५
खरगन्धिका ६ विश्वदेवा ७ इति
रत्नमाला ॥
गोरक्षतुम्बी स्त्री कुम्भतुम्बी इति
राजनिर्घण्टः ॥
गोरक्षदुग्धा स्त्री क्षुद्रक्षुपविशे
तत्पर्य्यायः गोरक्षी १ नागदुग्धा
२ रसायनी ४ बहुपत्री ५ अमृता
६ जीवा ७ अमृतसंजीवनी ८
अस्या गुणाः मधुरत्वं हृद्यत्वं
संग्राहित्वं हिमत्वं सर्व्ववश्य
कारित्वं रससिद्धिगुणप्रदत्वञ्च
इति राजनिर्घण्टः ॥
गोरक्षी स्त्री क्षुद्रक्षुपविशेषः
सा तु मालवे प्रसिद्धा तत्पर्य्यायः
सर्पदण्डी २ दीर्घदण्डी ३ स्वदण्डिका
४ चित्रला ५ गन्धबहुला ६
गोपाली ७ पञ्चपर्णिका ८
अस्या गुणाः मधुरत्वं तिक्तत्वं
शिशिरत्वं दाहपित्तविस्फोट
शान्तिसारज्वरदोषनाशित्वञ्च
गोरक्षदुग्धा ॥ कुम्भतुम्बी ॥
इति राजनिर्घण्टः ॥
गोराटी स्त्री शारिकापक्षी।
इति हेमचन्द्रः ॥
गोराटिका स्त्री शारिकापक्षी

इति राजनिर्घण्टः ॥
गोरिका स्त्री शारिकापक्षी
इति राजनिर्घण्टः ॥
गोरुतं क्ली क्रोशद्वये इति
हेमचन्द्रः ॥
(ष्टः) गोरोचं क्ली हरिताले इति
राजनिर्घण्टः ॥ (नवर्ण)
गोरोचना स्त्री स्वनामख्यातपीत
द्रव्यविशेषः तत्तु गोमस्तकस्थमुख्यकपित्ते
यथा विशेषे षष्ठे शालिनां तेषु के
मूत्रे सपित्ते पवनः कफस्त्वा
यदा तदा प्रभृत्युपजायते चक्रमेण
पित्तेष्विव रोचना गोः इति
माधवकरः तत्पर्य्यायः रुचिः २
शोभा ३ रुचिरा ४ शोभना ५
शुभा ६ गौरी ७ रोचनी ८ पिङ्गा
९ मङ्गल्या १० मङ्गला ११ शिवा १२
पीता १३ गौतमी १४ गव्या १५
वन्दनीया १६ काञ्चनी १७ मेध्या
१८ मनोरमा १९ श्यामा २० रामा
२१ इति राजनिर्घण्टः वेधा २२
रोचना २३ अस्या गुणाः ॥
हिमत्वं तिक्तत्वं वश्यमङ्गलशान्ति
कारित्वं विषालक्ष्मीग्रहोन्माद
गर्भस्रावक्षतनाशित्वञ्च इति
भावप्रकाशः रुच्यत्वं पवित्रता
श्रृगारहितकारित्वं क्रमि ॥

कुष्ठनाशित्वं भूतोपशमनत्वं।
जनमोहनत्वञ्च इति राजनिर्घण्टः
गोर्दं क्ली मस्तिष्के मस्तकस्थहृते
इत्यमरः ॥
गोलं क्ली मण्डले इति मेदिनी
गोलः पुं सर्व्ववर्तुलः इति।
हेमचन्द्रः मदनद्रुमः इति
रत्नमाला जारात् विधवायाः
सुतः इति धरणी बोलः इति
जटाधरः भूगोलः खगोलश्च
यथा गोलं प्रान्तेयदितवमति
भास्करीये मृगाले इति सिद्धान्त
शिरोमणिः एकराशौ षड्ग्रह
योगः यथा ग्रहाणामेकस्मिन्
यदि भवति षण्णां निवसतिस
दा गोलयोगः प्रलयपदमिदं
पिलभते भवेद्वा कोरक्षः परि
हरति पुत्रैश्च जननीं नृपात्मना
पुः स्यात् ज्वलति वसुधा शुष्यति
नदी इति प्रश्नकौमुदी ॥
एकराशौ सप्तग्रहयोगश्च यथा
सप्तग्रहा यद्येकस्था गोलयोगा
स्तदा भवेत् दुर्भिक्षं राष्ट्रपीडा च
तस्मिन् काले नृपक्षयः इति
मयूरचित्रकं अपि च यकादि
गृह्णीयात् रुक्कान् योगान् ॥
विद्वांसस्त्याख्याः गोलसुक

मूलकेदार पाशदामसंख्या ॥
दीनाः स्युः दुःखित दरिद्र ॥
बालक रुषिकर दुःशीलपशुप
निपुणानां जन्मकर्मेण दुःखिनः
परभाग्योपः सर्व्ववैते इति ॥
दीपिका ॥
गोलक क्ली गोलोके यथा
यद्रूपं गोलके धाम तद्रूपं
नास्ति मामके इति तन्त्रे ॥
गोलकः पुं मृते भर्त्तरि जारजः
रांडरङ्केले इति भाषा ॥
इत्यमरः अलिञ्जरः गुडः ॥
पिण्डः इति हेमचन्द्रः ॥
गन्धरसः इति रत्नमाला ॥
कलायः मटर इति ख्यातः
इति शब्दचन्द्रिका ॥
गोला स्त्री दुर्गा गोदावरी सखी
कुनटी पत्राञ्जने मण्डले ॥
अलिञ्जरः बालक्रीडनकाष्ठं
इति मेदिनी ॥
गोलाङ्गूलः पुं वानरः तत्
पर्य्यायः कपिश्यामास्यः २ दधिशोणः
३ नगाटनः ४ इति त्रिकाण्डशेषः
कृष्णवानरः इति राजनिर्घण्टः
गोलासः पुं गोमयछत्रिका ॥
शिलीन्ध्रे इति हारावली ॥
गोलिहः पुं घण्टापाटलिः

इति राजनिर्घण्टः ॥
गोलीढः पुं चेटपाटलिः ॥
इत्यमरः ॥
गोलोकः क्ली श्रीकृष्णस्यस्थाने
वैकुण्ठस्य दक्षभागे गोलोके
सर्वमोहने तत्रैव राधिका ॥
देवी द्विभुजो मुरलीधरः यद्रूपे
गोलके धाम तद्रूपेनास्ति मामके
ज्ञानेवा वत्सयोः विवाध्यान ।
योगेन विद्यते सुह तत्व ॥
मयैदेविनानादेवेन शोभिते
मध्यदेशे गोलकाख्ये ॥
श्रीविष्णो लोभ मंदिरे ॥
श्रीविष्णोः सत्यरूपस्य यतस्य
ले चित्तमोहने तस्यस्थानस्य
माहात्म्यं किं मया कथ्यते ॥
ऽधुना तत्रैव सतते ।
भाति द्विभुजो मुरली धरः ।
तदा सत्व मयो विष्णुर्भवने
याति निश्चितं वैष्णवस्य महा
मोहो यत्रैव परमेश्वरि इति
स्थानस्य माहात्म्यं संक्षेपेण
मयोदितं विस्तारेणनशक्नोमि
जन्मान्तरे शतेनचवीजकोषस्य
वाह्यतवेष्टितं तोय मंडलं ॥
प्रमाणे सदर्शं तोये यथा ॥
क्षीरोदसागरे पूर्वस्मान्योति

वकारं कोटिचन्द्र समप्रभे ॥
वलयाकार रूपेण सम्पुष्टे तोय
मंडले गंगादि सरितः ॥
सर्वास्तत्रैव भाति सेंद्रादि
देवताः सर्वत्र समानानिरंतरे
गंधर्व यक्ष नागादि कूष्मांडा
भैरवा स्तथा नानासुख ॥
विलासेन सदा चैकाग्रचेतसः
विष्णुगाने प्रकुर्वन्ति स्तुति
भक्तिपरायणाः देवगाने
प्रकुर्वन्ति चतुर्वक्त्रेणवेधसा
मालवाद्याश्चषड्रागाः षट्त्रिंश
द्रागिणी तथा वेदगानेन भासते
मूर्त्तिमतः सदेव हि मालवेनैव
रागेण सामगाने सदाप्रिये
मल्लारेण सदा पर्वं वसंतेन
तथा पुनः हिंदोलेन यजुः पाठे
सदा कुर्वन्ति चेतसा कर्णाटेनैव
ऋग्वेदः श्रीरागेण तथा शिवे
निर्दिष्ट पाठ मेतत् अनिर्दिष्ट
मतपरं तत्र वसन्ति ते रागाः ।
सहस्राणि च षोडश मुरारे
मुरारी गानात् सर्वे स्तालाः
प्रजायन्ते तेन तालेन रागेण
सदा गायन्ति वेधसः तद्रागस्य
विभागेहि कुर्वन्ति मुनयोजनाः
वसंता द्याश्च ऋतव स्तिष्ठन्ति तत्र

संतते नानाऋतुप्रसूनेन भूषिते
मुरलीधरः तत्रैव राधिका देवी
नानासुखविलासिनी वदन्ती
मुरली गाने कुरुकान्त प्रमोहने
येन श्रवणेन कामस्य उत्पत्ति ॥
जायते सदा तद्रागे चैव तमाले ।
कुरु गाने प्रयत्नतः एवमानंद
संयुक्ता महावेश विलासिनी ।
वामभागे सदा भाति राधिका
भक्तवत्सला इति तन्त्रे ॥ (म
गोलोकः पुं श्रीकृष्णस्य नित्यधा
मयथा निरोधारश्च वैकुण्ठो ॥
ब्रह्माण्डानां परावरः तत्परं ।
अपि गोलोकः पंचाशत्कोटि
योजनात् ऊर्द्ध्वे निराश्रयश्चापि
रत्नसार विनिर्मितः सप्तद्वारः
सप्तसारः परिखा सप्तसंयुतः ।
लक्षप्राकारयुक्तश्च नद्याविरजया
युतः वेष्टितो रत्नशैलेन शत
शृंगेण चारुणा योजनायुत ।
मानेव यस्येकं शृंगमुज्वलं शत
कोटीयोजनश्च शैल उच्छित
एवच दैर्घ्यं तस्य शतगुणे
प्रस्थेच लक्षयोजनं योजना
युत विस्तीर्णं तत्रैव रासमंडलः
अमूल्य रत्ननिर्माणं वर्तुलश्चंद्र
विंवत पारिजात वनेनैव ॥

भूषितेन च वेष्टितः कल्पवृक्ष
सहस्रेण पुष्पोद्यान शतेनच
नानाविधैः पुष्पवृक्षैः पुष्पितेनच
वारुणात्रिकोटि रत्नभवनै
गोपीलक्षैश्च रक्षितः रत्नप्रदीप
युक्तश्च रत्नतल्प समन्वितः
नानाभोगसमायुक्तो मधुवापी
शतैर्वृतः पीयूषवापीयुक्तश्च
कामभोग समन्वितः गोलोक
गृहसंख्यानं वर्णनेवा विशारदः
नकोपि वेदविद्वान् वा
वेदविद्वान् ब्रजेश्वरः इति
ब्रह्मवैवर्त्त पुराणे ॥
गोलोमिका स्त्री क्षुद्रक्षुपविशेषः
गोधूमा इति पार्वती इति च भाषा
तत्पर्यायः गोधूमी २ गोजा
३ क्रोष्टुकपुच्छिका ४ गोलोमवा ५
प्रस्तारिणी ६ अस्या गुणाः कटुत्वं
तिक्तत्वं त्रिदोषशमनत्वं हिमत्वं
मूलरोगास्त्र दोष नाशित्वं
ग्राहित्वं दीपनत्वंच इति ॥
राजनिर्घण्टः ॥
गोलोमी स्त्री श्वेतदूर्वा वचा
भूतकेशः इति मेदिनी वेश्या
इति हेमचन्द्रः गोलोमिका
इति राजनिर्घण्टः ॥
गोवत्सादी २ पुं वृकः इति

राजनिर्घण्टः ॥
गोवन्दनी स्त्री प्रियङ्गुवृक्षः ॥
इत्यमरः पीतदंडोत पलः
इतिरत्नमाला ॥
गोवर्द्धनः पुं स्वनामख्यातवृन्दा
वनस्थपर्वतः इति जटाधरः
तस्यस्वरूपं यथा अनादि ॥
हरिदासोऽयं भूधरो नात्र
संशयः इति पद्मे पातालखण्डे ॥
व्यासेशति श्रीकृष्णवाक्यं ॥
गोवर्द्धनधरः पुं श्रीकृष्णः इति
शब्दचन्द्रिका ॥
गोवशा स्त्री वन्ध्यागौः इति
कलाप व्याकरणं ॥
गोविट् पुं गोमयं इत्यमरः ॥
गोविन्दः पुं श्रीकृष्णः गवाध्यक्षः
बृहस्पतिः इति मेदिनी ॥
गोविष्ठा स्त्री गोमयं इति
राजनिर्घण्टः ॥
गोवृन्दं क्ली गोसमूहः इति
हलायुधः ॥
गोवृन्दारकः पुं श्रेष्ठगौः इति
कलाप व्याकरणं ॥
गोवृषः पुं वृषः इति ॥
शब्दरत्नावली ॥
गोशकृत् क्ली गोमयं इति
जटाधरः ॥

गोशालं क्ली स्त्री गोगृहं गोवालि
इति भाषा इति लिङ्गादि संग्रहे।
अमरः ॥
गोशीर्षं क्ली चन्दने इति
राजनिर्घण्टः हरिचन्दने
इत्यमरः गोशीर्षं गोशीर्ष
तदाकारो मलयैकदेशस्तत्र जाते
कालताम्रव्यामिश्रवर्णमुत्पल
गन्धि अतिसरं शीतलं तथा ॥
सदैव सर्वैर्वाञ्छितं इति
भरतः गरों मल्लकंच ॥
गोशीर्षकः पुं द्रोणपुष्पीवृक्षः
इति रत्नमाला ॥
गोशृङ्गः पुं वर्वूरवृक्षः इति
राजनिर्घण्टः गोविषाणे क्ली
गोषड्गवं क्ली गोषट्कं इति
मुग्धबोधं ॥
गोष्ठ ऊ संघाते इति ॥
कविकल्पद्रुमः ॥
गोष्ठं क्ली गोस्थानं गोठ इति
भाषा इत्यमरः प्रत्ययविशेषः
स तु स्थानार्थे पशुवाचकशब्देभ्यो
भवति यथा गोगोष्ठं महिष
गोष्ठं इत्यादि इति भरतः ॥
गोष्ठश्वः त्रि स्वगृहे गनेस्थितो यः
परान्द्वेष्टि सः इति जटाधरः
गोष्ठाष्टमी स्त्री गोपाष्टमी

सैव कार्त्तिकशुक्लाष्टमी इति स्मृतिः
गोष्ठी स्त्री सभा तस्या लक्षण
विशेषः यथोक्ता कथिता गोष्ठी
कैशिकी वृत्ति संयुता संभोग।
रसषट्पं सम्वायोषिदन्विता
प्राकृतैर्नवभिः पुंभिर्दशभि ॥
र्वाप्युपलक्षिता गर्वविमर्षा।
संधिभ्यां हीनाः प्राकृत संमता
वाग्युद्धे रन्विता नैव वर्जयेये।
विचक्षणैः इति संगीत ॥
दामोदरः संलापः इति
मेदिनी योध्यवर्गः यथा विषे
गोष्ठी दरिद्रस्य वृद्धस्य तरुणी
विषं इति चाणक्यं ॥ (कः
गोष्ठीपतिः पुं योध्यवर्गपाल
सभापतिः अथ ब्राह्मण गोष्ठी
पतिलक्षणं यथा नानाशास्त्र
विशारदैः सिकता सत्काव्यसमो
दिता निर्दोषैः कुलभूषणैः परिमिता
पूर्णा कुलज्ञैरपि श्रीमद्भागवतादि
कारण कथा शुश्रूषयाने तिता
गत्वा भीष्टमुपैति पञ्चगुणिजनागो
ष्ठी हि सा चोच्यते एवम्भूता गोष्ठी
तस्याः पतिः अपि च कुलीनाः
श्रोत्रियाः सर्वे यस्यान्नं भुञ्जते ॥
गृहे कुलीनाय सतां दत्वा सगो
ष्ठीपतिरुच्यते तद्यथा गोग

वेणीलक्ष्मीकान्त मजमुयादारः
मुखवंशे मदन भट्टाचार्य्यः २
तद्वंशे गोवर्द्धनरायः ३ वंशवंशे
शुभराजखान वंशः ४ चट्टवंशे
अनन्तभट्टाचार्यः ५ एते प्राचीनाः
आधुनिकाबहवः सन्ति कायस्थ
गोष्ठीपतिलक्षणं यथानीत्यज्ञः
कुलकर्मठः स्थितिमतो मन्योपि
धर्म्मान्वितः कार्य्याकार्य्यविलोकनैः
कुलभूतां सन्मान दानोद्यतः ॥
योह्यायः कुलसंविदो कुलसुधीः
सन्मोलिकानां तथा सद्वंश
प्रभवः ख्यातो सविदितो दाता
स गोष्ठीपतिः गणना आदौ द्वादश
गोष्ठीपति गणना आदौ द्वादश
पर्याये समभवद्दानेन गोष्ठीपतिः
सत्कीर्त्तिश्च सबुद्धिखान तनयः
श्रीमत्तरायः कृती १ संजात ॥
स्वदनेतरं गुणधरा गणेपच
पर्यायके स्व ख्यातो हि पुरन्दरः
कुलभवः खानः सदादानतः २
पर्यायेच चतुर्दशे समभवत्
पौरन्दरः केशवः खानः संतत
दानतो हि विल सत् कीर्त्ति ॥
धरामण्डले ३ नाना विन्न ॥
विसर्जनेन जनित शांत फल्ल कीर्तिः
तिता वासीत् पंचदशे तदात्मज

कृती श्रीकृष्ण विश्वासखासथ
ततः षोडशपर्य्याये दानजालः
कुलीनालिमालोदयारामपालः
५ ततस्तत सुतः पर्य्याये सूर्य्य
वाजि सयोनाथ गणेऽभवत
गुणप्रजिः ६ ततः पर्य्याये ॥
ऽह्लादेशात तनूजः समाहूयभूपो
ऽर्चितार्य्यव्रजोयः सदासत्कृपा
लायसेलाप तोषः कुलीनोच्च
पूज्जायरोऽये सभासः ७
आसीत किंकरसेननामसत्कृती
योमौलिकैकाग्रणीः पर्य्याये
यरिपूजितार्य्य निचयैर्वैकान
विंशो हि सः सङ्गोष्ठीयतिपाल
वेषा तनया पाणिग्रहेणात्मनो
दानेनापिच मौलिकादिरपरो।
गोष्ठीपतिः प्रायमः ८ दाने ॥
नातिवदान्यता दिगुणतालिःसी
म पुंऐपश्च यो गोपीसिंह ॥
चतुर्धुरीण सत्कृती विंशो हि॥
पर्य्यायके यत्नात किंकरसेन
वेषा तनयापाणिग्रहाद्वाग्नतः
सोप्यासीत भुविमौलिकोटि।
रपरो गोष्ठीपतिः सत्सुतिः।
९ पर्य्याये पुनरेक विंशक ॥
इहख्यातः तमा मंडले
गोपीसिंहचतुर्धुरीणकुलज्ञोयो

रामकांतः कृती धन्यो गणप
सपुण्य जन्य यश्रासा गोष्ठीपते
रग्रणीदीनैः कर्णा इवाति धैर्य्य
पयसां रत्नाकरश्चापरः ९
द्वाविंशो किलपर्य्यायेऽतिनिपते
स्तस्यात्मजासेद्य हृतात्मवैपवास
सपुण्य दत्तक तनूद्भूतस्य च
श्रीमतः गोपीमोहनसंज्ञकस्य
तनयद्वारा च गोष्ठीपतिः संभूतो
नवकृष्ण भूपतिवरः सन्मौलिकादिः
स्थितौ १० तावन्मुख्य कनिष्ठ
मध्यमकुलोद्भूतास्ततीयाद्भवान्
षड्भ्रातृन पितावतोऽत्रगणना
वद्धक्रमोनादरात सङ्गोष्ठीपति
कारकान ति नताधीनान कुलीनान
समाहूयात्र प्रकृतांस्तथात्रसह
ज्ञातपूज्यांस्तथा कोमलान्
विनैर्वागमृते नैति प्रणतिभि
श्वान्यैस्तथा विंशके पर्य्याये
ऽतितरां प्रपूज्य परमाह्लादान्वितः
श्रीयुतः गोपीमोहन देव।
वेष्णातिलको गोष्ठीपतिस्तापति
जातः सम्प्रति भूमिर्देवचटकाग्रे
चोचनादच्युतिः ११ इति॥
दक्षिणराढीय कायस्थकुला
चार्य्यकारिका ग्रथ्यैर्वेयानां ॥
गोष्ठीपतिर्यथा विंशेभ्यः ॥

प्रियभोज्यवस्त्रवसनेच्छ्रासने
भूषणोग्रामा भूमितोगमा ॥
गजगणाः स्वर्णानिरत्नानिव
नावउदारमंदिरस्तुवोवाठम
दत्ताः सदासा साधुज्ञातिकुटेव
सद्गुण गणाः संप्रीणितायनेव
गोऽश्रायतिना यपवभियज्ञो
श्रेष्ठोऽभिषकः कृतीनानाशास्त्र
विशारदः शुभमति र्वाग्मी।
चिकित्सापटुः तस्मातप्राप
गजे तुरंगकनकछत्रेवरंग्रेयने
सोऽभूत सेनविनायकोबहुगुणे
रेवष्ट गोष्ठीपतिः वैनायकेषु
सर्वेषु भास्करः श्रेष्ठ इरितः
गोष्ठीपतितयाख्यातः सवैद्यैः
पूजितोऽयतः इति भरत।
मल्लिकसूत कुलपंजिका
गोष्पदं क्ली गोसेवितस्थाने
गोखुरप्रमाणे इत्यमरः ॥
तथाच गोष्पदे गोपदश्च भुः।
गवांवगति गोचरे इति
विश्वोमेदिनीच ॥
गोसः पुं वोलः उषःकालः
इतिमेदिनी॥
गोसंख्यः पुं इत्यमरः ॥
गोसंगः पुं प्रत्यूषः [illegible] इति
भूरिप्रयोगः ॥

गोसहदृत्तः पुं गवयः इति
हेमचंद्रः
गोसंदायः पुं गोदानकर्त्ता इति
व्याकरणं ॥
गोसंभवा स्त्री श्वेतदूर्वा इति
राजनिर्घंटः गोजाते त्रि
गोसर्गः पुं प्रभाते इति
हारावली ॥
गोसवः पुं गोमेधयज्ञः इति
जटाधरः ॥
गोसम्प्राप्ताः पुं वोलः इत्यमर
टीकायां रायमुकुटः
गोस्तनः पुं हारभेदः इत्यमरः
स तु चतुर्थ्यष्टिकः चतुस्त्रिंशद्यष्टिक
इतिकेचित इति भरतः॥
गवांकुचश्च ॥ (का
गोस्तना स्त्री गोस्तनीइत्यमरटी
गोस्तनी स्त्री द्राक्षा इत्यमरः
कपिलद्राक्षा इतिराजनिर्घंटः
प्राहरत्नावली ॥
गोस्थाने क्ली गोष्ठेइत्यमरः
गोस्वामी न त्रि गोपतिः इति
हलायुधः स्वर्गस्यभुवोवाप्रभुः
यथा श्री सनातन गोस्वामीप्रिया
श्रीरतिमंजरी इत्यनंतसंहिता
गोहृत्रं क्ली गोमयं इति ॥



रत्नमाला ॥
गोहरीतकी स्त्री विल्वहक्षः
इति शब्दरत्नावली ॥
गोहितः पुं घोषलताविल्वः
इति शब्दचन्द्रिका गवां ॥
हितकारके त्रि ॥
गोहितं क्ली पादमूले इति
हेमचन्द्रः ॥
गोह्यं त्रि गुह्यं गोपनीये ॥
इति पाणिनि व्याकरणं ॥
गोक्षुरः पुं क्षुद्रक्षुपविशेषः
स तु क्षुद्र वृहद्भेदेन द्विविधः
गोखरि इति गोखुरु इति च ॥
भाषा तत्पर्य्यायः त्रिकण्टः २
स्थलशृङ्गाटः ३ गोकण्टः ४
त्रिकण्टकः ५ त्रिपुटः ६ कण्टक
फलः ७ क्षुरः ८ इति रत्नमाला
गोक्षुरकः ९ पलङ्कषा १० इक्षुगन्धा
११ श्वदंष्ट्रा १२ स्वादुकण्टकः १३
गोकण्टकः १४ वनशृङ्गाटः १५
इत्यमरः क्षुरकः १६ भक्षकण्टः
१७ इक्षुगन्धिका १८ इति।
भावप्रकाशः क्षुराङ्गः १९ ॥
श्वदंष्ट्रकः २० कण्टकी २१ भद्रकण्टः
२२ व्यालदंष्ट्रः २३ क्षुरकः २४
षडङ्गः २५ अस्य गुणाः सुशीतलत्वं
वलप्रदत्वं मधुरत्वं वृंहणत्वं ॥

कृच्छ्राश्मरी मेह विदाह नाशित्वं
रसायनत्वं तच्च वृहत्तो गुणोत्तर
त्वं च इति राजनिर्घण्टः स्वादु
त्वं वस्ति शोधनत्वं दीपनत्वं
पुष्टिदत्वं श्वास कासार्शोव्रण
नाशित्वं च इति भावप्रकाशः
वायुनाशित्वं हृद्रोगातङ्ककाशगुल्मः
तिकृत्त्वं हृद्यत्वं सोतोविशो ॥
धनत्वं च इति राजवल्लभः
गोक्षुरकः पुं गोक्षुरः इत्यमरः
गौः पुं स्त्री स्वनामख्यातपशुः
गरु इति भाषा पुं गोः पर्य्यायः
अनड्वान् इति पदे द्रष्टव्यः स्त्री गोः
पर्य्यायः माहेयी १ सौरभेयी
२ उस्रा ३ माता ४ शृङ्गिणी ५
अर्जुनी ६ अघ्न्या ७ रोहिणी ८
इत्यमरः माहेन्द्री ९ इज्या १०
धेनुः ११ अघ्ना १२ दोग्ध्री १३ भद्रा
१४ भूरिमही १५ अनडुही १६
कल्याणी १७ पावनी १८
तन्मांसगुणाः सुस्निग्धत्वं पित्त
श्लेष्म विवर्द्धनत्वं वृंहणत्वं ॥
वलकारित्वं पीनस प्रदर ॥
नाशित्वं च इति भावप्रकाशः
अपूतत्वं गुरुत्वं वात कफा ॥
पहत्वं च तद्दुग्धगुणाः पथ्यत्वं
अत्यन्तरुच्यत्वं स्वादुत्वं स्निग्धत्वं

पित्तवातामय नाशित्वं ॥
मेध्यत्वं कान्ति प्रज्ञाङ्ग पुष्टिवीर्य्य
वृद्धिकारित्वं च तद्दधिगुणाः
अतिपवित्रत्वं शीतत्वं स्निग्धत्वं
दीपनत्वं वलकारित्वं मधुरत्वं
अरोचक वातामय नाशित्वं।
ग्राहित्वं च तन्नवनीत गुणाः
शीतत्वं वर्णवल शुक्रकफरुचि
सुखकान्ति पुष्टिकारित्वं समधुरत्वं
संग्राहकत्वं वक्षहितत्वं वात
सर्वाङ्गशूल कासश्रमसर्वदोष
नाशित्वं च तद्घृत गुणाः।
हृद्यत्वं धीकान्तिस्मृतिवलमेधा
पुष्ट्यग्निवृद्धि शुक्रवपुःस्थौल्य
कारित्वं वात श्लेष्मश्रमपित्त
नाशित्वं विपाके मधुरत्वं ॥
हृद्यतमत्वं वहुगुरुत्वं च ॥
गवां मूत्रं ससितं गुरुविष्टम्भि
दुर्जरं तस्मादभ्युदिते सूर्य्ये यामे
यामार्द्धमेव वा समुत्तार्य्य पयो
ग्राह्यं तत पथ्यं दीपनं लघु।
विवत्सा वालवत्सानां पयो
दोषलमीरितं प्राशस्त्यं वत्सैक
वर्णाया धवली कृष्णयोरपि
इत्यादा मास पर्णारा कृष्णशृङ्गीव
याभवेत् तासां गवां हितं।
क्षीरं घृतं वामृतमेव वा गवां

सितानां वातघ्नं कृष्णानां पित्त
नाशनं श्लेष्मघ्नं रक्तवर्णानां
क्षीरं हन्ति कपिला पयः इति
राजनिर्घण्टः ॥
गौः पुं स्वर्गः रश्मिः वज्रः
इति मेदिनीचन्द्रः इति विश्वः
सूर्य्यः गोमेधयज्ञः इत्यमर
टीकायां भानुदीक्षितः ऋषभ
नामौषधं इति राजनिर्घण्टः
गौः स्त्री वत्सः वाणः दिक्
वाक् भूः जले वहुवचनान्ता।
इयं इति मेदिनी जले एक ॥
वचनान्तापि इति केचित् इति
भरतः माता इत्येकाक्षरकोषः
गौः पुं क्ली लोम जले
इत्यमरटीकायां भानुदीक्षितः
गौजिकः स्वर्णकारः इति।
त्रिकाण्डशेषः ॥
गौडः पुं स्वनामख्यातदेशः
तद्देशस्थे पुंभूम्नि इति जटाधरः
तद्देश सीमा यथा वङ्गदेशं
समारभ्य भुवनेशान्तगो शिवे
गौडदेशः समाख्यातः सर्वविद्या
विशारदः इति शक्तिसङ्गम
तन्त्रे सप्तमः पटलः येच ॥
गौडा यथा सारस्वताः कान्य
कुब्जाः गौडमैथिलिकोत्कलाः



पैवगौडा इति ख्याता ॥
विदस्योत्तरवासिनः इति
स्कंधपुराणं पुं चिल्लीशाके
गौडवास्तूकः पुं चिल्लीशाके
इति राजनिर्घंटः ॥
गौडिकं क्ली मद्यविशेषः यथा
पैष्टिक गौडिक माध्वीकानां
पानेसुरापाने कल्पतमे इति
प्रायश्चित्तविवेके देवलः
गुड निष्पन्नद्रव्ये त्रि गुडस्येदं।
इत्यैस्मिक प्रत्ययः।
गौडी स्त्री गुडादि कृतासुरा
गुडेरमद इति भाषा तत्पर्य्यायः
वारुणी २ इति त्रिकांडशेषः
अस्याः गुणाः तीक्ष्णत्वं उष्णत्वं
मधुरत्वं वातनाशित्वं पित्त
बलकांतितुष्टिकारित्वं दीपनत्वं
पथ्यत्वंच इति राजनिर्घंटः
रागिणी विशेषः सा तु मेघरागस्य
पत्नी इति संगीतदामोदरः ॥
काव्यरीतिविशेषः यथा तत्र
प्रसादमाधुर्य्यगुणत्रितयभेदतः
गौडवैदर्भपांचालरीतयः।
परिकीर्तिताः इति काव्यचंद्रिका
कौशोनदः इति हेमचंद्रः
गौतमः पुं मुनिविशेषः स तु
शाक्यवंशावतीर्णबुद्धमुनिविशेषः

तत्पर्य्यायः शाक्यमुनिः २
शाक्यसिंहः ३ सर्वार्थसिद्धः ४ शौद्धोदनिः
(मायादेवीसुतः) ५ अर्कबंधुः ६
मायादेवीसुतः ७ इत्यमरः
गौतमसंभवा स्त्री गोदावरीनदी
इति राजनिर्घंटः ॥
गौतमी स्त्री दुर्गा इति मेदिनी
राक्षसीविशेषः इति शब्दरत्नावली
गोदावरीनदी गोरोचना ॥
इति राजनिर्घंटः ॥
गौतमः पुं स्थावरविषभेदः
इति हेमचंद्रः ॥
गौदारः पुं गोधिकात्मजः ॥
गौधा इति ख्यातः इत्यमरः।
गौधेयः पुं गोधिकात्मजः
इत्यमरः ॥
गौधेरः पुं गोधिकात्मजः
इत्यमरः ॥
गौरः क्ली पद्मकेशरः इति
मेदिनी कुंकुमे स्वर्णे इति
राजनिर्घंटः ॥
गौरः पुं श्वेतसर्षपः चंद्रः
इति मेदिनी धवद्रुमः इति
राजनिर्घंटः पीतवर्णः श्वेत
वर्णः अरुणवर्णः तद्वति त्रि
इत्यमरः श्रीचैतन्यदेवः ॥
इत्यनंतसंहिता ॥

गौरः त्रि विशुद्धः इति मेदिनी ॥
गौरचंद्रः पुं श्रीचैतन्यदेवः ॥
यथा कृष्ण श्रीचैतन्य गौरांगो।
गौरचंद्रः शचीसुतः प्रभुर्गौरो
गौरहरिर्नामानि भक्तिदानि मे
इत्यनंतसंहिता ॥
गौरजीरकः पुं शुक्लजीरकः
सादाजीरा इति भाषा तत्
पर्य्यायः अजाजी २ श्वेतजीरकः
३ कणाह्वा ४ कणजीरः ५ कणा ६
सितदीप्यः ७ दीर्घकणा ८
सिताजाजी ९ गौराजाजी १०
अस्य गुणाः हिमत्वं रुचिकारित्वं
कटुत्वं मधुरत्वं दीपनत्वं ॥
कृमि विषाध्मान नाशित्वं ॥
चक्षुर्हितत्वंच इति राजनिर्घंटः
गौरत्वक् पुं इंगुदीवृक्षः इति
राजनिर्घंटः ॥
गौरवं क्ली अभ्युत्थाने इति।
हेमचंद्रः गुरोर्भावः गुरुत्वं
इति मुग्धबोधं ॥
गौरवितः त्रि आर्य्यः तत्।
पर्य्यायः आर्य्यमिश्रः २ इति
त्रिकांडशेषः ॥
गौरशाकः पुं मधूकवृक्षविशे
इति जटाधरः ॥
गौरसर्षपः पुं श्वेतसर्षपः।

तत्पर्य्यायः अनयः २ सिद्धार्थः
३ भूतनाशनः ४ कटुस्नेहः
६ कंडूघ्नः ७ राजिकाफलः ८
तीक्ष्णकः ९ दुरापर्षः १० रक्षोघ्नः ११
कुष्ठनाशनः १२ सिद्धप्रयोजनः १३
सिद्धसाधनः १४ सितसर्षपः १५
अस्य गुणाः कटुत्वं तिक्तत्वं
उष्णत्वं वातरक्तग्रहत्वग्दोषविष
भूतव्रणनाशित्वं रुच्यत्वंच
इति राजनिर्घंटः रूक्षत्वं
तीक्ष्णत्वं कफरक्तःकंडूकुष्ठकोठ
कृमिनाशित्वं रक्तपित्ताग्नि ॥
वर्द्धनत्वंच इति भावप्रकाशः
गौरसुवर्णं क्ली पत्रशाकविशेषः
तन्तु चित्रकूटदेशे प्रसिद्धं तत्
पर्य्यायः स्वर्णं २ सुगंधिकं ३
भूमिजं ४ वारिजं ५ ह्रस्वं ६
गंधशाकं ७ कटुमृणालं ८
चूर्णशाककः ९ अस्य गुणाः
शिशिरत्वं कफपित्तज्वरदाह
रुचिभ्रांतिरक्तश्रमनाशित्वं
पथ्यत्वंच इति राजनिर्घंटः
गौराश्री गौरी इति
(षः द्विरूपकोषः ॥ (यथा
गौरांगः पुं श्रीचैतन्यदेवः
गौरांग गौरदीर्घांग पवित्र
स्तोत्रैकृतांजलिः नेदगोप

सतैवैव नमस्यामि गदाग्रजे
इति ब्रह्मयामले चैतन्यकल्प
चैतन्यस्तवः अपिच गौराङ्गो
नादगम्भीरः स्वनामामृतलालसः
इति कुलजामले ॥
गौराष्टकः पुं स्थावरविषभेदः
इति हेमचन्द्रः
गौरास्यः पुं कृष्णवानरः इति
राजनिर्घण्टः ॥
गौरिका स्त्री अष्टवर्षीया कन्या
इति शब्दरत्नावली ॥
गौरिलः पुं श्वेतसर्षपः ॥
गौरी स्त्री पार्वती असंजातरजः
कन्या हरिद्रा दारुहरिद्रा ॥
गोरोचना प्रियङ्गुवृक्षः वसुधा
नदीविशेषः वरुणभार्य्या
इति मेदिनी सूर्य्यवंशीयप्रसेन
जिद्राजभार्य्या यथा लेभे ॥
प्रसेनजिद्भार्य्या गौरी नाम

पतिव्रता अभिशप्ता तु सा भर्त्रा
नदी वै बाहुदा भवत् इति।

हरिवंशः तुच्छशालिविशेषः
इति हेमचन्द्रः मञ्जिष्ठा ॥
श्वेतदूर्वा मल्लिका तुलसी।
सुवर्णकदली आकाशमांसी

इति राजनिर्घण्टः रागिणी ॥
विशेषः सा तु मालवरागपत्नी
तस्या रूपं यथा आराममध्ये
कुमारिका शारदेन्दुमुखलक्ष्मीः
राज्ञी दाडिमबीजदन्ती ॥
कीरानने गौरी इति सङ्गीत ॥
दामोदरः ॥
गौरीजं क्ली अभ्रके इति ॥
राजनिर्घण्टः
गौरीपुत्रः पुं कार्त्तिकेयः इति
हलायुधः ॥
गौरीपुष्पः पुं प्रियङ्गुवृक्षः इति
गौरीललितं क्ली हरिताले
इति राजनिर्घण्टः ॥ (मी
गौरुतल्पिकः पुं गुरुपत्नीगा
इति प्रायश्चित्तप्रकरणे धर्मशास्त्रे
गौलिकः पुं मुष्ककवृक्षः इति
राजनिर्घण्टः ॥
गौल्यं क्ली मधुरे इति ॥

राजनिर्घण्टः ॥
गौशातिकः त्रि गौशतस्वामी

एकशतगवाश्चैव यस्यासौ इति
भाषा इति व्याकरणे ॥ (ने
गौष्ठीनं क्ली भूतपूर्वकगोस्था
पूर्वगोष्ठ इति भाषा इत्यमरः

ग्रथ इ ङ ग्रंथे कुटिलीकरणे
इति यावत् इति कविकल्पद्रुमः
ग्रथिते त्रि कृतग्रंथने गांथा
इति भाषा तत्पर्य्यायः ॥
ग्रथिते २ दृब्धे ३ इत्यमरः ॥
गुम्फिते ४ आक्रान्ते हिंसिते ॥
इति मेदिनी ॥
ग्रंथ कि ग सन्दर्भे ग्रंथन इति ॥
यावत् इति कविकल्पद्रुमः ॥
ग्रंथः पुं गुम्फः ग्रंथना धने ॥
शास्त्रे द्वात्रिंशदक्षरनिर्मितिः
अनुष्टुप्छन्दः श्लोके इति हेम
चन्द्रः ॥ अ
ग्रंथकर्त्ता त्रि ग्रंथकारः ॥
पुस्तककारकः शास्त्रकृत ग्रंथं
करोतीत्यर्थे तृण प्रत्ययः।
ग्रंथकुटी स्त्री लेखस्थाने इति
त्रिकाण्डशेषः ॥
ग्रंथनं क्ली गुम्फनं ग्रंथनात् तत्।
पर्य्यायः सन्दर्भः २ रचना गुम्फः ३
श्रथनं ४ इति हेमचन्द्रः ॥
ग्रंथना स्त्री ग्रंथने इति
मुग्धबोधे ॥
ग्रंथिः पुं वंशादिसंधिः गांठि
इति भाषा तत्पर्य्यायः पर्व
२ परुः ३ इत्यमरः काण्डसंधिः
भङ्गमुल्ला हितावली ॥

पिण्डालुः इति राजनिर्घण्टः
कौटिल्ये ग्रंथिपर्णवृक्षः श्रेयने
रुग्भेदः इति मेदिनी
तस्य निदानं संप्राप्ति यथा
वातादयो मांसमसृक् प्रदुष्टाः
संदूष्य मेदश्च तथा शिराश्च
वृत्तोन्नतं विग्रथितं तु शोथं
कुर्वन्त्यतो ग्रंथिरिति प्रदिष्टः
तस्य वातिकरूपं यथा
आयम्यते वृश्चति तुद्यते च
प्रत्यस्यते मथ्यति भिद्यते च
कृष्णो मृदुर्वस्तिरिवाततश्च भिन्नः
स्रवेच्चानिलजोऽस्रमच्छं पैत्तिक
रूपं यथा दन्दह्यते धूप्यति
चूष्यते च पापच्यते प्रज्वलतीव
चापि रक्तः सपीतोऽप्यथवापि
पित्तात् भिन्नः स्रवेदुष्णमतीव
चास्रं श्लैष्मिकरूपं यथा
शीतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत् संहननोपपन्नः
चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः
स्रवेच्छुक्लघनं च पूयं इति
माधवकरः ॥ (पर्णी
ग्रंथिकं क्ली पिप्पलीमूले ग्रंथि
गुग्गुलुः इति मेदिनी ॥
ग्रंथिकः पुं करीरः देवज्ञः ॥
सहदेवाख्यपाण्डवः इति मेदिनी

ग्रन्थिते त्रि ग्रथिते इत्यमरः ॥ ग्रन्थिदला स्त्री मालाकन्दः इति राजनिर्घण्टः ॥ ग्रन्थिदूर्वा स्त्री मालादूर्वा इति राजनिर्घण्टः ॥ ग्रन्थिपर्णं क्ली वृक्षविशेषः गाठयाला इति भाषा तत्। पर्यायः शुकं २ बर्हिपुष्पं ३ स्थौणेयं ४ कुक्कुरः ५ इत्यमरः बर्हिः पुष्पं बर्ही ७ पुष्पं ८ बर्हं ९ शुकबर्हं १० इति तट्टीका ॥ स्थौणेयकं ११ कुक्कुरपुष्पं १२ गुल्यकं(?) १३ इति रत्नमाला विशीर्णाख्यं १४ स्थाराम(?) गुच्छकं १५ बर्हिः १६ शुकपुच्छं १७ शुकच्छदं १८ इति ग्रन्थान्तरं ग्रन्थिकं १९ काकपुष्पं २० गुच्छकं २१ नीलपुष्पं २२ सौगन्ध्यं २३ तैलपर्णकं २४ अस्य गुणाः तिक्तत्वं तीक्ष्णत्वं कटुत्वं उष्णत्वं दीपनत्वं। लघुत्वं कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वं च इति भावप्रकाशः अस्य लेपनगुणः कुष्ठनाहलक्ष्मी(?) रक्तस्वेद(?) नाशित्वं इति राजवल्लभः॥ ग्रन्थिपर्णः पुं चोरकनामगन्धद्रव्यं इति राजनिर्घण्टः ॥

ग्रन्थिपर्णी स्त्री जतुकालता इति राजनिर्घण्टः ॥ ग्रन्थिपर्णी स्त्री गण्डदूर्वा इति राजनिर्घण्टः ॥ ग्रन्थिफलः पुं शाकुरुण्डवृक्षः कपित्थवृक्षः मदनवृक्षः इति राजनिर्घण्टः ॥ ग्रन्थिमत्फलः पुं लकुचः इति राजनिर्घण्टः ॥ ग्रन्थिमान् पुं अस्थिसंहारकवृक्षः हाडभांगा इति हाडजोडा इति च भाषा तत्पर्यायः अस्थिसंहारी २ वज्राङ्गी ३ अस्थिशृङ्खला ४ अस्य गुणाः वातश्लेष्महृत्त्वं कृमिदुर्नामनाशित्वं अस्थियोक्तृत्वं उष्णत्वं सारकत्वं अम्लरागपित्तकारित्वं रूक्षत्वं स्वादुत्वं ॥ लघुत्वं वृष्यत्वं पाचनत्वं च इति भावप्रकाशः रत्नमाला च ॥ पर्य्याया राजवल्लभोक्तगुणाः अस्थिसंहारः प्रोक्तो वृष्याः(?) ग्रन्थिमूलं क्ली गृञ्जनं इति राजनिर्घण्टः ॥ ग्रन्थिमूला स्त्री मालादूर्वा इति राजनिर्घण्टः ॥ ग्रन्थिलं क्ली पिप्पलीमूलं इति राजनिर्घण्टः आर्द्रकं इति

शब्दचन्द्रिका ॥ ग्रन्थिलः पुं विकङ्कतवृक्षः बइंच(?) इति भाषा करीरवृक्षः इत्यमरः तण्डुलीयशाके हिन्तावली(?) पिण्डालुः चोरकनामगन्धद्रव्यं विकण्टकवृक्षः इति राजनिर्घण्टः ग्रन्थियुक्ते त्रि इति मेदिनी ॥ ग्रन्थिला स्त्री भद्रमुस्ता मालादूर्वा गण्डदूर्वा इति राजनिर्घण्टः ॥ ग्रन्थिवर्हि पुं ग्रन्थिपर्णवृक्षः इति शब्दचन्द्रिका ॥ ग्रन्थिहरः पुं अमात्यः मन्त्री। इति त्रिकाण्डशेषः ॥ ग्रन्थीकं क्ली ग्रन्थिकं पिप्पलीमूलं इति द्विरूपकोषः ॥ ग्रस उ ङ भक्षणे इति कविकल्पद्रुमः ॥ ग्रसकि ग्रासे इति कविकल्पद्रुमः ग्रस्तं त्रि लुप्तवर्णपदं अस्पष्टवाक्यं(?) भुक्तं खादितं इत्यमरः। ग्रह ग ञ ग्रहणे इति कविकल्पद्रुमः ॥ ग्रह ऊकि आदाने इति कविकल्पद्रुमः ॥ ग्रहः पुं सूर्यादि नव यथा रविसोममंगलबुधबृहस्पति

शुक्रशनिराहुकेतवः तेषां महद्भागातिर्यथा(?) वक्रा १ अतिवक्रा २ कुटिला ३ मन्दा ४ मन्दतरा ५ समा ६ शीघ्रा ७ शीघ्रतरा ८ इति ज्योतिषं तेषां ध्यानानि यथा तत्र सूर्यस्य क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलं ॥ पद्महस्तद्वयं पूर्वाननं सप्ताश्ववाहनं शिवाधिदैवतं सूर्यं वह्निप्रत्यधिदैवतं ॥ सोमस्य सामुद्रं वैश्यमात्रेयं हस्तमात्रं सिताम्बरं श्वेतं ॥ द्विबाहुं वरदं दक्षिणं सगदेतरे दशाश्वं श्वेतपद्मस्थं विचिन्त्योमाधिदैवतं जलप्रत्यधिदैवं च सूर्याभिमुखं तथा मंगलस्य आवन्त्यं क्षत्रियं रक्तं मेषस्थं चतुरङ्गुलं आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजं दक्षिणोर्द्ध्वक्रमात् शक्तिवराभयगदाकरं आदित्याभिमुखं देवं तद्वदेव समाह्वयेत् स्कन्दाधिदैवतं भौमे क्षितिप्रत्यधिदैवतं बुधस्य ॥ मागधं द्व्यङ्गुलं त्रियं(?) वैश्यं पीतं चतुर्भुजं वामोर्द्ध्वक्रमतः खड्गचर्म गदावरदं रविन्मं(?) सूर्यास्य(?) ॥ सिंहगं सौम्यं ॥ पीतवस्त्रं ॥



तथाह्वयेत् नारायणाधिदैवेच
विसृष्टप्रत्यधिदैवते बृहस्पतेः
द्विजन्मांगिरसं पीतंसैंधवेच ॥
षडंगुलं ध्यात्वा पीताम्बरं जीवे
सरोजस्थे चतुर्भुजे दण्डाढ्ये ॥
दण्डवरद करकादेऽमाह्वयेत् ।
ब्रह्माधिदैवे सूर्य्यास्यमिन्द्रप्रत्य
धिदैवते शुक्रस्य शुक्रे ॥
भोजकटे विप्रे भार्गवेचनवांगुले
पद्मस्थमाह्वयेत् सूर्य्यमुखे श्वेते
चतुर्भुजे सदाक्षवरं करका ॥
दण्डहस्ते सिताम्बरं प्रजाधि ॥
दैवतंध्यायेत् शची प्रत्यधि ॥
दैवते शनेः सौराष्ट्रे ॥
काश्यपं शूद्रे सूर्य्यास्ये चतु॥
रंगुलं कृष्णं कृष्णांबरं गृध्रगते
सौरिंचतुर्भुजे तद्धाण वरं
शूलेधनुर्हस्ते समाह्वयेत् ।
यमाधिदैवते प्रजापति प्रत्यधि
दैवते राहोः राहुं ॥
मलयजं शूद्रे पैठीनद्वादशांगुले
कृष्णं कृष्णाम्बरं सिंहा सने
ध्यात्वातथाह्वयेत् चतुर्बाहुं ।
खड्गवर शूल चर्मकरं तथा।
कालाधिदैवे सूर्य्यास्ये सर्प
प्रत्यधिदैवते केतवो
कौशाद्वीये केतवाणं जैमिनीये

षडंगुले धूम्रे गृध्रगते धूम्राह्वे
येद्विकृताननं सूर्य्यास्ये
धूम्रवसनं वरदं गदिनं तथा
चित्रगुप्ताधिदैवेच ब्रह्मप्रत्यधि
दैवते इतिग्रहयागतत्वं ॥
अनुग्रहः निर्बंधः ग्रहणं ॥
रणोद्यमः पूतना द्यः ॥
तेतुबालग्रहाः सैंहि केयः
उपरागः सतुचन्द्रसूर्य्ययोर्ग्रहणं
इतिमेदिनी ॥
ग्रहकल्लोलः पुं राहुः इति
त्रिकांडशेषः ॥
ग्रहणं क्ली स्वीकारः आदरः ॥
करः उपलब्धिः वेदी ॥
उपरागः इति मेदिनी इन्द्रिये
इतिराजनिर्घंटः ग्राहः इति
जटाधरः अथसूर्य्यचन्द्रग्रहण
कारणं यथा भचिपादान्तरे
राहोः केतोर्वा संस्थितोरविः
चतुष्पादान्तरेचन्द्रस्तदासंभाव्यते
ग्रहः यस्मिन्नक्षे रविस्तस्माच्च
तुर्द्दशगतः शशी पूर्णिमा
प्रतिपत् संधौ राहुणा ग्रस्यते
शशी कृष्णपक्षे तुतीयायां।
मासस्त्रे यदिजायते तत
स्तयोदर्शे सूर्य्यो राहुणा ग्रस्यते
वरिः ग्रहणकालीन

रविचन्द्रयोर्मेघेनाच्छादनाच्छादन
कारणं यथा रवि भौमनवांशे ॥
तन्निरं भं यास मादिशेत् ।
बुधसौरि नवांशे तु मलिनेत्विन्द्र
वर्षणं गुरौ वैशाख मासाद्य ॥
हृष्यते सबलाहकः शशिशुक्र
नवांशेतुशाहृष्ट कालेमहज्जले
अन्यथायामभूतोतो हृष्यते ॥
छादितोवरो राहोर्वर्णं ॥
विशेषे शुभाशुभे यथा श्वेते।
क्षेम सुभिक्षे ब्राह्मणपीडाच
निर्दिशेद्राहो अग्निभय मनल
वर्णपीडाच हुताशहृत्तीनां।
हरितेरोगोऽनुतापः शस्यानो
मीतितश्च विध्वंसः कपिले
शीघ्रगसत्व श्वेह विध्वंसोऽथ
दुर्भिक्षं अरुणकिरणानुरूपे
दुर्भिक्षं हृष्टयो ग्रहपीडा ॥
धूम्राभे क्षेमसुभिक्षमादिशेन्मरे
हृष्टिंच कपोतारुण कपिले
श्यामाभेक्षुद्भयं विनिर्दिशेत्।
कपोतः शूद्राणां व्याधिकरः
कृष्णवर्णश्च विमल कमल
पीताभो वैश्य ध्वंसी भवेत् ॥
सुभिक्षाय सान्निध्यमग्निभयं
गैरिकरूपेच युद्धानिडर्वाकोऽ
श्यामेहारिदेचविनिर्दिशेन्मरके

अग्निभय संप्रदायी पाटल
कुसुमोपमो राहुः तद्दर्शन ॥
निषेधो यथा समाष्ट जन्मशेषेषु
चतुर्थेदशमे तथानवमेचतथा
चंद्रेनकुर्याद्राहु दर्शने जन्मभे
जन्मराशौचषष्टाष्टमगते तयोः
चतुर्थे द्वादशे चंद्रेनकुर्याद्राहु
दर्शनं ग्रासदर्शन मात्रेण ॥
वार्थहानिमहद्दुःखं जायतेनात्र
संदेह स्तस्मात्तं परिवर्जयेत्
विपत्करं प्रत्यरि संज्ञितेषु
वैनाशिकाख्येषु कृतेहि कर्म ॥
सर्वेनरांणां निष्फलमेवयस्मात्
कृतेपि तत्रास्ति शुभेन किंचित्
तत्रकर्तव्यं कर्म यथा ॥
एकरात्रमुपोष्यैवराहुं दृष्ट्वातये
नरः पुण्यमाप्नोति कृत्वाचस्नाने
श्राद्धे विधानतः आदित्यकरणेः
पूते पुनः पूतेच वह्निनाजले
व्याख्यातुरः स्नायात् ग्रहणेऽप्युष्ण
वारिणा सर्वं भूमि समं दानं।
सर्वेव्याससमा द्विजाः सर्वंगंगा
समंतोयं ग्रहणे नात्रसंशयः
सर्वस्वेनापि कर्तव्यं श्राद्धंवैराहु
दर्शने अकुर्वानस्तु तत श्राद्धे
पंकेगौरिव सीदति आपद्य
तग्रस्तौ तीर्थेच चंद्रसूर्य्यग्रहे तथा



ग्रासश्राद्धं द्विजैः कार्य्यं ग्रहणात्
तेरेव हि चन्द्रसूर्य्यग्रहे स्नाने ।
श्राद्धदानजपादिकं कार्य्याणि
मलमासेऽपि नित्यं नैमित्तिकं तथा
सतीर्थेऽर्कविधुग्रासे तत्तु दामन
पर्व्वणः मन्त्रदीक्षां प्रकुर्व्वाणः ।
प्रकुर्व्वाणो मासस्त्रीदीनशोधयेत्
चन्द्रग्रहश्चन्द्रवारे सूर्य्ये सूर्य्य
ग्रहस्तथा चूडामणिरयं योगः ॥
स्नाने फले स्मृते अन्यस्मा ॥
ग्रहणात् कोटिगुणमत्र फलं लभे
त् अथवान्यप्रकारेण पुरश्चरण
मिष्यते ग्रहणेऽर्कस्य चेन्दोर्व्वा ॥
शुचिः पूर्व्वमुपोषितः नद्यां ।
समुद्रगामिन्यां नाभिमात्रोदके
स्थितः यद्वा पुण्योदके स्नात्वा ॥
शुचिः पूर्व्वमुपोषितः ग्रहणादि
विमोक्षान्तं जपेन्मन्त्रं समा
हितः अनन्तरं दशांशेन
क्रमाद्धोमादिकं चरेत् तदन्ते
महतीं पूजां कुर्य्याद्ब्राह्मणतर्प
णं ततो मन्त्रप्रसिद्ध्यर्थं गुरुं ।
संपूज्य तोषयेत् एवञ्च मन्त्र
सिद्धिः स्याद्देवता च प्रसीदति
सूतके मृतके चैव न दोषो ॥
राहुदर्शने स्नानमात्रं तु कर्त्तव्यं
दानश्राद्धविवर्जितं ॥

नक्षत्रविशेषे ग्रहणेन राशेर्दोष
स्तत् शान्तिश्च यथा यस्मिन्निजजन्म
नक्षत्रे ग्रस्येते शशिभास्करौ ॥
तज्जातानां भवेत् पीडा ये नराः
शान्तिवर्जिताः ग्रहणे ग्रहयोरि
पीडितनाडीनक्षत्रदोषशमनाय
सहस्रपातपुष्पैः स्नायात्फलिनी
फलचन्दनोशीरैः नाडीनक्षत्रे
णिच अथ दश षोडशाष्टादश
त्रयोविंश पञ्चविंशतयः ताम्रे
पात्रे तिलैः पूर्णे पूर्णे वा गव्य
सर्पिषा भास्करग्रहणे दद्यात् नाडी
दोषापपीडितः हुतं कुम्भोपरि
निहितं पात्रं नवनीतपूरितं
दद्यात् नागादिदोषशान्तये
द्विजाय दोषाकर ग्रहणे ॥
तत्र भोजनादिनिषेधो यथा
चन्द्रस्य यदि वा भानोर्यस्मिन्नहनि
भार्गव ग्रहणं तु भवेत्तत्र तत्
पूर्व्वं भोजनक्रियां नाचरेत् ॥
सग्रहे चैव तथैवास्तमुपागते ॥
यावत् स्यान्नोदय स्तस्य नाश्नीया
तावदेव तु मुक्तिं दृष्ट्वा तु भुञ्जीत
स्नानं कृत्वापरेऽहनि सूर्य्यग्रहे
तु नाश्नीयात् पूर्व्वं यामचतुष्टयं
चन्द्रग्रहे तु यामांस्त्रीन् बालवृद्धा
तुरैर्विना अहं नकीर्त्तयेद्बुध

गतो राहोश्च सूतके ॥
तत्राशौचे यथा सर्व्वेषामेव
वर्णानां सूतके राहुदर्शने ॥
स्नात्वा कर्म्माणि कुर्व्वीत मृतमन्नं
विवर्जयेत् ग्रहणेप्यवमाशौचे
विमुक्तौ सौतिके स्मृते तयोः
संपत्तिमात्रेण अथ स्पर्श क्रिया
क्रमः इति तिथ्यादि तत्त्वे ॥
अथ ज्योतिर्म्मते ग्रहण स्वरूपं
यथा राहुः पृथिवी छायां
समाश्रित्य चन्द्रे चन्द्रमा श्रित्य ।
रविं यदाच्छादयति तत्तद्ग्रासाख्ये
किन्तु रविचन्द्रयो न गति रोधक
स्वरूपो ग्रासः अथ ग्रहणसं
संभावना अमावस्यावसानसमं
यदि रविस्फुट राश्यादि राहु ।
केत्वोः स्फुट राश्यादिभिस्तुल्यः
किंवा दशभागान्तरितो भवति
तदा सूर्य्यग्रहणं पूर्णिमावसान
काले यदि चन्द्रस्फुट राश्यादिः
राहुकेत्वोः स्फुट राश्यादिभिस्तुल्यः
किंवा त्रयोदश भागान्तरितो ॥
भवति तदा चन्द्रग्रहणं स्यात्
तस्य गणना प्रकारो
यथा अमावस्या शेषकाले पूर्णिमा
वसाने च सूर्य्यसिद्धान्तोक्तगणना
गतो यथासंभव राश्यादि स्यौ


रविचन्द्रौ कर्त्तव्यौ मध्यराहु ॥
राश्यादिभिर्युक्तः स्फुटराश्यादि
स्याद्रविश्च कार्य्यः अस्मिन्राहुयुक्त
रवौ षड्राश्यधिके सति षड्राशीन्
भक्त्वा त्रिंशता पूरितः सन् यदि
नवतिभागाधिको भवति तदाशी
त्युत्तरशतांशेभ्यो हीनः कार्य्यः
अवशिष्टांको द्विः स्थाप्यः एकस्मात्
द्वाभ्यां स्वतीकेनापरो युक्तः सन्
शरो भवति राहुरव्योर्योगे ॥
कृते मेषादि राशि षट्के सति
सशरः सौम्य संज्ञकः तुलादि
षट्के सति याम्य संज्ञकः स्यात् ॥
चन्द्रराहुमानज्ञाने पञ्च ॥
त्रिंशद्धकलाधिक नवस्तुतरसम
शतकलामित मध्यचन्द्रभुक्तिः
७९०।३५ साच स्फुटकर्म्मणा किंचित्
कलादिभिर्न्यूनाधिका वा भवति
तस्याः स्फुटचन्द्रभुक्त्याः सकाशात्
द्वाचत्वारिंशदधिक शतेन १४२
हरणाल्लब्धं चन्द्रस्य माने स्यात्
पञ्चगुणित चन्द्रमानात् द्वाभ्यां
हरणाल्लब्धं राहुमानं भवति
अथ चन्द्रग्रहणे राहुचन्द्रयो ॥
र्म्माने मिलितं शरेण हीनकरणात्
यदवशिष्टं तत् ग्रासो भवेत् ॥
शरेऽल्पे सति राहुचन्द्रयो ॥

मिलिते मानद्वये ग्रासो भवेत् ॥
शरे ऽधिके ग्रासोन स्यात्
चन्द्रग्रहणारंभादि काल
ज्ञाने यथा षड्गुणितग्रासांकात्
तन्मिश्रित ग्रासांकेन लब्धे।
दंडादिके स्थितिदंडार्द्धं ॥
भवति तत् पौर्णमासीय
दंडादिषु हीनेसत् स्पर्शकालः।
युक्तेसत् मुक्तिकालः द्विगुणिते ॥
तत् स्थिति दंडादिकालः स्यात्
चन्द्रमंडलस्य स्पर्शादि दिग् ॥
ज्ञाने पूर्वोक्तशरे याम्ये सति
आकाशे चन्द्रमंडलस्य आग्निकोणे।
स्पर्शो नैर्ऋतकोणे मुक्तिश्च स्यात्
शरे सौम्ये सति सति ईशानकोणे
स्पर्शः वायुकोणे मोक्षः इति
चन्द्रग्रहणे सूर्य्यग्रहणे असौ
यथास्वरेखा विषुवक्ताया द्विः
स्यायया एकस्याः षडूर्ध्वतीनान्या
युक्तासती भागादिर्याम्या...स्यात्
सूर्य्यग्रहणोपयोगिनतमाह ॥
दिनार्द्धमावस्यायो दंडाहीनो ॥
यदेतरं तत् अंशादिकं नत
नामकं स्यात् सूर्य्य
ग्रहणोपयोगिलंबनं यथा द्विगुण
नत सम संख्यक खंडो ग्राह्यः॥
खंडांतर गुणित शेषात् षष्टिलब्ध

युक्तः सन् स्फुट लंबनं अंशादिकं
भवति सूर्य्यग्रहणे फल यथा
दिन पूर्व परार्द्धे क्रमेणषड्गुणित
नतयुक्त लंबन सहित स्फुटरवौ
षड्राश्यधिके षड्राशीन् त्यक्त्वा
त्रिंशता गुणितो यदि नवभ्या
अधिको भवति तदा अशीत्युत्तर
शतात् हीनः कार्य्यः त्रिगुणित
दशलब्धेः खंडो ग्राह्यः खंडान्तर
गुणितशेषात् दशलब्धयुक्तः सन्
फलभवति सूर्य्य ग्रहणे ॥
नतिर्यथा अस्त फलयोर्योगो
नतिः स्यात् षड्राशि न्यूने अस्त
फलांतरे नतिः सा फले अधिके
सति सौम्या अस्ते अधिके सति
याम्या भवति सूर्य्य ग्रहणे
शरो यथा मध्यराहु सहितः
स्फुटरवि द्विगुणित लंबनखंडात्
नवघ्नतो शादिभि दिनपूर्वार्द्धे
रहितः दिनपरार्द्धे सहितः कार्य्यः
पलाहुप संस्कृत रवौ षड्राश्य
ऽधिके षड्राशीन् त्यक्त्वा इत्यादि
चन्द्रग्रहणोक्त वत शरः कार्य्यः
पश्चस्फुट शरः उभयोः शरनत्यो
दिक तुल्यतायां नत्या सहयुक्तो
दिग्विभेदे रहितः कार्य्यः अंतरे
कार्य्ये सति यदाधिकं तस्यदिशा

शरस्य दिक वक्तव्या
सूर्य्यमाने यथा दशानुपलाष्ट
विपलाधिको नषष्टिकलामितर
वि मध्यभुक्तिः ५९।८।१० साव
स्फुट कर्मणि किंचितकलादिभि
न्यूनाधिका वा भवति तस्यास्ति ॥
गुणितस्फुट रवि भुक्ते द्वात्रिंशता
लब्धे रवि माने स्यात्
अथ सूर्य्यग्रहणे पूर्वोक्त चन्द्र ॥
मानेर विमाने मिलिते शरेण
हीनेसत् ग्रासो भवेत् सूर्य्य॥
ग्रहणस्यारंभादिकालज्ञाने चते
गुणित ग्रासांकात द्विगुत ग्रासांकेन
लब्धे दंडादिके स्थितिनाडिकार्द्धं
भवति तदमावस्याया दंडादिषु
हीने स्पर्शकालः युक्ते मुक्तिकालः
स्यात् स्पर्शादि दिग् ज्ञाने।
शरे याम्ये सति अर्कमंडलस्य
नैर्ऋतकोणे स्पर्शः अग्निकोणे
मोक्षः स्यात् सौम्ये शरे सति
वायुकोणे स्पर्शः ईशानकोणे
मुक्तिर्भवेत् द्विगुणिते ततस्थिति
दंडादिस्यात् दिवारात्र्योः ॥
परार्द्धे यदि ग्रहणं भवति तदा
अमावस्या पौर्णमास्यार्द्धदंडादिः
स्फुट लंबनयुक्तः कार्य्यः गणितागत
कामात् हीनातिरिक्तेकालेयदि

ग्रहणं स्यात् तत् उत्पातिकं ॥
भवेत् ग्रहणे मंडलस्य ॥
सामान्य वर्णो यथा विंवस्य ॥
वैवर्ण्यं अस्तु हानि स्तमो हृतिः
खंडन मल्पता वाप्यजाकारुणश्याम
मलपीतविशेषैः पदार्थैः रोध
इववेष्टनेवा भवति अपर्वजे
ग्रहणे इतिव्यस्तनात्तिकारिस्यात्
तदादिशश्च विरूपाः स्युः ॥
ग्रासो गुलि मान ज्ञाने दश
गुणित ग्रासांकात् मानद्वयार्द्धेन
लब्धे चन्द्रसूर्य्ययोर्ग्रासस्य गता
ऽङ्गुलाद्यं भवति सूर्य्यस्य अंगुल
मपि ग्रासो ऽष्टधा भवति चन्द्रस्य
सार्द्धांगुलः सदर्शः यदि षोडशांग
गुलाधिको भवति तदा सर्वग्रासः
ग्रहणे मंडलवर्णो यथा ॥
अल्पे ग्रहणे धूम्राभस्समग्रे कपिले
अर्द्धेकृष्णाभे इति सूर्य्यग्रहणे
इति सिद्धांतमंजरी सम्मते ॥
ग्रहणिः स्त्री ग्रहणीरोगः इत्यमर
टीकायां राय मुकुटः ॥
ग्रहणी स्त्री अग्न्यधिष्ठाननाडीरोग
विशेषः तस्य निदानं सम्प्राप्ती
यथा अतीसारे निवृत्तेपि मंदाग्नेर
हिताशिनः भूयः संदूषितो ॥
वह्निर्ग्रहणीमपि दूषयेत् यकैः



कफः सर्वश्च दोषै ॥ इत्यर्थ
मूर्च्छितैः साडुष्टा वह्नि शोभुक्त
माममेव विमुञ्चति पक्वं वा सरुजं
पूति मुहु र्बद्धं मुहु र्द्रवः ग्रहणी
रोगमाहुस्तमायुर्वेदविदो जनाः
तस्य पूर्वरूपं यथा पूर्व
रूपं तु तस्यादे तृष्णालस्यं बल
क्षयः विदाहो ऽन्नस्य पाकश्च।
चिरात् कायस्य गौरवं तस्य ॥
वातिकस्य निदानरूपोक्तं तिक्त
कषायातिरूक्ष संदुष्ट भोजनैः
प्रमितानशनात्यध्व वेगनिग्रह
मैथुनैः मारुतं कुपितं वह्निं॥
संछाद्य कुरुते गदान् तस्यान्नं।
पच्यते दुःखं शुक्तपाकं खराङ्गता
कंठस्य शोषः क्षुत् तृष्णा तिमिरं
कर्णयोः स्वनः पार्श्वोरुवंक्षणग्रीवा
रुजाभीक्ष्णं विसूचिका हृत्
पीडा कार्श्यं दौर्बल्यं वैरस्यं ॥
परिकर्तिका गृद्धिः सर्वरसानां च
मनसः सदनं तथा जीर्णे ऽजीर्य्यति
चाध्माने भुक्ते स्वास्थ्यमुपैति च
स वातगुल्म हृद्रोगप्लीहाशंकी
स मानवः चिराद्दुःखं द्रवं शुष्कं
तन्वामं शब्द फेन वत् पुनः ॥
पुनः सृजेद्वर्च्चः श्वासकासार्दितो
ऽनिलात् पैत्ति कस्य

तस्य निदान रूपे कट्व ऽजीर्ण।
विदाह्यम्ल क्षाराद्यैः पित्तमुल्बणं
आप्लावयद्धन्त्यनलं जलं तप्त।
मिवानलं सोऽजीर्णं नील
पीताभं पीताभः सार्य्यते द्रवं
पूत्यम्लोद्गार हृत् कंठदाहारुचि
तृड्ढितः पैत्तिकस्य ॥
तस्य निदानरूपे गुर्वति स्निग्ध॥
शीतादिभोजनादति भोजनात्
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपितः
कफः तस्यान्नं पच्यते दुःखं
हृल्लास छर्द्यरोचकाः आस्योप
देह माधुर्य्य कासष्ठीवन पीनसाः
हृदयं मन्यते स्त्यान मुदरं ॥
स्तिमितं गुरु दुष्टो मधुर उद्गारः
सदनं स्त्री ष्वहर्षणं भिन्नाम श्लेष्म
संसृष्ट गुरु वर्च्चः प्रवर्त्तनं ॥
अकृशस्यापि दौर्बल्य मालस्यं च
कफात्मके पृथग्वातादिनिर्दिष्ट
हेतुलिङ्ग समागमे त्रिदोषं ॥
निर्दिशेदेवं तेषां वक्ष्यामि ॥
भेषजं तस्या साध्यस्य ॥
लक्षणं यथा लिङ्गैरसाध्य ग्रहणी
विकारोयेषु तैः रतीसार गदो ॥
न सिध्येत् वृद्धस्य नूनं ग्रहणी
विकारो हत्वा तनुं नो विनिवर्त्तते
च इति माधव करः ॥

ग्रहणीरुक् स्त्री ग्रहणीरोगः तत्
पर्य्यायः प्रवाहिका २ इत्यमरः ॥
ग्रहिणी ३ इति तट्टीका ॥
ग्रहणीहरी स्त्री लवंगे इति
शब्दचन्द्रिका ॥
ग्रहद्रुमः पुं शाकवृक्षः इति
राजनिर्घण्टः ॥
ग्रहनायकः पुं शनिः इति
शब्दरत्नावली सूर्य्यश्च ॥
ग्रहनाशः पुं वृक्षविशेषः छातिम
इति भाषा इति शब्दरत्नावली
ग्रहनाशनः पुं ग्रहनाश वृक्षः
इति शब्दरत्नावली रत्नमाला च
ग्रहनेमिः पुं चन्द्रः इति
शब्दरत्नावली ॥
ग्रहपतिः पुं सूर्य्यः अर्कवृक्षः
इत्यमरः ॥
ग्रहपुष्पः पुं सूर्य्यः इति
हेमचन्द्रः ॥
ग्रहभीतिजित् पुं चोरनाम॥
गन्धद्रव्यं इति राजनिर्घण्टः ॥
ग्रहयागः पुं ग्रहाणां यज्ञः
तस्य शान्तिकत्वे मलमासादावपि
कर्त्तव्यत्वे पौष्टिकत्वे न शुद्धकाले
तस्य प्रयोगो यथा यजमानः॥
कृतस्नानादिः गोमयोपलिप्ते ॥
देशे कुशासने उप विष्ट

उदङ्मुखो ब्राह्मणान् स्वस्तिवाच्य
संकल्प्यमेव मुख्यार्घ्यं श्वेतसर्षपेण
विघ्नकरान् उत्सार्य्य गणाधिप
षोडशमातृकापूजा वसोर्द्धारा
वृद्धिश्राद्धानि कृत्वा स्वयं करणा
सामर्थ्ये ब्राह्मणान् वृणुयात् ततो
मंडपान्तर पूर्व भागे वितस्तिद्वय
विस्तृतायां वितस्त्युच्छ्रितायां उदक्
प्लवायां वेद्यां रक्तचंदनादिना
मध्ये वर्त्तुले सूर्य्यं आग्नेय्यां श्वेत
ऽर्द्धचन्द्राकारे सोमं दक्षिणस्यां
त्रिकोणे रक्ते मंगलं ऐशान्यां
पीते धनुराकारे बुधं उत्तरस्यां
पीते पद्माकारे गुरुं प्राच्यां
श्वेते चतुष्कोणे शुक्रं प्रतीच्यां
कृष्णे सर्पाकारे शनिं नैरृत्यां
कृष्णे मकराकारे राहुं वायव्यां
धूम्रवर्णान् खड्गाकारान् केतून्
विलिख्य स्वगृह्योक्तविधिना अग्नि
स्थापनादि ब्रह्मस्थापनपर्य्यन्तं
कर्म कृत्वा ग्रहपीठे लिखितेन
तद्ध्यानेन मंडले ग्रहानावाह्य
तेषां स्व स्व वर्णं वस्त्र गंध पुष्पादिना
पूजयेत् गंधविशेषः सूर्य्याय
रक्तचंदनं सोमाय श्वेतचंदनं
मंगलाय कुंकुमं बुधाय सरले
गुरवे सम भागेन मिश्रितानि

रक्तचंदनं श्वेतचंदनं कुंकुमं।
सरलानि शुक्राय श्वेतचंदनं
शनैश्चराय कस्तूरी राहवे पद्मं।
काष्ठं केतुभ्यश्च पद्मकाष्ठं दद्यात्
धूपे विशेषः रवये गुग्गुलुं ॥
सोमाय सरलं मंगलाय देवदारु
बुधाय घृतमिश्रितदेवदारु।
बृहस्पतये दशांगं शुक्राय गुरुं
शनैश्चराय कालागुरुं राहवे ॥
गुडत्वचं केतुभ्यो मधुमिश्रितं।
गुडत्वचं दद्यात् ततो ऽधि
देवताप्रत्यधिदेवताः पूजयेत्
ततो बलिं दद्यात् सूर्य्याय ॥
गुडौदनं सोमाय घृतपायसं ॥
मंगलाय पक्वयवचूर्णलड्डुकं।
बुधाय क्षीरान्नं गुरवे दध्योदनं
शुक्राय घृतौदनं शनैश्चराय ॥
यवतिलतण्डुलामकं कृशरं।
राहवे छागमांसं केतुभ्यः अजा।
क्षीरसाधिताऽजकर्णं रक्तं ॥
यवतिलतण्डुलरूपविशेषौदनं
ततश्चरुं श्रपयेत् ततः
कुशण्डिकां समाप्य रव्यादीनां
चरुहोमं कुर्य्यात् ततो यथा
शक्ति प्रत्येकं कस्याष्टाविंशति
रष्टोत्तरशतं अष्टोत्तरसहस्रं वा
मधुसर्पिर्मिश्रिताभिः सूर्य्यादीनां

तत्तत्समिद्भिर्होमं कुर्य्यात् ॥
समिधस्तु अर्कः पलाशः खदिर
स्त्वपामार्गोऽथ पिप्पलः उडुम्बरः
शमी दूर्वा कुशाश्च समिधः ॥
क्रमात् तत उदीच्यं कर्म्म
समाप्य दक्षिणां दद्यात् ॥
दक्षिणास्तु धेनुः शंखस्तथाऽनड्वान्
हेमवासोहय स्तथा ॥
कृष्णागौ रायसं छाग एतावै ॥
दक्षिणाः स्मृताः अस्य यागस्य
प्रयोजनं यथा गोचरेषु वा ॥
विलग्नेषु वा ये ग्रहा रिष्टसूचकाः
पूजयेत्तान् प्रयत्नेन पूजितास्तु
शुभावहाः श्रीकामः शान्तिकामो
वा ग्रहयज्ञं समाचरेत् वृष्ट्यायुः
पुष्टिकामो वा तथैवाभिचरन्नपि
इति ग्रहयागतत्त्वं ॥
ग्रहराजः पुं सूर्य्यः चन्द्रः इति
मेदिनी बृहस्पतिः इति ॥
शब्द रत्नावली ॥
ग्रहाधारः पुं ध्रुवनक्षत्रं इति
शब्दरत्नावली ॥
ग्रहामयः पुं आवेशः स तु
भूतादिना जातरोगः इति।
राजनिर्घण्टः ॥ इति
ग्रहाशी न पुं ग्रहनाशवृक्षः
शब्दरत्नावली ॥

ग्रहाह्वयः पुं भूताङ्कुश वृक्षः
इति राजनिर्घण्टः ॥
गृहीता त्रि ग्रहणकर्त्ता तत् ॥
पर्य्यायः ग्रहयालुः २ इत्यमरः
ग्रामः पुं विप्रादिवर्णाश्रयाशका
परिखादिरहितावहुजनवसतिः
इति भरतः तत्पर्य्यायः ॥
संवसथः २ इत्यमरः वृहादि।
भृत्यवसतिः इति श्रीधरस्वामी
तथा शूद्रजनप्राया सुसमृद्धकृषी
वल क्षेत्रोपयोग भूमध्ये वसति
ग्रामसंज्ञिका इति मार्कण्डेय
पुराणे शब्दादि पूर्वकश्चेत्
समूहार्थः इति विश्वः यथा ॥
शब्दग्रामः भूतग्रामः गुणग्रामः
इत्यादि स्वरभेदः यथा
षड्ज मध्यम गांधाराः त्रयोग्रामाः
मता इह षड्जग्रामो भवेदत्र ॥
मध्यम ग्राम एव च स्वर्लोकेच
गांधारो ग्रामः प्रचरति स्वर्गे ॥
इदानीं षड्जग्रामस्य मूर्च्छनाः
क्रियंते मूर्च्छनाप्रस्तार इत्यर्थः
स ऋ ग म प ध नि स इति ॥
षड्जस्य मध्योधनी स ऋचगाः
इति मध्यमस्य ऋ गौ म पौ
धनी सोऽन्ते इति गांधारस्य ॥
मूर्च्छनाः स ऋ ग म प धा नि स

निषौ ऋ ग मपास्त्वथः धनिषा
ऋगमापोऽन्त्रापधौ निषौ ऋ
गावमःप पौ धनी च स ऋ
गागामपधनि साश्च ऋ ऋौगा
मपौ धनीसाऽन्ते मूर्च्छनाः ॥
सप्तषड्जाः आदिह्नि त्रि चतुः
पंच षट् सप्तस्वपि संमता
मध्यमोमा यदा तेषु मध्यमग्राम
मूर्च्छना आदौ गकारो यत्रास्ति
गांधारग्राममूर्च्छनातत्र षड्ज
ग्रामप्रस्तारस्यायं क्रमः ॥
षड्जान्निषधांते नैधांते धांत
पांतेमिषते पान्मांते ॥
मध्यमाज्ञाते गाद्दषभांतेमिषाते
ऋषभात् धांत मित्याहुः षड्ज
ग्रामस्य मूर्च्छनाः मध्यमग्रामजास्त्वेवं
मूर्च्छनाः परिकार्त्ति मकारादि
क्रमेणैव गकारोत्थास्तु मताः
तारोमेन्द्रश्च आवश्च इति ग्राम
निरूपणाः षड्जग्राममूर्च्छनायाः
सप्तकाष्टानि ब्रह्म विष्णु शिवैः
रुक्ताः स्वयोग्रामा मनोहराः
इति संगीत दामोदरः
ग्रामकूटः शूद्रः इति ॥
त्रिकांड शेषः ॥
ग्रामजनिष्पावी स्त्री नखनिष्पावी
इति राजनिर्घण्टः ॥

ग्रामणीः पुं नापितः इत्य मरः
ग्रामणीः त्रि प्रधानः अधिपतिः
इतिमेदिनी भोगिकः इति
हेमचंद्रः ॥
ग्रामणीः स्त्री वेश्या ग्रामेया ॥
नीलिका इतिहेम चंद्रः ॥
ग्रामतक्षः पुं ग्रामाधीनःकाष्ठतष्ट
ग्रामाधनस्तक्षा गेयेकृतार इति
भाषा इत्यमरः ॥
ग्रामता स्त्री ग्रामसमूहः इत्यमरः
ग्रामत्वंच ॥
ग्रामभृतः पुं ग्रामप्रेष्यः सतु।
ब्राह्मणश्चेत पंचमा ब्राह्मणः
इत्याह्निक तत्वे ॥
ग्राममद्गुरिका स्त्री भृंगीमत्स्यः।
ग्रामपुंडे इति मेदिनी ॥
ग्राममुखः पुं हट्टः इति
शब्दरत्नावली ॥
ग्राममृगः पुं कुक्कुरः इति
शब्दरत्ना वली ॥ (लो
ग्रामयाजकः पुंग्रामस्थनानावर्ण
पुरोहितः सतुचतुर्थाब्राह्मणः
यथा अब्राह्मणास्तु षट्प्रोक्ता
(ज्ञ
ऋषिणा तत्ववेदिनाआद्योरा
भृतकस्तेषां द्वितीयः क्रयविक्रयी
तृतीयोबहुयाज्यःस्यात्चतुर्थो
ग्रामयाजकः पंचमस्तुभृतस्तेषां

ग्रामस्यनगरस्यच अनादित्यात।
यः पूर्वांसादित्यांचैव पश्चिमां ॥
नोपासीत द्विजः संध्यां सषष्ठो
ऽब्राह्मणःस्मृतः इति शातातपः
ग्रामस्थः त्रि ग्रामवासी ग्रामे ॥
तिष्ठति य इत्यर्थे ड प्रत्ययः ॥
ग्रामहासकः पुं भगिनी पतिः
इति शब्दरत्नावली ॥
ग्रामाधाने स्त्री मृगया इति
हलायुधः ॥
ग्रामांते स्त्री ग्रामसमीपे तत
पर्यायः उपशल्य १ इत्यमरः ॥
ग्रामांतिकं २ इतिवोपालितः।
ग्रामिणी स्त्री नीलीवृक्षः इति
जटाधरः ॥
ग्रामी त्रि ग्रामविशिष्टः गो ३
इति भाषा यथा गमी गड ॥
गड ग्रामी निपः केशरकोणितः
केशरकोणीति ख्यातो ग्रामी।
ग्रामचतान्वरः इति ब्राह्मण ॥
कुलाचार्य्य कारिका ॥
ग्रामीणः पुं ग्राम्यशूकरः इति
राजनिर्घंटः कुक्कुरः काकः
(राजनिर्घंटः कुक्कुरः) [illegible]
ग्रामीणा स्त्री नीलीवृक्षः इति
मेदिनी पालंक्यशाके इति॥
राजनिर्घंटः ॥

ग्रामकुक्कुट इति मेदिनी ॥

ग्रामेयकः त्रि ग्राम्यः इति
हेमचंद्रः ॥
ग्रामेया स्त्री ग्राम्यनारी इति
ग्रामणी शब्दार्थे हेमचंद्रः ॥
ग्रामेश्वरः त्रि ग्रामे श्वरः ॥
ग्रामाधिपतिः यथा येकेचित
पुरुषाधमे कतिपय ग्रामेशा ॥
मत्प्रार्थदे सेवांये मृगयामहे
नरमहो मूढावराका वयं इति
शांति शतके ॥
ग्राम्यः त्रि ग्रामात यत्नः तत।
पर्य्यायः ग्रामेयकः २ ग्रामीणः
३ इतिहेमचंद्रः भेडादिवचने।
ह्रालिका शाकटिकप्रधानत्वात
ग्रामेभवेग्राम्ये इति भरतः
तत्पर्य्याय अश्लीलं २ इत्यमरः
ग्राम्यकंदः पुं ग्राम्योद्भवःकंदल
इतिभाषा तत्पर्य्यायः ॥
स्थलकंदः २ इतिरत्नमाला ।
सतुदोषलः इतिराजवल्लभः
ग्राम्यकर्कटा स्त्री कूष्मांडः इति
त्रिकांडशेषः ॥
ग्राम्यकुंकुमे स्त्री कुसंभे इति
त्रिकांड शेषः ॥
ग्राम्यधर्म्मः पुं मैथुनेइत्यमरः
ग्राम्यपशुः पुंग्रामजातजंतुः
सतुसप्तविधो यथा गौः १ अजः

२ मेषः ३ मनुष्यः ४ अश्वः ५ ॥
अश्वतरः ६ गर्द्दभः ७ इति
तिथ्यादि तत्वे ॥
ग्राम्यमद्गुरिका स्त्री भृंगीमत्स्यः॥
इतिहारावली ॥
ग्राम्यमृगः पुं कुक्कुरः इति
जटाधरः ॥
ग्राम्यराशिः पुं मिथुनेकन्या ॥
तुलावृश्चिकः धनुः कुंभः ॥
रात्रौ मेषः वृषश्च इति
ज्योतिषे ॥
ग्राम्यवल्लभा स्त्री पालंक्यशाके
इतिराजनिर्घंटः ॥
ग्राम्यशूकरः पुं स्त्री ग्रामोत्पन्न
वराहः तत्पर्य्यायःविड्वराहः
२ ग्रामीणः ३ ग्रामक्रोडः ४
ग्रामकोलः ५ विष्कलः ६ दारकः ७
तस्यमांसस्य गुणाः वनवराह
मांसाद्गुरुत्वं मेदोवलवीर्य्य
वृद्धिकारित्वंच इतिराजनिर्घंटः
ग्राम्या स्त्री नीली निष्पावी इति
राजनिर्घंटः ॥
ग्राम्याश्वः पुं गर्द्दभः इति
त्रिकांडशेषः ॥
ग्रावा पुं प्रस्तरः पर्वतः ॥
इत्यमरः मेघः इति विश्वः ॥
हस्तौत्रि इति शब्दरत्नावली



ग्रासः पुं मुखपूरणान्नादि यथा
कुक्कुटाण्डप्रमाणोऽस्य यावांश्च प्रवि
शेन्मुखे एतं ग्रासं विजानीयात्।
शुद्ध्यर्थं कायशोधने इति
प्रायश्चित्त प्रकरणे पराशरः॥
तत्पर्य्यायः कवलः २ इत्यमरः।
गुडेरकः ३ पिण्डः ४ गेण्डोलः ५
कवकः ६ गुडः ७ इति हेम चन्द्रः
ग्राहः पुं ग्रहणे जलजन्तुविशेषः
ह्यांगर इति भाषा जलहस्ती इति
केचित् तत्पर्य्यायः अवहारः॥
२ इत्यमरभरतौ शिशुकः॥
इति राजनिर्घण्टः॥
ग्राहकः पुं सितावरशाके॥
इति राजनिर्घण्टः हिंस्रपक्षी॥
व्यालग्राही ग्रहीतरि त्रि इति॥
शब्दरत्नावली॥
ग्राहिणी स्त्री क्षुद्रदुरालभा॥
राजनिर्घण्टः ताम्रमूलाहृत्तः
छिर इति भाषा॥
इति रत्न माला॥
ग्राहिफलः पुं कपित्थ वृक्षः इति
राजनिर्घण्टः॥
ग्राही पुं कपित्थः इति शब्दचन्द्रिका
ग्राही त्रि मलवेधकः धारकः॥
इति वैद्यके ग्रहणकर्त्ता इति
व्याकरणं॥

ग्रीवा स्त्री गलघाटादिसमुदिता इति
भरतः मातृगर्भे मास मात्रेण॥
भवति इति सुखबोधः तत्
पर्य्यायः शिरोधिः २ कंधरा ३
इत्यमरः कंधिः ४ शिरोधरा ५
इति राजनिर्घण्टः कंधराशिरा
इति मेदिनी॥
ग्रीवी पुं स्त्री उष्ट्रः इति जटाधरः
प्रशस्त ग्रीवायुक्ते त्रि॥
ग्रीष्मः पुं ऋतुविशेषः स तु
ज्यैष्ठाषाढौ तत्पर्य्यायः उष्मकः
२ निदाघः ३ उष्णोपगमः ४ उष्णः
५ उष्णागमः ६ तपः ७ इत्यमरः।
घर्म्मः ८ तापनः ९ उष्णागमः १०
उष्मकालः ११ ग्रैष्मिके त्वनस्वेद
जन्मित्येष निश्चयः इति
राजनिर्घण्टः तत्र जात फले॥
ग्रीष्मोद्भवो भोगभवान्नुरक्तो
वक्तासुशीलो जलकेलिशीलः
विघापनैश्वर्य्य॥
यशोमनोज्ञो धन्वी॥
सर्वेषां परदाररचितः इति
कोष्ठीप्रदीपः उष्णः गरमि
इति तात इति च भाषा इति
मेदिनी तद्वति त्रि॥
ग्रीष्मजा स्त्री लवणीलोणा इति
भाषा इति शब्द चन्द्रिका॥

ग्रीष्मपुष्पी स्त्री करुणीपुष्पवृक्षः
इति राज निर्घण्टः॥
ग्रीष्मभवा स्त्री नवमल्लिका इति
रत्नमाला॥
ग्रीष्मसुन्दरकः पुं शाकविशेषः
गिमा इति भाषा तस्य गुणाः॥
तिक्तत्वं लघुत्वं कफपित्तदोष
नाशित्वं रुचिकारित्वंच इति
राजवल्लभः॥ (सुता
ग्रीष्महासे स्त्री इंद्रतूलकं बुडीर
इति भाषा इति त्रिकाण्डशेषः।
ग्रीष्मी स्त्री नवमल्लिका इति
राजनिर्घण्टः॥
ग्रीष्मोद्भवा स्त्री नवमल्लिका इति
राजनिर्घण्टः॥
ग्रुच उ इर चौर्य्य गतौ इति
कवि कल्प द्रुमः॥
ग्रैवं क्ली ग्रीवाभूषणं इति।
शब्द रत्ना वली॥
ग्रैवेयं क्ली कंठभूषणं इति
शब्द रत्ना वली॥
ग्रैवेयकं क्ली कंठभूषा इत्यमरः
ग्रैष्मी स्त्री नवमल्लिका इति
त्रिकाण्ड शेषः ग्रीष्मसंबंधिनि
त्रि नीतश्च॥
ग्लस उ ङ भक्षणे इति
कविकल्प द्रुमः॥

ग्लस्तः त्रि भक्षितः इत्यमरः॥
ग्लह ऊ किश्चादाने इति
कविकल्प द्रुमः॥ (इति
ग्लहः पुं अक्षक्रीडास्पणः आड
वाजि इति च भाषा इत्यमरः॥
ग्लाना त्रि ग्लानियुक्तः इति व्याकरणे
ग्लानः त्रि रोगात् क्षीणदेहः॥
तत्पर्य्यायः ग्लास्नुः २ इत्यमरः
रोगी इति राजनिर्घण्टः॥
ग्लानिः स्त्री बलहीनता इति हेम
चन्द्रः रोगः इति राजनिर्घण्टः।
ग्लास्नुः त्रि ग्लानः इत्यमरः॥
ग्लुच उ इर चौर्य्ये गतौ इति॥
कविकल्पद्रुमः॥
ग्लुंच उ इर गतौ इति
कविकल्प द्रुमः॥
ग्लेप ऋ ङ दैन्ये गतौ चाले
इति कविकल्पद्रुमः॥
ग्लेपः त्रि ग्लानियोग्यः इति
व्याकरणं॥
ग्लेव ऋ ङ सेवे इति कविकल्पद्रुमः
ग्लेष ऋ ङ अन्वेषे इति
कविकल्प द्रुमः॥
ग्लै ० क्षमे हर्षक्षये इति॥
इति कविकल्पद्रुमः॥
ग्लौः पुं चन्द्रः कर्पूरः इत्यमरः॥



घ घकारः सप्तव्यञ्जन चतुर्थवर्णः
अस्योच्चारणस्थाने कण्ठः इति
व्याकरणे अस्य स्वरूपं यथा।
घकारं चञ्चलापाङ्गि चतुष्कोण
लकं सदा पञ्चदेव मयं वर्णं।
अरुणादित्य सन्निभं निर्गुणं॥
त्रिगुणोपेतं सदा त्रिगुणसंयुतं।
सर्वगं सर्वदं शान्त घकारं ॥
प्रणमाम्यहं इति कामधेनुतन्त्रे
अस्यात् पतिर्गवर्णे द्रष्टव्या।
घः पुं घण्टा घर्घरशब्दः इति
मेदिनी ॥
घघ हसने इति कविकल्पद्रुमः
घट षङ्‌म चेष्टे इति
कविकल्पद्रुमः ॥
घटक हिंसे संघाते ॥
युतौ इति कविकल्प द्रुमः॥
घट कि युतौ इति कविकल्पद्रुमः
घटः पुं कलसः इत्यमरः तस्य
परिमाणं कलसशब्दे द्रष्टव्यं
समाधिभेदः स तु कुम्भके ॥
इभशिरः कूटकुटः इति मेदिनी
कुम्भराशिः यथा सिंहे वा यदि
गोघटे गतनरः सर्वार्थसिद्धिं
लभेत् इति समयप्रदीपः॥
द्रोणपरिमाणं इति वैद्यक ॥
परिभाषा कुम्भपरिमाणं यथा
दशाद्रोणं भवेत् खारी कुम्भस्तु।
द्रोणविंशतिः इति प्रायश्चित
तत्वकात्यायनः॥ (नायः
घटकः पुं वनस्पतिः पुष्पेण वि
फलितः इति भूरिप्रयोगः
योजकः तत्पर्य्यायः श्रेत्तरः
२ इति त्रिकाण्डशेषः तस्य ॥
लक्षणं यथा धावकोभावकश्चैव
योजकश्चोपशाकस्तथा हषक
स्तावकश्चैव षडेते घटकाः स्मृताः
अन्यज्ञा केनो विदेति पुरुषा
पुरुषानुपूर्विं सुवी नत्वेकुलभृतां
परिवर्तनेन वा अत्यन्त सूक्ष्मभावेन
कुलतारतस्य जानाति ते हि
घटकानन्त योजकाः इति
कुलदीपिका ॥
घटदासी स्त्री कुट्टनी तत्पर्य्यायः
कुट्टिनी २ इज्या ३ रतताली ४
गणेरुका ५ इति त्रिकाण्डशेषः
घटना स्त्री संघातीकरणं समूही
(टा
करणं यथा करिणां घटना घ
इत्यमरः योजनामेलने ॥ (स्त्री
यथा अघटन घटना पटीय
माया इति मायालक्षणं ॥
घटयोनिः पुं अगस्त्यमुनिः इति
हलायुधः ॥

घटराजः पुं कुम्भः इति हारावली
घटा स्त्री करिणां घटना हस्तिनो
युद्धार्थायैकत्र संघातीकरणं ॥
इत्यमरः घटने गोष्ठी सभा ॥
इति मेदिनी समूहः यथा।
यदगारघटाट्टकुट्टिमस्रवदिन्दूपल
तुन्दिलापया इति श्रीहर्षः ॥
घटालाबुः स्त्री कुम्भतुम्बी इति
राजनिर्घण्टः ॥
घटिकं क्ली नितम्बः इति
शब्दचन्द्रिका ॥
घटिका स्त्री पादग्रन्थिः इति
शब्दरत्नावली मुहूर्त्तः इति
जटाधरः दण्डः घडी इति
भाषा यथा चतस्रो घटिकाः
प्रातररुणोदय उच्यते इति
तिथ्यादितत्वे ॥
घटी स्त्री दण्डः घडी इति भाषा
इति भूरिप्रयोगः स्वल्प घटः ॥
इति मुग्धबोधे ॥
घटाकारः ॥
कुलालः इति मुग्धबोधे ॥
घटीयन्त्रं क्ली कूपाज्जलोत्तोलन
रज्जुसहित घटः जलतोलाकल
इति भाषा तत्पर्य्यायः ॥
उद्घाटने २ इत्यमरः ॥
घटोत्कचः पुं राक्षसविशेषः
स तु हिडिम्बा राक्षसी गर्भे भीम
सेनाज्जातः इति महाभारते ॥
घटोत्कचान्तकः पुं कर्णराजः
इति त्रिकाण्डशेषः ॥
घटोद्भवः पुं अगस्त्यमुनिः इति
हेमचन्द्रः ॥
घट्ट कचाले इति कविकल्पद्रुमः
घट्ट ङ चाले इति कविकल्पद्रुमः
घट्टः पुं नद्यादौ स्नानार्थप्रवेश
स्थाने घाट इति यस्य प्रसिद्धिः
जगात इति ख्यातो वा इति ॥
लिङ्गादिसंग्रहे अमरभरतौ
तत्पर्य्यायः तीर्थवतारः २
इति हेमचन्द्रः ॥
घट्टगा स्त्री नदीभेदः यथा
मलापहा भीमरथी च घट्टगा
यथा च तस्या जलसाम्यता गुणाः
मलापहा घट्टगय स्तथापि पथ्ये
लघुस्वादुतरं सकोतिदे इति
राजनिर्घण्टः ॥
ने (शेषः
घट्टजीवी पुं वर्णसंकरजातिवि
पाटनि इति भाषा स तु ॥
वैश्यायां रजकाज्जातः इति
विवादार्णवसेतुः ॥
घट्टना स्त्री चलना वृत्तिः ॥
हेम चन्द्रः ॥



चणद३ञ दीप्तौ इति
कविकल्पद्रुमः ॥ (शोषः
चेटः पुं स्वनामख्यातयेजनवि
मत्स्यचेट गुणः बल रुचि
कारित्वं वातनाशित्वंच इति
राजवल्लभः ॥ (कोण
चेटकः पुं क्षुपविशेषः चेट
इतिभाषा अस्यमूलगुणाः॥
कफनाशित्वं कटुपाकित्वं ॥
पित्तकारित्वंच इतिराजवल्लभः
चेटकर्णोपिपाठः ॥
चेटा स्त्री कांस्यनिर्मितवाद्य।
विशेषः यथासर्ववाद्यमयी।
चेटावाद्यभावेनियोजयेत् ॥
इतिस्मृतिः घाखावस्यगृहेनास्ति
चेटावा गरुडान्विता पुरतो ॥
वासुदेवस्य नस भागवतःकलौ
इतिपद्मपुराणे पातालखंडे।
चेटापाटलिवृक्षः इति
नागवल्ला इतिराजनिर्घंटः ॥
चेटाकः पुं चेटापाटलि वृक्षः
इतिशब्दरत्नावली ॥
चेटाकर्णः पुं ॥
शिवगणविशेषः ॥
चेंडु इति ख्यातः यथा
चेटाकर्णोगणः श्रीमानशिवस्य
भीववल्लभः इतिशिवपुराणे।

तस्यपूजाविधिर्यथाचैत्रेमासिच
संपूज्या चेटाकर्णो चेटात्मकः
आरोग्याय स्त्रीहीमूलेसेकोत्सो
नत्रकारयेत् पूजामेत्रो यथा ॥
चेटाकर्ण महावीर सर्वव्याधि
विनाशन विस्फोटक भयेप्राप्ते
रक्ष रक्षमहाबल इति ॥
तिथ्यादितत्वं ॥
चेटायष्टः पुं ग्रामादेप्रधानमार्गः
यथादृष्ट्वा धन्वेतरो राजमार्गे
चेटापष्टः स्मृतः इतिचाणक्य
चेटापल्लवितानोरुक्षपादीनो
पेयाः इति भरतः तत्पर्यायः
संसरणं २ तल्ले सरणं ॥
यदिपुर संवेथि स्यात् तदा
उपनिष्करमितिख्यातं इत्यमरः
चेटापाटलिः पुं वृक्षविशेषः
चेटापाकल इति भाषा तत्
पर्यायः ४ मुष्ककः ५ इत्यमरः
गोलिहः ६ चेटा ७ पाटलिः ८
इति तट्टीका लारुः ९ ॥
कालमुष्ककः १० इतिरत्नमाला
पाटली ११ ॥
चेटाकः १२ स्फाटः १३ ॥
इतिशब्दरत्नावली तीक्ष्णः ॥
चेटकः १५ इति रत्नकोषः ॥
मोक्षकः १६ काष्ठपाटली ॥

कालास्थाली १८ काचस्थाली १९
इति भावप्रकाशः राजनिर्घंटाक
गुणपर्यायो मुष्ककशब्देद्रष्टव्यो
चेटारवा स्त्री वृक्षविशेषः ॥
कनकनिया इतिचत्रशाणइतिच
भाषा तत्पर्यायः शाणगुष्पिका
२ इत्यमरः शाणपुष्पी ३ इति
भरतः ॥
चेटाली स्त्री कोषातकी इति
राजनिर्घंटः चेटाश्रेणीच ॥
चेटाबीजे स्त्री जयपालःइति
राजनिर्घंटः ॥
चेटाशाहे स्त्री कोसं इति
हेमचंद्रः ॥ (क्ष
चेटिका स्त्री लेविकानालूडेस
जिका इति राजनिर्घंटो हेम।
चेंडश्च ॥
राजनिर्घंटः ॥
चेटः पुं गजचेटा प्रतापः ॥
इत्युणादिकोषः ॥
चेटेश्वरः पुं ॥
देवताविशेषः ॥ (ह
सत्तमंगल पुत्रः ब्रणदानाच्चे
इतिभाषा यथामंगलस्य ॥
प्रिया मेधा तस्यां चेटे श्वरो
महान् ब्रणदाताच तेजस्वीविसु
तल्योवभूवह इतिब्रह्मवैवर्त्त

पुराणे ॥
चंडः पुं भ्रमरः इतिमेदिनिसारे
चने स्त्री कांस्यतालादिकेवाद्ये
चने स्त्री कांस्यतालादिकेवाद्ये
इत्यमरः कांस्यतालः करताल
इतिख्यातः आदिनाकाहलादयः
इतिसारसुंदरी मध्यम नृत्ये ॥
इतिमेदिनी लोहे इति ॥
हेमचंद्रः लवे इति ॥
राजनिर्घंटः ॥
चनः पुं मेघः मुस्ता लुचः
दार्ढ्यविस्तारः लोमुद्गरः ॥
इतिमेदिनी शरीरे कफः ॥
अभ्रके इतिराजनिर्घंटः ॥
सजातीयोकत्र यस्य पूरणेयथा
समस्थितोत्तश्चघनः प्रादिष्टः स्यात्पो
घनोत्यस्य ततोत्यवर्गस्मृत्याहतो
घादि घनश्च सर्वे इति
लीलावती ॥
घनः त्रि निविडः तत्पर्यायः
निरंतरः २ ॥
सांद्रः ३ इत्यमरः ॥
दृढः इतिमेदिनी पूर्णः
संपुटः इतिशब्दरत्नावली
घनकफः पुं करकाइति
त्रिकांडशेषः ॥
घनकालः पुं वर्षाऋतुः इति



शब्द रत्ना वली ॥ वर्गं
घनगोलकः पुं मेलितरजतस्य
मिश्राणसोणा रूपा इति भाषा
इति हेमचन्द्रः ॥
घनजम्बालः पुं वुलकः इति
त्रिकाण्डशेषः ॥
घनज्वाला स्त्री मेघदीप्तिः वज्राग्निः
इति शब्दरत्नावली ॥
घनतालः पुं सारंगपक्षी इति
जटाधरः ॥
घनतोलः पुं चातकपक्षी इति
त्रिकाण्ड शेषः ॥
घनद्रुमः पुं विकंटकवृक्षः इति
राजनिर्घण्टः ॥
घननाभः पुं धूमः इति
शब्द रत्ना वली ॥
घनपत्रः पुं पुनर्नवा इति
राजनिर्घण्टः ॥
घनपाखण्डः पुं मयूरः इति
शब्द माला ॥
घनफलः पुं विकंटकवृक्षः इति
राज निर्घण्टः ॥ (त्रये
घनमूलं क्ली स्वीयसमजातीयैक
राशिकः यथा नवघनस्य मूलं
त्रये इत्यादि तत्करणं सूत्रं ॥
यथा आद्यं घनस्थानमथाघने द्वे
घनस्तथाद्यात् घनतो विशोध्य

घनेपृथक्स्थं पदमस्य कृत्वा त्रि
घ्न्या तदाद्यं विभजेत फलेन ॥
पंक्त्या न्यसेत्तत्कृतिमन्त्य ॥
निघ्नीं त्रिघ्नीं त्यजेत्तत्कृतिमम
फलस्य घनं तदाद्यात् घनमूल
मेवं पंक्त्या भवेदेव मतः ॥
पुनश्च इति लीलावती ॥
घनमूलः पुं मोरटः इति ॥
राजनिर्घण्टः ॥
घनरसः पुं सान्द्रनिर्यासः ॥
मोरटः जले कर्पूरे ॥
पीलुपर्णी सम्यक् सिद्धरसः
इति मेदिनी जले क्लीवलिंगो
ऽपि यथा घनरस मेघ नीरे
हूत ममृतं जीवनं भुवनं इति
रत्नकोषः ॥
घनवल्लिका स्त्री विद्युत् इति
हारा वली ॥ (इति
घनवल्ली स्त्री अमृतस्रवालता
राजनिर्घण्टः ॥
घनवातः पुं नरकभेदः इति
हेमचन्द्रः ॥
घनवासः पुं कूष्माण्डः इति
हारावली ॥
घनवाहनः पुं शिवः इति ॥
हेमचन्द्रः इन्द्रश्च मेघवाहन ॥
इत्यमरदर्शनात् ॥

घनश्यामः त्रि निविडकृष्णवर्णः
मेघतुल्यश्यामवर्णः योगिकोऽयं
शब्दः श्रीरामकृष्णयोर्वाचकः यथा
अयेराम घनश्याम वंदामि ॥
मुखपंकजं यदि जीवामि शोकेन
पुनर्द्रक्ष्यामि ते मुखं इति
महानाटके समानकर्णविन्यस्त
स्फुरन्मकरकुण्डले हेमाम्बरघन
श्यामे श्रीवत्स श्रीनिकेतने।
इति श्रीभागवते ॥
घनसारः पुं कर्पूरं दक्षिण
वर्त्तपारदः इति मेदिनी वृक्ष
भेदः जले इति धरणी ॥ (ति
घनस्कन्धः पुं कोशाम्रवृक्षः इ
राजनिर्घण्टः ॥ इति
घनस्वनः पुं तण्डुलीयशाकः
राजनिर्घण्टः मेघशब्दश्च ॥
घना स्त्री माषपर्णी रुद्रजटा
इति राजनिर्घण्टः ॥
घनाकरः पुं वर्षाकालः इति
शब्दरत्नावली ॥
घनाघनः पुं इन्द्रः घातुकमत्त
हस्ती वर्षुकमेघः इत्यमरः
अन्योन्यघट्टने इति धरणी।
घनाघनः त्रि निरंतरः घातुकः
इति हेमचन्द्रः ॥

घनाघना स्त्री काकमाची इति
शब्दचन्द्रिका ॥
घनात्ययः पुं शरत्कालः इति
हेमचन्द्रः ॥
घनामयः पुं खर्जूरवृक्षः इति
त्रिकाण्ड शेषः ॥ (ति
घनाम्लः पुं वास्तूकशाकः इ
त्रिकाण्डशेषः ॥
घनाश्रयः पुं आकाशं इति
हेमचन्द्रः ॥
घनोदधिः पुं नरकभेदः इति
हेमचन्द्रः ॥
घनोपलः पुं करका इति हेमचन्द्रः
घन्न गतौ इति कविकल्पद्रुमः
घरट्टः पुं पेषणी जांता इति
भाषा इति पुराणं ॥
घर्घटः पुं मत्स्यविशेषः घागरा
इति भाषा इति शब्दरत्नावली
घर्घरः पुं पर्वतद्वारं द्वारं ॥
उलूकः नदविशेषः स्वरभेदे
त्रि इति मेदिनी ध्वनिः ॥
हासे इति हेम चन्द्रः ॥
तुषानलः इति भूरिप्रयोगः
घर्घरकः पुं घर्घरनदः यथा
शोणे घर्घरके जले तु हविदे
संताप शोषापहे यथा ॥
वह्निकारं तथा च वलदे क्षीणाग



हृद्भिदं इति राजनिर्घण्टः ॥
चर्च्चरी तद्वच्चटिकावीणाभेदः।
इतिमेदिनी ॥
चर्च्चरिका स्त्री तद्वच्चटिका ॥
भूस्थान्ये नदी विशेषः ॥
वादित्रदंडः इतिहेमचंद्रः।
वाद्यप्रभेदः इतिविश्वः
चर्बुची स्त्री यमकीटः चुरखुरीया
इतिभाषा इति रत्नमाला ॥
चर्व गतौ इतिकविकल्पद्रुमः
चर्म्मः पुं श्रमवारि अंगजलं।
घाम इतिभाषा तत्पर्य्यायः।
निदाघः २ स्वेदः ३ इत्यमरः ॥
अस्यनिदाघस्वेदशब्दे द्रष्टव्यं।
आतपः ग्रीष्मः उष्मा इति।
हेमचंद्रः ॥
चर्म्मविचर्च्चिका स्त्री चर्म्मविचर्च्ची
चर्म्मचर्च्चिका चामाविइतिभाषा
यथा स्वेदवाहीनि दुष्यंतिकोष्य
शोकभयैस्तथा ततः स्वेदः।
प्रवर्त्तेत दौर्गंध्यं चर्म्मचर्च्चिका
राजिकाकृति हृस्तोत्था यतो
चर्म्मविचर्च्चिका इतिप्रयोगामृतं
अस्याश्चिकित्सा स्वेद शब्दे।
द्रष्टव्या ॥
चर्म्मांतः पुं वर्षाकालः इति
राजनिर्घण्टः ॥

चर्म्मांतकामुकी स्त्री बलाकाइति
राजनिर्घण्टः ॥ (षा
चर्षणी स्त्री चर्षः क्षपा इतिभा
यथा चर्षणादभिवातादायदेशे
विगतत्वचं उष्णासावान्वितंतद्वि
चूष्टमित्यभिधीयते इति ॥
माधवकरः ॥
चषणालः पुं शिलापुत्रः लोष्ट
इति भाषा इतित्रिकांडशेषः
चर्षणी स्त्री हरिद्रा इति ॥
त्रिकांड शेषः ॥ (मः
चष इ ड त्वरे इतिकविकल्पद्रु
चस इ ड त्वरणे इतिकविकल्पद्रुमः
चस ऊ ऐ भक्षणे इति ॥
कविकल्प द्रुमः ॥
चसिः पुं आहारः इतिहेमचंद्रः
चस्मरः त्रि अघरः भक्षकः ॥
इत्यमरः ॥
चहे स्त्री के कमे इति
त्रिकांडशेषः ॥
चहः पुं दिने हिंसेत्रि इति
मेदिनी ॥
चा स्त्री कोची चानः इति ॥
मेदिनी ॥ (वली
चाटः पुं चाटा इतिशब्दरत्ना
चाटा स्त्री पीबापश्चाङ्गागःचाटु
इतिभाषा तत्पर्य्यायः अवटुः

कृकाटिका ३ इत्यमरशिरः ॥
पश्चात् संधिः ४ इतिराजनिर्घण्टः
चाटः ५ कृकाटी ६ इति
शब्दरत्नावली चाटिका ७ इति
शब्दचंद्रिका ॥ (का
चाटिका स्त्री चाडा इतिशब्दचंद्रि
चाटिकः पुं योबहुभिर्मिलित्वा
स्तुतिपठतिसः योदेवतायये
वेटाचातेन शंसतिसः श्रावण
ख्यः इतिस्वामी इतिसारसुंदरी
तत्पर्य्यायः चाक्रिकः २ इत्यमरः
चाटिकः ३ इति भरतः ॥
धुल्लरहलः इति हारावली।
चातः पुं कांडः प्रहारः इति
मेदिनी अंकपूरणे यथा ॥
समत्रिचातश्च घनः प्रदिष्टः इति
लीलावती ॥
चातकः त्रि हननकर्त्ता यथा
गौरीमाधवयोर्भर्त्ताराधिकाशिव
सन्निधौ हेतुः कामदहनावसर्थः
कमल्लचातकः इतिविदग्धमुख
मंडने ॥
चातने स्त्री हननेवधः यज्ञार्थ
पशुवधः इतिशब्दरत्नावली
चातनः त्रि वधकर्त्ताइतिसिद्धांत
कौमुद्या मुणादि वृत्तिः ॥
चातिः पुं पत्तिवंधनेइतुणादि

कोषः प्रहरणे इतिमेदिनिसारे
उणादिवृत्तिः ॥
चानिपत्नी पुं शोभनपत्नी इति
हारावली ॥
चातुकः त्रि हिंसः क्रूरः इत्यमरः
व्याकरणे ॥
चारः पुं सेचनं इतिहेमचंद्रः
चात्तिकः पुं चूतपूरः इति
हेमचंद्रः ॥ (विशेषः
चामः पुं गवाघदन्नीयतृण
तत्पर्य्यायः यवसः २ इत्यमरः
यवसः ३ जवसः ४ इति भरतः
चासिः पुं अग्निः इति
त्रिकांडशेषः ॥ (ल्पद्रुमः
चिन इ ड ग्रहणे इतिकविक
चु उ ध्वनौ इतिकविकल्पद्रुमः
चुः पुं ध्वनिः इतिजटाधरः ॥
चुट उ ऐ परिवर्ते इति ॥
कविकल्पद्रुमः ॥
चुड शि श्रति हतौ इति ॥
कविकल्प द्रुमः ॥
चुटः पुं चरण शेषिः इति
हेमचंद्रः ॥ (पकोषः
चुटिकः स्त्री गुल्फः इतिहैम
चुटिकः पुं गुल्फः इतिहेमचंद्रः
चुटिका स्त्री ग इत्यमरः ॥



घुटी स्त्री गुल्फः इतिद्विरूपकोषः
घुड शि ग्याचाते इति
कविकल्पद्रुमः ॥
घुण ड भ्रमणे इति कविकल्पद्रुमः
घुण ड ग्रहणे इति कविकल्पद्रुमः
घुण श भ्रमणे इति कविकल्पद्रुमः
घुणः पुं काष्ठकृमिः तत्पर्यायः
काष्ठवेधकः २ इति लिंगादि।
संग्रह टीकायां भरतः काष्ठ
लेखकः ? इति भूरिप्रयोगः
घुणवल्लभा स्त्री अतिविषा इति
भावप्रकाशः ॥
घुटः पुं गुल्फः इति शब्दमाला
घुटकः पुं गुल्फः इति हेमचन्द्रः
घुटिकं क्ली वनस्थकरीषविल
घुटे इति भाषा इति
शब्दचन्द्रिका ॥
घुडः पुं भ्रमरः इत्युणादिकोषः
घुर शा ध्वनौ भीमार्थे इति
कविकल्पद्रुमः ॥
घुर्घुरः पुं कीटविशेषः घुरघुरी
इति भाषा तत्पर्यायः।
यमकीटः २ इति त्रिकाण्डशेषः
घर्घरी ३ इति रत्नमाला।
घुर्घुरी स्त्री जलजन्तुविशेषः तत्
पर्यायः सूक्तिका २ इति
त्रिकाण्डशेषः ॥

घुलेचः पुं गवेधुका गड गड
इति भाषा इति रत्नमाला ॥
घुलघुलारवः पुं पारावतभेदः
इति राजनिर्घण्टः ॥
घुष इ उ कान्तिकृतौ इति
कविकल्पद्रुमः ॥
घुष इ र वधे इति कविकल्प(द्रुमः)
घुष कि इ र नुतौ स्तुतौ इति।
यावत् विग्रहे इति कविकल्पद्रुमः
विग्रह इह कथने आविष्करणे
नानाप्रकार करणे वा आङ्पूर्वकः
सततक्रन्दने इति तट्टीका ॥
घुषितं त्रि शब्दिते इति ॥
लपमथ्याकरणे ॥
घुष्टं त्रि शब्दिते इति मुग्धबोधे
घुसृणं क्ली कुंकुमे इति
त्रिकाण्डशेषः ॥
घूकः पुं उलूकः इति हेमचन्द्रः
घूकारिः पुं काकः इति हेमचन्द्रः
घूकावासः पुं शाखोटवृक्षः इति
राजनिर्घण्टः ॥
घूर ई उ य हिंसावयोहान्योः ॥
गतवद् वयोभाव इति यावत्
इति कविकल्पद्रुमः ॥
घूर्ण ञ श भ्रमणे इति ॥
कविकल्पद्रुमः
घूर्णः पुं ग्रीष्मसुन्दरकः गीमा

इति भाषा इति शब्दचन्द्रिका ॥
भ्रमणेव ॥
घूर्णनं क्ली भ्रमणे तत्पर्यायः
वक्रावर्तः २ भ्रमः ३ भ्रान्तिः ४
भ्रमिः ५ घूर्णिः ६ इति
हेमचन्द्रः ॥
घूर्णायमानः त्रि भ्रम्यमाणः यथा
इन्द्राद्यैरखिलार्थ साधन परैः
संस्तूयमाने मुहुः पीतोन्मत्तफला
ऽतुलालसतया घूर्णायमानेत्वणे
इति कलाप धातुव्याख्यासारः
घूर्णिः स्त्री घूर्णने इति हेमचन्द्रः
घूर्णितः त्रि भ्रमितः तत्पर्यायः
प्रचलायितः २ इत्यमरः ॥
घूर्णमानः त्रि भ्राम्यमाणः यथा
मोहन्तः पर्वतस्था बहुकुसुम।
मुक्तावाघुना घूर्णमानाः इति
महानाटके ॥
घृ सेके इति कविकल्पद्रुमः
घृ क सेके क्लादने इति ॥
कविकल्पद्रुमः ॥
घृ ऌ भासि सेके इति ॥
कविकल्पद्रुमः ॥
घृण द उ न दीप्तौ इति।
कविकल्पद्रुमः ॥
घृण इ उ ग्रहणे इति कविकल्प(द्रुमः)
घृणा स्त्री करुणा जुगुप्सा तत्र

पर्यायः अर्तिते २ ऋतीया ३
हृणीया ४ इत्यमरः रीज्या ५
घृणिया ६ ह्रीणीया ७ हृणीया ८
इति तट्टीका ॥
घृणावासः पुं कूष्माण्डः इति
त्रिकाण्डशेषः घृणावृक्षे त्रि ॥
घृणिः पुं किरणः इत्यमरः
सूर्य्यः जलं इति मेदिनी ॥
घृतं क्ली पक्वनवनीतं घिउ इति
भाषा तत्पर्यायः आज्यं २
हविः ३ सर्पिः ४ इत्यमरः ॥
पवित्रं ५ नवनीतकं ६ अमृतं ७
अभिघारः ८ होम्यं ९ आयुः १०
तेजसः ११ इति राजनिर्घण्टः ॥
तस्य गुणाः वृष्याग्निशुक्रौजोमेदः
स्मृतिकफकारित्वं वातपित्त
विषोन्मादरोगशोषालक्ष्मीज्वर
नाशित्वं मांसादष्टगुणगुरुत्वं च
इति राजवल्लभः रसायनत्वं
स्वादुत्वं चक्षुर्हितत्वं शीतवीर्य्यत्वं
पापनाशित्वं अल्पाभिष्यन्दित्वं
कान्तितेजो लावण्य स्वराय
हितं बलकारित्वं पवित्रत्वं
गुरुत्वं उदावर्त शूलानाह
क्षीरसर्पानाशित्वं स्निग्धत्वं हृद्य
त्वं च इति भावप्रकाशः अथ



गव्यघृतस्य गुणाः विशेषेण ॥
चक्षुर्हितत्वं शीतत्वं वात पित्त
कफालक्ष्मीपापरक्षोनाशित्वं
शुक्राग्निस्वादु पाक मेधालावण्य
कान्त्योजस्तेजोवृद्धिवयःस्थिति
बलायुर्हित कारित्वं गुरुत्वं
पवित्रत्वं सुमंगलत्वंरसायनत्वं
सुगन्धित्वं रोचनत्वं चारुत्वं ॥
सर्वाज्येषु गुणाधिकत्वंच इति
भावप्रकाशः बुद्धिस्मृतिव धृः
स्थैर्यकारित्वं श्रमोपशमनत्वं
हृद्यतमत्वं बहुगुणत्वंच ॥
माहिष घृत गुणाः उत्तमत्वं ।
धृतिसौख्य कान्ति बल वर्ण
चक्षुर्हित कारित्वं वात श्लेष्म
दुर्नाम ग्रहणीविकारनाशित्वं
मन्दानलोद्दीपनत्वंनवगव्यतः
परम स्वादुत्वं मनोहारित्वंच।
इतिराजनिर्घण्टः स्वादुत्वं
पित्तरक्त नाशित्वं शीतत्वं ॥
श्लेष्मशुक्रवृद्धिकारित्वंगुरुत्वं
स्वादुपाकित्वंच छागीघृतगुणाः
अग्नि चक्षुर्हित बलकारित्वं।
कास श्वास क्षयेषु हितत्वंकटु
पाकित्वंच इतिभावप्रकाशः
कफ नाशित्वं इतिराजनिर्घण्टः
मेषीघृतगुणाः पित्त मेद।
स्कारित्वं योनिदोषे शोषे ॥
कफे अनिलेच शस्तत्वं लघुत्वं
दुर्नामोन्माद नाशित्वंच इति
राजवल्लभः पाकेलघुत्वं पित्त
कोपाकारित्वं शोफेकंपेच ॥
हितत्वंच भेडकघृत गुणाः
अतिगौरवात सुकुमार देहि
वर्ज्यत्वं वृद्धियादव हरत्वं ॥
बलकारित्वं नृणां वपुषोविस्र
गंधकारित्वंच हस्तिनी घृत ॥
गुणाः कफ पित्तविष क्रमि
नाशित्वं कषायत्वं लघुत्वं
विष्टंभित्वं तिक्तत्वंवह्निकरत्वंच
अश्वाघृतगुणाः कटुत्वं ॥
मधुरत्वं कषायत्वं ईषदग्नि ॥
दीपनत्वं बाल्यप्रदत्वंमूर्छाहारि
त्वंगुरुत्वंच गार्दभी घृत ॥
गुणाः अग्निबलकारित्वं मूत्रदोष
कफनाशित्वं पाके लघुत्वं ॥
कषायत्वं उष्णवीर्य्यत्वंच ॥
उष्ट्राघृतगुणाः मधुरत्वंविपाके
कटुत्वं शीतलत्वंकुष्ठ क्रमि
विषवातकफगुल्मोदरनाशित्वंच
इतिराजनिर्घण्टः शोषघ्नाशित्वं
इतिराजवल्लभः ॥
नारीघृत गुणाः चक्षुर्हितरुचि
कारित्वं मेदाग्नि पथ्यत्वं

दीपनत्वं पाकेलघुत्वंसर्वामय
विषनाशित्वंच इतिराजनिर्घण्टः
प्रमेहनाशित्वं इतिराजवल्लभः
दुग्धभव घृतगुणाः ग्राहित्वं।
शीतलत्वं नेत्ररोगकारित्वं ॥
पित्तदाहास्र मदमूर्छाभ्रमानिल
नाशित्वंच स्वस्तनदधिजघृते
तदेवहैयंगवीने तस्य गुणाः
चक्षुर्हितत्वं दीपनत्वंरुचिबल
कारित्वं बृंहणत्वं वृष्यत्वं ॥
विशेषाज्ज्वर नाशित्वंच ॥
वर्षाद्दूर्द्ध पुराणस्य तस्यगुणाः
त्रिदोष मूर्छाकुष्ठविषोन्मादा
ऽपस्मारतिमिर नाशित्वं इति
भावप्रकाशः मदशिरःकर्णादि
ज्वरोग शांति नाशित्वं व्रणस्य।
शोधनत्वं रोपणत्वंच आयुर्वृद्धि
शरीरदृढता सौकुमार्य्यकांति
स्मृतिबलकारित्वंबाल्यतरुण
वार्द्धकेचातिबल्यत्वं पथ्यत्वंच
इतिराजनिर्घण्टः प्रतिषणायाम
कासजीर्णज्वरसर्वरोगनाशित्वं
श्रेष्ठत्वं धातुसाम्यकारित्वंच।
तस्यलक्षणं उग्र गंधे ॥
पुराणस्यादशवर्षास्थितंघृतं
लाक्षारसनिभंशीतंश्पुराणं।
मतः परंयथायथाभवेज्जीर्णं ॥
गुणवत्स्यात्तथा तथाकोस्य
पात्रेदशादिनस्थितंघृतंत्याज्यं
इतिराजवल्लभः औषधवाद्दत
पक्क घृतस्य पूर्णवीर्य्यंवत्मास
पर्य्यंते तिष्ठति इतिवैद्यक ॥
परिभाषा ॥
घृतः त्रि दीप्तः सेचकः इति
शब्दरत्नावली ॥
घृतकरंजः पुं करंजभेदः
घियाकरमचा इतिभाषातत
पर्य्यायः प्रकीर्य्यः २ घृतपर्णकः ३
स्निग्धपत्रः ४ तपस्वी ५ विषारिः ६
विरोचनः ७ अस्य गुणाः कटुत्वं
उष्णत्वं वात व्रण सर्वत्वग्दोष
विषस्पर्श नाशित्वंच इति
राजनिर्घण्टः ॥
घृतकुमारिका स्त्री घृतकुमारी
इतिभावप्रकाशः ॥ (गुल्मः
घृतकुमारी स्त्री स्वनामख्यात
घिकुमारी इति भाषा तत ॥
पर्य्यायः कुमारी १ तरणिः २ सहा
३ इतिशब्दरत्नावलीकन्यका ४
दीर्घपत्रिका ६ स्थूलेरुहा ७ मृदुः ८
कन्या ९ बहुपत्रा १० अमरा ११
अजरा १२ कंटकप्राहता १३ वीरा
१४ भेगेष्टा १५ विपुलास्रवा १६
ब्रह्मघ्नी १७ तरुणी १८ रामा १९

कपिला २० अम्बुधिस्रवा २१ सुकंटका २२ स्थूलदला २३ गृहक २४ अस्या गुणाः हिमत्वं ॥ तिक्तत्वं मदगन्धित्वं कफपित्त। कासविष श्वासकुष्ठनाशित्वं रसायनत्वंच इति राजनिर्घण्टः भेदकत्वं नेत्रहितत्वं मधुरत्वं। बृंहणत्वं शुक्रबलकारित्वं वातगुल्म प्लीह यकृतवृद्धिज्वर ग्रन्थ्यग्निदग्धविस्फोटपित्तरक्तत्वग्रोग नाशित्वंच इति भाव प्रकाशः ॥

घृतदीधितिः पुं अग्निः इति त्रिकाण्डशेषः ॥

घृतपर्णकः पुं घृतकरञ्जः इति राजनिर्घण्टः ॥

घृतपूरः पुं पिष्टकविशेषः यथा मर्दितां समितां क्षीरनारिकेल। घृतादिभिः अवगाह्य घृतेपक्वा घृतपूरीयमुच्यते घृत पूरो। गुरुर्हृद्यः कफकृद्रक्तमांसदः रक्तपित्त हरोलघुः स्वादुः पित्त हरोऽग्निदः इति राजवल्लभः। तत्पर्य्यायः पिष्टपूरः २ घृतवरः ३ घार्तिकः ४ इति हेमचन्द्रः ॥

घृतपूर्णकः पुं करञ्जभेदः इति त्रिकाण्डशेषः ॥

घृतमण्डलिका स्त्री हंसपदी घृतः इति राजनिर्घण्टः ॥ (रुद्र)

घृतमण्डा स्त्री वायसोली घृतमा ह्ना इति भाषा इति शब्दचन्द्रिका ॥

घृतवरः पुं घृतपूरः इति हेमचन्द्रः ॥

घृता स्त्री घृतमण्डा इति शब्दचन्द्रिका ॥

घृताची स्त्री अप्सरोविशेषः इ(ति) हलायुधः ॥ (ला)

घृताची गर्भसंभवा स्त्री स्थूलैले इति राजनिर्घण्टः ॥

घृताह्वः पुं सरलद्रवः इति त्रिकाण्डशेषः ॥

घृतेली स्त्री कीटविशेषः तैलपायिका इति केचित् तत्पर्य्यायः पिंगकपिशा २ इति हेमचन्द्रः ॥ (एवं)

घृतोदः पुं घृतसमुद्रः यथा सुरोदाद्द्विगुणः समानेन घृतोदेन यथापूर्वः कुशद्वीपः इति श्रीभागवते ॥

घृष ड संहर्षे चर्षे इति कविकल्पद्रुमः ॥ (भाषा)

घृष्टः त्रि घर्षितः घसा इति यथा घृष्टो मलयजो गन्धः इति

मुद्रितत्वं ॥

घृष्टिः स्त्री वाराही वामरआलु। इति भाषा इत्यमरः घर्षणे ॥ स्त्री अपराजिता शूकरे पुं। इति मेदिनी ॥ (पर्णी)

घृष्टिला स्त्री चित्रपर्णीकाष्टलि इति रत्न माला ॥

घृष्वी पुं स्त्री शूकरः इति सिद्धान्तकौमुद्या मुणादि वृत्तिः ॥

घेंवुलिका स्त्री कोंवादनेवेंचु इति भाषा इति रत्न माला ॥

घोटः पुं स्त्री घोटकः इति राजनिर्घण्टः ॥

घोटकः पुं स्त्री पशुविशेषः ॥ घोडा इति भाषा तत्पर्य्यायः। पीतिः २ तुरगः ३ तुरंगः ४ अश्वः ५ तुरंगमः ६ वाजी ७ वाहः ८ अर्वा ९ गन्धर्वः १० हयः ११ सैन्धवः १२ सप्तिः १३ इत्यमरः घोटः ॥ १४ पीती १५ पीथिः १६ इति भरतः तार्क्ष्यः १७ हरिः १८ वीती १९ इति हेमचन्द्रः ॥ मुद्गभोजी २० धाराटः २१ जवनः २२ जितवः २३ जवी २४ वाहनश्रेष्ठः २५ श्रीभ्राता २६ अमृतसोदरः २७ अस्य मांसगुणाः उष्णत्वं वात नाशित्वं लघु गुरुत्वं अति सेवनात् पित्तदाह प्रदत्वंच ॥ इति राजनिर्घण्टः अग्निकफबलकारित्वं बृंहणत्वं चक्षुर्हितत्वं मधुरत्वंच इति भावप्रकाशः ॥ अथाश्वपरीक्षा सपक्षा वाजिनः पूर्वं संजाता व्योमचारिणः ॥ गन्धर्वेभ्यो यथाकामं गच्छन्तिच समन्विताः इन्द्रादेशाच्छालिहोत्रः तेषां पक्षमथाछिनत् ततः प्रभृति निष्पक्षा तुरगा धरणीगताः उत्तमा मध्यमा नीचाः कनीयांसस्तथापरे चतुर्द्धा वाजिनो भूमौ जायन्ते देशा ॥ संश्रयात् ताजिताः खुरशालाश्च तुषाराश्चोत्तमा हयाः गोजिकाणाश्च केकणाः प्रौढाहाराश्च मध्यमाः ताडजा उत्तमापाश्च वाजमूलाश्च मध्यमाः गल्वराः साध्वाराश्च सिंधुपाराः कनीयसः अन्यदेशोद्भवा ये च ते वै नीचाः प्रकीर्त्तिताः वाजिनो जलजाः केचिद्वह्निजातास्तथा परे समीरप्रभवाश्चान्ये तुरगा मृगजाः ॥ ये जलोद्भवा द्विजा ज्ञेयाः क्षत्रिया वह्निसंभवाः प्रभञ्जनभवा वैश्याः मृगजाः शूद्रजातयः सुगन्धो यो भवेद्विप्रः क्षत्रियो गुरु



गंधिकः घृतगंधो भवेद्धि यः ॥
मीनामोदीव मत्स्यकः विवेकी
सद्गुणो विप्रस्तेजस्वी क्षत्रियो।
बली कोपस्वभावो भवेद्वैश्यः।
मूढो नितः सत्वको भवेत् विप्रोध्या
वाहनाः सर्वत्रयो भूमिपतेः सदा।
शूद्रजातिं तुरंगं तु न स्पृशेति ॥
नेश्वराः इत्युत यतिः ॥
अथांगुल्यांग विभागः सप्तवि ॥
शत्यंगुलिभिर्मुखमानं विधीयते
कर्णौ षडंगुलौ प्रोक्तौ भालकं ॥
चतुरंगुलं चत्वारि ग्रीवा समाख्या
स्कंधः सैपरिकीर्तितः पृष्ठवंशा
स्त्रस्तु विंशः सप्तविंशा तथा कटी
इति सृष्टं तथा त्रिंशति पुच्छं
तुर्याधिकं लिंगं हस्तप्रमाणेन
तथोरौ चतुरंगुलौ मध्यस्थाने।
चतुर्विंशं हृदयं षोडशात्मकं
कटिकुक्ष्यंतरं प्रोक्तं चत्वारि।
ध्रात प्रमाणतः मणिबंधद्वयं चैव
खुराश्च चतुरंगुलाः अपूर्णान्यंगु
लिकाः पादा दीर्घा विंशाधिका
मताः इत्यंगुलि विभागः ॥
अथवयोज्ञदाहनकुल सप्तवर्णा
भवंतीह सर्वेषां वाजिनां ध्रुवं
तानहं कीर्तयिष्यामि भेदैर्ज्ञाता
नेकधा सितो रक्तः स्तथा ॥

पीतः सारंगः पिंग एव च नीलः
कृष्णोऽथ सर्वेषां श्वेतः श्रेष्ठतमो
मतः श्वेतः कुंदेंदु संकाशो ॥
रक्तः कौसुंभ सन्निभः हरिद्रा ॥
सदृशः पीतः सारंगः कर्पूरः स्मृतः
पिङ्गः कपिलाकारो नीलो ॥
दूर्वादलप्रभः कृष्णो जंबूफलाकारः
शास्त्रज्ञैः समुदाहृतः इति वर्णाः
अथ वयो विभागः दंतेषु ॥
व्यंजनेय हंतेन तेयो वयःक्रमः
तद्यथा कालिका हारिणी शुक्ला काचा
मक्षिका सदृशी शंख मुषलं चैव
दंतानां चलता तथा इत्यष्टौ ॥
व्यंजनान्याहुरश्वघोषलक्षणज्ञाः
चतुर्भिर्वत्सरैर्दंता स्वत्वारः ॥
परिकीर्तिताः पंचभिश्च ॥
षड्भिश्चैव जायंते तथ कालिकाः
षष्ठे संवत्सरे प्राप्ते कालिकान्या
भवेत्तु हि तथान्या सप्तमे वर्षे
चतुर्थी कालिका भवेत् अष्टम
वत्सरे प्राप्ते जायंते स्वेत कालिकाः
नवमे तथता: सर्वा आपीताः
संभवंति च केचिद्दकादशे ॥
वर्षे तावत् पीतत्वमागताः ततः
श्वेताः प्रजायंते चतुर्दश समावधि
ततः काचप्रभाः सम्यक यावत्
संवत्सरा त्रयः ततः सप्तदशाद्धि

यावद्वर्षाणि विंशतिः मक्षिका
भा वदं त्येषा यावद्वर्षत्रयं पुनः
शंखाभासाः सर्वदंता भवंति वाजि
नां मतः त्रयोविंशात् परे वर्षे।
दशना मुषला मताः षड्विंशात्
परेतो दंतास्थानाच्चलनमायुषः
यावद्वर्षत्रयं यस्मात् त्रिपतंतिस
मात्रयेद्वात्रिंशद्वत्सरे वाजी नूनं
निर्वाणमाप्नुयात् इति वयःस्थानं
अथ शुभलक्षणानि ॥ वेत्ति
दीर्घाः स्वष्का विशालास्यो येऽ
तुरंगमाः ते शस्ताः पार्थिव ॥
वेद्रस्य यान वाहनकर्मणि।
आस्यं भुजौ चापि कृकाटिका च
दीर्घं चतुष्कं तुरगस्य शस्तं।
तथोन्नतं घ्राणपुटं ललाटक
फश्च वाजिभवस्यवोध्यः श्रोत्र
मणिबंधश्च पुच्छ कोष्ठं लघूनमे
पीतांगः श्वेतपादो यो यश्च
स्यात् सितलोचनः चक्रवाकः
स विज्ञेयो राजार्हः प्रियसत्तमः
मुखे चंद्रक सेवीतः पक्वजंबूफला
कृतिः श्वेतपादः स विज्ञेयो।
मल्लिकाख्यः सुपूजितः सर्वेषु
लोहयोयस्तु पणामेक श्रवणो
भवेत् स वाजी वाजिमेधार्हः।
पूर्णामकर्णः सडुलंभः यस्यपादाः

सिताः सर्वे पुच्छो मुष्को मुखं तथा
मूर्द्धजास्तु सिता यस्य ते विपादष्ट
मंगलो यस्य पादाः सिताः ॥
सर्वचेद्रकंच ललाटके कल्याण
पंचकः शोक्तो भर्तुः कल्याण
कारकः विमिश्र वर्णकाः सर्वे
प्रशस्ता वाजिनां मताः यस्योत
कृष्टतरा वर्णा हृद्धिं यांति शनैः
शनैः नाशयंति तथानीवान्
करोति स बहून् हयान् ॥
अथावर्तगुणाः शोक्ताश्रमिव दा
हितिरावर्तः इति नाघतेषद्धियो
दक्षिणा वामोदक्षिणास्तु शुभा
वहः नासिकायेल ललाटायेशंखे
कंठे च मस्तके आवर्ताजायते
येषां तेधन्यास्तु तुरंगमाः ललाटे
यस्य चावर्तो द्वितीयस्तु कुकुंदरे
मस्तके च तृतीयस्तु स विज्ञेयो
हयोत्तमः देवावर्तो भवेद्यस्य।
वाजिनो दक्षिणाश्रयः सकरोति
महासौख्यं स्वामिनः श्रिवसंज्ञितः
कर्णमूले यदावर्तः स्तनमध्ये
तथापरः विजयाख्यावुभौतौतु
युद्धकाले जयप्रदौ स्कंधपार्श्वे
यदावर्तः स भवेत् सुखकारकः
नासामध्ये यदावर्त एकोवायदि
वा त्रयः चक्रवर्ती स विज्ञेयो



वाजीभूपाल भूषितः कंठे यस्य।
मङ्गवत्तुः श्रोक्त श्रिता मणिः
शुभः रोम्णां दक्षिकवत् स्थाने
शुक्ति रित्यभिधीयते यत्रावर्तः
शुभस्तत्र शुक्तिस्तत्र शुभावहा
अथदोषा चत्वारो ॥
पक्षिताः पादाः सर्वेष्वेतस्य।
वाजिनः भवेतियस्य सत्याज्यो
यमदूतः सहूतः चत्वारो
यस्यैव पादाः पंयरविवर्णकाः
सत्याज्यो मुषली नाम्ना मुनिभिः
कुलनाशनः दुर्लक्षवाजिने
ज्ञस्यायदीर्क्षः प्राप्नती श्रियं
यस्तु वर्णविभेदेन जायते रोम।
संभवात् पुष्पाढ्यः सपरित्याज्यः
सर्ववाजिभयावहः यस्याव शेष
वर्णेन क्षायते च प्रधानतः ॥
विहद्धिं गच्छतः सोऽन्यः कुरुते
हयसंतयं इति स्कंधे ॥
गले चैव कटिदेशे तथैव च।
नाभौ कुक्षौ च पार्श्वे शमध्यमः
सप्रकीर्तितः एकोवामकपोल
स्थोयस्यावर्तः भद्रयते चवर्णी
सहय स्त्याज्यः कुरुते स्वामि।
नाशने वामभंगश्चयावर्तः ॥
प्रकीर्तितधनं त्वस्य कर्तीते ॥
यस्यचावर्तसमृत्ते कुरुते विभो

स्कंधे जानुगतावर्तः प्रवासे
कुरुते ऽथवा वाजी मद्र गता।
वर्ती वर्जनीयो महीभुजा ॥
त्रिवलि प्रभवावर्ते त्रिवर्गस्य
प्रणाशकः पृष्ठवंशे यदावर्तेषकः
संपरित्यज्यते धूमकेतु रीति
ख्यातः सत्याज्यो हरेतान्नृपैः
गुह्यपुच्छे वलीयस्य भवेत्या
वर्तकाहयः सकृतांतस्तु रूपेण
वर्जनीयस्तुरंगमः अथोर्द्ध वषरा
वाजी संपुटे नस्पोतक्कचित्
यमदूतः सविज्ञेयो वर्जनीय
स्तुरंगमः हीनदंतोऽधिकश्चैव
करालीकृस्मतालुकः मुषलीच
श्रृंगी यदैते यातकास्मृता श्रेया
तत्राद्यो विदितायौ तु शेषाणां
लक्षणं मृणुत्रयः पादाः सितायस्य
कृस्नश्चैकोऽभिजायते त्रयो
वाप्यसिता यस्य एकः शुक्लो
भिजायते मुषलीनामपापाये
दूरत्याज्यो हयाधमः विकटो
विषमो यस्य दशनः सकरालकः
करालीकुरुते नाशंभर्तुरत्र
नसंशयः कृस्नतालु र्हयानाशं
कुरुतेनात्रसंशयः विवदंतो
भवेयस्तु कृस्नतालनडयते
कर्णोतेवृलिकौतेवश्रृंगवलत्यते

यदिस श्रृंगी कुरुते नाशं
राष्ट्रस्य च कुलस्य च एकोद्वोऽज्ञात
कोऽश्व हीनो द्वोऽप्यधिकोऽकः
वेदीच केवली चैव षडेतेपाप
दुःस्समाः अथारिष्ट ॥
तस्यस्यापिच नेत्रांते स्यातां ॥
नीले च वाजिनः तथैव तस्य।
जानीयाद्वत्सरस्त्रिवार्षिकी
नीलपीते च नेत्रांते त्रिभिर्मासै
र्वपुः क्षयः यस्य नेत्रांते रेखा।
बहुवर्णा प्रजायते विशेषा।
द्वाजिनो ज्ञेयं तस्यायुः पंच।
मासिके जिह्वायो जायते बिंदु
रेकस्मायदि वाजिनः मासैके॥
जीवितंतत्र पीतेमासद्वयंतथा
रक्ते मृत्युस्त्रिभिर्मासै श्वेतभिन्न
विचित्रके पंचभिर्नीलवर्णेच
षड्भिर्वज्र समाकृतौ सप्तभिः
पाटलाकारे च णका भेतथाष्टभिः
नवभिश्च हरिद्राभे दश
भिर्जतकोयमेयकारपोसवर्णा
भेवत्सरेणहिमृयते यस्य।
श्वासोभवेद्रूक्षः शरीरेउलकों
किते जिह्वाहि मलिनाकारा।
मास षट्के सजीवति जिह्वाये
पिंडकायस्य पार्श्वे चतथोदरे
मूत्रेकरोति रक्तं वा मासषट्के।

सजीवति कर्णयोः स्तब्धे यस्य
नेत्राभ्यां वा प्रवर्तते वाजिनः ॥
पित्तश्लस्य दशमासान् सजीवति
यस्य नेत्रे हरिद्राते यस्य वाला ॥
दितस्यच तस्यायुः सप्तमासीये
बहुवर्णा तथा दिनैः यस्यैके
लोचने हीने द्वितीये रक्तसन्निभे
पुटेतेच सविज्ञेयः पीताभे।
मासजीवकः एता निश्चरिष्टानिरक्ष
दोषजानि स्फुलिंगायस्य दृश्यते
पुच्छतोऽथस्य वह्निज्वाः निपिच्छेतः
प्रभोर्नाशं ते वदंति निश्चगामे
अश्वपालो समासाद्य यदाव
मधुमक्षिकाः मधुजाले प्रवधेति
तदाश्वान् हंति क्षतस्वष्टाः अथ
हयक्रियाकालः स्ववहण गुरु
पार्श्वीसेषु भौमार्कवारे स्वतिथि
करण नाराचेद्र योगोदयेषु
शुभमिह हयकार्यकार्यमार्येण
बुद्धा न खलु रिक्त ज्ञानो वासरे
नोयत्नो इति कालः अथ
हयारोहण ज्ञाने चलकिशलय
पादः कर्ण मध्येक दृष्टिर्नवल्लति
कटिदेशः स्वासनेसंस्थितोयः
हयहृदयगतिज्ञः स्थानदेशा
तापः सखलु तुरगयाता पूज्यते
पार्थिवेंद्रैः मेरुः स्थिरो यस्य

वल्लीव पादौ त्रिकोणान्ते संहत
मासनेव सवाजिवाहः प्रथितः
पृथिव्यां प्रेषा नरा भार
कराहयानां तत्रताडन ॥
विधिः रक्तकोष्ठे मुखे चौष्ठे ।
गलपृष्ठे च ताडयेत् भीते ।
वक्षःस्थले हन्यादङ्के चोन्मार्ग
गामिनः कुपिते पुच्छसंस्थाने
भीते जानुद्वये तथा सर्वस्यापाम
दंडस्पर्दं डमेकं निपातयेत् ॥
अस्थानदंडपाताच्च बहुदोषः ।
प्रजायते तस्मात्त्रिरीत्यकर्मवे
हयदंडनिपातने अथ
धावनविधिः हस्तेष्वत्तु विंशति
भिर्दंडैर्दंड उदाहृतः अत्ततो ।
निमेषणान्यष्टौ मात्रा प्रोक्ता ।
विचक्षणैः मात्रा षोडशाके ॥
नाम्नो यो धावति धनुः पाते ॥
तमुत्तमोत्तमं विद्याद्दशु वेगं ॥
मध्यमं विंशात्या मध्यमो ।
ज्ञेयो हतोन्ये चाधमा मताः ।
नभस्याश्वयुजे मासि नैवाश्वान्
वाहयेन्नृपः वक्र्याश्रि सह प्रोष्णे
श्रमातकुप्यति वाजिनो कार्येण
महता वापि योज्या मासितं ॥
कार्त्तिके हेमन्ते शिशिरे ॥
योगो वसन्ते च पदक्रया वाले

हद्दे कर्णे कण्ठे दत्त स्नेहं ॥
हृहृद्दलि मूर्ध्नि तिरिक्तकोष्ठे च
गुर्विणीव नवाहयेत् अथ ।
रक्तमोक्षण विधिः हासप्तति
सहस्राणि नाडीनां संभवन्ति हि
वाजिनामिह सर्वेषामास्तु रक्ते ।
व्यवस्थिते तासां निर्मोक्षणाधाय
द्वाराण्यष्टौ वदाम्यहं येयाति
कुपिते रक्ते सर्वदेह समुद्भवे
कंठकक्षे लोचनायोरसयोस्त्र
मुखेतथा अगयो रथपादेषु
पार्श्वयोरुभयोरपि पतद्दले
सवित्तेयं वाजिनोभिषगुत्तमैः
अन्ये समदप्राप्त्याहुः सिराद्वाराणि
वाजिनः येषु रक्ते स्रुते सदाः ।
प्रकरोति ततः सर्वं गुल्फेगले
तथा मेढ्रकक्षान्ते चैव पत्रके
गुदे पृष्ठे च वक्षौ च जंघयोः सर्व
संधिषु जिह्वायो चाधरे चौष्ठे
नेत्रयो रुभयोरपि कर्णमूले
मण्योगंडे रुधिरं स्रावयेद्भिषक्
सोक्त मानपलेनत्याज्यं रक्त
तुरंगप्रमाणे तद्यथा ॥
पलप्राते मुखे त्याज्य ॥
कक्षयोश्चैक मेवच शतार्द्धं ।
नेत्रदेशाच्च मेढ्रदेशात्तथैवच
गंडयोरंडयोश्चैव स्रावयेत् ॥

पंचविंशतिं द्वादशैव गुदे शाहृ ।
एवंशास्त्रविचक्षणाः चैत्रिकं
कालिकं विधादाते विघात ॥
सफेनिलं पिच्छिलं पाडु ॥
कषायोदक वच्चयेत् अथ ॥
ऋतुचर्यानशास्त्रो वाहयेदश्वान्
ग्रीष्मकाले कषायनायदीक्ष
दम्तेते स्यवाहनं दशमासिकंकु
पोदके कटुकं तैलं निवातगेहे
शालेपलार्द्ध लवणे दिवसान्तरेण
तत्रा ऽन्यथामतिमुत्कामपवीथ्यहा
निर्मुक्तौ वैलैर्विरहितस्त्वचेथा
विनश्येत् शारदि गड्हतेपयः
प्रशस्ते शारदि सितात्त्वपलप्रमाण
मक्तं मधुरमम्बुजलेसरोवरोत्थे
हत पत नील मुकुष्टकाश्च ।
भोज्याः हेमन्तकाले हतं तैल
माषा निर्वात संस्थाच पयो ।
यवेक्षुं शनैः शनैर्वाहनकर्म
कुर्याद्यवांश्च भक्ता वितरेद् ॥
विधिज्ञः शिशिरे तैल ॥
पलाष्टकं कटिस्थेदिनसप्तकं वा
पाययेत्तुरगान् तदनु प्रात ।
भोजयेद्यवांश्च यवपवसांश्च
तथा हतस्तरूपाः यस्य दत्ता ।
यवाभोज्या शिशिरे समुपस्थिते
अकृत्वापि क्रियाः सर्वा सहयः

सावमृच्छति वसन्ते संशमनिज
सावव पाणद्वाह य हयानद्युतैस्तैले
शालेसकल विधि रुक्तोपि चमतः
पयो दद्याद्दले सलवणं मधो
वाहनविधिर्भृत्यो योज्य स्तेनाहं
मपि सवमिक्षेद यवराः वसन्त
समये यो ऽश्वः स्थाने तिष्ठति
बंधने तस्योत्साहः प्रणश्येत
सालस्य जायते वपुः ग्रीष्मे
ह्रुतेस्ततज मोक्षणचर्मश्रीति
सक्षायवंधन विमर्द्दन प्रीततोर्यै
हर्वान्तरेण लघुच कोमलमन्यदेव
यत्किंचिदेव मुपयुक्तमिदं ददेति
भोजेन हयलक्षण ॥
मन्यथा स्निग्धोगो लघुतर
लोमकस्त्व पृष्ठोदीचीस्यास्थि
नयनके या दृष्टवं प्राः रक्तोष्ठः
दृप्तु ल नितंव भारवक्ष्या राजाहीं
भवति तुरंगमः प्रशस्यः नाभे
राश्मादेहस्य द्विधा पूर्वापर
क्रमात् पूर्वकाय स्थितारक्ताः
अभाय हयसंस्थिताः अधः काये
स्थितारक्ता अथ मत्त्वप्रकाशकाः
सकीर्नो वेपरीत्येन प्रशस्तफल
मादिशेत् वात स्पष्ट ॥
ब्रह्मादिजाति भेदेन हयजाति
अनुविधा तद्यथा येसुक्ताः स

विमल पुष्प गंधायेवाश्वहंगमाः
सचूर्ण सक्तुक भोजिनो वा।
अकुद्धाः समरगता भृशं च।
पुष्टा स्ते विप्राः क्षितिपति
वाहनेऽति योग्याः येरक्ताः
सद्गुरुगंधयो ऽरुभाषासेर
क्षावहुतरभोजिनो बलाढ्या
अशांताः सकलगुणाग्रहाःश्च
क्षीणा विज्ञेया विधिकरजातस्ते
येपीताः खलु हुतगंधयोपि
येवायेऽकुद्धाः कथमपिरोष
शालिनो येवहावावहुतरना
द्रचोषणावा विज्ञेयान्नृपवरैवै
नृपजातयस्ते येकृष्णाः सरूषा
म गंधयोपि येवा अन्यथावहु
तरतार्द्रनेरपीमे क्षीणागात्रबु
लनवोपि वेशहीनास्ते शूद्राः
क्षितिपतिना भूषा विहेयाः
पतत्रु एकैकमेव लक्षणेन
सामुदायिकं लक्षणं हृदयं
यातविज्ञातिः स्यात् रंगमःवनते
लक्षणकस्ते हेन्या ज्ञेया रूपयाधमाः
अन्यतनुसात्त्विका राजसाश्चेति
तामसाश्चेति तेहयाः येशुद्ध
सत्त्वाभूषा वेगवन्तः क्रांतिभा
जो बहुभोगिनश्च अक्रोध॥
प्रीत्या: समोतिरूपा सात्त्विका

भूपतुरंगमाः स्युः ये रक्त
वर्णा गुरुरोषाः रुषाभि॥
हातेनहि ये सहंते येऽमी।
वलाढ्याः खलु दीर्घदेहास्ते राजसा
भूपतुरंगमाः स्युः ये कृष्णवर्णा
स्तनु रोषा वेगाऽल्पाश्चिनोलक्षण
लक्षताश्च ये दुर्बलाः सर्वगुणे॥
विहीना स्तेतामसा भूपतुरंगमा
प्रथमाः ह्येषां लक्षणं संख्यात
द्विगुणो वाजि मध्यमः॥
त्रयाणां गुणं वेधात् त्रिगुणो।
वाजिनिंदितः परा पार॥
संहितायांतु हयविद्या वासु॥
तेजः स्वैः पंचभिस्तुरंगास्त्रितैः
उल्वणैः पंचधा भेदाः पराशर
मतायथा ये स्थूलाः अश्व॥
सहृदे हरूपभोजनाश्चाक्रांतावहु
तरभोजनाश्च दीर्घाः अकुद्धाः
समरगतास्तु रोषभाजो भौमा
स्तेयुक्त गुरु चर्यैर स्वरास्तु
येश्चयोगास्तनुबलाः अमासह
कलेवराः अक्रोध वेगाः।
सत्त्वाश्चाप्यास्ते तुरगाधमाः
येवातरोगप्रतिमाग्रवेगा॥
सुपुष्ठा भूपांदी र्घकलेवराश्च
अश्रांति भाजो बहुरङ्गाश्चते
वायवा वाजिवराः प्रदिष्टाःये

क्रोधशीला भृशवेगयुक्ता मुक्ता
दिनातक्रोशा धाते व्रजेति।
तेते जसाः पुणपवतां प्रदेशे
भवंति पुणेपरापिते मिलंति॥
एको यदा तेजससंज्ञकोऽश्वः
किंकार्य्यमन्यैस्तुरगार्थमेस्तु।
शुक्ते यदाहीरक खेऽमेके॥
किंकार्य्यमन्यैर्मणिभिर्विचित्रैः
उतस्तुत्य येवाजिवराव्रजेति।
कृत्याभृशं वेगसमन्विताश्चापे
लंघयेतः परिखा मपरोते।
गाग्राणाः पुणपतमाः प्रदिष्टाः
हयोर्लक्षणमेवंयातुरगः स्यात
द्विभौतिकः स्वजाति गुणा।
भूतानां हयानां वाहने शुभे।
शालिहोत्रादि विज्ञानातद्वि
ज्ञेयं यथानरे अरेभवेहि॥
दुष्टाश्च वाहयेदिति चेतदा
तिले सकोचनेदघाल्लवणंवा
गुडान्विते रवेत पूजयेद्वापि॥
निजे निर्मयेमदादयात्ताम्र॥
एतं वापि अभावे सर्वकर्मणाः
एवमन्यत्रापि कांचने रजते
ताम्रे लोहमेतद्यथा क्रमे॥
ब्रह्मादिजातिदोषाणां देय।
मेतत् प्रशांतयेश्रभावेपिच।
सर्वेषां तात्त्वेणस्यात् प्रतिक्रिया

इतिहयपरीक्षा इति
भोजराज कृतयुक्तिकल्पतरुः
घोटिका स्त्री हस्तभेदः तत्
पर्य्यायः कर्कटी १ तोगी २
चतुरंगा ३ अस्या गुणाः कटुत्वं
उष्णत्वमधुरत्वे वातश्लेष्मकेडु
कृष्टास्रमयघ्नु नाशित्वंच इति
राजनिर्घंटः॥ (को
घोणा स्त्री नासा अश्वनासि
तत्पर्य्यायः प्रोथः २ इत्यमरः
घोणी पुं सूकरः इत्यमरः
घोंटा स्त्री हस्तविशेषः॥
प्रायाकुल इति भाषातत्पर्य्यायः
वदरः २ गोपघोंटा ३ शृगाल
कोलिः ४ कपिकोलिः ५ इति
काचित् रत्नमालाहस्तिकोलिः
वदरीकुदा ७ कर्कंधुः ८ इति
रत्नकोषः शूकरहस्तः इति
मेदिनी॥
घोनसः पुं गोनसः तिलित्ससर्पः
इति हेमचंद्रः॥
घोरं स्त्री विषं इति राजनिर्घंटः
घोरः पुं शिवः भयानके त्रि
इति हेमचंद्रः॥
घोरदर्शनः पुं स्त्री उलूकः इति
राजनिर्घंटः भयानकरूपे त्रि
घोरपुष्पं क्लीकांस्यं इति॥



राजनिर्घण्टः घोरपुष्पमपि पादः
घोरवासनः पुं शृगालः इति
शब्दरत्नावली ॥
घोरवासी पुं शृगालः इति
हेमचन्द्रः ॥
घोरा स्त्री रात्रिः इति।
त्रिकाण्डशेषः ॥ देवदालीलता
इति राजनिर्घण्टः भयानका च ॥
घोलं क्ली ससारं निर्जलं मथितं
दधि तत्पर्य्यायः दण्डाहतं २
कालशेयं अरिष्टं ४ गोरसः ५
घलं ६ मलिनं ७ केवलं ८
भग्नसंधिकं ९ तस्य भेदाः ॥
तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बु
निर्जलं ससारं यद्वेतक्रं ॥
कट्वरं तत्प्रकीर्त्तितं इति
शब्दचन्द्रिका अस्य विशेषाः
तक्रशब्दे द्रष्टव्याः ॥
घोली स्त्री पत्रशाकविशेषः
तत्पर्य्यायः घोलिका १ घोलिः २
कलम्बुः ४ कुवकालुका ५।
क्षेत्रजाता अस्या गुणाः ॥
लवणत्वं रुचिकारित्वमम्लत्वं
वातकफनाशित्वञ्च आमम।
घोलिका गुणाः अम्लत्वं रूक्षत्वं
रुच्यत्वं वायुनाशित्वं ॥
पित्त श्लेष्म ॥

कारित्वञ्च सूक्ष्मया जीर्णज्वर।
नाशित्वं इति राजनिर्घण्टः ॥
घोषं क्ली कांस्यं इति ॥
राजनिर्घण्टः ॥
घोषः पुं आभीरपल्ली गोपालः
ध्वनिः घोषकलता कांस्यं ॥
मेघशब्दः इति मेदिनी ॥
मशकः इति त्रिकाण्डशेषः ॥
कायस्थादीनां पद्धतिविशेषश्च
घोषकः पुं घोषालता तत्पर्य्यायः
धामार्गवः २ इत्यमरः।
घोषकाकृतिः ३ आदानी ४
देवदाली ५ तोरणकः ६ महाश्वेत
हस्तिघोषातकी पीत।
पीतघोषा २ राजघोषातकी ३
कर्कोटकी ४ महाजाली ५ क्ष्वेडः
६ कोषफला ७ श्वेतघोषायाः
पर्य्यायः घोषातकी १ मृदंगी
जालिनी कृतवेधकः ४ श्वेतपुष्पा
५ आकृतिछत्रा ६ ज्योत्स्ना ७
इति रत्नमाला ॥
घोषकाकृतिः पुं घोषकः इति
रत्नमाला ॥
घोषणा स्त्री उच्चैः शब्दः लोक
विज्ञापनायोच्चैः शब्दितं तत
पर्य्यायः। उच्चैर्घुष्टं २॥
इत्यमरः ॥

घोयित्नुः पुं ब्राह्मणः कोकिलः
वन्दी इति शब्दरत्नावली।
घोषवती स्त्री वीणा इति
हेमचन्द्रः शब्दविशिष्टे त्रि ॥
घोषा स्त्री मधुरिकौषधिः मौरी
इति भाषा इति मेदिनी
कर्कटशृङ्गी इति राजनिर्घण्टः
घोषातकी स्त्री श्वेतघोषा इति
रत्नमाला ॥
घ्रा गंधोपादाने इति
कविकल्पद्रुमः ॥
घ्राणं क्ली नासिका इत्यमरः
न्यायमते घ्राणेन्द्रियग्राह्यगंधे
त्वादि घ्राते त्रि इति मेदिनी ॥
घ्राणतर्पणः पुं गन्धः इत्यमरः
घ्राणदुःखदा स्त्री छिक्कनी इति
भावप्रकाशः ॥
घ्रातः त्रि गृहीतगंधपुष्पादिः घ्रा
लनया इति सोका इति च भाषा
तत्पर्य्यायः घ्राणः २ इत्यमरः।
घ्रातिः स्त्री नासिका इति
शब्दचन्द्रिका ॥

ङ

ङ ङकारः व्यञ्जनपंचमवर्णः
अस्योच्चारणस्थानं नासिककंठः
इति व्याकरणं अस्य स्वरूपं यथा
ङकारं परमेशानि स्वयं परम
कुण्डली सर्वदेवमयं वर्णं त्रिगुणं
लोललोचने पंचप्राणमयं वर्णं
ङकारं प्रणमाम्यहं इति कामधेनुः
तंत्रेमपिच ऊर्द्ध्वाधः क्रमयः क्रमेता
रेखा किंचिद्दा कुंचिता ततः
अधोगता कुण्डलीतमात्राशक्ति
स्वरूपिणी रेखात्रयेषु ब्रह्मेश
विष्णवः संति देवताः इति
वर्णोद्धारतन्त्रे ॥
ङः पुं विषयः विषयस्पृहा इति
मेदिनी भैरवः इत्येकाक्षर ॥
कोषः ॥
ङ ङ ध्वनौ इति कविकल्पद्रुमः

—

च

चचकारः व्यंजनषष्ठवर्णः
अस्योच्चारणस्थानं तालु इति
व्याकरणं अस्य स्वरूपं यथा
चवर्णं शृणु सुश्रोणि चतुर्वर्ग
प्रदायकं कुण्डली सहितं देवि
स्वयं परमकुण्डली सततं कुण्डली
युक्तं पंचदेवमयं सदायच ॥
प्राणमयं वर्णं पंचप्राणात्मकं सदा
त्रिशक्तिसहितं वर्णं त्रिबिन्दु ॥
सहितं प्रिये इति कामधेनुतन्त्रे
अपिच वातोक वर्तुलाकार ॥



ऊर्द्धश्च क्रमतोगतः रेखा ॥
त्रयेषु चन्द्राग्निसूर्य्या स्थिष्टेति
नित्यशः शक्तिर्माशानविज्ञेया
ध्यानमस्य प्रवक्ष्यते इति
वर्णोद्धारतन्त्रे ॥
व व्य अन्वाचयः यत्र एकस्य
प्राधान्येनापरस्य गौणत्वेनान्वयो
सोऽन्वाचयः यथा भो वटो ॥
भिक्षामट गां चानय भिक्षामटन
मत्र प्रधानं तत्कुर्वाणो यदि
गां पश्यसि तदा तामप्यानयेति
नोचेत् भिक्षामेवाटेति ॥
समाहारस्तिरोहितावयवभेदः
इतरेतर उद्रिक्तावयवभेदः ॥
अतएव चार्थे द्वन्द्व इति सूत्रे।
विधाय चार्थोऽत्र समाहारेतरे
तरश्चेति व्याख्याय समाहारे।
अनभिव्यक्तावयवत्वात् एकवच
ने इतरेतरयोगे समुद्भूयमान।
प्रधानत्वात् द्विवहुवचने यथा
पाणिपादं अश्ववलीवर्दैः ब्रह्म
क्षत्रियविट्शूद्राः स्वल्पश्चोथा
विति परेकस्मै समुच्चितिः ॥
समुच्चयः प्राधान्येन कश्चित् क्रिया
विषये ऽनेकस्य चीयमानता ॥
यथा धवांश्च खदिरांश्च छिंधि।
इतिभरतः समाहारः ॥

अन्योन्यार्थः समुच्चयः पक्षान्तरे
पादपूरणे आधारणे इति
मेदिनी हेमः इति ॥
त्रिकाण्डशेषः ॥
वः पुं वरुणेशोकक्षयःचन्द्रः
चौरः इति मेदिनी निर्वीजे
दुर्जने च त्रि इति शब्दरत्नावली
वक इ भीतौ सौत्रो धातुरयं
इति कविकल्पद्रुमः ॥
चकम अ उ प्रतिघाते तृप्तौ
इति कविकल्पद्रुमः ॥
चकास ऋ ल लु दीप्तौ इति
कविकल्पद्रुमः ॥
चकितं त्रि भीतं इति ॥
त्रिकाण्डशेषः तस्य लक्षणं
प्रियाग्रे चकितं भीते रस्थानेपि
भयं महत् इत्युज्ज्वलनीलमणिः
चकोरः पुं स्त्री पक्षिविशेषः।
तत्पर्य्यायः चन्द्रिकापायी २
कौमुदीजीवनः ३ अस्यमांस।
गुणाः चटके शीतलं रुच्यं वृष्यं
कापिञ्जलामिषं तद्वच्चकोरजे
मांसे हृद्यं च बलपुष्टिदं इति
राजनिर्घण्टः ॥
चकोरकः पुं स्त्री चकोरपक्षी ॥
इत्यमरः ॥
चक्क फ भ्रांतौ इतिकविकल्पद्रुमः

चक्रं क्ली ब्रजः समूहः सैन्यं ॥
रथांगं चका इति भाषा राष्ट्रं।
दम्भविशेषः कुम्भकारोपकरणं
कुमारेर चाक इतिभाषा अस्त्र।
विशेषः जलावर्त्तः इति
मेदिनी ग्रामजाले इति
त्रिकाण्डशेषः तगरपुष्पं इति।
राजनिर्घण्टः व्यूहविशेषः इति
महाभारते तैलयन्त्रे इत्यमरः ॥
टीकायां स्वामी शरीरस्थषट् ॥
चक्राणि यथा मूलाधारः स्वाधि
ष्ठानं २ मणिपूरं ३ अनाहतं ४
विशुद्धं ५ आज्ञाख्यं ६ तद्यथा ॥
मूलाधारे त्रिकोणाख्ये इच्छाज्ञा
नक्रियात्मके मध्ये स्वयम्भुलिङ्गन्तु
कोटिसूर्य्यसमप्रभं तदूर्द्ध्वं ॥
कामवीजन्तु कलशान्तीन्दुनादकं
तदूर्द्ध्वं तु शिखाकारा कुण्डली।
ब्रह्मविग्रहा तद्वाह्ये हेमवर्णाभं
वसवर्णं चतुर्दलं द्रुतहेम ॥
समप्रख्यं पद्मं तत्र विभावयेत्।
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं
हीरकप्रभं वादि लांत।
षड्वर्णेन युक्तं स्वाधिष्ठान संज्ञकं
मूलमाधार षट्कानां मूलाधारं
ततो विदुः स्वशब्देन परो लिङ्गं
स्वाधिष्ठानं ततो विदुः तदूर्द्ध्वं ॥

नाभिदेशे मणि पूरं ॥
महत्प्रभे मेघाभे विद्युदाभं च
वहुतेजोमयं ततः मणिवद्भिन्नं
तत्पद्मं मणिपूरं तथोच्यते ॥
दशभिश्च दलैर्युक्तं डादि ॥
फांताक्षरान्विते शिवेनाधिष्ठितं
पद्मं विश्वालोकैककारणं
तदूर्द्ध्वं नाहतं पद्मं उद्यादा ॥
दित्यसन्निभं कादिठांताक्षरै
रर्कपत्रैश्च समधिष्ठितं तन्मध्ये
वाणलिङ्गं तु सूर्य्यायुतसमप्रभं
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र
दृश्यते तेनाहताख्यं पद्मं।
तन्मुनिभिः परिकीर्त्तितं ॥
आनन्दसदनं तत्पुरुषाधिष्ठितं
परं तदूर्द्ध्वं तु विशुद्धाख्यं ॥
दलषोडशपङ्कजं स्वरैः
षोडशैर्युक्तं धूम्रवर्णं महत्।
प्रभं विशुद्धिं तनुते यस्मात्।
जीवस्य हंस लोकनात् विशुद्धं
पद्ममाख्यातमाकाशाख्यं महा
द्भुतं आज्ञाचक्रं तदूर्द्ध्वं तु
आत्मनाधिष्ठितं परं आज्ञा
संक्रमणं तत्र गुरोराज्ञेति ॥
कीर्त्तितं कैलासाख्यं तदूर्द्ध्वं।
तवोधनीन्तु तदूर्द्ध्वतः पवेवोधव।
चक्राणि शाक्तानि तवस्तुत

मैत्रोद्धारार्थषट्चक्राणि
कुलाकुलचक्रं १ राशिचक्रं २
नक्षत्रचक्रं ३ अकथहचक्रं ४
अकडमचक्रं ५ ऋणधनिचक्रं ६
तद्यथाकुलाकुलस्य भेदेहि ॥
वक्ष्यामि मैत्रिणामिह वाय्वग्नि।
भूजलाकाशगाः पञ्चाशल्लिपयः
क्रमात् पञ्च ह्रस्वाः पञ्च।
दीर्घा बिन्द्वन्ताः सन्धि सम्भवाः॥
कादयः पञ्चशः यशलसहान्ताः
प्रकीर्त्तिताः तथाच अआ एक
चटतपयषाःमारुताः इई ऐ ख।
छठथफरक्षाःआग्नेयाःउऊत
गजडदबलाः पार्थिवाः ॥
ऋॠ ओ घ ढ ध भ व साः।
वारुणाः ऌ ॡ औ ङ ञ ण न म।
हाः नाभसाः साधकस्याक्षरे
पूर्वमैत्रस्यापि तदक्षरे ॥ ॥
वेधक भूत दैवत्यं जानीयात्।
सकलं हि तत् भौमस्य वारुणं
मित्रं आग्नेयस्यापि मारुतं ॥
मारुते पार्थिवानाञ्च शत्रुराग्नेय
मैभसौ नाभसं सर्वं मित्रं ॥
स्याद्विरुद्धं नैवशीलयेत् ॥
अथ राशिचक्रं लेखा द्वयं ॥
पूर्वपरागतं स्यात् तन्मध्यतो ॥
याम्य कौबेर भेदात् द्वकैक ॥

यथा मीशान निशाचरेत हुताशन ॥
वायो विलिखेन्मतो अर्गान् ॥
तेषाग्नि वह्नियुगल अवर्णादि
संख्यान् पञ्चषु वाणशार पञ्च
वतष्टवार्णान् मेषादितः प्रवि
लिखेत् सकला वर्णान् कन्या
गतान् प्रविलिखेदथ शादिवर्णान्
तेन अ आ इ ई मेषः ॥
उ ऊ ऋ वृषः ॠ ऌ ॡ मिथुने।
ए ऐ कर्कटः ओ औ सिंहः अं अः
श ष स ह ल क्षः कन्या ॥
कवर्गस्तुला चवर्गो वृश्चिकः
टवर्गो धनुः तवर्गो मकरः ॥
पवर्गः कुम्भः यवर्गो मीनः ॥
स्वराशीनां मन्त्र कुर्ले मन्त्रं भजेत्
राशीनां शत्रुतां ज्ञेया त्यजेत्
षष्ठं मृतिं व्ययं स्वराशेर्मन्त्र ॥
राशौ षष्ठे गणनीये विचक्षणैः
यदात् स्वराशे रस्मानं तदा ॥
साधकनामाद्यक्षरं सेवेथिनं ॥
राशिं गृहीत्वा गणयेत् ॥
अथ नक्षत्रचक्रं अ आ अश्विनी
देवगणः इ भरणी मानुषः ॥
ई उ ऊ कृत्तिका राक्षसः ॥
ऋ ॠ ऌ ॡ रोहिणी मानुषः ए
मृगशिरो देवः ऐ आर्द्रा मानुषः
ओ औ पुनर्वसु देवः कः पुष्यो

देवः खग अश्लेषा राक्षसः।
घ ङ मघा राक्षसः च पूर्वफल्गुनी
मानुषः छज उत्तराफल्गुनी मानुषः
झ ञ हस्ता देवः ट ठ चित्रा।
राक्षसः ड स्वाती देवः ढ ण।
विशाखा राक्षसः तथद अनुराधा
देवः ध ज्येष्ठा राक्षसः न प फ।
मूला राक्षसः ब पूर्वाषाढा मानुषः
भ उत्तराषाढा मनुष्यः म श्रवणा
देवः य र धनिष्ठा राक्षसः ल॥
शतभिषा राक्षसः व श पूर्व।
भाद्रपदा मानुषः ष स ह उत्तर ॥
भाद्रपदा मानुषः अं अः ल क्ष
रेवती देवः तथाच अश्विन्यादि
क्रमेणैव विलिखेत्तारकाः पुनः
वक्ष्यमाण विधानेन तन्मध्ये।
वर्णकान् लिखेत् उत्तराहतिण
यन्तरेखा कुर्यात् चतुष्टयी ॥
दशरेखाः पश्चिमाग्राः कर्त्तव्या
वीरवंदिते अकारादि क्षकारान्
तान् द्विवेदवह्नि वेदकान्।
भूमीड नेत्र चंद्राश्च अश्लेषांते
खगोऽग्नियो द्विभूनेत्रनेत्रयुग्मो
भैंड नेत्राग्निचंद्रकान् मघादि
ज्येष्ठपर्य्यन्ते द्वितीयं नवतारकं
वह्नि भूमीड चंद्राश्च युग्मेंड ॥
नेत्रवह्निकान् वेदेन भेदिता।

वर्णैरेवत्यपशा गताः क्रमात् ॥
पूर्वोत्तरा त्रयंचैव भरण्यार्द्राच
रोहिणी इमानि मानुषाणि हु
नक्षत्राणि मनीषिणः ज्येष्ठा।
शतभिषा मूला धनिष्ठाऽश्लेष
कृत्तिकाः चित्रा मघा विशाखाः
सुस्ता राक्षस देवताः अश्विनी
रेवती पुष्यः स्वाती हस्तः ॥
पुनर्वसुः अनुराधा मृगशिराः।
श्रवणा देवताः ताः स्वजातौ ॥
परमाप्रीतिर्मध्यमा भिन्नजातिषु
रक्षोमानुषयोर्नाशो वैरं दानव
देवयोः जन्मसंपद्विपत् क्षेमः
प्रत्यरि साधको वधः मित्रं ॥
परममित्रं च जन्मादीनि पुनः पुनः
जन्म त्रि पञ्च सप्तानि वर्ज्जनीयानि
नक्षत्राणि स्वनक्षत्रादेव नक्षत्रे
गणनीये स्वनक्षत्रस्थाने स्वना
माद्यक्षरं सेवेथि नक्षत्राद्गणनीये
अथाकथह चक्रं वक्ष्ये ॥
लिखेत् कोष्ठे चतुष्कोष्ठसमन्विते
पुनश्चतुष्के तत्रापि लिखेद्धीमान्
क्रमेणतु इंद्वग्नि रुद्र नव नेत्र
युगार्कदिक्सत्वष्टषोडश चतुर्दश
भौतिकेषु पातालपंचदश ॥
वह्निद्विमांसु कोष्ठे वर्णान् लिखेत्
लिपिभवान् क्रमशस्तु धीमान्

नामाद्यक्षरमारभ्य यावन्मैत्रादि ॥
मात्रां चतुर्भिः कोष्ठैरेकैक ॥
मितिकोष्ठचतुष्टये पुनः कोष्ठग
कोष्ठेषु सप्ततो नाम्नाद्यादितः
सिद्धः साध्यः सुसिद्धो ऽरिः
क्रमाज्ज्ञेया मनीषिभिः सिद्धः
सिध्यति कालेन साध्यस्तु जपहोम
मतः सुसिद्धो ग्रहमात्रेण रिपु
मूलं निकृन्तति अथाकडमचक्रे
रेखाद्वये पूर्वपरेण कुर्यात् ॥
तन्मध्यतो याम्य कुबेर भेदात्।
महेश रेखोचिपति क्रमेण ॥
तिर्यक् तथा वायु हुताशनेन।
अकारादि हकारान्तान् क्लीव।
हीनान् लिखेत्ततः तथा मेह
वर्णद्वये लृलॄ तद्धि क्लीवे ॥
प्रचलते एकैक क्रमतो ॥
लेख्यान् मेषादिषु वृषांतकान्
गणयेत् क्रमशो भेद्रनामादिवर्ण
कादिमान् मेषादितश्च मीनांते
गणयेत् क्रमशः सुधीः जमुः
स्वनामतो मैत्री यावन्मैत्रादि ॥
मात्रां सिद्ध साध्य सुसिद्धारीन्।
पुनः सिद्धादयः पुनः नवैकपंचमे
सिद्धः साध्यः षड्दश सप्तमे ॥
सुसिद्ध त्रिसप्तके रुद्रे वेदाष्ट
द्वादशे रिपुः पतते कथिते ॥

देविश्रकडमादिक मृतमे ॥
नागाश्च द्विवसवानो कोष्ठवृद्धिः
षिवस्य च राशिवृद्धि सेषेरेच
गोपालेऽकडमः स्मृतः ॥
अथ क्रमेण धनिचक्रे कोष्ठान्
कादशान्येव वेदेन पूरितानिच
अकारादि हकारान्ते लिखेत् ॥
कोष्ठेषु नवचित प्रथमे ॥
पंचकोष्ठेषु ह्रस्वदीर्घक्रमेणतु
द्वयं द्वये लिखेत्तत्र विचारे ॥
खलु साधकः शेषैकैककशो
वर्णान् क्रमशस्तु लिखेत्सुधीः
द्वौ द्वौ स्वरौ पंचसु कोष्ठकेषु।
शेषान् समान षट्सु षडेकमेकं
कादीन् [illegible] विलिखेत्ततो
ऽर्णानेकैकमेकादशात्रिकेषु
षट्काल काल वियदग्नि समुद्र
वेद लोकाश शून्य दहनाः।
खलु साध्य वर्णाः युग्म द्विपंच
वियद्देवर युक शशांक योमाथि
वेद शशिनः खलु साधकाणाः
नामाक्षरादक ठवाङ्ग जभुक शेषे
ज्ञातो भेयो रधिक शेष मृणं ॥
धनं स्यात् मैत्रो यद्यधिकोकः
स्यात्तदा मैत्रं जपेत् सुधीः।
समेपि च जपेन्मंत्रे न जपेत्
ऋणाधिके शून्ये शून्ये विजानी

यात् तस्मात् शून्ये विवर्जयेत्
इति तंत्रसारः अथोत्तरायण।
चक्रे यथा चक्रे सारे विलिख्य
ग्रहयति रथेन सेक्रमे यत् ॥
करोति यस्मिन्नेव तद्देव
मरणभयकरं मूल मूलेपि
दद्यात् तत पश्चाद्वार मूले विवि
भयकरं मूलपार्श्वे ऽर्थलाभः।
सर्व्वं स्यात् मूलमध्ये भवतिच
नियतेति वाम क्रमेण ॥
केतुचक्रे यथा कंठे ॥
हृदि त्रिभयुगे कृतमानलाभो
षट्पृष्ठभे लयकरं धनदं करे
त्रिः वामे चतुर्षु च रुजं पदयो
स्त्वष्टौ लक्षोभयेच नितरां।
मिह केतुचक्रे अहिचक्रे यथा
अथाहिचक्रे वक्ष्यामि विभ्रांत
दृष्यपाल्ययोः ऊर्द्ध रेखाष्टके
लेख्यं तिर्यक् चैव च रेखिकाः
स्यान्नहार मुखे चक्र मष्टौ ॥
विंशति कोष्ठकेतत्रैव सौम्याश्वि।
याम्यवह्निकृत्तिका मघभाग्यतः।
उत्तराफल्गुनी लेख्या पूर्व।
गहुन्या भमसके अहिबुध्नो ॥
ऽजपाद वह्नि पातभेद्राहसर्पभे।
पुष्यहस्ते समालेख्य ॥
द्वितीया पङ्क्ति मास्थिते ॥

अभिजिद्धिस्त्र वह्नेते सौम्यरौद्रे
पुनर्वसं चित्रभेच तृतीयायां
पङ्क्तौ धिष्ण्यस्य सप्तके विश्वदैवे
तोयभे मूला ज्येष्ठा मैत्र ॥
विशाखभे स्वाती पङ्क्तौ
चतुर्थ्यां तु कर्तव्य यत्रगाकृति
द्वारशाखे मघा मास्ये द्वारस्था
कृतिकाततः अश्वीशपूर्वाषाढादि
त्रिक पंच चतुष्टयं वेरती ॥
पूर्वनाडेंद्रो भानि शोषाणि
भास्वतः उदयादि गता ॥
नाग्रा भद्राः यष्णामशेषके
निनेडु भुक पुक्ता ऽसौ ॥
भवेत्तत् काल चंद्रमाः चेद्भवेत्
साधयेत् सूर्यभृत्तस्ये चेष्टकालिके
चंद्र ऋक्षे यदार्केहृतदाक्ति
निश्चिते तिथिः भानु ऋक्षे
स्थितो नोचेत्तदा शाल्ये न।
सेषायः स्व स्व भेद्धितयेत्तये
नालिकं विद्धि पर्यये स्थिते
नलभ्यते दृष्टे चंद्रे क्रूरग्रहा
न्विते पुष्टचंद्रे भवेन्मृत्युर्हीण
चंद्रेऽल्पको तिथिः हेमतारेच
तान्मारेत्ते कांस्यतथा त्रपु ॥
नागं चंद्रे विजानीयाद्रात्रकादि
ग्रहेहिते मिश्रे मिश्रं भवेत्।
दृष्टेसूर्येदृष्टि विवर्जिते हेम

तारेव तामैरं पाषाणं मृन्मया
पसंस्तूर्यादि गृहेण वेद्देद्य
भांडे प्रजायते भुक्तराशेष शा।
मानेन भूमानं परिकल्पयेत
नीचे द्विम्र परेनीचे जलसंस्थो
भवेत्त्रिधिः स्वोच्चस्थेन तुंगद्वय
नवांशक क्रमेणाच परमोच्चे ॥
भवेत्तुंगे भित्तिस्थमृत्तसेक्रम।
अथिष्ठिते भवेद्दूव्यं यत्रचेद्रो
ग्रहान्वितः कुलाकुलचक्रे ॥
यथा द्वितीयादष्टमी षष्ठीकुला
कुलमुदाहृतं विषमाश्चाकुलाः
सर्वाशेषाश्च तिथयः कुलाः
रविश्चंद्रो गुरुः सौरिश्चत्वारो।
ऽत्राकुला मताः भौमशुक्रौ।
कुलाख्यौ च बुधवारः कुलाकुलः
वरुणार्द्रा ऽभिजिन्मूलेकुलाकु
ल मुदाहृतं कुलानि समधिष्ण्या
नि शेषभान्य ऽकुलानि चतिथौ
वारे च नक्षत्रे अकुले यायिनो
जयः कुलाख्ये स्थायिनो नूनं
संधिश्चैव कुलाकुले अथ
कुंभचक्रं कुंभाकारं लिखेच्चक्रं
तिर्य्यग्रेखा प्रभेदितं क्रमाद्दिक्षु
मध्ये लेख्य मेकैकांतरं भे ॥
क्रमात भानुभानि लिखित त्र
रिक्तः पूर्णा इति क्रमात एवं

राशिक्रमो लेख्यो रिक्तः पूर्णा इति
द्वितीयादिके रिक्ता नवेयात्रा ॥
पूर्णापूर्णा शुभावहा अथ
कोटचक्रं अथातः संप्रवक्ष्यामि
कोटचक्रमिहाष्टधास्तोकोऽरेः
कुरुतेयत्र भूरि सैन्यपराजयं
प्रथमो मृन्मयः कोटो द्वितीयो
जलकोटकः तृतीयो ग्राम ॥
कोटश्च चतुर्थस्तत्र गह्वरः ॥
पंचमो गिरिकोटश्च षष्ठः कोटश्च
डामरः सप्तमो वक्र भूमिष्टो
विषमाख्यस्तथाष्टमः मृन्मये
साधयेत कोटं जलस्थे वेध
मोचनं ग्राम दुर्गे ऽग्निदाहेच।
प्रवेशो गह्वरे तथा पर्वतेस्थान
भेदश्च भूतले डामरे रणे ॥
वक्रस्थे कवियोगे च विषमेस्थायि
यायिनो अति दुर्गे कालकर्णं

चक्राकारं वर्त्तनेश्च दिग्गते तुलावर्त्तेश्च
यथाख्यो यत्तभेदश्च प्रार्थं ॥
यतन्नामाष्टकं ज्ञेयं वर्गाष्टक
क्रमेण च यस्य वर्गस्य येभवेत्
तज्ज्यास्तत्रा नागराः योजयेत्
तेनवर्गेण तद्दुर्गं तस्यभेगादः
अगरुडः क मार्जारश्च सिंहश्च
शुनीसुतः तसर्पश्चपश्चाखुश्च

यगजः शास्त्रज्ञास्ततः दुर्गवर्गस्य
येभवन्त्यावर्गनाम स्थिता नराः
तद्दुर्गे तेरणे त्याज्या नकर्मव्या
गदृद्याधिपाः अवर्गात पंचमस्थाने
खेडिभंगश्च जायते ऽवर्गा षष्टके
ज्ञेयं पूर्वादिषष्ट दिशांक्रमात ॥
कोटचक्रं लिखेच्चादौ चतुरस्त्रे
त्रिनाडिके कृत्तिकादीनि धिष्ण्या
नि साभिजिंतिन्यसेद्बुधः वहिः
कोटे तथा मध्ये कोटे मध्ये।
वहिर्वहिः प्रवेशो निर्गमस्तत्र
ज्ञातव्यः स्वरवेदिभिः वहि
द्वादशभान्यत्र प्राकारे तारकाष्ट
कं दुर्ग मध्ये तथाचाष्टौ मध्ये
स्तंभ चतुष्टये कृत्तिका ॥
पुष्यसर्पश्च मघा स्वाति
विशाखे भेऽनुराधा ऽभिजि।
द्विस्तुर्थनिष्वि यामा वहिःश्रवा
पुनर्वसु भाग्य चित्रा ज्येष्ठा।
तथोत्तराः शतभेरेवती चैव।
प्राकारे तारकाष्टकं मृगरोद्रा ॥
तथा हस्ते मूलमाषाढ पूर्वकं
पूर्वोत्तरा तथा भाद्रा मध्ये ॥
अश्वत्याष्टकं विडः पूर्वे रोहिण्यभे
हस्ते पूर्वाषाढ्वाच वारुणिं उत्तरे
चोत्तरं भाद्रमेततस्तंभ ॥
चतुष्टये कृत्तिकायेमघायंच ॥

मैत्राद्ये वासवादिके त्रीणि ॥
त्रीणि प्रवेशेच भानि द्वादश।
निर्गमे कृत्तिकादि रथेन्यासः
सर्वोपरो प्रदर्शितः दुर्गभाद्
गणानं चात्र ग्रहैर्वीचेन्ततः फलं
चतुरस्त्रे तथा वृत्ते त्रिकोणे।
वृत्तदीर्घके अर्क चंद्रे वर्त्तलेच
गोलाने धनुराकृति चतुरस्त्रे
यथान्यासो भूमि भाग ॥
क्रमेणाच प्रवेशे निर्गमे स्तंभे
तथा हस्तादि सप्तके दुर्गे ॥
भित्तिविभागेन दातव्या धिष्ण्
मंडले वाह्य मेमध्य भेचैव ॥
यत्रस्थाः क्रूरखेचराः तत्रस्थाने
कृतेयत्ते द्विस्तिदुर्गे सस्तेनिकं
ऊर्द्धदृष्टीच भौमार्कौ केकरौ
बुधभार्गवौ समदृष्टीच जीवंद्द
शनिराहू तथोद्दृष्टौ नेडीत्रये
वहिर्मध्ये गर्भे नामादि लिख्यते
कालपद्वोद्ध शाकेभ्यः परक्रमे
विवत्तया यातभेकालनाडीस्थ
मृत्युभेष्या पदेस्थितेचौर्य्यस्तयो
पतापाश्च रोद्रनाशो प्रग्रहः
क्रूरागभे प्रेद्देतिप्राकारे खेडि
कारकाः वहिस्थाविष्टकेसैन्य
भेगादा नात्रसेशायः क्रूरागभे
शुभावाले गृह्यते निश्चितं पुरे

सौम्या मध्ये वहिः क्रूरा असाध्ये
दुर्गमुच्यते क्रूरचक्रद्वये मध्ये
प्राकारे सौम्य खेचराः ॥
भेदाद्भङ्गो भवेद्दुर्गे विनायुद्धेन
गृह्यते प्राकारे संस्थिताः
क्रूरा मध्ये सौम्य ग्रहा यदि
दुर्गभङ्गसमन्तपत्रे भङ्गमायाति
वेष्टकः मध्यनाडी स्थिताः सौम्याः
क्रूरा वहिश्च स्थिताः सैन्यावेष्टौ
वहिः प्राप्तौ विनायुद्धेन जायते
प्राकारे पुरमध्ये च क्रूरा ॥
व्यवस्थिताः सौम्या वाह्ये तदा
दुर्गमध्ये नापि सिध्यति सौम्य
मध्ये च कोटच वाह्ये पापग्रहा
यदि दैवज्ञ स्यादिभिः कोटो।
गृह्यते न कदाचन प्राकारवाह्य
गाः क्रूराः सौम्या मध्यगता यदि
युद्धं प्रकार खंडिम्न पुरभेदेन
जायते स्तम्भान्तरगता यस्य ग्रहाः
सौम्याः शुभान्विताः भवेत्तु
तस्य कोटस्य न नाशो विद्यते
कश्चित् स्तम्भान्तरगस्य वस्यारवि
राहु शनैश्चराः भूमिपुत्रश्च
तस्याशुनाशः कोटस्य निश्चितं
सौम्या वाह्ये तथा कोटे मध्ये।
क्रूरग्रहाः स्थिताः स्वयं दुर्गे।
प्रपक्षेति वेष्टकायगाधियाः

वाह्याभ्यन्तरगाः क्रूराः प्राकारे
शोभनग्रहाः रिपुद्वये क्षये।
याति विना युद्धेन निश्चितं ॥
प्राकारस्था ग्रहाः क्रूरा वहिर्मध्ये
शुभाः स्थिताः समयुद्धं भवेत्तत्र
खंडिपातो दिने दिने सौम्याः
क्रूरास्तथा वाह्ये प्राकारमध्य
वाह्यगाः पकस्था यत्र कुर्वन्ति
संग्रामस्तत्र दारुणं गजाश्वरथ
भूपालाः सामन्ता मंडलेश्वराः
कुर्वन्ति च भटा युद्धमुभयोरपि
सैन्ययोः विचार्य कुरुते युद्धं
कोटचक्रे स्वरोदयी प्रवेशाधिष्ठा
गे चन्द्रे जीव यत्रान्तं संस्थिते।
निष्क्रम्ये कविराणे दुर्गकर्त्तव्यं
वेष्टकैर्नृपैः कर्त्तव्यं कविग्रहेव
राज्ञो स्वमे वहिर्जने प्रवेशः ॥
निर्गमाद्गुरौ सैनयो रुभयोरपि
कवौ कोटजयो युद्धे विपरीते
युगा जयः विहाय प्रकृते चारे
वक्रगा कुतिवद्गुरुः तदा प्राग्दृशे
भगः स्यात् रुद्धयोः पूर्व ॥
सैन्ययोः भौमश्च वक्रिते ॥
भंगो भवेत् दक्षिणतः तत्र च
भवेत् पश्चिमतो भंगो भार्गवे
वक्रगामिनि बुधे वक्रगते चैव
भंगश्चोत्तरतो भवेत् यदि तत्र

स्थितौ स्यातां नत्रात्वर्के शनैश्चरौ
क्रूरा वक्री प्रवेशार्के पुरमध्ये ॥
स्थितौ यदा तदा कोटविनाशाय
कोटस्था वाह्य भूपतेः प्रवेशा
वाह्यगक्रूर वक्रे स्वसैन्यविग्रहः
दुर्भिक्षं मृत्युभंगो च वहिः सैन्यस्य
जायते निर्गमे तु वहिःस्थ चक्रौ
वक्रं करोति चेत् प्राकारस्य ॥
भवेद्भङ्गः प्राकारस्थे पुरस्य च
पुरभे निर्गमे वक्राः कथंचित्
क्रूरखेचराः दुर्गं त्यक्ता तदा।
काले दुर्गस्थः प्रपलायते यथा
क्रूरैस्तथा सौम्यैः फलं ग्राह्यं
विपर्ययात् मिश्रे मिश्रं
विजानीयात् कोटचक्रे न संशयः
यः दुर्गसैन्ये तथैवाप्ते प्राकारे
मध्यभागगे नीचस्थे वेष्टके
सैन्ये ज्ञातव्यं सर्ववेदिभिः ॥
कोटे कोटाधिपे नीचौ विज्ञदौ
भौमभास्करौ समस्थाव पुरे।
सर्वे उच्चस्थौ निष्फलौ च तौ
प्राकारे वेष्टके हन्ति उच्चस्था
राहुसूर्यजौ प्राकारस्थो वहिः
सैन्ये नीचस्थौ तौ च निष्फलौ
स्थितेर्के पत्रे स्तरौ गुरावत्र ॥
स्थितेऽपि च वक्रिता ॥
नैव प्राक्काः ॥

स्वविधाता कोटभेदने सम ॥
दृष्टा गुरुश्चंद्रः पश्यतः सर्वतः
सदा तिर्य्यक् स्थितौ बुधशुक्रौ
फलदौ नात्र संशयः ऊर्द्धदृष्टिग्रहे
कुर्यात् टिंगनी यंत्रवाहने समेव
साधयेत् खंडिरंध्रपात मथो
शुभे कोटभे सुख युक्तस्ये ॥
राहोर्यदि गत्वादिके कोटश्च
भज्यते क्षिप्रं पूर्वोक्त विधिना
चिरात् दुर्गमध्यगते सूर्ये।
जलशोषः प्रजायते चंद्रभेगः
कुजे दाहो बुधे बुद्धि वलान्नराः
वाक्पतौ दुर्गमध्यस्थे सभिक्षे
पत्तोजले च लविता नराः शुक्रे
मृत्युरोगौ शनैश्चरे राहौ मध्य
गते दुर्गे भंगा भेदो महद्भये
केतौ मध्यगते तत्र विषादः
स्याज्जन्ताधिपे सौरिश्च वाक्पति
श्चैव भवेतां दिशि संस्थितौ
यस्यां तया स कोटस्तु भज्यते
नात्र संशयः इति वोक्तं ॥
फलं मध्ये पवे वाह्यगते ग्रहे
उपग्रह समायोगात् तत्यते प्राण
संशयः अकारादि स्वराः पंच
पूर्वोक्तादि चतुष्कोणमध्यान्ताः सच
मालेख्या स्ततस्याः खंडि ॥
कारकाः ॥

दुर्गनाम्नः स्वरो यस्य वामो वाल
सितोऽपि वा तद्दिने प्रारभेत् ॥
युद्धे दुर्गं सिध्यति नान्यथा ॥
इति कोटचक्रे इति समयामृते
चक्रान्तराणि तन्त्रके हे ॥
द्रष्टव्यानि ॥
चक्रः पुं चक्रवाकपक्षी इत्यमरः
चक्रकः त्रि तर्कविशेषः तस्य
लक्षणं यथा स्वापेक्षणीया
पेक्षितत्सापेक्षितत्व निबंधन
प्रसंगत्वं अपेक्षाव ज्ञाप्तो ॥
उत्पत्तौ स्थितौ च यथा स्यात्तत्राद्या
यथा यत् तद्घट ज्ञाने यद्येतद्
घटज्ञानजन्य ज्ञानजन्यज्ञान
जन्यं स्यात् तदा एतद्घटज्ञानज
न्यज्ञानजन्यज्ञानभिन्नं स्यात्
द्वितीया यथा घटोऽयं यद्ये
तद्घट जन्यजन्यजन्यः स्यात्तदा
एतद्घटजन्यजन्यभिन्नः स्यात्
तृतीया यथा घटोऽयं यद्येतद्घट
वृत्ति वृत्तिः स्यात् तदा तेनोप
लभेत इति इति तर्कशास्त्रे।
चक्रकारकं क्ली व्याघ्रनखं।
नामगंध द्रव्यं इत्यमरः ॥
चक्रकुल्या स्त्री चित्रपर्णीक्षु
कुलिया इति भाषा इति
शब्दचंद्रिका ॥

चक्रगजः पुं चक्रमर्द्दवृक्षः इति
राजनिर्घंटः ॥ (ते
चक्रगेंडुः पुं वर्तुलाकारोपधा
गोलबालिश इति गोलबालिश
इति च भाषा इति चतुरस्रार्थे
हेमचंद्रः ॥
चक्रगच्छः पुं अशोकवृक्षः
इति शब्दचंद्रिका ॥
चक्रजीवकः पुं कुंभकारः इति
हेमचंद्रः ॥
चक्रदंष्ट्रः पुं शूकरः इति
राजनिर्घंटः ॥
चक्रदंती स्त्री दंती वृक्षः इति
राजनिर्घंटः ॥
राजनिर्घंटः ॥
चक्रधरः पुं विष्णुः सर्पः ॥
ग्रामजालिनि त्रि इति मेदिनी
चक्रनखः पुं व्याघ्रनखनामगं
धद्रव्यं इति राजनिर्घंटः ॥
चक्रनामा न पुं माक्षिकधातुः इति
हेमचंद्रः ॥
चक्रनायकः पुं व्याघ्रनखः इति
राजनिर्घंटः (त्तः
चक्रपभाटः पुं चक्रमर्द्दकवृ
इति शब्दरत्नावली
चक्रपरिव्याधः पुं ॥
आरग्वध वृक्षः ॥

इति वैद्यके ॥
चक्रपर्णी स्त्री चक्रकुल्यालता
शब्दचंद्रिका ॥
चक्रपाणिः पुं विष्णुः इत्यमरः
चक्रपादः पुं रथः हस्ती ॥
इत्यजयपालः ॥ (का
चक्रपुष्करिणी स्त्री मणिकर्णि
काशीखंडे ॥
चक्रफलं क्ली अस्त्रविशेषः
पर्य्यायः अट्टने २ इति ॥
त्रिकांडशेषः ॥
चक्रबांधवः पुं सूर्यः इति
हेमचंद्रः ॥
चक्रभृत् पुं विष्णुः इति हेमचंद्रः
चक्रभेदिनी स्त्री रात्रिः इति
त्रिकांडशेषः ॥
चक्रमंडली पुं अजगरसर्पः
इति हेमचंद्रः ॥ (केंदिया
चक्रमर्द्दः पुं वृक्षविशेषः चा
इति भाषा तत्पर्य्यायः एडगजः
२ अडगजः ३ गजाख्यः ४ मेषकृ
यः ५ पडहस्ती ६ आवर्त्तकः ७
चक्रगजः ८ चक्री ९ पुन्नाटः १०
पुन्नाडः ११ विमर्द्दकः १२ दद्रुघ्नः
१३ तर्द्दटः १४ चक्राह्वः १५
शुकनाशनः १६ दृढबीजः १७

प्रपुन्नाडः १८ खर्जूघ्नः १९ इति
राजनिर्घंटः चक्रमर्द्दकः २०
पद्माटः २१ उरणाख्यः २२
इत्यमरः प्रपुन्नडः २३ प्रपुनाडः
२४ उरणाक्षः २५ इति तट्टीका
अस्य गुणाः कटुत्वं तीव्रत्वं ॥
मेदो वात कफ व्रण कंडू कुष्ट दद्रु
पामादि दोष नाशित्वंच इति
राजनिर्घंटः लघुत्वं स्वादुत्वं
रूक्षत्वं पित्तश्वासकृमिनाशित्वं
लघुत्वं हिमत्वंच तत्फलगुणाः
उष्णता कुष्ट कंडू दद्रु विषानिल
गुल्मकास कृमि श्वासनाशित्वं
कटुत्वंच इति भावप्रकाशः
चक्रमर्द्दकः पुं चक्रमर्द्दः इत्यमरः
चक्रयानं क्ली रथादि चक्रयुक्तयानं
इत्यमरटीकायां रायमुकुटादयः
चक्ररदः पुं शूकरः इति ॥
त्रिकांड शेषः ॥
चक्रलताम्रः पुं बहुरसालवृक्षः
इति राजनिर्घंटः ॥
चक्रलक्षणा स्त्री गुडूची इति
रत्नमाला ॥
चक्रला स्त्री उच्चटा इत्यमरः
चक्रवर्त्तिनी स्त्री जनीनामगंधद्रव्ये
इत्यमरः अलक्तकः ॥



इतिराजनिर्घंटः ॥

चक्रवर्त्ती पुं समुद्रपरिवृतायाः सर्वभूमरीश्वरः तत्पर्य्यायः। सार्वभौमः २ इत्यमरः ॥ वास्तूके इतिराजनिर्घंटः ॥

चक्रवाकः पुं स्त्रीपक्षिविशेषः चकाचकि इति भाषा तत्पर्य्यायः कोकः २ चक्रः ३ रथांगाह्वय नामकः ४ इत्यमरः भूरिप्रेमा ५ द्वंद्वचारी ६ सहायः ७ कांतः ८ कामी ९ रात्रिविश्लेषगामी १० रामावल्लाजायमः ११ कामुकः १२ अस्यमांसगुणाः लघुत्वं। स्निग्धत्वं बलप्रदत्वंच इति। राजनिर्घंटः ॥

चक्रवाटः पुं क्रियारोहः पर्य्यंतः शिखातरुः इति मेदिनी चक्रवाडं क्ली चक्रवाले इत्यमरटीकायां भरतः पर्वतविशेषः पुं इति मेदिनी चक्रवातः पुं भ्रमिवातः घूर्ण वातास्य इति भाषा तत्पर्य्यायः वात्या २ यथादैत्यो नाम्ना। तृणावर्त्तः कंसभृत्यः प्रचोदितः चक्रवातस्वरूपेण जहारासीन मर्भकं तृणावर्त्तः पोंतरथी ॥ वात्यारूप धरो हरन् इति श्रीभागवते ॥ (परिणते

चक्रवालं क्ली मंडलाकारेण समूहमात्रे मंडलाकारो दिक समूहः इति माधवी इति भरतः तत्पर्य्यायः मंडलं २ इत्यमरः ॥ (वंतः

चक्रवालः पुं लोकालोकप इत्यमरः ॥ (र्वते

चक्रवृद्धिः स्त्री यत्रवृद्धिरूपे हातमपाकोऽधमर्णः स वृद्धि कमिदं दास्यामीति स्वीकरोति तत्रयावृद्धिः सा तदेव तद इति भाषा यथा वृद्धेरपि पुनर्वृद्धि चक्रवृद्धिरुदाहृता इति नारदः

चक्रव्यूहः पुं युद्धार्थमंडलाकारेण सैन्यरचना इति द्रोणपर्व चक्रशा ल्या स्त्री काकतुंडी श्वेतगुंजा इति राजनिर्घंटः चक्रश्रेणी स्त्री अजशृंगी वृक्षः इति रत्नमाला चक्रसंज्ञं क्ली वंगं इति हेमचंद्रः

चक्रसंवरः पुं बुद्धभेदः तत पर्य्यायः हेरंबः २ हेरुकः ३ देवः ४ वज्रकपाली ५ निसुंभी ६ प्राप्तिप्रोषखरः ७ वज्रटीकः ८

इतित्रिकांडशेषः ॥ (शृंगी

चक्रा स्त्री नागरमुस्ता कर्कट इति राज निर्घंटः ॥ (हं

चक्रांकी स्त्री हंसी हंसी इति शब्दरत्नावली चक्राकीच पाठः।

चक्रांगः पुं स्त्री हंसः इत्यमरः चक्रमंगमस्येति व्युत्पत्यारथोऽपि ॥

चक्रांगा स्त्री सुदर्शनालता इति रत्न माला ॥

चक्रांगी स्त्री कटुरोहिणी इति मेदिनी हंसी इति शब्दरत्नावली हिलमोचिका ॥ इति त्रिकांडशेषः ॥ मंजिष्ठावृषपर्णी इति राजनिर्घंटः कर्कटशृंगी इति रत्न माला ॥

चक्राटः पुं विषवैद्यः धूर्तः दीनारः इति मेदिनी ॥ (कृतः

चक्राणः त्रि कृतवान् कर्मवाच्य भाववाच्य क्ली कृतं इति मुग्धबोधव्याकरणे तट्टीकाच

चक्राधिवासी पुं नागरंगवृक्षः इति त्रिकांडशेषः ॥

चक्रावर्त्तः पुं घूर्णने इति हेमचंद्रः ॥

चक्राह्वः पुं चक्रमर्द्दः इति राजनिर्घंटः ॥

चक्रिः पुं कर्त्ता इतिमुग्धबोधं

चक्रिका स्त्री जानु इति ॥ राजनिर्घंटः ॥

चक्री पुं विष्णुः ग्रामजालिकः चक्रवाकः कुलालः सर्पः सूचकः इति विश्वमेदिन्यौ अजः तैलिकभेदः इति ॥ शब्द रत्नावली चक्रवर्त्ती इति हेमचंद्रः चक्रमर्द्दः तिनिशः व्यालनखः काकः खरः इति राजनिर्घंटः चक्रविशिष्टे त्रि

चक्रीवान् पुं स्त्री गर्द्दभः इत्यमरः राजविशेषः इति सिद्धांत कौमुदी ॥

चक्रुः पुं कर्त्ता इति सिद्धांत कौमुद्या मुणादि वृत्तिः ॥

चक्रेश्वरी स्त्री जिनानां विद्यादेवी विशेषः इति हेमचंद्रः वचनच्यातने इति कविकल्पद्रुमः

चंक्रं क्ली यानमात्रे तत्पर्य्यायः घोरणं २ इति त्रिकांडशेषः

चंक्रः पुं रथः हस्तः इति मेदिनी ॥

चंक्रमणं क्ली पुनः पुनर्भ्रमणं अतिशय भ्रमणं इति व्याकरणे




अनति देहपीडाकारक चञ्चु-
मत्स्यगुणाः आमवातमेधाग्नि-
दीपनद्धिकारित्वं सदोपानद्धहित
यारचञ्चमत्स्यगुणाः अनारोग्यत्वं
अनायुष्यत्वं इन्द्रियदृष्टिनाशित्वं
च इति राजवल्लभः ॥
चञ्चः त्रि शोभनः दक्षः इति
मेदिनी ॥
चञ्चण्डा स्त्री फललताविशेषः
चिचिण्डा इति भाषा तत्पर्य्यायः ॥
श्वेतकूलः २ श्वेतराजी ३ हस्त-
फलः ४ अस्या गुणाः पटोल-
गुणात् किञ्चिन्न्यूनत्वविशेषात्
शोषिणो हितत्वञ्च इति मदन-
विनोदः ॥
चञ्चरी स्त्री पुं भ्रमरी यथा।
करीचरी भरीति चेदिप्पी ॥
चरीभ्रमरीति कां स्त्रियः चरी
करीति चेन्न चञ्चुरीति चञ्चरी
इत्युद्भटः ॥
चञ्चरीकः पुं भ्रमरः इति
त्रिकाण्डशेषः ॥

चपले ९ चटुले १० इति
तट्टीका वायौ पुं इति मेदिनी।
चञ्चला स्त्री लक्ष्मीः विद्युत् इति
मेदिनी पिप्पली इति ॥
शब्दचन्द्रिका ॥
चञ्चा स्त्री नलनिर्मितावायव इति
भाषा तृणनिर्मितपुरुषः इति
मेदिनी ॥
चञ्चुः पुं गोनाडीचः सतनाडीच
शाकः एरण्डहस्तः इति ॥
मेदिनी मृगः इति शब्दरत्नावली
रक्तैरण्डः लघुचञ्चु हस्तः इति
राजनिर्घण्टः ॥
चञ्चुः स्त्री पक्षिणामोष्ठः पाखि
ठोंट इति भाषा तत्पर्य्यायः ॥
त्रोटिः २ इत्यमरः चञ्चूः ३
त्रोटी ४ चञ्चुका ५ इति
शब्दरत्नावली सृपाटिका ६ इति
हेमचन्द्रः पत्रशाकविशेषः
तत्पर्य्यायः विजला २ चञ्चूः ३
कलम्भी ४ चीरपत्रिका ५ चञ्चुरः ६
चञ्चुपत्रः ७ सुशाकः ८ क्षेत्रसम्भवः

चञ्चलं त्रि अस्थिरं तत्पर्य्यायः ९ अस्या गुणाः मधुरत्वं तीक्ष्णत्वं
चलनं २ कम्पनं ३ कम्प्रं ४ चलं ५ कषायत्वं मल शोधनत्वं ॥
लोलं ६ चलाचलं ७ तरलं ८ गुल्मोदर विबन्धार्शो ग्रहणी
पारिप्लवं ९ परिप्लवं १० इत्यमरः नाशित्वञ्च तस्या बीजस्य गुणाः

कटुत्वं उष्णत्वं गुल्मशूलोदर
रोग विषत्वग्दोष कण्डूखर्ज्जू ॥
कुष्ठनाशित्वञ्च इति राजनिर्घण्टः
चञ्चुका स्त्री चञ्चुः पक्षिमोष्ठः इति
शब्दरत्नावली ॥
चञ्चुपत्रः पुं चञ्चुशाकः इति।
राजनिर्घण्टः ॥
चञ्चुभृत् पुं स्त्री पक्षी इति
त्रिकाण्डशेषः ॥
चञ्चुमान् पुं स्त्री पक्षी इति।
हारावली ॥
चञ्चुरः पुं चञ्चुशाकः इति
राजनिर्घण्टः ॥ (तत्र
चञ्चुसूचिः पुं स्त्री कारण्डवपक्षी
पर्य्यायः सुगृहः २ पीततुण्डः ३
इति त्रिकाण्डशेषः मकूलः ४
चञ्चुसूचिकः ५ इति हेमचन्द्रः
चञ्चुसूचिकः पुं स्त्री चञ्चुसूचिप
क्षी इति हेमचन्द्रः ॥
चञ्चूः स्त्री चञ्चु इति हेमचन्द्रः
चटभेदे इति कविकल्पद्रुमः
चटक वधे भेदे इति।
कविकल्पद्रुमः ॥
चटकः पुं स्त्री पक्षिविशेषः
चड इति भाषा तत्पर्य्यायः ॥
कलविङ्कः २ इत्यमरः

चित्रपृष्ठः ३ गृहनीडः ४ वृषायणः
इति हारावली कामुकः ६
नीलकण्ठः ७ तन्मांसगुणाः ॥
शीतत्वं लघुत्वं शुक्रबलप्रदत्वञ्च
तद्वदारण्य चटके तक्कफलघु।
पथ्यदे इति राजनिर्घण्टः ॥
चटकका स्त्री चटका इति।
मुग्धबोधव्याकरणे ॥
चटका स्त्री चटकपत्नी चटकस्यापत्ये
चटी इति भाषा इत्यमरः ॥
पिप्पलीमूले इत्यमरटीकायां
नारायणचक्रवर्त्ती श्यामापक्षी
इति राजनिर्घण्टः ॥
चटकाशिरः क्ली पिप्पलीमूले
इति हेमचन्द्रः ॥
चटकिका स्त्री चटका इति ॥
मुग्धबोधव्याकरणे ॥
चटिका स्त्री पिप्पलीमूले चटका
इति हलायुधः ॥
चटिकाशिरः क्ली पिप्पलीमूले
इत्यमरः ॥
चटकाशिरः पुं पिप्पलीमूले
इत्यमरटीकायां भरतः ॥
चटुः पुं प्रियवाक्ये उदरे ॥
व्रतिनामासनभेदः इति मेदिनी
प्रियभाषणे क्लीवलिङ्गोऽपि



इति संक्षिप्तसारे उणादि वृत्तिः।
चेचुलः त्रि चेचलः इति हेमचन्द्रः
हेदरः इत्युणादि कोषः ॥
चड़ला स्त्री विद्युत् इति जटाधरः
चड़लोलः त्रि चाड़लोलः स्वेच्छलः
इति हारावली ॥ (मः
चड इ उ रोषे इति कविकल्पद्रु
चड ईक रोषे इति कविकल्पद्रुमः
चण मदाने इति कविकल्पद्रुमः
चण मि गतौ हिंसे इति
कविकल्पद्रुमः ॥
चण शाठे इति कविकल्प द्रुमः
चणकः पुं मुनिविशेषः इति
शब्दरत्नावली शस्यविशेषः
चणावुट क्षौला इतिच भाषा
तत्पर्य्यायः हरिमंथकः २
इत्यमरः हरिमन्थजः ३ इति
तट्टीका चणः ४ हरिमंथः ५
सुगंधः ६ कृष्णचंचुकः ७ वालभोज्यः
८ वाजिभक्षः ९ कंचुकी १० ॥
अस्यगुणाः मधुरत्वं रूक्षत्वं।
मेहवातरक्तपित्त नाशित्वं ॥
दीपनत्वं वर्णबलरुच्य ध्मान
कारित्वंच आमस्य
तस्यगुणाः ॥
शीतलत्वं रुच्यत्वं संतर्पणत्वं
दाहतृष्णाश्मरीशोषनाशित्वं
गौल्यत्वं कषायत्वं ईषत्कफ
वीर्य्यकारित्वंच भृष्टस्य ॥
तस्यगुणाः रुच्यत्वं वात ॥
नाशित्वं रक्तदोषकारित्वं ॥
उष्णवीर्य्यत्वं लघुत्वं स्वेदशैत्य
हरत्वंच तस्ययूषस्य गुणाः।
मधुरत्वं कषायत्वं कफ वात
विकारश्वासोर्द्ध्वकासक्लमपीनस
नाशित्वं वलदीपनत्वंच ॥
प्रातस्तज्जल पान गुणाः चंद्र।
मरीचिवत् शीतलत्वंपित्तरोग
नाशित्वं पुष्टिप्रदत्वं पाके।
तैजगुणत्वं संतर्पणत्वं मंजुलत्वं
मधुरत्वंच इति राजनिर्घंटः॥
तस्य आर्द्रभृष्टस्य गुणाः ॥
वलकारित्वं रोचनत्वंच ॥
स्विन्नस्य तस्य गुणाः पित्तकफ
नाशित्वं तत्सूपः क्षोभकरः
तस्य शाकस्य गुणाः रुच्यत्वं।
दुर्जरत्वं कफवातकारित्वं।
अम्लत्वं विष्टंभजनकत्वं पित्त
दन्तशोफ नाशित्वंच इति॥
भाव प्रकाशः ॥
चणकात्मजः पुं
वात्स्यायन मुनि ॥
इति हेम चंद्रः ॥ (तस्य
चणकाम्लकं क्ली चणकलवणं

गुणाः अत्यम्लत्वं दीपनत्वं ॥
दंतहर्षणत्वं लवणानुरसत्वं रु
च्यत्वं शूलाऽजीर्णविबंधनाशि
त्वंच इति भावप्रकाशः ॥
चणकाम्लवाः क्ली तत्क्षेत्रस्थफल
वस्त्रणकपत्रशिशिरवारि इति श
ब्दावली चणद्रुमः पुं क्षुद्रगोक्षुरः
इति राजनिर्घंटः चणीद्रुमोपि
पाठः चणपत्री स्त्री रुदंतीवृक्षः
राज निर्घंटः ॥
चणिका स्त्री तृणविशेषःतत्
पर्य्यायः गोडुम्बा १ सुनीला २
तेत्रजा ३ हिमा ४ अस्या गुणाः।
वीजेहर्षत्वं वलत्वं अतिमधुरत्वंच
तृणैः पशुहितत्वं इति
राज निर्घंटः ॥ (ली
चेडं क्ली तीक्ष्णं इति शब्दरत्नाव
चेडः पुं तितिडीवृक्षः धर्मकिंकरः
दैत्यविशेषः इति मेदिनी ॥
चेडः त्रि अत्यंतकोपनः ॥
इत्यमरः तीक्ष्णता विशिष्टः इति
शब्दरत्नावली ॥
चेडता स्त्री उग्रता इति हेमचंद्रः
चेडनायिका स्त्री दुर्गा इति।
शब्दरत्नावली अष्टनायिकांतर्ग
तनायिकाविशेषः तस्याध्याने
यथा चेडनायिका नीलवर्णा
षोडशभुजा कपाले खटके ॥
चेटोदर्पणेच धनुर्ध्वजेपाशेच
शोभनो शक्तिं वामहस्तेन
विभ्रती मुद्गरं शूलवज्रेच
खड्गंचैव तथांकुशं शरं चक्रं
शलाकांच दक्षिणेन विभ्रती
इति देवीपुराणोक्त दुर्गोत्सव
पद्धतिः ॥
चेडरुद्रिका स्त्री विद्याविशेषः
इति शब्दरत्नावली ॥
चेडवती स्त्री दुर्गा इति
शब्द रत्ना वली अष्टनायिकांतर्गत
नायिकाविशेषः अस्या ध्याने
यथा चेडवती धूम्रवर्णा षोडश
भुजामित्यादि शेषं चेडनायिका
ध्यानवत् इति देवीपुराणोक्त
दुर्गोत्सव पद्धतिः ॥ (यिका
चेडा स्त्री अष्टनायिकांतर्गतना
विशेषः अस्या ध्याने यथा॥
चेडाम्बुजवर्णा षोडशभुजा
मित्यादि शेषं चेडनायिका
ध्यानवत् इति देवीपुराणोक्त।
दुर्गोत्सव पद्धतिः जिनानां॥
शासन देवता विशेषः इति
हेमचंद्रः चौरनाम गंधद्रव्यं ॥



इत्यमरः श्वेतपुष्पी इति मेदिनी
लिंगिनीलता कपिकच्छुः आखु
कर्णी श्वेतदूर्वा इति राजनिर्घण्टः
नदीविशेषः इति शब्दरत्नावली
वेडांशुः पुं सूर्यः यथा
वेडांशोर्निशाकाकयारघुपते इति
वेडोऽयमुज्जृम्भते
महानाटके ॥
वेडातः पुं करवीरः इत्यमरः ॥
वेडातकं क्ली अर्द्धोरुकं वासीणां
मर्द्धोरु पर्य्यन्तं वासः इत्यमरः
पुंस्काण्डेयोयालिन शब्दात्
पुंल्लिंगो ऽपि ॥ ...षः
वेडालः पुं वर्णसंकरजातिविशेषः
चाण्डाल इति भाषा सतु ब्राह्मण्यां
गर्भशूद्रात् जातः इति ।
पर्य्यायपद्धतिः तत्पर्यायः ।
प्लवः ३ मातंगः ४ दिवाकीर्त्तिः ५
जनंगमः ६ निषादः ७ श्वपचः ८
अन्तेवासी ९ चाण्डालः १० पुक्कसः
११ इत्यमरः जनंगमः १२ ॥
निषादः १३ श्वपच १४ पुक्कशः १५
पुक्कषः १६ नष्टीका ॥
निष्कः १७ इतित्रिकाण्डशेषः ॥
तस्याकृतिर्यथा अथ राज्ञो ॥
त्थनीतायांतस्याराज्ञाभूवह ॥

वेडालदर्शनो राम सप एव
डूराकृतिः नील पीताम्बरधरो
रक्तांबर कृतोत्तरः संरब्धताम्र
नेत्रांतःकरालोहरिपिंगलः
कृत चर्म्मनिवासीच लौहाभरण
भूषितः इति रामायणे ॥
श्मशानं वेडालस्य निवासकर्मादि
यथा वेडालमुपचानीतं बहि
ग्रामात् प्रतिश्रयः अपपात्राश्च
कर्त्तव्यावधनं मेषाम्च गर्द्दभं
वासांसि मृतचेलानि भिन्नभाण्डेषु
भोजनं कार्ष्णायसमलंकारः
परिव्रज्याच नित्यशः नैतैः
समयमन्विछेत् पुरुषो धर्म्म
माचरन् व्यवहारोमिथस्तेषां
विवाहः सदृशैः सह अन्नमेषां
पराधीनं देयस्याद्भिन्नभाजने
रात्रौ न विचरेयुस्ते ग्रामेषु ॥
नगरेषुच दिवाचरेयुः कार्य्यार्थं
विज्ञिता राजशासनैः अबांधवं
शवंचैव निर्हरेयुरिति स्थितिः
वध्याश्च हन्युः सततं यथाशास्त्रं
नृपाज्ञया वध्यवासांसि गृह्णीयुः
शय्याश्चाभरणानि च इति मनुः
क्रूरकर्म्मा इति संक्षिप्तसारे ॥
उणादि वृत्तिः ॥

वेडालकंदः पुं कंदविशेषः
तस्य गुणाः मधुरत्वं कफ
पित्तास्रदोष विषभूतादिदोष
नाशित्वं रसायनत्वंच तस्य भेदाः
एकपत्रः द्विपत्रः त्रिपत्रः चतुष्पत्रः
पंचपत्रः इति राजनिर्घण्टः ॥
वेडालवल्लकी स्त्री वेडालवीणा
इत्यमरः अस्याः पर्य्यायः वेडाल
वीणा शब्दे द्रष्टव्यः ॥
वेडालिका स्त्री वेडालवल्लकी
उमानृषधीभेदः इति
मेदिनीकर हेम वेड्डौ ॥
वेडिः स्त्री चेडी इत्यमरटीकायां
भरतः ॥
चेडिका स्त्री दुर्गा इत्यमरः ॥
चेडिलः पुं रुद्रः नापितः ॥
वाल्हूकं इति हेमचेद्रः ॥
चेडिला स्त्री नदीभेदः इत्युणादि
कोषः ॥
चेडी स्त्री दुर्गा हिंसाकोपना ॥
इति मेदिनी अस्या रूपांतराणि
चेडिः चेडा चेडिका इत्यमर ॥
टीकायां भरतः मार्कंडेय ॥
पुराणोक्त देवीमाहात्म्यं तस्य
पारक्रमोयथा अर्गले कील
कंचादौ पठित्वा कवचं पठेत् ।

जपेत् सप्तशती पश्चात् क्रम
एषशिवोदितः अर्गलं दुरितं
हंति कीलकं फलदं तथा कवचं
रक्षयेन्नित्यं चेडिका त्रितयं तथा
इति तंत्रे अपिच नारायणं
नमस्कृत्य नरंचैव नरोत्तमं
देवीं सरस्वतीं व्यासं ततो जय
मुदीरयेत् आदौ च प्रणवं जप्त्वा
स्तोत्रं वासे हितो पठेत् ॥
अंतेच प्रणवं दद्यादित्युवाचादि
पूरुषः सर्वत्र पाठे विज्ञेयो ॥
त्वन्यथा विफलं भवेत् अुद्देना
ऽन्यचित्तेन पठितव्यं प्रयत्नतः
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य
वाचनं आधारे स्थापयित्वातु
पुस्तकं वाचयेत् सुधीः हस्त
संस्थापनादेव यस्मादल्पफलं
लभेत् स्वयंच लिखितं यत्तु ।
कृतिना लिखितं न यत्
अब्राह्मणेन लिखितं तच्चापि
विफलं भवेत् ऋषि छंदादिकं
न्यस्य पठेत् स्तोत्रं विचक्षणः
स्तोत्रेन हूयते यत्र प्रणवन्यास
माचरेत् संकल्पिते स्तोत्र पाठे
संख्यां कृत्वा पठेत् सुधीः अध्याये
प्राप्य विरमेन्न तु मध्ये कदाचन ।



कृतेविरामे मयेतत्स्रव्यापार्दि ।
पठेन्नरः ब्राह्मणे वाचके विप्रा
ह्मान्य वर्णिज मादरात कृत्वान्य
वनज्ञाद्राजनवाचकान्नरकंव्रजेत
देवाच्चीमयतः कृत्वाब्राह्मणेनो
विशेषतः श्रेयेच शिथिले ।
कुर्याद्वाचकः कुरुनंदन पुत्र
र्वश्रीततत सूत्रं नमुक्त्वाधारयेत
क्वचित विस्पष्ट मद्रुते शोते ॥
स्पष्टाक्षरं पदेत यो कलस्वर ॥
समायुक्तं रस भाव समन्विते ।
वुध्यमानः सदर्थं वैयेथार्थ ॥
कृत्वशोन्नयब्राह्मणादिषुसर्वेषु
ग्रंथार्थं चार्थयेन्नृप यएवं वाचये
द्वैपन सविप्रो व्यास उच्यते ॥
सप्तस्वरसमायुक्ते कालेकाले
विष्णुस्पते प्रदर्शयन रसान ॥
सर्वान वाचयेद्वाचको नृप ।
तस्य फलं यथा चंडी पाठ ॥
फलं देवि शृणुष्व गदतो मम
एकाहस्यादि पाठानो यथावत
कथायामिते संकल्प पूर्वं ॥
संपूज्य न्यस्यांगेषु मनून्सकृत
पाठाद्दलि प्रदानाद्धि सिद्धि ।
माप्नोति मानवः उपसर्गस्य
शांत्यर्थं त्रिपाठं पठेन्नरः ॥

ग्रहोपघातेषु कर्तव्यं पंचा हुते ॥
वरानने महाभये समुत्पन्ने ॥
सप्ताहृत्तं समुच्चयेत नवाहृत्या
भवेच्छान्ति र्वाजपेय फलं लभेत
राजवश्याय भूत्यै वरुद्रा हृते
मुदीरयेत स्रकाहृत्य काम्या ॥
सिद्धिर्वै हानिश्च जायते ॥
मन्वाहृत्यारिपुर्वशपलस्याऽसीवशमा
त्रियात सौख्यं पंचदशाहृत्य
श्रियमाप्नोति मानवः कलाहृत्या
पुत्रपौत्रधन धान्या गमं ॥
विदुः राज्ञो भीति विमोक्षाय ॥
वैरस्योच्चाटनायच कुर्यात ॥
सप्तदशावृत्तेनयाष्टादशकेप्रिये
महाव्रण विमोक्षाय त्रिंशावृत्ति
पठेत सुधीः पंचविंशावर्त्तेनात
भवेद्वंध विमोक्षणं संकटे ॥
समनुप्राप्ते दुश्चिकित्स्यामयेतथा
जातिध्वंसे कुलोच्छेदे आयुषो
नाशमागते वैरिवृद्धौ व्याधि ॥
वृद्धौ धननाशे तथात्तयेतथैव
त्रिविधोत्पाते तथाचैवाति
पातके कुर्याद्यत्नात शताहृत्तिं
ततः संपद्यते शुभे श्रियोवृद्धिः
शताहृत्या द्राज्य वृद्धिस्तथापरे
मनसा चिंतितं देवि सिद्धे दष्टो

त्राच्छतात शताश्वमेधयज्ञानां
फलमाप्नोति सत्यंते सहस्रावर्त
नाल्लक्ष्मी सहृणोति स्वयंस्थिरा
भुक्त्वा मनोरथान कामान नरो
मोक्षमवाप्नुयात यथाश्वमेधः
क्रतुराट् देवानांच यथा हरिः
स्तवानामपि सर्वेषां तथासप्तशती
स्तवः अथवा बहुनोक्तेन किमेतेन
वरानने चंड्याः शताहृत्त पाठात
सर्वाः सिध्यंति सिद्धयः इति
तिथ्यादितत्वे अथ प्रथम ॥
चरितस्य ब्रह्मर्षिर्महाकालीदेवता
गायत्रीछंदो नंदाशक्ती रक्त
दंतिकाबीज मग्निस्तत्वं तत्र
महाकाल्याध्याने यथादशवक्त्रा
दशभुजा दशपादांजन प्रभा
विशालया राजमाना त्रिंशल्लोचन
मालयास्फुरद्दशन दंष्ट्रा भा ॥
भीमरूपा भयंकरी खड्गशूल
गदाबाणातोमरंच भुशुंडि भृत
परिघंकार्मुकं शीर्षं निश्च्योत
तद्रुधिरं दधौ मधुकैटभयो ॥
युद्धेध्येयासा तामसी शिवा
मध्यम चरितस्य विष्णु ॥
ऋषिर्महा लक्ष्मी ॥
अनुष्टुप छंदः ॥
शाकंबरीशक्ति दुर्गा बीजं ॥

सूर्यस्तत्वं तत्र महालक्ष्याध्याने
यथाश्वेताननानीलभुजासुश्वेत
स्तनमंडला रक्तमध्या रक्तदेहा ।
स्थूलजंघारु तालुका विशाल
लेपना कांता सर्वसौभाग्य ॥
शालिनी अष्टादशभुजापूज्यासा
सहस्रभुजा रणे आयुधान्यत्र
वक्ष्यंते दक्षिणाधः करक्रमात
अक्षमालाच कमलं बाणासि
कुलिशं गदां चक्रं त्रिशूलं ।
परशुं शंखघंटेच पाशकं ॥
शक्तिं दंडं चर्मचापं पानपात्रं ।
कमंडलुं अलंकृत भुजा पद्मे
रायुधैः परमेश्वरी स्मर्तव्या ॥
स्तुतिकालादौ महिषासुरमर्दिनी
ध्येयाराजसी मूर्तिः सर्व देव
मयीमता यो ध्यात्वा मानवो
नित्यं लभेतेप्सित मात्मनः ॥
उत्तरचरितस्य रुद्रऋषिः सरस्वती
देवता उष्णिक छंदो भीमाशक्ति
भ्रामरीबीजं वायुस्तत्वं तत्र सर
स्वत्याध्याने यथागौरी देह ॥
समुत्पन्नाया सत्वैकगुणाश्रया
साक्षात सरस्वती प्रोक्ता ॥
शुंभासुर निसूदनी ॥
दधौवाष्ट भुजा बाणं ॥
मुषलं शूल चक्रकं ॥



प्रोक्तश्चेटाह्वले चैव कार्मुके चतुष्पा
दे । श्वेतामालतिकाला दौ
वयेषुभनिसुभयोः इति
कात्यायनी तंत्रे ॥
चंडीकुसुमः पुं रक्तकरवीरवृक्षः
इति राजनिर्घण्टः ॥
चेडुः पुं डुंडुभः इति शब्दचंद्रिका
चतयन्ना यावे इति कविकल्पद्रुमः
चतस्रः त्रि चतुःसंख्याविशिष्टाः
इति व्याकरणे चतुःशब्दस्य ।
स्त्रीलिंगे बहुवचनांतरूपोऽयं
पुंसि चत्वारः क्लीबे चत्वारि
चतुःश्च चतुर्वारं इति व्याकरणे
चतुःपत्री स्त्री क्षुद्रपाषाणभेदी
इति राजनिर्घण्टः ॥
चतुःपर्णी स्त्री क्षुद्राम्लिका इति
राजनिर्घण्टः ॥
चतुःपला स्त्री नागवला इति
राजनिर्घण्टः ॥
चतुःपुण्ड्रः पुं सिंहाह्वस्तः इति
राजनिर्घण्टः ॥
चतुःशालं क्ली स्त्री ॥
यां पराभि ॥ (उ
मुखगृहं चतुःशालकमिलनं वा
इति भाषा इत्यमरः ॥ (इति
चतुःशालकं क्ली चतुःशाले
शब्दरत्नावली ॥

चतुःषष्टि स्त्री चतुरधिकषष्टिसं
चौसट्ठि इति भाषा कलानाम्नी
उपविद्या ऋग्वेदः इति मेदिनी
चतुरः त्रि कार्यक्षमः निरालसः
तत्पर्यायः दक्षः २ पेशलः ३
पटुः ४ सूत्थानं ५ उष्णः ६
इत्यमरः पेशालः ७ पेषलः ८
इति तट्टीका निपुणः इति ॥
राजनिर्घण्टः तत्स्य लक्षणं यथा
वाक्चेष्टा सौगंध्य समागमः तत्र
वचनसौगंध्य समागमो यथा तमो
जटाले हरिदंतराले काले
निष्पाया त्वव निर्गतायाः तटे
नदीनां निकटे वनानां घटेत
प्राप्तोदारिकः सहायः चेष्टा
सौगंध्यसमागमो यथा कांते
कनकजंवीरं करे कमपि कुर्वति
स्मरात्र लिखिते भानौ विंदु मिंदु
मुखी ददौ इति रसमंजरी ॥
नेत्रगोचरः इति हेमचंद्रः
चतुरः पुं चक्रगंडः हस्तिशाला
इति हेमचंद्रः ॥
चतुरंग क्ली
हस्त्यश्वरथ पदाति
रूपं सैन्यं यथा चतुरंगे
स्थापिवले समहत प्रसहे मरि
इति रामायणे अरण्यकां ३ ॥

विशेषः चौरखेला इति भाषा
यथा युधिष्ठिर उवाच अष्ट
कोष्ठे च याक्रीडा तां मे ब्रूहि
तपोधन प्रकर्षेणैव मे नाथ
चतुराजी यतो भवेत् व्यास
उवाच अष्टकोष्ठान् समालिख्य
प्रदक्षिण क्रमेणतु अरुणं
पूर्वतः कृत्वा दक्षिणे हरिते
वले पार्थ पश्चिमतः पीतमुत्तरे
श्यामले वले राज्ञो वामे गजे
कुर्यात् तस्मादश्वं ततस्तरिं
कुर्यात् कौंतेय पुरतो युद्धे
पतिं चतुष्टये कोणे नौका ।
द्वितीये ऽश्व स्तृतीये तु गजो
वसेत् तुरीये च वसेद्राजा वटिकाः
पुरतः स्थिताः पंच केन
वटी राजा चतुष्के णैव कुंजरः
त्रिकेणतु चलत्यश्वः पार्थ नौ
काद्वयेन तु कोष्ठमेकं विलिख्य
श्च सर्वतो याति भूपतिः अग्रएव
वटी याति वले हंत्यग्र कोण गं
यथेष्टं कुंजरो याति वटरिव
मही पते ॥
तिर्यक् तुरंगमो ॥
याति लंघयित्वा त्रिकोष्ठकं ।
कोणकोष्ठद्वये लंघ्य व्रजेन्नौका
युधिष्ठिर सिंहासनेचतु ॥

राज्ञीं नृपा कृष्टेतु षट्पदं काककाष्ठे
हृद्गन्नौका नौकाकृष्ट प्राकारकं
चालाचाते वटी नौका ॥
वलं हंति युधिष्ठिर राज्ञा गजो
हयश्चापि तत्का चातेनिहंति च
अत्यंतेस्ववले रक्षेत स्वराजावल
मुत्तमे अल्पस्याद्रक्षया पार्थ
हंतव्यं वलमुत्तमे नौकायाश्च
त्वारि पदानि अश्वस्याष्टौ पदानि
इत्याधिका मम्बस्य मतंगजस्य
गर्वेण राज्ञाक्रीडेति निर्भरं ।
तस्मात्सर्व वलेदत्वा रक्षेत्कौंते
यकुंजरं सिंहासने चतुराजी
यदवस्थानतो भवेत् सर्वसैन्यो
र्गजैर्वापि रक्षितव्यामहीपतिः
अन्यद्राजपदं राज्ञा यदाक्रांता
युधिष्ठिर तदा सिंहासनं तस्य
मन्यते नृपसत्तम राज्ञाव
नृपतिं हत्वा कुर्यात् सिंहासने
यदा द्विगुणं वाहयेत् पणमन्य
थैकगुणं भवेत् द्विगुणोपणं
दातव्यत्वेन शापयेत मित्र
सिंहासने ॥
पार्थ यदा रोहति ॥
भूपतिः तदा सिंहासने नाम
सर्वं नयति तद्वलं यदा
॥ सिंहासने कर्त्ता राजा यष्ट

यदाश्रितः तदा चाते ऽपि
हतश्चो बलेनापि सरक्षितः
विद्यमाने नृपे यत्र स्ववीयेच।
नृपत्वयं प्राप्नोति च तदा तस्य
चतूराजी यदा भवेत् नृपेणैव
नृपं हत्वा चतूराजी यदा भवेत्
द्विगुणो वाहयेत् यणमन्यथैक
गुणं भवेत् स्वपदस्थो यदा राजा
राजानं हंति पार्थिव चतुरंगे।
तदा नृपवाहयेद्वा चतुर्गुणं यदा
सिंहासने काले चतूराजी समु
त्थिता चतूराजी भवत्येव न तत्
सिंहासनं नृप श्रेष्ठ देवीजं उभ
यथा जयेऽपि यत्सिंहासना
धिकारात् यत्राज वधेष्टोप्यथ
धिका निष्फलत्व दर्शनात्
क्रीडायामपि तथा कल्प्यते
राजद्वयं यदा हस्ते ममात्मनो
राजसंस्थिते येण
संहृत श्चैकोवलनाप्यपहार्यो
ते राजाद्वयं यदा हस्ते न तस्याद्दन्य
केऽपरः तदा राजा हि राजानं।
चातेऽपि तं हनिष्यति नृपाकृष्ट
यदा राजा न निष्यति युधिष्ठिर
चातावातेपि हतश्चो राजा तत्र
नरलकः कोणराजपदे ॥

त्यक्ता वटिकांते यदा व्रजेत्तत्वटी
नयेत् पदे नाम तदा कोष्ठवले
चषट्द यदि तस्य भवेत् पार्थिवत्
राजीच षट्पदे तदापिचचतूराजी
भवत्येव न संशयः यदातेः
षट्पदे विहि राज्ञावा हस्तिना
तथा षट्पदे नभवेत्तस्य अवशेष
मणुपार्थिव सप्तमे कोष्ठके
यास्याद्वटिका दशाकेन वै
तदान्योन्यं च हंतव्यो मुर्खव
दुर्बलेवले त्रिवटीकस्य कौंतेय
पुरुषस्य कदाचन षट्पदेन
भवेत्येव इति गौतम भाषितं
नौकैका वटिका यस्य।
विद्यते खेलने यदि गाढवटीति
विख्याता पदे तस्य न दुष्यति
गाढवात्यापदे राज पदे
कोणपदे च तत् हस्ते रंगे
बलेनास्ति काककाष्ठे तदा भवेत्
वदे निराशसाः सर्वेतस्य नस्ता
जयाजयो प्रार्थिते पंचमे।
राज्ञिमृत वशेच षट्पदे॥
अश्वोचे स्यात्तदा राजन्चलिता
वालितेपदे द्विराहत्यागतौ
तस्माद्दन्यात परावलंजयी पार्थ
सिंहासने काले काककाष्ठे

यदा भवेत् सिंहासने भवत्येव।
काककाष्ठेन भण्यते ॥
उपविष्टं च यत् स्थाने तस्योपरि
चतुष्टये नौका चतुष्टये यत्र
क्रियते यस्य नौकया नौका
चतुष्टये तत्र हहत्रौकेति भण्यते
न कुर्यादेकदा राजन्
राजस्याभिमुखं राजेयदिक
दीनधर्मज्ञ पापघ्नो भविष्य
तिस्थानाभावे यदा पार्थ हस्तिने
हस्तिसंमुखे करिष्यति तदा
राजस्त्विति गौतम भाषितं ॥
प्राप्ते राजद्वये राजन् हंतव्यो।
वामनो राजः इतितिथ्यादित
त्वे चतुरंगक्रीडने ॥
चतुरंगा स्त्री घोटिकाहस्तः इति
राजनिर्घण्टः ॥
चतुरंगिणी चतुरंगसेना इति
रामायणे ॥
चतुरंगुलः पुं आरग्वधवृक्षः
इत्यमरः चतुरंगुलिपरिमिते त्रि
चतुरस्रः त्रि चतुष्कोणः यथा
चतुरस्रे त्रिकोणे वा वर्तुले वाऽर्द्ध
चन्द्रके कर्त्तव्य मानपूर्वेण।
आलभ्यादिषु मंडले इत्याह्निक
तत्त्वे बौधायनः लग्नाच्चतुर्थाष्टम

लग्ने इति दीपिका ॥
चतुराननः पुं ब्रह्मा इत्यमरः
तस्य चतुराननत्वे कारणं यथा
तस्योत्सर्वाभोरुहकर्णिकाया
मवस्थितो लोकमपश्यमानः
परिक्रमन् व्योम्नि विवृत्तनेत्र
श्चत्वारि लेभेनुदिशं मुखानि
इति श्रीभागवते ॥ सहिते
चतुरूषणं क्ली पिप्पलीमूल
त्रिकटु यथा त्र्यूषणं सकणामूलं
कथितं चतुरूषणं व्योषस्येव
गुणाः प्रोक्ता अधिकाश्चतुरूषणे
इति भावप्रकाशः ॥
चतुर्गतिः पुं कच्छपः इति
हेमचन्द्रः ॥
चतुर्थः त्रि चतुर्णां पूरणः चौटा
इत्यादिभाषा इति मुग्धबोधे
चतुर्थांशः पुं चतुर्भागैकभागः
तत्पर्यायः तुरीयः २ पादः ३
इति राजनिर्घण्टः ॥
चतुर्थिका स्त्री पलपरिमाणे
इति वैद्यक परिभाषा ॥
चतुर्थी स्त्री तिथिविशेषः सा तु
चन्द्रस्य चतुर्थकलाक्रियारूपा
इति स्मृतिः तत्र जातस्य फलं
यथा सपुत्रमित्र प्रमदाप्रमोदी

हृताभिलाषी कृपया समेतः ॥
विवादशीलो विजयी विवादे ॥
भवेच्चतुर्थी प्रभवः कठोरः ॥
इति कोष्ठीप्रदीपः ॥
चतुर्द्दन्तः पुं ऐरावतहस्ती इति
हेमचन्द्रः ॥
चतुर्द्दश त्रि चतुरधिकादश्यावाद
इति भाषा इति ज्योतिषे ॥
पूरणार्थेऽप्रकारान्तोऽयं प्राह
तद्वाचकानि विद्याः १ यमः २
मनुः ३ इन्द्रः ४ भुवनं ५ अवतारके
६ इति कविकल्पलता ॥
चतुर्द्दशी स्त्री तिथिविशेषः ॥
सा तु चन्द्रस्य चतुर्द्दशकलाक्रिया
रूपा तत्पर्य्यायः भूता २ इति
तिथ्यादितत्त्वं तत्र जातस्य फलं
यथा विरुद्धशीलः पुरुषः सरोषः
क्रोरः कठोरः परवित्तकस्थायतात्र
भोक्ता परदारवित्तश्चतुर्द्दशी
चेत् जननस्य काले ॥ इति
कोष्ठीप्रदीपः मासविशेषे ॥
तत्र कर्म्माणि यथा ज्यैष्ठकृष्ण
चतुर्द्दश्यां स्त्रीकर्त्तृक सावित्र्यादि
देवता पूजा स्वामि पूजा च ॥
भाद्र शुक्लचतुर्द्दश्यां अनन्तपूजा
चतुर्द्दश्यां पिष्टभक्षणं ऽक।

वेधनेन कार्त्तिककृष्णचतुर्द्दश्यां
चतुर्द्दश शाक भक्षणं चतुर्द्दश
दीपदानं यम तर्पणं च ॥
अग्रहायण शुक्लचतुर्द्दश्यां गौरी
पूजा पाषाणाकार पिष्टकभक्षणं च
माघकृष्ण पक्षे रटन्त्याख्य चतु
र्द्दश्यां काली पूजा रुणोदयस्नानं च
फाल्गुनकृष्णपक्षे शिवरात्र्याख्य
चतुर्द्दश्यां मुपवासः शिवपूजा च
चैत्रशुक्लपक्षे मदनचतुर्द्दश्यां
मदनहेतु यत्नेन कामदेवपूजा
इति स्मृतिः ॥
चतुर्द्दोलं क्ली पुं स्वनामख्यात
यान विशेषः यथा राज्ञोयद्वि
पदे याने विशेषाख्यमलं विदुः
चतुर्भि रूह्यते यत्र चतुर्द्दोलं
तदुच्यते भोजस्य चतुर्भि ॥
वीरहकैर्द्दण्डैः षड्भिः कुंभैः
सुशोभितैः लंभैः रष्टाभि ॥
रुदितं चतुर्द्दोल मनुत्तमं ॥
तद्भेदा जयकल्याण वीरसिंह
यथाक्रमं चतुर्विधानां भूपानां
चतुर्द्दोलः प्रकाशितः त्रिहस्त
सम्मिता यामो द्विहस्तपरिणाह
वान् हस्त द्वयोन्नतः प्रोक्त
श्चतुर्द्दोलो जयाख्यया चतुर्हस्त

यतोयस्य सार्द्ध द्वे हस्तद्वयम्
चतुर्द्दोलः समाख्यातः कल्याण
स्तावदुन्नतः पंचहस्तायतोयस्य
त्रिहस्तपरिणाहवान् तावदेवो
न्नतोवीरश्चतुर्द्दोल उदाहृतः
आयाम परिणाहाभ्यां चतुर्हस्त
मितो ह्यियः चतुर्द्दोलो नायं।
सिंह हस्तदर्द्धेनोन्नतः शुभः ॥
सर्वोपि द्विविधः प्रोक्तः सच्छदिश्च
पि निश्छदिः स्मृतः समस्वर्णास्तु
परः केलिरचनात्यये सर्वेषां।
मेव काष्ठानां दण्डः स्याद्रजताश्मणः
वेदनेनैव चाटना सर्वेषां मुप
युज्यते लोमजं सर्ववस्त्रेषु।
कनकं सर्वधातुषु कुंभश्च ॥
पद्मकोषश्चगिरिश्चेति यथाक्रमं
त्रैदेष्णानां महीद्राणां चतु
र्द्दोलेषु विन्यसेत् दर्पणं ॥
वाई चन्द्रश्च हंसः केकी शुको
गजः सिंहश्चतस्याग्रे ॥
आदित्यादि दर्शनात् मणि
नियमस्तु दण्डवत् रक्तः शुक्ल
श्चपीतश्चकृष्णश्चित्रस्तथारुणः
नीलः कपिलइत्युक्तः पताकानां
तत्संग्रहः चतुर्द्दोलः सपताकः
स्तु भयानमिति स्मृतः मुक्ता।

स्तवैके द्दशाभि प्रोक्तः स्याद्ध्वज
केशानां चामरैर्द्दशाभि
दिग्जयिनोचतुर्द्दोलः चामपक्षस्य
पुष्कश्चैत सर्वोपरि परिन्यसेत्
यात्रासिद्धिर्येनास्माच्चतुर्द्दोला
महीभुजां स्तंभ कादर हितो।
निश्छदि रुक्तश्चतुर्द्दोलः माने
पूर्ववत् सपुनर्द्विविधः प्रोक्तः
सध्वजश्चाप निर्ध्वजः ध्वजानुबन्ध
न्यस्यतिषड्गीविजये खिणः तेषां
मानेतु चत्वारः स्वामिहस्तैकसंमिताः
कोणेषु पश्चादग्रेच हस्तद्वय
मितोध्वजो स्वर्णं रजतं
युग्मं त्रिविधानां महीभुजां
मणिचामर कुंभानां खड्गादीनां
विनिश्चयः चतुर्द्दोलध्वजेराज्ञां
विज्ञेयो नवदण्डवत् निर्ध्वजेच
॥ चतुर्द्दोल मान मन्यतमं शृणु
आयाम परिणाहाभ्यां चतुर्हस्त
मितो ह्यियः विजयोनाम विज्ञातं
श्चतुर्द्दोलो महीभुजां विजयो
मंगलो भव्यो वित स्तैकेक।
हि हितः त्रिविधानां महीद्राणां
यानत्रय मुदाहृतं अष्टाभि
रुह्यते यस्तु अष्टदोल मुशंति च
सोपान हितयेचात्र विज्ञेये

शिल्पिनिर्मिते ॥ भोजस्तु ॥
अष्टाभिर्बाहुकैर्दण्डैः षड्भिस्तु ॥
दशभिर्ध्वजैः स्तम्भैस्तु दशभि।
र्ज्ञेय महादोले मही भुजां।
तेन्द्रराजयकल्याण वीरसिंहा ॥
यथाक्रमं चतुर्विधानां भूपाना
महादोलाः प्रकाशिताः षड्विंहस्त
मितायामः परिणाहश्चतुर्भुजः।
चतुर्हस्तोन्नतो राज्ञां महादोले
जयेविडः आयाम परिणा।
स्याभ्यां पंच हस्त मितो हि यः ॥
कल्याणाख्योऽष्टदोलो पंचतुर्द
शमितोन्नतिः सप्त हस्ताश्च तः
कार्य्ये प्रवरे पंचहस्तकः ॥
पंचहस्तोन्नतो वीरमहादोला।
महीभुजां आयाम परिणा।
हाभ्यां सप्तहस्त मितो हि यः ॥
सिंहनामा महादोलोऽपि विज्ञेयः
षड्भुजोन्नतः सर्वोपयहि विधः
शाकः सकृदिष्याऽपि निष्कदिः
काष्ठ वस्त्र घटादीनां मणीनां
चामरस्य च चतुर्दोलवडन्नेयो
नियमोऽन्यापि सूरिभिः ॥
पूर्ववन्निष्कदे मीने ध्वजमान
सिंहोच्यते दशध्वजा लेषु ॥
वाष्टौ स्तम्भिहस्त हयोन्नताः
पञ्चादशे ध्वजो राज्ञश्चतुर्हस्त
मितो मतो मणि चामर ॥
पत्ताणां निर्णयो निष्मताकवत्
निर्ध्वजश्चाष्टदोलायः शिविकेति
लगयते मणिकुंभ मुक्तादीनां
नियमोनवदंडवत् इत्यष्टदोल
कथने पंचद्वादश षोडश ॥
विंशति दोलादिकाः कार्य्याः
मानेसार्द्धद्विगुणिते सार्द्ध
त्रिगुणिते पुनः मतेषां विंशति
दोलातत्परतो भोजमते संभवे।
ध्याने याने वहून्नुयोज्य वहु
गुणमिजगाद वेद्यासः ॥
भविष्यात्तरेऽपि यडुक्ते हैमपदे
यानेतेनमानेन योनृपः स्व
याने कुरुते दिव्यं सचिरंसख
मश्नुते स्वयोगश्चक्र यानस्यो
भोगमाप्नोति मानवः परयोगिक
यानस्थः क्लेश माप्नोति पुष्कलं
योदंभादथवाऽज्ञाना माने ॥
प्रकुरुतेऽन्यथा तस्यतानि।
निनर्यपति आशुविधायशोधने
प्रधानंयानमाश्रित्य नियमोयं
समाश्रितः नाप्रधाने निर्णयोक्ति
तल्लिंगंतु मनोज्ञता इति
युक्तिकल्पतरुः ॥

चतुर्थांश चतुः प्रकारं चारिप्रकार
इति भाषा इति व्याकरणं
चतुर्भद्रं क्ली सकलधर्मार्थकाम
मोक्ष इत्यमरः अन्यूनाधिकशक्ति
धर्मा काम मोक्ष इति
तट्टीकासार सुंदरी ॥
चतुर्भुजः पुं विष्णुः इत्यमरः
चतुर्मुखः पुं ब्रह्मा इति
शब्दरत्नावली औषधविशेषः
यथा रसगंधक लौहाभ्रं समं
सूतांशि हेमच सर्वंखल्लतले
त्रिसा कन्यारसविमर्दिते ॥
एरंडपत्रैरावेष्ठ्य धान्यराशौ।
दिनत्रयं संस्थाप्य ततउद्धृत्य
सर्वरोगेषु योजयेत पतद्रं
सायनवरं त्रिफला मधुसेवते
तथा चाग्निवलं खादेतवलीपलित
नाशनं क्षयमेकादशविधं ॥
कासं पंचविधं तथाकुष्ठमष्टादश
विधं पाण्डुरोगान प्रमेहकान।
शूलं श्वासंच हिक्कां मंदाग्नि
चाम्लपित्तं कं व्रणान्सर्वानाशवा
तेविषयं विद्रधिं तथा अपस्मार
ग्रहोन्मादान सर्वार्शांसि त्वगाम
यान् क्रमेणसेवितं हंतिहस्त
सिंह्राशनिर्यथा पादपिष्के वल्प
मातुष्यं पुत्र प्रसव कारणं
चतुर्मुखेन देवेन कुलत्रयेण
सूचितं इति प्रयोगामृते ॥
चतुर्मुख रसः ॥
चतुर्युगं क्ली चतुर्णां युगानां
समाहारः इति व्याकरणं ममर
टीकाच ॥
चतुर्वक्त्रः पुं ब्रह्म इति हलायुधः
चतुर्वर्गः पुं धर्मार्थकाममोक्ष
इत्यमरः ॥
चतुर्विद्यः पुं चतुर्वेदवेत्ताऽस्य
रूपांतराणि चतुर्वेदः चातुर्वेद्यः
चातुर्वैद्यः इति व्याकरणं ॥
चतुर्बीजं क्ली मेथिका चंद्रसूरं
कालाजाजी यवानिका एतच्चतुष्टयं
मिलितं तच्चूर्णं नित्यभक्षणगुणाः
पवनामयाजीर्णशूलाध्मानपा
र्श्वशूलकटिव्यथानाशित्वं इति
भावप्रकाशः ॥
चतुलः त्रि स्थापयिता इति
संक्षिप्तसारे उणादि वृत्तिः
चतुष्की स्त्री मशहरीमशारीइति
भाषा पुष्करिणी भेदः इति
मेदिनी यष्टिभेदे क्ली इति
शब्द रत्ना वली ॥
चतुष्टयं क्ली चतुरवयवे इति

मुग्धबोधे कैंद्रे इतिनीलकंठीय
ताजके ॥
चतुष्पथं क्ली एकत्रमिलितप
थचतुष्टये चौमाता यथइतिभाषा
तत्पर्य्यायः शृंगाटके २
इत्यमरः ॥
चतुष्पथः पुं ब्राह्मणः इतिमेदि
चतुष्पदः पुं पशुः करणविशेषः
इतिमेदिनी तत्रजातस्य फलं।
यथा चतुष्पादभवो मर्त्यः सदाचार
विवर्जितः स्वल्पवित्तःक्षीणदेह
श्चतुष्पाद धनान्वितः इतिकोष्ठी
प्रदीपः मेष वृषसिंहाः प्रायः।
मकरपूर्वार्द्धं धनुः परार्द्धंच इति
दीपिका ॥
चतुष्पदी स्त्री पद्ये चौपदी इति
भाषा इतिमेदिनी ॥ (ला
चतुष्पाटी स्त्री नदी इतिशब्दमा
चतुष्पाटी स्त्री चतुर्णां वेदानां पा
ठो यस्यां सा चौपाडी इतिभाषा
इतिलोके प्रसिद्धिः ॥
चतुष्पाणिः पुं विष्णुः इति
हारावली ॥ (रू
चतुस्समं क्ली मिलितचंदनागु
कस्तूरीकुंकुमरूपं इतिहेमचंद्रः
औषधविशेषः यथालबंगी ॥

सैंधवे पथ्या यमानीच चतुःसमे
(घ आमशूल विबंध घ्ने पाचने ॥
भेदि शोथनुत् अन्यच्च जाती
फलं त्रिदशा पुष्पसमन्वितेनजीरंच
टंगण पुते चरकेण चोक्ते चूर्णानि
(नी माक्षिक सितासहितानि लीढ्वा
आमातिसार मखिलं गुरुहंति
शूलं इति स्वबोधः ॥
चतुस्त्रिंशत् स्त्री चतुरधिकात्रिंशत्
चौतिश इति भाषा इति ॥
ज्योतिषे ॥
चतुस्त्रिंशज्जातकज्ञः पुं बुद्धभेदः
इति हेमचंद्रः ॥
चतूराजी स्त्री चतुरंगक्रीडांतर्गत
क्रीडाविशेषः इतितिथ्यादि
तत्वे ॥
चत्वरं क्ली स्थंडिले होमार्थं।
परिष्कृता भूमिः अंगने उठान
चाताल इतिच भाषा इत्यमरः
चत्वारः पुं चतुःसंख्याचारि
इतिभाषा इतिव्याकरणं ॥
महावाक्यानि वेदः १ ब्रह्मास्य २
वर्णाः ३ समुद्राः ४ हरिबाहुः ५
स्कंदंतिदंतः ६ सेनांगं ७ उपायाः
८ यामाः ९ युगं १० आश्रमे ११
हरपादः १२ इतिकविकल्पलता

चतुःसंख्याविशिष्टेत्रि इत्यमरः
चत्वारिंशत् स्त्री संख्याविशेषः
चालिश इतिभाषा इतिज्योतिषे
चत्वालः पुं होमकुंडे दर्भः।
इतिमेदिनी गर्भः इति।
बिम्बहेमचंद्रौ ॥
चदपत्र याचे इतिकविकल्पद्रु (मः
चद इ आह्लादे दीप्तौ इति
कविकल्पद्रुमः ॥
चदिरः पुं हस्ती चंद्रः कर्पूरे।
भुजगः इतिसंक्षिप्तसारे ॥
उणादि वृत्तिः ॥
चन म हिंसे इतिकविकल्पद्रुमः
चन श शब्दे इतिकविकल्पद्रुमः
चनम् आसाकल्यप्रकाश्ये
यथाकिंचन इत्यमरभरतौ ॥
प्रत्ययोः येविभक्त्यंतकिंशब्दा
दुत्तरेभवति इतिमुग्धबोधे।
चंच उ इ गतौ इतिकविकल्पद्रुमः
चंदः पुं चंद्रः इतिभरत श्रुत
शब्दार्णवः ॥
चंदकः पुं मत्स्यविशेषः।
चांदा इति भाषा तस्यगुणाः रु
चिबल्लकारित्वं अनभिष्यंदि
त्वंच इति राजवल्लभः ॥
चंद्रकोपि पाठः ॥

चंदनः पुं क्ली स्वनामख्यातवृक्षः
तत्पर्य्यायः गंधसारः २ मलयजः
३ भद्रश्रीः ४ इत्यमरः श्रीखंडे ॥
५ महार्हे ६ श्वेतचंदने ७
गोशीर्षे ८ तिलपर्णी ९ मंगल्ये
१० मलयोद्भवे ११ गंधराजे १२
सुगंधे १३ सर्पावासे १४ शीतले
१५ गंधाढ्ये १६ भोगिवल्लभे १७
पावने १८ शीतगंधः १९ इति
राजनिर्घंटः तैलपर्णिकः २०
चंद्रद्युतिः २१ इतिभावप्रकाशः
भद्रश्रियं २२ हिते २३ हिमे ॥
२४ इति रत्नमाला अस्यगुणाः
कटुत्वे तिक्तत्वे शीतलत्वे ॥
स्वादे कियत् कषायत्वं पित्त
श्रांतिवमिज्वरक्रिमितृषासंताप
शांतिकारित्वं वृष्यत्वं वक्त्ररोग
नाशित्वं शरीरकांति वृद्धि।
कारित्वं लेपने कामवृद्धि
कारित्वं अतिसौरभ्यदत्वंच।
इति राजनिर्घंटः रूक्षत्वे ॥
तिक्तत्वं आह्लादनत्वं लघुत्वं
श्रमशीर्षरोगविषश्लेष्मास्रदाह
नाशित्वंच श्रेष्ठचंदनलक्षणं
यथा स्वादे तिक्तं कषे पीतं ॥
छेदे रक्तं तनौ सितं ग्रंथि ॥

कोटरसंपृक्ते चंदने श्रेष्ठ ॥
मुच्यते इति भावप्रकाशः ॥
चंदनं क्ली रक्तचंदने इति
मेदिनी वानरविशेषे पुं इति
हेमचंद्रः ॥
चंदनगोपी स्त्री शारिवाविशेषः
इति राजनिर्घंटः ॥
चंदनपुष्पं क्ली लवंगं इति
राजनिर्घंटः ॥ चंदनशारिवा
स्त्री शारिवाविशेषः ॥
इति राज निर्घंटः ॥
चंदनसारः पुं वज्रक्षारे इति
राजनिर्घंटः ॥
चंदना स्त्री शारिवाविशेषः ॥
इति राजनिर्घंटः नदीविशेषः
सा तु मधुरवाल्याख्य नगरसमीपे
प्रसिद्धा ॥
चंदनाचलः पुं मलयपर्वतः ।
इति त्रिकांडशेषः ॥
चंदनाद्रिः पुं मलयपर्वतः ॥
इति त्रिकांडशेषः ॥
चंदनी स्त्री नदीविशेषः इति
मेदिनी ॥
चंदनीया स्त्री गोरोचना इति
राजनिर्घंटः ॥
चंदिरः पुं चंद्रः हस्ती इति

मेदिनी ॥
चंद्रं क्ली स्वर्णे चुक्रे इति
राजनिर्घंटः ॥
चंद्रः पुं देवताविशेषः चांद
इति भाषा तत्पर्य्यायः ॥
हिमांशुः २ चंद्रमाः ३ इंदुः ४
कुमुदबांधवः ५ विधुः ६ सुधांशुः ७
शुभ्रांशुः ८ ओषधीशः ९ निशापतिः
१० अब्जः ११ जैवातृकः १२
सोमः १३ ग्लौः १४ मृगांकः १५
कलानिधिः १६ द्विजराजः १७
शशधरः १८ नक्षत्रेशः १९
क्षपाकरः २० इत्यमरः ॥
दोषाकरः २१ निशीथिनीनाथः
२२ शर्वरीशः २३ एणांकः २४
शीतरश्मिः २५ इति शेषांतरे ॥
समुद्रनवनीतः २६ सारसः २७
प्रणीः ३ अमतिः ३३ चंदिरः ३४
उडुपः ३० सुधासूतिः ३१ तिथि
प्रणीः ३२ अमतिः ३३ चंदिरः ३४
चित्राटीरः ३५ पक्षधरः ३६ ऋक्षेशः
३७ नभश्चमसः ३८ राजा ३९
रोहिणीशः ४० अत्रिनेत्रजः ४१
पक्षजः ४२ सिंधुजन्मा ४३ दशाश्वः
४४ हरचूडामणिः ४५ माः ४६
तारापीडः ४७ निशामणिः ४८

इति जटाधरः मृगलांछनः ४९
दर्शविपत् ५० छायामृगधरः ।
ग्रहनेमिः ५२ दाक्षायणीपतिः ५३
लक्ष्मीसहजः ५४ सुधाकरः ५५
सुधाधारः ५६ शीतभानुः ५७ तमो
हरः ५८ तुषारकिरणः ५९ हरिः ६०
हिमद्युतिः ६१ द्विजपतिः ६२
विश्वप्सा ६३ अमृतदीधितिः ६४
हरिणांकः ६५ रोहिणीपतिः ६६
सिंधुनंदनः ६७ तमोनुत् ६८ एणः
तिलकः ६९ कुमुदेशः ७० क्षीरोद
नंदनः ७१ कांतः ७२ कलावान् ७३
यामिनीपतिः ७४ सिप्रः ७५ मृग
पिप्लुः ७६ सुधानिधिः ७७ तुंगी ७८
पक्षजन्मा ७९ चंद्रः ८० अब्धिनव
नीतकः ८१ पीयूषमहाः ८२ शीत
मरीचिः ८३ शीतलः ८४ इति शब्द
रत्नावली निशामणिः ८५ त्रिनेत्रचू
डामणिः ८६ अत्रिनेत्रभूः ८७ सुधांगः
८८ परिज्ञाः ८९ बलक्षगुः ९०
तुंगीपतिः ९१ यज्वनांपतिः ९२
पर्वधिः ९३ क्लेदुः ९४ जयंतः
९५ तपसः ९६ स्वचमसः ९७
विक्रमः ९८ इति त्रिकांडशेषः
दशवाजी ९९ श्वेतवाजी १००
अमृतसूः १०१ कौमुदीपतिः १०२

कुमुदिनीपतिः १०३ भपतिः १०४
दक्षजापतिः १०५ ओषधीपतिः १०६
कलाभृत् १०७ शशभृत् १०८
एणभृत् १०९ छायाभृत् ११० अत्रि
दृग्जः १११ निशारत्नं ११२ ॥
निशाकरः ११३ अमृतः ११४
श्वेतद्युतिः ११५ इति हेमचंद्रः
तस्मात् पत्निर्यथा ब्रह्मणो ॥
मानसः पुत्रस्त्वत्रिनाम महातपाः
सृष्टिकामः प्रजावत्स तपस्तेपे
सुदुश्चरं त्रीणि वर्षसहस्राणि दिव्या
नीतीह नः श्रुते ऊर्द्धमाचक्रमे
तस्यरेतः सोमत्वमीयिवत् ॥
नेत्राभ्यां तस्य सुस्राव दशधा
द्योतयद्दिशः ते गर्भं ब्रह्मणा
दिष्टा दशदेव्यो दधु र्दिशः
संगत्यैव महाराज नेवताः ॥
सम शाक्नुवत् यदा नधारणे
शाकास्तस्य गर्भस्य तादिशः
ततस्ताभिः सहैवासौ नियपात
वसुंधरां पतितं सोममालोक्य ॥
ब्रह्मालोक पितामहः रथ
मारोपयामास लोकानां हित
काम्यया सतेन रथ मुख्येन ।
सागरांतां वसुंधरां त्रिःसप्तकृत्वो
द्रुहिणो ऽकारयत्त प्रदक्षिणं ॥



तस्यतत् स्नाविते तेजः पृथिवी
मन्वपद्यत तेनौषध्यः समुद्भूता
याभिः संधार्य्यते जगत् स।
लब्धतेजा भगवान् ब्रह्मणावर्द्धि
तः क्षये तस्य क्षय वृद्धि।
कारणे यथा अश्विन्याद्यास्तु ॥
दक्षस्य उपयमे सुता विधुः
रोहिण्यामेव सततं बहु प्रेमा।
रराम हृष्टा तदितरास्तास्तु।
तमाः पितरमब्रुवन् अस्माकं।
कामदस्तात जामाता तव ॥
रोहिणीं रमयत्येव सततं ॥
तेनतत्सावर्यं पितः ततःकृत्वा
चाप्रियं दक्षः सोममाहभजस्व
भोः प्रेम्णा समेन सर्वा स्त्वं।
दुहितृर्मम मानद जगृहेतद्वचो
नैवसोमः सप्रेम रोहिणीं ॥
तथैव रमयामास कृत्वादक्ष
ऋतुकोपद्गु शापाय तेनभविता
क्षयत्वं मद्वचो तिगः यक्ष्मणाच
परिग्रस्तो भवतं स्त्रीणां रतकः।
अथक्षयमिते तस्मिन् सर्वास्ताः
सहिताः स्त्रियः पितरं शरणं।
प्राप्ताः स्त्रीयैतेन पतिःपितः
न वयं तेन वर्त्तामो विनाक्षस्त्व
निराकृताः उवाच दक्षस्ताःसर्वाः
प्रायो मेनान्यथा भवेत् ॥
मास मध्ये पक्षमेकं वर्द्धतो ॥
सक्रमेण वै क्षयं क्रमेण ॥
शेषशेत् पक्षमेकं व्यवस्थयायवे
प्रायं वर्द्धैव दद्वावसेव्यवस्थया
तथैवराजते व्योम्नि क्षयवृद्धी
दधद्विधुः इतियामस्वर्गखंडे
सचगौरवर्णः वायुकोणस्वी ॥
वैश्यजातिसत्वगुणाकर्कटराशिशृग
शिरोन सत्वरौप्य लवणारसमुक्ता
गैरिकादिधातु सर्पाणामधिपतिः
आर्द्रभूमि चारी तपस्वी अथराह्न
कालेप्रबलः श्लेष्मप्रकृतिः स्थूलो
युवा शुभग्रहः शुभाशुभश्च इति
ताजकज्ञातकादयः अर्द्धाह्नः
प्रश्नीयायः इतिसमयामृतं ॥
कर्पूरे स्वर्णजले कांपिल्ल्यः ॥
इतिमेदिनी हीपविशेषः ॥
इति शब्दमाला विसर्गः इति
तंत्रे कमनीयः मेचकः सतु
बर्हिचंद्रकः इति हेमचंद्रः ॥
रक्तरजते तत्र शोणम् मुक्ताफले
आह्लादजनकद्रव्ये इतिभरत
कृतव्याडिः ॥
चंद्रके स्त्री सितमरिचे इति ॥
राजनिर्घंटः ॥


चंद्रकः पुं बर्हिनेत्रे मयूरपुच्छेर।
चांद इति भाषा तत्पर्य्यायः ॥
मेचकः २ इत्यमरः नखः इति
शब्दचंद्रिका मत्स्यविशेषः।
चांदामाच इति भाषा अस्य
गुणाः अनभिष्यंदित्वं मधुरत्वं
बलवर्द्धनत्वंच इतिराजनिर्घंटः
तत्पर्य्यायः चलत् पूर्णिमा २
चंद्रचंचला ३ चंद्रिका ४ इति
शब्दरत्नावली चंद्रशाहात ॥
स्वार्थे केचंद्रश्च ॥
चंद्रकला स्त्री डमडवाद्ये वाचा
मत्स्यः इति शब्दरत्नावली ॥
चंद्रस्य षोडशो भागः तद्यथा
पूषायथा सुमनसा रतिःप्रीतिः
स्तथा धृतिः ऋद्धिः सौम्या ॥
मरीचिस्तथाचैवांशुमालिनी
अंगिरा शशिनी चेतिछायासंपूर्ण
मंडला तुष्टिश्चैवामृता चेति
कलाः सोमस्य षोडश आसां।
प्रयोजनं तिथितेदे स्त्रीणामेरा
विशेषे स्थितस्यकामस्याशावा
दिसविंदुश्चेत्येकस्वरपुकानमोरे
ततत् प्रत्येक कलानामरूपे
मंत्रे श्वालनं इति कामं ॥
शास्त्रं तंत्रोक्ता कला ॥
यथा अमृता मानदा पूषा तुष्टि
र्लक्ष्मी रति धृतिः शशिनी चंद्रिका
कांतिर्ज्योत्स्ना श्रीः प्रीतिरंगदा
पूर्णा पूर्णामृता कामदायिन्यः
शशिनः कलाः आसां प्रयोजनं
कलावती दीक्षादौ पूजने इति
रुद्रयामल ॥
चंद्रकांतं स्त्री श्रीखंडचंदने ॥
कैरवे इति रत्नमाला ॥
चंद्रकांतः पुं कैरवे मणिभेदः
इति मेदिनी शेषस्यपर्य्यायः
चंद्रमणिः २ चांद्रः ३ चंद्रोपलः ४
इति हेमचंद्रः इंदुकांतः ५
चंद्राश्मा ६ सेव्लवाचलः ७ ॥
शीताश्मा ८ चंद्रिकाद्रावः ९
शशिकांतः १० अस्य गुणाः
शिशिरत्वं स्निग्धत्वं अस्रदाह
ग्रहालक्ष्मी नाशित्वं शिवप्रीति
करत्वं स्वच्छत्वंच तद्द्रववारि
गुणाः विमलत्वं लघुत्वं पित्त
मूर्च्छा पित्तास्र दाहकासमदात्यव
रोगनाशित्वंच इतिराजनिर्घंटः
चंद्रकांता स्त्री रात्रिः इति ॥
शब्दचंद्रिका चंद्रपत्नीच ॥
चंद्रकालानलं स्त्री चक्रविशेषः
यथा चंद्रकालानलेचक्रेव्योमा

कारं लिखेद्बुधः चतुर्दिक्षु त्रिशू।
लानि मध्यमित्रानि कारयेत् ॥
पूर्वत्रिशूल मध्यस्थदिनक्षत्रादि
लिख्यते त्रिशूलेच वहिर्मध्ये ॥
मध्ये वहिस्त्रिशूलके मृत्यु।
त्रिशूले नानर्क्षमध्यमे वहि।
ष्टके क्षेम लाभ जय प्रज्ञा ॥
नामर्क्षेगवमो वर्जनीये ॥
प्रयत्नेन प्रयमाष्ट त्रिपंचके ॥
इति समयामृते ॥
चंद्रकी पुं स्त्री मयूरः इति
त्रिकांडशेषः ॥
चंद्रगुप्तः पुं राजविशेषःचाणक्य
नामाकश्चिद्ब्राह्मणः नंदं तत
पुत्रांश्च हत्वायंराजानंकृतवान्
इतिश्रीभागवतं चित्रगुप्तः
इतिकेचित् ॥
चंद्रगोलस्थाः पुं दिव्यपितरः
इति त्रिकांडशेषः वहूवचनांता
ऽयं शब्दः ॥
चंद्रगोलिका स्त्री ज्यो[illegible]त्स्ना।
इतिहेमचंद्रः ॥
चंद्रचंचला स्त्री चंद्रकमत्स्यः इति
शब्दरत्नावलीजटाधरश्च ॥
चंद्रदाराः पुं अश्विन्यादिनक्षत्राणि
इतिहलायुधः वहूवचनांतोयं।

चंद्रपुष्पा स्त्री श्वेतकंटकारी इति
राजनिर्घंटः ॥
चंद्रप्रभः पुं कृतार्हद्विशेषः
इति हेम चंद्रः ॥
चंद्रप्रभा स्त्री वाकुची इति
राजनिर्घंटः औषधविशेषःयथा
कृमिरिपु दहनव्योष त्रिफला
भरदारु चव्य भूनिंव मागधि
मूलं मुस्तं सशठिवचा माक्षिकं
चैव लवणद्वयं निशायुगं।
कल्लुरुक गजकणातिविषाःकर्ष
शाकाश्चैव समानि कुर्यात् ॥
पलाष्टकंचायसजतो द्विगुणात्
निक्षात्र शुद्धस्य पुरस्य धीमान्
पलद्वयं लोहरजस्तथैव सिता
चतुष्कं पलमत्रवेशणानिकुंभकुंभ
विलंगायिपुकं चंद्रप्रभेयं ॥
गुडिकाप्रयोज्याथाप्रीक्षिनिर्णा
शाम्यते षंडव भगंदरपांडू ॥
कामलांच निर्नष्टवद्धः कुलेच
दीप्तिं हंत्या मयान् पित्तकफान्नि
लौंघानाडीगतं मर्मगतंव्रणंच
गृध्रवृद्धिं विद्रधिराजयक्ष्माणं
मेहं भगाख्यं प्रवलंच योज्या
शुक्रक्षयेचाश्मरि मूत्रकृच्छ्रंके
प्रवाहिस्युदरामयेच भक्तस्यपूर्वं

सततं प्रयोज्या तक्रानुपानेत्वथ
मस्त्वनुपाने आजोरसोज्ञाकल्ल
जोरसोवा पयोयवाप्रीतजला
नुपाने वलेननागस्त्वरगाजेवन
दृष्ट्यास्तुपर्णः प्रवणोवराहःवली
पलितनिर्मुक्तोहृष्टापितरुणा
यते न पान भोज्येपरि हार्यो।
मलिनप्रीतवातातप मैथुनेश्च
शंभुसमभ्यर्च्चीकृतप्रसादेनाम्ना
गुडीचंद्रमसः प्रसादात् इति
सावबोधः ॥
चंद्रभागा स्त्री नदीविशेषः ॥
इत्यमरः तत्पर्य्यायः चंद्रभागी
२ चंद्रिका ३ इतिशब्दरत्नावली
सातुकाश्मीरदेशेशिखिडाम्रस्या
जलस्यगुणाः सुशीतलत्वं।
दाहपित्तवातनाशित्वंच इति
राजनिर्घंटः ॥ (ति
चंद्रभागी स्त्री चंद्रभागानदी इ
शब्द रत्ना वली ॥ (र्घंटः
चंद्रभूतं स्त्री रूप्यंइतिराजनि
चंद्रमणिः पुं चंद्रकांतमणिः
इति हेमचंद्रः ॥ (ति
चंद्रमंडलं स्त्री चंद्रबिंबंचंद्रप
वेषाः अस्यप्रमाणंमंडलशब्दे
द्रष्टव्यं ॥

चंद्रमाः पुं चंद्रः इत्यमरः ॥
चंद्रमौलिः पुं शिवः इति ॥
हारावली ॥
चंद्ररेणुः पुं काव्यचौरः इति
त्रिकांड शेषः ॥
चंद्रलेखा स्त्री वाकुची इति।
राजनिर्घंटः ॥
चंद्रलोहकं स्त्री रूप्यं इति
राजनिर्घंटः ॥
चंद्रवंशः पुं चंद्रसंतानःयथा
ब्रह्मणः पुत्रः अत्रिःतस्यपुत्रश्चंद्रः
तस्यबुधः तस्य वैवस्वत मनु
कन्यायां इलायां भार्य्यायां ॥
पुरूरवाःसप्रतिष्ठाननगरेइदानी
विठोरसंज्ञे राजचक्र वर्त्ती
आसीत् तस्योर्वश्यां षट्पुत्रा
आसन् तेषां आयुर्ज्येष्ठः तस्य
पुत्रो नहुष स्तस्य ययाति।
श्चक्रवर्त्ती तस्य द्वे भार्य्ये ॥
वृषपर्वणो दानवराजस्य सुता
शर्म्मिष्ठा शुक्रस्यकन्यादेवयानीच
देवयान्यां ययातेर्द्वौ पुत्रो
यदुस्तुर्वसुश्च शर्मिष्ठायांत्रयः
पुत्राः द्रुह्युः अनुः पुरुश्च
तत्र यदुप्रभृतयश्चत्वारः ॥
पितुराज्ञा हेलने वनवंतः ॥



पित्राशप्ताः ज्येष्ठपुत्रं यदुं
शप्तवानतव वंशे राजचक्रवर्त्ती।
माभूत तुर्वसु द्रुह्यनूनशप्तवान
युष्माकं वंशे वेदवाह्याम्लेच्छा
भविष्यंति पुरुस्तु पितुराज्ञया
दुष्करं कर्मकृत्वा पितुरतिप्रिय
आसीत ययातिःस्वमरणसमये
कनिष्ठ पुत्रं पुरुं राजचक्रवर्तिनं
कृतवान यदवे दक्षिणस्यां।
दिशि किंचिद्राज्यखंडं दत्तवान
तथा द्रुह्यवे पूर्वस्यां दिशि ॥
पश्चिमायां तुर्वसवे उत्तरस्यां ॥
अनवे सर्वान् पुरोरधीनांश्चक्रे
यदुरतीव धर्म्मशील स्तद्वंशे।
द्वापरयुगस्यांते श्रीकृष्णोऽवतीर्णः
तद्वरितं सर्वशास्त्रप्रसिद्धं ॥
ययाति पुत्रेष्वतिविस्तीर्णः पुरो
वंशः उच्यते पुरोः पुत्रो जन
मेजयः तस्यप्रचिन्वान तस्यप्रवीरः
तस्यमनस्युः तस्यचारुपदः तस्य
सद्युः तस्यबहुगवः तस्यसंयातिः
तस्यअहंयातिः तस्यरौद्राश्वः।
तस्यऋतेयुः तस्यरंतिनारःत
स्यसुमतिः तस्यरंतिनारःतस्य
दुष्यंतश्चक्रवर्ती तस्य शकुंतला
यांभार्यायांभरतश्चक्रवर्त्तीआसीत

यस्ययज्ञेशिशक्तमश्वमेधानकृतवान
पंचाशद्राजसूयान एवमन्यान नाना
विधान यज्ञानकरोत बहूनि
दत्तवान सप्तविंशति सहस्रवत्
सरान् एकछत्रं राज्यंकृतवान
तस्यपुत्रो वितथः तस्य मन्युः
तस्यबृहत्क्षेत्रः तस्यहस्ती
येनहस्तिना पुरं निर्मितं तस्य
अजमेढः तस्यऋक्षः तस्यसंवरणः
तस्यसूर्यकन्यायां तपत्यांकुरुः
तस्यजन्हुः तस्यसुरथः तस्य
विदूरथः तस्य सार्वभौमःतस्य
जयत्सेनः तस्याराधिकः तस्य
अयुतायुः तस्य अक्रोधनः तस्य
देवातिथिः तस्य ऋक्षः तस्य
दिलीपः तस्य प्रतीपः तस्य
देवापिःशंतनुःवाह्लीकइतित्रयः
पुत्राः तत्र देवापिःकलापग्रामे
योगीभूत्वावर्त्तते सकलौ चंद्र
वंशोत्सन्ने कलेरंते पुनः सत्य
युगेचंद्रवंशं भावयिष्यति
तत्रशंतनूराजा अभवतसचक्र
वर्तीतस्यगंगायां भीष्मःपुत्रो
जातः सपरमधर्मात्मामहावीरः
येनपितुर्दासकन्याविवाहार्थं
पितूराज्यं त्यक्तं ये स्वस्य ॥

विवाहेत्यक्तं ऊर्द्धरेता जातः ॥
शंतनोर्दासकन्यायां द्वौ पुत्रौ
जातौ चित्रांगदो विचित्रवीर्यश्च
सत्यवत्यांकन्यायांपराशरात
व्यासोजातः पुनर्मुनेर्वरात।
व्यासजन्मानंतरं साकन्यारूपा
भवत चित्रांगदो युद्धे गंधर्वेण
हतः विचित्रवीर्यस्यक्षेत्रेसत्य
वत्याज्ञयाव्यासःधृतराष्ट्रंपांडुं
चजनयामासधृतराष्ट्रस्यांयस्य
गांधार्यांभार्यायांदुर्योधनज्ये
ष्ठ पुत्रशतं बभूवपांडोर्द्वेभार्ये
कुंती माद्रीच ऋषीभूतस्यमुनेः
शापात्मैथुन रहितस्य पांडोः।
आज्ञाया कुंतीधर्माद्युधिष्ठिरंच
वायोर्भीमं इंद्रादर्जुनं जनयामास
माद्री अश्विनीकुमाराभ्यांनकु
लसहदेवौजनयामासयुधिष्ठिर
स्तुराजसूययाजी अर्जुनस्यसुभद्रा
यांभार्यायांअभिमन्युस्तस्यउत्त
रायांभार्यायांपरीक्षितयुधिष्ठि
रादनंतरंकलियुगस्यारंभे स
राजासीत चक्रवर्ती तस्य
जनमेजयःतस्यशतानीकःतस्य
सहस्रानीकः तस्यअश्वमेधजः
तस्यअसीमकृष्णः तस्यनेमिचक्रः

स हस्तिनानगरे नद्याप्लुते ॥
कौशांब्यां पुर्य्यां राजासीत ॥
तस्यउग्रः तस्यचित्ररथः तस्य
सुचिरथः तस्यवृष्टिमान तस्य
सुषेणः तस्यसुनीथः तस्यनृचक्षुः
तस्यसुखीनलः तस्य परिप्लवः
तस्यसुनयः तस्यमेधावी तस्य
नृपंजयः तस्यदूर्वः तस्यतिमिः
तस्यबृहद्रथः तस्यसुदासःतस्य
शतानीकः तस्यदुर्दमनः तस्य
महीनरः तस्यदंडपाणिःतस्य
निमिः तस्य क्षेमकः एतत।
पर्य्यंतमस्य वंशस्य पूर्तिः एते
कलेः सहस्र वर्षपर्य्यंते स्थिताः
सोमवंशपाण्डवोत्तरे मयाय ॥
वंशपाराजानःकलौवहुकाले
स्थिताःअतस्तेवर्ण्यंते तत्र
युधिष्ठिर समकालीनो जरासंध
सुतः सहदेवो मगधेषुराजासीत
तस्यमार्जारिः तस्यश्रुतश्रवाः
तस्यअयुतायुः तस्यनिरमित्रः
तस्यसुनक्षत्रः तस्यबृहत्सेनः
तस्यकर्मजित तस्यश्रुतंजयः
तस्यविप्रः तस्यशुचिः तस्य
क्षेमः तस्यसुव्रतः तस्यधर्मसूत्रः
तस्यसमः तस्यद्युमत्सेनः तस्य



सुमतिः तस्य सुबलः तस्य सुनीथः
तस्य सत्यजित तस्य विश्वजित
तस्य पुरंजयः एते राजानः कलेः
सहस्रवत्सरपर्यंतं राज्यं कृतवंतः
ततः पुरंजयस्य मंत्री सुनकः ॥
पुरंजयं हत्वा तस्य पुत्रे प्रद्योते ॥
राजानं कृतवान् तदारभ्य ॥
राजानो वर्णसंकरदोषदुष्टा।
जाताः प्रद्योत पुत्रः पालक ॥
तस्य विशाखयूपः तस्य राजकः
तस्य नंदिवर्द्धनः एते पंच अष्ट
त्रिंशोत्तर शतवर्षं भूमिपा॥
आसन् नंदिवर्द्धनस्य पुत्रः।
शिशुनागः तस्य काकवर्णः तस्य
क्षेमधर्मा तस्य क्षेत्रज्ञः तस्य
विधिसारः तस्य अजातशत्रुः तस्य
दर्भकः तस्य अजयः तस्य नंदि
वर्द्धनः तस्य महानंदिः एते दश
नृपाः षष्ट्युत्तर शतत्रयं वत्सरान्
भूमिपाला आसन् महानंदि
सुतो नंदः शूद्रायां समुत्पन्नः
राजासीत् तस्य सुमाल्याद्याः ष्टौ
पुत्रा आसन् ते शतवत्सरान्
राज्यं कृतवंतः चाणक्यनामा
कश्चिद्ब्राह्मणः नंदं तत्पुत्रांश्च
हत्वा मौर्यं चंद्रगुप्तं राजानं
कृतवान् कलौ नंदांतः क्षत्रिय।
वंशः इति श्रीभागवते ॥
महाभारतेच ॥
चंद्रवल्ली स्त्री सोमवल्लरी ॥
सोमलता इति ख्याता ब्रह्मीशाक
मिति केचित् इत्यमरटीकायां
भरतः ॥
चंद्रवल्ली स्त्री प्रसारणी माधवी
लता इति राजनिर्घंटः सोम
लताच ॥
चंद्रवाला स्त्री स्थूलैला इत्यमरः
चंद्रविहंगमः पुं बकपक्षी इति
त्रिकांडशेषः ॥
चंद्रव्रतं क्ली चांद्रायणं इति स्मृतिः
चंद्रशाला स्त्री ज्योत्स्ना इति
त्रिकांडशेषः प्रासादोपरि गृहं
तत्पर्यायः शिरोगृहं २
इति हेमचंद्रः चंद्रशालिका १
वडभी ४ कूटागारं ५ इति
त्रिकांडशेषः ॥
चंद्रशालिका स्त्री वडभी इति
त्रिकांडशेषः ॥ (हालिम
चंद्रशूरं क्ली फलविशेषः ॥
इति भाषा तत्पर्यायः चंद्रिका
२ चर्महंत्री ३ पशुमेहनकारिका
४ नंदनी ५ कारवी ६ भद्रा ७

अस्य गुणाः हिक्का वातश्लेष्माति
सारिणां हितत्वं अस्रवात रोग
दूषितत्वं बल पुष्टिविवर्द्धनत्वंच
इति भावप्रकाशः ॥
चंद्रशेखरः पुं शिवः इत्यमरः।
पर्वत विशेषः यथा विशेषतः
कलियुगे वसामि चंद्रशेखरे।
इत्यागमे शिववाक्यं ॥
चंद्रसंज्ञः पुं कर्पूरं इत्यमरः
चंद्रसंभवा स्त्री सूक्ष्मैला इति
शब्दचंद्रिका ॥
चंद्रहासं क्ली रौप्यं इति
राजनिर्घंटः ॥
चंद्रहासः पुं खड्गः रावणखड्गः
इति मेदिनी ॥
चंद्रहासा स्त्री गुडूची इति।
राजनिर्घंटः ॥
चंद्रा स्त्री एला विताने इति
शब्दरत्नावली गुडूची इति।
केचित् ॥
चंद्रातपः पुं आच्छादनविशेषः
चांदो आ इति भाषा तत्पर्यायः
उल्लोचः २ विताने ३ चंद्रा ४
इति शब्दरत्नावली ज्योत्स्ना
इति हेमचंद्रः ॥
चंद्रापीडः पुं शिवः इति ॥
त्रिकांडशेषः ॥
चंद्रावली स्त्री गोपीविशेषः।
सातु चंद्रभानुकन्या व्रजे श्रीकृष्णस्य
नित्यप्रिया राधातुल्या यथा
राधा चंद्रावली मुख्या प्रोक्ता नित्य
प्रिया व्रजे कृष्णवन्नित्य सौंदर्य
वैदग्ध्यादि गुणाश्रयाः इत्युज्ज्वल
नीलमणिः ॥
चंद्रिका स्त्री ज्योत्स्ना इत्यमरः
स्थूलैला चंद्रकमत्स्यः ॥
चंद्रभागानदी इति शब्दरत्नावली
कर्णस्फोटा मल्लिका श्वेतः
कंटकारी मेथिका हृद्रैमेला
इति राजनिर्घंटः चंद्रशूरं
इति भावप्रकाशः ॥
चंद्रिकांबुजं क्ली सितोत्पलं
इति राजनिर्घंटः ॥
चंद्रिकाद्रावः पुं चंद्रकांतमणिः
इति राजनिर्घंटः ॥
चंद्रिकापायी पुं स्त्री चकोरपक्षी
इति राजनिर्घंटः ॥
चंद्रिलः पुं शिवः नापितः॥
वास्तूकं इति मेदिनी ॥
चंद्री स्त्री बाकुची इति राजनिर्घंटः
चंद्रेष्टा स्त्री उत्पलिनी इति
राजनिर्घंटः ॥



चेंद्रोदयः पुं शशिनः प्रकाशः
चेंद्रातपः औषधविशेषः इति
हेमचेंद्रः सन्न मकरध्वजाख्य
रससिंदूरं यथापलं मृडस्वर्णं
दलं रसेंद्र पलाष्टकं षोडश ॥
गंधकस्य शोणैः सकार्पासभवैः
प्रसूनैः सर्वं विमर्द्य च कुमारिका
द्भिः ततकाचकुंभे निहितं ॥
सुगाढमृतकर्पटैस्तद्दिवसत्रयं
पचेत क्रमाग्नौ सिकताख्ययंत्रे
ततोरजः पल्लव रोग रम्यं ॥
निगृह्य चैतस्य पलं पलानि चत्वारि
कर्पूररजस्तथैव जातीफले ।
शोषणं मिद्रपुष्प कस्तूरिकाया
ऽयंकथितस्तु माषो भुक्तो ऽहि
वल्लीदल मध्यवर्ती मदोन्मदानो
प्रमदाशतानां गर्वाधिकत्वेन
श्रयत्यकांडे द्रुतिवनीभूतमतीव
दुग्धंमृहूनि मासाविसमल्लका
निमायान्न पिष्टानि भवंति यथा
न्यानंददायीन्यपराणि चात्र ।
वली पलित नाशनस्तनुभृतां
वयः स्तंभनः समस्तगदखंडनः
प्रचुर रोगपंचाननः शुद्धेषु रसता
इयं भवति यस्य चेंद्रोदयः ।
सर्पचपार ॥

दर्पितो मृगदृशां भवेद्दुर्लभः ॥
इति सारकौमुदी सुखबोधश्च
चेंद्रोदया स्त्री नेत्ररोगस्यौषध
विशेषः यथा हरीतकीवचाकुष्ठं
पिप्पलीमरिचानि च विभीतकस्य
मज्जा च शंखनाभिर्मनः शिला
सर्वमेतत्समं कृत्वा छागीक्षीरेण
पेषयेत नाशयेत्तिमिरं ॥
कंडूं पटलान्यर्बुदानि च श्रोथ
कानि च मांसानि यश्च रात्रौन
पश्यति अपि द्विवार्षिकं पुष्पं
मासेनैकेन साधयेत वर्त्तिश्च
चंद्रोदया नाम्नातथा दृष्टिप्रसादनी
चेंद्रोपलः पुं चेंद्रकांत मणिः
इति हेम चेंद्रः ॥
चय कन कल्के चूर्णीकरणे
इति कविकल्प द्रुमः ॥
चय सांत्वे प्रियवचने उपशमेच
इति कविकल्पद्रुमः ॥
चपटः पुं चपेटः चड इति ॥
भाषा इत्यमर टीका
चपलं क्ली शीघ्रं इतिमेदिनी
क्षणिकं इति हेम चेंद्रः
चपलः पुं पारदः मीनः ॥
चोरकः ॥
प्रस्तर विशेषः इति ॥

मेदिनी स्तवः इति
राजनिर्घंटः ॥
चपलः त्रि तरलः चंचलः इति
मेदिनी दोषमनिश्चित्य वध
बंधनादिः कर्त्ता तत्पर्यायः ॥
चिकुरः २ इत्यमरः चिकलः
इति शब्दरत्नावली ॥
चपला स्त्री लक्ष्मीः विद्युत
पुंश्चली पिप्पली इतिमेदिनी
जिह्वा इति शब्दचंद्रिका विजया
मदिरा इति राज निर्घंटः ॥
चपेटः पुं विस्तृताङ्गुलिपाणिः
चड इति चापड इतिच भाषा ।
तत्पर्यायः प्रतलः २ प्रहस्तः ३
इत्यमरः ॥
चमन २ भक्ते इतिकविकल्पद्रुमः
चम उ भक्ते इतिकविकल्पद्रुमः
चमत्कारः पुं अपामार्गः इति
शब्दरत्नावली चित्तविस्ताररूपः
तत्पर्यायः विस्मयः २ इति
साहित्यदर्पणः उमरुः ३ इति
त्रिकांडशेषः लोकातीतीर्था
कलनेन किमेतदिति ज्ञानरूपा
ज्जननेचित्तस्य दीप्तप्रायत्वंचित्त
विस्तारः दृष्टहेतभ्योऽसंभवित
ज्ञानेन हेत्वेतरानुसंधानेमनो

व्यापारयेवचित्तविस्तारइत्यपरे
इति साहित्य दर्पण टीका ॥
चमरं क्ली चामरं इतिमेदिनी
चमरः पुं चमरगोः तत्पर्यायः
छज्जनी २ वन्यः ३ धेनुगः ४
वालप्रियः ५ इति राजनिर्घंटः
चमरपुच्छः पुं कोकडः सत्तु ।
विलेशय भेदः इतिराजनिर्घंटः
चामरं क्लीच ॥
चमरिकः पुं कोविदारवृक्षः
इत्यमरः ॥
चमरी स्त्री चमरगावी तत्पर्यायः
दीर्घवाला २ गिरिप्रिया ३ इति
राजनिर्घंटः मंजरी ४ इति ॥
मेदिनी ॥
चमसः पुं क्ली यज्ञपात्रभेदः
चमच इति भाषा इतिमेदिनी
चमसः पुं पर्पटः पिष्टभेदः
लड्डुकः इत्यजयपालः ॥
चमसी स्त्री मुद्गमसुरादिपिष्टे
काष्ठरचिते यज्ञपात्रमित्यन्ये
इति लिंगादि संग्रह टीकायां
भरतः चूर्णयक्कुष्कमाषाणांचमसी
सा विधीयते इतिभावप्रकाशः
चमूः स्त्री सेनामात्रे सेनाविशेषः
तत्र ७२९ हस्तिनः ७२९ रथाः



२१८७ अश्वाः ३६४५ पदातयः। समुदायेन नवत्यधिकशतद्वयाधिकसप्तसहस्रं इत्यमरमेदिनीकरौ चमूरुः पुं स्त्री हरिणविशेषः इत्यमरः ॥
चंपः पुं कोविदारवृक्षः इति ॥ शब्दमाला ॥
चंपकं क्ली कदलीफलविशेषः चांपाकेला इति भाषा अस्य गुणाः वातपित्तनाशित्वं गुरुत्वं। वीर्य्यकारित्वं अतिशीतत्वं ॥ रसे पाके मधुरत्वंच इति राजवल्लभः चंपकपुष्पंच ॥
चंपकः पुं वृक्षविशेषः चांपा इति भाषा तत्पर्य्यायः चांपेयः २ हेमपुष्पकः ३ इत्यमरः स्वर्णपुष्पः ४ शीतलच्छदः ५ सुभगः ६ भृंगमोही ७ शीतलः ८ भ्रमरातिथिः ९ सुरभिः १० दीपपुष्पः ११ स्थिरगंधः १२ अतिगंधकः १३ स्थिरपुष्पः १४ हेमपुष्पः १५ पीतपुष्पः १६ हेमाह्वः १७ सुकुमारः १८ वनदीपः १९ अस्य गुणाः कटुत्वं तिक्तत्वं शिशिरत्वं दाहकुष्ठ कंडू व्रणनाशित्वं गुणाढ्यो। राजचंपकः इति राजनिर्घंटः ॥

कषायत्वं मधुरत्वं विष कृमि। कृच्छ्रकफवातास्रपित्तनाशित्वंच इति भावप्रकाशः पनसफल। कोषैकदेशावयवश्च ॥
चंपककलिका स्त्री चंपककोरकः तत्पर्य्यायः गंधफली २ बहुगंधा ३ गंधमादिनी ४ इति राजनिर्घंटः
चंपकरंभा स्त्री सुवर्णकदली इति राजनिर्घंटः ॥
चंपकालुः पुं पनसः इति ॥ भूरिप्रयोगः ॥
चंपकंदः पुं मत्स्यभेदः ॥ चांदकुडा इति भाषा अस्य गुणाः गुरुत्वं शुक्रकारित्वं मधुरत्वं। वातपित्तनाशित्वंच इति राजवल्लभः ॥
चंपकोषः पुं पनसः इति त्रिकांडशेषः ॥
चंपा स्त्री कर्णपुरी अधुनाभाग(ल)पुर इति ख्याता तत्पर्य्यायः मालिनी २ लोमपादपूः ३ कर्णपूः ४ इति हेमचंद्रः चंपावती ५ चंपापुरी ६ इति शब्दरत्नावली
चंपाधिपः पुं कर्णराजः इति हेमचंद्रः ॥
चंपापुरी स्त्री चंपानगरी इति

शब्दरत्नावली ॥
चंपालुः पुं पनसः इति शब्दरत्नावली ॥
चंपावती स्त्री चंपापुरी इति। शब्दरत्नावली ॥
चंपूः स्त्री काव्यविशेषः इति जटाधरः तल्लक्षणं यथा गद्यपद्यमयी वाणी चंपूरित्यभिधीयते इत्यलंकारशास्त्रं ॥
चंपेशः पुं कर्णराजः। इति त्रिकांडशेषः ॥
चंपायलक्षितः पुं अंगदेशः इति हेमचंद्रः तद्देशस्य पुं भूम्नि। चव गतौ इति कविकल्पद्रुमः
चय ऊं गतौ इति कविकल्पद्रुमः
चयः पुं वप्रे इत्यमरः ॥ तत्प्राकारादिमूलबद्धं यदुपरि प्राकारो निबध्यते सः चयः। इति ख्यात इति केचित् इति तट्टीकायां सारसुंदरी दुर्गनगरे। उद्धृतमृत्तिकारूपबद्धं यदुपरि प्राकारो निवेश्यते तथाचार्थ प्राशस्त्यं खातमुद्धृतमृदा वप्रे कारयेत्तस्योपरि प्राकारमिति इति भरतः समूहः समाहृतिः इति मेदिनी प्राकारः पीठे ॥

इति हेमचंद्रः ॥
चरक संशये असंशये इति कविकल्पद्रुमः ॥
चर गमने अदने आचारे ॥ इति कविकल्पद्रुमः ॥
चरः पुं गोपनेन राष्ट्रादेः शुभाशुभादि ज्ञानार्थं राज्ञा नियुक्तः पुरुषः परतत्त्वज्ञानार्थभ्रमणकर्त्ता तत्पर्य्यायः यथार्हवर्णः २ प्रणिधिः ३ अपसर्पः ४ चारः ५ स्पशः ६ गूढपुरुषः ७ इत्यमरः तत्राद्यो भिन्नवर्णागादिवेशेन नित्यस्थायिनि चरे यैच स्वदेशपरदेशभ्रमणशीलः इत्यन्या इति भरतः तस्य लक्षणं यथा। विवस्वानिव तेजोभिर्नभस्वानिव वेगतः राजा चरेज्जगत् सर्वं शश्वद्याल्लोकसन्मतैः तर्केंगितज्ञः स्मृतिमान् स्वीयभावप्रकाशकः क्लेशायाससहो दक्षः सर्वत्र भयवर्जितः सुभक्तो राजसुतथा कार्याणं प्रतिपत्तिमान् नृपो निहन्याच्चारेण पराष्ट्रं विचक्षणः कालज्ञो मंत्रकुशलान् सेवत् चिकित्सकान् तथान्यानपि युंजीत समर्थान् शुद्धचेतसः



अकुर्वंश्च तथाप्यन्यान् दृष्ट्वापि
न् तत्त्वभाषिणः पाषण्डिनस्ताप
सादीन् परराष्ट्रे नियोजयेत् स्वदेश
परदेशज्ञान् सुशीलान् सुविच
क्षणान् वार्त्ताहर्त्तॄन् वहूंश्चैव
चराणां विनियोजयेत् नैकस्य
वचने राजा चारस्य प्रत्यये
वहेत् द्वयोः संवेद्य माज्ञाय।
तद्युक्तं कार्य्यमारभेत तस्मा
द्राजा प्रयुञ्जीत चरान् वहुमुखान्
वहून् नीरोगा वामनाः कुब्जा।
स्त्रिद्विधा येच कारवः भिक्षुका
श्चारणा दास्यो मालाकार्य्यः।
कलाविदः अन्तःपुरगता वाह्ये
निर्हारयु रक्षिता प्रकाश
श्चाप्रकाशश्च चरस्त्रिविधो मतः
अप्रकाशाय मुद्दिष्टः प्रकाशो
दूतसंज्ञकः इतिभावप्रकाशः
कृतयुक्तिकल्पतरुः आक्षद्यूत
भेदः भौमः चलः इति।
मेदिनी खंजनपक्षी इति
शब्दमाला कपर्द्दकः इति
राजनिर्घण्टः मेषकर्कटतुला
मकरलग्नानि इतिज्योतिषं
आस्थिरविभूतिर्निर्वचलमदने
स्खलितनियममपि चरभे॥

इति दीपिका ॥
चरकः पुं चारः इत्युणादिकोषः
पर्पटः इति राजनिर्घण्टः ॥
मुनिविशेषः तत्कृत तन्नामक
ग्रन्थः तयोरुत्पत्तिर्यथा यदा
मत्स्यावतारेण हरिणा वेद उद्धृतः
तदा शेषश्च तत्रैव वेदं ॥
सांगमवाप्तवान् अथर्व्वान्तर्गते
सम्यगायुर्वेदं च लब्धवान् एकदा स
महीवृत्तं द्रष्टुं चर इवागतः
तत्र लोकान् गदैर्ग्रस्तान् व्यथया
परिपीडितान् स्थलेषु वहुषु
व्यग्रान्म्रियमाणांश्च दृष्ट्वान्तान्
दृष्ट्वातिदयायुक्तः तेषां दुःखेन
दुःखितः अनेन चिन्तयामास
रोगोपशमकारणं संचिन्त्य।
स स्वयं तत्र मुनेः पुत्रो बभूव ह
यतश्चर इवायातो न ज्ञातः।
केनचिद्यतः तस्माच्चरकनामासौ
विख्यातः क्षितिमण्डले स भाति
चरकाचार्य्यो देवाचार्य्यो यथा दिवि
सहस्रवदनस्यांशो येन ध्वंसे
रुजां कृतः आत्रेयस्य मुनेः
शिष्या अग्निवेशादयोऽभवन्
मुनयो वहव स्तैश्च कृतं तन्त्रं
स्वकं स्वकं तेषां तन्त्राणि ॥

संस्कृत्य समाहृत्य विपश्चिता
चरकेणात्मनो नाम्ना ग्रन्थोऽयं
चरकः कृतः इति भावप्रकाशः
चरटः पुं खंजनपक्षी इति
शब्दमाला ॥
चरणः पुं क्ली वहूवादिः मूले
गोत्रे इति मेदिनी अयमांगे ॥
तत्पर्य्यायः पादः २ पत् ३
अंघ्रिः ४ इत्यमरः विक्रमः ५
पदः ६ आक्रमः ७ इति
राजनिर्घण्टः क्रमणः ८ चलनः ९
क्रमः १० इति हेमचन्द्रः ॥
चरणं क्ली गमने भक्षणे ॥
आचारः इति हेमचन्द्रः ॥
चरणग्रंथिः पुं गुल्फः इति
हेमचन्द्रः ॥
चरणायुधः पुं कुक्कुटः इत्यम
रः ॥
चरमः त्रि अन्तः पश्चिमः ॥
इत्युणादिकोषः ॥
चरमक्ष्माभृत् पुं अस्ताचलः
इत्यमरः ॥
चरमाचलः पुं अस्तपर्वतः इ
ति त्रिकाण्डशेषः ॥
चरमाद्रिः पुं अस्ताचलः इति
हेमचन्द्रः ॥
चराचरं क्ली जगत् इति मेदिनी

आकाशः इति धरणी जंगमा
जंगमे यथा तया विसृज्यते
विश्वंजगदेतच्चराचरं इति
चंडी ॥
चराचरः त्रि जंगमः इत्यमरः
इंगः इति विश्वः इष्टः इति
हेमचन्द्रः कपर्दके पुं इति
राजनिर्घण्टः ॥
चरिः पुं पशुः इत्युणादिकोषः
चरितं क्ली चरित्रे इति शब्दरत्नावली
तद्विविधं यथा अनुभावाश्च
लीलाचेत्युच्यते चरितं द्विधा
अनुभावाः अलंकाराख्या उद्भास
राख्याः वाचिकाख्याश्च लीलास्या
च्चारुविक्रीडा रास केडका।
खेलाद्या चारु क्रीडा प्रकीर्तिता
ताण्डवे वेणुवादने गोदोहः
पर्वतोद्धारो गोहूतिर्गमनादिका
इत्युज्ज्वलनीलमणिः ॥
चरितार्थः त्रि प्राप्तप्रयोजनः यथा
पुराणस्य कवेस्तस्य चतुर्मुख
समीरिता प्रवृत्तिरासीच्छब्दा
चरितार्था चतुष्टयी इति कुमार
संभवः ॥
चरित्रं क्ली स्वभावः तत्पर्य्यायः
चरितं २ चारित्रं ३ चरीतं इति

शब्दरत्नावली ॥
चरिञ्चा स्त्री तिंतिडीवृक्षः इति
शब्दरत्नावली ॥
चरिष्णुः त्रि जंगमः इत्यमरः ।
चरित्रं क्ली चरितं इति
शब्दरत्नावली ॥
चरुः पुं हव्यान्नं तत्पाकभाण्डं
इतिमेदिनी तत्र संस्कृते ॥
वह्नौ गोक्षीरेण चरुं पचेत् ।
इतिशारदातिलकं तस्यानुष्ठानं
यथा अग्नेः पश्चिमायां दिशि
प्रागग्रान् कुशानास्तीर्य्य तदुपरि
प्रक्षालितं वारुणमुदूखलंमुषले
वैणवं च सूर्पं वारुणचमसस्य ।
जलशोधितं संस्थाप्य व्रीहीन्
यवान्वा सूर्पे निधाय चमसस्य
जलेन तं वास्तोष्पतये त्वा जुष्टं प्रोक्षा
मि ते इन्द्राय त्वा जुष्टं प्रोक्षामि ते भूस्त्वा
जुष्टं प्रोक्षामि ते भुवस्त्वा जुष्टं ।
प्रोक्षामि ते स्वस्त्वा जुष्टं प्रोक्षामि
ते प्रजापतये त्वा जुष्टं प्रोक्षामि ।
छिल्लसीं इत्यष्टौ वारान् प्रोक्षयेत्
ततः कोशपात्रेण चरुस्थाल्या
वारं वास्तोष्पतये त्वा जुष्टं निर्वं
पामि ते इन्द्राय त्वा जुष्टं निर्वपामि
ते भूस्त्वा जुष्टं निर्वपामि ते भुवस्त्वा
जुष्टं निर्वपामि ते स्वस्त्वा जुष्टं निर्व
पामि ते प्रजापतये त्वा जुष्टं निर्व
पामि इति प्रत्येकं गृह्णीत ।
उदूखले स्थापयेत् छिल्लसीं ततो
दक्षिणहस्तमुपरि कृत्वा मुषले
नावहत्य सूर्पेण प्रस्फोटयेत्
इत्यमेव वारत्रयं कृत्वा त्रिः
प्रक्षालयेत् ततश्चरुस्थाल्यां
समंत्रकं कृतोत्तरीयं पवित्रं ।
निक्षिप्य प्रक्षालितं तण्डुलं
निधाय दुग्धं निक्षिप्यलौकि
कमुदकं दत्वा तन्मध्ये खदिर
पलाशोदुम्बराणामन्यतमस्य
प्रादेशप्रमाणं अग्रे उभयतो
अंगुष्ठपर्वप्रमाणं चतुष्कोणं
पुष्कलं मेक्षणं दक्षिणावर्त्तेन
भ्रामयित्वा तथा पचेत् यथा
तरुणः सम्यक्पाको भवति
गालनं न भवति दाहश्च न भवति
ततः सम्यक्पाके भूते मध्ये हुतं ।
स्रुवे दत्वा प्रागादिदिक्षु विछिन्नं
चरुमवतार्य्य अग्नेरुत्तरतः कुशो
परि स्थापयित्वा पुनर्मध्ये हुतं स्रुवं
दद्यात् इति भवदेवभट्टः ॥
चरुव्रणः पुं चित्रापूपः चिताड़
पिठा इति भाषा इति ॥

त्रिकाण्डशेषः ॥
चर्च्चिक अध्ययने इति कविकल्प
चर्च्च श उक्तौ भत्सने इति ॥
कविकल्पद्रुमः ॥
चर्च्चरी स्त्री गीतभेदः चर्च्चरीगीत
भेदे च केशभिन्न करशब्दयोः ।
इतिरुद्रः हर्षक्रीडितसभूतिः
कापटिकानां सादरवचनं । भरतः ॥
तोयस्य त्रिकं चेत्यन्ये वसन्तसमय
क्रीडेत्येके इत्यमरटीकायां ।
भरतः हर्षक्रीडावाक तत
पर्य्यायः चर्भटी २ इति हेमचन्द्रः
चर्च्चरीकः पुं महाकालः केश
विन्यासः शाकः इति मेदिनी ॥
चर्चा स्त्री दुर्गा चिन्ता चार्च्चिक्यं
इति मेदिनी विचारणा ॥
इत्यमरः ॥
चर्च्चिका स्त्री दुर्गा इति त्रिकाण्ड
चर्चा इति द्विरूपकोषः ॥
चर्च्चितं त्रि चंदनादिना कृतले
पनं तत्पर्य्यायः ॥
दिग्धं २ लिप्तं ३ ॥
इति जटाधरः ॥
चर्म्मः त्रि हननेयः इति पाणिनि
व्याकरणं ॥
चर्पटः पुं स्फारः विपुलः चप
र्पटः इति मेदिनी ॥

(द्रुमः चर्पटी स्त्री पोली इति ॥
त्रिकाण्डशेषः ॥
चर्वणा इति कविकल्पद्रुमः
चर्भटः पुं इर्वारुः इति हलायुधः
चर्भटी स्त्री चर्च्चरी हर्षक्रीडावाक
इति हेमचन्द्रः ॥
चर्म्म क्ली फलकः इत्यमरटीकायां
(मः इति
चर्म्म क्ली इन्द्रियविशेषः चा
भाषा तत्पर्य्यायः त्वक् २
असृग्धरा ३ कृत्तिः ४ अजिनं ५
देहचर्म ६ रक्ताधारः ७ रोमभूमिः
८ शरीरावरणं ९ इति ॥
राजनिर्घण्टः असृग्वरा १० इति
भरतधृतसर्वधरः शरीरा
वरके शस्त्रे ढाल इति भाषा
(शेषः तत्पर्य्यायः फलकः २ फलं ३
इत्यमरः फरं ४ चर्म्म ५ इति
भरतः तस्य लक्षणं यथा ।
शरीरावरके शस्त्रे चर्म्म इ
त्यभि । धीयते
तत्पुन द्विविधं काष्ठ ॥
चर्म्मसंभव भेदतः शरीरावरक
त्वेचलघुता दृढता तथा ।
(टः दुर्भेद्यतेति कथिता चर्मणां गुणा
संग्रहः स्वल्पता गुरुताचैव
मृदुता सविभेद्यता विरुद्धवर्णता ॥



वेति चर्म्मणो दोष संग्रहः ॥
सितारक्तस्तथा पीतः कृष्ण
इत्यभिधाहितः अस्मादिजाति
भेदेन चर्म्मणो वर्णनिर्णयः
चित्रवर्णस्तु सर्वेषां सर्वदैवोप
यपेत इति युक्तिकल्पतरुः ॥
ब्रह्मचारिधार्य्यकृष्णसारचर्म
इत्यमरः ॥
चर्मकषा स्त्री पश्चिमदेशजाते
गंधद्रव्ये केचित्तु चामारकषा
इतिख्याता इत्याहुः इति भरतः
तत्पर्य्यायः सप्तला १ विमला २
सातला ३ भूरिफेना ४ इत्यमरः
प्रातला ५ चर्मकषा ६ इति
भरतः मोसरोहिणी (?) इति
राजनिर्घंटः ॥ (मर
चर्मकसा स्त्री चर्मकषा इत्य
टीकायां भरतः ॥ शेषः
चर्मकारः पुं वर्णसंकरजातिवि
चामार इति मुचि इति च भाषा
स तु चंडाल्यां तीवराज्जातः ॥
इति पराशरपद्धतिः तत
पर्य्यायः पादूकृत् १ इत्यमरः
पादुकृत् २ चर्म्मारः ३ इति
तट्टीका चर्म्मकृत् ४ पादुका
रः ५ इति हलायुधः
चर्म्मरुः ७ ॥

कुरटः ८ इति त्रिकांडशेषः ।
चर्म्मकारी स्त्री चर्म्मकैवौषधिः
इति मेदिनी ॥
चर्म्मकृत् पुं चर्मकारः इति
हलायुधः ॥ (विशेषः
चर्मचटका स्त्री निशाचरपक्षि (?)
चामचिका इति भाषा तत् ॥
पर्य्यायः जतुका १ अजिनपत्रिका
२ इति हेमचंद्रः जतुका ३
गृहमाचिका ४ जतनी ५ अजिन
पत्रा ७ चार्म्मिः ८ चर्मचटी ९ इति
शब्दरत्नावली चर्मपत्रा १० इति
जटाधरः चर्मचटिका ११ इति
केचित् ॥
चर्मचटी स्त्री चर्मचटका इति
शब्दरत्नावली ॥
चर्मचित्रकं क्ली श्वेतकुष्ठं इति
राजनिर्घंटः ॥
चर्मजं क्ली रोमा रुधिरं इति
राजनिर्घंटः ॥
चर्म्मण्वती स्त्री नदीविशेषः सा तु
बुंदेलखंडाख्यदेशे चंबल इति
ख्याता कदली इति मेदिनी
चर्म्मदंडः पुं कशा चाबुक इति
भाषा इति हेमचंद्रः ॥
चर्म्मदूषिका स्त्री ॥
कोठरोगः इति ॥

राजनिर्घंटः ॥
चर्म्मतरंगः पुं वलिः त्वक्संको
चः इति राजनिर्घंटः ॥
चर्मद्रुमः पुं भूर्जवृक्षः इति
राजनिर्घंटः ॥
चर्मपत्रा स्त्री चर्मचटी इति
जटाधरः ॥
चर्मपादुका स्त्री उपानत् चामडा (?)
जुता इति भाषा यथा ततो
ब्रह्मचारी अनेन मंत्रेण चर्मपा
दुका युगलं पादौ निदध्यात् इति
भवदेवभट्टः अस्या गुणाः पादुका
शब्दे द्रष्टव्याः ॥
चर्मप्रभेदिका स्त्री चर्मप्रभेदनाह
योउ इति भाषा इत्यमरः ॥
चर्मप्रसेवकः पुं चर्मप्रसेविका
इत्यमरटीकायां भरतः ॥ (सं
चर्मप्रसेविका स्त्री अग्निसंदीपना
चर्म्मनिर्मित यंत्रं भाती इति
ज्ञाता इति च भाषा तत्पर्यायः
भस्त्रा १ इत्यमरः ॥
चर्ममुंडा स्त्री दुर्गा ॥
इति हेमचंद्रः ॥ (इति
चर्मरंगा स्त्री आवर्त्तकीलता
राजनिर्घंटः ॥
चर्म्मरुः पुं चर्मकारः इति।
त्रिकांडशेषः ॥

चर्म्मसंभवा स्त्री इति हारावली
चर्मसारः पुं रसः इति राजनिर्घंटः
चर्म्माभः पुं रसः इति राजनिर्घंटः
चर्म्मारः पुं चर्मकारः इति ॥
जटाधरः ॥
चर्म्मी पुं चर्मधारियोद्धा ढाली
इति भाषा तत्पर्यायः ॥
फलकपाणिः १ भूर्जवृक्षः
इत्यमरः भृंगिरिटिः मोचा ॥
इति शब्दरत्नावली ॥ (मरः
चर्य्या स्त्री कुर्य्यापथस्थितिः इत्य
नियमापरित्यागः कुर्य्यते गुरोः
शास्त्रोपासनाया ज्ञायते कुर्य्या साव
ध्यान धारणादिः तस्याः पंथा
उपायः तत्र स्थितिर्वा पाथस्थिति
स्वस्थानमपरित्यागः सा इति
भरतः गमने अदने आचरणे वा
इति मुग्धबोधटीकायां दुर्गादासः
चर्व किं भक्षे इति कविकल्पद्रुमः
चर्वणं क्ली दंतैश्चूर्णने चिबान
इति भाषा इति हेमचंद्रः ॥
चर्वी ने पुं ॥
तलप्रहारः इति ॥
हारावली ॥
चर्वितं त्रि कृतचर्वणं भक्षितं
इत्यमरः ॥
चर्वितपात्रकं क्ली चर्वितताम्बूलादि



त्यागपात्रे पीकदान इति भाषा
यथा तांबूलं दर्पणं पानपात्रे
चर्वितपात्रके इति रामलीलायां
पातालखंडे ॥
चर्व्ये त्रि चर्वणीये यथा षट्कोटि
ब्राह्मणांश्च भोजयामास नित्य
शः चूष्य पेय लेह्य चर्व्यैः ॥
इति लक्ष्मि दिने दिने इति
ब्रह्मवैवर्ते प्रकृतिखंडे ॥ (ना
चर्षणिः पुं जनः यथा सचर्षणी
मृदगाकुचौ मृजनप्रियः श्रियाया
इवदीर्घदीपनः इति श्रीभागवते
चलशाविलासे इति कविकल्प
द्रुमः चलजगतो इति कविकल्पद्रुमः
चलकं भृतो पोषणे इति ॥
यावत् इति कविकल्पद्रुमः
चले त्रि चंचले इत्यमरः ॥
चलः पुं कंपः तथुकेत्रि इति
मेदिनी ॥
चलचंचुः पुं चकारपक्षी इति
हेमचंद्रः ॥
चलत् पूर्णिमा स्त्री चंद्रकमस्यः
इति त्रिकांडशेषः ॥
चलदंगः पुं ॥
मत्स्यविशेषः ॥ चेंगा ॥
इति भाषा अस्य गुणाः ॥
अनभिष्यंदित्वं वातेहितत्वं ।

रोचनत्वंच इति राजनिर्घंटः
चलदंगकः पुं चलदंगमत्स्यः
इति जटाधरः ॥ (मत्स्यः
चलद्दलः पुं अश्मन्तकवृक्षः इति
चलने क्ली भ्रमणे कंपने ॥
कंपेत्रि इति मेदिनी ॥
चलनः पुं पादः इति हेमचंद्रः
हरिणः इति जटाधरः ॥
चलनके क्ली चंडातके इति
हेमचंद्रः ॥
चलनी स्त्री नारीभेदः जगवेधनी
वस्त्रचर्बरी चाचर इति भाषा
इति हेम चंद्रः ॥
चलपत्रः पुं अश्मन्तकवृक्षः इति
राजनिर्घंटः ॥
चला स्त्री लक्ष्मीः इति मेदिनी
सिल्हकः इति रत्नमाला ॥
चलाचलः त्रि चंचलः इत्यमरः
काके पुं इति राजनिर्घंटः ॥
चलातंकः पुं वातरोगः इति।
राजनिर्घंटः ॥
चलिते त्रि कंपिते इत्यमरः
गते चलत्त गता चितिदर्पणात्
चलुः पुं गंडूषः
इति हेम चंद्रः ॥
चलुकः पुं प्रसृतिः भांडभेदः
इति मेदिनी ॥

चविः स्त्री चविका इति शब्दरत्ना
वली चविके क्ली चविका इति
भरत धृतरुद्रः चविका
स्त्री हस्तविशेषः चइ ॥
इति भाषा तत्पर्य्यायः चव्यं १
२ इत्यमरः चव्या ३ चविके ४
चवी ५ इति भरतः चविः ६
इति शब्दरत्नावलीतेजोवती ७
कोला ८ नाकुली ९ उषणा १०
चव्यके ११ वशिरः १२ गंधनाकुली
१३ वल्ली १४ कोलवल्ली १५ कोल
१६ कुटिलसप्तकं १७ तीक्ष्णा १८
कविकणावल्ली १९ हकरः २०
अस्या गुणाः कटुत्वं उष्णत्वं ॥
लघुत्वं रोचनत्वं दीपनत्वं ।
जंतु … कासश्वासशूलनाशि
त्वंच इति राजनिर्घंटः भेदकत्वं।
कफनाशित्वंच इति राजवल्लभः
चवी स्त्री चविका इति शब्दरत्नाव
ली चव्यं क्ली चविका इत्यमरः
चव्यके क्ली चविका इति
राजनिर्घंटः ॥
चव्यजा स्त्री गजपिप्पली इति
राजनिर्घंटः ॥
चव्यफलं क्ली गजपिप्पली इति
राजनिर्घंटः ॥

चव्या स्त्री चविका इत्यमरटीकायां
भरतः वचा इति मेदिनी ॥
कार्पासी इति राजनिर्घंटः ॥
चवन्न तद्दे इति कविकल्पद्रुमः
चषवधे इति कविकल्पद्रुमः
चषकः पुं क्ली मद्यपानपात्रे
तत्पर्य्यायः सरकः २ सरकः ३
अनुतर्षणं ४ इति हेमचंद्रः
अथ चषकोद्देशः यत्पानपात्रे
भूपानां तज्ज्ञेयं चषकं बुधैः
काञ्चनं राजतं वै च स्फाटिकं काच
मेव च हैमं स्वराष्ट्रदिक्काणे
वर्तणे पृथिवीभुजां इत्यन्य
संमते तेषां निर्णयः पाठसंमतः
स्वमुष्टि सम्मिते रत्नैश्च तुवर्णैः
समन्विते मार्त्तिकं वाथ फालं वा
सर्वेषामुपयुज्यते काष्ठजं
धातुजं शैलं जांगलादिमही
भुजां यदन्यत्तोयपानादि पात्रे
दृष्टी भुजां भवेत् एवं तत्रापि
नियम इति भोजस्य निश्चयः
इति युक्तिकल्पतरुः सुरापात्रे
मधु मद्यप्रभेदः इति ॥
मेदिनी ॥
चषतिः पुं भक्षणे वधः इति
सिद्धांतकौमुद्यामुणादिवृत्तिः

चषालः पुं यूपकटकः इत्यमरः
यज्ञसमाप्ति सूचकं यस्तुवेयना
घर्षे यज्ञभूमौ यत् काष्ठ ॥
सारोप्यते सयूपः तस्याग्रे सि
वलयाकृति उमरुकाकृतिर्वा।
यः काष्ठविकारः सः यूपमूलेपि
हितलोहवलयश्च इतिकेचित्
इतिभरतः मधुस्थाने इति
हेलिमसारे उणादि हतिः मो
चहूतक प्राठे इतिकविकल्पद्रु
चहकमप्राप्तये इतिकविकल्पद्रु
चहूप्राप्ते प्रतारणे इतियावत्
इतिकविकल्पद्रुमः ॥ (द्रुमः
चक्षल उ. कथने इतिकविकल्प
चक्षणं क्ली मद्यपानरोचकभ
क्ष्य द्रव्यं इतिहेमचंद्रः कथनंच
चक्षाः स पुं बृहस्पतिः इति
त्रिकांडशेषः उपाध्यायः ।
इत्युणादिकोषः ॥ (शास्त्र
चक्षुः क्ली इंद्रियविशेषः तस्य
उद्भूतरूपे २ तद्द्रव्यं ३ पृथक्त्वे
३ संख्या ४ विभागः ५ संयोगः
६ परत्वं ७ अपरत्वे ८ स्नेहः ९
द्रवत्वं १० संख्यापरिमाणं ११
योग्यवृत्तिक्रिया १२ योग्यवृत्ति
जातिः १३ योग्यवृत्तिसमवायः १४

अस्येन्द्रियसहकारिणः आलोकः
उद्भूतरूपं महत्वं इति ॥
भाषापरिच्छेदः अस्याधिष्ठात्री
देवता सूर्यः इतिश्रीभागवते
तत्पर्यायः लोचनं २ नयनं ३
नेत्रं ४ ईक्षणं ५ अक्षि ६ दृक् ७
दृष्टिः ८ इत्यमरः अंबकं ९
दर्शनं १० इतिहेमचंद्रः ॥
तयनं ११ इतिराजनिर्घंटः ॥
पाणिभ्यां नस्पृशेच्चक्षुषी नैक
पाणिना चक्षुः परिहिताकांक्षीन
स्पृशेदेक पाणिना इतिकर्म
लोचने मेषशृंगी वृक्षः इति
रत्नमाला ॥
चक्षुर्वर्द्धनं क्ली मेषशृंगी वृक्षः
इति रत्नमाला ॥
चक्षुः श्रवाः स पुं सर्पः इत्यमरः
चक्षुष्या स्त्री प्रपौंडरीके ॥
सौवीरांजने खर्परी तुत्थे ॥
इतिराजनिर्घंटः ॥
चक्षुष्यः पुं केतक वृक्षः ॥
पुंडरीकवृक्षः इतिमेदिनी ॥
शोभांजन वृक्षः इतिराजनिर्घंटः
रसांजने इति हेमचंद्रः ॥
चक्षुष्मः त्रिप्रियदर्शनः इति
जटाधरः चक्षुर्हितः इति

चविः स्त्री चविका इतिशब्दरत्नावली
चविकं क्ली चविका इतिभरत
धृतरुद्रः ॥
चविका स्त्री वृक्षविशेषः चइ
इतिभाषा तत्पर्यायः चव्यं ।
२ इत्यमरः चव्या ३ चविकं ४
चवी ५ इति भरतः चविः ६
इति शब्दरत्नावली तेजोवती ७
कोला ८ नाकुली ९ उषणं १०
चव्यकं ११ वशिरः १२ गंधनाकुली
१३ वल्ली १४ कोलवल्ली १५ काले
१६ कुटिलसप्तकं १७ तीक्ष्णं १८
करिकणावली १९ हकरः २०
अस्या गुणाः कटुत्वं उष्णत्वं ॥
लघुत्वं रोचनत्वं दीपनत्वं ॥
जंतुदककास श्वासशूलनाशि
त्वंच इतिराजनिर्घंटः भेदकत्वं
कफनाशित्वंच इतिराजवल्लभः
चवी स्त्री चविका इतिशब्दरत्नावली
चव्यं क्ली चविका इत्यमरः ॥
चव्यकं क्ली चविका इति।
राजनिर्घंटः ॥
चव्यजा स्त्री गजपिप्पली इति
राजनिर्घंटः ॥ (इति
चव्यफलं क्ली गजपिप्पली इ
राजनिर्घंटः ॥

चव्या स्त्री चविका इत्यमरटीकायां
भरतः वचा इतिमेदिनी ॥
कार्पासी इतिराजनिर्घंटः ॥
चष ञ तदे इतिकविकल्पद्रुमः
चष १ वधे इतिकविकल्पद्रुमः
चषकः पुं क्ली मद्यपानपात्रं
तत्पर्यायः गल्वर्कः सरकः २
अनुतर्षणं ३ इतिहेमचंद्रः
अथ चषकोद्देशः पानपात्रं
भूपानां तत्रज्ञेयं चषकं बुधैः
कानकं राजतंचैव स्फाटिकं काच
मेवच हेमं स्वराष्ट दिक्कोणं
वर्तुलं पृथिवीभुजां इत्यन्य
सम्मते तेषां निर्णयः पाठस्ततः
स्वमुष्टि सम्मिते रत्नैश्चतुर्वर्णैः
समन्विते मार्त्तिकं वाथ फालेवा
सर्वेषामुपयुज्यते काष्ठजं
धातुजं शैलं जांगलादि मही
भुजां यदन्यमीय पानादिपात्रं
पृथिवीभुजां भवेत् एवं तत्रापि
नियम इति भोजस्य निश्चयः
इतियुक्तिकल्पतरुः सुरापात्रं
मधुमद्यप्रभेदः इति ॥
मेदिनी ॥
चषतिः पुं भक्षणे वधः इति
सिद्धांतकौमुदी उणादिवृत्तिः

चषालः पुं यूपकटकः इत्यमरः
यज्ञसमाप्तिसूचके यज्ञवेष्टना
यर्थं यज्ञभूमौ यत् काष्ठ
मारोप्यते सयूपः तस्यशिरसि
वलयाकृति उमरूकाकृतिर्वा यः
काष्ठविकारः सः यूपमूलेविक्षिप्त
लोहवलयश्च इति केचित् ।
इतिभरतः मधुस्थाने इति
संक्षिप्तसारे उणादि वृत्तिः ॥
चहूतकस्थाने इतिकविकल्पद्रु
मः चहूकमस्थाने इतिकविकल्प
द्रुमः चहस्थाने प्रतारणे इतिधाव
त् इतिकविकल्प द्रुमः ॥ मः
चत लडकथने इतिकविकल्पद्रु
चताणं क्ली मद्यपानरोचकभेदः
द्वये इति हेमचंद्रः कथनेच ॥
चक्षाः पुं बृहस्पतिः इति ।
त्रिकांडशेषः उपाध्यायः ॥
इत्युणादिकोषः ॥
चक्षुः क्ली इंद्रियविशेषः तस्य
उद्भूतरूपे १ तद्दृष्टे २ पृथक्त्वे
३ संख्या ४ विभागः ५ संयोगः
६ परत्वे ७ अपरत्वे ८ स्नेहः ९
द्रवत्वे १० संख्यापरिमाणे ११
योग्यवृत्तिक्रिया १२ योग्यवृत्ति
जातिः १३ योग्यवृत्तिसमवायः १४

अस्येंद्रियसहकारिणः आलोकः
उद्भूतरूपे महत्त्वे इति
भाषापरिच्छेदः अस्याधिष्ठात्री
देवतासूर्यः इतिश्रीभागवते
तत्पर्य्यायः लोचने १ नयने २
नेत्रे ३ ईक्षणे ४ अक्षिणि ५ दृक् ६
दृष्टिः ७ इत्यमरः अंबकं ८
दर्शने ९ इतिहेमचंद्रः ॥
नयने १० इतिराजनिर्घंटः
पाणिभ्यांनस्पृशेच्चक्षुषीनैक
पाणिना चक्षुषोरहिताकांक्षीन
स्पृशेदेक पाणिना इतिकर्म
लोचने मेषशृंगीवृक्षः इति
रत्नमाला ॥
चक्षुर्वहने क्ली मेषशृंगीवृक्षः
इति रत्नमाला ॥
चक्षुःश्रवाः पुं सर्पः इत्यमरः
चक्षुष्यं क्ली प्रपौंडरीके ॥
(श्राद्धे) सौवीरांजने खपरीतुत्थे ॥
इतिराजनिर्घंटः ॥
चक्षुष्यः पुं केतकवृक्षः ॥
पुंडरीकवृक्षः इतिमेदिनी ॥
शोभांजनवृक्षः इतिराजनिर्घंटः
रसांजने इतिहेमचंद्रः ॥
चक्षुष्यः त्रि प्रियदर्शनः इति
जटाधरः चक्षुर्हितः इति ॥

[illegible]
चक्षुष्या स्त्री कुलत्थिका सुभ
इति मेदिनी अजशृंगी अरण्य
कुलत्थिका इतिराजनिर्घंटः
चाकचिक्या स्त्री श्वेतवुह्ना इति
रत्नमाला ॥
चाक्रिकः पुं बहुभिर्मिलित्वायः
स्तौति सः तत्पर्य्यायः घांटिका
र्थकः २ इत्यमरः तैलकारः ॥
इतिहेमचंद्रः शाकटिकः ॥
गाडनुयान इति भाषा इति ॥
महाभारते राजधर्मः ॥
चांगः पुं चांगेरी इत्यमरः ॥
टीकायां रायमुकुटः ॥
चांगेरी स्त्री अम्ललोणिका ॥
इत्यमरः ॥
चांचल्यं क्ली चंचलताचापल्यं
यथा चांचल्यरहितालक्ष्मीः पुत्र
पौत्रावधिस्थिरा इतिजगन्मंगला
ख्यकवचे ॥
चाटः पुं चौरः इतिमिताक्षरा
चाटकैरः पुं चटकस्यापत्ये
चटारछा इति भाषा इत्यमरः
चाटुः पुं क्ली प्रियवाक्यं तत्
पर्य्यायः चटुः २ प्रियप्रायं ३
इतिहेमचंद्रः स्फुटवादी इति

संक्षिप्तसारे उणादि वृत्तिः
मिथ्याप्रियवाक्यं खोशामदिया
कथा इतिभाषा इतिमहाभारते
चाटुपटुः पुं भंडः भांड इति ॥
भाषा इति हारावली ॥
चाटुलोलः त्रि चटुल्लोलः इति
हारावली ॥
चाटुवटुः पुं चाटुपटुः इति
भूरिप्रयोगः ॥
चाटूक्ति स्त्री सेवा इतिहारावली
प्रियकथाच ॥
चाणकीनं त्रि चणकोत्पत्तियोग्य
क्षेत्रं इत्यमरटीकायां राय ॥
मुकुटः ॥
चाणक्यः पुं मुनिविशेषः तत्
पर्य्यायः द्रोमिणः २ अंगुलः ३
इति त्रिकांडशेषः ग्रंथविशेषे
क्ली यथा नानाशास्त्रोद्धृतंवक्ष्ये
राजनीतिसमुच्चयं सर्ववीजमिदं
शास्त्रं चाणक्यं सारसंग्रहं इति
तत्रैव ॥ (भेदः
चाणक्यमूलकं क्ली मूलकप्र
चाणकमूलीतिख्याते तत्पर्य्यायः
वालेयं २ विष्णुगुप्तकं ३ स्थूलमूले
४ महाकंदे ५ कौटिल्यं ६
मरुसंभवं ७ शालाककटकं

मिश्रे ९ अस्य गुणाः उष्णत्वं ॥
कटुत्वं रुचिकारित्वं दीपनत्वं
कफवात कृमिगुल्मनाशित्वं
ग्राहकत्वं गुरुत्वंच इति
राजनिर्घण्टः ॥
चाणूरः पुं कंसराजस्य मल्लविशे
षः यथा ततः क्रोधातिताम्राक्षः
कंसः परमकोपनः चाणूरः ।
मादिशद्युद्धे कृष्णस्य सुमहाबले
इति महाभारते हरिवंशः ॥
चाणूरसूदनः पुं श्रीकृष्णः इति
त्रिकाण्डशेषः ॥
चाण्डालः पुं चण्डालः इत्यमरः
चाण्डालिका स्त्री चण्डालवीणा
इत्यमरः चण्डालिकाशब्दार्थीयत्र
चाण्डाली स्त्री लिङ्गिनी इति
राजनिर्घण्टः चाण्डालपत्नीच
चातकः पुं स्वनामख्यातपक्षी
तत्पर्य्यायः स्तोककः २ सारङ्गः
३ मेघजीवनः ४ इति राजनिर्घण्टः
तोककः ५ इत्यमरः ॥
शारङ्गः ६ इति भरतः ॥
तन्मांसगुणाः लघुत्वं शीतत्वं
कफरक्तपित्तनाशित्वं अग्नि
कारित्वंच इति राजवल्लभः ॥
चातकानन्दनः पुं वर्षाकालः इति

राजनिर्घण्टः ॥
चातुरः पुं चक्रगण्डुः गोलवालिश
इति भाषा इति मेदिनी ॥
चातुर त्रि नेत्रगोचरः चाटुकारः
दक्षः नियन्ता इति मेदिनी ॥
चातुरकः त्रि चातुरः इति
हेमचन्द्रः ॥
चातुराश्रम्यं क्ली ब्रह्मचर्यगार्हस्थ्य
वानप्रस्थभिक्षुरूपाश्रमचतुष्टयानां
धर्मः इति पुराणं ॥
चातुरिकः पुं सारथिः इति
जटाधरः ॥
चातुरी स्त्री दाक्ष्यं चतुरता
इति मेदिनी ॥
चातुर्जातकं क्ली गुडत्वगेला
नागकेशर पत्र रूपचतुष्टये
इति राजनिर्घण्टः ॥
चातुर्भद्रं क्ली नागरातिविषा
मुस्ता गुडूचीति चतुष्टये इति
राजनिर्घण्टः ॥ वैश्य
चातुर्वर्ण्यं क्ली ब्राह्मणक्षत्रिय
शूद्राः इति हेमचन्द्रः चतुर्वर्ण
धर्मश्च ॥
चातुर्वैद्यः पुं चातुर्विद्यः ॥
चतुर्वेदवेत्ता इति व्याकरणं ॥
चात्वालः पुं गर्तः अग्निहोत्रीय

करणे इति सिद्धान्त सारे
उणादि वृत्तिः ॥
चान्द्रं क्ली चान्द्रायणं इति
प्रायश्चित्त तत्वं ॥
चान्द्रः पुं चन्द्रकान्तमणिः इति
हेमचन्द्रः चान्द्रमासः इति ॥
शब्दरत्नावली ॥ र्द्रः
चान्द्रकं क्ली शुण्ठी इति राजनिर्घ
चान्द्राख्यं क्ली आर्द्रकं इति
राजनिर्घण्टः ॥
चान्द्रभागा स्त्री चन्द्रभागा नदी
इति द्विरूपकोषः ॥
चान्द्रमसं क्ली मृगशिरोनक्षत्रं इति
हेमचन्द्रः चन्द्रमससंबंधिनि त्रि
चान्द्रमसायनः पुं बुधग्रहः इति
हलायुधः चान्द्रमसाय निश्च।
चान्द्रमासः पुं चन्द्रसंबंधिमासः
स तु गौण मुख्यभेदेन द्विविधः
तत्राद्यः कृष्णप्रतिपदादिपौर्ण
मास्यन्तः द्वितीयः शुक्लप्रतिपद
दि दर्शान्तः सामान्यत्रिंशत्तिथ्या
त्मकमासस्तत्र मुख्यचान्द्रकर्मा
णि श्राद्धिक श्राद्धाद्य श्रादादिस
पिण्डीकरणान्त श्राद्धानि चान्द्रायण
प्राजापत्यादि ॥
व्रतानि दान कर्म्म ॥
नित्यस्नाने गृहप्रक्षालणादि।

॥ प्रतिष्ठासाधारणतिथिविहितकर्म्म
गौणचान्द्रे अष्टकादिपर्वणश्राद्धे
वारुणीस्नाने जन्मतिथि कृत्ये
जन्माष्टम्याद्युपवासः दुर्गोत्सवादि
तिथिनियत पूजासामान्यत्रिंश
तिथ्यात्मक मासेन मासिकादि
मासगणना इति स्मृतिः ॥
चान्द्रायणं क्ली व्रतविशेषः तत्
पर्य्यायः इन्दुव्रतं २ इति
त्रिकाण्डशेषः तत्तु चतुर्विधं ॥
पिपीलिका मध्याख्यं १ यव
मध्याख्यं २ यति चान्द्रायणं ३ शिशु
चान्द्रायणं ४ यथा एकैकं ह्रास
येत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत्
उपस्पृशं स्त्रिषवणमेतच्चान्द्रायणं
स्मृतं एतदेव पिपीलिका ॥
मध्याख्यं इति कुल्लूक भट्टः ॥
एवमेव विधिं कृत्स्नमाचरेद्यव
मध्यमे शुक्लपक्षादिनियतश्चरं
श्चान्द्रायणं व्रतं अष्टावष्टौ सम
श्नीयात् पिण्डान् मध्यंदिने स्थिते
नियतात्मा हविष्याशी यतिचान्द्रा
यणं चरन् चतुरः प्रातरश्नीयात्
पिण्डान् विप्रः समाहितः चतुरो
ऽस्तमिते सूर्य्ये ॥
शिशुचान्द्रायणं ॥
स्मृतं इति मनुः ॥



चोटी स्त्री श्वेतकंठकारी ज्योत्स्ना
इति राज निर्घण्टः ॥
चापः पुं धनुः इत्यमरः ॥
चापपटः पुं पियालवृक्षः इति
जटाधरः ॥
चापलं क्ली अनवस्थितिः इति
हेमचन्द्रः तस्य लक्षणं यथा
मात्सर्य्य द्वेषरागादेश्चापल्यं
नवस्थितिः इति साहित्यदर्पणः
चापल्यं क्ली चपलता चांचल्यं
यथा परदारे परद्रव्ये परीवादे ॥
परस्य च परीहासे गुरोः स्थाने
चापल्यं च विवर्जयेत इति
चाणक्य ॥
चामरं क्ली पुं चमरी पुच्छलोम
निर्मित व्यजनं चौंरी इति
भाषा तत्पर्य्यायः प्रकीर्णकं २
इत्यमरः चामरं ३ चामरा ४
चामरी ५ इति भरतः वाल
व्यजनं ६ रोमगुच्छकं ७ इति
शब्दः अस्य वायुगुणाः तेजः
कारित्वं मक्षिकादिव्यापोहनत्वंच
इति राजवल्लभः अथ
चामरो हेमाः हस्त हयोन्नताः स्व
ल्पाः स्ववर्णावलिभूषिताः हीरेण
लंकृता राज्ञां भवामान सख प्रदः
वलेश्चामरदैत्यांचा हाश्चायामते

प्रकाशिते भद्यो भद्रोजयः ॥
पीलः सखः सिद्धिश्चलःस्थिरः
वितस्त्येकैक संवृद्ध्यादिनेशादि
दिक्षणभुवां सौवर्णराजतं पुष्पं
वैदेशानां महीभुजां योजयेत् ॥
दिति निश्चित्य वलिकल्पनकर्म्मणि
स्थलजं जांगलो राजा अनूपो
जलजं वहेत हीरं च पद्मरागश्च
वैदूर्य्यं नील एवच मणिर्वलिषु
योक्तव्यो ब्रह्मादीनां यथाक्रमं
शुक्लो रक्तो ऽथ पीतश्च नाना
वर्णो यथाक्रमं चामरो ॥
राजकेश्यस्य सामान्यस्य भूपतेः
न भवमानतो न्यूनं चामरं ॥
गुणमावहेत अथ चामरं ॥
परीक्ष्य स्थलजं जलजं वेति
चामरं द्विविधं विदुः मेरौ
हिमालये विंध्ये कैलासे मलये
तथा उदये ऽस्त गिरौ चैव
गंधमादन पर्वते एव मेतेषु
शैलेषु याश्चमार्य्यो भवंतिहि
तासां वालस्य जायेत चामरं ॥
त्वभिधा भुवि आपीताः ॥
कनकाद्रिहिमगिरेः शुभ्रायता
विंध्यजाः कैलासादसिताः सिता
मलयजाः शुक्लास्तथा पिंगलाः
आरक्ता उदयोद्भवाश्च मरजा ॥

आलनील शुक्लास्तिषःकृष्णाः के
वलगंधमादनभवाःपीडूत्विषश्चा
मराः अन्येषु श्चापपाः कृष्णाश्चाम
राः संभवंति हि विप्रलब्ध्रप्रियविट्
भूदजातय स्तापश्चतुर्विधाः ॥
चमर्य्यः पर्वतोद्भूता यथापूर्वं
गुणावहाः दीर्घवालाः सलक्ष
वः स्निग्धागाश्चापि कोमलाःवि
रलालनुपर्वाणश्चमर्य्यो वल
जातयः विना संस्कारमप्यासां चा
मरं विमलं भवेत दीर्घवालाः।
सगुरुवः कर्कशाश्चाभूषितवनाः
विज्ञेयाः स्थलपर्वाणश्चमर्य्यो
वैश्यजातयः संस्कारेवाप्यसे।
स्कोऽनेन स्वभावेन्यजे दिदेखवेवा
लाः सल्लच्छवः कोमलांगभूष
वनाः चमर्य्यस्तनुपर्वाणविक्ष
याः शूद्रजातयः संस्कारेणापिमा
लिनमासांचामरमिष्यतेदीर्घता
लघुताचैवस्वच्छताघनतातथा
गुणाश्चत्वारः इत्येते चामराणां
प्रकीर्तिताः खर्वता गुरुता चैव
वैवर्ण्यं मलिनांगता दोषश्चत्वार
इत्येते चामराणां प्रकीर्तिताः।
दीर्घदीर्घांशुः राप्नोति ॥
लघो भीति विनाशाने स्वच्छ

स्याद्धन कीर्तिभ्यां घने स्युःस्थिर
संपदः खर्वे खर्वायु रुद्दिष्टे ॥
गुरुणि गुरुभयप्रदः विरले रोग
शोकाभ्यां मलिने मृत्युमादि
शेत इति स्थलजं अथ ॥
जलजं लवणेक्षुसरा सर्पि
र्दधितोयपयोब्धिषु यथोत्तरं
गुणवद्भ्यश्चमर्य्यः समसमस्त
पुच्छानि तासां हृतानि जंतुभि
र्मकरादिभिः कदाचिदुपलभ्यत
तत्तीरेषु एषु शालिभिः लवणाब्धि
समुद्भूते पीतं गुरु तथा लघु।
वह्नौ लिप्तश्चवालश्वेत किंचिद्वट
वेष्टयते इक्षुसिंधूद्भवे ताम्रे।
चामरं विमलं लघु मक्षिका
मशकाश्चैव तस्मिन् व्रजति
चामरं सुराब्धिजाते कलुषं
कर्बुरं पुरुकर्कशं तदीयेनैव
माद्यंति अपिहत्वा मतंगजाः॥
सर्पिः सिंधुभवं स्निग्धं श्वेतापीतं
घनेलघुवायुरोगाः प्रशाम्यंति
तस्य वीजनवायुना जलसिंधूद्भवे
पांडु दीर्घं लघु घनं महत ॥
अस्य वातेन नश्येत्तु तृष्णा मूर्छा
मदो भ्रमः नारिकेलेन तयस्तस्य
यस्येदं चामरं गृहे क्षीरोद ॥

संभवंत्येते दीर्घं लघु घने ॥
महत्त्वमस्य चामर राजस्य ॥
विज्ञेयो गुणविस्तरः नाल्पेन ।
तपसा लभ्यो देवानामपि ॥
जायतेह्रियतेऽथंतैः सिंधौ ॥
नीरोगः सयतिलोलयैः यथा ।
पूर्ववदनेयंज्ञातिदोषगुणादिकं
स्थलजे जलजे चैवभाव्य ॥
मेतद्विशेषणे स्थलजे तव ॥
दृष्टेहि दोह मिषमिषायते ॥
जलजं वह्नि उद्देह्नि महाते धूम ।
मुञ्चेत चामराणां समुद्दिष्ट ॥
भित्वैवे लक्षणद्वयं यत्नेविमृष्य
योधयेत्स राजा सर्वमश्नुते ॥
जलजं चामरं राजा यो ॥
धत्ते जांगलेश्वरः तस्याचिरात् ।
कुलेवीयैलक्ष्मीरायुश्चनश्यति
अनूपाधीश्वरो राजाधावहेत् ।
स्थलजं तत्पातस्यैतानि विनश्यन्ति
लक्ष्मीरायुर्वंशो बले
नाले वर्णद्वये तेषां विधेयं ॥
शिल्पिना क्रमात् संस्कारो ॥
वालुकायंत्रे मसूरसलिलादिभिः
तद्रसलिलक्षाल्यातक्रुचिमत्वं
विपद्यते रसपकरणे शुक्लो ॥
चामरोद्देशः इतिभोजराज कृत ॥
युक्तिकल्पतरुः ॥

चामरपुष्पः पुं गुवाकः काशः
आम्रः केतकः इतिमेदिनी ॥
चामरपुष्पकः पुं काशः इति
जटाधरः चामरपुष्पर्यायश्च ॥
चामरा स्त्री चामरं इत्यमर ॥
टीकायांभरतः ॥
चामरी स्त्री चामरं इत्यमर ॥
टीकायां भरतः ॥
चामरी पुं स्त्री घोटकः इति
त्रिकाण्डशेषः ॥
चामीकरं क्ली स्वर्णं धुस्तूरः ॥
इत्यमरः ॥
चामुण्डा स्त्री दुर्गा इतिजटाधरः
मातृकाभेदः इतिशब्दरत्नावली
तत्पर्यायः चर्विका २ चर्ममुण्डा ३
मार्जारकर्णिका ४ कर्णमोटी ५ मह
गंधा ६ भैरवी ७ कापालिनी ८
इतिहेमचन्द्रः अस्याध्यानं यथा
कालीकरालवदना विनिष्क्रान्तासि
पाशिनी विचित्रखट्वांगधरा ॥
नरमाला विभूषणा द्वीपि ॥
चर्मपरीधाना शुष्कमांसातिभैरवा
अतिविस्तारवदना जिह्वाललन
भीषणा निमग्नारक्तनयनानादा
पूरित दिङ्मुखा अस्याः ॥
चामुण्डेति नामकारणं यथा ॥


यस्माच्चण्डं च मुण्डं च गृहीत्वा त्वमुपा
गता चामुण्डेति ततो लोके ॥
ख्याता देवि भविष्यसि इति
चण्डी ॥
चांपिला स्त्री नदी इति
त्रिकाण्डशेषः ॥
चाम्पेयः पुं चंपकः नागकेशरः
इत्यमरः
चाम्पेयकं क्ली किंजल्कः इति
राजनिर्घण्टः ॥
चाम्य क्ली भक्ष्यभक्षणार्थचम
धातोः कर्मणि ण्यति निष्पन्नः
चाय ऋ न निशाने चाक्षुषज्ञाने
इतिधावत् अर्थे इति ॥
कविकल्पद्रुमः ॥
चारं क्ली कृत्रिमविषे इति ॥
हेमचन्द्रः ॥
चारः पुं पियालवृक्षः गतिः
बंधः अवसर्पः इति मेदिनी ॥
कारागारे इतिहेमचन्द्रः चरः ॥
यथा नृपोनिहन्याच्चारेण पर
राष्ट्रविचक्षणः इति युक्ति ॥
कल्पतरुः ॥
चारकः पुं अश्वादेः पालकः ॥
संचारकः बंधः इति मेदिनी ॥
पियालवृक्षः इतिराजनिर्घण्टः

चारटिका स्त्री नलीनामगंधद्रव्ये
इति राजनिर्घण्टः ॥
चारटी स्त्री पद्मचारिणीवृक्षः ।
इत्यमरः भूम्यामली इति ॥
राजनिर्घण्टः ॥
चारणः पुं नटविशेषः तत् ॥
पर्यायः कुशीलवः २ इत्यमरः
गंधर्वविशेषः यथा गंधर्वाणां
ततो लोकः परतः शतयोजनात्
देवानां गायनास्ते च चारणाः स्तुति
पाठकाः इतिपद्मे स्वर्गखण्डे ॥
चारभटः पुं वीरः इतिहेमचन्द्रः
चारवायुः पुं निदाघजवायुः इति
[illegible] त्रिकाण्डशेषः [illegible]
चारिणी स्त्री करुणीवृक्षः इति
राजनिर्घण्टः ॥
चारित्रं क्ली चरित्रं इतिहेमचन्द्रः
चारित्रा स्त्री तिंतिडीवृक्षः इति
शब्दरत्नावली ॥
चारुः पुं बृहस्पतिः मनोज्ञे ॥
त्रि इति मेदिनी ॥
चारुकः पुं शरबीजे अस्य गुणाः
मधुरत्वं रूक्षत्वं रक्तपित्त
कफापहत्वं शीतत्वं लघुत्वं
अवृष्यत्वं कषायत्वं वातकोपनत्वं
च । इतिभावप्रकाशः ॥



चारुकेशरा स्त्री नागर मुस्ता ॥
तरुणीपुष्पं इतिराजनिर्घंटः ॥
चारुगर्भः पुं श्रीकृष्णपुत्रः यथा
चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम ॥
एवच इति हरि वंशः ॥
चारुगुप्तः श्रीकृष्णपुत्रः यथा।
सुषेणश्चारुगुप्तश्च चारुविंदश्च।
वीर्य्यवान् इति हरिवंशः ॥
चारुदेष्णः पुं रुक्मिण्यां श्रीकृष्ण
पुत्रः यथा द्वितीयश्चारुदेष्णश्च।
हस्तिसिंहो महा रथः इति
हरिवंशः ॥ (षः
चारुधारा स्त्री शची इतित्रिकांडशे
चारुधामा इत्यपि पाठः
चारुनालकं क्ली रक्तपद्मे इति
पुराणे ॥
चारुपर्णी स्त्री प्रसारणी गंधं
भादालिया इति भाषा इति
राजनिर्घंटः ॥
चारुफला स्त्री द्राक्षा इति
राजनिर्घंटः ॥ (स्य
चारुमती स्त्री रुक्मिण्यां श्रीकृष्ण
कन्या यथा चारु बाहुः ॥
कनीयांश्च कन्या चारुमती तथा
इति हरि वंशः ॥
चारुलोचनः पुं हरिणः इति
त्रिकांड शेषः ॥
चारुवर्द्धना स्त्री नारी इति ॥
राजनिर्घंटः ॥ (था
चारुवाहुः पुं श्रीकृष्णपुत्रः य
चारुवाहुः कनीयांश्च कन्या चारु
मती तथा इतिहरिवंशः ॥
चारुविंदः पुं श्रीकृष्णपुत्रः यथा
सुषेणश्चारुगुप्तश्च चारुविंदश्च
वीर्य्यवान् इतिहरिवंशः ॥
चारुव्रता स्त्री मासोपवासिनी
इति त्रिकांडशेषः ॥
चारुशिला स्त्री मणिः इति
त्रिकांड शेषः ॥ (लेपन
चार्च्चिक्यं क्ली चंदनादिना देहवि
विशेषः तत्पर्य्यायः चर्चा २
स्थासकः ३ इत्यमरः चर्च्चिक्यं ॥
४ इति भरतः ॥
चार्म्मः पुं चर्म्माच्छादितरथः इति
भरतः चर्म्माकृत द्रव्ये त्रि ॥
चार्म्मणं क्ली चर्मसमूहः इत्यमरः
टीकायां भरतः ॥
चार्मिणं क्ली चर्मिणांसमूहः
इत्यमरटीकायां स्वामी ॥
चार्वाकः पुं तार्किकविशेषः तत्
पर्य्यायः वार्हस्पत्यः २ नास्तिकः ३
लौकायतिकः इतिहेम चंद्रः ॥

सवश्चाकाश भिन्नभूतचतुष्टयवादी
प्रत्यक्ष मेके चार्वाकाः इति ॥
न्यायसंग्रहः दुर्य्योधनसखराक्षस
विशेषः इति महा भारते ॥
चार्वी स्त्री कुवीरपत्नी ज्योत्स्ना ॥
बुद्धिः शोभना इतिमेदिनी ॥
दीप्तिः इति शब्दरत्ना वली ॥
चालः पुं स्वनामख्यातगृहाच्छादने
तत्पर्य्यायः पिटं २ इति ॥
त्रिकांडशेषः पटलं ३ छदिः ४
इत्यमरः स्वर्णचूडपक्षी इति
भूरिप्रयोगः ॥
चालकः पुं अंकुश दुष्टो हस्ती
इति त्रिकांडशेषः ॥
चालनं क्ली चालनी इत्यमर ॥
टीकायां भरतः ॥ (दि
चालनी स्त्री स्वनामख्यातशस्या
चालनपात्रे तत्पर्य्यायः तितउः
२ इत्यमरः चाचनं ३ वहु ॥
छिद्रा ४ इति भरतः
चाषः पुं स्वर्णचातकः सोणचञ्चु
इतिख्यातः नीलकंठ इतिकचित्
ख्यातः इत्यमरटीकायां भरतः
तत्पर्य्यायः किकीदिविः २ ॥
नीलांगः ३ शुभदर्शनः ४
राजनिर्घंटः ॥
चासः पुं चावपक्षी इक्षुः ॥
इति मेदिनी ॥
चाक्षुषं क्ली प्रत्यक्षविशेषः तत्तु
चक्षुरिंद्रिय जन्य ज्ञाने द्रव्य ॥
चाक्षुषे प्रतिबंधः संयोगः कारणं
द्रव्यसमवेत चाक्षुषे प्रतिबंधः
संयुक्त समवायः द्रव्य समवेत ॥
समवेतचाक्षुषे प्रतिबंधः संयुक्त
समवेत समवायः इतिसिद्धांत
मुक्तावली तथाच द्रव्यग्रहस्तु
संयोगात् संयुक्त समवायतः ॥
द्रव्येषु समवेतानां तथा तत्
समवायतः तत्रापिसमवेतानां
शब्दस्य समवायतः तद्वृत्तीनां
समवेत समवायेनतुग्रहः इति
भाषा परिच्छेदः ॥ (तो
चाक्षुषः पुं षष्टमनुः अस्मिन्मन्व
अजित नामको विष्णोरवतारः
मंत्रद्रुम इंद्रः आप्यादयो देवाः
हर्य्यश्म वीरकादयः पुरु ॥
पुरुष सुद्युम्नादयो मनु पुत्राः
इति श्री भाग वते ॥
चि ञ चित्यां चयने इति ॥
कविकल्प द्रुमः ॥ (मः
चि म नचित्यां इतिकविकल्पद्रु
चिकिम चित्यां इतिकविकल्पद्रुमः



चिकित्सकः पुं चिकित्सा कर्त्ता ॥
तत्पर्य्यायः रोगहारी २ ॥
अगदङ्कारः ३ भिषक् ४ वैद्यः ५ ॥
इत्यमरः तस्य लक्षणं यथा।
आयुर्वेद कृताभ्यासः सर्वेषां ॥
प्रियदर्शनः आर्य्यशीलगुणोपेत
एषवैद्यो विधीयते इति।
चाणक्यः ॥
चिकित्सा स्त्री रोगप्रतीकारः ॥
तत्पर्य्यायः रुक्प्रतिक्रिया २ ॥
इत्यमरः उपचारः ३ उपचर्य्या ॥
४ निग्रहः ५ वेदनानिग्रहः ६ क्रिया
७ उपक्रमः ८ शमः ९ इति
राजनिर्घण्टः चिकित्सितं १० ॥
प्रतीकारः ११ भिषग्जितं १२ ॥
इति रत्नमाला ॥ सात्रिधा यथा
आसुरी मानुषी दैवी चिकित्सा ॥
सा त्रिधा मता सूतप्रधाना दैवी ॥
स्यात् छेद भेदात्मिका सुरी ॥
मानुषी षड्रसा ज्ञेया जपहोमादि
संस्कृता कलौ चाल्पबले लोके ॥
मानुषी तत्र पूजिता इति।
वैद्यके तस्या लक्षणं यथा
याभिः क्रियाभिर्जायन्ते शरीरे।
धातवः समाः सा चिकित्सा ॥
विकाराणां कर्मतद्भिषजां मतं

या तूदीर्णं शमयति नान्यं व्याधिं।
करोति वा सा क्रिया न तु या व्याधिं
हृत्वान्यमुदीरयेत् चिकित्सा ॥
विष्णुपदेशो यथा जात मात्र
श्चिकित्स्यः स्यान्नोपेक्ष्योल्पतया
गदः वह्निशत्रु विषैस्तुल्यः स्वल्पो
ऽपि विकरोत्यसौ रोगमादौ ॥
परीक्षेत ततो नेतर मौषधं ॥
ततः कर्म्म भिषक् पश्चात् ज्ञान
पूर्वं समाचरेत् औषधं केवलं ॥
कर्त्तुं यो जानाति न चौषधं ॥
वैद्य कर्म्म स चेत् कुर्य्यात् वधमर्हति
राजतः आदावेते रुजो ज्ञाने ॥
प्रयत्नेन चिकित्सकः भेषजानां।
विधानेषु ततः कुर्य्यात् चिकित्सितं
प्रीते प्रीत प्रतीकारं मुखे ॥
वास्प निवारणं कृत्वा कुर्य्यात् क्रियां
प्राप्तां क्रियाकाले न हापयेत् ॥
अप्राप्ते वा क्रियाकाले प्राप्ते वा न
क्रिया कृता क्रियाहीनातिरिक्ता च
साध्येष्वपि न सिध्यति क्रिया यास्तु
गुणलाभे क्रिया मन्या श्रेयो ॥
जयेत् पूर्वंस्या पंणतवेगायो न
क्रियासंकरो मतः चिकित्सा ॥
फले यथा क्वचिदर्थः क्वचिन्मैत्री
क्वचिद्धर्मः क्वचिद्यशः कर्म्माभ्यासः

क्वचिच्चेति चिकित्सा नास्ति निष्फलं
चिकित्सोगानि यथा रोगी।
हृतो भिषग्दीर्घमायुर्द्ध्यो वसेवकः
सद्दोषधं चिकित्सायामित्यगानि
बुधा जगुः इतिभावप्रकाशः ॥
चिकित्सितं क्ली चिकित्सा इति
रत्नमाला कृतप्रतीकारे त्रि
चिकिणः त्रि चिपिटनासिकः इति
केचित् ॥
चिकिलः पुं पंकः इति हेम चन्द्रः।
चिकीर्षा स्त्री कर्त्तुमिच्छा करिबार
वाञ्छा इतिभाषा इति मुग्धबोधे।
चिकीर्षुः त्रि कर्त्तुमिच्छुः कारणेच्छा
विशिष्टः इति व्याकरणं ॥
चिकुरः पुं केशः सर्पः ॥
पर्वतः पक्षिभेदः वृक्ष ॥
विशेषः गृहबभ्रुः तरलः
इति मेदिनी ॥
चिकुरः त्रि चपलः सत्तु दोष ॥
मनिश्चित्य बध बन्धनादेः कर्त्ता
इत्यमरः ॥
चिकुरपक्षः पुं कचसमूहः केश
समुदयः इत्यमरः ॥
चिकुरपाशः पुं केशसमूहः ॥
इत्यमरः ॥
चिकुरहस्तः पुं केशसमूहः ॥

इत्यमरः ॥
चिकूरः पुं केशः इति ॥
शब्दभेद प्रकाशः ॥
चिक्कणपीडने इति कविकल्पद्रुमः
चिक्कः पुं छुछुन्दरी इति ॥
त्रिकाण्डशेषः ॥ (कणा
चिक्कणं त्रि स्निग्धव्यञ्जनादि चि
इतिभाषा इत्यमरः ॥
चिक्कणः पुं पूगवृक्षः तत्फले क्ली
इति राजनिर्घण्टः ॥
चिक्कणा स्त्री उत्तमा गौः तत्
पर्य्यायः नैचिकी २ इति ॥
शब्दचन्द्रिका पूगफले इति ॥
राजनिर्घण्टः ॥
चिक्कणी स्त्री पूगफले इति
राजनिर्घण्टः ॥
चिक्कसः पुं यवचूर्णं इति ॥
हेम चन्द्रः ॥
चिक्का स्त्री पूगफले इति ॥
राजनिर्घण्टः ॥
चिंगटः पुं मत्स्यविशेषः गल्दा
चिंगड़ा इति मोचा चिंगड़ी इति च
भाषा तत्पर्य्यायः महाशल्कः २
इति हारावली अस्य गुणाः ॥
गुरुत्वं ग्राहित्वं मधुरत्वं बल ॥
वर्द्धनत्वं मेदः पित्तास्रनाशित्वं ॥



रूक्षत्वे रेचनत्वे कफ वात ॥
कारित्वेच इतिराज वल्लभः ।
चिंगटी स्त्री मत्स्यवि शेषः
चुषाचिंगडी इतिभाषा अस्य ।
गुणाः मधुरत्वे रूक्षत्वे वात
नाशित्वे स्लेष्मकारित्वे गुरुत्वेच
इति राजवल्लभः ॥
चिंगडः पुं चिंगट मत्स्यः इति
शब्दमाला ॥
चिचिंडः फलविशेषःचिचिंडा
इतिचिचिंगा इतिच भाषा ।
तत्पर्य्यायः श्वेतराजिः २सुदीर्घः
३ गृहकूलकः ४ अस्यगुणाः वात
पित्तनाशित्वे पथ्यत्वे बलरुचि ॥
कारित्वे शोषिणांऽतिहितत्वे ॥
पटोलतः किंचिद्गुणहीनत्वेच
७ इति भाव प्रकाशः ॥
चिंचा स्त्री तिंतिडीवृक्षः इत्यमरः
चिंची स्त्री गुंजा इति केचित्
चिंचाम्लं क्ली अम्लशाकः इति
राजनिर्घंटः ॥
चिंचासारः पुं अम्लशाकः इति
राजनिर्घंटः ॥
चिंचोटकः पुं तृणविशेषः ॥
चेंचको इतिचेंचुडा इतिच भाषा
तत्पर्य्यायः अंकलोडः २ इति ।

रत्नमाला चिंचाटकोपिपाठः ॥
चिट प्रेषे इतिकविकल्प द्रुमः ॥
छिट क प्रेषे इतिकविकल्पद्रुमः
चित इ ज्ञाने इतिकविकल्पद्रुमः
चितक उ ज्ञाने इतिकविकल्पद्रुमः
चित इ क स्मृतौ इतिकविकल्पद्रुमः
चित् स्त्री ज्ञाने इत्यमरः ॥
चित् अ असाकल्य इत्यमरः
यथा किंचित् कश्चित् इत्यादि ।
चितः त्रि छन्नः इति मेदिनी ॥
चिता स्त्री शवदाहाधार चुल्ली
तत्पर्य्यायः चित्या२ इत्यमरः ॥
काष्ठमटी ३ चैत्ये ४ चिताचूडके ॥
५ चित्ये ६ इति त्रिकांडशेषः ॥
चितिः ७ संहतिः इति मेदिनी
चिताचूडकं क्ली चिता इति
त्रिकांडशेषः ॥
चितिः स्त्री चितासमूहः इति
मेदिनी सैषादिष्टिकाक्षेप्या
ज्ञानार्थीक विशेषः तस्य सूत्रे
यथाउक्तयेण गुणिते चितेरपि
क्षेत्र संभव फलं घनं भवेत् ॥
इष्टका घन हृते घने चिति ॥
श्चेष्टका परिमितिश्च लभ्यते
इष्टकोच्छ्रय हृडछितिः श्रितेः ॥
सुखराश्च दृषदो चितेरपि ॥

उदाहरणं यथा अष्टादशांगुले ।
दैर्घ्ये विस्तारे द्वादशांगुलः
उच्छ्रिति स्त्र्यंगुला यासामिष्टका
स्ताश्चितौकिल इतिलीलावती
चितिका स्त्री कटिशृंखला इति
हारावली ॥ (२००
चित्तं क्ली अनुसंधानात्मिकांतःक
रणवृत्तिः इति वेदांतः यत्र सत्व ॥
गुणं स्वच्छं शांतं भगवतः पदं
यदाहुर्वासुदेवाख्यं चित्तं ।
तन्महदात्मकं स्वच्छत्वमविकारित्वं
शांतत्व मिति चेतसः प्रवृत्ति ॥
लक्षणं प्रोक्तं यथापां प्रकृतिः ।
परा इति श्रीभाग वतं ॥
अस्यार्थः अधिभूत स्वरूपेण ।
तस्यैव महानिति संज्ञा अध्यात्म
रूपेण चित्तं उपास्य रूपेण ॥
वासुदेवः अधिष्ठातात् तस्य ।
क्षेत्रज्ञः इति श्रीधर स्वामी ॥
मनः इत्यमरः ॥
चित्तप्रसन्नता स्त्री हर्षः इति
हेमचंद्रः ॥
चित्तविप्लवः पुं उन्मादः इति ।
हेमचंद्रः ॥
चित्तविभ्रमः पुं उन्मादःइत्यमरः ।
चित्तसमुन्नतिः स्त्रीमानः इत्यमरः ।

चित्ताभोगः पुं एकस्मिन् विषये
मनसः पुनः पुनः प्रवृत्तिः तत्
पर्य्यायः मनस्कारः २ इत्यमरः ॥
चित्तोन्नतिः स्त्री गर्वः इति
हेमचंद्रः ॥
चित्त्यं क्ली चिता इति त्रिकांडशेषः
चित्यः पुं अग्निः इतिमुग्धबोधे
चित्या स्त्री चिता इत्यमरः ॥
चित्र त क हरणिके दाणि ॥
लेख्ये अद्भुते इति ॥
कविकल्पद्रुमः ॥
चित्रं क्ली तिलके आलेख्ये ॥
अद्भुते कर्बुर वर्णः तद्युक्ते त्रि ॥
इति मेदिनी आकाशः कुष्ट
विशेषः इति हेमचंद्रः ॥
चित्रः पुं यम विशेषः यथा ॥
वृकोदराय चित्राय चित्रगुप्ताय
वैनमः इति तिथ्यादि तत्वे ॥
कर्बुर वर्णः इत्यमरटीकायां ॥
भरतः पेरंडवृक्षः अशोक ॥
वृक्षः चित्रकवृक्षः इति ॥
राज निर्घंटः ॥
चित्रकं क्ली तिलकं इतिमेदिनी
चित्रकः पुं व्याघ्रः इतिहेमचंद्रः
व्याघ्रभेदः चितावाघ् इति ॥
भाषा तत्पर्य्यायः चित्रकायः २



उपव्याघ्रः ३ मृगान्तकः ४ शूरः ५
तरक्षुशार्दूलः ६ चित्रव्याघ्रः ७
वृक्षविशेषः चित इति भाषा
तत्पर्य्यायः अग्निः २ शार्दूलः ३
चित्रः ४ पाचीकटुः ५ शिखी ६
कृशानुः ७ दहनः ८ व्यालः ९
ज्योतिष्कः १० पालकः ११ अनलः
१२ दारुणः १३ वह्निः १४ पावकः
१५ धूवरः १६ पाठी १७ द्वीपी १८
चित्राङ्गः १९ शूरः २० अस्य गुणाः।
अग्निसमत्वं पाककटुत्वं शोफ।
कफार्त्तिवातोदरार्शोग्रहणीकृमि
कण्डूनाशित्वञ्च इति राजनिर्घण्टः।
पाके ऽग्नितुल्यत्वं कुष्ठनाशित्वं
इति राजवल्लभः। एरण्ड वृक्षः
इत्यमरः। चित्रकारः इति।
हेमचन्द्रः॥
चित्रकण्ठः पुं कपोतः इति॥
जटाधरः॥
चित्रकम्बलः पुं कम्बलविशेषः
दुलिचा गालिचा इत्यादि भाषा।
यथा कृषः स्त्रीपुंसयोश्चित्रकम्बले
पुंसि वर्हिवि इत्युणादिकोषः
चित्रकारः पुं वर्णसंकरजातिविशेषः
पटुया इति भाषा स तु शूद्रा॥
गर्भे विश्वकर्म्माऽत्सजातः इति

ब्रह्मवैवर्त्तपुराणे तत्पर्य्यायः॥
रङ्गाजीवः २ इत्यमरः॥
चित्रकर्मा पुं तिनिशवृक्षः इति
शब्दचन्द्रिका बहुव्रीहौ आश्चर्य्य
कर्म्मा चित्रकारश्च॥
चित्रकायः पुं व्याघ्रः इति॥
हेमचन्द्रः चित्रव्याघ्रः इति॥
राजनिर्घण्टः॥
चित्रकारः पुं चित्रकरः यथा
स्थपतेरपि गान्धिक्यां चित्रकारो
व्यजायत इति पराशरपद्धतिः
चित्रकूटः पुं पर्वतविशेषः॥
इति शब्दरत्नावली पुरा रामो
वने गत्वा प्रथमे यत्र वास॥
मकरोत् अधुना वेदेलखण्डाख्य।
देशे कामता इति ख्यातः॥
चित्रकृत् पुं तिनिशवृक्षः इत्यमरः
चित्रकरः इति हलायुधः॥
चित्रकोलः पुं अञ्जनिका इति
त्रिकाण्डशेषः॥
चित्रगन्धं क्ली हरिताले इति॥
राजनिर्घण्टः॥
चित्रगुप्तः पुं चतुर्द्दशयमान्तर्गत
यमः तस्य लेखकः इति॥
मेदिनी तस्योत्पत्ति र्यथा॥
ब्रह्मपादोत्पातः शूद्रमसीशौ द्वौ

बभूवतुः एको मसीशः सर्वाख्यः
सर्वाणि हृदय द्विजातकुलप्रदीपः
स्वीयानां ज्ञातीनां पूततास्पृहः।
वगलेति महाविद्यां गृहीत्वा
साधयन् मुदा सर्वाणि हृदयाख्यस
पण्डितस्य प्रसादतः वरं।
याचितवान् भक्त्या त्रिलोकाधि
पति गुरो कृपया कुरु मां नाथ त्व
मेव वगला मम गुरुणापि वरो।
दत्तो राज्यं भुक्त्वा पुनर्भवान्॥
त्रिलोकाधिपति र्भूत्वा मुदा तत्र
स्थास्यसि गुर्वीत्तया मसीशः स
राज्यभोगी द्विजाज्ञानात् विहाय
देहं भूपश्च त्रियारूपा बभूवह॥
चित्रगुप्त श्चित्रसेनश्चित्राङ्गदः।
देहं भूपश्च त्रिधा रूपा बभूवह
चित्रगुप्त श्चित्रसेन श्चित्राङ्गद॥
इति त्रयः स्वर्गे मर्त्ये च पाताले
राजते चिरमुत्तमः चित्रगुप्तो॥
महाविद्याप्राप्यकुलाख्यविप्रतः
पुत्रान्याचितवांश्च वगरोर्देवल
मावहन् यमान्तिस्था बभूवापि
सर्वमत्याथो विवेचकः शिरः शुभा
शुभकर्म्म विविच्याथ मनोतिके।
यद्दत्त सकल्लानोत तदेवा॥
भोजयद्यमः इत्याचारनिर्णय॥
तेन अस्यात् यत्यते कायस्थ॥
शोहे इष्टद्य॥

चित्रजल्पः पुं वाक्यविशेषः यथा
प्रेष्ठस्य सुहृदालोके गूढरोषाभि
जृम्भितः भूरि भावमयो जल्पो
यत्तीव्रोत्कण्ठितोत्तिमः चित्र
जल्पो दशाङ्गोयं प्रजल्पः परि
जल्पितं विजल्पोज्जल्पसंजल्पा
अवजल्पोऽभिजल्पितं आजल्पः
प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितं
इत्युज्ज्वल नील मणिः॥
चित्रतण्डुलं क्ली विडङ्गे इति
रत्नमाला॥
चित्रतण्डुला स्त्री विडङ्गे इत्यमरः
चित्रत्वक् पुं भूर्जवृक्षः इति
राजनिर्घण्टः॥
चित्रदण्डक पुं तलवृक्षः इति
राजनिर्घण्टः॥
चित्रदण्डकः पुं तलवृक्षः इति
रत्नमाला॥
चित्रदेवी स्त्री महेन्द्रवारुणी॥
इति राजनिर्घण्टः॥
चित्रनेत्रा स्त्री सारिकापक्षी इति
हारावली॥
चित्रपत्रिका स्त्री कपित्थपर्णीह
इति रत्नमाला द्रोणपुष्पी इति
राजनिर्घण्टः॥
चित्रपर्णी स्त्री जलपिप्पली इति
राजनिर्घण्टः॥
चित्रपदा स्त्री गाथापदीलता॥



इति शब्दमाला छंदो भेदः। इतिछंदोमंजरी अस्यलक्षणादि छंदः शब्दे द्रष्टव्यं ॥

चित्रपर्णिका स्त्री चित्रपर्णीभेदः तत्पर्य्यायः दीर्घा २ शृगालविन्ना। ३ त्रिपर्णी ४ सिंहपुच्छिका ५। दीर्घपत्रा ६ अतिगुहा ७ ध्रुष्टिला ८ इति रत्नमाला ॥

चित्रपर्णी स्त्री पृश्निपर्णी इत्यमरः कर्णस्फोटालता जलपिप्पली द्रोणपुष्पी इति राजनिर्घंटः। मंजिष्ठा इति रत्नमाला ॥

चित्रपक्षः पुं तित्तिरपक्षी ॥ इतिजटाधरः ॥

चित्रपादा स्त्री सारिका पक्षी॥ इतिहारावली ॥

चित्रपिच्छकः पुं मयूरः इति राजनिर्घंटः ॥

चित्रपुंखः पुं शरः इति ॥ त्रिकांडशेषः ॥

चित्रपुष्पी स्त्री अंबष्ठा इति राजनिर्घंटः ॥

चित्रपृष्ठः पुं कलविंकपक्षी॥ इतिहारावली ॥

चित्रफलः पुं मत्स्यविशेषः॥ चितल इतिभाषा अस्यगुणाः गुरुत्वं स्वादुत्वं स्निग्धत्वं वृष्यत्वं बलप्रदत्वंच इतिराजवल्लभः॥

चित्रफलकः पुं चित्रफलमत्स्यः इतिभूरि प्रयोगः ॥

चित्रफला स्त्री चिर्भिटा मृगेर्वारुः लिंगिनी महेंद्र वारुणी ॥ वार्त्ताकी कंटकारी इति राजनिर्घंटः मत्स्यविशेषः॥ फलुइ इति भाषा तत्पर्य्यायः राजग्रीवः २ फलकी ३ महोन्मदः ४ इति शब्दरत्नावली ॥

चित्रभानुः पुं अग्निः ॥ सूर्य्यः इतिमेदिनी चित्रक वृक्षः॥ अर्कवृक्षः वह्निसंज्ञक इति अर्काह्व इति वामरदर्शनात भैरवः इतिशब्दरत्नावली

चित्रभेषजा स्त्री काकोडुंबरिका इति राजनिर्घंटः ॥

चित्रमेखलः पुं मयूरः इति त्रिकांड शेषः ॥

चित्रयोधी पुं अर्जुनवृक्षः इति राजनिर्घंटः पार्थश्च ॥

चित्ररथः पुं सूर्य्यः गंधर्वविशेषः इतिमेदिनी शेषस्यपर्य्यायः गंधर्वराजः २ अंगारपर्णः ३ कुबेरसखः ४ दग्धरथः ५ सत

मुनिनाम्नो दक्षकन्यायांकश्यपो त्सज्जातः इति महा भारते ॥

चित्रलः पुं कर्बुरवर्णः तद्वतित्रि इतिशब्दरत्नावली ॥

चित्रलता स्त्री मंजिष्ठा इति। राजनिर्घंटः ॥

चित्रला स्त्री गोरक्षीवृक्षः इति राजनिर्घंटः ॥

चित्रलेखा स्त्री अप्सरोविशेषः सा ऊषायाः सखी यथा उवाच हदंतीचैव कुंभांडतनया सखी कृशाला ते विशालाक्षि सर्वथा संधि विधेह अप्सराश्चित्रलेखा वैदिशे विज्ञाप्यतांसति इति। हरिवंशः कुंभांडकन्या यथा बाणस्यमंत्री कुंभांडश्चित्रलेखा च तत्सुता सख्युश्चकृतसखीवृषो कौतूहल समन्विता इति श्रीभागवते छंदोविशेषः ॥ इतिछंदोमंजरी अस्यविवरणं छंदः शब्दे द्रष्टव्यं ॥

चित्रलोचना स्त्री सारिकापक्षी इतिजटाधरः भूरिप्रयोगश्च।

चित्रवदालः पुं पाठीनमत्स्यः इतिजटाधरः ॥

चित्रवल्लिकः पुं वदालमत्स्यः इतिहेमचंद्रः ॥

चित्रवल्ली स्त्री मृगेर्वारुः महेंद्र वारुणी इतिराजनिर्घंटः ॥

चित्रवीर्य्यः पुं रक्तैरंडः इति ॥ राजनिर्घंटः ॥

चित्रशिखंडिजः पुं वृहस्पतिः इत्यमरः ॥

चित्रशिखंडिप्रसूतः पुं वृहस्पतिः इतिहलायुधः ॥

चित्रशिखंडी पुं सप्तर्षयः इत्यमरः यथामरीचि रंगिरा अत्रिः ॥ पुलस्त्यः पुलहः क्रतुः वशिष्ठश्चेति सप्तैते ज्ञेया श्चित्रशिखंडिनः ॥ इति भरतः ॥

चित्रसर्पः पुं मालुधानसर्पः इति शब्दरत्नावली ॥

चित्रसेनः पुं ब्रह्मपादजमसीशाख्य कायस्थस्य चित्रगुप्तादि त्रितयांते गत मूर्त्तिविशेषः सतु मर्त्यलोक विवेचकः यथा चित्रसेने महा वियां वगलेति गुरोर्नयन् ॥ जन्मासंतोष्यपुत्रादीन्याचित्वा प्राप्य मर्त्यतः राज्यंचकार स्वपुत्रश्चित्रांगाद अथो गतः इत्याचार निर्णयतंत्रे ॥

चित्रा स्त्री श्रीकृष्णसखीविशेषः



यथापरमश्रेष्ठ सख्यस्तु ललिता
सविशाखिका सचित्राचंपकलता
तुंगविद्येंदुलेखिका रंगदेवी ॥
सुदेवी चेत्यष्टौ सर्वगुणाग्रिमाः।
इत्युज्वलनीलमणिः अस्याकुंज
श्रीकुंडस्य पूर्वस्यां आनंद ॥
सुखदो नाम वयः अष्टमासाधिक
त्रयोदशवत्सरं वर्णो गौरः।
अस्या वस्त्रं जातीपुष्पतुल्यं कर्म
चित्रे इति गोस्वामि ग्रंथः ॥
मूषिकपर्णी गोडुंबा सुभद्रा ॥
दंतिका माया सर्पभेदः ॥
नदीविशेषः इति मेदिनी ॥
अप्सरोविशेषः इतिहेमचंद्रः।
अश्विन्यादि सप्तविंशतिनक्षत्रांत
र्गत चतुर्दश नक्षत्रं तत्र मुक्ता।
वदुज्वलं एकतारकामयं अस्य
अधिष्ठात्री देवता विश्वकर्मा यथा
एकमौक्तिक समुज्वल प्रभे।
त्वष्टृदैवत वदने खमध्यगे इति
कालिदासः तत्रजातस्य ॥
फलं यथा शत्रुसंतापित ॥
शास्त्रपत्नी दक्षो नये चापि।
विचित्रवासाः प्रसूतिकाले यदि
यस्य चित्रा वदति विचित्रा खलु।
तस्यप्रणाह्ये इति कोष्ठीप्रदीपः


श्वेतवीरुः गोडदूर्वा ॥
सत्तश्रेणी मंजिष्ठा इति ॥
राजनिर्घंटः छेदविशेषः ॥
इति छेदोमंजरी अस्य विवरणं
छेदः शब्दे द्रष्टव्यं ॥
चित्रांगं क्ली हिंगुले हरिताले
इति राजनिर्घंटः ॥
चित्रांगः पुं चित्रकः रक्तचित्रकः
सर्पः इति राजनिर्घंटः
चित्रांगदः पुं चंद्रवंशीय राज
विशेषः सत शांतनुराजपुत्रः
विचित्रवीर्यभ्राता गंधर्वविशेषः
इति महाभारते ब्रह्मपादजः।
मसीधाख्यकायस्थस्य चित्रगुप्तात्
त्रितयांतर्गत सत्वविशेषः स
अधोलोक विवेचकः तस्याधो
गमनकारणं यथा अधोगतस्य
हेमंते वगले भृणु कालिके
वगलेति मंत्रं प्राप्य विप्रः॥
स्वामिति वांछया तपश्चकार
पंचाहं नान्यत किंचिद् गृहीतवान्
फलमूलादिकं किंचित सायमत्ति
यथा मिलेत् विहाय विषस्य
गुरोरपि पूजां च पार्वति ॥
जपेन्नित्यं हि वगला मन्त्रविशेष
नेत्थं यन् ज्ञात्वेति ब्राह्मणः

सर्वे ऊचुश्चित्रांगदं कुथा वचो ॥
हिमधुरं किंचित प्रियाद्भुतान्तु ॥
सुंदरि रे चित्रांगद अज्ञस्त्वं ॥
वत्स विप्रत्वमिच्छसि कदाप्युपानत्
मस्तके नैवेति नहि बुध्यसे ॥
वत्स शीघ्रं मथो गच्छ चिरं कुरु ॥
तपोमुदा चित्रांगदः शृणु ॥
कृत्वा ब्राह्मणान् तुष्टाव ततो।
ब्राह्मणा लज्जिताः संतस्तमुवाच
हे चित्रांगद हे तात वत्स त्वं ॥
नोत्सवः किल उत्थितो कुरु ॥
सातातभद्र ते कथयामि भोः ॥
जनस्तयो वलेनैव सहं ॥
भवितु महति नार्हतीशो विना
तातब्राह्मणो भवितुं किल ॥
इतीश्च राज्ञा वेदे लिप्रतिजानीहि
तत्वतः वरं प्राप्नोति देवत्वं ॥
ब्राह्मणत्वं कदापिन यथामरत्वं।
मीशेन विनाक्वापि नशासने ॥
नोत्सव त्वमेथा गच्छसत्वेन ॥
वगलोजप कलेर्हि सहस्राणि
नागलोकेश्वरो भव तत त्वि ॥
लोकनाथस्त्वमिद्र तुल्याभविष्यसि
राज्यं भक्त्या ततो नैव पुनरा ॥
वर्ण्णने तवसदा वयं तव शिवं ॥
चिंतयामो नभी कुरु तात गच्छ ॥

सर्वभुक् त्वनागलोके पिविल्लसात्
ततश्चानंदमनसा गतश्चित्रांगद।
स्थले इत्याचार निर्णय तंत्रे ॥
चित्रांगदसूः स्त्री सत्यवती सा ॥
व्यासमाता इति त्रिकांडशेषः ॥
चित्रांगी स्त्री मंजिष्ठा कर्णजलौकाः
इति राजनिर्घंटः ॥
चित्राटीरः पुं चंद्रः घंटाकर्णः ॥
वलिक्षागास्रविंडभिरंकितभालः
इति मेदिनी ॥
चित्रापूपः पुं पिष्टकभेदः ॥
चित इपिटा इतिभाषा तत् ॥
पर्य्यायः चरुव्रणः २ इति
त्रिकांडशेषः ॥
चित्रायसं क्ली तीक्ष्णलोहं इति
राजनिर्घंटः ॥
चित्राक्षी स्त्री सारिकापक्षी इति
त्रिकांडशेषः ॥
चित्राक्षुपः पुं द्रोणपुष्पी इति
राजनिर्घंटः ॥
चित्रिकः पुं चैत्रमासः इति
शब्दरत्नावली ॥
चित्रिणी स्त्री पद्मिन्यादि चतुर्विध
स्त्रीमध्ये स्त्रीविशेषः सामीन गंधा
तस्यालक्षणं यथा भवति ॥
इति रसज्ञानाति दीर्घीनखवी ॥

तिलकुसुम सुनासा स्निग्ध॥
देहोत्पलाक्षी कठिन घन॥
कुचाढ्या सुंदरी सा सुशीला ॥
सकलगुणविचित्रा चित्रिणीचित्र
वक्त्रा इतिरतिमंजरी ॥
चित्रेशः पुं चंद्र इति शब्दचंद्रिका।
चित्रोक्तिः स्त्री आकाशवाणी इति
त्रिकांडशेषः आश्चर्यकथनेच॥
चित्रौदने स्त्री विचित्रान्ने इति
ग्रहयज्ञतत्वे ॥
चिद्रूपः त्रि हृदयालुः इति।
हेमचंद्रः स्फूर्तिमान् इति
भूरिप्रयोगः ज्ञानमयः यथा
चिद्रूपीपरमात्मनेतियोगशास्त्रे ॥
चिंता स्त्री चिंतना चिंतने॥
तत्पर्य्यायः स्मृतिः २ आध्याने ३।
इत्यमरः आध्या ४ ध्याने ५
चिंतितिः ६ इतिशब्दरत्नावली॥
चिंतिया ७ इतिरभसः दर्शन॥
संभोगयोः प्रकारः भावना इति
रसमंजरी ॥
चिंतामणिः पुं ब्रह्मा इति
शब्दरत्नावली बुद्धविशेषः इति
त्रिकांडशेषः।मणिविशेषः यथा
सामर्थ्यं संपादित वांछितार्थं ॥
श्चिंतामणिःस्यात्तकर्थ हनूमान्॥
इति भट्टिः स्पर्शमणिः तथाच॥
यथा चिंतामणिं स्पृष्ट्वा लोहं॥
कांचनतांभजेत् इति॥
पाद्मोत्तरखंडे ॥
चिंतावेश्म स्त्री मंत्रणा गृहे॥
तत्पर्य्यायः दार्वटं २ इति॥
हारावली ॥
चिंतिडी स्त्री तिंतिडी इति
द्विरूपकोषः इति कश्चित्
चिंतितं त्रि कृतचिंतनं ॥
यच्चिंतितं तदिह दूरतरं प्रयाति॥
यच्चेतसा न गणितं तदिहा॥
भ्युपैति इत्युद्भटः कर्महरिके॥
चिंतायुक्तः भावुके चिंता॥
चिंतितिः स्त्री चिंता इति॥
शब्दरत्नावली ॥
चिंतिया स्त्री चिंता इति॥
त्रिकांडशेषः ॥
चिन्नः पुं अस्पविशेषः चिना॥
इति भाषा इति शब्दचंद्रिका ॥
चिपिटः पुं भक्ष्यद्रव्यविशेषः
चिड़ा इति भाषा तत्पर्य्यायः ॥
पृथुकः २ इति हेमचंद्रः॥
चिपिटकः ४ इत्यमरः चिपुटः॥
५ इतिभरतः धान्यचमसः॥६
इति त्रिकांडशेषः अस्यगुणाः॥

गुरुत्वे स्निग्धत्वे बृंहणत्वं ॥
कफवर्द्धकत्वंच ॥ क्षीर युक्तस्य॥
तस्य गुणाः बलकारित्वं वायु॥
नाशित्वं मलभेदकत्वंच इति
राजवल्लभः बृंहणत्वं हृद्यत्वंच॥
तस्य लक्षणं यथा शालयः सतुषा
आर्द्रा भृष्टा अस्फुटिता स्ततः॥
कुट्टिताश्चिपिटाः प्रोक्तास्तेस्मृताः
पृथुका अपि इति भावप्रकाशः।
शालेया यावनालाद्याश्चिपिटाः
पुष्टि वर्द्धनाः इति राजनिर्घंटः॥
तस्य भक्षण विधिनिषेधौ यथा॥
हिः स्विन्न मन्नं पृथुकंमुद्गदेश।
विशेषकेनात्पतशालविषाणं।
भक्षणेच निवेदने अभक्ष्यंच ॥
यतीनांच विधवा ब्रह्मचारिणं॥
इति ब्रह्मवैवर्त्ते ब्रह्मखंडे ॥
चिपिटकः पुं चिपिटः इत्यमरः॥
चिपिटा स्त्री गुंडासिनीतृणे इति
राजनिर्घंटः ॥
चिपुटः पुं चिपिटकः इति॥
भरत धृत रुद्रकोषः ॥
चिमिः पुं शुकपक्षी इति
शब्द रत्नावली पट्टवृक्षः इति
शब्द माला॥
चिमिकः पुं शुकपक्षी इति
शब्द रत्ना वली ॥ (र्म
चिरकारी त्रि चिरक्रियः चिरेणक
रोतीति कर्तरि णिन् प्रत्ययः
चिरकाले स्त्री दीर्घकालः तत्
पर्य्यायः दीर्घरात्रं इति॥
त्रिकांड शेषः॥
चिरक्रियः त्रि चिरकालेनक्रिया
कारकः तत्पर्य्यायः दीर्घसूत्रः २
इत्यमरः ॥
चिरजीवकः पुं जीवकवृक्षः इति
जटाधरः ॥ (इति
चिरजी पुं विष्णु पुं विष्णु काकः
मेदिनी जीवकवृक्षः शाल्मलि
वृक्षः इति राजनिर्घंटः ॥
मार्कंडेयः अश्वत्थामा बलिः
व्यासः हनुमान् विभीषणः ॥
कृपः परशुरामः इति ॥
तिष्यादितत्वं बहुकालजीविनि
त्रि इतिजटाधरः ॥
चिरंजीवी पुं विष्णुः काकः
इति हेमचंद्रः जीवक वृक्षः॥
शाल्मलिवृक्षः इतिराजनिर्घंटः
चिरजीविनि त्रि ॥
चिरंटी स्त्री स्ववासिनी ऊढा अनूढा
वापितृ गेह स्थिता कन्या ॥
द्वितीयवयाः स्त्री साचयुवती इति



भरतधृत रुद्रः हेमचंद्रश्च ॥
चिरतिक्तः पुं वृक्षविशेषः चिरता
इति भाषा तस्य र्य्यायः ॥
चिरातिक्तः २ तिक्तकः अनार्य्य ॥
तिक्तकः ४ किराततिक्तः ५ भूर्निवः
६ किराततकः ७ सुतिक्तकः ८ ॥
इति शब्द रत्नावली ॥
चिरत्नः त्रि पुरातनः चिरकालोत
पन्नः इति जटा धरः ॥
चिरंतनः त्रि पुरातनः इत्यमरः ॥
चिरपाकी पुं कपित्थः इति
राज निर्घंटः ॥
चिरपुष्पः पुं वकुलवृक्षः इति।
राजनिर्घंटः ॥
चिरम् व्य चिरार्थ दीर्घकालार्थ
तत्पर्य्यायः चिराय २ चिर ॥
रात्राय ४ चिरस्य ४ चिरात् ५
चिरेण ६ इति हेमचंद्रः ॥
चिरमेही पुं स्त्री गर्द्दभः इति
हेम चंद्रः ॥
चिरंभणः पुं चिल्लः इति ॥
त्रिकांड शेषः ॥
चिररात्रं क्ली दीर्घकालः इति
हलायुधः ॥
चिररात्राय व्यदीर्घकालः इत्यमरः।
चिरविल्वः पुं करंजवृक्षः इत्यमरः ॥

चिर सूता स्त्री चिरप्रसूता गवी।
केलेन् गाइ इति भाषा तत् ॥
पर्य्यायः वस्कयनी २ इत्यमरः ॥
चिरस्थायी त्रि वहुकालस्थाता चिर
तिष्ठतीति कर्त्तरि णिन् प्रत्ययः ॥
चिरस्य व्य दीर्घकालः इत्यमरः ॥
चिराठिका स्त्री श्वेतपुनर्णवा इति
रत्नमाला चठिका पाताडी ॥
इति भाषा यथा गोमूत्र ॥
शुद्धस्य पुरातनस्य यद्वायसत्वाति
चिराठिकायाः इतिवैधके ॥
चिरात् व्य दीर्घकालः इति ॥
हेमचंद्रः ॥
चिरात् पुं गरुडः इति ॥
त्रिकांडशेषः ॥
चिरातिक्तः पुं चिरतिक्तः इति ॥
शब्द रत्ना वली ॥
चिराय व्य दीर्घकालः इति
हेम चंद्रः ॥
चिरायुः पुं देवता इति ॥
त्रिकांड शेषः चिरजीविनि त्रि
यथा भवतियदि मनुष्योगुर्वधीन्
श्चिरायुः इत्यागमः ॥
चिरिरमहिंसे इतिकविकल्पद्रुमः
चिरिः पुं शुकपक्षी इति ॥
त्रिकांड शेषः ॥

चिरंटी स्त्री ऊढा अनूढावा पितृ ॥
गृहस्थिता कन्या तत्पर्य्यायः ॥
सुवासिनी २ इत्यमरः चिरंटी ॥
३ सुवासिनी ४ इति भरतः ॥
द्वितीयवयाः स्त्री युवती इति
मेदिनी ॥
चिरिविल्वः पुं चिरविल्वः करंजवृक्षः
इत्यमरटीकायां भरतः ॥
चिरु क्ली वाहुसंधिः इति
शब्दचंद्रिका ॥
चिरे व्य चिरं इत्यमर टीकायां ॥
रायमुकुटः ॥
चिरेण व्य चिरं इतिहेम चंद्रः ॥
चिर्भटी स्त्री कर्कटी इतिहेम चंद्रः ॥
चिर्भिटा स्त्री कर्कटीभेदः चिभिडा
इति वेलसेद इतिच देशांतरीय ॥
भाषा तत्पर्य्यायः सुचित्रा २ ॥
चित्रफला ३ क्षेत्रचिर्भिटा ४ ॥
पांडुफला ५ पथ्या ६ रोचनफला
७ चिर्भिटिका ८ कर्कचिर्भिटा ९

इतिराजनिर्घंटः चिर्भिटं १०
धेनुडग्धं ११ गोरक्षकर्कटी १२ ॥

अस्यागुणाः मधुरत्वं रूक्षत्वं
गुरुत्वं पित्त कफापहत्वं ॥
अनुसत्वं ग्राहित्वं विष्टंभित्वंच ॥
पक्वाया अस्या गुणाः उष्णत्वं ॥
पित्तलत्वंच इतिभावप्रकाशः ॥
गौल्यत्वं दीपनत्वंच वालया ॥
अस्या गुणः तिक्तत्वं किंचिदम्ल
त्वंच शुष्काया स्तस्या गुणाःश्लेष्म
वातारुचि जाड्यनाशित्वं रोचन
त्वंदीपनत्वंच इतिराजनिर्घंटः ॥
चिल श वासे इतिकविकल्पद्रुमः
चिलमीलिका स्त्री कंठीभेदः ॥
खद्योतः विद्युत् इति ॥
मेदिनी ॥
चिलिचिमः पुं मत्स्यविशेषः ॥
चालियागडक इति ख्यातः ॥
इञ्चाक इत्यके इति भरतः ॥
तत्पर्य्यायः नलमीनः २ ॥
इत्यमरः तलसीनः ३ चिली ॥
चिमिः ४ चिलीचिमः ५ चिलिचीमः
६ चेलिचीमः ७ चिलीमः ८ चिलि
मीनकः ९ चिलिचीमिः १० कवलः
११ चिलीटकः १२ इति ॥
भरत धृत कोषांतरे चैंगो ॥
इतिख्यातो मत्स्यः तस्य गुणाः ॥
लघुत्वं रूक्षत्वं अनभिष्यंदित्वं ॥
वायुकारित्वं कफनाशि त्वंच
इतिराज वल्लभः ॥
चिल्ल शैथिल्य ॥ हाव कृतौ ॥
इति कविकल्प द्रुमः ॥
चिल्लः पुं पक्षिविशेषः चिल्



इतिभाषातत्पर्य्यायः आतायी ॥
२ इत्यमरः शकुनिः ३ आतायी ॥
४ इतिहेमचंद्रः खेश्रीतिः ५ ॥
कंठनीडकः ६ चिरिभणः ७ इति
त्रिकांडशेषः क्लिन्नचक्षुःक्लिन्ननेत्र
युक्ते त्रि इतिमेदिनी ॥
चिल्लका स्त्री फिल्लिका इति
शब्द रत्ना वली ॥
चिल्लभक्ष्या स्त्री हृद्दविलासिनी ॥
इति शब्दचंद्रिका ॥
चिल्लाभः पुं प्रसह्यचौरः हात ॥
छेंचड इति गांठिकाटा इतिच ॥
भाषा इति त्रिकांड शेषः ॥
चिल्ली स्त्री लोध्रःपत्रशाक भेदः ॥
तत्पर्य्यायः चिल्लिका २ डुली ३
अम्लोहिता ४ मृडपत्री ५ क्षार ॥
दला ६ क्षारपत्रा ७ वास्तुकी ८ ॥
महद्दला ९ गोडवास्तुकः १० अस्य
गुणाः वास्तुक तुल्यत्वं क्षारत्वं ॥
श्लेष्म पित्त प्रमेह मूत्रकृच्छ्र ॥
नाशित्वं पथ्यत्वं रुचिकारित्वंच ॥
इति राज निर्घंटः ॥ फिल्लिका।
इति शब्दरत्ना वली ॥
चिरिः पुं चिवुकं इति जटा धरः।
चिविटः पुं चिपिटः इत्यमरटीका।
चिविल्लिका स्त्री ॥
क्षुद्र क्षुप विशेषः ॥

तत्पर्य्यायः रक्तदला २ क्षुद्रचोली
३ मधुमालपत्रिका ४ अस्यागुणाः
कटुत्वं कषायत्वं जीर्णज्वरे अति
हितत्वं । रसायनत्वंच इति ॥
राजनिर्घंटः ॥
चिवुः पुं चिवुकं इति भरतः ॥
चिवुकं क्ली अधराधोभागः इति
इति दाडि इतिच भाषा इत्यमरः
चिवुकः पुं मुचुकुंद वृक्षः इति
राजनिर्घंटः ॥
चिह्न लक्षणे सौत्रचुरादि रिति
दुर्गादासः इत्यमरटीकायां भरतः ॥
चिह्नं क्ली चिह्न्यते येनतत् चिना
इतिदाग इतिचभाषा तत्पर्य्यायः
कलंकः २ अंकः ३ लांछनं ४ लक्ष्म
५ लक्षणं ६ लिंगं ७ इत्यमरः ॥
लक्ष्मणः ८ इतिभरतः पताका।
इति मेदिनी ॥
चिह्नकारी त्रि चोरदर्शनः विघाती
इति विश्वः ॥
चिह्नधारिणी स्त्री श्यामालता इति
शब्द चंद्रिका ॥
चिह्नितः त्रि चिह्नयुक्तः अंकितः
लक्षितः चिह्न धातोः कर्म्मणिक्त
प्रत्ययेन निष्पन्नः ॥
चीक कि मर्षणे ॥
इति कवि कल्प द्रुमः ॥

चीडा स्त्री गंधद्रव्य विशेषः चीड
गंध इति ख्याता तत्पर्य्यायः ॥
दारुगंधा २ गंधवधूः ३ गंधमादनी
४ तरुणी ५ तारा ६ भूतमारी ७ ॥
मंगल्या ८ कपटिनी ९ ग्रह ॥
भीतिजित् १० अस्यागुणाः कटुत्वं।
कास कफ नाशित्वं दीपनत्वं ॥
अत्यंत सेवनात् पित्त दोष ॥
भ्रमापहत्वंच इतिराज निर्घंटः ॥
चीनं क्ली पताका इतित्रिकांडशेषः
सीसके इति रत्न माला ॥
चीनः पुं देशविशेषः चीना ॥
इति भाषा यथा काश्मीरेत ॥
समारभ्य कामरूपात् पश्चिमे ॥
भोटांत देशो देवशि मानमे ॥
प्राच्यां दक्षिणे मानसेशाद्वक्ष पूर्वे
चीनदेशः प्रकीर्त्तितः इति शक्ति
संगम तंत्रे अंशुक विशेषः ॥
व्रीहिभेदः तंतुः मृगविशेषः ॥
इतिमेदिनी ॥
चीनकः पुं धानविशेषः चीना
इति भाषा तत्पर्य्यायः काक ॥
कंगुः इति हेमचंद्रः अस्यगुणाः
शोषणत्वं वायुवर्द्धकत्वं पित्त ॥
श्लेष्मनाशित्वं रूक्षत्वंच इति
राजवल्लभः कंगानी चीनकर्पूरः ॥

इति राजनिर्घंटः ॥
चीनकर्पूरः पुं कर्पूरविशेषः ॥
चीनक पूर इतिदेशांतरीय भाषा
तत्पर्य्यायः चीनकः २ कृत्रिमः ३
धवलः ४ पटुः ५ मेघसारः ६
तुषारः ७ हीमकर्पूरजः ८ ॥
अस्य गुणाः कटुत्वं तिक्तत्वं ॥
उष्णत्वं ईषच्छीतत्वं कफ कंठदोष
क्रिमिनाशित्वं मेध्यत्वं पावनत्वंच
इति राजनिर्घंटः ॥
चीनजं क्ली लोहं तत्पुतीक्ष्णलोहं
इति राजनिर्घंटः ॥
चीनपिष्टं क्ली सिंदूरं इतिहेमचंद्रः
सीसकं इति राजनिर्घंटः ॥
चीनवंगं क्ली सीसकं इति ॥
राजनिर्घंटः ॥
चीनाककर्कटी स्त्री कर्कटीप्रभेदः ॥
सातु चित्रकूटदेशे प्रसिद्धा तत्
पर्य्यायः राजकर्कटी २ सुदीर्घा ३
राजफला ४ वाला ५ कुलकर्कटी ६
अस्यागुणाः रुच्यत्वं शिशिरत्वं
पित्त दाह शोष नाशित्वं ॥
मधुरत्वं तृप्तिदत्वं लघुत्वंच ॥
इति राजनिर्घंटः ॥
चीभ ऊरड प्रशंसायां इति ॥
कवि कल्प द्रुमः ॥



चीरं क्ली वल्कलं जीर्णवस्त्र खंडं ॥
इति सुभूतिः इति लिंगादि
संग्रहटीकायांभरतः गोस्तनः ॥
वस्त्रभेदः रेखा भेदः ॥
लेखनभेदः ॥ इति मेदिनी ॥
वस्त्रं चूडा सीसकं इति ॥
हेम चंद्रः ॥
लेखने इति विश्वः ॥
चीरपत्रि स्त्री चंचुशाकः इति ॥
राजनिर्घंटः ॥
चीरपर्णः पुं शालवृक्षः इति।
राजनिर्घंटः ॥
चीरिः स्त्री नेत्रोम्शुकं इति ॥
शब्दरत्नावली ॥
चीरिका स्त्री झिल्ली हेमचंद्रः ॥
चीरितछदा स्त्री पालंक्यशाके ॥
इति भाव प्रकाशः ॥
चीरी स्त्री कच्छाटिका झिल्ली ॥
इति हेमचंद्रः ॥
चीरुकं क्ली फलविशेषः चेंउर
इति भाषा। अस्यगुणः रुचि ॥
दाह कफ पित्तकारित्वं अम्लत्वंच

इति राजवल्लभः ॥
चीर्णं त्रि प्रीलितं इति।
त्रिकांडशेषः ॥

चीर्णपर्णः निंबवृक्षः खर्जूरवृक्षः
॥ इति मेदिनी ॥
चीलिका स्त्री चीरिका झिल्ली ॥
इति शब्दरत्नावली ॥
चील्लका स्त्री झिल्ली इति ॥
शब्द रत्ना वली ॥
चीव ऋ म ग्रहणे ॥ संहतौ ॥
चीव क दीप्तौ इतिकविकल्पद्रुमः
चीवरं क्ली भिक्षवस्त्रं इत्युणादि ॥
कोषः ॥
चीवरी पुं बुद्ध भिक्षुकः। इति ॥
त्रिकांड शेषः ॥
चुक्क क पीडने इतिकविकल्पद्रुमः
चुक्कारः पुं सिंहनादः इति ॥
त्रिकांडशेषः ॥
चुक्रं क्ली अम्लद्रव्य विशेष महदा
इति ख्याते तत्पर्य्यायः ॥
तिंतिडीकं २ वृक्षाम्लं ३ इत्यमरः
पत्रशाकविशेषः चुक इति ॥
ख्याते तत्पर्य्यायः चुक्रवास्तूके ॥
२ लिकुचे ३ अम्लवास्तुकं ४ दलाम्ले
५ अम्लशाकाख्ये ६ अम्लादि ७

हिलमोचिका ८ अस्यगुणः अम्ल
पत्रत्वं लघुत्वं उसत्वं वात ॥
गुल्म नाशित्वं रुच्याग्नीषत पित्त ॥

कारित्वं पथ्यत्वंच कोञ्जिक ॥
प्रभेदः तत्पर्य्यायः सहस्रवेधं ॥
२ रसाम्लं ३ चुक्रवेधकं ४ शाकाम्ल
भेदने ५ चेद्रे ६ अम्लसारं ७ ॥
चुक्रिका ८ अस्यगुणः तिक्तत्वं ॥
अम्लत्वं स्वादुत्वं कफ पित्त ॥
नासिका रोगदुर्गंध शिरोरोग ॥
नाशित्वंच इति राजनिर्घंटः ॥
संधानविशेषः यथा यन्मस्त्वादि
शुचौ भांडे सगुडक्षौद्र कोञ्जिकं ॥
धान्यराशौ त्रिरात्रस्थं शुक्तं चुक्रं
तदुच्यते द्विगुणं गुडमध्वारनाल ॥
मस्तुक्रमादिह इतिपरि भाषा ॥
चुक्रः पुं अम्लः अम्लवेतसः ॥
इतिविश्वः ॥
चुक्रकं क्ली शाकविशेषः चुका
पालंग इतिभाषा अस्य गुणाः
दुर्जरत्वं भेदकत्वं वायुनाशित्वं।
पित्तकारित्वं गुरुत्वंच इति ॥
राजवल्लभः ॥
चुक्रफलं क्ली वृक्षाम्लं इति
राजनिर्घंटः ॥
चुक्रा स्त्री चांगेरी आमरुल् ॥
इतिभाषा इति मेदिनी ॥
तिंतिडी इतिशब्दरत्नावली ॥
चुक्राम्लं क्ली वृक्षाम्लं इति।

राजनिर्घंटः ॥
चुक्राम्ला स्त्री अम्ललोणिकाचिंचा
कांजिकभेदः इतिराजनिर्घंटः ॥
चुक्रिका स्त्री अम्ललोणिका इत्यमरः
कचांगेरी चुकापालंग इति ॥
भाषा इति रत्न माला ॥
चुचुकं क्ली कुचाग्रे तत्पर्य्यायः ॥
चुचुकं २ चुचूकं ३ इति ॥
शब्दरत्नावली कुचानने ४
पुंलिंगोपि इतिरत्नकोषः ॥
स्तनवृंते ५ इत्यमरटीकायांभरतः
चुचूः पुं सनिषसशाके इति
त्रिकांडशेषः ॥ (वली
चुचूकं क्ली चुचुकं इतिशब्दरत्ना
चुच्य इ अभिषवे इतिकविकल्पद्रुमः
अभिषवो ऽत्र स्नाने मथने ॥
पीडने संधानेच इति तट्टीका ॥
चुचुः पुं छुछुंदरिः इति
हारावली ॥
चुंचुरी स्त्री तिंतिडीद्यूते कांइ
वीचिर खेला इतिभाषा इति
त्रिकांडशेषः ॥
चुंचुली स्त्री तिंतिडीकास्थिभिर्द्यूत
क्रीडा इतिहारावली ॥
चुट तच्छले अल्पीभाव इति ॥
यावत् इति कविकल्प द्रुमः ॥



चुट इ तक्ले इतिकविकल्प द्रुमः
चुट कशिच्छेदे इतिकविकल्पद्रुमः
चुट इक छेदे इतिकविकल्प द्रुमः।
चुट्टक कतुछ्ले अल्पीभाव इति।
यावत् इतिकविकल्प द्रुमः ॥
चुड इक छेदो इतिकविकल्प द्रुमः।
चुड इ तक्ले इतिकविकल्प द्रुमः।
चुडु हतौ हावे इति
कवि कल्प द्रुमः ॥
चुण शि छेदे इतिकविकल्पद्रुमः
चुंडा स्त्री कूपः इतित्रिकांड शेषः ॥
चुंडी स्त्री कूपः इति त्रिकांड शेषः।
उपकूपं कूपसमीपेस्वल्पजलाधारः
इति हेमचंद्रः ॥
चुत इर क्षरणे इतिकविकल्पद्रुमः
चुतः पुं गुदद्वारे इति
प्राहरत्ना वली ॥
चुतिः स्त्री गुदद्वारे इति
प्राह रत्ना वली ॥
चुदक नुदि प्रेरणे इति ॥
कविकल्प द्रुमः ॥
चुड्ड हतौ हावे इति
कवि कल्प द्रुमः ॥
चुंदी स्त्री कुट्टनी इतिहेम चंद्रः।
चुपशनैर्गतौ इतिकल्प द्रुमः ॥
चुव इ कि चुंबने इति।

कवि कल्प द्रुमः ॥
चुंवकः पुं कान्तलोहभेदः तत्र ॥
पर्य्यायः कांतपाषाणः २ अयस्कांतः
३ लौहकर्षकः ४ अस्यगुणाः ॥
लेखनत्वं शीतत्वं मेदो विष
गदापहत्वंच इतिभावप्रकाशः ॥
धटस्योर्द्धं वलेवने इतिमेदिनी ॥
चुंवकः त्रिचुंवनपारः धूर्त्तः ॥
वहुग्रंथैकदेशज्ञः इतिमेदिनी
चुंवनं क्ली मुखसंयोगः चुमा
इतिभाषा तस्यस्थानानि यथा ॥
मुखस्तने ललाटेचं नेत्रयो ॥ जिह्वायां
रपि ॥ गंडेच कर्णयोश्चैव ॥
कंठोरुभगा मूर्द्धसु चुंबनस्थान ॥
मिस्ठकं विज्ञेयं कामुके रिह ॥
इति काम शास्त्रं ॥
चुरकि स्तेये इतिकविकल्पद्रुमः
चुरा स्त्री चौर्य्यं इति ॥
प्राह रत्ना वली ॥
चुरी स्त्री उपकूपं कूपसमीपेघाल
जलाधारः इति हेमचंद्रः ॥
चुलुकः पुं घनपंकः इति ॥
त्रिकांड शेषः प्रसृतिः भांड ॥
प्रभेदः इति हेमचंद्रः ॥
चुलुकं क्ली माषमज्जनजले यथा
माष मज्जन माचामं तकुलुक ॥

मितिमहोप निषत् ॥
चुलुकी पुं शिशुमाराकृति मत्स्यः
इति प्राह रत्नावली ॥
चुलुप लोले इतिकविकल्पद्रुमः
चुलुपः पुं वाललालने इति।
जटाधरः ॥
चुलुपा स्त्री छागी इतित्रिकांड ॥
शेषः ॥
चुलुंपी शिशुमाराकृति मत्स्यः ॥
उत्पल मत्स्यः इति कश्चित् ॥
इति प्राह रत्नावली ॥
चुल्ल हावकृतौ इतिकविकल्पद्रुमः
इतिमेदिनी ॥
चुल्लकी स्त्री शिशुमारः कुंडीभेदः।
कुलविशेषः इति मेदिनी ॥
प्राहरत्नावलीच ॥
चुल्लिः स्त्री पाकार्थमग्निस्थाने ॥
इति अखा इतिच भाषा ॥
तत्पर्य्यायः अश्मंते २ उद्धाने ॥
३ अधिश्रयणी ४ अंतिका ५ ॥
इत्यमरः अस्मंते ६ उध्माने ७
उद्धारे ८ चुल्ली ९ अंदिका १०
इतितट्टीका ॥
चुल्ली स्त्री चिता उद्धाने इति ॥
मेदिनी ॥

चुंवे क्ली वदने इत्युणादिकोषः ॥
चुल्ले क्ली पुं तुल्ले तत्र मांस ॥
पिंडकविशेषः स्थालीभृष्टमांसे
पनसादि फलस्यासार भागो ॥
भोता इतिख्यातः इतिलिंगादि ॥
संग्रह टीकायां भरतः ॥
चूचुकं क्ली पुं कुचुकं इत्यमर ॥
टीकायां भरतः ॥
चूडकः पुं कूपः इतित्रिकांडशेषः
चूडा स्त्री मयूरशिखा शिरोमध्यस्थ
शिखामात्रे तत्पर्य्यायः ॥
वडभी वाहुभूषणं इति ॥
मेदिनी अग्रे इतिहेम चंद्रः ॥
कूपः इति त्रिकांडशेषः ॥ दश
संस्कारांतर्गत संस्कारविशेषः
यथाचूडाकार्य्या यथाकुलमिति
मलमास तत्वं ॥
चूडाकरणं क्ली दशसंस्कारांतर्गत
संस्कारविशेषः तस्यक्रमोयथा
कुलाचारवशात् प्रथमे तृतीये
वावर्षे चूडाकरणं कर्त्तव्यं तत्र ॥
प्रथमे प्रातःकृतस्नानः कृत ॥
वृद्धिश्राद्धः पिता सत्यनामान ॥
मग्निं संस्थाप्य विरूपाक्षजपांते।
कुशंडिकां समाप्याग्नेर्दक्षिणत ॥



एकविंशति दर्भपिञ्जलीः सप्त
सप्तभिरेकी कृत्य कुशांतरेण ॥
वेष्टयित्वा उष्णोदकसहितेकांस्य
पात्रेताम्रनिर्मित क्षुरं तद भावे ॥
दर्पणंवा लोहक्षुरपाणिंवनापिते
स्थापयेत अग्नेरुत्तरतोवृषगोमये
तिल तंडुल माषसिद्धंचकृसरं ॥
अग्नेः पूर्वतो मिश्रित व्रीहि यव।
तिलमाष पूरित पात्र त्रयं ॥
स्थापयेत माता शुचिना वस्त्रेण
कुमारमाछाद्य क्रोडे निधाय।
अग्नेः पश्चिमतो भर्तुर्वाम पार्श्वे॥
उत्तराग्रेषु कुशेषु प्राङ्मुखी ॥
उपविशति ततः पिता प्रकृत ॥
कर्मारंभे प्रादेश प्रमाणं कृताकां।
समिधं तूष्णीमग्नौहुत्वा व्यस्त समस्त
महाव्याहृति होमं कुर्य्यात।
प्रजापति ऋषि गायत्री छंदो ॥
ऽग्निर्देवता महाव्याहृति होमे॥
विनियोगः ॐभूः स्वाहाप्रजापति
ऋषि रुष्णिक्छंदो वायुर्देवता
महाव्याहृति होमे विनियोगः
ॐभुवः स्वाहा प्रजापति ऋषि।
रनुष्टुछंदः सूर्यादेवता महाव्या
हृतिहोमे विनियोगः ॐस्वः स्वाहा
प्रजापति ऋषि र्बृहतीछंदः ॥

प्रजापतिर्देवता व्यस्त समस्त॥
महा व्याहृति होमे विनियोगः॥
ॐ भूर्भुवः स्वः स्वाहा ततः पिता ॥
उष्णाय शंमुख कुमारस्य मातुः॥
पश्चादवस्थितः क्षुरपाणिं नापिते
पश्यन् तमेव सवितृ रूपं ध्यायन्
जपति प्रजापति ऋषिः सविता
देवता चूडाकरणे विनियोगः ॥
ॐ आयमगात् सविताक्षुरेणातत
उष्णोदक सहिते कांस्यपात्रे ॥
पश्यन् वायुं मनसा ध्यायन्जपति
प्रजापति ऋषि वायुर्देवता चूडा
करणे विनियोगः ॐ उष्णेण वाय
उदकेनैधि ततः कांस्य पात्र ॥
स्थितोष्णोदकेन दक्षिणहस्तगृही
तेन दक्षिण कपुच्छिका मनेन॥
मंत्रेण क्लेदयति कपुच्छिका शब्देन
दक्षिणेनरतः शिखा स्थानादधः
शिरसः कर्णाभिमुखोञ्च देश
उच्यते ततः प्रजापति ऋषि ॥
रापोदेवता चूडाकरणे विनि
योगः ॐ आपउंदंतु जीवसे ॥
ततस्ताम्रक्षुरं तदभावे दर्पणंवा
पश्यन् जपति प्रजापति ऋषि
विष्णुर्देवता चूडाकरणे विनियोगः
ॐविष्णोर्दंष्ट्रोसि ततः कुश वट्ट

सप्त दर्भपिञ्जली गृहीत्वाछिन्न
दक्षिणक पुच्छिका देशे अनेन ॥
मंत्रेण ऊर्द्ध्वमूला निदध्यात ॥
प्रजापति ऋषि रोषधि र्देवता ॥
चूडाकरणे विनियोगः ॐ उषधे॥
त्रायस्वैनं ततोवामहस्त गृहीत
कुशपिञ्जली सहितकपुच्छिका
देशे स्वदक्षिणहस्तगृहीत ताम्र
क्षुरं दर्पणंवा अनेन मंत्रेण ॥
निदध्यात प्रजापतिर्ऋषिः ॥
स्वधितिर्देवता चूडाकरणे विनि
योगः ॐस्वधिते मैनं हिंसीः ॥
ततः केशच्छेदो यथान भवति ॥
तथाताम्रक्षुरं दर्पणंवा तत्रैव ॥
कपुच्छिकादेशे अनेन मंत्रेणप्रेर।
येत प्रजापतिर्ऋषिः पूषा देवता
चूडाकरणे विनियोगः ॐयेनपूषा
बृहस्पतेर्वायोरिंद्रस्यचावपत्तेन ॥
तेववामि ब्रह्मणा जीवातेव ॥
जीवनायदीर्घायुष्ट्वायवर्चसे
तुभ्यंवारहदयं ततोलोहक्षुरेण ॥
दक्षिण कपुच्छिक देशस्यकेशं॥
छित्वादर्भपिंजली सहितकेशस्य
वालमित्र विष्ठत पात्रस्य वृषं ॥
गोमयोपरि निधानं कुर्य्यात ॥
ततः कपुच्छलदेशस्यकांस्यपात्र।

स्थितोष्णोदकेनदक्षिण हस्त ॥
गृहीतेन पूर्ववदेव आपउंदंतु ॥
जीवसे इत्यनेन मंत्रेण क्लेदनं ॥
ॐविष्णोर्दंष्ट्रोसि इत्यनेन ॥
ताम्रक्षुरस्य दर्पणस्यवाप्रेरणं ॥
ॐ उषधे त्रायस्वैनं इत्यनेन ॥
कपुच्छलदेशे ऊर्द्ध्व मूलदर्भपिंजली
निधानं ॐस्वधिते मैनं हिंसी ॥
रित्यनेनताम्रक्षुरस्य दर्पणस्यवा
कपुच्छलदेशे निधानं ॐयेनपूषा
बृहस्पत रित्यनेन पूर्वाभिमुखं
ताम्रक्षुर प्रेरणं लोह क्षुरेण ॥
कपुच्छल देशस्य केशछित्वा दर्भ
पिंजली सहित केशस्यवालमित्र
विष्ठत पात्रस्य वृष गोमयोपरि
निधानं कुर्य्यात कपुच्छल शब्देन
पश्चिमतः शिखास्थानादधःशिरसो
नापित क्रोडाभिमुखोञ्च देशो ॥
ऽभिधीयते तथैव ॥ वाम ॥
कपुच्छिकास्लावनादिछेदनपूर्वके
वृषगोमयोपरिदेशे निधानांतं ॥
पूर्ववत सर्वं कुर्य्यात ततः ॥
कुमारस्य शिरः पाणिभ्यां
मुपगृह्य जपति प्रजापति ऋषि
रुष्णिक छंदो जमदग्निकश्यपा
गस्त्यादयो देवता चूडाकरणे ॥



विनियोगः ओं त्र्यायुषं जमदग्नेः ॥
कश्यपस्य त्र्यायुषं अगस्त्यस्य।
त्र्यायुषं यद्देवानां त्र्यायुषं ॥
तन्नेस्तु त्र्यायुषं ऽग्रेकृत्वा ॥
देशानीत्वा पुष्पादितं कृत्वा नापितः
कुमारं मुंडयति सर्वमेव केशं ॥
वृष गोमयोपरि निधायारण्ये ॥
वेणुविटपे स्थापयेत् ततः पूर्ववत्
व्यस्तसमस्त महाव्याहृति होमं।
कृत्वा तूष्णीं प्रादेशप्रमाणहुताश
समित् प्रक्षेपेण प्रकृते कर्म्म॥
समाप्य उदीच्य शाट्यायनहोमादि
वामदेव्य गानांतं कर्म्म निर्वर्त्य॥
कर्म्मकारयितृ ब्राह्मणाय दक्षिणां
दद्यात् कुमार धान्य यव तिल माष
शरावान् नापिताय दद्यात् ॥
इति चूडाकरणे समाप्ते इति
भवदेव भट्टः ॥
चूडामणिः पुं शिरोरत्ने काक॥
चिंचाफले इति मेदिनी ॥
चूडाम्ले स्त्री वृक्षाम्ले इति।
राजनिर्घंटः ॥
चूडालं स्त्री मस्तके इति ॥
शब्दरत्नावलीचूडायुक्ते त्रि इति
हेमचंद्रः ॥
चूडाला स्त्री उच्चटायां इत्यमरः॥

श्वेतगुंजा नागरमुस्ता ॥ इति
राजनिर्घंटः ॥
चूडावान् त्रि चूडाविशिष्टः इति
चूडाला शब्दार्थे मेदिनी ॥
चूर्ण क संकोचे इति कविकल्पद्रुमः
चूतः पुं आम्रवृक्षः इत्यमरः ॥
गुदद्वारे इति शब्दरत्नावली ॥
च्यूत इत्यपि पाठः ॥
चूतकः पुं आम्रः कूपकः इति
मेदिनी ॥
चूर ई ङ य दाहे इति ॥
कविकल्पद्रुमः ॥
चूर्णक पेषे इति कविकल्पद्रुमः
चूर्णं क्ली संपेषणेन जात रजः॥
तस्य लक्षणं यथा अत्यंतशुष्कं
यद्द्रव्यं सुपिष्टं वस्त्रगालितं ॥
तत्स्याच्चूर्णं रजः क्षोदस्तन्मात्रा।
कर्ष सम्मिता चूर्णे गुडः समो देयः
शर्करा द्विगुणा चूर्णेषु भर्जितं।
हिंगु देयं नोत्क्लेदकृद्भवेत् ॥
लिहेच्चूर्णं द्रवैः सर्वैर्घृताद्यैर्द्वि
गुणोन्मितैः पिवेद्वा तद्गुणेनैव
चूर्णमालोडितं द्रवैः चूर्णावलेह
गुडिका कल्कानामनुपानकं ॥
पित्तवातकफातंके त्रिद्व्येकपल
माहरेत् इति भावप्रकाशः ॥

चूर्णौषधस्य पूर्णवीर्य्यं पलत्रय।
पर्य्यंतं तिष्ठति इति वैद्यक ॥
परिभाषा आबीर इति॥
ख्यातं पटवासो क्षोदः इत्यन्ये ॥
इति भरतः गंधगुंडा इति ॥
ख्यातं इति सारसुंदरी तत्॥
पर्य्यायः वासयोगः २ इत्यमरः ॥
वासयुक्तिः ३ इति मेदिनी ॥
गंधयुक्तिः ४ इति भूरिप्रयोगः ॥
पटयुक्तिः ५ इति शब्दरत्नावली।
चूर्णिः पुं संपेषणेन जात रजः।
चूर इति गुंडा इति फाकि इति च ॥
भाषा तत्पर्य्यायः क्षोदः २
इत्यमरः चूर्णं ३ रजः ४ इति।
भावप्रकाशः धूलिः क्षार।
विशेषः चूणा इति भाषा इति।
मेदिनी शेषस्य गुणाः वात ॥
श्लेष्मभेदो नाशित्वं शंखचूर्णस्य॥
गुणाः कटुत्वं क्षारत्वं उष्णत्वं ॥
कृमिनाशित्वं च इति राजवल्लभः॥
चूर्णकं क्ली गद्यविशेषः यथा
अपादः पदसंतानो गद्यं तत् ॥
त्रिधा मतं चूर्णकोत्कलिकाप्राय
वृत्तगंधि प्रभेदतः अकठोराक्षरं॥
स्वल्पसमासं चूर्णकं विडुः तत्।
वैदर्भरीतिस्थं गद्यं लघु ॥

तरे भवेत् भवत्युत्कलिका ॥
प्रायंसमासाढ्यं दृढाक्षरं वृत्तैक।
देशसंवधावृत्तगंधि पुनः स्मृतं
चूर्णकं यथा सहित्रयाणामेव ॥
जगतां गतिः परम पुरुषः॥
पुरुषोत्तमो दृप्तदानवभरेण ॥
भंगुरांगीं धरणी मवलोक्य ॥
करुणार्द्रहृदयस्तस्या भारमवतार
यितुं रामकृष्णस्वरूपेणांशतो
यदुवंशे अवततार इति ॥
छंदोमंजरी ॥
चूर्णकः पुं सक्तुः इति त्रिकांडशेषः
स्वार्थे के चूर्णशब्दार्थो यत्र ॥
चूर्णकारः पुं वर्णसंकरजातिविशेषः
चूणारी इति भाषा सनटकन्यायां
पुंड्रकाज्जातः इति पराशरः ॥
पद्धतिः ०॥
चूर्णकुंतलः पुं अलकः इत्यमरः
चूर्णखंड स्त्री कर्करे कांकर इति त्रुटि
इति च भाषा इति हारावली ॥
चूर्णपारदः पुं हिंगुले इति
राजनिर्घंटः ॥
चूर्णशाकांकः पुं गौरसुवर्णशाके
इति राजनिर्घंटः ॥
चूर्णिः स्त्री पातंजलव्याकरणे
महाभाष्ये कपर्दकः इति

लिंगादि संग्रह टीकायां भरतः
शतसंख्यक कपर्दिकाः इति
सिद्धांतकौमुद्या मुणादि वृत्तिः।
चूर्णिका स्त्री सक्तुः इति भूरिप्रयोगः
चूर्णिकृत पुं भाष्यकारः इति
त्रिकांड शेषः ॥
चूर्णी स्त्री कपर्दकः इति मेदिनी।
नदीविशेषः साराणाचेदाख्य ॥
ग्रामसमीपे तिष्ठति ॥
चूला स्त्री चंद्रशाला गृहोपरिगृहे
इति शब्दरत्ना वली चूडाच ॥
चूलिकं क्ली घृतभृष्टगोधूमचूर्णं
लूची इति भाषा इति शब्दचंद्रिका।
चूलिका स्त्री हस्तिकर्णमूलं इत्यमरः
नाटकांगविशेषः इति मेदिनी।
चूष पाने इति कविकल्प द्रुमः
चूषा स्त्री कच्छ्या काछडी इति
भाषा इत्यमरः ॥
चृत श हिंसे ग्रंथे इति
कविकल्पद्रुमः ॥ इति
चृत कि संदीपने
कवि कल्प द्रुमः ॥
चेटः पुं दासः इति हेम चंद्रः ॥
चेटकः पुं दासः इत्यमरः ॥
उपपति नायक भेदः तस्य ॥ इति
लक्षणं रसे स्थान चतुरः

रसमंजरी ॥
चेटिका स्त्री दासी इति द्विरूपकोषः
चेटी स्त्री दासी इति हेम चंद्रः ॥
चेडः पुं दासः इत्यमरटीकायां ॥
रमानाथः ॥
चेडकः पुं दासः इत्यमरटीका ॥
चेडिका स्त्री दासी इति ॥
द्विरूपकोषः ॥
चेडी स्त्री दासी इत्यमर टीका ॥
चेत् व्य यदि इत्यमरः ॥
चेतः क्ली चित्तं इत्यमरः ॥
चेतकी स्त्री हरीतकी इत्यमरः ॥
हिमाचलभवा त्रिशिरा हरीतकी ॥
सा च सर्वरोगनाशिनी गंधयुक्ता
द्रव्यकरणे प्रशस्ता इति वैद्यके ॥
जातीपुष्पं इति राजनिर्घंटः ॥
चेतनः पुं आत्मा इति हेम चंद्रः ॥
मनुष्यः इति राजनिर्घंटः ॥
प्राणी इत्यमरः प्राणयुक्ते त्रि ॥
इति मेदिनी ॥
चेतनकी स्त्री हरीतकी इति
राजनिर्घंटः ॥
चेतना स्त्री बुद्धिः इत्यमरः ॥
सा गर्भस्थबालकस्य सप्तमिमासे ॥
भवति इति सुख बोधः ॥
चेतनीया स्त्री ऋद्धिनामौषधिः

इति राज निर्घंटः ॥
चेदिः पुं देशभेदः तत्पर्य्यायः
त्रैपुरः २ डाहलः ३ चैद्यः ४ ॥
तद्देशस्थे पुं भूम्नि इति हेमचंद्रः
चेदिपतिः पुं उपरिचर वसुः ॥
यथा इंद्रप्रीत्या चेदि पति
अकारेंद्र महे वसुः पुत्राश्चास्य।
महावीर्य्याः पंचासन्नमितौजसः
इति महा भारते ॥
चेदिराजः पुं शिशुपालः इति
पुराणे उपरिचरवसुः सत् चेद्र ॥
वंशीय कृति राजपुत्रो विस्तुभक्त
इंद्रसखा इंद्रादेश चेदिराज्यं ॥
गृहीतवान् इंद्रदत्ताकाशगा ॥
विमानेनोपरिचरो बभूव प्रकटा
ऋषयो देवाश्च विवदमानास्तम
पृच्छन् किमौषध्याय सुनावायज्ञाः
कर्तव्याल्लिनोक्ते पशुना तत ॥
ऋषयस्ते शेषु भवतास्तथा ॥
शास्त्रमनुक्त्वा देवानां पक्षपातः
कृत स्तस्मादधो गच्छ इत्यभिशप्तः
सततस्तल्लणात् भू विवरे गतः ॥
श्रीविष्णुना तस्य भक्त्यार्थे नोदी।
श्राद्धादौ गृह भित्तौ घृतधारा ॥
दाने विहिते इति महा भारते ॥
चेदिराट् पुं शिशुपालः इति

त्रिकांड शेषः ॥
चेवी स्त्री रागिणी विशेषः इति
हला युधः ॥
चेल ऋ चाले गतौ इति ॥
कवि कल्प द्रुमः ॥
चेलं क्ली वस्त्रं अधमे त्रि इत्यमरः
चेलानः पुं फललताविशेषः
चेलना इति भाषा तत्पर्य्यायः
अल्पप्रमाणकः २ इति रत्नमाला
अस्य फलस्य गुणाः गुरुत्वं विष्ट
भित्वं मधुरत्वं कफ वायु ॥
कारित्वंच इति राजवल्लभः ॥
चेलालः पुं फललताविशेषः
तत्पर्य्यायः चित्रफलः २ लताम्रः
३ राजतेमिषः ४ लतायनसः ५
नाठाम्रः ६ सेंडुः ७ इति त्रिकांडे ॥
शेषः ॥
चेलिका स्त्री पट्टवस्त्र विशेषः
चेलिरकापउ इति भाषा यथा।
सेये कृष्णस्य वनिता पीतशाटी
परिच्छदा रक्तचेलिकयाछन्ना
शातकुंभ स्तनस्तनी इति पाद्मे
पाताल खंडे ॥
चेल्लकः पुं बुद्धभिक्षु शिष्यः ॥
तत्पर्य्यायः श्रामणेरः २ प्रव्रजितः
३ महापासकः गोमी ५ इति ॥



त्रिकाण्ड शेषः ॥
चेल्ल ऋ चाले गतौ इति
कविकल्प द्रुमः ॥
चेष्ट ऊ ईहे इति कविकल्प द्रुमः
चेष्टकः पुं रतिबन्धविशेषः यथा
पादमेकं हृदि न्यस्य इतरेणैव ॥
चेष्टयेत् कान्तः क्रोडे स्थितां ॥
नारीबन्धो ऽयं चेष्टको मतः ॥
इति स्मरदीपिका चेष्टा कर्म्मणि त्रि
चेष्टा स्त्री कायिकव्यापारः इति
मुग्धबोधटीकायां दुर्गा दासः।
चेष्टितं क्ली गतिः चेष्टा इति।
मेदिनी चेष्टान्विते त्रि ॥
चेष्टानाशः पुं प्रलयः इति
राजनिर्घण्टः ॥
चैतन्यं क्ली प्रकृतिः इति।
राजनिर्घण्टः चेतना ॥
चैतन्यः पुं भगवदवतारविशेषः
तस्य प्रमाणं यथा कृत्वा तु ॥
कलिधर्म्मा स्नात ब्रह्मा लोक ॥
पितामहः सर्व्वलोकहितार्थाय ॥
प्रोवाच मधुसूदनं भविष्यति ॥
कलौ केनोपायेन धर्म्मपालनं।
भक्तिमार्गस्थितिः कस्मात्तद्वदस्व।
जगद्गुरो श्रीभगवानुवाच ॥
अवतीर्णो भविष्यामि कलौ ॥

निज गणैः सह शची गर्भे ॥
नवद्वीपे स्वर्धुनी परिवारिते ॥
अप्रकाश्य मिदं गुह्यं न प्रकाश्यं
वहिर्मुखे भक्तावतारं भक्ताख्यं ॥
भक्तं भक्ति प्रदं स्वयमन्यया ॥
मोहिताः केचिन्नास्यन्ति वहि
र्म्मुखाः नास्यन्ति मद्भक्तियुताः
साधवो न्यासिनो ऽमलाः ॥
कृष्णावतारकालेयाः स्त्रियो ये
पुरुषाः प्रियाः कलौ ते
ऽवतरिष्यन्ति श्रीदामसुवलादयः
चतुःषष्टिर्महान्तस्ते गोपा द्वादश
वालकाः धर्म्मसंस्थापनार्थाय ॥
विहरिष्यामि तैरहं काले ॥
नष्टे भक्तिपथे स्थापयिष्याम्यहं
पुनः कृष्णश्चैतन्य गौराङ्गो ॥
गौर चन्द्रो गौरहरिः शचीसुतः
प्रभुर्गौरो नामानि भक्तिदानि ॥
मे गङ्के तु भुवि ते पुत्रा जयन्तो ॥
भक्तरूपिणः धर्म्मसंस्थापने ॥
काले कुर्व्वन्तु ते ममाज्ञया ॥
कृष्णावतारकाले ये मद्भक्ता ॥
स्तान् शृणु क्रमात् श्रीदामनाम
गोपालो मम रामस्य च ॥
प्रियः अभिराम इति ख्यातः ॥
पृथिव्यां सम्भविष्यति सदाम ॥

नामगोपालः श्रीमान् सुन्दर ॥
ठक्कुरः वसुदाम प्रिय सखः ॥
श्रीधनञ्जय पण्डितः सुवलो मे
प्रियसखो गौरीदासाख्य पण्डितः
कमलाकरपिप्पलाइः पूर्व्वख्यातो
महावलः पूर्व्वदेहे सराहर्ष ॥
उद्धारण महाशयः महावाहु।
गोपवालः श्रीमान सहस्रपण्डितः
पुरुषोत्तमो वैष्णवकुले ल्लोके ॥
कृष्णः प्रियो मम अर्ज्जुनः पूर्व्वदेहे
यः कलौ श्रीपरमेश्वरः पूर्व्व
प्रिया लवङ्गा मे कृष्णाख्यः स।
कलौयुगे श्रीधरः श्रीधरसमः पूर्व्व
श्रीमधुमङ्गलः सुवलो वलवामे
सखः कलौ श्रील हलायुधः द्वाद
पूते भविष्यति कलौ मद्धर्म्मरक्षणे
चतुःषष्टि महान्तो ये ॥
स्त्रियः केचिच्च पुरुषाः पुरा ॥
गोपाङ्गनाः ख्याताः कलौ ताः ॥
पुरुषा भुवि यति यस्मात ॥
कलौ चाहं तदर्थे पुरुषाः ॥
स्त्रियः नीलाम्बरश्चक्रवर्त्ती गर्गः
ख्यातो मुनिः पुरा श्रुतिप्रिया ॥
राधिकामे श्रीगदाधर पण्डितः ॥
राधिकायाः प्रियाप्राः सश्रीगदा
धरठक्कुरः मधुमती प्रिय।

सखी श्रीनरहरि सेवकः ॥
वृन्दादेवी प्राणसखी श्रीमुकुन्दः
कलौयुगे चन्द्रावली प्राणतुल्या
कविराजः सदाशिवः ललिताया
सखी मुख्या जगदानन्द पण्डितः
विशाखाया प्रियसखी श्रीदामोदरः
नामकः वनमाली कविराजः
श्रीविशाखा सखी मम श्रीरघुनाथ
भट्टश्च रङ्गदेवी ममप्रिया ॥
श्रीगदाधर भट्टस्तु सुदेवी सा मम
प्रिया प्रबोधानन्द विख्यातस्तुङ्ग
विद्या तथा प्रिया श्रील राघव ॥
गोस्वामी चम्पकाख्या लता प्रिया
गोस्वामी श्रील भूगर्भ इन्दुलेखा
तथा प्रिया काशीमिश्रः शशि ॥
रेखा रूपः श्रीरूपः मञ्जरी ॥
श्रीसनातन गोस्वामी प्रिया श्रीरति
मञ्जरी श्रीरघुनाथदासः श्रीस्वरूप
मञ्जरी मम द्वितीये रघुनाथश्च
श्रीरागमञ्जरी प्रिया श्रीलगोपाल
भट्टः श्री अनङ्ग मञ्जरी सखी
लोकनाथः प्रेमभक्तो लवङ्ग।
मञ्जरी सखी श्रीगदाधरभट्टस्तु
प्रिया श्री गुण मञ्जरी भट्टः श्रीजीव
गोस्वामी योगमाया सहायिनी
दूती कलावती प्रेष्ठा श्रीगोविन्दः



प्रियो मम दूती लीलावती ॥
श्रीमान् माधवः प्रीतिवर्द्धनः ॥
वासुघोषाभिधो दूती ममानंद ॥
पदायिनी श्रीशिवानंदभार्य्या सा
मत् प्रियेंदुमती सखी श्री परमा।
नंदपुरी प्रियोमे उद्धवः सखा ॥
श्रीलराघव दासस्तु धनिष्ठेमेप्रिया
सखीशुक्लांबरो ब्रह्मचारी याज्ञिको
ब्राह्मणः स्मृतः पंडितोजगदीशश्च
यज्ञपत्नी मम प्रिया आचार्य्यः
श्रील भगवान् श्रीचैतन्यप्रियांश
भाक् पंडितो गरुडः श्रीमान् ॥
गरुडोमम वाहनः श्रीलगोपीनाथ
सिंहोऽक्रूरो भक्तो मम प्रियः ॥
घोषः शंकर आख्यो गुणसागर ॥
रायकः माधवः पूर्णतनुर्मुनिर्विश्व
कर्म्मांश भास्करः वनमाली ॥
सुदामाच सार्वभौमो बृहस्पतिः ॥
प्रिया इंदुमुखी यामि मकरध्वज।
विष्क्रतः सिंहानंदो लोकनाथः।
कविचंद्रस्ततः परं श्रीनाथो ॥
रामनाथश्च चत्वारः सनकादयः।
काशिमिश्रस्तु कुब्जास्याद्ब्रह्मानंदो
ऽर्जुनः सखा प्रतापरुद्रः ख्यातो।
ऽसाविंद्रद्युम्नो महीपतिः ॥
ठक्कुरश्च कालिदासः पुलिंदी ॥

वनचारिणी शिखीव राधिका ॥
दासीमा इति ख्याति संयुता ॥
आचार्य्य गोपीनाथश्च रत्नावती
नमप्रिया शार्ङ्ग दासः पद्मिनी।
स्यात् सूर्यो विश्वम्भरः स्मृतः।
भानुमती सत्य राजो ॥
रामानंदः कलावतीजयश्च विजय
श्चैव गोविंदो गरुड स्तथा ॥
आचार्य्यरत्नश्चंद्रः स्याद्वासो ॥
वृंदावनः स्मृतः शुक देवो ॥
व्यासपुत्रो भट्टो वल्लभ इरितः ॥
शिवानंदोऽग्रज इव देवानंदश्च।
भार्गवः पंडितः श्रीजगन्नाथो
दुर्वासा मुनिरुच्यते आचार्य्यः
श्रीअनंतश्च हरिदासस्तथैवच
यतागोष्ठ्यो व्रजे ख्याता ॥
हृदयानंद एवच प्रियाश्चतुःषष्टि
रेते धर्म संस्थापने कलौ ॥
येतेषां पुण्यनामानि ये स्मरंति
दिने दिने ते प्राप्नुवंति ॥
मद्भक्तिं पुनंति भुवनत्रयं मद्भक्त
दासा ये मत्पी नास्ति तेषां ॥
समाः कश्चित् कृत्वा भगवतो ॥
वाक्यं ब्रह्मा हृष्टमवाप भवान् स्तौति
नंदेव देवेश नेडु इंडु भय ॥
सदा जगुर्गंधर्व प्रवराः स्तरु

प्रमुखोक्तादा इत्यनेन संहितायां ॥
श्रीचैतन्य जन्मखंडे सप्तपंचाशः ॥
नमोऽध्यायः अपिचायः सते ॥
सितवर्णां मादधदसौ श्री शुक्लनामा
ऽभवत्रेतायां मखभुक् मखाख्य ॥
उचितोऽभूत्कृष्णवर्णां दधत् यः।
प्रपामं दधदाम्रवर्णाकमभूत्प्रणामो
युगेद्वापरे सोऽयं गौर विधू ॥
विभाति कलयन्नामावतारे कलौ
नित्यानंदो भक्तरूपो व्रजे ॥
यः श्रीहलायुधः भक्तावतार ॥
साचर्य्योऽद्वैतो यः श्रीसदाशिवः ॥
इति गौरगणोद्देशः ॥
चैत्यं क्ली आयतने इत्यमरः।
यज्ञस्थाने केचित्तु मुख रहितं
देवकुल सदृशं यज्ञायतनं ॥
सचित्यमचित्यमपीत्याहुः ॥
देवायतनमात्रे महादेव कुले ॥
इति भरतः चिता इति।
त्रिकांडशेषः ॥
चैत्यः पुं बुद्धः बिंबः उद्देशा ॥
वृत्तः इति मेदिनी भरतश्च ॥
शोषस्य पर्य्यायः देवतरुः २ ॥
देवावासः ३ करिभः ४ कुंजरः ५
इति त्रिकांडशेषः ॥
चैत्यद्रुः पुं अश्वत्थवृक्षः इति

त्रिकांडशेषः ॥
चैत्यमुखः पुं कमंडलुः इति ॥
त्रिकांडशेषः ॥
चैत्यवृक्षः पुं अश्वत्थवृक्षः इति
रत्नमाला ॥
चैत्रं क्ली मृते देवकुले देउल ॥
इति भाषा इति मेदिनी ॥
चैत्रः पुं बुद्धभित्तुकः इति ॥
त्रिकांडशेषः वर्षपर्व्वत विशेषः
इति मेदिनी चित्रागर्भजातो बुध
पुत्रः सप्तद्वीपाधिपतिः सुरथ
राजपितामहः इति ब्रह्मवैवर्त्तं ॥
प्रकृतिखंडे मासभेदः चित्रा ॥
नक्षत्रयुक्ता पौर्णमासी यत्र सः
सतु सौर चांद्रभेदेन द्विविधः ॥
तत्र मीनराशिस्थ रविकः सौरः
मीनस्थ रविप्रारब्धशुक्लप्रतिपदादि
दर्शांतश्चांद्रः इति मलमास तत्वं
तत्पर्य्यायः चैत्रिकः २ मधुः ॥
३ इत्यमरः चैत्री ४ कालादिकः
५ इति राजनिर्घंटः चैत्रकः ॥
६ चित्रिकः ७ इति शब्दरत्नावली
तत्रजातफलं सत्कर्मशाली ॥
विनयी सविशेषो भोगी सखी ॥
स्यान्मधुराज्नभोजी सत्संगयुक्तो
द्विजदेवभक्तो भवेन्मनुष्यो ॥

मधुमासजन्मा इतिकोष्ठी प्रदीपः
तत्र शिवव्रतं कर्तव्यं यथा
चैत्रे मासस्य माघे वा यो।
ऽर्च्चयेत् शंकरं व्रती करोति
नर्त्तने भक्त्या वेत्रपाणिर्दिवानिशं
मासे वाप्यर्द्धमासे वा दश
सप्तदिनानि वा दिनमानं युगं ॥
सोऽपि शिवलोके महीयते ॥
इति ब्रह्मवैवर्त्ते प्रकृति खंडे ॥
अधुना अस्य सन्न्यास इति राजन्।
इतिच भाषा ॥
चैत्रकः पुं चैत्रमासः इति।
शब्दरत्नावली ॥
चैत्ररथं क्ली कुवेरस्योपवनं ॥
तत्तु चित्ररथ गंधर्व निर्म्मितं॥
इत्यमरः ॥
चैत्रावली स्त्री चैत्रीपूर्णिमातत्
पर्य्यायः मधूत्सवः २ सुवसंतः ३
काममहः ४ वासंती ५ कर्द्दनी ६
इति त्रिकांडशेषः ॥
चैत्रिकः पुं चैत्रमासः इत्यमरः
चैत्री पुं चैत्रमासः इत्यमरः
चैत्री पुं चैत्रमासः इति ॥
राजनिर्घंटः चैत्रिरितिच पाठः
हस्तबोधसुतः इति जटाधरः ॥
तद्दृष्टीये पुं भूमि इति।
त्रिकांडशेषः ॥
चोचं क्ली गुडत्वक् इत्यमरः ॥
तेजपात इति ख्याते इति ॥
केचित् उपभुक्त फलावशिष्टे ॥
चोचा इति ख्याते तालफले ॥
इतिभरतः कदलीफले इति ॥
सारसुंदरी नारिकेले इति ॥
स्वामी वल्कले चर्म्म इति धरणी
चोचकं क्ली वल्कले इति शब्दरत्नाव
चोटी स्त्री शाटी इति हेमचंद्रः॥
चोडः पुं प्रावरणे देशविशेषः
इति मेदिनी ॥
चोदना स्त्री विधिः ॥
यथा चोदना लक्षणोऽर्थो धर्म्म
इति जैमिनिसूत्रे एकोद्दिष्टादि
श्राद्धादौ श्राद्धश्राद्धादि चोदना।
इति स्मृतिः ॥
चोदनागुडः पुं कंदुकः इति
त्रिकांडशेषः ॥
चोद्यं क्ली अद्भुते प्रश्ने इति ॥
मेदिनी ॥
मेदिनी ॥
चोद्यः त्रि चोदनार्हः प्रेरणीयोपः
इतिमेदिनी चोपनं क्ली पोनैर्गमने इति
चुपधातोर्भावे ऽनट् ॥
चोरः पुं स्तेयकर्त्ता तत्पर्य्यायः॥


कुत्रचित् चोरभयदूरीकरणार्थं श्लोकद्वयं रक्षोमंत्रो यथा
आर्य्यचोरः कपिः स्त्री लिंगस्यादृतं वरस्तथा । तिस्पे स्मरणादेव
चोरा यांति निष्फलं । लिंगो भार्य्या कपिलस्य ग्रामात् सा च
मोहिनी तां स्मरणमात्रेण चौरा गच्छंति निष्फलाः २

चौरः २ दस्युः ३ तस्करः ४ प्रति
रोधी ५ मलिम्लुचः ६ स्तेनः ॥
एकागारिकः ८ स्तैन्यः ९ प्रच्छन्न
नः १० मोषकः ११ पाटच्चरः १२ परा
स्कंदी १३ कुंभिलः १४ खनकः १५
शाकिनवर्णः १६ खानिकः १७ इति
शब्दरत्नावली प्रबुरपुरुषः १८
इति त्रिकांडशेषः कलमशाटी ॥
इतिक्रमचंद्रिका हेतहरु चेद्रः॥
गंधद्रव्यविशेषः यथा चोर॥
कुंकुमरोचनाः इत्यष्टगंधकथने
आत्मः ॥
चोरकः पुं टक्का पिंडिंग इति।
भाषा इति रत्नमालाख्यौषधिद्रव्य
विशेषः तत्पर्य्यायः शंकितः २
खङ्गः ३ दुष्पत्रः ४ क्षेमकः ५ रिपुः ६
चपलः ७ कितवः ८ धूर्त्तः ९ पटुः १०
नीचः ११ निशाचरः १२ गणहासः १३
कोपनकः १४ चोरः १५ फलचोरकः
१६ दुष्कुलः १७ ग्रंथिलः १८ सग्रंथिः
१९ गणचोरकः २० ग्रंथिपर्णः २१
ग्रंथिदलः २२ ग्रंथिपत्रः २३ ॥
अस्य गुणाः तीव्रगंधत्वं उष्णत्वं ॥
तिक्तत्वं वातकफ नाश ॥
मुखरुजाजीर्णक्रिमिदोषनाशित्वं
च इति राजनिर्घंटः ॥
चोरपुष्पिका स्त्री चोरपुष्पी इति
शब्द रत्नावली ॥
चोरपुष्पी स्त्री हृस्वविशेषः चोना
इति चोरहुली इतिच ख्याता ॥
इतिभरतः तत्पर्य्यायः ॥
शंखिनी २ केशिनी ३ इत्यमरः॥
चोरपुष्पिका ४ इतिशब्दरत्नावली
चोरस्नायुः स्त्री काकनासालता। तस्कर
स्नायुरिति राजनिर्घंट दर्शनात्
चोरा स्त्री चोरपुष्पी इति
शब्दचंद्रिका ॥
चोरिका स्त्री चौरिका चौर्य्यं ॥
इत्यमरटीकायां रायमुकुटः ॥
चोलः पुं कंचुलिका काचुलि इति
भाषा तत्पर्य्यायः कूर्पासकः २
इत्यमरः स्त्रीणां निचोल इति
रमानाथः पुं स्त्रियां चोला ॥
इति ख्यातो इति सुभूतिः ॥
नद्यादित्वात् चोलीच कूर्पासः ॥
कफोणि जानुच तद्दृयमस्यते ॥
स्त्रियते अत्र कूर्पासः तेन अमनीषा
दित्वात् लोपः तत स्वार्थेकः ॥
इति भरतः देश[illegible]षः ॥
अधुना तांजोर इति ख्यातः इति
शब्दरत्नावली पद्मस्कंधादिवेद
योगानधिकारि मेक विशेषः ॥

सपूर्वं क्षत्रियश्चासीत् सगरराजेः
नाम्य धर्मनाशो वेश्यान्य त्वेव
चकार इति हरिवंशः ॥
चौलकं क्ली वल्कलं इति
शब्दरत्नावली ॥
चौलकः पुं बाणवारः कवचं
इति हारावली ॥
चौलकी पुं करीवः नारंगः ॥
किष्कुपर्वं इति मेदिनी ॥
चौलेडुकः पुं शिरोवेष्टः इति
त्रिकांड शेषः ॥
चौस्कः पुं सिंधुवारदेशीयाश्वः
इति त्रिकांड शेषः ॥
चौक्षः त्रि शीतः शुचिः दक्षः
तीक्ष्णः मनोज्ञः इति।
मेदिनी ॥
चौरः पुं स्त्रीचौरः इत्यमरः ॥
चौरपुष्पी इतिमेदिनी सुगंधि।
द्रव्यविशेषः इतिहेम चंद्रः ॥
चौरिका स्त्री चौर्यं इत्यमरः
चौरी स्त्री चौर्यं इतिशब्दरत्नावली
चौर्यं क्ली [illegible]धर्मः चौरी इति
चुरी इति [illegible]षा तत्पर्यायः।
स्तैन्यं २ स्तेयं ३ चौरिका ४॥
इत्यमरचौरी ५ इति
शब्द रत्ना वली चौरिका ६


इत्यमरटीका ॥ (तिः
चौलकर्म्म क्ली चूडाकर्म्मेइतिस्म
चौलुक्यः पुं राजर्षिभेदः इति
हेम चंद्रः ॥
चौक्षः त्रि मनोज्ञे इति ॥
महा भारते ॥
च्युकहासे सहने इति ॥
कविकल्पद्रुमः ॥
च्युङ गतौ इतिकविकल्पद्रुमः
च्युतइरक्षरणे इतिकविकल्पद्रुमः
च्युतं त्रि क्षरितं यथा पिवंते
त्वन्मुखांभोज च्युतंहारावलीसवं
इति श्रीभागवते ॥
च्युतिः स्त्री भगं इतिहेमचंद्रः
गुदद्वारं इति शब्दरत्नावली ॥
क्षरणं यथा कुर्य्यां हरस्यापि ॥
पिनाकपाणेर्धैर्य्यच्युतिं केमम
धन्विनोऽन्ये इतिकुमारसंभवः।
च्युपः पुं मुखं इति सिद्धांत ॥
कौमुदी उणादि वृत्तिः ॥
च्युषकहानौ इतिकविकल्पद्रुमः
च्योतं क्ली श्च्योते घृतादि ॥
क्षरणं इत्यमर टीका ॥
च्यौत्नः त्रि गमनकर्त्ता श्रेउजः
स्तोज्यः इतिसिद्धांतकौमुदी ॥
उणादि वृत्तिः ॥





२०८
शब्दकल्पद्रुम





शब्दकल्पद्रुम



